The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE . P . H . KARANI
Date 17 · 10 · 2008

Shreemunt Bhagwunt Pooran.

Vol. 1.

२

3.
1981

47535
१८

श्रीमद्भागवते प्रथमस्कधमारभ्य सप्तमस्कंधपर्यंताः स्कधाः १

ZZ a 6

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

5
1981

अथश्रीमद्भागवतेप्रथमस्कंधःप्रारभ्यते॥

भा० श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीकृष्णनाथचरणावहमीडे ओंनमः श्रीपरमहंसास्वादितच्चर प्र०
१ णकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामचंद्राय निर्विघ्नमस्तु वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्ष
सि यस्यास्तेहृदयेसंविचंनृसिंहमहंभजे १ विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यंपरंधामजगद्धामनमा
मितत् २ माधवोमाधवावीशौसर्वसिद्धिविधायिनौ वंदेपरस्परात्मानौपरस्परनुतिप्रियौ ३ संप्रदायानुरोधेनपौर्वा
पर्यानुसारतः श्रीभागवतभावार्थदीपिकेयंप्रतन्यते ४ क्वाहंमंदमतिःक्वेदंमंथनंक्षीरवारिधेः किंतत्रपरमाणुर्वैय
त्रमज्जतिमंदरः ५ मूकंकरोतिवाचालंपंगुंलंघयतेगिरिं यत्कृपातमहंवंदेपरमानंदमाधवं ६ श्रीमद्भागवता
भिधःसुरतरुस्तारांकुरःसज्जनिःस्कंधैर्द्वादशभिस्ततःप्रविलसद्भक्त्यालवालोदयः द्वात्रिंशत्त्रिशतंयस्यविलसच्छाखाः
सहस्राण्यलंपर्णान्यष्टदशेष्टदोतिसुलभोवर्वर्तिसर्वोपरि ८ श्रीपरमानंदायनमः अथनानापुराणशास्त्रप्र
बंधैश्चित्तप्रशांतिमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणानुवर्णनप्रधानंभागवतशास्त्रंप्रा
रिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणमंगलमाचरति जन्माद्यस्येति परंपरमेश्वरंधीमहि इतिध्या
यतेर्लिङ् छांदसंध्यायेमेत्यर्थः बहुवचनंचशिष्याभिप्रायं तमेवस्वरूपतटस्थलक्षणाभ्यामुपलक्षयति तत्रस्व
रूपलक्षणंसत्यमिति सत्यत्वेहेतुः यत्रयस्मिन्त्रयाणांमायागुणानांतमोरजःसत्वानांसर्गोभूतेंद्रियदेवतारूपः
अमृषासत्यः यत्सत्तयामिथ्यासर्गोपिसत्यवत्प्रतीयतेतंपरंसत्यमित्यर्थः अत्रदृष्टांतः तेजोवारिमृदांयथाविनिम
योव्यत्ययः अन्यस्मिन्नन्यावभासः सयथाधिष्ठानसत्तयासद्वत्प्रतीयतइत्यर्थः अत्रदृष्टांतः तत्रतेजसिवारिबुद्धिः
मरीचितोयेप्रसिद्धामृदिकाचादौवारिबुद्धिरित्यादियथायथमूह्यं यद्वातस्यैवपरमार्थसत्यत्वप्रतिपादनायतदित १

9
1981

रस्यमिथ्यात्वमुक्तं यत्रमृषैवायंत्रिसर्गोनवस्तुतःसन्निति यत्रेत्यनेनप्रतीतंउपाधिसंबंधंवारयति स्वेनैवधाम्नास
दानिरस्तकुहकंकपटंयस्मिन्तं तटस्थलक्षणमाह जन्मादीति अस्यविश्वस्यजन्मस्थितिभंगंयतोभवतितंधीम
हिइति तत्रहेतुः अन्वयादितरतश्चार्थेषुकार्येषुपरमेश्वरस्यसद्रूपेणान्वयात् कार्याभावेपिअस्वरूपेणावस्थानात्
इतरतः अकार्येभ्यश्चखपुष्पादिभ्यस्तद्व्यतिरेकात् यद्वाअन्वयशब्देनानुवृत्तिरितरशब्देनव्यावृत्तिः अनुवृत्तत्वात्
सद्रूपंब्रह्मकारणं मृत्सुवर्णादिवत्व्यावृत्तत्वाद्विश्वंकार्यंघटकुंडलादिवदित्यर्थः यद्वासावयवत्वादन्वयव्यतिरेकाभ्यां
यदस्यजन्मादितद्यतोभवतीतिसंबंधः तथाचश्रुतिः यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभि
संविशंतीत्याद्याः स्मृतिश्च यतःसर्वाणिभूतानिभवंत्यादियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षयेइत्याद्याः
तर्हिकिंप्रधानंजगत्कारणत्वात्ध्येयमभिप्रेतं नेत्याह अभिज्ञोयस्तंसऐक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृ
जतेतिश्रुतेः ईक्षतेर्नाशब्दमितिन्यायाच्च तर्हिजीवःस्यात् नेत्याह स्वराट्स्वेनैवराजतेयःतंस्वतःसिद्धज्ञानमित्य
र्थः तर्हिकिंब्रह्मा हिरण्यगर्भःसमवर्ततताग्रेभूतस्यजातःपतिरेकआसीदित्यादिश्रुतेः नेत्याह तेनेत्यादिकवयेब्र
ह्मणेपिब्रह्मवेदंयःतेनेप्रकाशितवान् योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंदेवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वैशरणमहंप्रपद्यइतिश्रुतेः ननुब्रह्मणोअन्यतोवेदाध्ययनमप्रसिद्धं सत्यं तत्तुहृदामनसैवतेनेअनेन
बुद्धिवृत्तिप्रवर्तकत्वेनगायत्र्यर्थोदर्शितः वक्ष्यतिहि प्रचोदितायेनपुरासरस्वतीवितन्वताजस्यसतींस्मृतिंहृदि
स्वलक्षणाप्रादुरभूत्किलास्यतः समेऋषीणामधिपःप्रसीदतामिति ननुब्रह्माचस्वयमेवसुप्तप्रबुद्धन्यायेनवेदमु

पलभ्यतां नेत्याह यद्यस्मिन्ब्रह्मणिसूरयोपिमुह्यंति तस्मात्ब्रह्मणोपिपराधीनज्ञानत्वात्स्वतःसिद्धज्ञानपरमेश्वर
एवजगत्कारणंअतएवसत्यःअसतःसत्ताप्रदत्वाच्चपरमार्थसत्यःसर्वज्ञत्वेनचनिरस्तकुहकः तंधीमहीतिगायत्र्या
प्रारंभेणचगायत्र्याख्यंब्रह्मविद्यारूपमेतत्पुराणंदर्शितंयथोक्तंमत्स्यपुराणे पुराणदानप्रस्तावे यत्राधिकृत्यगा
यत्रींवर्ण्यतेधर्मविस्तरः वृत्रासुरवधोपेतंतद्भागवतमिष्यते लिखित्वातच्चयोर्दद्याद्धेमसिंहसमन्वितं प्रोष्ठप-

श्रीगणेशायनमः जन्माद्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञःस्वराट्तेनेब्रह्महृदाय
आदिकवयेमुह्यंतियत्सूरयः तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधा
म्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि १ श्रीरामजयरामजयजयराम

द्यांपौर्णमास्यांसयातिपरमंपदं अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितंइति पुराणांतरेच ग्रंथोष्टादशसाहस्रोद्वा
दशस्कंदसंमितः हयग्रीवब्रह्मविद्यायत्रवृत्रवधस्तथा गायत्र्याचसमारंभस्तद्वैभागवतंविदुः पद्मपुराणेअं
बरीषंप्रतिगौतमवचनं अंबरीषशुकप्रोक्तंनित्यंभागवतंशृणु पठस्वस्वमुखेनापियदीच्छसिभवक्षयमिति
अतएवभागवतंनामान्यदित्यापिनाशंकनीयं १ ७ ७ ७ ७ २

11/1981

इदानींश्रोतप्रवर्तनायश्रीभागवतस्यकांडत्रयविषयेभ्यःवेदेभ्यःसर्वशास्त्रेभ्यःश्रैष्ठ्यंदर्शयति धर्मइतिअत्रश्री
मत्सुंदरेभागवतेपरमोधर्मोनिरूप्यते परमत्वेहेतुःप्रकर्षेणउज्झितंकैतवंफलाभिसंधिलक्षणंकपटंयस्मिन्सः
प्रशब्देनमोक्षाभिसंधिर्निरस्तःकेवलमीश्वराराधनलक्षणोधर्मोनिरूप्यतइति अधिकारितोपिधर्मस्यपरमत्वमा
ह निर्मत्सराणांपरोत्कर्षासहनंमत्सरःतद्रहितानांसतांभूतानुकंपिनां एवंकर्मकांडविषयेभ्यःशास्त्रेभ्यःश्रैष्ठ्य
मुक्तं ज्ञानकांडविषयेभ्योपिश्रैष्ठ्यमाह वेद्यमाह वास्तवंपरमार्थभूतंवस्तुवेद्यंनतुवैशेषिकादीनामिवद्रव्यगु
णादिरूपं यद्वावास्तवशब्देनवस्तुनोंशोजीवःवस्तुनःशक्तिर्मायाचवस्तुनःकार्यंजगच्चतत्सर्वंवस्त्वेवनततःपृथ

धर्मःप्रोज्झितकैतवोत्रपरमोनिर्मत्सराणांसतांवेद्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनं
श्रीमद्भागवतेमहामुनिकृतेकिंवापरैरीश्वरःसद्योहृद्यवरुध्यतेत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात् २

गिति वेद्यंअप्रयत्नेनैवज्ञातुंशक्यंततःकिमतआह शिवदंपरमसुखदं किंच अध्यात्मिकादितापत्रयोन्मूलनंच
अनेनज्ञानकांडविषयेभ्यःश्रैष्ठ्यंदर्शितं कर्तृतोपिश्रैष्ठ्यमाह महामुनिःश्रीनारायणःतेनप्रथमंसंक्षेपतःकृतेदेव
ताकांडतोश्रैष्ठ्यमाह परैःशास्त्रैःतदुक्तसाधनैर्वाईश्वरोहृदिकिंवासद्यएवावरुध्यतेस्थिरीक्रियते वाशब्दःकटाक्षेकिंतु
विलंबेनकथंचिदेव अत्रतुशुश्रूषुभिःश्रोतुमिच्छद्भिरेवतत्क्षणादेवावरुध्यते ननुइदमेवतर्हिकिमितिसर्वेनशृण्वंति
तत्राह कृतिभिरिति श्रवणेच्छापुण्यैर्विनानोत्पद्यतइत्यर्थः तस्मादत्रकांडत्रयार्थस्यापियथावत्प्रतिपादनादिदमेव
सर्वशास्त्रेभ्यःश्रेष्ठंततोनित्यमेतदेवश्रोतव्यमितिभावः २

भा० इदानींतुनकेवलंसर्वशास्त्रेभ्यः श्रेष्ठत्वादस्यश्रवणंविधीयते अपितुसर्वशास्त्रफलरूपमिदं अतःपरमादरेणसेव्यमि= प्र०
३ त्याह निगमेति हेभावुकाः हेपुण्यपुरुषाः भागवतंमुहुर्वारंवारंपिबत कथंभूतंनिगमकल्पतरोर्गलितंफलं निगमोवेदः
सएवकल्पतरुःसर्वपुरुषार्थोपायत्वात् तस्यफलमितिभागवतंनाम तत्रवैकुंठगतंनारदेनानीयमह्यंदत्तं मयाचशुक
स्यमुखेनिहितं तच्चतन्मुखात्भुविगलितंशिष्यप्रशिष्यादिरूपपल्लवपरंपरयाशनैरखंडमेवावतीर्णनतूच्चनिपातेनस्फु
टितमित्यर्थः एतच्चभविष्यदपिभूतवन्निर्दिष्टं अनागताख्यानेनैवास्यशास्त्रस्यप्रवृत्तेः अतएवामृतरूपेणद्रवेणसंयुतं
लोकेहिशुकमुखस्पृष्टंफलममृतमिवस्वादुर्भवतीतिप्रसिद्धं अत्रशुकोमुनिः अमृतंपरमानंदः सएवद्रवोरसः रसोवैसः
रसंह्येवायंलब्ध्वानंदीभवतीति श्रुतेः अतःहेरसिकाःहेरसज्ञाः तत्रापिभावुकाः हेरसविशेषभावनाचतुराः अहोभु

निगमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ३

विगलितमित्यलभ्यलाभोक्तिः इदंभागवतंनामफलंमुहुःपिबत ननुत्वगादिकंविहायफलाद्रसःपीयतेकथंफलमेवपा
तव्यंतत्राह रसंरसरूपंअतस्त्वग्यष्ट्यादेर्हेयस्याभावात्फलमेवकृत्स्नंपिबत अत्रचरसतादात्म्यविवक्षयारसवत्त्वस्या
विवक्षितत्वाद्गुणवचनेपिरसशब्देमतुपःप्राप्त्यभावात्तेनविनैवरसंफलमितिसामानाधिकरण्यं तत्रफलमित्युक्तेपानासं
भवोहेयांशश्चप्रसक्तिश्चभवेदितितन्निवृत्त्यर्थंरसमित्युक्तं रसमित्युक्तेपिगलितस्यरसस्यपातुमशक्यत्वात्फलमित्युक्तंइति
द्रष्टव्यं नचभागवतामृतपानंमोक्षेपित्याज्यमित्याहुः आलयंलयोमोक्षः अभिविधावाकारः लयमभिव्याप्यनहीदंस्वर्गादि
सुखवत् मुक्तैरुपेक्ष्यतेकिंतुसेव्यतएववक्ष्यतिहि आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहेतुकींभक्तिमित्थंभूतगु ३
णोहरिरिति ३

13/1981

तदेवमनेनश्लोकत्रयेणविशिष्टदेवतानुस्मरपूर्वकंप्रारिप्सितस्यशास्त्रस्यविषयप्रयोजनादिवैशिष्ट्येनसुखसेव्यत्वेन
श्रोतॄनभिमुखीकृत्यशास्त्रमारभते नैमिषेति ब्रह्मणोवशिष्टस्यचक्रस्यनेमिःशीर्यतेकुंठीभवतियत्रतन्नेमिशंनेमि
षमेवनैमिशं तथाचवायवीये एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते यत्रास्यशीर्यतेनेमिःसदेशःस्तपसःशुभः
इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोमयं प्रणिपत्यमहादेवंविससर्जपितामहः तेपिहृष्टतराविप्राःप्रणम्यजगतांप्रभुं
प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत तद्वनंतेनविख्यातंनैमिषंमुनिपूजितमिति नैमिषेइतिपाठेवराहपुराणोक्तंद्र
ष्टव्यं तथाहि गौरमुखमृषिंप्रतिभगवद्वाक्यं एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा उवाचनिमिषेणेदंनिहतंदानवं

नैमिषेनिमिषक्षेत्रेऋषयःशौनकादयः सत्रंस्वर्गायलोकायसहस्रसममासत ४
तएकदातुमुनयःप्रातर्हुतहुताग्नयः सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ५

बलं अरण्येस्मिंस्ततस्त्वेवंनैमिष्यारण्यसंज्ञितं भविष्यतियथार्थंवैब्राह्मणानांविशेषकमिति अनिमिषःश्रीविष्णुः
अलुप्तदृष्टित्वात्तस्यक्षेत्रे तथाचात्रैवशौनकादिवचनं क्षेत्रेस्मिन्वैष्णवेवयमिति स्वर्गायतइतिस्वर्गायोहरिः सए
वलोकःभक्तानांनिवासस्थानंतस्मैतत्प्राप्तयेइत्यर्थः सहस्रंसमाःसंवत्सराअनुष्ठानकालोयस्यतत्सत्रसंज्ञकंक
र्मोद्दिश्यआसतउपविविशुः यद्वाआसतअकुर्वतेत्यर्थः आलभतनिर्वपतिउपायंतीत्यादिवत् प्रत्ययोच्चार
णमात्रा त्वेनआसनधात्वर्थस्याविवक्षितत्वात् ४ प्रातःकालेहुताएवहुताःअग्नयोयैस्तेअनेननित्य
नैमित्तिकहोमसाकल्यंदर्शितं इदंवक्ष्यमाणमादरात्पप्रच्छुः ५ कृष्ण ७ ९

विविदिषितानर्थान्प्रष्टुंसूतस्यसर्वशास्त्रज्ञानातिशयमाहुः त्वयेति त्रिभिः श्लोकैः इतिहासोमहाभारतादिः तत्सहि
तानिनकेवलमधीतानिअपितुआख्यातान्यपिव्याख्या तानिचउतअपियानिधर्मशास्त्राणितान्यपि ६ किंच या
नीत्यादि विदांविदुषांमध्येश्रेष्ठोव्यासोयानिवेद परावरेसगुणनिर्गुणेब्रह्मणिविदंतीतितथा ७ वेत्थजानासिसौम्य
हेसाधो तेषामनुग्रहात् नतुतोज्ञानेहेतुमाहब्रूयुरिति स्निग्धस्यप्रेमवतः उतएवरहस्यमपिब्रूयुरेव ८ अंजसा
ग्रंथार्जवेन एकांततः श्रेयः अव्यभिचारिश्रेयःसाधनं अन्येपिबहुनाकालेनबहुशास्त्रश्रवणादिभिर्विनिश्चितवंतः तं

ऋषयऊचुः त्वयाखलुपुराणानिसेतिहासानिचानघ आख्यातान्यप्यधीतानिधर्मशास्त्राणियान्युत ६
यानिवेदविदांश्रेष्ठोभगवान्बादरायणः अन्येचमुनयःसूतपरावरविदोविदुः ७ वेत्थत्वंसौम्यतत्स
र्वंतत्वतस्तदनुग्रहात् ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ८ तत्रतत्रांजसायुष्मन्भवता
यद्विनिश्चितं पुंसामेकांततःश्रेयस्तन्नःशासितुमर्हसि ९ प्रायेणाल्पायुषःसाधोकलावस्मिन्युगे
जनाः मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः १० भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः अतः
साधोत्रयत्सारंसमुद्धृत्यमनीषया ११ ब्रूहिभद्रायभूतानांयेनात्मासुप्रसीदति ११ श्रीराम

तुनेत्याहुः प्रायेणेति हेसाधोसौम्य अस्मिन्युगेकलौ अल्पायुषोजनाः तत्रापिमंदाः तत्रापिसुमंदमतयः तत्रापिमंदभा
ग्याः विघ्नाकुलाः तत्रापिउपद्रुतारोगादिभिः १० नचबहुशास्त्रश्रवणेपितावतैवफलसिद्धिरित्याहुः भूरीणिकर्मा
णि अनुष्ठेयानियेषुतानि समुद्धृत्ययथावद्धृत्येनउद्धृतवचनेनआत्माबुद्धिःसुप्रसीदतिसम्यगुपशाम्यति ११ ४

15
1381

प्रश्नांतरंसूतजानासीतिपंचभिः भद्रंतेइत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्वतांसत्वशब्देनसत्वमूर्ति
र्भगवान्सउपास्यतयाविद्यतइतिसात्वंता भक्ताः स्वार्थेअण् राक्षसवायसादिवत् तस्यचाश्रवणमार्षंतद्वंसात्वतामिति
भवंतितेषांपतिः पालकः यस्यार्थविशेषस्यचिकीर्षयावसुदेवस्यभार्यायांदेवक्यांजातइति १२ अंगहेसूततन्नोअ
नुवर्णयितुमर्हसि सामान्यतस्तावत्यस्यावतारोभूतानांक्षेमायपालनायभवायसमृद्ध्ये तत्प्रभावमनुवर्णयत
स्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वंति आपन्नइति त्रिभिः संसृतिमापन्नःप्राप्तः विवशोपिततः संसृतेः अत्रहेतुः यच

सूतजानासिभद्रंतेभगवान्सात्वतांपतिः देवक्यांवसुदेवस्यजातोयस्यचिकीर्षया १२ तन्नःशुश्रूषमाणा
नांअर्हस्यंगानुवर्णितुं यस्यावतारोभूतानांक्षेमायचभवायच १३ आपन्नःसंसृतिंघोरांयन्नामविवशो
गृणन् ततःसद्योविमुच्येतयद्बिभेतिस्वयंभयं १४ यत्पादसंश्रयाःसूतमुनयःप्रशमायनाः सद्यःपुनं
त्युपस्पृष्टाःस्वर्धुन्यापोनुसेवया १५ कोवाभगवतस्तस्यपुण्यश्लोकेड्यकर्मणः शुद्धिकामोनशृणुयाद्यशः
कलिमलापहं १६ तस्यकर्माण्युदाराणिपरिगीतानिसूरिभिः ब्रूहिनःश्रद्दधानानांलीलयादधतःकलाः १७

तोनाम्नोभयमपिस्वयंबिभेति १४ किंच यस्यपादौसंश्रयोयेषांअतएवप्रशमोअयनंवर्त्मआश्रयोवाएषांतेमुनयः
प्रशमायनाः उपस्पृष्टाःसंनिधिमात्रेणसेविताःसद्यःपुनंतिस्वर्धुनीगंगातस्याःआपःतत्पादान्निःसृताः नतुतत्रैवतिष्ठं
तिअतस्तत्संबंधेनपुनंत्योपिअनुसेवयापुनंतितेतःसद्यइतिमुनीनामुत्कर्षोक्तिः १५ पुण्यश्लोकैरीड्यानिस्तव्या
निकर्माणियस्यतस्ययशः कलिमलापहंसंसारदुःखोपशमनं १६ प्रश्नांतरंतस्येति उदाराणिमहांतिविश्वसृष्ट्या
दीनिसूरिभिर्नारदादिभिः कलाः ब्रह्मरुद्रादिमूर्तीः १७ वासुदेव हरे कृष्ण ७

अथेति प्रश्नांतरे अवतारकथाः स्थित्यर्थमेव तत्तदवसरे येमत्स्याद्यवताराः तदाश्रयाः कथाः स्वैरंलीलाः कुर्वतः श्रीकृष्णाव
तारप्रयोजनेनैव तच्चरितं यशोपि ज्ञात एवज्ञातव्यं १८ एवमौत्सुक्येन पुनरपि तच्चरितान्येवश्रोतुमिच्छंतः तत्रात्मनस्तृष्णा
वमावेदयंति योगमायादिषु व्यस्मास्मः उद्गच्छतितमोयस्मात्सउत्तमाः तथाभूतः श्लोकोयशोयस्यतस्यविक्रमेतु विशेषे
णनतृष्यामः अलमितिनमन्यामहे तत्रहेतुः यद्विक्रमं शृण्वतां यद्वा अन्येतृप्यंतु नामवयंतुनेतितुशब्दस्यान्वयः अयम
र्थः त्रेधात्यलंबुद्धिर्भवति उदरादिभरणेन वारसाज्ञानेन वा स्वादुविशेषाभावाद्वा तत्रशृण्वतां इत्यनेन श्रोत्रस्याकाशत्वात्न

अथाख्याहि हरेर्धीमन् अवतारकथाः शुभाः लीलाविदधतः स्वैरमीश्वरस्यात्ममायया १८ वयंतुनवितृप्या
मउत्तमश्लोकविक्रमे यच्छृण्वतां रसज्ञानां स्वादुस्वादुपदेपदे १९ कृतवान्किलवीर्याणि सहरामेण केशवः
अतिमर्त्यानि भगवान्गूढः कपटमानवः २० कलिमागतमाज्ञाय क्षेत्रेस्मिन्वैष्णवेवयं आसीनादीर्घसत्रेण
कथायां सक्षणाहरेः २१ त्वन्नः संदर्शितोधात्रा दुस्तरंनिस्तितीर्षतां कलिंसत्वहरंपुंसां कर्णधारइवार्णवं २२

भरणमित्युक्तं रसज्ञानामित्यनेनवाज्ञानतः पशुवत्तृप्तिर्निराकृता इक्षुभक्षणवद्रसांतराभावेनतृप्तिं निराकरोति पदेपदे
प्रतिलक्षणं स्वादुतोपिस्वादु १९ अतः श्रीकृष्णचरित्राणि कथयेत्याशयेनाहुः कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रांता
नि गोवर्द्धनोद्धारणादीनि मनुष्येष्वसंभाविनीत्यर्थः २० ननु याजनाध्ययनादिव्यग्राणां कुतएतच्छ्रवणावकाशः स्यादतआ
हुः कलिमागतं ज्ञात्वातद्भिया विष्णुपदं गंतुकामाः दीर्घसत्रेणनिमित्तेनात्रासीनाः हरेः कथायां सक्षणाः लब्धावसराः २१
अस्मिन्नवसमये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनंदंति त्वमिति कलिंनिस्तर्तुमिच्छतां अर्णवंतितीर्षतां कर्णधारोनावि
कइव २२ ५

17
1981

पुनः प्रश्नांतरं ब्रूहीति धर्मस्य वर्मणि कवचवद्रक्षके स्वांकाष्ठां मर्यादां स्वरूपमित्यर्थः अस्य चोत्तरं कृष्णेस्वधामोपगतेध
र्मज्ञानादिभिः सहेत्ययंश्लोकः २३ इतिप्रथमे टीकायां प्रथमोध्यायः तदेवं प्रथमोध्याये षट्प्रश्नामुनिभिः कृताः
द्वितीये तदुत्तरं सूतश्चतुर्णामाह तेष्वथ १ विप्राणामिति एवं भूतैः सम्यक्हृष्टो रोमहर्षणस्य पुत्रः उग्रश्रवाः तेषांवचः
प्रतिपूज्य सत्कृत्य वक्तुमुपक्रांतवान् १ प्रवचनस्योपक्रमे गुरुदेवतानमस्कार इति तमाह त्रिभिस्तत्र स्वगुरोः शुकस्यैश्वर्यं
तच्चरितेनैव द्योतयन्नाह यंप्रव्रजंतमिति यंप्रव्रजंतं संन्यस्य गच्छंतं अनुपेतं मासुपनयस्वेत्युपनयनार्थमनुपपन्नं य

ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि स्वांकाष्ठामधुनोपेते धर्मः कंशरणंगतः २३ इति श्रीभागवते पुरा
णे प्रथमस्कंधे नैमिषेयोपाख्याने ऋषिप्रश्नः प्रथमोध्यायः १ इतिसंप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः
प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उवाच यंप्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकात
र आजुहाव पुत्रेति तन्मयतयातरवोभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोस्मि २ श्रीरामजयराम

द्वाकेनाप्यनुपेतं अननुगतमेकाकिनमित्यर्थः तत्रहेतुः अपेतकृत्यं कृत्यशून्यं कर्ममार्गे अप्रवर्तमानं नैष्ठिकत्वात्
द्वैपायनो व्यासः विरहात्कातरोभीतः पुत्र इति प्लुतेनाजुहाव आहूतवान् दूराद्धाने प्लुतेसत्यपि संधिरार्षः तदातन्मय
तया शुकरूपतया तरवोभिनेदुः प्रत्युत्तरमुक्तवंतः पितुः स्नेहानुबंधनपरिहारायवृक्षरूपेणोत्तरं दत्तवानित्यर्थः
तं मुनिमानतोस्मि तन्मयत्वोपपादनाय विशेषणं सर्वभूतानां हृन्मनः अयते योगबलेन प्रविशतीति सर्वभूतहृदयस्तं २

तत्कृपालुतांदर्शयन्नाह यइति अंधंगाढतमःसंसाराख्यमतितर्तुमिच्छतांपुराणानांमध्येगुह्यंगोप्यंतत्रहेतुत्वेनचत्वारि
विशेषणानिस्वःनिजःअसाधारणःअनुभवःप्रभावोयस्यतत्स्वानुभावं अखिलश्रुतीनांसारं एकमद्वितीयंअनुपम
मित्यर्थः आत्मानंकार्यकारणसंघातमधिकृत्यवर्तमानमात्मतत्वमध्यात्मंतस्यदीपंसाक्षात्प्रकाशकं उपयामिशरणंव्रजा
मि ३ जयत्यनेनसंसारमितिजयोग्रंथःतमुदीरयेदिति स्वयंयथोदीरयन् अन्यान्पौराणिकान् उपशिक्षयति ४ तेषांव
चः प्रतिपूज्येतियदुक्तंतत्प्रतिपूजनंकरोति हेमुनयःसाधुयथाभवतितदहंपृष्टःयतोलोकानांमंगलमेतत् यतःकृष्ण

यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतांमोतंधं संसारिणांकरुणयाहपुराणगुह्यं तं
व्यासस्रुनुमुपयामिगुरुंमुनीनां ३ नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरये
त् ४ सूतउवाच मुनयःसाधुपृष्टोहंभवद्भिर्लोकमंगलं यत्कृतःकृष्णसंप्रश्नोयेनात्मासुप्रसीदति ५
सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे अहैतुक्यप्रतिहताययात्मासंप्रसीदति ६ वासुदेवेभगवतिभक्ति
योगःप्रयोजितः जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकं ७ राम ७ ७

विषयःसंप्रश्नःकृतः ५ सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापिकृष्णेपर्यवसानादेवमुक्तं तत्रयत्प्रथमंपृष्टंसारशास्त्रसारमेकां
तिकंश्रेयोब्रूहीतितत्रोत्तरं सवैपुंसामिति अयमर्थः धर्मोद्विविधःप्रवृत्तिलक्षणोनिवृत्तिलक्षणश्चतत्रयःस्वर्गाद्यर्थःप्रवृत्ति
लक्षणःसोपरःयतस्तुधर्मात्श्रवणादरादिलक्षणाभक्तिःभवतिसोपरोधर्मःसएवैकांतिकश्रेयइति कथंभूता अहैतुकीहेतुः
फलानुसंधानंतद्रहिता अप्रतिहताविघ्नैरनभिभूता ६ ननुनमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति यज्ञेनदाने
नतपसानाशकेनेत्यादिश्रुतिभ्योधर्मस्यज्ञानांगत्वंप्रसिद्धंतत्कुतोभक्तिहेतुत्वमुच्यते सत्य तत्तुभक्तिद्वारेणेत्याहवासुदेव
इति अहेतुकंशुष्कतर्काद्यगोचरंऔपनिषदमित्यर्थः ७ राम कृष्ण वासुदेव हरे नारायणहरे श्री ७ ६

1g
1981

व्यतिरेकमाह धर्मइति प्रसिद्धः सयदिविश्वक्सेनस्यकथासुरतिंनोत्पादयेत्तर्हिस्वनुष्ठितोपिसन्अयंश्रमोज्ञेयः ननुमोक्षा
र्थस्यापिधर्मस्यश्रमत्वमस्त्येव अतआहकेवलंविफलःश्रमइत्यर्थः नन्वस्तितत्रापिस्वर्गादिफलमित्याशंकांएवकारेणनिराक
रोति क्षयिष्णुत्वान्नतत्फलमित्यर्थः नन्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिश्रुतेःनतत्फलस्यक्षयिष्णुत्वमित्या
शंक्यहिशब्देनसाधयति तद्यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतइतितर्कानुगृहीतयाश्रु
त्याक्षयप्रतिपादनात् ८ तदेवंहरिभक्तिद्वारातदितरवैराग्यात्मज्ञानपर्यंतःपरोधर्मइत्युक्तं अन्येतुमन्यंतेधर्मस्यार्थःफ
लंतस्यचकामःफलंतस्यचेंद्रियप्रीतितत्प्रीतेश्चपुनरपिधर्मार्थादिपरंपरेतियथाहुः धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यत

धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं ८ धर्मस्यह्यापवर्गस्यनार्थोर्था
योपकल्पते नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः ९ कामस्यनेंद्रियप्रीतिर्लाभोजीवेतयावता जीवस्यत
त्वजिज्ञासानार्थोयश्चेहकर्मभिः १० वदंतितत्तत्वविदस्तत्वंयज्ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते ११

इत्यादितन्निराकरोति धर्मस्येतिद्वाभ्यां अपवर्गस्यउक्तन्यायेनापवर्गपर्यंतस्यअर्थायफलत्वायअर्थोनोपकल्पतेयोग्योनभ
वति तथार्थस्याप्येवंभूतधर्माव्यभिचारिणःकामोलाभायफलत्वायनहिस्मृतोमुनिभिः ९ काम्यस्यविषयभोगस्यइंद्रियप्रीति
र्लाभःफलंनभवतिकिंतुयावज्जीवेततावानेवकाम्यस्यलाभःजीवनपर्याप्तएवकामःसेव्यतइत्यर्थः जीवस्यजीवनस्यचपुनः
कर्मानुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धःसोऽर्थोनभवतिकिंतुतत्वजिज्ञासैवेति १० ननुचतत्वजिज्ञासानामधर्मजिज्ञासैवधर्मएव
हितत्वमितिकेचित्तत्राह तत्वविदस्तुतदेवतत्वंवदंति किंतत्ज्ञानंनाम अद्वयमिति क्षणिकविज्ञानपक्षंव्यावर्तयति ननुतत्वविदो
पिविगीतवचनाएव नैवं तस्यैवतत्वस्यनामांतरैरभिधानादित्याह औपनिषदैर्ब्रह्मेतिहिरण्यगर्भैःपरमात्मेतिसात्वतैर्भगवानि
त्यभिधीयते ११

भा० ७ तच्चतत्वंसपरिकरयाभक्त्यैवआप्यतइत्याह तच्चेत्यन्वयः ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षंतच्चतत्वंआत्मनिक्षेत्रज्ञेपश्यंति प्र०
किंतत्‌आत्मानंपरमात्मानंश्रुतेनवेदांतादिश्रवणेनगृहीतयाप्राप्तयेतिभक्तेर्दार्ढ्यमुक्तं १२ धर्मस्यफलंमुक्तिःनार्थकामा
दिकमितिममर्थमुपपाद्योपसंहरति अतइति हेद्विजश्रेष्ठाः हरितोषणंहरेराराधनंसंसिद्धिःफलं १३ यस्माच्चभक्तिविही
नोधर्मःकेवलंश्रमएवतस्माद्भक्तिप्रधानोधर्मोनुष्ठेयइत्याह तस्मादिति एकेनएकाग्रेणमनसा १४ भक्तिविहीनोधर्मः
केवलंश्रमइतिप्रपंचितं इदानींतुभक्तेर्मुक्तिफलत्वंप्रपंचयति यदिति यस्यअनुध्याअनुध्यानं सैवअसिःखड्गःतेनयु

तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया १२ अतःपुंभिर्द्विजश्रेष्ठा
वर्णाश्रमविभागशः स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं १३ तस्मादेकेनमनसाभगवान्सात्वतांपतिः श्रो
तव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा १४ यदनुध्यासिनायुक्ताःकर्मग्रंथिनिबंधनं छिंदंतिकोविदास्तस्यको
नुकुर्यात्कथारतिं १५ शुश्रूषोःश्रद्दधानस्यवासुदेवकथारुचिः स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवया १६
शृण्वतांस्वकथांकृष्णःपुण्यश्रवणकीर्तनः हृद्यंतस्थोह्यभद्राणिविधुनोतिसुहृत्सतां १७ रामकृष्णवासु

क्ताःविवेकिनःग्रंथिमहंकारंनिबध्नातियत्कर्मतत्छिंदंति तस्यकथायांरतिंकोनुकुर्यात्‌ १५ ननुसत्यमेवंकर्मनिर्मू
लनीहरिकथारतिस्तथापितस्यांरुचिनोत्पद्यते किंकुर्मस्तत्राह शुश्रूषोरिति पुण्यतीर्थनिषेवणादिभिर्निःपापस्यमहत्से
वास्यात्‌ तयाचतद्धर्मश्रद्धातनःश्रवणेच्छार्थः १६ ततश्चशृण्वतामिति पुण्यश्रवणकीर्तनेयस्यसःसतांसुहृत्‌हि
तकारीहृदयान्यभद्राणिकामादिवासनाःतानिअंतस्थःहृदयस्थःसन्‌ १७ श्री राम जयराम ७

भा० ८ उपाधिवैशिष्ट्येनफलवैशिष्ट्येसदृष्टांतमाह पार्थिवात्प्रवृत्तिप्रकाशरहिताद्दारुणःकाष्ठात्सकाशात्धूमःप्रवृत्तिस्वभाव प्र०
स्त्रयीमयःवेदोक्तकर्मप्रचुरःइषत्कर्मप्रत्यासत्तेस्तस्मादग्निस्त्रयीमःसाक्षात्कर्मसाधनत्वात्‌ एवंतमसःसकाशाद्रजोब्रह्म
दर्शनंब्रह्मप्रकाशकंतुशब्देनलयात्मकात्तमसःसकाशाद्रजसःसोपाधिकज्ञानहेतुत्वेनकिंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं
ननुसर्वथातत्प्रकाशात्मकत्वंविक्षेपकत्वात्‌ यत्सत्वंतत्साक्षाद्ब्रह्मदर्शनं अतस्तद्रूपेणोपाधीनांब्रह्मादीनामपियथोत्तरंवै
शिष्ट्यमितिभावः २४ वासुदेवभक्तौपूर्वाचारंप्रमाणयति भेजिरइति अथअतोहेतोःअग्रेपुराविशुद्धसत्वमूर्तिंभगवंतमधो
क्षजं अतोयेतानुवर्तंतेनइहसंसारेक्षेमायकल्पंते २५ नन्वन्यानपिकेचिद्भजंतोदृश्यंतेसत्यं मुमुक्षवस्तुअन्यान्नभजंति

पार्थिवाद्दारुणोधूमस्तस्मादग्निस्त्रयीमयः तमसस्तुरजस्तस्मात्सत्वंयद्ब्रह्मदर्शनं २४ भेजिरेमुनयोथाग्रेभ
गवंतमधोक्षजं विशुद्धसत्वंक्षेमायकल्पंतेयेनुतानिह २५ मुमुक्षवोघोररूपान्हित्वाभूतपतीनथ नाराय
णकलाःशांताभजंतिह्यनसूयवः २६ रजस्तमप्रकृतयःसमशीलाभजंतिवै पितृभूतप्रजेशादीन्श्रियैश्वर्य
प्रजेप्सवः २७ वासुदेवपरावेदावासुदेवपरामखाः वासुदेवपरायोगावासुदेवपराःक्रियाः २८ रामजयराम

किंतुसकामाएवेत्याहमुमुक्षवइतिद्वाभ्यां भूतपतीनितिपितृप्रजेशादीनामुपलक्षणंअनसूयवःदेवतांतरानिंदकाःसंतः २६
रजस्तमसीप्रकृतिस्वभावोयेषांतेअतएवपितृभूतादिभिःसमशीलंयेषांतेश्रियासहऐश्वर्यंप्रजाश्चेप्संतीतितथाते २७
मोक्षप्रदत्वाद्वासुदेवोभजनीयइत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवःपरःतात्पर्यगोचरोयेषांतेननु
वेदामखपरादृश्यंतेइत्याशंक्य तेपितदाराधनार्थत्वात्तत्पराएवेत्युक्तं योगाःयोगशास्त्राणियेषामभ्यासनप्राणायामादि
क्रियापरत्वमाशंक्यतासामपितत्प्राप्त्युपायकत्वात्‌ तत्परत्वमुक्तं २८ श्रीरामजयरामजयजयराम ६ वासुदेव ८

१९८१

ततश्चनष्टप्रायेष्विति सर्वाभद्रनाशस्यज्ञानोत्तरकालत्वात् प्रायग्रहणंभागवतानांभागवतशास्त्रस्यवासेवयानैष्ठिकी
निश्चला विक्षेपकाभावात् १८ रजश्चतमश्चयेतत्प्रभावाभावाः कामादयः एतैरनविद्धमनभिभूतंप्रसीदतिउपशाम्यति
१९ भगवद्भक्तियोगतः प्रसन्नमनसः अतएवमुक्तसंगस्य २० ज्ञानफलमाह भिद्यतइति हृदयमेवग्रंथिः चिज्जडग्रंथरूपो
हंकारः अतएवसर्वसंशयाः असंभावनादिरूपाः कर्माण्यनारब्धफलानिआत्मस्वरूपभूतेईश्वरे दृष्टे एवकारेण ज्ञानानंत

नष्टप्रायेष्वभद्रेषुनित्यंभागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवतिनैष्ठिकी १८ तदारजतमोभावाः का
मलोभादयश्चये चेतएतैरनाविद्धंस्थितंसत्वेप्रसीदति १९ एवंप्रसन्नमनसोभगवद्भक्तियोगतः भगवत्तत्व
विज्ञानंमुक्तसंगस्यजायते २० भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिदृष्टएवात्मनी
श्वरे २१ अतोवैकवयोनित्यंभक्तिंपरमयामुदा वासुदेवेभगवतिकुर्वंत्यात्मप्रसादिनी २२ सत्वंरजस्तम
इतिप्रकृतेर्गुणास्तैर्युक्तः परः पुरुषएकइहास्यधत्ते स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाः श्रेयांसितत्रखलुस

रमेवेतिदर्शयति २१ अत्रसदाचारंदर्शयन्नुपसंहरति अतइति आत्मनः प्रसादिनीमनः शोधनीं वासुदेवेभक्तिंकुर्वंती
तिभजनीयविशेषोदर्शितः २२ तदेवोपपादयितुंब्रह्मादीनांत्रयाणामेकात्मकत्वेपिवासुदेवस्याधिक्यमाह सत्वमिति
इहयद्यप्येकएवपरः पुमान् अस्यविश्वस्यस्थित्यादयेस्थितिसृष्टिप्रलयार्थंसंज्ञाः केवलंभिन्नाधत्ते हरिविरिंचिहरा
इतितथाप्येसंधिरार्षः तत्रतेषांमध्येश्रेयांसिशुभफलानिसत्वतनोर्वासुदेवादेवस्युः २३ श्री ७ ७

23
1981

ज्ञानंज्ञानशास्त्रं ननुतद्ज्ञानपरमेवेत्याशंक्यज्ञानस्यापितत्परत्वमुक्तंतपोश्चज्ञानं धर्मोधर्मशास्त्रंदानव्रतादिविषयः ननु
तत्स्वर्गपरमित्याशंक्यगम्यतइतिगतिः स्वर्गादिफलंसापितदानंदांशरूपत्वात्तत्परैवेत्युक्तं यद्वा वेदाइत्यनेनतन्मूलत्वा
त् सर्वाण्यपिवासुदेवपरायणीत्युक्तं तत्रतुतेषांमखयोगक्रियादीनांनार्थपरत्वान्नतदेकपरत्वमित्याशंक्यमखादीनांत
त्परत्वमित्युक्तमितिद्रष्टव्यं २९ ननुजगतः सर्गप्रवेशनियमनादिविलासयुक्तेवस्तुनिसर्वशास्त्रसमन्वयोदृश्यतेकथं वासुदे
वपरत्वंसर्वस्यतत्राह सएवेतिचतुर्भिः एतैरेवश्लोकैस्तस्यकर्माण्युदाराणिब्रूहीतिप्रश्नस्योत्तरंसदसद्रूपयाकार्यकारणा

वासुदेवपरंज्ञानंवासुदेवपरंतपः वासुदेवपरोधर्मोवासुदेवपरागतिः २९ सएवेदंससर्जाग्रेभगवानात्ममायया
सदसद्रूपयाचासौगुणमय्यागुणोविभुः ३० तयाविलसितेष्वेषुगुणेषुगुणवानिव अंतः प्रविष्टआभातिविज्ञा
नेनविजृंभितः ३१ यथाह्यवहितोवह्निर्दारुष्वेकः स्वयोनिषु नानेवभातिविश्वात्माभूतेषुचतथापुमान् ३२

त्मिकयाअगुणश्चेत्यन्वयः स्वतोनिर्गुणोपिसन्नित्यर्थः भगवतोजगत्कारणत्वमुक्तं ३० प्रवेशनियमनलक्षणांलीलामाह
तयेति विलसितेषुउद्भूतेषुगुणेषुआकाशादिषुअंतः प्रविष्टः सन् गुणवानिवमदधीनायतेगुणाइत्यभिमानवानिव ननुव
स्तुतस्तथा यतोविज्ञानेनचिच्छक्त्याविजृंभितो अत्यूर्जितः ३१ बहुरूपत्वलीलामाहयथेति स्वयोनिषुस्वाभिव्यंजकेषुअ
वहितोनिहितः विश्वात्मापुमान् परमेश्वरोभूतेषुप्राणिषुअंतर्यामिणोपिप्रतियोगिनानात्वमिवोन्यतेक्षेत्रज्ञरूपेणवा ३२

भा० प्र०
१

भोगरूपांलीलामाह असौहरिः भूतसूक्ष्माणिचइंद्रियाणिचआत्मामनश्चतैः स्वयंनिर्मितेषु भूतेषु चतुर्विधेष्विति भोगस्थान=
त्र्यंद्योत्पते तद्गुणानतत्रतदनुरूपान्विषयानिछयाभुंक्ते भोजयतीतिनिजर्योवाज्ञेयः पालयतीविवातदात्मनेपदमार्षभुंजो
अनचतइविस्मरणात ३३ इदानींस्तजानासीतिप्रश्नोत्तरमाहभावयतिपालयति एतत्तुसर्वावतारसाधारणप्रयोजनं
विशेषतः कृष्णावतारस्यकुंतीस्तुतौवक्ष्यते लोकभावनःलोककर्ता देवादिषुलीलावतारैस्तेष्वनुरक्तः ३४ इतिप्रथमटीका
यांद्वितीयोध्यायः २ अवतारकथाप्रश्नेतृतीयेतत्तराभिधा पुरुषाद्यवतारोक्त्यातत्तच्चारित्रवर्णनैः १ यदुक्तं अथा
ख्याहिहरेर्धीमनअवतारकथाःशुभाइति तदुत्तरत्वेनावतारानतुक्रमिष्यनप्रथमंपुरुषावतारमाह जगृहइति पंचभिः

अंसौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान ३३ भावयत्येषसत्वेनलो
कान्वैलोकभावनः लीलावतारानुरतोदेवतिर्यङ्नरादिषु ३४ इतिश्रीभागवतेप्रथमस्कंधेद्वितीयोध्यायः २
सूतउवाच जगृहेपौरुषंरूपंभगवान्महदादिभिः संभूतंषोडशकलंआदौलोकसिसृक्षया १ यस्यांभसि
शयानस्ययोगनिद्रांवितन्वतः नाभिह्रदांबुजादासीद्ब्रह्माविश्वसृजांपतिः २ यस्यावयवसंस्थानैःकल्पितो
लोकविस्तरः तद्वैभगवतोरूपंविशुद्धंसत्वमूर्जितं ३
महदादिभिःमहदहंकारपंचतन्मात्रैःएकादशेंद्रियाणिपंचमहाभूतानीतिषोडशकलाः अंशाःयस्मिनननुयद्यपिभगवद्वि
ग्रहोनैवंभूतः तथापिविराड्जीवांतर्यामिणोभगवतोविद्रूपेणोपासनार्थमेवमुक्तमितिद्रष्टव्यं १ कोसौभगवानित्यपेक्षा
यांतंविशिनष्टियस्यांभसिएकार्णवेशयनस्यविश्रांतस्य तत्रचयोगःसमाधितः तद्रूपांनिद्रांविस्तारयतःयस्यनाभिरेवह्रदः
तस्मिन्यदंबुजंतस्मात्सकाशातब्रह्माआसीत अभूत पाद्मेकल्पेपौरुषंजगृहे २ कीदृशंरूपंतदाह यस्येति ननुकीदृशो
विग्रहस्तस्ययोंभसिशेतेस्मतदाह तत्तस्यभगवतोरूपंतुविशुद्धंरजआद्यसंभिन्नं अतएवोर्जितंनिरतिशयंसत्वं ३ १

25
1981

एतच्चयोगिनांप्रत्यक्षमित्याह पश्यंतीति अदभ्रमनल्पंज्ञानात्मकंयच्चक्षुःतेनसहस्रंअपरिमितानियानिपदादीनितैर
द्भुतंसहस्रंमूर्द्धादयोयस्मिनतत सहस्रंयानिमौल्यादीनितैरुल्लसत्शोभमानं ४ एतत्तुक्तदृष्ठंनत्वन्यावतारवदाविर्भाव
तिरोभाववदित्याह एतत आदिनारायणरूपंनिधीयंतेयस्मिन्निति निधानंकार्यावसाने प्रवेशस्थानमित्यर्थः बीजंउद्भव=
स्थानं बीजत्वेपिनान्यबीजतुल्यं किंत्वव्ययं नकेवलमवताराणामेवबीजंकिंतुसर्वप्राणिनामित्याह यस्यांशांशेनब्रह्मा तस्यांशो
मरीच्यादिस्तेन ५ सनत्कुमाराद्यवतारंतच्चरितंचाह सएवेति कौमार आर्षः प्राजापत्योमानवइत्यादीनिसर्गविशेषना=
पश्यंत्यदोरूपमदभ्रचक्षुषासहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलो
ल्लसत ४ एतन्नानावताराणांनिधानंबीजमव्ययं यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरादयः ५ सएवप्रथमंदेवः
कौमारंसर्गमाश्रितः चचारदुश्चरंब्रह्माब्रह्मचर्यमखंडितं ६ द्वितीयंतुभवायास्यरसातलगतांमहीं उद्ध
रिष्यनुपादत्तयज्ञेशःसौकरंवपुः ७ तृतीयमृषिसर्गंवैदेवर्षित्वमुपेत्यसः तंत्रंसात्वतमाचष्टनैष्कर्म्यंकर्मणां
यतः ८ तुर्येधर्मकलासर्गेनरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरंतपः ९ रामकृष्णवासुदेव
मानियःपौरुषंरूपंजगृहेसएवदेवःकौमाराख्यंसर्गमाश्रितःसन्ब्रह्माब्राह्मणोभूत्वाब्रह्मचर्यंचचार प्रथमद्वितीयादि
शब्दोनिर्देशमात्रापेक्षया ६ अस्यविश्वस्यभवायउद्भवायमहीमुद्धरिष्यन्निति कर्मोक्तिः एवंसर्वत्रावतारस्तत्कर्मचोक्तमि
त्यनुसंधेयं ७ नारदावतारमाह तृतीयमिति ऋषिसर्गमुपेत्यतत्रदेवर्षित्वमुपेत्येत्यर्थः सात्वतंवैष्णवंतंत्रंपंचरात्रागमं
आचष्टउक्तवान्यतस्तंत्रात्कर्मणांनिर्गतंकर्महेतुत्वंयेभ्यस्तानिनिष्कर्माणि तेषांभावोनैष्कर्म्यंकर्मणामेवमोचकत्वं यतोभ
वतितदाचष्टेत्यर्थः ८ तुर्येवतारेधर्मस्यकलाअंशःभार्येत्यर्थः अर्धोवाएषआत्मनोयत्पत्नीतिश्रुतेःतस्याःसर्गेऋषीभूत्वेनी
कावतारंतांदर्शयति ९

भा० १० आसुरयेतन्नाम्नेब्राह्मणाय तत्वानांग्रामस्यसंघस्यविनिर्णयोयस्मिनतत्सांख्यं १० दत्तात्रेयावतारमाह षष्ठमिति अत्रेर प्र०
पत्यत्वं तेनैववृतः सन्प्राप्तः अत्रेरपत्यत्वमभिकांक्षतमाह तुष्टइति वक्ष्यमाणत्वात्कथंप्राप्तः अनुसूययामत्तदशापत्यमिषे
णमामेवापत्यंवृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः आन्वीक्षिकीं आत्मविद्यांप्रह्लादादिभ्यश्च ११ यज्ञावतारमाह सयज्ञः
यामाद्यैः स्वस्यैवपुत्रायामानामदेवाः तदाद्यैः सहस्वायंभुवंमन्वंतरंपालितवान् तदास्वयमिंद्रोभूदित्यर्थः १२ सर्वाश्रमनम

पंचमः कपिलोनामसिद्धेशः कालविप्लुतं प्रोवाचासुरयेसांख्यंतत्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वंवृतः प्राप्तोनु
सूयया आन्वीक्षिकीमलर्काय प्रह्लादादिभ्यऊचिवान् ११ ततः सप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत सयामाद्यैः सु
रगणैरपात्स्वायंभुवांतरं १२ अष्टमेमेरुदेव्यांतुनाभेर्जातउरुक्रमः दर्शयन्वर्त्मधीराणांसर्वाश्रमनमस्कृतं १३
ऋषिभिर्याचितोभेजेनवमंपार्थिवंवपुः दुग्धेमामोषधीर्विप्रास्तेनायंसउशत्तमः १४ रूपंसजगृहेमात्स्यंचा
क्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं १५ सुरासुराणामुदधिंमथ्नतांमंदराचलं दध्रेकम
ठरूपेणपृष्ठएकादशेविभुः १६

स्कृतं अंत्याश्रमपारमहंस्यवर्त्म धीराणांदर्शयन् नाभेराग्नीध्रपुत्रात्ऋषभोजातः १३ पार्थिवंवपुः राजदेहं पृथुरूपं पाठांतरेपृ
थोरिदंपार्थिवं औषधीरित्युपलक्षणं इमांपृथिवींसर्वाणिवस्तूनिदुग्धअदोहयत्मामाप्यवस्त्वार्थः हेविप्राः तेनपृथ्वीदोहने
नसोयमवतारउशत्तमः कमनीयतमः वराकांतावित्यस्मात् १४ चाक्षुषमन्वंतरेयउदधिसंप्लवः तस्मिन् यद्यपिमन्वंत
रावसानेप्रलयोनास्तितथापिकेनचित्कौतुकेनसत्यव्रतायमायादर्शितायथाअकांडेमार्कंडेयायेतिद्रष्टव्यं महीमय्यां
नाविनौकारूपायांमत्स्यामित्यर्थः अपात्रक्षितवान्वैवस्वतमितिमाविनज्ञाः १५ कमठः कूर्मः तद्रूपेण एकादशोअव
तारेविभुः दध्रेदधार १६ १०

27/1981

धान्वंतरं धान्वंतरिरूपं द्वादशमादिप्रयोगत्वार्षः त्रयोदशमेरूपंतच्चरितेनसहदर्शयति अपाययदित्यत्रसुधामित्यध्याहारः
मोहिन्यास्त्रियारूपेणअन्यानसुरान्मोहयन् धन्वंतरिरूपेणामृतमानीयमोहिन्या अपाययदित्यर्थः १७ नारसिंहंस्वरूपं
बिभ्रत् एरकांग्रंथितृणं १८ दुष्टानांमदंवामयतीतिवामनरूपंकृत्वंवा प्रत्यादित्सुः तस्मादाक्षिप्य ग्रहीतुमिच्छुः १९ परशुरामा
वतारमाह अवतारइतित्रिः त्रिगुणंयथाभवतितथासप्तकृत्वः सप्तवारां एकविंशतिवारानित्यर्थः २० अल्पमेधसः अल्पप्र

धान्वंतरंद्वादशमंत्रयोदशममेवच अपाययत्सुरानन्यान्मोहिन्यामोहयन्स्त्रिया १७ चतुर्दशंनारसिंहंबिभ्र
द्दैत्येंद्रमूर्जितं ददारकरजैर्वक्षस्येरकांकटकृद्यथा १८ पंचदशंवामनकंकृत्वागादध्वरंबलेः पदत्रयंयाचमानः
प्रत्यादित्सुस्त्रिविष्टपं १९ अवतारेषोडशमेपश्यन्ब्रह्मद्रुहोनृपान् त्रिःसप्तकृत्वः कुपितोनिःक्षत्रामकरोन्महीं २०
ततः सप्तदशेजातः सत्यवत्यांपराशरात् चक्रेवेदतरोः शाखादृष्ट्वापुंसोल्पमेधसः २१ नरदेवत्वमापन्नः सुरका
र्यचिकीर्षया समुद्रनिग्रहादीनिचक्रेवीर्याण्यनेकशः २२ एकोनविंशेविंशतिमेवृष्णिषुप्राप्यजन्मनी रामकृष्ण
वितिभुवोभगवानहरद्भरं २३ ततः कलौसंप्रवृत्तेसंमोहायासुरद्विषां बुद्धोनाम्नाजिनसुतः कीकटेषुभविष्यति २४
अथासौयुगसंध्यायांदस्युप्रायेषुराजसु जनिताविष्णुयशसोनाम्नाकल्कीजगत्पतिः २५ राम कृष्ण राम

ज्ञान्दृष्ट्वातदनुग्रहार्थंशाखाः चक्रे २१ नरदेवत्वंराघवरूपेणप्राप्तः स अतः परं अष्टादशे २२ विंशतितमइतिवक्तव्येनकार
लोपः छंदोनुरोधेन रामकृष्णावित्येवंनामजन्मनीप्राप्य २३ अजिनस्यसुतः जिनसुतइतिपाठेजिनः सएवकीकटेषुमध्यग
याप्रदेशे २४ युगसंध्यायांकलेरंतेविष्णुयशसोब्राह्मणात्सकाशाज्जनिष्यति २५ श्रीरामजयरामजयजयराम हरे

भा० ११ अनुक्तसर्वसंग्रहार्थमाह अवताराइति असंख्येयत्वेदृष्टांतः यथेति अविदासिनः उपक्षयशून्यात् सरस उपक्षयेइत्यस्मात्स प्र०
रसः सकाशात्कुल्याः क्षुद्रप्रवाहाः २६ विभूतीराह ऋषयइति २७ तत्रविशेषमाह एतेचेति पुंसः परमेश्वरस्यकेचिदंशाः
केचित्कलाः विभूतयः तत्रमत्स्यादीनामवतारत्वेनसर्वज्ञत्वसर्वशक्तित्वेपियथोपयोगमेवज्ञानक्रियाशक्त्याविष्करणं कुमा
रनारदादिष्वधिकारकेषुयथोपयोगमंशकलावेशः पृथ्वादिषुशक्त्यावेशः कृष्णस्तुभगवान्साक्षान्नारायणएवआविर्भू
तः सर्वशक्तित्वात् सर्वेषांप्रयोजनमाह इंद्रारयोदैत्याः तैर्व्याकुलमुपद्रुतंलोकंमृडयंतिसुखिनंकुर्वंति एतत्कीर्तनफलमा

अवताराह्यसंख्येयाहरेःसत्वनिधेर्द्विजाः यथाविदासिनःकुल्याः सरसःस्युःसहस्रशः २६ ऋषयोमनवोदेवा
मनुपुत्रामहौजसः कलाःसर्वेहरेरेवसप्रजापतयस्तथा २७ एतेचांशकलाःपुंसःकृष्णस्तुभगवान्स्वयं इंद्रारिव्या
कुलंलोकंमृडयंतियुगेयुगे २८ जन्मगुह्यंभगवतोयएतत्प्रयतोनरः सायंप्रातर्गृणन्भक्त्यादुःखग्रामाद्वि
मुच्यते २९ एतद्रूपंभगवतोह्यरूपस्यचिदात्मनः मायागुणैर्विरचितंमहदादिभिरात्मनि ३० यथानभसिमे
घौघोरेणुर्वापार्थिवोनिले एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः ३१

ह जन्मेति गुह्यं अतिरहस्यं जन्म प्रयतः शुचिःसन् दुःखग्रामात्संसाराद्विमुच्यतेइत्युक्तंतत्रकथंदेहद्वयसंबंधेसतितद्वि
मुक्तिरित्याशंक्यदेहसंबंधस्यभगवन्मायाविलसितत्वात् एतच्छ्रवणादिजनितविद्ययातन्निवृत्तिरुपपद्यते इत्याशयेनाह
एतदितिपंचभिः अरूपस्यचिदेकरसस्यात्मनोजीवस्य एतत्स्थूलंरूपंशरीरंभगवतोयामायातस्याःगुणैर्महदादिरूपैर्विरचितं
कआत्मनिआत्मस्थानेशरीरीकृतमित्यर्थः कथमित्यपेक्षायांस्वरूपावरणेनतदध्यासइतिसदृष्टांतमाह यथावाय्वाश्रितोमे
घौघोनभसिआकाशेअबुद्धिभिर्ज्ञैः आरोपितः यथानापार्थिवोरेणुःतद्गतंधूसरत्वादि अनिलेएवंद्रष्टरिआत्मनिदृश्यत्वंदृश्य ११
त्वादिधर्मकंशरीरंआरोपितमित्यर्थः ३१

29/1981

किंच अतःस्थूलारूपात्परंअन्यदपिरूपंरूप्यतेप्रकाश्यते अनेनेतिरूपंलिंगंशरीरंआरोपितमित्यनुषंगःकथंभूतंतत् य
दव्यक्तंसूक्ष्मं तत्रहेतुःअव्यूढगुणबृंहितं व्यूढः करचरणादिपरिणामस्तथा अपरिणताः अव्यूढाः गुणाः तैर्गुणैर्बृंहितंरचि
तं आकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेवकुतस्तत्राह अदृष्टाश्रुतवस्तुत्वात्यच्चकारविशेषवद्वस्तुतदस्मादादिवत्
दृश्यतेश्रूयते वाइंद्रादिवत् इदंतुनतथातर्हितस्यसत्वेकिंप्रमाणं तत्राहसजीवः जीवोपाधिः जीवाजीवेननिर्मुक्तःजी
वोजीर्वविहायेत्यादौजीवोपाधौलिंगदेहेजीवशब्दप्रयोगात्जीवोपाधितयाकल्पितइत्यर्थः ननुस्थूलमेवभोगायतन
त्वाज्जीवत्वोपाधिरस्ति किमन्यकल्पनयेत्यतआह यद्यस्मात्सूक्ष्माल्लिंगदेहात्पुनर्भवःपुनःपुनर्जन्मउत्क्रांतिगत्या

अतःपरंयदव्यक्तमव्यूढगुणबृंहितं अदृष्टाश्रुतवस्तुत्वात्सजीवोयत्पुनर्भवः ३२
यत्रेमेसदसद्रूपेप्रतिषिद्धेस्वसंविदा अविद्ययात्मनिकृतेइतितद्ब्रह्मदर्शनं ३३

गतीनांतेनविनासंभवादितिभावः ३२ तदेवमुपाधिद्वयमुक्त्वातदपवादेनजीवस्यब्रह्मतामाह यत्रेति यत्रयदास्थूलस
क्ष्मेइमेरूपेस्वसंविदाश्रवणमननादिसत्त्यास्वस्यरूपस्यसम्यक्ज्ञानेनप्रतिषिद्धेभवतः ज्ञानेनप्रतिषेधार्हत्वेतमेवहे
तुमाह अविद्ययात्मनिकृतेअविद्ययाआत्मनिपरमात्मन्यधिष्ठानेउभेरूपेस्थूलसूक्ष्मशरीरेकल्पितेइतिहेतोः तद्ब्रह्मत
दाजीवोब्रह्मैवभवतीत्यर्थः कथंभूतंब्रह्मदर्शनंज्ञानैकस्वरूपं तथापिभगवन्मायायाःसंसृतिकारणभूतायाविद्य
मानत्वात् कथंजीवस्यब्रह्मतातत्राह ३३ राम कृष्ण वासुदेव हरे

यदीति असंदेहेसंदेहवचनंयदिवेदाःप्रमाण्यंस्युरितिवत् वैशारदीविशारदःसर्वज्ञईश्वरःतदीयादेवीसंसारचक्रेण
सृष्टिस्थितिप्रलयरूपेणक्रीडंति एषामायायद्युपरताभवतितदाजीवस्यब्रह्मतास्यात् किमिसुपरताभवेत्तत्राह मतिः
विद्यारूपा अयंभावः यावदविद्यात्मनाआवरणविक्षेपौकरोतितावन्नोपरमति यदातुसैवविद्यारूपेणपरिणताभवेत्
तदासदसद्रूपंजीवोपाधिंदग्ध्वानिरिंधनाग्निवत्स्वयमेवोपरमेदितितदासंपन्नःब्रह्मस्वरूपंप्राप्तएवेतिविदुस्तत्त्वज्ञाः
किमतोयद्येवंस्वेमहिम्निपरमानंदस्वरूपेमहीयतेपूज्यतेविराजितइत्यर्थः ३४ यथाजीवस्यजन्मादिमाया एवमीश्व
रस्यापिजन्मकर्मादिमायेत्याह एवमिति अकर्तुःकर्माणिअजनस्यजन्मादिह्रत्पतेःअंतर्यामिणः ३५ तर्हिजीवादीश्वर

यद्येषोपरतादेवीमायावैशारदीमतिः संपन्नएवेतिविदुर्महिम्निस्वेमहीयते ३४ एवंजन्मानिकर्माणिह्यकर्तुर
जनस्यच वर्णयंतिस्मकवयोवेदगुह्यानिह्रत्पतेः ३५ सवाइदंविश्वममोघलीलःसृजत्यवत्यत्तिनसज्जतेस्मिन् भू
तेषुचांतर्हितआत्मतंत्रःषड्वर्गिकंजिघ्रतिषड्गुणेशः ३६ नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतीः
नामानिरूपाणिमनोवचोभिःसंतन्वतोनटचर्यामिवाज्ञः ३७ श्रीरामजयरामजयजयराम कृष्ण वासुदे

स्यकोविशेषःस्वातंत्र्यमेवविशेषइत्याह सवाइति षड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रति दूरादेवगंधवद्गृह्णातिन
तुसज्जतइत्यर्थः कुतःषड्गुणेशःषडिंद्रियनियंता ३६ ननुकिंईश्वरस्यसृष्ट्यादिकर्मभिर्विषयभोगैर्वातत्राह नचेति धा
तुर्जगद्विधातुरीश्वरस्यऊतीलीलाःकुमनीषःकुबुद्धिःनिपुणेनतर्कादिकौशलेननअवैतिनजानाति मनसारूपाणिवच
सानामानिसंतन्वतः विस्तारयतःवचोभिरितिबहुत्वंश्रुत्यभिप्रायेणमनोवचोभिःसहेतिवा ३७ रामकृष्णवासुदे १२

31/1981

भक्तस्तुकथंविजानातीत्याह सवेदेति अमायया अकुटिलभावेनसंततयानिरंतरयानुवृत्त्या अनुकूल्येनयोभजेतसप
दवींस्वरूपंवेदजानाति ३८ भक्तिमार्गप्रवृत्तान् ऋषीन् अभिनंदति अथेति यतोभक्तएवभगवत्तत्त्वंजानाति अथातःभ
गवंतःसर्वज्ञाःभवंतोधन्याःकृतार्थाःकुतःयद्यस्मात्इत्थंप्रश्नैर्वासुदेवेआत्मभावंमनोवृत्तिंकुर्वंति सर्वात्मकंएकांतिकंय
त्रयस्मिन्भावेसतिभूयःपरिवर्तोजन्ममरणाद्यावर्तोनभवति ३९ सूतकिमेतच्छास्त्रमपूर्वंकथयसितत्राह इदमिति ब्रह्म
संमितंसर्ववेदतुल्यंउत्तमश्लोकस्यचरितंयस्मिन्तत् ऋषिर्व्यासः ४० तत्संप्रदायप्रवृत्तिमाह निःश्रेयसमिति सुतंशुकं

सवेदधातुःपदवींपरस्यदुरंतवीर्यस्यरथांगपाणेः योमाययासंततयानुवृत्त्याभजेततत्पादसरोजगंधं ३८ अ
थेहधन्याभगवंतइत्थंयद्वासुदेवेखिललोकनाथे कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयःपरिवर्तउग्रः ३९ इदं
भागवतंनामपुराणंब्रह्मसंमितं उत्तमश्लोकचरितंचकारभगवानृषिः ४० निःश्रेयसायलोकस्यधन्यंस्वस्त्य
यनंमहत् तदिदंग्राहयामाससुतमात्मवतांवरं ४१ सर्ववेदेतिहासानांसारंसारंसमुद्धृतं सतुसंश्रावयामा
समहाराजंपरीक्षितं ४२ प्रायोपविष्टंगंगायांपरीतंपरमर्षिभिः कृष्णेस्वधामोपगतेधर्मज्ञानादिभिःसह ४३
कलौनष्टदृशामेषपुराणार्कोधुनोदितः तत्रकीर्तयतोविप्राविप्रर्षेर्भूरितेजसः ४४ अहंचाध्यगमंतत्रनिविष्ट
स्तदनुग्रहात् सोहंवःश्रावयिष्यामियथाधीतंयथामति ४५ इतिश्रीभागवतेपुराणेप्र० तृतीयोध्यायः ३

४१ केनोपविष्टमितिपरमवैराग्योक्तिः ४२ प्रायेणमृत्युपर्यंताशा-हेविप्राः विप्रर्षेःसकाशात्अध्यगमंज्ञातवान् अस्मितत्र
कीर्तयतःतत्रनिविष्टइतिचान्वयभेदात्तत्रपदावृत्तिरदोषः ४४ यथाधीतंनतुस्वमतिविलसितंतत्रतुयथामतिस्वमत्यनु
सारेणसंक्षेपतःकथितंविस्तरतःश्रावयिष्यामि ४५ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधटीकायांतृतीयोध्यायः

तुर्थेभागवतारंभःकारणत्वेनवर्ण्यते व्यासस्यापरितोषस्तुतपःप्रवचनादिभिः १ इतिएवंप्रसन्नतयाश्रावयिष्यामीति
ब्रुवाणंमुनीनांबहूनांमध्येएकेन वक्तव्येयोवृद्धःवृद्धेष्वपिबहुषुयःकुलपतिर्गणमुख्यःतेष्वपिबहुषुयोबह्वृचऋग्वेदीते
नवक्तव्यंअतएवंभूतत्वात्शौनकोब्रवीत्यत्पयांकथामाह २ कस्मिन्स्थानेकेनहेतुनेति महाभारतादिधर्मशास्त्रा-
णिकृतवतःपुनरेतत्संहिताकरणेकिंकारणमित्यर्थः कुतइतिसार्वविभक्तिकस्तसिः केनप्रावर्तितइत्यर्थः कृष्णोमासः ३
यउक्तंतत्संश्रावयामासेति तत्शुकस्यव्याख्यानादिकंकथंघटितमितिपृष्टुंतस्यासंगोदीनतामाह द्वाभ्यांतस्येति समंदृक्
समंब्रह्मपश्यतियतरुन्निद्रःमायाशयनादुद्बुद्धःअतोनिर्विकल्पकःस्वार्थेकःनिरस्तभेदःकिंच एकस्मिन्नेव अंतःसमाप्ति

व्यासउवाच इतिब्रुवाणंसंस्तुत्यमुनीनांदीर्घसत्रिणां वृद्धःकुलपतिःसूतंबह्वृचःशौनकोब्रवीत् १ शौनकउवाच
सूतसूतमहाभागवदनोवदतांवर कथांभागवतींपुण्यांयदाहभगवान्शुकः २ कस्मिन्युगेप्रवृत्तेयंस्थानेवाकेनहे
तुना कुतःसञ्चोदितःकृष्णःकृतवान्संहितांमुनिः ३ तस्यपुत्रोमहायोगीसमदृङ्निर्विकल्पकः एकांतमतिरु
न्निद्रोगूढोमूढइवायते ४ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नंदेव्योह्रियापरिदधुर्नसुतस्यचित्रं तद्वीक्ष्यपृच्छति
मुनौजगदुस्तवास्तिस्त्रीपुंभिदानतुसुतस्यविविक्तदृष्टेः ५

र्यस्याःतथाभूतामतिर्यस्य तथाहि यानिशासर्वभूतानांतस्यांजागर्तिसंयमी इतिस्मृतेःअतएवगूढःअप्रकटोमूढइवप्र
तीयते ४ आत्मजंशुकंप्रव्रजंतमप्यनुयांतमनुगच्छंतंऋषिंव्यासंअनग्नमपिदृष्ट्वाजलेक्रीडंत्योदेव्योअप्सरसःह्रियालज्जया
वस्त्रपरिधानंकृतवत्यःअनग्नमपीत्यनेनार्थात्तत्सुतोनग्नइत्युक्तंभवतिनग्नस्यपुरतोगच्छतःसुतस्यतुह्रियापरिद
धुः तच्चित्रंवीक्ष्यइयंस्त्रीअयंपुमानितिभिदाभेदःतवास्ति नतुसुतस्यभेदमतिर्नास्ति विविक्तापूतादृष्टिर्यस्यतस्य ५ १३

33
1981

एवंभूतोसौकथमालक्षितःज्ञातःकुरवोजांगलाश्चदेशविशेषाःतान्संप्राप्तःप्रथमं ततोगजसाह्वयेविचरन्गजेन
सहितआह्वयोनामयस्यतस्मिन्हस्तीनामराजातेननिर्मितत्वात् ६ एवंभूतेनमुनिनासह यत्रसंवादेएषासात्वतीभा
गवतीश्रुतिःसंहिता ७ एतद्व्याख्यानंबहुकालावस्थानापेक्षं तस्यत्वेकत्रावस्थानंदुर्लभमित्याह सइति गोदोहनमात्र
कालंप्रतीक्ष्यते तदपिनभिक्षार्थंकिंतुतेषामाश्रमंगृहंतीर्थंकुर्वन्पवित्रीकुर्वन् ८ तस्मादेवंभूतोत्रवक्तेत्याश्चर्यंश्रोतु

कथमालक्षितःपौरैःसंप्राप्तःकुरुजांगलान् उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६ कथंवापांडवेय
स्यराजर्षेर्मुनिनासह संवादःसमभूत्तातयत्रैषासात्वतीश्रुतिः ७ सगोदोहनमात्रंहिगृहेषुगृहमेधिनां
आवेक्ष्यतेमहाभागस्तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतंसूतप्राहुर्भागवतोत्तमं तस्यजन्ममहाश्च
र्यंकर्माणिचगृणीहिनः ९ ससम्राट्कस्यवाहेतोःपांडूनांमानवर्धनः प्रायोपविष्टोगंगायांअनादृत्या
धिराट्श्रियं १० नमंतियत्पादनिकेतमात्मनःशिवायहानीयधनानिशत्रवः कथंसवीरःश्रियमंग
उत्स्रजांयुवैषतोत्स्रष्टुमहोसहासुभिः ११

तच्चरितमतीवाश्चर्यं अतःकथयेत्याह अभिमन्युसुतमितिपंचभिःगृणीहिकथय ९ सम्राट्चक्रवर्तीचेति वितर्के
कस्यवाहेतोःकस्मात्कारणात् अधिराट्श्रियंअधिराजांश्रियंसंपदमनादृत्यगंगायांप्रायोपविष्टः १० यस्यपादनि
केतनंचरणपीठं हस्फुटं धनान्यानीयशत्रवोनमंति अंगहेसूतयुवातरुणएवएषत ऐच्छत् आत्रार्थमात्मनेपदं
असुभिःप्राणैःसह ११ राम

विरक्तस्यकिंधनादिभिरितिचेत्तत्राह शिवायेति उत्तमश्लोकपरायणायवजीवंतितन्नात्मार्थंकिंतुपरोपकारार्थमेव लोक
स्यशिवायसुखायभवायसमृद्ध्येभूतयेऐश्वर्यायतेजीवंति नतात्मार्थं एवंसत्यसौराजानिर्विद्यविरज्यापिपरेषामाश्रयंक
लेवरंकुतोहेतोर्मुमोच नहिपरोपजीवनंस्वयंत्यक्तुमुपचितमित्यर्थः १२ यत्किंचनदृष्टोभितत्सर्वंनोअस्माभ्यंसमाचक्ष्वयत
यस्माद्वाचांविषयेगिरांगोचरेर्थेत्वांतपारंगतंमन्ये छांदसादन्यत्रवैदिकव्यतिरेकेणअत्रैवर्णिकत्वात् १३ कस्मिन्युगेइ
त्यादिप्रश्नानांव्यासजन्मकथनपूर्वकमुत्तरमाह द्वापरेसमनुप्राप्तेकरेत्यपेक्षायामाह तृतीयेयुगस्यपर्ययेपरिवर्तेवास

शिवायलोकस्यभवायभूतयेयउत्तमश्लोकपरायणाजनाः जीवंतिनात्मार्थमसौपराश्रयंमुमोचनिर्विद्यकुतः
कलेवरं १२ तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन मन्येत्वांविषयेवाचांस्नातमन्यत्रछांदसात् १३ सूतउवा
च द्वापरेसमनुप्राप्तेतृतीयेयुगपर्यये जातःपराशराद्योगीवासव्यांकलयाहरेः १४ सकदाचित्सरस्वत्याउप
स्पृश्यजलंशुचिः विविक्तएकआसीनउदितेरविमंडले १५ परावरज्ञःसऋषिःकालेनाव्यक्तरंहसा युगधर्मव्य
तिकरंप्राप्तंभुवियुगेयुगे १६ भौतिकानांचभावानांशक्तिह्रासंचतत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसिता
युषः १७

व्यांउपरिचरस्यवसोःवीर्याज्जातायांसत्यवत्यांयोगीज्ञानीव्यासोजातः १४ जलमुपस्पृश्यजलेस्नानादिकंकृत्वेत्यर्थः आ
सीनोबभूवेतिशेषः विविक्तदेशइत्यादिचित्तैकाग्र्यार्थमुक्तं अनेनैवबदरिकाश्रमंस्थानंसूचितं १५ तत्रचसऋषिःयुगधर्म
व्यतिकरादिकंवीक्ष्यसर्ववर्णाश्रमाणांचयद्धितंतदध्यावितितृतीयेनान्वयः परावरज्ञःअतीतामागतवित् अव्यक्तंरंहोवे
गोयस्यतेनकालेनयुगधर्माणांव्यतिकरंसंकरंप्राप्तंवीक्ष्यतथाभुवियुगेयुगे १६ भौतिकादीनांशरीरादीनांतत्कृतं=
कालकृतंनिःसत्वान् धैर्यशून्यान्दुर्मेधान्मंदमतीन् १७ वासुदेव हर राम कृष्ण १४

35
1981

१८ ततःश्चतुर्होत्रोपलक्षिताश्चत्वारऋत्विजश्चतुर्होतारस्तैरनुष्ठेयंकर्मचातुर्होत्रंशुद्धंशुद्धिकरंयज्ञसंतत्यैयज्ञानामविच्छे
दाय १९ चातुर्वर्ण्यमेवाह ऋगिति उद्धृताः पृथक्कृताः २० २१ दारुणःअथर्वोक्ताभिचारादिप्रवृत्तेः २२ वेदविभागप्रयो
जनमाह तएवेति २३ तएववेदादुर्मेधैःधार्यंतेपुरुषैर्य २३ येपूर्वमतिमेधाविभिःधार्यंतेस्मतएव २४ किंच स्त्रीशूद्रे

दुर्भगांश्चजनान्वीक्ष्यमुनिर्दिव्येनचक्षुषा सर्ववर्णाश्रमाणांयद्दध्यौहितममोघदृक् १८ चातुर्होत्रंकर्मशुद्धं
प्रजानांवीक्ष्यवैदिकं वेदधाद्यज्ञसंतत्यैवेदमेकंचतुर्विधं १९ ऋग्यजुःसामाथर्वाख्यावेदाश्चत्वारउद्धृताः इ
तिहासःपुराणंचपंचमोवेदउच्यते २० तत्रर्ग्वेदधरःपैलःसामगोजैमिनिःकविः वैशंपायनएवैकोनिष्णातोय
जुषामुत २१ अथर्वांगिरसामासीत्सुमंतुर्दारुणोमुनिः इतिहासपुराणानांपितामेरोमहर्षणः २२ तएतऋ
षयोवेदंस्वंस्वंव्यस्यन्ननेकधा शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोभवन् २३ तएववेदादुर्मेधैर्धार्यंतेपु
रुषैर्यथा एवंचकारभगवान्व्यासःकृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा कर्मश्रेय
सिमूढानांश्रेयएवंभवेदिह २५ इतिभारतमाख्यानंकृपयामुनिनाकृतं एवंप्रवृत्तस्यसदाभूतानांश्रेयसि
द्विजाः २६ सर्वात्मकेनापियदानातुष्यद्धृदयंततः २६ नातिप्रसीदद्धृदयःसरस्वत्यास्तटेशुचौ वितर्कयन्विवि
क्तस्थइदंप्रोवाचधर्मवित् २७

ति द्विजबंधवःत्रैवर्णिकेषधमाःतेषांकर्मरूपेश्रेयसिश्रेयःसाधनंएवंभवेत्अनेनैवप्रकारेणभवत्विति २५ अतएवते
षांकृपयाभारताख्यानंमुनिनाकृतं भूतानांश्रेयसिहितेसर्वात्मकेनापिकर्मणा नातिप्रसीदद्धृदयंयस्यसः २६
चित्ताप्रसत्तौहेतुंवितर्कयन्निदमुवाचस्वागतं २७ श्री छ राम छ छ

निर्व्यलीकेननिष्कपटबुध्यामानिताः पूजिताः २८ २९ देत्योदेहेसवः आत्माजीवः वस्तुतोविभुः परिपूर्णएव आत्मना
स्वेनरूपेणासंपन्नः तारतम्यमप्राप्तइवाभातिब्रह्मवर्चसंवेदश्रवणाध्यापनोत्कर्षजंतेजः तत्रसाधवोब्रह्मवर्चस्याः तेषु
सत्तमः अतिश्रेष्ठोपि यद्वानकेवलमसंपन्नइवाभाति प्रत्युतब्रह्मवर्चस्वीब्रह्मवर्चसवानपिअसत्तमइवाभाति तारत
म्यमप्राप्तइवाभाति उत्तमइतिपाठांतरेकमनीयतमोपीति ३० असंपन्नत्वेहेतुस्वयमेवाशंकतेकिंवेति प्रायेणप्र

धृतव्रतेनहिमयाछंदांसिगुरवोग्नयः मानितानिर्व्यलीकेनगृहीतंचानुशासनं २८ भारतव्यपदेशेनआ
म्नायार्थश्चदर्शितः दृश्यतेयत्रधर्मादिस्त्रीशूद्रादिभिरप्युत २९ अथापिबतमेदेह्योह्यात्माचैवात्मनावि
भुः असंपन्नइवाभातिब्रह्मवर्चस्यसत्तमः ३० किंवाभागवताधर्मानप्रायेणनिरूपिताः प्रियाःपरमहं
सानांतएवह्यच्युतप्रियाः ३१ तस्यैवंखिलमात्मानंमन्यमानस्यखिद्यतः कृष्णस्यनारदोभ्यागात् आश्रमंप्रा
गुदाहृतं ३२ तमभिज्ञायसहसाप्रत्युत्थायागतंमुनिः पूजयामासविधिवन्नारदंसुरपूजितं ३३ इति
श्रीभागवतेमहापुराणेप्रथमस्कंधेनारदव्याससंगमोनामचतुर्थोध्यायः ४ कृष्ण वासुदेव
सूतउवाच अथतंसुखमासीनउपासीनंबृहछ्रवाः देवर्षिःप्राहविप्रर्षिंवीणापाणिःस्मयन्निव १

यस्त्वेन हियस्मात्तएवधर्माः अच्युतस्यप्रियाः ३१ खिलंन्यूनंखिद्यतःखेदंप्राप्नुवतः कृष्णस्यव्यासस्यप्रागुदाहृतंस
रस्वतीतीरस्थं ३२ तंनारदमागतमाज्ञायसहसाप्रत्युत्थायविधिवत्पूजयामासेति ३३ इतिप्रथमेचतुर्थोध्यायः पं
चमेसर्वधर्मेभ्योहरिकीर्तनगौरवं व्यासचित्तप्रसादायनारदेनोपदिश्यते १ उपसमीपेआसीनंविप्रर्षिंव्यासं बृह
छ्रवाःमहायशाः स्मयनइव हसन्निवेत्यनेनमुखप्रसन्नतोत्पते यद्वा इवेत्यनधिकारार्थंअहोमहानपिमुह्यतिति
स्मयमानः १ १५

37
1981

शारीरःशरीराभिमानीआत्माआत्मनातेनशरीरेणकच्चित्किंपरितुष्यति मानसआत्मामनोभिमानीतेनमनसापरितु
ष्यति कच्चिन्नोवेत्ति विजिज्ञासितंज्ञातुमिष्टंधर्मादियत्तत्सर्वंसुसंपन्नंसम्यक्ज्ञातं अपिशब्दादनुष्ठितंचेत्यर्थः अधीति
पाठेसंबोधनंसुसंपन्नत्वेहेतुः महदद्भुतमित्यादिसर्वैरर्थैर्धर्मादिभिःपरिबृंहितंपरिपूर्णंअतएवमहदद्भुतमपिभारतं
कृतवान्त्वंअतोयत्तेजिज्ञासितंतत्सुसंपन्नंअतःकिमसंतोषकारणमित्यर्थः ३ किंचयत्सनातनंनित्यंब्रह्मवेदःतच्चत्व

नारदउवाच पाराशर्यमहाभागभवतःकच्चिदात्मनि परितुष्यतिशारीरआत्मामानसएववा २ जिज्ञासितं
सुसंपन्नमपितेमहदद्भुतं कृतवान्भारतंयस्त्वंसर्वार्थपरिबृंहितं ३ जिज्ञासितमधीतंचयत्तद्ब्रह्मसनात
नं तथापिशोचस्यात्मानमकृतार्थइवप्रभो ४ व्यासउवाच अस्त्येवमेसर्वमिदंत्वयोक्तंतथापिनात्माप
रितुष्यतेमे तन्मूलमव्यक्तमगाधबोधंपृच्छामिहेत्वात्मभवात्मभूतं ५ संवैभवान्वेदसमस्तगुह्यमुपासि
तोयत्पुरुषःपुराणः परावरेशोमनसैवसर्वंसृजत्यवत्यत्तिगुणैरसंगः ६ श्रीरामजयरामजयजयराम

याजिज्ञासितंविचारितं अधीतंअध्यापितंचशिष्येभ्योदत्तमित्यर्थः तथापिशोचसितत्किमर्थमितिशेषः ४ आत्मा
शारीरोमानसश्च तन्मूलंतस्यापरितोषस्यकारणंअव्यक्तमस्फुटंअस्माभिर्दुर्विज्ञेयं हेनारदत्वांपृच्छामि आत्मभ
वोब्रह्मातस्यात्मनोदेहादुद्भूतं अतः अगाधोऽतिगंभीरोबोधोयस्यतंत्वां ५ अगाधबोधतांप्रपंचयन्नाह सवा
इतिद्वाभ्यां सर्वगुह्यज्ञानेहेतुःयद्यस्मात्पुराणपुरुषउपासितस्त्वयाकथंभूतः परावरेशः कार्यकारणनियंता मन
सैवसंकल्पमात्रेणगुणैःकृत्वाविश्वंसृजतीत्याह ६ रामकृष्ण हरिराम जयजय रामकृष्ण

भा०
१६

किंच त्वं त्रिलोकीं पर्यटन् अर्क इव सर्वदर्शी योगबलेन प्राणवायुरिव सर्वप्राणिनां अंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः प्र०
अतः परे ब्रह्मणि धर्मतो योगेन निष्णातस्य तदुक्तं याज्ञवल्क्येन इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो ध
र्मो यद्योगेनात्मचिंतनं इति अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैर्निष्णातस्य मे अलमित्यर्थः यन्न्यूनं तद्विचक्ष्व वि
तर्कय ७ अनुदितप्रायं अनुक्तप्रायं प्रायशो न वर्णितं भगवद्यशो विनायेनैव धर्मादिज्ञानेन असौ भगवान् न तुष्यते त
देव दर्शनं ज्ञानं खिलं न्यूनं मन्ये अहं ८ ननु भगवद्यश एव तत्र तत्रानुवर्णितं तत्राह यथेति चशब्दाद्धर्मादिसाधनानि च

त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी। परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं वि
चक्ष्व ७ श्रीनारद उवाच भवतानुदितप्रायं यशो भगवतोमलं येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ८
यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ९ न यद्वचश्चित्रपदं
हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः १०

तथा धर्मादिवत् प्राधान्येन वासुदेवस्य महिमा नत्युक्त इत्यर्थः ९ वासुदेवव्यतिरिक्तान्यविषयज्ञानवद्देवान्यविषयं वा
क्चातुर्यं च खिलमेवेत्याह नेति चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्था
नं उशंति मन्यते कुतः मानसाः सत्वप्रधाने मनसि वर्तमाना हंसा यत्र यत्र न विरमंति कर्हिचिदपि नितरां न रमंति उशि
क्क्षयाः उशिक् कमनीयब्रह्मक्षयो निवासो येषां ते यथा प्रसिद्धा हंसाः मानससरसि चरंतः कमनीयपद्मखंडनिवा
साः त्यक्तविचित्रान्नादियुक्ते ऽप्युच्छिष्टगर्ते काकक्रीडास्थाने न विरमंति इति शेषः १० वासुदेव हरे नारायण वासुदेव १६

39
1981

विनापि पदचातुर्यं भगवद्यशःप्रधानं वचः प्रधानमित्याह तद्वाग्विसर्ग इति स चासौ वाग्विसर्गः वाचः प्रयोगः उच्चारणं जना
नां समूहो जनता तस्याः अघं विप्लावयति नाशयतीति तथा सः यस्मिन् वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्तेपि प्र
तिश्लोकं अनंतस्य यशसांकितानि नामानि भवंति तत्र हेतुः यत् यानि नामानि साधवो महांतः वक्तरि सति शृण्वंति श्रोत
रि सति गृणंति अन्यदा तु स्वयमेव गायंति कीर्तयंतीति ११ भक्तिहीनं कर्म बंधनमेवेति कैमुतिकन्यायेन दर्शयति नैष्क
र्म्यमिति निष्कर्म ब्रह्म तदेकाकारत्वान्निष्कर्मतारूपं नैष्कर्म्यं निष्कर्मतारूपं फलाभिसंधिरहितं अपि नैष्कर्म्यं अज्यते अ
नेनेत्यंजनमुपाधिः तन्निवर्तकं निरंजनं एवंभूतमपि ज्ञानं अच्युते भावो भक्तिस्तद्वर्जितं चेदलमत्यर्थं न शोभते सम्यग

तद्वाग्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि शृण्वंति गायं
ति गृणंति साधवः ११ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्र
मीश्वरे न चार्पितं कर्म यदप्यकारणं १२ अथो यथा वद्भगवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः
उरुक्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टितं १३

परोक्षज्ञानाय न कल्पत इत्यर्थः तदा शश्वत्साधनकाले फलकाले चाभद्रं दुःखं दुःखरूपं यत्काम्यं कर्म तदप्यकारणं अका
म्यं तच्चेति चकारस्यान्वयः तदपि कर्म ईश्वरे नार्पितं चेत् कुतः पुनः शोभते बहिर्मुखत्वेन सत्वशोधकत्वाभावात् १२ नदे
वं भक्तिशून्यानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव यतः अतो हरेश्चरितमेवानुवर्णयेत्याह अथो अतः कारणा
त् अमोघा यथार्था दृक् वीर्यं यस्य शुचिशुद्धं श्रवो यशो यस्य सत्ये रतः धृतानि व्रतानि येन स भवानेवं महागुणत्वा
त् अत उरुक्रमस्य विविधं चेष्टितं लीलां समाधिना चित्तैकाग्र्येण अखिलस्य बंधस्य मुक्तये त्वमनुस्मर स्मृत्वा वर्णयेत्य
र्थः एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगो नानुपपन्नः १३

विपक्षेदोषांतरमाह ततउरुक्रमविचेष्टितात्पृथक्दृशः अतएवान्यथाप्रकारांतरेणयत्किंचिदर्थांतरंविवक्षतः तया
विवक्षयाकृतैःस्फुरितैरूपैर्नामभिश्चवक्तव्यत्वेनोपस्थितैःदुःस्थिताऽनवस्थितासतिमतिःकदाचित्क्वापिविषयेअस्पदं
स्थानंनलभेत् वातेनाहताआघूर्णितानौरिव तदुक्तंगीतासु व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनं
ताश्चबुद्धयोऽव्यवसायिनामित्यादि १४ तदेवंहरियशोविनाभारतादिपुकृतंधर्मादिवर्णनमकिंचित्करमित्युक्तं अस्तु
तद्विरुद्धमेवजातमित्याह जुगुप्सितंनिंद्यंकाम्यकर्मादिस्वभावतएवरक्तस्यतत्ररागिणःपुरुषस्यधर्मकृतेधर्मार्थमनु

ततोऽन्यथाकिंचनयद्विवक्षतःपृथक्दृशस्तत्कृतरूपनामभिः नकुत्रचित्क्वापिच
दुःस्थितामतिर्लभेतवाताहतनौरिवास्पदं १४ जुगुप्सितंधर्मकृतेनुशासतःस्वभावर
क्तस्यमहान्व्यतिक्रमः यद्वाक्यतोधर्मइतीतरःस्थितोनमन्यतेतस्यनिवारणंजनः १५

शासतस्तवमहानयंव्यतिक्रमःअन्यायः कुतइत्यतआह यस्यवाक्यतोअयमेवधर्मोमुख्यइतिस्थितः इतरःप्राकृ
तोजनःतस्यकाम्यकर्मादेरन्येनतत्त्वज्ञेनक्रियमाणंनिवारणंस्वयमेववाश्रेयेक्रियमाणं यद्वा नकर्मणानप्रजयाध
नेनत्यागेनैकेअमृतत्वमानशुरित्यादिश्रुत्यादिश्रुत्याक्रियमाणंनिवारणंयथार्थमेतदितिनमन्यतेकिंतुप्रवृत्तिमा
र्गानधिकृतविषयंतदितिकल्पयति तदुक्तंमतांतरोपन्यासेभट्टैः तत्रैवंशक्यतेवक्तुंयेन्येपंग्वादयोनराः गृहस्थ
त्वंनशक्यंतेकर्तुंतेषामयंविधिः१नैष्ठिकब्रह्मचर्यंवापरिव्राजकतापिवा तैरवश्यंगृहीतव्यातेनादावेतदुच्यतेइत्या
दि १५ १७

भा
1981

ननुयद्येवंप्रवृत्तिमार्गोनिंद्यतेतर्हिनिवृत्तिमार्गेसर्वक्रियात्यागेनैवपरमेश्वरसुखस्वरूपानुभूतेःकिंतद्यशःकथनेनापि
तत्राह विचक्षणोऽतिनिपुणःकश्चिदेवनिवृत्तितःसर्वक्रियानिवृत्त्यास्यविभोःसुखंनिर्विकल्पकसुखात्मकंस्वरूपंज्ञातुं
अर्हति नपुनरविचक्षणःप्रवृत्तिस्वभावःविमुखत्वेहेतुःनअंतःकालतःपारंचदेशतोयस्यतस्यविभोश्चेष्टितं ततःकार
णात्हेविभोअनात्मनोदेहाद्यभिमानिनःअतएवगुणैःसत्वादिभिःप्रवर्तमानस्यजनस्यदर्शयभवानितित्वमित्य
र्थः पाठांतरेहेभवन्दर्शयतिसंबोधनं १६ एवंतावत्काम्यकर्मादेरनर्थहेतुत्वात्तद्विहायहरेर्लीलैववर्णनीयेत्युक्तं इदानीं

विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं प्रवर्तमानस्यगुणैरनात्म
नस्ततोभवान्दर्शयचेष्टितंविभोः १६ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथप
तेत्ततोयदि यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोभजतांस्वधर्मतः १७

तुनित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्यकेवलंभक्तिरेवोपदेष्टव्येत्याशयेनाह त्यक्त्वेति ननुस्वधर्मत्यागेनभजन्
भक्तिपरिपाकेनयदिकृतार्थोभवेत्तदानकाचिच्चिंता यदिपुनरपक्वएवम्रियतेततोभ्रश्येद्वा तदास्वधर्मत्यागनि
मित्तोनर्थःस्यादित्याशंक्याह ततोभजनात्पतेत्कथंचिद्भ्रश्येत्म्रियेतवायदितदाअपिभक्तिरसिकस्यकर्मानधिकारा
न्नानर्थशंका अंगीकृत्याप्याह वाशब्दःकटाक्षेयत्रक्ववानीचयोनावपिअमुष्यभक्तिरसिकस्याभद्रमभूत्किंनाभू
देवेत्यर्थः भक्तिवासनासद्भावादितिभावः अभजद्भिस्तुकेवलंस्वधर्मतःकोवाअर्थआप्तःप्राप्तः अभजतामितिष
ष्ठीतुसंबंधमात्रविवक्षया १७

नतुस्वधर्ममात्रादपिकर्मणापितृलोकइतिश्रुतेः पितृलोकप्राप्तिः फलमस्त्येवतत्राह तस्यैवहेतोः तदर्थंयत्नंकुर्यात्
उपरिब्रह्मपर्यंतंअधस्थावरपर्यंतंभ्रमद्भिर्जीवैर्नलभ्यते तुपूर्ववत् तत्तुविषयसुखं अन्यत एवप्राचीनकर्मणासर्व
त्रनरकादावपिलभ्यतेदुःखवत् यथादुःखंप्रयत्नंविनापिलभ्यतेतद्वत् तदुक्तं अप्रार्थितानिदुःखानियथैवायांतिदे
हिनां सुखान्यपितथामन्येदैन्यमत्रातिरिच्यतेइति १८ यदुक्तंयत्रक्कवाभद्रमभूदितितदुपपादयति अथवा ननु
परमेश्वरसेवाया अपिकर्मत्वादितरकर्मवत्संसारहेतुत्वमितिचेत्तत्राह नवाइतिमुकुंदसेवीजनः जातुकदाचित्क
थंचनकुयोनिगतोपिसंसृतिंनाप्नजेत्नाविशेत् अंगअहोअन्यवत्केवलकर्मनिष्ठवदितिवैधर्म्यदृष्टांतः ननुयदामुकुं
दसेवांत्यजतितदासंसृतिंव्रजेदितिचेत्तत्राह मुकुंदांघ्र्योरुपगूहनमालिंगनंपुनःस्मरन्विहातुंनेच्छेत् यतोयंजनोरसग्र

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा
१८ नवैजनोजातुकथंचनव्रजेन्मुकुंदसेव्यन्यवदंगसंसृतिं स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः
१९ इदंहिविश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः तद्धिस्वयंवेदभवांस्तथापिवैप्रादेशमात्रंभवतःप्रदर्शितं २०

हःरसेनरसनीयेनविष्णोर्यशसागृह्यतेवशीक्रियते यद्वारसेरसनीयेग्रहआग्रहोयस्यतदुक्तंभगवता यततेचततोभूयः
संसिद्धौकुरुनंदन पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसः इति १९ तदेवंभगवल्लीलांप्राधान्येनवर्णयेत्युक्तं तत्रकोभग
वान्काश्चतस्यलीलाइत्यपेक्षायामाह इदंविश्वंभगवानेव सतुअस्माद्विश्वस्मादितरःईश्वरात्प्रपंचोनपृथक्ईश्वरस्तु
प्रपंचात्पृथगित्यर्थः तत्रहेतुःयतोभगवतोहेतोर्जगतःस्थित्यादयोभवंति अनेनैवलीलाअपिदर्शिता यद्वा इदंविश्वंभ
गवानिवइतरइवइतरःयःसजीवोपिभगवान्चेतनाचेतनप्रपंचस्तद्व्यतिरेकेणनास्ति सएवैकस्तत्त्वमित्यर्थः हिशब्देन
सर्वंखल्विदंब्रह्मेत्यादिप्रमाणंसूचितं तद्धिस्वयमेवभगवान्वेद प्रादेशमात्रमेकदेशमात्रंआचार्यवान्पुरुषोवेदेत्या १८
दिश्रुत्यर्थसंपादनायप्रदर्शितं २०

43/1981

नचतवाचार्यापेक्षाईश्वरावतारत्वादित्याह त्वमिति हेअमोघदृक् आत्मनास्वयंआत्मानमजमेवसंतंजगतःशिवायप्र
जातमवेहि कुतः परस्यपुंसःकलांअंशभूतंतत्तस्मान्महानुभावस्यहरेरभ्युदयःपराक्रमःअधिअधिकंगण्यतांनिरूप्य
तां २१ अनेनैवतपआदिसर्वंतवसफलंस्यादित्याह इदंहीतिश्रुतादयोभावनिष्ठा इदमेवहितपःश्रवणादेरविच्युतोनि
त्योऽर्थःफलंकिंतत् उत्तमश्लोकस्यगुणानुवर्णनमितियत् २२ तत्संगतोहरिकथाश्रवणादिफलंस्वचरितेनप्रपंचयति

त्वमात्मनात्मानमवेह्यमोघदृक्परस्यपुंसःपरमात्मनःकलां अजंप्रजातंजगतःशिवायतन्महानुभावाभ्युदयो
धिगण्यतां २१ इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः अविच्युतोर्थःकविभिर्निरूपितोयदुत्त
मश्लोकगुणानुवर्णनं २२ अहंपुरातीतभवेभवंमुनेदास्यास्तुकस्याश्चनवेदवादिनां निरूपितोबालकएवयोगि
नांशुश्रूषणेप्रावृषिनिर्विविक्षितां २३ तेमय्यपेताखिलचापलेर्भकेदांतेधृतक्रीडनकेनुवर्तिनि चक्रुःकृपांय
द्यपितुल्यदर्शनाःशुश्रूषमाणेमुनयोल्पभाषिणि २४ उच्छिष्टलेपाननुमोदितोद्विजैःसकृत्स्मभुंजेतदपास्तकिल्बि
षः एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मएवात्मरुचिःप्रजायते २५

अहंपुरापूर्वकल्पे अतीतभवेपूर्वजन्मनि वेदवादिनांदास्याःसकाशादभवंजातोस्मि निरूपितःनियुक्तः कयोगिनांशु
श्रूषणेप्रावृषिवर्षोपलक्षिते चातुर्मास्येनिर्विविक्षतांनिर्वेशंएकत्रवासंकर्तुमिच्छतां २३ अपेतान्यखिलानिचापलानिय
स्मात्तस्मिन्नियतेंद्रिये अधृतक्रीडनकेत्यक्तक्रीडासाधने अनुवर्तिनि अनुकूले २४ उच्छिष्टलेपानपात्रलग्नान्ते
द्विजैरनुज्ञातःसन्सकृत्एकवारंभुंजेस्मतेनभोजनेनापस्तकिल्बिषोजातोस्मि तेषांधर्मेपरमेश्वरभजनेएवात्म
नोमनसोरुचिःप्रजायतेस्मेत्यनुषंगः २५ श्रीराम जयराम जयजय राम

अशृण्वंश्रुतवानस्मिमेश्रद्धयाममेवश्वतः स्फिटयानत्वन्येनवलाज्जनितया अतोममेत्तस्यापोनरुत्तांप्रियंश्रवोयस्य
तस्मिन् २६ तस्मिन्भगवतिलब्धरुचेर्ममास्खलितामतिरभवेदित्यनुषंगः ययामत्यापरेप्रपंचातीतेब्रह्मस्वरूपमयि
सदसत्स्थूलसूक्ष्मंचैतच्छरीरंस्वमाययास्वविद्ययाकल्पितं ननुवस्तुतोस्तीतितत्क्षणमेवपश्यामीति २७ एवंशुद्धत्वंप
दार्थज्ञानेदेहादिकृतविक्षेपनिवृत्तेस्तत्कारणभूतरजस्तमोनिवर्तिकादृढाभक्तिर्जायतेत्याह इत्थमिति हरेर्यशः शृण्व

तत्रान्वहंकृष्णकथाः प्रगायतामनुग्रहेणाशृणवंमनोहराः ताः श्रद्धयामेऽनुपदंविशृण्वतः प्रियश्रवस्यं
गममाभवद्रुचिः २६ तस्मिंस्तदालब्धरुचेर्महामुनेप्रियश्रवस्यास्खलितामतिर्मम ययाहमेतत्सदसत्स्व
माययापश्येमयिब्रह्मणिकल्पितंपरे २७ इत्थंशरत्प्रावृषिकावृतूहरेर्विशृण्वतोमेऽनुसवंयशोमलं संकी
र्त्यमानंमुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा २८ तस्यैवंमेनुरक्तस्यप्रश्रितस्यहतैनसः श्रद्दधा
नस्यबालस्यदांतस्यानुचरस्यच २९ ज्ञानंगुह्यतमंयत्तत्साक्षाद्भगवतोदितं अन्ववोचन्गमिष्यंतः कृपया
दीनवत्सलाः ३० येनैवाहंभगवतोवासुदेवस्यवेधसः मायानुभावमविदंयेनगच्छंतितत्पदं ३१ राम

तोमेनुसवंत्रिकालंसत्वरजस्तमोपहाभक्तिः प्रवृत्ता २८ तस्यैतिशुद्धत्वंपदार्थस्यदृढाभक्तिमतोमेप्रश्रितस्यविनी
तस्य २९ गुह्यतममितिसाधनभूततत्वज्ञानंगुह्यं तत्साध्यंविविक्तात्मज्ञानंगुह्यतरंतत्प्राप्येश्वरज्ञानंगुह्य
तमंभगवतोदितंभागवतंशास्त्रंअन्ववदन्उपदिष्टवंतः ३० तदेवज्ञानंपूर्वोक्तंत्वंपदार्थज्ञानाद्विवेकेनदर्श
यतियेनैवेति अविदंज्ञातवानहं ३१ श्री राम जय राम जय जय राम १९

45
1981

तत्साधनधर्मरहस्यंसूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितंभेषजंनिवर्तकंसत्वशोधक
मितियावत् किंतत्भगवतिभावितंसमर्पितंयत्कर्मतत्कथंभूतेभगवतिईश्वरेसर्वनियंतरि एवमपिब्रह्मणिअप्र
च्युतेपूर्णरूपे ३२ ननुसंसारहेतोःकर्मणःकथंतापत्रयनिवर्तकत्वं सामग्रीभेदेनघटतइतिसदृष्टांतमाह द्वाभ्यां
उयआमयोरोगःयेनघृतादिनाजायतेतदेवकेवलमामयकारणभूतंद्रव्यंतमामयंनपुनातिननिवर्तयतीत्यर्थः किं
तुचिकित्सितंद्रव्यांतरेर्भावितंसत्पुनात्येवयथा ३३ आत्मविनाशायकर्मनिवृत्तयेकल्पंतेसमर्थाभवंति परेईश्व

एतत्संसूचितंब्रह्मन्तापत्रयचिकित्सितं यदीश्वरेभगवतिकर्मब्रह्मणिभावितं ३२ आमयोयश्चभूतानां
जायतेयेनसुव्रत तदेवत्यामयंद्रव्यंनपुनातिचिकित्सितं ३३ एवंनृणांक्रियायोगाः सर्वेसंसृतिहेतवः त
एवात्मविनाशायकल्पंतेकल्पिताःपरे ३४ यदत्रक्रियतेकर्मभगवत्परितोषणं ज्ञानंयत्तदधीनंहिभक्ति
योगसमन्वितं ३५ कुर्वाणायत्रकर्माणिभगवच्छिक्षयासकृत् गृणंतिगुणनामानिकृष्णस्यानुस्मरंतिच ३६

रेकल्पिताःअर्पिताः संतः तत्रचप्रथमंमहत्सेवाततश्चतत्कृपाततस्तद्धर्मेश्रद्धाततोभगवत्कथाश्रवणंततोभगव
तिरतिः तयाचदेहद्वयविवेकात्मज्ञानं ततोदृढाभक्तिः ततोभगवत्तत्वज्ञानं ततस्तत्कृपयासर्वज्ञत्वादिभगवद्गुणावि
र्भावइतिक्रमोदर्शितः ३४ ननुचज्ञानेनाज्ञानप्राप्तकर्मनाशः तच्चज्ञानंभक्तियोगाद्भवतिकथं कर्मणाकर्मनाशःस्या
त्तत्राह यदत्रेति ३५ भगवदर्पणेनक्रियमाणंकर्मभक्तियोगंजनयतीतिसदाचारेणदृढयति यत्रयदाभगवतःशि
क्षयाकर्माणिकुर्वाणाभवंति तदाश्रीकृष्णस्यगुणनामानिगृणंति अनुस्मरंतिचकृष्णमित्यर्थः इयंभगवच्छिक्षा
यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति ३६ रामकृष्णहरे

कीर्तनंस्मरणरूपभक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह द्वाभ्यां नमइति नमोधीमहिमनसानमनंकुर्वीमहि ३७ अमूर्तिकंमंत्रोक्त
व्यतिरिक्तमूर्तिशून्यंयजतेपूजयति सपुमान्सम्यग्दर्शनोभवति ३८ एवंचकृतवतिहरिःस्वदशांज्ञानादिकंदत्तवानित्याह
इमंस्वनिगमंस्वोपदेशंमयानुष्ठितंआवेक्ष्यज्ञात्वाभावंप्रतिंच ३९ अतस्त्वमप्येवंकुर्वीत्याहत्वमिति अदभ्रं अनल्पं श्रुतंय
स्यहेअदभ्रश्रुतविभोःविश्रुतंयशःप्रख्याहिकथय येनविश्रुतेनबुद्धेनविदांविदुषांबुभुत्सितंबोद्धुमिष्टंसमाप्यतेय

नमोभगवतेतुभ्यंवासुदेवायधीमहि प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिमूर्त्यभिधानेनमंत्रमू
र्तिममूर्तिकं यजतेयज्ञपुरुषंससम्यग्दर्शनःपुमान् ३८ इमंस्वनिगमंब्रह्मन्नावेक्ष्यमदनुष्ठितं अदान्मेज्ञानमै
श्वर्यंतस्मिन्भावंकेशवः ३९ त्वमप्यदभ्रश्रुतविश्रुतंविभोःसमाप्यतेयेनविदांबुभुत्सितं प्रख्याहिदुःखैर्मुहुर
र्दितात्मनांसंक्लेशनिर्वाणमुशंतिनान्यथा ४० इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेव्यासनारदसंवादेपंचमो
ध्यायः ५ सूतउवाच एवंनिशम्यभगवान्देवर्षेर्जन्मकर्मच भूयःपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः १
व्यासउवाच भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव वर्तमानोवयस्याद्येततःकिमकरोद्भवान् २ स्वायं
भुवकयावृत्त्यावर्तितंतेपरंवयः कथंचेदमुदस्राक्षीःकालेप्राप्तेकलेवरं ३ श्रीरामजयरामजयजयराम

नोदुःखैःपीडितानांसंक्लेशशांतिंप्रकारांतरेणनमन्यंते ४० इतिश्रीभागवतेमहापुराणेप्रथमेटीकायांपंचमोध्या
यः व्यासस्यप्रत्ययार्थंचषष्ठेप्राग्जन्मसंभवं स्वभाग्यंनारदंप्राहकृष्णसंकथनोद्भवं १ स्वयमपितथाचिकीर्षुर्गुरू
पदेशानंतरभावितच्चरितंपृच्छतिभिक्षुभिरिति विप्रवसितेदूरदेशगमनेकृतेमतिविज्ञानस्यादेष्टृभिः २ परंवयःउ
त्तरमायुः तेत्वयाकथंवर्तितंनीतं इदमपिदासीपुत्रभूतंकलेवरंउदस्राक्षीःउत्सृष्टवानसि ३ रामकृष्णबा २०

117/1981

एषःकल्पांतलक्षणःकालःतेस्मृतिंकथंनव्यवधात्नखंडितवान् अडागमाभावस्त्वार्षः हियतःएषसर्वस्यनिराकृति
रपलापोयस्मात् ४ अकारुषंकृतवानहं रेफषकारयोर्विश्लेषछंदोनुरोधेन ५ तत्रतावत्किंचित्कालंतत्रैवमातृस्नेहयंत्रि
तोन्यवसमित्याह त्रिभिः एकएवाहमात्मजोयस्याःसायोषित्स्त्रीतिशोच्यामूढेतिचमायानभिज्ञास्नेहानुबंधनेहेतुः ६ किं
करीत्यस्यार्थंप्रपंचयति अस्वतंत्रासा अतोनकल्पानसमर्थाआसीत् दारुमयीयोषेत्येतिपरवश्ये दृष्टांतःतदेवंसास्नेहं

प्राक्कल्पविषयामेतांस्मृतिंतेसुरसत्तम नतेषव्यवधात्काल एषसर्वनिराकृतिः ४ नारदउवाच भिक्षुभिर्वि
प्रवसितेविज्ञानादेष्टृभिर्मम वर्तमानोवयस्याद्येततएतदकारुषं ५ एकात्मजामेजननीयोषिन्मूढाचकिं
करी मय्यात्मजेनन्यगतौचक्रेस्नेहानुबंधनं ६ सास्वतंत्रानकल्पासीद्योगक्षेमंममेच्छती ईशस्यहिवशेलो
कोयोषादारुमयीयथा ७ अहंचतद्ब्रह्मकुलेउषिवांस्तदपेक्षया दिग्देशकालाव्युत्पन्नोबालकःपंचहाय
नः ८ एकदानिर्गतांगेहाद्दुहंतींनिशिगांपथि सर्पोदशत्पदास्पृष्टःकृपणांकालचोदितः ९ तदातदहमी
शस्यभक्तानांशमभीप्सतः अनुग्रहंमन्यमानःप्रातिष्ठंदिशमुत्तरां १० श्री राम जयराजय

चक्रे ७ अहंचदिगादिषु अनभिज्ञोतस्तत्रैवन्यवसमित्याह अहंचतस्मिन्ब्रह्मकुले तस्याःमातुःस्नेहानुबंधस्यापेक्ष
या कदाविरमेदितिप्रतीक्षयेत्यर्थः उषिवान्वासंकृतवान् पंचहायनःपंचवर्षः ८ गेहान्निर्गतांगांदुहंती हतोश
त्प्रत्ययः रोगधुंनिर्गताभित्यर्थः पदापादेन आस्पृष्टः इषदाक्रांतः अदशत् अपादत् ९ तन्मातुर्मरणंशंकल्याणं
अभीप्सतःईशस्यानुग्रहंमन्यमानःप्रातिष्ठंप्रस्थितोस्मि १० राम श्री ७ ७

स्फीतान्जनपदादीनतियातःसन्महद्विपिनमद्राक्षमितिचतुर्थेनान्वयःजनपदादिषुनानागुणदोषयुक्तेषुसमदृष्टिः
सन्गतोदूरमितितात्पर्यार्थःस्फीतान्समृद्धान्जनपदान्देशान् तत्रतस्यांदिशिपुरग्रामव्रजाकरान्तत्रपुराणीराज
धान्यःग्रामाश्चप्रोक्ताः विप्राश्चविप्रभृत्याश्चयत्रचैववसंतिते सतुग्रामइतिप्रोक्तः शूद्राणांवासएवचेति व्रजाः
गोकुलानिआकरारत्नाद्युत्पत्तिस्थानानितान् खेटाः कर्षकग्रामाःखर्वटाःगिरितटग्रामाः चप्रोक्तावा एकतोय
चतुग्रामोनगरंचैकतःस्थितं मिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमितिवाटीःपुगपुष्पादीनांवाटिकाः वनानिस्व

स्फीतान्जनपदांस्तत्रपुरग्रामव्रजाकरान् खेटखर्वटवाटीश्चवनान्युपवनानिच ११ चित्रधातुविचि
त्राद्रीनिभभग्नभुजद्रुमान् जलाशयांछिवजलान्नलिनीःसुरसेविताः १२ चित्रस्वनैःपत्ररथैर्विभ्रम
द्भ्रमरश्रियः नलवेणुशरस्तंबकुशकीचकगह्वरं १३ एकएवातियातोहमद्राक्षंविपिनंमहत् घोरंप्रति
भयाकारंव्यालोलूकशिवाजिरं १४ परिश्रांतेंद्रियात्माहंतृट्परीतोबुभुक्षितः स्नात्वापीत्वाहृदेनद्याउपस्पृ

तःसिद्धवृक्षाणांसमूहांउपवनानिरोपितवृक्षाणांवनानिच ११ चित्रैर्धातुभिस्वर्णरजताद्यैः चित्रितानद्रींश्च इभै
र्भग्नाभुजाःशाखायेषांतेद्रुमाएषुतान्शिवानिभद्राणिजलानियेषांतान् नलिनीःसरसीः १२ चित्राःस्वनाःएषां
तैपत्ररथैःपक्षिभिःतन्नादप्रबुद्धैरित्यर्थः विभ्रमद्भिःभ्रमरैःश्रीशोभायासांताःनलिनीःअतियातःअतिक्रम्य
गतःसन्महद्विपिनंवनमद्राक्षं कीदृशंनलवेणुशराणांस्तंबैःकुशैःकीचकैश्चगह्वरंदुर्गमं तत्रवेणुजातयएवविपु
लांतरालगर्भाःकीचकाः१३ घोरंदुःसहंप्रतिभयाकारं भयंकररूपंव्यालादीनामजिरंक्रीडास्थानं १४ परिश्रांता 21
निइंद्रियाणिआत्मादेहश्चयस्य तृषापरीतोव्याप्तःउपस्पृष्टः १५ राम कृष्ण हरे

पिप्पलोपस्थेअश्वत्थमूलेआश्रितःउपविष्टःआत्मनाबुद्ध्याआत्मस्थंआत्मानंपरमात्मानं १६ भावेनभक्त्यानिर्जितंव
शीकृतंचेतःतेन औत्कंठ्येनाश्रुकलायुक्तेअक्षिणीयस्य १७ प्रेम्णोतिभरेणनिर्भिन्नपुलकान्यंगानियस्य आनंदस्या
संप्लवेमहापूरेपरमानंदेउभयंआत्मानंपरंच १८ मनसःकांतमभीष्टंशुक्शोकःतमपहंतीतितत् उत्तस्थेउत्थितोस्मि
१९ हृदिमनःसमाधायस्थिरीकृत्य अवितृप्तोहमातुरइव अभवमितिशेषः २० गिरांअगोचरःसंवेदनस्याविषयश्च

तस्मिन्निर्मनुजेरण्येपिप्पलोपस्थआश्रितः आत्मनात्मानमात्मस्थंयथाश्रुतमचिंतयं १६ ध्यायतश्चरणां
भोजंभावनिर्जितचेतसा औत्कंठ्याश्रुकलाक्षस्यहृद्यासीन्मेशनैर्हरिः १७ प्रेमातिभरनिर्भिन्नपुलकांगो
तिनिर्वृतः आनंदसंप्लवेलीनोनापश्यमुभयंमुने १८ रूपंभगवतोयत्तन्मनःकांतंशुचापहं अपश्यन्सहसो
त्तस्थेवैक्लव्याद्दुर्मनाइव १९ दिदृक्षुस्तदहंभूयःप्रणिधायमनोहृदि वीक्षमाणोपिनापश्यमवि
तृप्तइवातुरः २० एवंयतंतंविजनेमामाहागोचरोगिरां गंभीरश्लक्ष्णयावाचाशुचःप्रशमयन्निव २१ हं
तास्मिञ्जन्मनिभवानमांद्रष्टुमिहार्हसि अविपक्वकषायाणांदुर्दर्शोहंकुयोगिनां २२ सकृद्यद्दर्शितंरूपमे
तत्कामायतेनघ मत्कामःशनकैःसाधुसर्वान्मुंचतिहृच्छयान् २३ सत्सेवयादीर्घयापिजातामयिदृढा
मतिः हित्वावद्यमिमंलोकंगंतामज्जनतामसि २४ श्रीगजानन श्रीराम

तदीश्वरः २१ हंतेतिसानुकंपसंबोधनेमाइतिमां द्रष्टुंनार्हसि यतःनविपक्वाःदग्धाकषायामलाःकामादयोयेषांतेते
षांकुयोगिनांअनिष्पन्नयोगानां २२ कुतस्तर्हिदृष्टोसितत्राह सकृद्दर्शितंमयेतियत् एतत्कामायमय्यनुरागाय तत्का
मेनकिमित्यतआह मत्कामःपुमान्हृच्छयान्कामान् २३ अदीर्घयापिसतांसेवयाअवद्यंनिंद्यंलोकंदेहंमज्जनतांमत्पा
र्षदतांगंतासि २४

प्रजानांसर्गेसृष्टौनिरोधेसंहारेपिप्रजासर्गस्यनिरोधइतिवा २५ तत्प्रसिद्धंमहद्भुतं अस्यमहतोभूतस्यनिश्वसितमेतदृग्वे
दादिइत्यादिश्रुतेः कीदृशंईश्वरंसर्वनियंतारंनभसिलिंगंमूर्तिर्यस्यतन्नभोलिंगंनन्निहितमपिलिंग्यतइतिअलिंगंतस्मै
अदृष्टायवनामंप्रणामंविदधेकृतवानहं तेनानुकंपितःसन् २६ हतत्रपःत्यक्तलज्जाःविमत्सरोजातोस्मीतिशेषः २७ का
लेस्वावसरे प्रारब्धकर्मक्षयेकालोमृत्युः प्रादुरभूत् आविर्बभूव अकस्मात्प्रादुर्भवे दृष्टांतः विद्युदिवेतिसौदामिनीतिविशे
षणंस्फुरत्वप्रदर्शनार्थंसुदामामालातत्रभवसौदामिनीमालाकारेत्यर्थः यद्वा सुदामापर्वततते नैकदिगितिसूत्रेणाण्स्फ

मतिर्मयिनिबद्धेयंनविपद्येतकर्हिचित् प्रजासर्गनिरोधेपिस्मृतिस्तेमदनुग्रहात् २५ एतावदुक्त्वोपरराम तन्म
हद्भुतंनभोलिंगमलिंगमीश्वरं अहंतस्मैमहतांमहीयसेशीर्ष्णावनामंविदधेनुकंपितः २६ नामान्यनंतस्यहत
त्रपःपठन्गुह्यानिभद्राणिकृतानिचस्मरन् गांपर्यटंस्तुष्टमनागतस्पृहःकालंप्रतीक्षन्विमदोविमत्सरः २७
एवंकृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः कालःप्रादुरभूत्कालेतडित्सौदामिनीयथा २८ प्रयुज्यमानेमयितां
शुद्धांभागवतींतनुं प्रारब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः २९

टिकादिमयपर्वतप्रांतेभावात्हि विद्युदतिस्फुटाभवतितद्वदित्यर्थः यद्वा तडिदिति अंतिकइत्यर्थः तडिदंतिकयोरितिनिरु
क्तस्मरणात् २८ प्रयुज्यमानेमयिमित्यर्थः अयमर्थः हित्वावद्यमिमंलोकंगंतामज्जनतामसीतियाभागवतीभगवत्पा
र्षदरूपाशुद्धासत्वमयीतनुःप्रतिश्रुतानांप्रतिभगवतामपिप्रयुज्यमानेनीयमाने प्रारब्धंयत्कर्मतन्निर्वाणंसमाप्तंय
स्याआरब्धकर्मणोनिर्वाणमेवनिर्वाणंयस्येति एवंभूतात्मकोदेहोन्यपतत् अनेनपार्षदतनूनामकर्मारब्धत्वंशुद्ध
त्वंनित्यत्वमित्यादिसूचितंभवति २९ नारायणवासुदेवहरे गोविंद नारायण ७ ७

51 / 1831

इदंत्रैलोक्यमादाय उपसंहृत्यउदन्वत एकार्णवस्यांभसिशयानेश्रीनारायणे शिशयिषोःशयनंकर्तुमिच्छोर्विभोर्ब्रह्मणःअं
तःमध्यंअनुप्राणंनिश्वासेनसहविविशेप्रविष्टोहं ततोवतीर्यविश्वात्मादेहमाविश्यचक्रिणः अवापवैष्णवींनिद्रामित्येकीभू
याथविष्णुनेतिकूर्मोक्तेः स्वायनेभसिपाठेस्वायनेस्वस्यायनेंभसिशिशयिषोःब्रह्मणइतिनारायणेनाभेदविवक्षयोक्तम्भि
क्षिगमयितव्यं ३० प्राणेभ्यः इंद्रियेभ्यःअहंमरीचिमिश्राःतन्मुख्याऋषयश्चजज्ञिरे ३१ येकार्मिणस्तेबहिर्नयांतितपआ
दिभिर्ब्रह्मलोकंगतास्तेंतर्नयांति अहंतुमहाविष्णोरनुग्रहात् अखंडितब्रह्मचर्यव्रतःसन् अंतर्बहिश्चपर्यमिकचिदपि

कल्पांतइदमादायशयानेंभस्युदन्वतः शिशयिषोरनुप्राणंविविशेंतरहंविभोः ३० सहस्रयुगपर्यंतउत्थायेदंसि
सृक्षतः मरीचिमिश्राऋषयःप्राणेभ्योहंचजज्ञिरे ३१ अंतर्बहिश्चलोकांस्त्रीन्पर्येम्यस्कंदितव्रतः अनुग्रहान्म
हाविष्णोरविघातगतिःक्वचित् ३२ देवदत्तामिमांवीणांस्वरब्रह्मविभूषितां मूर्छयित्वाहरिकथांगायमानश्चराम्य
हं ३३ प्रगायतःस्ववीर्याणितीर्थपादःप्रियश्रवाः आहूतइवमेशीघ्रंदर्शनंयातिचेतसि ३४ एतद्ध्यातुरचित्ता
नांमात्रास्पर्शेच्छयामुहुः भवसिंधुप्लवोदृष्टोहरिचर्यानुवर्णनं ३५

अविघाताअप्रतिहतागतिर्यस्यसः ३२ किमितिपर्यटसिईश्वराज्ञयालोकमंगलार्थमित्याह चतुर्भिः देवेनईश्वरेणदत्तांस्व
राः निषादर्षभगांधारषड्जमध्यमधैवतपंचमइति सप्तत एवब्रह्मब्रह्माभिव्यंजकत्वात्तेनविभूषितांसतःमिद्धां सप्त
भस्वरामित्यर्थःमूर्छयित्वामूर्छनालापवतींकृत्वा ३३ स्वप्रयोजनमाह प्रगाय तइतिचेतसिकृतेदर्शनंयातिचक्षुर्विषयोभ
वति ३४ परंप्रयोजनमाह एतद्धीति मात्राःविषयाःतेषांस्पर्शाःभोगाःतेषामिच्छया आतुराणिचित्तानियेषांहरिचर्यानुव
र्णनंयत् एवदेवभवसिंधोःप्लवःपोतं नकेवलंश्रुतिप्रामाण्येन किंत्वन्वयाव्यतिरेकाभ्यांदृष्टएवेत्यर्थः ३५ राम

एतदेवेत्युक्तमवधारणमनुभवेन दृढयति दर्शयति यमादिभिस्तथा न शाम्यति तद्यथा मुकुंदसेवया अद्धा साक्षादात्मा
मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेण शाम्यति किंपुनस्तद्गुणवर्णनेनेति भावः ३६ भवतो मनः परितोषकं व्याख्या
तं ३७ आमंत्र्य अनुज्ञाप्य याहृच्छिकः स्वयोजनसंकल्पशून्यः ३८ हरिकथागायक भाग्यं श्लाघ्यते अहो इति माद्यन्
तृष्यन् तंत्र्या वीणया ३९ इति प्रथमे टीकायां षष्ठः अथ भागवतं श्रोतुर्जन्मवकुं परीक्षितः सुप्तबालवधाद्द्रोणेर्दंडः

यमादिभिर्योगपथैः कामलोभहतो मुहुः मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ३६ सर्वं तदिदमाख्यातं
यत्पृष्टोहं त्वयानघ जन्मकर्म रहस्यं मे भवतश्चात्मतोषणं ३७ सूतउवाच एवं संभाष्य भगवान् नारदो वा
सवीसुतं आमंत्र्य वीणां रणयन् ययौ याहृच्छिको मुनिः ३८ अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः गा
यन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ३९ इति श्रीभागवते महापुराणे प्रथमस्कंधे व्यासनारदसंवादे षष्ठो
ध्यायः ६ शौनक उवाच निर्गते नारदे सूत भगवान्बादरायणः श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः १
सूतउवाच ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे शम्याप्राश इति प्रोक्तो ऋषीणां सत्रवर्द्धनः २ तस्मि
न्स्व आश्रमे व्यासो बदरीखंडमंडिते आसीनोप उपस्पृश्य प्रणिदध्यो मनः स्वयं ३ भक्तियोगेन मनसि स
म्यक् प्रणिहितेमले अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयां ४ श्रीरामजयराम जयजयराम वासुदेव

सप्तम उच्यते १ तस्य नारदस्य अभिप्रेतं श्रुतवान्सन् १ ब्रह्मनद्यां ब्रह्मदेवत्यायां ब्राह्मणैरन्वितायां वा सत्रं कर्म
वर्द्धयतीति वा बदरीणां खंडेन समूहेन मंडिते मनः प्रणिदध्यो स्थिरीचकार समाधिना तु स्मरतत् द्विचेष्टितमिति ना
रदोपदिष्टं ध्यानं कृतवानित्यर्थः ३ प्रणिहिते निश्चले तत्र हेतुः भक्तियोगेनामले पूर्वं प्रथमं पुरुषं ईश्वरं प्रपश्यत्
पूर्णमिति पाठः तदुपाश्रयां ईश्वराश्रयां तदधीनां मायां वापश्यत् ४ श्री श्री राम २३

53/1981

ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह यया संमोहितः स्वरूपावरणेन विक्षिप्तः परोपि गुणत्रयाद्व्यतिरिक्तोपि
तत्कृतं गुणत्रयाभिमानकृतं अनर्थं च कर्तृत्वादिकं प्राप्नोति ५ अनर्थमुपशामयति यो धोक्षजे साक्षाद्भक्तियोगः तं वा पश्य
त् एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्यार्थे सात्वसंहितां श्रीभागवताख्यां चक्रे तदनेन श्लोकत्रयेण भागवतार्थः संक्षेप
तो दर्शितः एतदुक्तं भवति विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदः स्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्माय
या संमोहितस्तिरोभूतस्वरूपं तद्विपरीतधर्मा जीवः तस्य च ईश्वरभक्त्या लब्धज्ञानेन मोक्ष इति तदुक्तं विष्णुस्वामिना ह्ला
दिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः १ तथा स ईशो यद्वशे माया स जीवो य

यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते ५ अनर्थोपशमं साक्षाद्भक्ति
योगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ६ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे भक्ति
रुत्पद्यते पुंसः शोकमोहजरापहा ७ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं शुकमध्यापयामास निवृत्ति
निरतं मुनिः ८ शौनकउवाच स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः कस्य वा महतीमेतामात्मारामः समभ्य
सत् ९ सूतउवाच आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः १०

स्तयार्दितः स्वाविर्भूतपरानंदः स्वाविर्भूतः सुद्धः स्वप्रः स्वादृगुत्थविपर्यासभवभेदजभीशुचः यन्मायया जुषन्नास्ते
तमिमं नृहरिं नुम इति ६ संहिताया अनर्थोपशामकत्वं दर्शयति यस्यां श्रूयमाणायामेव किंपुनः श्रुतायामित्यर्थः ७ अनुक्र
म्य शोधयित्वा ८ कस्य वा हेतोर्महती वितता ९ निर्ग्रंथा ग्रंथेभ्यो विनिर्गता तदुक्तं गीतासु यदा ते मोहकलिलं बुद्धिर्व्यतित
रिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति यद्वा ग्रंथिरेव ग्रंथः निर्गतो हृदयग्रंथ इत्यर्थः ननु मुक्तानां किं भ
क्त्येत्यादि सर्वापेक्षपरिहारार्थमाह इत्थंभूतगुण इति १० राम श्री राम जयराम

भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह हरेरिति महदाख्यानं भागवतं अध्यगात् अधीतवा
न् विष्णुजनाः प्रिया यस्येति व्याख्यानादिप्रसंगेन तत्संगतिकाम इति भावः ११ एतेन तस्य पुत्रो महायोगीत्यादिना शुक
स्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं यत्पृष्टं तस्योत्तरमुक्तं यदन्यत्पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं
कथयति यस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरमाह परीक्षित इति विलापनं मुक्तिं मृत्युं वा संस्थां महाप्रस्थानं श्रीकृ
ष्णकथानासु दयो यथा भवति तथा १२ तत्र परीक्षितो जन्म निरूपयिष्यन्नादौ तावत् गर्भस्थ एव अश्वत्थाम्नो ब्रह्मा

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ११ परीक्षितोथरा
जर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं १२ यदा मृधे कौरवसृंजयानां वीरेष्व
थो वीरगतिं गतेषु वृकोदराविद्धगदाभिमर्षण भग्नोरुदंडे धृतराष्ट्रपुत्रे १३ भर्तुः प्रियं द्रौणिरिति स्म
पश्यन् कृष्णासुतानां स्वपतां शिरांसि अपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति १४

स्त्रात् कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति यदेत्यादि यदा द्रौणिरश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांसि उ
पाहरत् तदा तन्माता अरुदत् तां च सांत्वयन् किरीटमाली अर्जुन आहेति तृतीयेनान्वयः कमिति बालानां शिरांसि =
आनीतवानित्यपेक्षायामाह मृधे युद्धे यद्यपि पांडवा अपि कौरवा एव तथापि संसृंजयवंशजो धृष्टद्युम्नः पांडवानां
सेनापतिरिति संसृंजयानामित्युक्तं वीरगतिं स्वर्गं अथो अनंतरं वृकोदरेण आविद्धायाः क्षिप्तायाः गदायाः अभिम
र्षेण घातेन भग्नो उरुदंडो यस्य तथाभूते धृतराष्ट्रपुत्रे दुर्योधने सति १३ भर्तुर्दुर्योधनस्य स्मेति वितर्के इति
एवं प्रियं स्यादिति पश्यन् तस्य तद्विप्रियमेवेति वाक्यांतरं विप्रियत्वे हेतुः जुगुप्सितमिति १४ राम कृष्ण २४

55
1981

घोरं दुःसहं यथा भवति बाष्पस्य कलाभिर्बिंदुभिराकुले अक्षीणि यस्यास्सा किरीटस्यैकत्वेपि तदग्राणां बहुत्वात्किरीट
मालीत्युक्तं १५ शुचः शोकाश्रूणि प्रमृज्यामि परिमार्जयामि यत् यदा ब्रह्मबंधोर्ब्राह्मणाधमस्य आततायिन इति अग्निदो
गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते ह्याततायिन इति स्मरणात् आततायी शस्त्रपाणी तेन च पुत्रहंतृ
त्वं लक्ष्यते गांडिवाद्धनुषो मुक्तैः विशिखैर्बाणैरुपाहरत् त्वत्समीपमानयामि यच्छिर आक्रम्य आसनं विधाय दग्धपुत्रा
सती १६ वल्गवो रम्या विचित्रा जल्पाः भाषणानि तैः य अर्जुनः अच्युत एव मित्रं सूतश्च यस्य दंशितः बद्धकवचः उग्रंध

माताशिश्रूनां निधनं सुतानां निशम्य घोरं परितप्यमाना तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीट
माली १५ तदा शुचस्ते प्रमृजामि भद्रे यत् ब्रह्मबंधोः शिर आततायिनः गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य
यत्स्नास्यसि दग्धपुत्रा १६ इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशित उग्रध
न्वा कपिध्वजो गुरुपुत्रं रथेन १७ तमापतंतं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन पराद्रवत्प्राणपरीप्सुरुर्व्यां याव
द्गमं रुद्रभयाद्यथार्कः १८

न्वा आपं यस्य कपिर्हनुमान् ध्वजे यस्य सः गुरोः पुत्रं रथेन अन्वाद्रवत् अन्वधावत् १७ आपतंतं आधावंतं स द्रौणिः कुमारहा बा
लघाती उद्विग्नमनाः कंपितहृदयः प्राणपरीप्सुः प्राणान् लब्धुमिच्छुर्नंतुं कीर्तिं यावद्गमं यावद्गंतुं शक्यं तावदुर्व्यां पराद्रवत्
अपलायत कः अस्माद्यथा मृगो भूत्वा सुतं ग्रसितुमुद्यतः सन् रुद्रस्यार्भकः यातु यथा मृगो भूत्वा पलायते स्म अर्क इति पाठे वाम
नपुराणे कथा सूचिता तथाहि विद्युन्माली नाम कश्चित्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोसावर्कस्य पृष्ठ
तो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् ततोर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितं तद्दृष्ट्वा कुपितरुद्रभयादर्कः
पर्याद्रवत् ततो क्रूरदृष्ट्या दृश्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जात इति १८ राम कृष्ण वासुदे

भा०
२५

अशरणंरक्षकरहितं ननुपलायनमेवरक्षकमस्ति नतस्यापिकुंठितत्वादित्याह श्रांतवाजिनोयस्यतं ब्रह्माशीरोस्त्रंब्रह्मा प्र०
स्त्रंद्विजात्मजइत्यदीर्घदर्शितमाह १९ ततब्रह्मास्त्रंसमाहितःकृतध्यानःउपसंहामजानतोपिसंधानेहेतुःप्राणकृछ्र
इति २०७ ततःअस्मात्सर्वतोदिशंप्रादुष्कृतंप्रकटीभूतं तेजोभिप्रेक्ष्यततःप्राणापहंवाभिप्रेक्ष्य २१ सुतंविज्ञाययितुंप्रथ
मंस्तौति श्रीकृष्णेतिचतुर्भिःसंस्तैर्हेतार्दह्यमानानांतस्य अपवर्गोपवर्जथितानाशकइत्यर्थः २२ यतस्त्वमीश्वरःसाक्षा
कुतः प्रकृतेःपरःपुरुषःतत्कुतःयतःआद्यःकारणंकारणत्वेप्यविकारितामाह मायांव्युदस्य अभिसत्यंकैवल्यरूपेआ

यदाशरणमात्मानंऐक्षतश्रांतवाजिनं अस्त्रंब्रह्मशिरोमेने आत्मत्राणंद्विजात्मजः १९ अथोपस्पृश्यसलिलंसंद
ध्येतत्समाहितः अजानन्नपिसंहारंप्राणकृच्छ्रउपस्थिते २० ततःप्रादुष्कृतंतेजःप्रचंडंसर्वतोदिशं प्राणापहम
भिप्रेक्ष्यविष्णुंजिष्णुरुवाचह २१ अर्जुनउवाच कृष्णकृष्णमहाभागभक्तानामभयंकर त्वमेकोदह्यमानानामप
वर्गोसिसंसृतेः २२ त्वमाद्यःपुरुषःसाक्षादीश्वरःप्रकृतेःपरः मायांव्युदस्यचिच्छक्त्याकैवल्येस्थितआत्मनि २३
सएवजीवलोकस्यमायामोहितचेतसः विधत्सेस्वेनवीर्येणश्रेयोधर्मादिलक्षणं २४ तथायंचावतारस्तेभुवोभा
रजिहीर्षया स्वानांचानन्यभावानामनुध्यानायचासकृत् २५ किमिदंस्वित्कुतोवेतिदेवदेवनवेम्यहं सर्वतो
मुखमायातितेजःपरमदारुणं २६

त्मन्यवस्थितइति २३ त्रिवर्गदातापित्वमेवेत्याह सइति यस्त्वंमायामभिभूयस्थितःसएवमायाभिभूतस्यजनस्यधर्मा
दिफलमुपासितःसन्विधत्सेवीर्येणप्रभावेन २४ तथाचानेनावतारेणतवसाधुपक्षपातोलक्ष्यतइत्याह तथेति किंभू
भारहरणं मदिच्छामात्रेणनभवतितत्राह स्वानांज्ञातीनामनुध्यानायच तथानन्यभावानांएकांतभक्त्यानांच २५
एवंस्तुत्वाप्रस्तुतंविज्ञापयति किमात्मकमिदंकुतोवाआयातीतिस्वित्वितर्के २६ रामकृष्णहरिरामजयजयराम २५

57/1981

इदंद्रोणपुत्रस्यब्राह्ममस्त्रंतेनचप्राणबाधेप्राप्तेप्रदर्शितंकेवलं नतुतत्प्रयोगेकुशलइत्यर्थः यतोसावुपसंहारंनवेद ए
तच्चत्वंवेत्थजानासि २७ प्रत्यवकर्षणंकृषलकरंनिवर्तकमित्यर्थः अतःपरस्त्रतेजःउन्नद्धंउत्कटंब्रह्मास्त्रतेजसैवजहिघात
य तत्प्रयुक्तंचास्त्रंतदुपसंहृत्यस्वयमुपशाम्येत् यतस्त्वमस्त्रज्ञोसि २८ परेयात्रवस्तएववीरास्तान्हंतीतितथाफाल्गुनी
अर्जुनःआपःस्पृष्ट्वाआचम्यतंश्रीकृष्णंपरिक्रम्यप्रदक्षिणीकृत्यब्राह्मस्याय ब्रह्मास्त्रंनिवर्तितुं २९ ततउभयोर्ब्रह्मा
स्त्रयोस्तेजसीशरैःसंहतेसंवेष्टितेपरस्परंमिलित्वाववृधाते अवर्धतां किंकृत्वारोदसीद्यावापृथिव्यौ खमंतरिक्षमावृ

श्रीभगवानुवाच वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितं नैवासौवेदसंहारंप्राणबाधउपस्थिते २७ नह्यस्यान्य
तमंकिंचिदस्त्रंप्रत्यवकर्षणं जह्यस्त्रतेजउन्नद्धमस्त्रज्ञोस्यस्त्रतेजसा २८ सूतउवाच श्रुत्वाभगवताप्रोक्तंफाल्गु
नःपरवीरहा स्पृष्ट्वापस्तंपरिक्रम्यब्राह्मंब्राह्मास्त्रायसंदधे २९ संहत्यान्योन्यमुभयोस्तेजसीशरसंवृते आवृत्य
रोदसीखंचववृधातेर्कवह्निवत् ३० दृष्ट्वास्त्रतेजस्तुतयोस्त्रीन्लोकान्प्रदहन्महत् दह्यमानाःप्रजाःसर्वाःसां
वर्तकममंसत ३१ प्रजोपप्लवमालक्ष्यलोकव्यतिकरंचलं मतंचवासुदेवस्यसंजहारार्जुनोद्वयं ३२ ततआसा
द्यतरसादारुणंगौतमीसुतं बबंधामर्षताम्राक्षःपशुंरशनयायथा ३३

त्य यथाप्रलयेसंकर्षणमुखाग्निरूपस्थितोर्कसंहत्यवर्द्धेतेतद्वत् ३० तयोर्द्रौणिफाल्गुनयोःतेनदह्यमानाःसांव
र्तकंप्रलयाग्निंअमंसतमेनिरे ३१ लोकानांव्यतिकरंव्यत्ययंनाशमित्यर्थः वासुदेवस्यमतंचालक्ष्यब्रह्मास्त्रद्वयमुप
संहृतवान् ३२ गौतमवंशजागौतमीतस्याःसुतंअमर्षणकोपेनताम्रेअक्षीणियस्यसः निष्कृपत्वेदृष्टांतः पशुंय
थेति तस्यबंधनंधर्मइत्यत्रवादृष्टांतः यथायाज्ञिकंपशुमितिरशनयारज्वा ३३ रामकृष्णहरेवासुदेवहरे

शोकरोषादियुक्तस्याप्यर्जुनस्यधर्मनिष्ठारव्यापनायश्रीकृष्णवाक्यंतदाह षड्भिः शिबिरायराजनिवेशायनेतुमिछंतं
प्रकुपितइवेति ३५ रिपोरपिसुप्तस्यबालस्यचवधोनधर्मइत्यन्यार्थैर्दर्शयति मत्तंमद्यादिना प्रमत्तंअनवहितंग्रहवा
तादिनाम्स्त्रियंस्त्रीनामानं जडंअनुद्यमंप्रपन्नंशरणागतं विरथंभग्नरथं ३६ तद्वधोदंडरूपस्तस्यैवश्रेयःपुरुषार्थःयः
पुमान्सप्राणान्परप्राणैःपरधनापहरणेनकन्याविक्रयेणवाप्रपुष्णातिधनंबाह्यप्राणमितिश्रुतेः अतएवतद्वधस्त
स्यैवहितकरः यद्यतोदंडप्रायश्चित्तरहिताद्दोषात्सपुमानधोयातीतितथाचस्मरंति राजभिःकृतदंडास्तुकृत्वापापानि

शिबिरायनिनीशंतंदाम्नाबध्वारिपुंबलात् प्राहार्जुनंप्रकुपितोभगवानंबुजेक्षणः ३४ श्रीभगवानुवाच
मैनंपार्थार्हसित्रातुंब्रह्मबंधुमिमंजहि योसावनागसःसुप्तानवधीन्निशिबालकान् ३५ मत्तंप्रमत्तमुन्म
त्तंसुप्तंबालंस्त्रियंजडं प्रपन्नंविरथंभीतंनरिपुंहंतिधर्मवित् ३६ स्वप्राणान्यःपरप्राणैःप्रपुष्णात्यघृणः
खलः तद्वधस्तस्यहिश्रेयोयद्दोषाद्यात्यधःपुमान् ३७ प्रतिश्रुतंचभवतापांचाल्यैशृण्वतोमम आह
रिष्येशिरस्तस्ययस्तेमानिनिपुत्रहा ३८ तदसौवध्यतांपापआततायात्मबंधुहा भर्तुश्चविप्रियंवीरकृत
वान्कुलपांसनः ३९ एवंपरीक्षिताधर्मंपार्थःकृष्णेनचोदितः नैछद्धंतुंगुरुसुतंयद्यप्यात्महनंमहान् ४०
अथोपेत्यस्वशिबिरंगोविंदप्रियसारथिः न्यवेदयत्तंप्रियायैशोचंत्यैआत्मजान्हितान् ४१ तथाहृतंपशुव
त्पाशबद्धमवाङ्मुखंकर्मजुगुप्सितेन निरीक्ष्यकृष्णापकृतंगुरोःसुतंवामस्वभावाकृपयाननामच ४२

मानवाः विधूतकल्मषायांतिस्वर्गंसुकृतिनोयथाइति ३७ ३८ ३९ यद्यपिचोदितःतथापिहंतुंनैछत् आत्महनंपुत्रहं
तारमपियतोमहान्धर्मज्ञः ४१ गोविंदप्रियःसारथिर्यस्यसःआत्मजान्शोचंत्यै ४१ तथापरिभवेनाहृतमानीतंक
र्मणाजुगुप्सितेनदोषेणावाङ्मुखंअपकृतंअपकारिणंकृपयानिरीक्ष्यवामःशोभनःस्वभावोयस्याःसा ४२

२६

५९
१९८१

ननामचउवाचेतिचकाराभ्यांसंभ्रमःसूचितः बंधनेनानयनंअसहमाना ४३ सरहस्यः गोप्यमंत्रसहितःविसर्गो
स्त्रप्रयोगःउपसंयमउपसंहारः ताभ्यांसहितोअस्त्रसमूहश्च ४४ किंच तस्यद्रोणस्यात्मादेहस्तस्यार्द्धरूपीआस्ते
अर्द्धत्वेहेतुः पत्नी अर्द्धोवाएषआत्मनोयत्पत्नीतिश्रुतेः जायापतीअग्निमादधीयतांइतिश्रुतेः उभयोरेककारक
त्वावगमाच्च ननुयद्युभयोरेककारकत्वंतर्हिभर्तरिमृतेसाकथंजीवतितत्राह नान्वगाद्भर्तारंयतोवीरसूःपुत्रवती
४५ तत्तस्माद्गौरवंगुरोःकुलंभवद्भिःकर्तृभिर्वृजिनंदुःखंप्राप्तुंनार्हति किंतुपूज्यंवंद्यंच ४६ मृतवत्सामृतपुत्राविप

उवाचचासहंत्यस्यबंधनानयनंसती मुच्यतांमुच्यतामेषःब्राह्मणोनितरांगुरुः ४३ सरहस्योधनुर्वेदः
सविसर्गोपसंयमः अस्त्रग्रामश्चभवताशिक्षितोयदनुग्रहात् ४४ सएषभगवान्द्रोणःप्रजारूपेणवर्त
ते तस्यात्मनोर्द्धंपत्न्यास्तेनान्वगाद्वीरसूःकृपी ४५ तद्धर्मज्ञमहाभागभवद्भिर्गौरवंकुलं वृजिनंनार्हतिप्रा
प्तुंपूज्यंवंद्यमभीक्ष्णशः ४६ मारोदीत्तस्यजननीगौतमीपतिदेवता यथाहंमृतवत्सार्तारोदिम्यश्रुमुखीमु
हुः ४७ यैःकोपितंब्रह्मकुलंराजन्यैरजितात्मभिः तत्कुलंप्रदहत्याशुसानुबंधंशुचार्पितं ४८ सूतउवाच
धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत् राजाधर्मसुतोराज्ञाःप्रत्यनंदद्वचोद्विजाः ४९ श्रीरामजयराम

क्षेदोषमाह ४७ यैरिति येषांराजन्यानांकुलंकर्मभूतं सानुबंधंसपरिवारं शुचाशोकेनार्पितंव्याप्तंचब्रह्मकुलंक
र्तृप्रदहति ४८ धर्ममित्यादयोवचसःषड्गुणाःपूर्वषट्कश्लोकेद्रष्टव्याःतत्रधर्मंधर्मादनपेतंमुच्यतामितिन्या=
य्यंपादनपेतंसरहस्यइत्यादि सकरुणंतस्यात्मनोर्द्धमिति निर्व्यलीकंनिष्कपटं तद्धर्मज्ञेति समंपक्षपातशून्यंमा
रोदीतिदुःखसाम्योक्तेःमहत्यैःकोपितमितिनिष्ठुरोत्पाहितोपदेशात् एवंभूतंराज्ञाःवचःहेद्विजाःप्रत्यदनंदतअनु
मोदितवान् ४९

उनकुलादयश्चभ्रातरनंदतयुयुधानःसात्यकिः ५० तस्यतथाविधस्यद्रोणेर्वधएवश्रेष्ठः अन्यथानरकपातप्रसंगात् नदा
हभर्तुरितिअहत्वजघान ५१ चतुर्भुजोक्तेरयंभावः भीमेएवहंतुंप्रवृत्तेद्रौपद्यांचसहसातन्निवारणेप्रवृत्तायांउभयोः
संवारणायाविष्कृतचतुर्भुजइति संदिहानस्यसख्युरर्जुनस्य ५२ वधार्हणःवधार्हःमयैवशास्त्रकृता ब्राह्मणोनहंतव्यः
तथाच आततायिनमायांतंअपिवेदांतपारगं जिघांसंतंजिघांसीयात्ननतेनब्रह्महाभवेत् इतिवदता तदुभयमप्यनुशा

नकुलःसहदेवश्चयुयुधानोधनंजयः भगवान्देवकीपुत्रोयेचान्येयाश्चयोषिताः ५० तत्राहामर्षितोभीमस्तस्य
श्रेयान्वधःस्मृतः नभर्तुर्नात्मनश्चार्थेयोहन्सुप्तान्शिशून्वृथा ५१ निशम्यभीमगदितंद्रौपद्याश्चचतुर्भुजः
आलोक्यवदनंसख्युरिदमाहहसन्निव ५२ श्रीकृष्णउवाच ब्रह्मबंधुर्नहंतव्यःआततायीवधार्हणः मयैवोभ
यमाम्नातंपरिपाह्यनुशासनं ५३ कुरुप्रतिश्रुतंसत्यंयत्तत्सांत्वयताप्रियां प्रियंचभीमसेनस्यपांचाल्याम
ह्यमेवच ५४ सूतउवाच अर्जुनःसहसाज्ञायहरेर्हार्दमथासिना मणिंजहारमूर्धन्यंद्विजस्यसहमूर्धजं ५५
विमुच्यरशनाबद्धंबालहत्याहतप्रभं तेजसामणिनाहीनंशिबिरान्निरयापयत् ५६ वपनंद्रविणादानंस्थाना
न्निर्यापणंतथा एषहिब्रह्मबंधूनांवधोनान्योस्तिदैहिकः ५७ पुत्रशोकातुराःसर्वेपांडवाःसहकृष्णया
स्वानांमृतानांयत्कृत्यंचक्रुर्निर्हरणादिकं ५८

सनंपरिपालय ५३ तवचप्रतिज्ञांपूरयेदित्याह प्रियांसांत्वयतात्वयायत्प्रतिश्रुतंहननंतच्चसत्यंकुरु मह्यंमम तत्रवधे
भीमस्यप्रियंभवति अवधेद्रौपद्याः इयश्रीकृष्णस्य ५४ हार्दमभिप्रायंअज्ञायज्ञात्वानत्वशक्यंउभयंविरुध्यात् अ
तोयमभिप्रायइतिज्ञात्वेत्यर्थः असिनाखड्गेनमूर्धन्यंमूर्ध्निजातंसहमूर्धजंसकेशवं ५५ मणिनाहीनं निरयापयत्
निःसारितवान् ५६ अनेनश्रीकृष्णोक्तंसर्वंसंपादितमित्याहवपनमिति देहसंबंधीहस्तपादादिलक्षणः ५७ निर्हर
णंदाहार्थनयनं ५८ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेटीकायांसप्तमोध्यायः ७ श्रीकृष्णार्पण

61
1981

अष्टमेकुपितद्रोणेरस्त्राद्रक्षायरीक्षितः श्रीकृष्णस्यस्तुतिःकुंत्याराज्ञःकोशश्चकीर्त्यते १ तेपांडवाःसंपरेतानांमृतानां
गंगायामुदकंदातुंसकृष्णाश्रीकृष्णेनसहिताःस्त्रियःपुरस्कृत्यअग्रतःकृत्वातस्मिन्कार्येस्त्रीपुरःसरत्वविधानात् २ नि
नायस्त्वा हरिपादाब्जरजोभिःपूतायासरित्गंगातस्याःजलेपुनर्ग्रहणादादावपिस्नाताइतिगम्यते २ कुरुपतिंयुधि
ष्ठिरंसहानुजंभीमादिभिःसहितं ३ मुनिभिःसहितः ४ कितवैःद्यूतेदुर्योधनादिभिर्द्रौपद्याःकचग्रहणादिनाक्षतंन

इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्रौणिनिग्रहोनामसप्तमोध्यायः ७ सूतउवाच अथतेसंपरेता
नांस्वानामुदकमिच्छतां दातुंसकृष्णागंगायांपुरस्कृत्ययपुःस्त्रियः १ तेनिनीयोदकंसर्वेविलप्यचभृशंपुनः
आप्लुताहरिपादाब्जरजःपूतसरिज्जले २ तत्रासीनंकुरुपतिंयुधिष्ठिरंसहानुजं गांधारीपुत्रशोकार्तंपृ
थांकृष्णांचमाधवः ३ सांत्वयामासमुनिभिर्हतबंधून्शुचार्पितान् भूतेषुकालस्यगतिंदर्शयन्नप्रतिक्रियां
४ साधयित्वाजातशत्रोःस्वराज्यंकितवैर्हृतं घातयित्वासतोराज्ञःकचस्पर्शक्षतायुषः ५ याजयित्वाश्व
मेधैस्तंत्रिभिरुत्तमकल्पकैः तद्यशःपावनंकृत्वाशतमन्योरिवातनोत् ६ आमंत्र्यपांडुपुत्रांश्चशैनेयोद्धव
संयुतः द्वैपायनादिभिर्विप्रैःपूजितैःप्रतिपूजितः ७ गंतुंकृतमतिर्ब्रह्मन्द्वारकांरथमास्थितः उपलेभेभि
धावंतीमुत्तरांभयविह्वलां ८ पाहिपाहिमहायोगिन्देवदेवजगत्पते नान्यंत्वदभयंपश्येयत्रमृत्युःपरस्परं ९

क्षमायुर्येषांतान् ५ याजयित्वेत्यादिभाविकथासंक्षेपः उत्तमकल्पैःउत्तमोपहारैःशतमन्योःशतक्रतोरिव यथाउपें
द्रोविष्णुरिंद्रस्ययशःआतनोत् ६ शैनेयःसिनेर्नप्तासात्यकिःस्तेनचोद्धवेनसंयुतः ७ रथमास्थितःसन् उत्तरांपरिन्
मातरंअभिमुखंधावंतींउपलेभेददर्श ८ उत्तराश्रीकृष्णंप्रार्थयतेपाहीपाहीतिद्वाभ्यां अन्यस्तुप्रार्थनयोग्योनास्ती
त्याह त्वत्त्वत्तःअन्यंअभयंभयरहितंनपश्यामि यत्रलोकेपरस्परंमृत्युर्भवतितत्रप्रस्तुतंभयमावेदयति ९ राम

अभिद्रवति अभिमुखमायाति तप्तमायसंलोहमयंशल्यंयस्यसः अतिकार्पण्येनाह काममिति कामंयथेष्टं १० पराभ
वेनातिकुपितस्यद्रोणेःअपांडवंपांडवशून्यंइदंविश्वंकर्तुंप्रवृत्तंब्रह्मास्त्रमबुध्यत ११ अतएवबहुसुखंतदागतमित्याह
तर्ह्येति १२ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात्तद्दुःपरिहरंव्यसनंवीक्ष्य अनन्यविषयः आत्मायेषांसैकनिष्ठानामित्यर्थः
वैराट्याउत्तरायाः अंतस्थःसन्गर्भमावृतवान् तत्रहेतुःयतः आत्माअंतर्यामीयोगेश्वरइति बहिस्थस्यापिप्रवेश

अभिद्रवतिमामीशशरस्तप्तायसोविभो कामंदहतुमांनाथमामेगर्भोनिपात्यतां १० सूतउवाच उपधा
र्यवचस्तस्याः भगवान्भक्तवत्सलः अपांडवमिदंकर्तुंद्रोणेरस्त्रमबुध्यत ११ तर्ह्येवाथमुनिश्रेष्ठपांडवाःपं
चसायकान् आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः १२ व्यसनंवीक्ष्यतत्तेषांअनन्यविषयात्मनां
सुदर्शनेनस्वास्त्रेणस्वानांरक्षांव्यधाद्विभुः १३ अंतस्थःसर्वभूतानामात्मायोगेश्वरोहरिः स्वमाययावृणो
द्गर्भंवैराट्याःकुरुतंतवे १४ यद्यप्यस्त्रंब्रह्मशिरस्त्वमोघंचाप्रतिक्रियं वैष्णवंतेजआसाद्यसमशाम्यद्भृगूद्व
ह १५ मामंस्थाह्येतदाश्चर्यंसर्वाश्चर्यमयेच्युते यइदंमाययादेव्यासृजत्यवतिहंत्यजः १६ ब्रह्मतेजोविनि
र्मुक्तैरात्मजैःसहकृष्णया प्रयाणाभिमुखंकृष्णमिदमाहपृथासती १७ कुंत्युवाच नमस्येपुरुषंत्वाद्यमीश्व
रंप्रकृतेःपरं अलक्ष्यंसर्वभूतानामंतर्बहिरवस्थितं १८

घटनार्थमुक्तं कुरूणांतंतवेसंतानाय पांडवानामपिकुरुवंशजत्वादेवमुक्तं १४ अमोघमप्रतिक्रियंचसमशाम्यत्
सशांतमासीत् १५ एतद्ब्रह्मास्त्रशमनंआश्चर्यंमामंस्थाःमामन्यध्वं १६ कृष्णयासह १७ त्वांनमस्येनमस्करो
मि ननुकनिष्ठंमांकथंनमस्करोषितत्राह आद्यंपुरुषंकुतः प्रकृतेःपरं तत्कुतःईश्वरंप्रकृतेरपिनियंतारंअ
तएवसर्वभूतानामंतर्बहिश्चपूर्णत्वेनावस्थितंतथाप्यलक्ष्यं १८ श्रीराम जयराम जयजयरामराम २८

63
1981

तत्रहेतुः माययैवजवनिकातिरस्कारिणीतयाआछन्नंप्रतिछन्नं अतोहंमज्ञाभक्तियोगानभिज्ञाकेवलंनमस्यामि
अधःअक्षजंज्ञानंयस्मात्तंअव्ययमपरिछिन्नं तत्प्रपंचःमूढादृशादेहाभिमानिनापुंसानलक्ष्यसे १९ किंच परमहं
सानामात्मानात्मविवेकिनां ततोमुनीनांमननशीलानामपि ततश्चामलात्मनांनिवृत्तरागादिनामपितथात्वेननि
जमहिम्नानलक्ष्यसे अतोभक्तियोगंविधातुंत्वांवयंस्त्रियःकथंहिपश्येम यद्वापरमहंसानामपिभक्तियोगवि धा
नार्थंत्वांआत्मारामाणामप्यचिंत्यनिजगुणैराकृष्यभक्तियोगविधातुंकारयितुमवतीर्णमित्यर्थः २० ज्ञानभक्त्योर
शक्यत्वमुक्त्वापुनः केवलंनमस्करोमिकृष्णायेतिद्वाभ्यां २१ पंकजंनाभौयस्यपंकजानांमालास्तियस्य पंकजव

मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययं नलक्ष्यसेमूढदृशानटोनाट्यधरोयथा १९ तथापरमहंसानांमु
नीनाममलात्मनां भक्तियोगविधानार्थंकथंपश्येमहिस्त्रियः २० कृष्णायवासुदेवायदेवकीनंदनायच
नंदगोपकुमारायगोविंदायनमोनमः २१ नमःपंकजनाभायनमःपंकजमालिने नमःपंकजनेत्रायनम
स्तेपंकजांघ्रये २२ यथाहृषीकेशखलेनदेवकीकंसेनरुद्धातिचिरंशुचार्पिता विमोचिताहंचसहात्मजावि
भोत्वयैवनाथेनमुहुर्विपद्गणात् २३ विषान्महाग्नेःपुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः मृधेमृधे
नेकमहारथास्त्रतोद्रौण्यस्त्रतश्चास्महरेभिरक्षिताः २४
त्पद्मसन्निभेनेत्रेयस्य पंकजांकितेअंघ्रीयस्यतस्मैतत्कृतोपकारानानुस्मरंतियथेति द्वाभ्यांअयमर्थः मात्वत्तोपिमय्यधि
कातवप्रीतिः तथाहिहेहृषीकेशयथादेवकीकंसेनरुद्धात्वयाविमोचिता अहंचतथैवकिंविमोचितेतिकाकामहान्विशे
षउक्तः तंदर्शयति सातिचिरंरुद्धासतीतस्माद्देवसकृद्विमोचितातथाशुचार्पिताचसतीनचतस्याःपुत्रारक्षिताःअ
स्तिचान्योनाथस्तस्याःअहंतुविपद्गणात्तत्रापिमुहुःशीघ्रंचसात्मजाचत्वयैवचनाथेनेति २३ विपद्गणमेवदर्शयति
विषात्भीमस्यविषमोदकदानात् महाग्नेःजतुगृहदाहात् पुरुषादाःहेडिंबादयोराक्षसाःतेषांदर्शनात् असत्सभा

भा० याः भूतस्थानात् अश्विनोरक्षिताः आस्म अभवाम २४ यत्त्वासु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं श्र०
२९ यस्मात् २५ संपरस्तु श्रेयः परिपंथिन्य इत्याह जन्म सत्कुले जन्मादिभिः एधमानो यस्य सः अपि धातुं कृष्ण गोविंदेति
वक्तुं अपि अकिंचनानां गोचरविषयभूतं वासुदेवव्यतिरिक्ते वस्तूनि नास्ति प्रेमा येषां ते अकिंचनाः नतु निस्वाः २६
प्रस्तुतं मनोरथपूरणाय प्रणमति अकिंचनाः भक्ता एव वित्तं सर्वस्वं यस्य तस्मै ततः किं निवृत्ताः गुणवृत्तयो धर्मा
र्थकामविषयाः यस्मात्तस्मै कुतः आत्मारामाय तत्कुतः शांताय रागादिरहिताय किंच कैवल्यस्य पतये कैवल्यदा

विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं २५ जन्मैश्वर्यश्रुतश्रीभि
एधमानमदः पुमान् नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २६ नमोऽकिंचनवित्ताय निवृत्तगुणवृत्त
ये आत्मारामाय शांताय कैवल्यपतये नमः २७ मन्ये त्वां कालमीशानमनादिनिधनं विभुं समं चरंतं
सर्वत्र भूतानां यन्मिथः कलिः २८ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं न यस्य
कश्चिद्दयितोऽस्ति कर्हिचित् द्वेष्यश्च यस्मिन् विषमा मतिर्नृणां २९ श्रीकृष्णाय नमः श्रीपरमात्मने राम

तुं समर्थाय ननु देवकीपुत्रं मां कथं स्तोषि तत्राह मन्ये त्वां कालं ननु देवकीसुतं तत्राह तव ईशानं नियंतारं अना
दिनिधनं आद्यंतशून्यं विभुं प्रभुं समं यथा भवति तथा सर्वत्र चरंतं ननु पार्थसारथेः कथं मम साम्यं तत्राह य
त्वयतः त्वत्तः निमित्तभूतात् भूतानामेव मिथः कलिः कलहो भवति न तु त्वत्तः त्वयि वैषम्यं २८ ननु निग्रहानु
ग्रहरूपं मयि प्रसिद्धं वैषम्यं अत आह न वेदेति नृणां विडंबनं अनुकरणमीहमानस्य कुर्वतः यस्मिन्त्वयि
विषमा मतिः निग्रहानुग्रहरूपा भवति २९ वासुदेव हरे नारायण राम कृष्ण विठ्ठल गोविंद दामोदर विष्ठवे नमः २९

65
1981

अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपेण ३०
नरविडंबनमत्याश्चर्यमित्याह गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दामरज्जुं आददे जग्रा
ह तावत्तत्क्षणमेव या ते दशा अवस्था सा मां विमोहयति किंभूतस्य अश्रुभिः कलिलं व्यामिश्रं अंजनं ययोस्ते च संभ्रमे
ण व्याकुले अक्षीणि यस्मिन् तद्वक्त्रं निनीय अधः कृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य यत् यतः त्वत्तः
भीरपि स्वयं बिभेति तस्य ते दशा ३१ अत एव जगन्मोहनतया दुर्ज्ञेयत्वात् तव जन्मादि बहु वर्णयंतीत्याह केचिदिति

जन्म कर्म च विश्वात्मन् अजस्याकर्तुरात्मनः तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं ३० गोप्याददे त्वयि कृ
तागसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहय
ति भीरपि यद्बिभेति ३१ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये यदोः प्रियस्यान्ववाये मलयस्येव चंदनं ३२
अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषां ३३ भारावतरणायान्ये भु
वो नाव इवोदधौ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ३४ भवेऽस्मिन् क्लिश्यमानानां अविद्याकामकर्म
भिः श्रवणस्मरणार्हाणि करिष्यन्निति केचन ३५

चतुर्भिः पुण्यश्लोकस्य प्रियस्य युधिष्ठिरस्य कीर्तये यदोर्वा कीर्तय इति वा मलयस्य कीर्तये वंशे वा चंदनं ३२ तथा व
सुदेवस्य भार्यायां अज एव त्वमभ्यगात् पुत्रत्वमिति शेषः प्रथमपुरुषस्त्वार्षः अर्भकत्वमिति पाठः सुगमः ताभ्यां
पूर्वं सुतपा पृश्निरूपाभ्यां याचितः सन् अस्य जगतः क्षेमाय ३३ आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्यविवक्षया
३४ भवांतरं परमानंदस्वरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामः ततः कर्माणि तैः क्लिश्यमानानां तन्निवृत्तये
श्रवणाद्यर्हाणि कर्माणि करिष्यन् ३५

अस्यपक्षस्यसिद्धांततामभिप्रेत्यश्रवणादिफलमाह शृण्वंतीति नंदंतिअन्यैःकीर्त्यमानमभिनंदंतियेजनाःइहितंचरि
तंतावकंत्वदीयंचरणांबुजंतएवपश्यंत्येव अचिरेणैवेतिसर्वत्रावधारणं कीदृशंभवप्रवाहस्यजन्मपरंपरायाःउपरमोयः
स्मिन्तत् ३६ इदानींतवास्मत्परित्यागोनुचितइत्याशयेनाह अपीतिचतुर्भिः हेप्रभो सुहृदोनुजीवनश्चनोअस्मान्अ
पिस्वित्किंस्वित्त्वंजिहासमिसि येषामस्माकमन्यत्परायणंनैवास्तिकुतःराजसुयुद्धानंतरावसिष्ठेषु योजितमहोदुःखं
वैरंयैस्तेषांस्वानांकृतमीहितमापेक्षितंयेनतस्यसंबोधनं विसर्गांतपाठेत्वंपदविशेषणं ३७ ननुतवबांधवायादवाः

शृण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमं
पदांबुजं ३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः येषांनचान्यद्भवतःपदांबुजा
त्परायणंराजसुयोजितांहसां ३७ केवयंनामरूपाभ्यांयदुभिःसहपांडवाः भवतोदर्शनंयर्हिहृषिकाणा
मिवेशितुः ३८ नेयंशोभिष्यतेतत्रयथेदानींगदाधर त्वत्पदैरंकितायातिस्वलक्षणविलक्षितैः ३९ इमेजनप
दाःस्वृद्धाःसुपक्वौषधिवीरुधः वनाद्रिनद्युदन्वंतोह्येधंतेतववीक्षितैः ४०

पुत्राश्चपांडवाश्शूराःसमर्थाश्चतत्किंकार्पण्यंभाषसे केवयमिति यर्हिभवतोदर्शनंयदात्वमस्मान्नपश्यसि तदानां
म्नाविख्यात्यारूपेणसमृध्याचयदुभिःसहिताःपांडवानामकेवयं नकोपिअतितुच्छाइत्यर्थः हृषीकाणामीशितुर्जी
वस्यादर्शनेयथानकिंचिन्नामरूपंचतद्वत् ३८ किंचयथेदानीमियमस्मत्याल्याक्ष्माभिःसेरसाधारणैर्वज्रांकुशादि
भिःलक्षणैर्विलक्षितैश्चांकितैस्त्वत्पदैरंकितासतीभातितत्रतदात्वयिनिर्गतेसतिनशोभिष्यते ३९ अपिच इमेज
नपदाःदेशाःस्वृद्धाःसुसमृद्धाःसंतः ४० श्रीराम श्रीराम श्रीप्रसन्नोस्तु रामजय ३०

गमनेपांडवानामकुशलं अगमनेचयादवानामित्युभयतोव्याकुलचित्तासतीतेषुस्नेहनिवृत्तिंप्रार्थयते अथेतिविश्वे
शेत्यादिसंबोधनानिस्नेहछेदसामर्थ्यख्यापनायदृढंसितं ४१ ततःकिमितआह त्वयीति अनन्यविषयासतीममतिःर
तिमुद्वहनात्अनवछिन्नांप्रीतिकरोत्वित्यर्थः ओघंपूरंयथागंगाप्रतिबंधंनगणयतीतिभावः ४२ एवमभ्यर्थ्यपुनःप्र
णमति हेश्रीकृष्णतेनमःउपकारानुस्मरंति बहुधासंबोधयति कृष्णसख अर्जुनस्यसखे वृष्णीनामृषभश्रेष्ठ अ
नन्येर्भूम्यैद्रुह्यंतियेराजन्यास्तेषांवंशस्यदहनएवमप्यघनपवर्गवीर्य अक्षीणप्रभावगोविंदप्राप्तकामधेन्वैश्वर्यगो

अथविश्वेशविश्वात्मन्विश्वमूर्तेस्वकेषुमे स्नेहपाशमिमंछिंधिदृढंपांडुषुवृष्णिषु ४१ त्वयिमेनन्यविषया
मतिर्मधुपतेसकृत् रतिमुद्वहतादद्धागंगेवौघमुदन्वति ४२ श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजं
न्यवंशदहनानपवर्गवीर्य गोविंदगोद्विजसुरार्तिहरावतारयोगेश्वराखिलगुरोभगवन्नमस्ते ४३ सूतउवाच
पृथयेत्थंकलपदैःपरिणूताखिलोदयः मंदंजहासवैकुंठोमोहयन्निवमायया ४४ तांबाढमित्युपामंत्र्यप्र
विश्यगजसाह्वयं स्त्रियश्चस्वपुरंयास्यन्प्रेम्णाराज्ञानिवारितः ४५

द्विजसुराणामार्तिहरोवतारोयस्येति ४३ कलानिमधुराणिपदानियेषुतैःवाक्यैःपरिणुतो खिलउदयोमहिमायस्य
सः नस्तुतावित्यस्मात् परिणतेतिवक्तव्येदीर्घछंदोनुरोधनमंदस्मीषत् तस्यहासएवमायाबस्यतिहि हासोजनोमा
दकरीवमायेति ४४ त्वयिमेनन्यविषयामतिरितियत्प्रार्थितंतद्बाढमिति अंगीकृत्यरथस्थानाद्गजाह्वयमागत्य पृ
थांतांश्चान्याश्चसुभद्राप्रमुखाःस्त्रियः उपामंत्र्यानुज्ञाप्यस्वपुरंयास्यन्राज्ञायुधिष्ठिरेणप्रेम्णाःत्रैवकंचित्कालं
निवसेतिसंप्रार्थ्यनिवारितः ४५

अथभीष्मस्यनिर्वाणोत्सवंवक्तुंउपोद्घातकथांप्रस्तौति व्यासाद्यैः प्रबोधितोपिशुचाव्याप्तःसन्नाबुध्यतविवेकं न
प्रापकुतः ईश्वरेहया अतः स्वभक्तभीष्मनिर्याणमहोत्सवायराज्ञासहकुरुक्षेत्रंगंतव्यं तत्रतन्मुखेनायंप्रबोधनीयइ
तीश्वराभिप्रायःस्तमजानन्निरित्यर्थः श्रीकृष्णेनापि प्रबोधितोनाबुध्यत अत्रहेतुः अद्भुतकर्मणेति यथाकुरुपां
डवानांसंधानार्थंगतोपियथोचितमेववदन्नपिविग्रहमेवदृढीकृतवान् एवमत्रापिप्रबोधयन् अबोधदृढीचकारेत्य
र्थः ४६ अबोधमेवप्रपंचयति आहेतिषड्भिः प्राकृतेन अविवेकव्याप्तेन आत्मनाचित्तेनहेविप्राः ४७ पारक्यस्यश्व
शृगालाद्याहारस्यदेहस्यार्थेमयाअक्षौहिणीःअक्षौहिण्यः अक्षौहिणीप्रमाणंव्यासेनोक्तं अक्षौहिणीप्रसंख्यातार

व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा प्रबोधितोपीतिहासैर्नाबुध्यतशुचार्पितः ४६ आहराजाधर्मसुत
श्चिंतयन्सुहृदांवधं प्राकृतेनात्मनाविप्राःस्नेहमोहवशंगतः ४७ अहोमेपश्यताज्ञानंहृदिरूढंदुरात्मनः
पारक्यस्यैवदेहस्यबह्व्योमेक्षौहिणीर्हताः ४८ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः नमेस्यान्निरयान्मो
क्षोह्यपिवर्षायुतायुतैः ४९ नैनोराज्ञःप्रजाभर्तुर्धर्मयुद्धेवधोद्विषां इतिमेनतुबोधायकल्पतेशासनंवचः ५०

थानांद्विजसत्तमाः संख्यागणनतत्त्वज्ञैःसहस्राण्येकविंशतिः शतान्युपरिचैवाष्टौतथाभूयश्चसप्ततिः गजानांचप्र
संख्यानमेतदेवप्रकीर्तितं ज्ञेयंशतसहस्रंतुसहस्राणिनवैवतु नराणामधिपंचाशच्छतानित्रीणिचैवहि पंचषष्टिस
हस्राणितथाश्वानांशतानिच दशोत्तराणिषट्प्राहुःसंख्यातत्त्वविदोजनाः एतामक्षौहिणीप्राहुर्यथावदिहसंख्य
येति ४८ सुहृदःसंबंधिनःमित्राणिसखायःपितरःपितृव्याः द्विषांवधःएनःपापंनभवतीतियत्शासनंशिक्षारूपं
वचःमेबोधायप्रबोधायनकल्पते कुतोनकल्पतेयतःस्तद्वचः प्रजाभर्तुरेवायंभावःस्वप्रजानामन्यतोबाधेप्रसक्ते
तद्वधोनुज्ञातः दुर्योधनेनतुप्रजायांपाल्यमानायांमयाकेवलंराज्यलोभेन हतत्वात्पापमेवेदमिति ५० राम ३१

69/1981

किंच युद्धेपुंसांवधोभवतुनामधर्मः स्त्रीणांतुमयाहताःबांधवोयासांतासांयोमाद्रोहोनुदिशोप्युत्थितःतंव्यपोहितुंअ
पाकर्तुंकल्पःसमर्थोनाहंगृहमेधीयैर्गृहाश्रमविहितैः ५१ ननुचसर्वपाप्मानंतरतिब्रह्महत्यांयोश्वमेधेनयजत
यउचैनमेवंवेदेतिश्रुतेः पापमश्वमेधेननश्येदेवेत्यशंक्य अविवेकविजृंभितंहेतुवादमाश्रित्यनिराकरोति यथाघन
पंकेनपंकांकोनमृज्यतेयथावासुरालेपकृतमपावित्र्यंबाह्यासुरयानमृज्यते तथैवभूतहत्यामेकाप्रमादतोजातांबु
द्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुंशोधयितुंनार्हतीति ५२ इतिश्रीभागवतेप्रथमस्कंधेटीकायांअष्टमोध्यायः ८

स्त्रीणामवद्बंधूनांद्रोहोयोसाविहोत्थितः कर्मभिर्गृहमेधीयैर्नाहंकल्पोव्यपोहितुं ५१ यथापंकेनपंकां
कःसुरयावासुराकृतं भूतहत्यांतथैवैकांनयज्ञैर्मार्ष्टुमर्हति ५२ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधे
कुंतीयुधिष्ठिरानुतापोनामाष्टमोध्यायः ८ सूतउवाच इतिभीतःप्रजाद्रोहात्सर्वधर्मविवित्सया त
तोविनशनंप्रागाद्यत्रदेवव्रतोपतत् १ तदातेभ्रातरःसर्वेसदश्वैःस्वर्णभूषितैः अन्वगच्छन्रथैर्विप्रा=
व्यासधौम्यादयस्तथा २ भगवानपिविप्रर्षेरथेनसधनंजयः सतैर्व्यरोचतनृपःकुबेरइवगुह्यकैः ३
दृष्ट्वानिपतितंभूमौदिवश्च्युतमिवामरं प्रणेमुःपांडवाभीष्मंसानुगाःसहचक्रिणा ४ तत्रब्रह्मर्षयःसर्वे
देवर्षयश्चसत्तमाः राजर्षयश्चतत्रासन्द्रष्टुंभरतपुंगवं ५ रामजयरामजयजयराम श्रीरामज

युधिष्ठिरायभीष्मेणसर्वधर्मनिरूपणं कृष्णस्तुतिश्चमुक्तिश्चनवमेतस्यवर्ण्यते १ यदर्थंतस्याविमोकःश्रीकृष्णेन
संवर्धितस्तद्दर्शयति इतीति सर्वेषांधर्माणांविवित्सयावेदितुमिच्छयाविनशनंकुरुक्षेत्रंदेवव्रतोभीष्मः १ सदश्वैः श्रे
ष्ठःआश्वायेर्युक्तैःरथैः ४ तत्रतदा तत्रासन्तत्क्षणमेवागतइत्यर्थः भरतपुंगवंभीष्मं ५ रामचंद्र प्रसन्न

रेणुकासुतः परशुरामः ६ ७ ब्रह्मरातः शुकः अंगिरसो बृहस्पतिः ८ वसूत्तमो भीष्मः देशकालविभागविदिति उत्थातु
मशक्यत्वात् शयान एव मनसा वाण्या च पूजयामासेत्यभिप्रायः ९ हरिस्थं संतं पुरतश्चासीनं पूजयामास १० उपासीना
न् समीप उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संगतान् उपसन्नान् पाठांतरे सन्नतान् नतान् अवनतान् अ
भ्याचष्ट अभ्यभाषत अनुरागास्रैः स्नेहाश्रुभिः अंधीभूतेन चक्षुषा उपलक्षितः ददर्श इति वा ११ अभिभाषणमाह अ

पर्वतो नारदो धौम्यो भगवान् बादरायणः बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ६ वसिष्ठ इंद्रप्रमदस्त्रितो गृ
त्समदोसितः कक्षीवान् गौतमोत्रिश्च कौशिकोथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोमलाः शि
ष्यैरुपेता आजग्मुः काश्यपांगिरसादयः ८ तान् समेतान् महाभागान् उपलभ्य वसूत्तमः पूजयामास धर्म
ज्ञो देशकालविभागवित् ९ कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं हृदिस्थं पूजयामास माययोपात्तविग्र
हं १० पांडुपुत्रानुपासीनान् प्रश्रयप्रेमसंगतान् अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ११ अहो कष्टमहो
न्याय्यं यद्यूयं धर्मनंदनाः जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः १२ संस्थितेतिरथे पांडौ पृथा बाल
प्रजा वधूः युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः १३ सर्वं कालकृतं मन्ये भवतां यदप्रियं सपा
लो यद्वशे लोको वायोरिव घनावली १४ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः कृष्णोस्त्री गांडिवं चापं सुहृत्कृष्ण
स्ततो विपत् १५

होइत्येकादशभिः हे धर्मनंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ सुखेनैव जीवितुं अर्हथ यूयमिति यत् एतदहो क
ष्टं जुगुप्सितं अहो अन्याय्यं चैतत् यतो यूयं विप्राः धर्मोच्युत आश्रया पत्यानि तद्दती अपत्यैः सह क्लेशान् प्राप्तेत्य
र्थः १२ कालकृतेन शोकं वारयति सर्वमिति द्वाभ्यां भवतामपि यद्वशे यस्य वशवर्ती १४ अहो दुर्घटघटनापटुः का
ल इत्याह यत्रेति कृष्णोर्जुनः अस्त्री धन्वी ततः तत्रापि विपत् पुण्यशाली बलास्त्रैः पुण्य शस्त्रैः दैवसंपत्ताविपर्ययः
१५ ३२

71/1981

नन्वेतत् कथं कालोतिक्रमेदिति सापेक्षायामाह अस्य श्रीकृष्णस्येत्यंगुल्या निर्दिशति विधित्सितं कर्तुमिष्टं यूयं वि
धित्सितस्य जिज्ञासया १६ दैवतंत्रमीश्वराधीनं सुखदुःखं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितः अनुवर्तिनः अन्
तरिक्षः हे नाथ कुलपरंपरागतः स्वामिन् प्रभो समर्थ अनाथाः प्रजाः पाहि १७ अनुविधेयः परमेश्वरः श्रीकृष्ण ए
वेत्याह एष एव भगवान् सर्वेश्वरः यतः आद्यः पुमान् २ तत्र यतो नारायणः साक्षात् १८ तदुपपादयति अस्येति
अनुभावं प्रभावं १९ त्वमज्ञानात् यमेवं मन्यसे मातुलेयं देवक्याः सुतं प्रियं प्रीतिकर्तारं सुहृत्तमं उपकारानपेक्ष्य

नह्यस्य कर्हिचिद्राजन् पुमान्वेद विधित्सितं यद्विजिज्ञासया युक्ता मुह्यंति कवयोपि हि १६ यस्मादिदं दैव
तंत्रं व्यवस्य भरतर्षभ तस्यानुविहितो नाथा नाथ पाहि प्रजाः प्रभो १७ एष वै भगवान् साक्षादाद्यो ना
रायणः पुमान् मोहयन् मायया लोकं गूढश्चरति वृष्णिषु १८ अस्यानुभावं भगवान् वेद गुह्यतमं शिवः
देवर्षिर्नारदः साक्षाद्भगवान् कपिलो नृप १९ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं अकरोः सचिवं दूतं सौ
हृदादथ सारथिं २० सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् २१
तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः २२ भक्त्यावेश्य मनो
यस्मिन् वाचा यन्नाम कीर्तयन् त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः २३

पकारकं च सौहृदाद्विश्वासात् सारथिं अकरोः कृतवानसि सचिवं मंत्रिणं २० नन्वीश्वरश्चेत् कथं नीचे सारथ्यादौ प्र
वृत्तस्तत्राह सर्वेति तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतिवैषम्यं क्वचिदपि नास्ति कुतः निरवद्यस्य रा
गादिशून्यस्य तत्कुतः अनहंकृतेः तच्च कुतः अद्वयस्य तदपि कुतः समदृशः तत्रापि हेतुः सर्वात्मनः यथेष्टं वा हे
तुहेतुमद्भावः २१ तथापि समत्वेपि हे भूप अनुकंपितं अनुकंपां २२ इदानीं स्वदेहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थ
यते भक्त्येति द्वाभ्यां यावदिति विलंबं द्योतयति अहोहं नो मित्यज्यामीति स्वातंत्र्यं इदमित्यनात्मत्वेन ज्ञातं २३

प्रसन्नहासेन अरुणलोचनाभ्यां च उल्लसद्रुचिरं मुखांबुजं यस्य ध्यानस्य यथाविषयः योन्यैश्चिंत्यते केवलं सोग्रतः
स्थितः सन्मां प्रतीक्षतामित्यर्थः २४ ततः सानुकंपं वाक्यमाकर्ण्य २५ पुरुषस्वभावेन विहितान्नरजातिसाधारणा
न्वर्णयामासेति तृतीयेनान्वयः यथावर्णं वर्णधर्मान्यथाश्रमं आश्रमधर्मान्न्च वैराग्यरागाभ्यामुपाधिभ्यां क्र
मेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् २६ पुनस्तत्रैव विशेषमाह दानेति मोक्षधर्मान् शमदमादीन् भ

स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यान
पथश्चतुर्भुजः २४ सूत उवाच युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे अपृच्छद्विविधान्धर्मान् ऋषी
णामनुशृण्वतां २५ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं वैराग्यरागोपाधिभ्यामाम्नातोभ
यलक्षणान् २६ दानधर्मान्राज्यधर्मान्मोक्षधर्मान्विभागशः स्त्रीधर्मान्भगवद्धर्मान्समास
व्यासयोगतः २७ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने नानाख्यानेतिहासेषु वर्णयामास
तत्त्ववित् २८ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः २९ तदो
पसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेमीलितदृग्व्यधारयत्
३०

गवद्धर्मान् हरितोषणान्द्वादश्यादिनियमरूपान् समासव्यासौ संक्षेपविस्तारौ ताभ्यां योगो उपायो ततः ताभ्यां
२७ धर्मादींश्च यथाधिकारं प्रति नियतोपायसहितान् यथावत् नानाख्यानेषु ये इतिहासाः तेषु यथासंति तथा व
र्णयामासेति २८ छंदेनेच्छया मृत्युर्यस्य २९ सहस्रणी युद्धसमीपस्थान् सहस्रं रथिनो नयति पालयतीति सहस्रणी
भीष्मः सहस्रणा इति पाठे महस्रार्थवतीर्गिरः लसंतौ पीतौ पटौ यस्य तस्मिन् अमीलितदृगेव मनो व्यधारयत् ३०

३३

73
1981

अनयैव विशुद्धया धारणया हतमशुभं यस्य सः तस्य श्रीकृष्णस्येक्षया कृपादृष्ट्यैव गतः आयुधश्रमो यस्य सः अ
त एव निवृत्तः सर्वेंद्रियवृत्तीनां विभ्रमः विविधं भ्रमणं यस्मात्सः जन्यं देहं ३१ परमफलरूपां श्रीकृष्णरतिं प्रार्थयि
तुं प्रथमं स्वकृतमर्पयति इति नानाधर्माद्युपायैर्मतिर्मनो धारणलक्षणा उपकल्पिता सा समर्पिता कृष्णालता
नां पुंगवे श्रेष्ठे भगवति वितृष्णा निःकामा अवितृष्णेति वा छेदः अवितृष्णेत्यर्थः विगतो भूमा यस्मात्तस्मिन् यम
पेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः तदेव परमैश्वर्यमाह स्वसुखं स्वरूपभूतं परमानंदं उपगते प्राप्तवत्येव ननु कथं
स्वसुखं उपगतः विषयसुखेच्छया षोडशभार्यापरिग्रहात्तत्राह क्वचित्कदाचित् विहर्तुं क्रीडितुं प्रकृतिं उपेयुषः

विशुद्धया धारयौणे हताशुभस्तदीक्षयैवाशु गतायुधश्रमः निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं
विसृजन्जनार्दनं ३१ श्रीभीष्म उवाच इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ३२ त्रिभुवनकमनं तमालवर्णं रविकरगौरव
रांबरं दधाने वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेनवद्या ३३ श्रीकृष्णवासुदेव हरे नारा

स्वीकृतवति ननु स्वरूपतिरोधानेन जीववत्पारतंत्र्यमित्यर्थः विहर्तुमिति यदुक्तं तत्प्रपंचयति यत्त्यतः प्रकृतेर्भ
वप्रवाहः सृष्टिपरंपरा भवति ३२ इदानीं मूर्तिं वर्णयन् रतिं प्रार्थयते त्रिभुवनकमनं त्रैलोक्यामेककमनीयं य
त्तत् दधदुर्दधाने रतिर्मेस्तु कथंभूतं वपुः तमालवत् नीलो वर्णो यस्य तत् प्रातःकालीनाः रवेः करा इव स्वतएव गौरे पी
ते वरे निर्मले अंबरे यस्मिन् तत् अलककुलैः परिवृतमाननाब्जं यस्मिंस्तत् विजये सखे पार्थसारथौ अनवद्या
अहेतुकी फलाभिसंधिरहिता रतिरस्तु ३३

विजयसखिबलमेवानुवर्णयन्रतिंप्रार्थयते युधियुद्धेतुरंगाणांखुररजस्तुरगरजः तेनविधूम्राधूमसदृशेचताेवि
घक्कइतस्ततस्ततः कचाःकुंतलाः तैर्लुलितंविकीर्णंश्रमवारिस्वेदबिंदुरूपंतेनभक्तवात्सल्यद्योतकेनालंकृतं
मास्यंयस्यतस्मिन्श्रीकृष्णेममात्मामनः अस्तुरमतामित्यर्थः पुनःकथंभूते ममनिशितैःमदीयैर्निशितैस्ती
क्ष्णैःशरैर्विभिद्यमानात्वक्यस्यतस्मिन् शरीरेवविलसत्कवचंयस्यतस्मिन् ३४ किंच सपदीति सेनयोरुभयो
र्मध्येरथंस्थापयमेच्युत यावदेतान्निरीक्ष्येहंयोद्धुकामानवस्थितानितिसखुरर्जुनस्य वचोनिशम्यसपदितत्क्ष

युधितुरगरजोविधूम्रविघक्ककचलुलितश्रमवार्यलंकृतास्ये ममनिशितशरैर्विभिद्यमानत्वचिविलसत्कव
चेस्तुकृष्णआत्मा ३४ सपदिसखिवचोनिशम्यमध्येनिजपरयोर्बलयोरथंनिवेश्य स्थितवतिपरसैनिकायु
रक्ष्णाहृतवतिपार्थसखेरतिर्ममास्तु ३५ व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुध्या
कुमतिमहरदात्मविद्ययायश्चरणरतिःपरमस्यतस्यमेस्तु ३६ रामकृष्णवासुदेवहरेनारायणरामयनमः

णमेवपरबलयोःसैन्ययोर्मध्येस्थितेपार्थसखेरतिरस्तु तत्रस्थिताकृतंसख्यंदर्शयति परस्यसैनिकानामायुरक्ष्णाकालदृष्ट्या
हृतवति असौभीष्मःअसौद्रोणोवा असौकर्णइतिततत्प्रदर्शनव्याजेनदृष्ट्यैवसर्वेषांआयुराकृष्यार्जुनस्यजयंकृतव
तीति ३५ नकेवलमर्जुनस्यसपत्नायुर्हरणेनैवजयमावहत् किंतत्वविद्याहरणेनापीत्याह व्यवहितादूरेस्थितायाःपृ
तनायान्याःमुखमिवमुखंअग्रेस्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः स्वजनवधाद्विमुखस्यनिवृत्तस्य तदुक्तंगीतासु एवमु
क्त्वार्जुनःसंख्येरथोपस्थउपाविशत् विसृज्यसशरंचापंशोकसंविग्नमानसः इति कुमतिंअहंहंतेत्यादिकुबुद्धिं ३६ २४

115
1981

ममतुमहांतमनुग्रहंकृतवानित्यपेक्षायामाह द्वाभ्यां स्वनिगमं अशस्त्रएवाहंसाहाय्यंकरिष्यामीत्येवंभूतांस्वप्रतिज्ञां
हित्वा श्रीकृष्णंशस्त्रंग्राहयिष्यामीत्येवंरूपांमत्प्रतिज्ञांऋतंसत्यंयथाभवतितथा अधिकां अधिकर्तुंयोरथस्थःसन्न
वप्लुतःसहसैवावतीर्णःअवप्लुतःसनयोभ्ययात् अभिमुखमधावत् इभंहंतुंहरिःसिंहइवकिंभूतः धृतारथचरणश्च
क्रंयेनसः तदासंरंभेनमानुष्यनाट्यविस्मृतेरुदरस्थसर्वभूतभुवनभारेणप्रतिपदंचलद्गुः चलंतीगोः पृथ्वीयस्मात्सःते
नैवसंरंभेणपथिगतंउत्तरीयंवस्त्रंयस्यसमुकुंदोमेगतिर्भवत्वित्युत्तरेणान्वयः ३७ एवंयदाअभ्यायात्तदाभ्यमानस्या
ततायिनोधन्विनोमेशितैस्तीक्ष्णैर्विशिखैर्हतः अतोविशीर्णदंशः विध्वस्तकवचःक्षतजेनरुधिरेणव्याप्तःसन्प्रस

स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः धृतरथचरणोभ्ययाच्चलद्गुर्हरिरिवहंतुमिभंं
गतोत्तरीयः ३७ शितविशिखहतोविशीर्णदंशःक्षतजपरिप्लुतआततायिनोमे प्रसभमभिससारमद्वधा
र्थंसभवतुमेभगवान्गतिर्मुकुंदः ३८ विजयरथकुटुंबआत्ततोत्रेधृतहयरश्मिनितच्छ्रियेक्षणीये भ
गवतिरतिरस्तुमेमुमूर्षोर्यमिहनिरीक्ष्यहतागताःस्वरूपं ३९

भंबलाद्वारयन्तमर्जुनमप्यतिक्रम्यमद्वधार्थमभिससारअभिजगाम एवंयोलोकप्रतीत्यार्जुनपक्षपातीविलक्षितः
वस्तुतस्तुममैवानुग्रहंकृतवान्यतममभक्तेनोक्तंवचोमादृथास्तु सभगवान्मेगतिर्भवत्वित्यर्थः ३८ नरैवमन्यायैर
पिभृत्यरक्षाव्यग्रेकृष्णेरतिमाशास्ते विजयोअर्जुनःतस्यरथएवकुटुंबंअकृत्यैरपिरक्षणीयायस्यतस्मिन् आत्तंतोत्रंप्रतो
दोयेनसःतस्मिन् धृताश्वतेहयानांरश्मयःप्रग्रहाःतेसंतियस्यतस्मिन्श्रीत्यादिस्यश्चेत्यनकारांतादपिरश्मिशब्दादी
निःतच्छ्रियातयासारथ्यश्रियाईक्षणीयेशोभमानेमुमूर्षोर्मर्तुमिच्छोनन्वन्यायनतेइनिकिमितिरतिःप्रार्थ्यतेअतआ
ह भगवतीतिनित्यैश्वर्येतदाह इहयुद्धेहताःसर्वेयंनिरीक्ष्यस्वरूपंतत्समानरूपंगताःप्राप्ताःइति ३९ रामचंद्र

सत्रधर्मेणयुध्यमानाः स्वरूपंप्रापुरित्येतन्नचित्रंयतोमधांधाअपिप्रापुरित्याह ललितगतिश्चविलासश्चरासादिमंजु
गत्यादिभिः आत्मीयैस्तदीयैर्वाकल्पितउरुमानः पूजायासांताः अतउत्कटेनमदेनांधाः अतएवतदेकचित्ततेनतस्य
कृतंकर्मगोवर्द्धनोद्धारणादिमनुकृतवत्योगोपवध्वोयस्यप्रकृतिस्वरूपंअगुन् अगुमन् मकारलोपस्त्वार्षः किलप्रसि
द्धं तस्मिन्मरतिरस्त्वितिपूर्वेणान्वयः ४० जगत्पूज्यतामनुस्मरन्नाह मुनिगणैर्नृपवर्यैश्चसंकुलेव्याप्ते अंतःसदसि स
भामध्येयुधिष्ठिरस्यराजसूये एषांमुनिगणादीनां ईक्षणीयः अहोरूपमहोमहिमेत्येवमाश्चर्येणविलोकनीयसन्

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानः कृतमनुकृतवत्यउन्मदांधाः प्रकृतिमगन्कि
लयस्यगोपवध्वः ४० मुनिगणनृपवर्यसंकुलेंतःसदसियुधिष्ठिरराजसूयएषां अर्हणमुपपेदईक्षणीयो
ममदृशिगोचरएषआविआदिरात्मा ४१ तमिममहमजंशरीरभाजांहृदिहृदिधिष्ठितमात्मकल्पितानां
प्रतिदृशमिवनैकधार्कमेकंसमधिगतोस्मिविधूतभेदमोहः ४२ सूतउवाच कृष्णएवंभगवतिमनोवाग्दृ
ष्टिवृत्तिभिः आत्मन्यात्मानमावेश्यसोंतश्वासउपारमत् ४३ रामचंद्रप्रसन्नोस्तुशुभंभवतुनारायण

अर्हणंपूजांउपपेदेप्राप एषःजगदात्माममदृशिगोचरःदृष्टिविषयःसन् आविर्भूतोवर्तते अहोमेभाग्यमितिभा
वः ४१ सोहंकृतार्थोस्मीत्याह तमिमंअजंसम्यगधिगतःप्राप्तोस्मि सम्यक्त्वमाह विधूतभेदमोहः तदर्थंभेदस्यो
पाधिकत्वमाह आत्मकल्पितानांस्वयंनिर्मितानांशरीरभाजांप्राणिनांहृदिहृदिप्रतिहृदयंधिष्ठितं अधिष्ठितं अका
रलोपस्त्वार्षः नैकधाअनेकधा अधिष्ठानभेदादनेकभेदाभातमित्यर्थः अत्रदृष्टांतः सर्वप्राणिनांदृशंदृशंप्रति एक
मेवार्कमनेकधाप्रतीतमिवेति ४२ मनोवाग्दृष्टीनांवृत्तिभिः परमात्मनिश्रीकृष्णे अंतरेवलीनःश्वासोयस्यसः ४३ ३९

77
1981

निष्कलेनिरुपाधौसंपद्यमानंमिलितंआज्ञायाअलक्ष्य ४४ दैवैर्मानवैश्चवादिताःराज्ञांमध्येयमाधवः अनस्यव
४५ निर्हरणादीनिसंस्कारादीनिसम्यक्परेतस्यमुक्तस्यापीत्यर्थः ४६ पितरंधृतराष्ट्रं तपस्विनीसंतापवती ४७।४८
राजायुधिष्ठिरः ४९ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेटीकायांनवमः दृशामेकृतकार्यस्यहस्तिनापुरतो

संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिष्कले सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये ४४ तत्रदुंदुभयोनेदुर्दे
वमानववादिताः शशंसुःसाधवोराज्ञांखात्पेतुःपुष्पवृष्टयः ४५ तस्यनिर्हरणादीनिसंपरेतस्यभार्गव यु
धिष्ठिरःकारयित्वामुहूर्तंदुःखितोभवत् ४६ तुष्टुवुर्मुनयोहृष्टाःकृष्णंतद्गुह्यनामभिः ततस्तेकृष्णहृदयाः
स्वाश्रमान्प्रययुःपुनः ४७ ततोयुधिष्ठिरोगत्वासहकृष्णोगजाह्वयं पितरंसांत्वयामासगांधारींचतप
४८ पित्राचानुमतोराजावासुदेवानुमोदितः चकारराज्यंधर्मेणपितृपैतामहंविभुः ४९ इतिश्रीभागवते
महापुराणेप्रथमस्कंधेयुधिष्ठिरराज्यलाभोनामनवमोध्यायः ९ शौनकउवाच हत्वास्वरिक्थस्पृधआत
तायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः सहानुजैःप्रत्यवरुद्धभोजनःकथंप्रवृत्तःकिमकारषीत्ततः १ सूतउ
वाच वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः निवेशयित्वानिजराज्यईश्वरोयुधिष्ठिरंप्रीत
मनाबभूवह २

हरेस्त्रीभिःसंस्तूयमानस्यवर्णतिद्वारकागमः १ राज्यंचकारेत्युक्तं तत्रपृच्छति हत्वेति स्वस्यरिक्थेधनेस्पृद्धेतेस्पर्धंतेतथा
यद्वा स्वरिक्थायस्पृधंसंग्रामोयेषां अतएवधनादिहरणादाततायिनः तान्हत्वाप्रत्यवरुद्धभोजनःबंधुवधदुःखेनसं
कुचितभोगः राज्यलाभेनप्राप्तभोगोवा कथंराज्यप्रवृत्तः प्रवृत्तोवाततःकिमकार्षीदिति १ राज्यप्रवृत्तोश्रीकृष्णस्यप्री
तिंपर्यालोच्यप्रवृत्तइत्याशयेनोत्तरमाह वंशंकुरोःसंरोहयित्वापरिक्षिद्रक्षणेनअंकुरितंकृत्वा कथंभूतं वंशदवाग्नि
निर्हृतंवंशएवदवोवनंतस्यततस्मादुद्भूतोयःक्रोधरूपोग्निस्तेननिर्हृतंदग्धंनिजराज्येनिवेश्यच २ रामकृष्णमुकुं

प्रवृत्तौहेतुमुक्त्वाकिमकार्षदित्यस्योत्तरमाह निशम्येतिप्रवृत्तंयद्विज्ञानंपरमेश्वराधीनंजगन्नस्वतंत्रमित्येवंभूतंतेन
विधूतोविभ्रमो अहंकर्तेत्येवंभूतोमोहयस्यसः अनुजैरनुवर्तितःसेवितःसन् अजितःश्रीकृष्णएवआश्रयोयस्यसःप
रिधिःसमुद्रस्तत्पर्यंतांगांपृथ्वींपालयामास ३ तस्यराज्यमनुवर्णयति काममितित्रिभिः महीसर्वकामदोग्धीबभूव व्र
जान्गोष्ठानि उधस्वतीःउधस्वसः उधःक्षीराशयःस्थूलोधसइत्यर्थःसिषिचुःअभ्यषिंचन् ४ अन्हतुऋतौऋतौ ५ आ

निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः शशासगामिंद्रइवाजिताश्रयःपरिध्युपांतामनुजा
नुवर्तितः ३ कामंववर्षपर्जन्यःसर्वकामदुघामही सिषिंचुःस्मव्रजान्गावःपयसोधस्वतीर्मुदा ४ नद्यःस
मुद्रागिरयःसवनस्पतिवीरुधः फलंत्योषधयःसर्वाःकाममन्वृतुतस्यवै ५ नाधयोव्याधयःक्लेशादैवभूता
त्महेतवः अजातशत्रावभवन्जंतूनांराज्ञिकर्हिचित ६ उषित्वाहास्तिनपुरेमासान्कतिपयान्हरिः सुहृदांचवि
शोकायस्वसुश्चप्रियकाम्यया ७ आमंत्र्यचाभ्यनुज्ञातःपरिष्वज्याभिवाद्यतं आरुरोहरथंकैश्चित्परिष्वक्तो
भिवादितः ८ सुभद्राद्रौपदीकुंतीविराटतनयातथा गांधारीधृतराष्ट्रश्चयुयुत्सुर्गौतमोयमौ ९ वृकोदरश्च
धौम्यश्चस्त्रियोमत्स्यसुतादयः नसेहिरेविमुह्यंतोविरहंशार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगोहातुंनोत्सह
तेबुधः कीर्त्यमानंयशोयस्यसकृदाकर्ण्यरोचनं ११

धयोमनोव्यथाव्याधयोरोगाक्लेशाःशीतोष्णादिकृताःदैवंचभूतानिचआत्माचहेतुर्येषांतेअधिदैविकादीनांतेजंतूनांना
भवन् ६ इदानींद्वारकागमनंनिरूपयितुमाह उषित्वेति स्वसुःसुभद्रायाः ७ तंयुधिष्ठिरं ८ युयुत्सुः धृतराष्ट्राद्वैश्यायां
जातः गौतमःकृपः यमौनकुलसहदेवौ ९ अन्याश्चस्त्रियःमत्स्यसुताउत्तरातस्याःपुनर्ग्रहणंगर्भरक्षककृष्णविरहेमोहा
धिक्यात् यद्वामत्स्यसुतासत्यवतीतेषांकृष्णविरहासहनंकैमुतिकन्यायेनाह १० सत्संगादितिद्वाभ्यां सतांसंगाद्वेतोर्मुक्तः
पुत्रादिविषयोदुःसंगोयेनसःसद्भिःकीर्त्यमानंरुचिकरंयस्ययशःसकृदप्याकर्ण्यसत्संगंत्यक्तुंनशक्नोति ११ श्रीराम ३६

79
134

दर्शनादिभिस्तस्मिन्श्रीकृष्णेन्यस्ताअस्यस्ताधीर्येषांते १२ अतएवनिमिषैर्नेत्रैस्तमेववीक्ष्यमाणास्तत्रतत्राईणानयनाद्यर्थ
चलंतीस्मयतःस्नेहेनसम्यक्बद्धाअतएवतमेवानुगतानिचेतांसियेषां १३ आगारान्नियातिनिर्गच्छतिसति औत्कंठ्यादे
नोःउद्गलतस्रवतबाष्पंअश्रुण्यरुंधन्नेत्रेष्ववस्तंभितवत्यः तत्रहेतुःअभद्रंनोस्यात् अमंगलंमाभूदित्येतदर्थं १४
समंएककालंमृदंगादयोदशवाद्यभेदाः १५ प्रेमव्रीडास्मितपूर्वमीक्षणंयासांताः १६ गुडाकानिद्रातस्याईशोजितनिद्रोर्जु

तस्मिन्न्यस्तधियःपार्थाःसहेरन्विरहंकथं दर्शनस्पर्शसंलापशयनासनभोजनैः १२ सर्वेतेनिमिषैर्नेत्रैस्तमनुद्रु
तचेतसः वीक्षंतःस्नेहसंबद्धाविचेलुस्तत्रतत्रह १३ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते निर्यात्यगारा
न्नोभद्रमितिस्याद्बांधवस्त्रियः १४ मृदंगशंखभेर्यश्चवीणापणवगोमुखाः धुंधुर्यानकघंटाद्यानेदुर्दुंदुभयः
समं १५ प्रासादशिखरारूढाःकुरुनार्योदिदृक्षया ववृषुःकुसुमैःकृष्णंप्रेमव्रीडास्मितेक्षणाः १६ सितातपत्रं
जग्राहमुक्तादामविभूषितं रत्नदंडंगुडाकेशःप्रियःप्रियतमस्यह १७ उद्धवःसात्यकिश्चैवव्यजनेपरमाद्भुते
विकीर्यमाणःकुसुमैरेजेमधुपतिःपथि १८ अश्रूयंताशिषःसत्यास्तत्रतत्रद्विजेरिताः नानुरूपानुरूपा
श्चनिर्गुणस्यगुणात्मनः १९ अन्योन्यमासीत्संजल्पउत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणांसर्वश्रुतिमनोहरः २०

नः १७ व्यजनेचामरेजग्रहतुः मधुपतिःश्रीकृष्णः १८ सत्याःश्रीकृष्णेतासांअव्यभिचारात् किंतु नानुरूपाश्चनिर्गु
णस्यपरमानंदस्यसुखीभवेत्यादयोनानुरूपाःगुणात्मनोमानुष्यनाट्यावतारेअनुरूपाश्चेत्यर्थः संधिरार्षः १९
सर्वासांश्रुतीनांमनोहरःउपनिषदोपिमूर्तिमंत्यस्तंसंजल्पंअभ्यनंदन्नित्यर्थः २० श्रीरामजयरामजयजयराम

तत्रैतेजसः सौंदर्यादतिशयेन विस्मिताभ्यः सखिभ्योन्याः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति चतुर्भिः वैस्मरणे
किलेति प्रसिद्ध्या प्रमाणं द्योतनं य एक एवाद्वितीयः पुरुष आसीत् स वा अयं श्रीकृष्णः कुत्रासीत् अविशेष आत्मनि निःप्रपंचे नि
जरूपे कदा अग्रे गुणेभ्यः गुणक्षोभात् पूर्वं तथा निशि प्रलये च तस्मल क्षणं जगदात्मनि जीवे निमीलितात्मन्नितिलुप्तसमंस्यंतं
परं जातावेकवचनं ईश्वरे लीनरूपेषु जीवेषु सत्स्वित्यर्थः ननु जीवानां ब्रह्मत्वात् कथं लयस्तत्राह सुप्तासु शक्तिषु सतीषु जी
वोपाधिभूतसत्वादिशक्तिलय एव जीवलय इत्यर्थः २१ तदेवं सृष्टेरादौ प्रलयानंतरं च निःप्रपंचावस्थानमुक्त्वा सृष्टिप्रलय
योर्मध्ये सप्रपंचावस्थानमाहुः स एव अप्रच्युतस्वरूपस्थितिरेव प्रकृतिं अनुससार अधिष्ठितवान् भूयः पुनः सृष्टिप्रवाह
स्यानादित्वात् कीदृशीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायां मोहिनीं अत एव सिसृक्षतीं स्रष्टुमि

सवै किलायं पुरुषः पुरातनो य एक आसीदविशेषमात्मनि अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्त
शक्तिषु २१ स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं अनामरूपात्मनि रूपनामनी विधित्स
मानोनुससार शास्त्रकृत् २२ स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः पश्यंति भक्त्युत्कलि
तामलात्मना नन्वेष सत्वं परिमार्ष्टुमर्हति २३ श्री श्री राम ७ ७ ७ ७ ७ ७

च्छतीं किमर्थमनुससार अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः कर्मा
णि च विधातुं वेदान् कृतवानित्यर्थः शास्त्रकृदिति २२ अस्य दर्शनमिति दुर्लभमस्माभिर्लब्धमित्याहुः सवै अयं यस्य परं स्व
रूपं अघ्रिं वा निर्जितो मातरिश्वा प्राणो यैः इत्थं मार्षते सूरय एवात्रैव हृदये पश्यंति केन भक्त्या उत्कलितः उत्कंठितो मलो
य आत्मबुद्धिस्तेन दृश्यते त्वग्र्यया बुद्ध्येति श्रुतेः बुद्धिवैमल्यास्यापि अयमेव हेतुरित्याहुः ननु हे सखि एष एव सत्वं बुद्धिं परि
मार्ष्टुं सम्यक् शोधयितुमर्हति ननु योगादय इत्यर्थः यद्वा नु अहो एष सत्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेन अप्रत्यक्षी
भवितुं नार्हति किं त्वनेन सहैव गंतव्यमित्यर्थः २३ ३७

81/1981

पुण्यश्लोकतामाहुः हे सखि यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैः अनुगीतसत्कथः अनुगीताः सत्याः कथा यस्य स ए
वायं गानप्रकारमाहुः य एक ईश इत्यादि २४ एवंभूतस्य नानावतारकारणमाहुः यदाहीति तमोव्याप्ताधीर्येषां ते नृपा अ
धर्मेण जीवंति केवलं प्राणान् पुष्णंति तत्र तदा एष एव भवाय स्थित्यै सत्वतः विशुद्धरूपेण सत्वेन रूपाणि दधत् भगादीनि ध
त्ते प्रकटयति युगे युगे न तद्वत् सरैश्वर्यं ऐश्वर्यं सत्यं सत्यप्रतिज्ञं ऋतं यथार्थोपदेशकत्वं दयां भक्तकृपां यशः अद्भुतकर्मत्वं
२५ विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयति अहो इति पंचभिः यद्यस्मात् एषः पुरुषोत्तमः श्रियः पतिः स्वजन्मना य
दोः कुलं अंचति पूजयति सत्करोति अतः श्लाघ्यतमं तत्वं क्रमणेन च मधोर्वनं मथुरां सत्करोति अतस्तत्पुण्यतममिति न

सवा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्ज
ते २४ यदा ह्यधर्मेण तमोधियो नृपा जीवंति तत्रैष हि सत्वतः किल धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दध
द्युगे युगे २५ अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं यदेष पुंसामृषभः श्रियः पतिः स्वजन्म
ना चंक्रमणेन चांचति २६ अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः पश्यंति नित्यं यदनुग्रहेषितं
स्मितावलोकं स्वपतिं च यत्प्रजाः २७ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः पिबंति याः स
ख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः २८

मर्थस्याप्यतां नातिशये अलमिति तत्राप्यर्थे अहो इत्युक्तं २६ अहो बत आश्चर्यं किं न तत् कुशस्थली द्वारका स्वर्ग उत्कृष्ट इति यद्य
शस्तस्य तिरस्करी परिभवकर्त्री भुवश्च पुण्ययशः कर्त्री भवति यद्यतः यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेण ईषितं स्मितपूर्वावलो
कं यद्वा अनुग्रहार्थमिषितं इष्टं स्वस्यात्मनः पतिं श्रीकृष्णं न तु पित्रादिवद्देहमात्रपतिं नित्यं पश्यंति स्म उषितमिति पाठे स्वा
नुग्रहार्थमुषितं कृतनिवासं नैतत्स्वर्गेस्तीत्यर्थः २७ हे सखि अस्य गृहीतपाणिभिः पत्नीभिः ईश्वरोयमेव नूनं च जन्मां
तरेषु समर्चितः यस्मिन्नधरामृते आशयश्चित्तं यासां ताः संमोहं प्राप्ता मनो हरत्वमुक्तं २८ रामचंद्र प्रसन्न कृष्ण

एतत्प्रपंचः याइतिह्वाभ्यांवीर्यंप्रभावएवशुल्कंमूल्यंतेनशुष्मिणः बलिष्ठान्प्रद्युम्नश्चशांबश्चांबश्चसुतायासांरुक्मिणीजांबव
तीनग्नजितीनांताआदिर्यासांसत्यभामादीनांताः याश्चापराः अस्यश्लोकस्योत्तरश्लोकेनान्वयः २९ एतास्त्रीत्वमेवपरंकेवलंसा
धुशोभनंकुर्वते अपास्तंपेशलंभद्रंस्वातंत्र्यंयस्मात् निरस्तंशुचित्वंयस्मात्तथाभूतमपि जातुकदाचिदपिनपेतिननिर्गच्छति
आत्मतिभिः व्याहारैः यद्वापारिजातादिप्रियवस्त्वाहरणैः हृदिस्पृशत् आनंदयत् ३० एवंविधाश्चित्रागिरः सस्मितेननिरीक्षणेनाभि
नंदन्सहरिर्ययौ ३१ मधुद्विषोपिगोपीथायरक्षणायस्नेहात्परेभ्यः शत्रुभ्यः शंकितसन्प्रायुंक्त हस्त्यश्वरथपादातसेनांगं

यावीर्यशुल्केनहृताः स्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः प्रद्युम्नशांबांबसुतादयोपराया श्चाहृताभौमवधे
सहस्रशः २९ एताः परंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंबतसाधुकुर्वते यासांगृहात्पुष्करलोचनः पतिर्नजात्वपे
त्याहृतिभिर्हृदिस्पृशत् ३० एवंविधावदंतीनांसगिरः पुरयोषितां निरीक्षणेनाभिनंदन्सस्मितेनययौहरिः ३१
अजातशत्रुः पृतनांगोपीथायमधुद्विषः परेभ्यः शंकितःस्नेहात्प्रायुंक्तचतुरंगिणीं ३२ अथदूरगतान्शौरिः कौ
रवान्विरहातुरान् संनिवर्त्यदृढंस्नेहात्प्रायात्स्वनगरींप्रियैः ३३ कुरुजांगलपांचालान्शूरसेनान्सयामुनान्
ब्रह्मावर्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ ३४ मरुधन्वमतिक्रम्यसौवीराभीरयोः परान् आनर्तान्भार्गवोपागा
च्छ्रांतवाहोमनाग्विभुः ३५ तत्रतत्रहतत्रत्यैर्हरिः प्रत्युद्यतार्हणः सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ३६

स्याच्चतुर्विधाभिस्सैवं चतुरंगिणीपृतनांसेनां ३२ पांडोः कुरुवंशजत्वात्पांडवा अपिकौरवाएवतान्प्रियैरुद्धवादिभिः सह ३३
कुरुक्षेत्रंकुरुदेशांतर्गतमेवक्रमोत्रनविवक्षितः ३४ मरुर्निरुदकोदेशः धन्वोल्पोदकः आनर्तोस्योद्धारकादेशः सविभुः उपा
गात्प्राप्तः हेभार्गव मनाक्ईषत्श्रांतावाहायस्य ३५ तत्रतत्रदेशेतत्रत्यैर्जनैप्रत्युद्यतानिनिवेदितानि अर्हणानिउपायना
नितस्मैसः सायंअपराह्ने पश्चादिशंभेजे प्राप्तः तदागविष्ठः स्वर्गस्थः सूर्यः गांउदकंगतः प्रविष्टअस्तंगतइत्यर्थः भद्यो
वाएषप्रातरुदेत्यपः सायंप्रविशतीतिश्रुतेः यद्वातदासायंकालेरथारूढतीर्यगविष्ठः भूमौस्थितः गांजलाशयगतः सन्पश्चा
द्दिशंसंध्यांभेजे उपासितवानित्यर्थः ३६ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेटीकायांदशमोध्यायः १० राम ३८

83
1981

आनर्तेस्तूयमानस्यपुरींनिर्विश्यबंधुभिः एकादशेरतिः सम्यक्यादवेंद्रस्यवर्ण्यते १ उत्तंबेरुच्चलत्तोरसुदंवध्वजतोरणं
उल्लसद्दलदीपाकीस्वपुरंप्रभुराविवत् २ स्वद्गानसमृद्धान्दरवरंपांचजन्यंशंखंदध्मौवादितवान् १ दरः शंखउच्चकासेशुशुभे
कथंभूतः दरः करकंजसंपुटेदाध्यायमानः आपूर्यमाणः धवलमुदरंयस्यसः तथापिकृष्णस्यअधरशोणेनशोणिमायस्यसः
कथमुच्चकाशे अब्जखंडेरक्तकमलसमूहेकलहंसोराजहंसः उच्चशब्दोयथातद्वत् २ जगतोयद्भयंमरणंयमोवातस्यभ
यस्यनाशकंप्रत्युद्ययुः प्रत्युजग्मुर्भर्तुर्दर्शनेलालसांऔत्सुक्यंयासांताः ३ तस्मिन्श्रीकृष्णेउपनीताः समर्पिताः बलयः उ-

इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेदशमोध्यायः १० सूतउवाच आनर्तान्सउपव्रज्यस्वृद्धान्जनपदान्स्वका
न् दध्मौदरवरंतेषांविषादंशमयन्निव १ सउच्चकाशेधवलोदरोदरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमा
नः करकंजसंपुटेयथाब्जखंडेकलहंसउत्स्वनः २ तमुपाश्रित्यनिनदंजगद्भयभयापहं प्रत्युद्ययुः प्रजाः सर्वाभ
र्तृदर्शनलालसाः ३ तत्रोपनीतबलयोरवेर्दीपमिवादृताः आत्मारामंपूर्णकामंनिजलाभेननित्यदा ४ प्रीत्यु
त्फुल्लमुखाः प्रोचुर्हर्षगद्गदयागिरा पितरंसर्वसुहृदमवितारमिवार्भकाः ५ नताः स्मतेनाथसदांघ्रिपंकजंविरिं
चिवैरिंच्यसुरेंद्रवंदितं परायणंक्षेममिहेच्छतांपरंनयत्रकालः प्रभवेत्परः प्रभुः ६ भवायनस्त्वंभवविश्वभावनत्व
मेवमाताथसुहृत्पतिः पिता त्वंसद्गुरुर्नः परमंचदैवतंयस्यानुवृत्त्याकृतिनोबभूविम ७

पायनानियाभिः निरपेक्षेपितस्मिन्नादरेणसमर्पणेदृष्टांतः रवेदीपमिवेति पितरमर्भकाइवतंसर्वसुहृदमवितारमूचुरित्यु
त्तरेणान्वयः सुहृत्वेनैवावितारंनतुकामेन अत्रहेतुः आत्मारामं तत्रहेतुः परमानंदनिजस्वरूपलाभेनैवपूर्णकामं ५ वि
रिंचिः ब्रह्मा वैरिंच्याः सनकादयः इहसंसारेक्षेममिच्छतांपरायणंपरमंशरणंकुतः परेषांब्रह्मादीनांप्रभुरपिकालोयत्र
प्रभुर्नभवेत् ६ अतः भवायउद्भवायनोअस्माकंत्वंभव हेविश्वभावन कृतिनः कृतार्थाः बभूविमजातावयं ७ राम

कृतार्थत्वमेवाहुः अहोभगवतावयंसनाथाःस्मयद्यस्मात्तवरूपंपश्येम त्रैविष्टपानामपिदूरेदर्शनंयस्यदेवानामपिदुर्लभ
मित्यर्थः प्रेम्णार्द्रंस्मितंतद्युक्तंस्निग्धंनिरीक्षणंयस्मिन्तत् आननंयस्मिन् तद्रूपंसर्वेषुचांगेषुसौभगंयस्मिन् ८ अर्थ
काइवसकरुणमाहुः यर्ह्ययदाभो अंबुजाक्षनोभवानिति पाठेनइत्यनादरेषष्ठी अस्माननादृत्य अपससार अपहाय
जगाम कुरून्हस्तिनपुरंमधून्मथुरांवा तत्रतदारविंविना आंध्येदृष्णोर्यथाएवंतवनः त्वदीयानामस्माकमपीत्यर्थः
९ इतिचएवंविधाअन्याश्चोच्चरिताःवाचःशृण्वन्दृष्ट्यासाभिर्नरावलोकनेनानुग्रहंकुर्वन् १० पुरींद्वारकांप्राविशत् १०

अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननंपश्येमरूपंतवसर्वसौभ
गं ८ यर्ह्यंबुजाक्षापससारनोभवान्कुरून्मधून्वाथसुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमःक्षणोभवद्रविंविना
क्ष्णोरिवनस्तवाच्युत ९ कथंवयंनाथचिरोषितेत्वयिप्रपन्नत्स्वाखिलतापशोषणं जीवेमतेसुंदरहासशोभितं
अपश्यमानावदनंमनोहरं १० इतिचोदीरिताःवाचःप्रजानांभक्तवत्सलः शृण्वानोऽनुग्रहंदृष्ट्यावितन्वन्प्राविश
त्पुरीं १० मधुभोजदशार्हार्हकुकुरांधकवृष्णिभिः आत्मतुल्यबलैर्गुप्तांनागैर्भोगवतीमिव ११ सर्वर्तुसर्ववि
भवैःपुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृतपद्माकरश्रियं १२ गोपुरद्वारमार्गेषुकृतकौतुकतोरणं चित्र
ध्वजपताकाग्रैरंतःप्रतिहतातपां १३

तांद्वारकांस्तौतिपंचभिःस्वतुल्यबलैर्मधुभोजादिभिर्गुप्तांरक्षितां ११ सर्वेषुऋतुषुसर्वेविभवाःपुष्पादिसंपदोयेषांतेपु
ण्यवृक्षालताश्रमालतामंडपाश्रयेषुतैरुद्यानादिभिर्वृतायेपद्माकराःसरांसितैःश्रीशोभायस्यांतां उद्यानंफलप्रधा
नं उपवनंपुष्पप्रधानंआरामःक्रीडार्थंवनं १२ गोपुरंपुरद्वारंगृहद्वारं कृतानिकौतुकेनउत्सवेनतोरणानियस्यां गरुडा
दिचिह्नांकिताःध्वजाःजयप्रदयंत्रांकिताःपताकाःचित्राणांध्वजपताकानामग्रैःअंतःप्रतिहतःआतपोयस्यां १३ ३९

85
1984

संमार्जितानिसारितरजस्कानिमहामार्गादीनियस्यांमहामार्गाःराजमार्गाःरथ्याइतरमार्गाः आपणकाःपण्यवीथयःचत्व
राण्यंगणानिफलादिभिरुप्तांअवकीर्णा १४ १५ प्रेष्ठमायांतंनिशम्यश्रुत्वावसुदेवादयःप्रत्युज्जग्मुरितिचतुर्थेनान्वयः
१६ प्रहर्षवेगेनउच्छ्वसितानिउल्लंघितानिशयनादीनियैःशामभुक्तगतौ १७ वारणेंद्रंमंगलार्थंपुरस्कृत्यपुरतःकृत्वाससुमं
गलैःसुमंगलपुष्पादियुक्तपाणिभिःब्रह्मघोषोमंत्रपाठः १८ प्रणयेनस्नेहेनआगतंसाध्वसंसंभ्रमोयेषां वारमुख्याश्चप्र

संमार्जितमहामार्गरथ्यापणकचत्वरां सिक्तांगंधजलैरुप्तांफलपुष्पाक्षतांकुरैः १४ द्वारिद्वारिगृहाणांचदध्य
क्षतफलेक्षुभिः अलंकृतांपूर्णकुंभैर्बलिभिर्धूपदीपकैः १५ निशम्यप्रेष्ठमायांतंवसुदेवोमहामनाः अक्रूरश्चोग्र
सेनश्चरामश्चाद्भुतविक्रमः १६ प्रद्युम्नश्चारुदेष्णश्चसांबोजांबवतीसुतः प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः
१७ वारणेंद्रंपुरस्कृत्यब्राह्मणैःससुमंगलैः शंखतूर्यनिनादेनब्रह्मघोषेणचादृताः १८ प्रत्युज्जग्मूरथैर्हृष्टाःप्र
णयागतसाध्वसाः वारमुख्याश्चशतशोयानैस्तद्दर्शनोत्सुकाः १९ लसत्कुंडलनिर्भातकपोलवदनश्रियः नटन
र्तकगंधर्वाःसूतमागधबंदिनः गायंतिचोत्तमश्लोकचरितान्यद्भुतानिच २१ भगवांस्तत्रबंधूनांपौराणामनुव
र्तिनां यथाविध्युपसंगम्यसर्वेषांमानमादधे २२ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वास्यचाश्वपा
केभ्योवरैश्चाभिमतैर्विभुः २३ स्वयंचगुरुभिर्विप्रैःसदारैःस्थविरैरपि आशीर्भिर्युज्यमानोन्यैर्बंदिभिश्चाविशत्पुरं २४

त्युज्जगाम अद्भुतानिचेतिचकारस्यबंदिनश्चेत्यन्वयः १९ लसत्कुंडलैर्निर्भातियानिकपोलानितैर्वदनेषुश्रीर्यासांताःवार
मुख्याःनर्तक्योवेश्याः २० नटाःनवरसाभिनयचतुराःतालाद्यनुसारेणनृत्यंतोनर्तकाःगंधर्वागायकाःसूताःपौराणिकाःप्र
क्ताःमागधावंशशंसकाः बंदिनस्त्वमलप्रज्ञाःप्रस्तावसदृशोक्तयः तेसर्वेगायंतिचेतिचकारस्यान्वयः २१ यथाविधिःस
हयथोचितंतैस्तथासमागमंकृत्वासर्वेषांमानंकृतवानित्यर्थः २२ तदाहप्रह्वेति प्रह्वत्वंशिरसानतिःअभिवंदनंअभिवाद
नंवाचानतिःअश्वास्यअभयंदत्वाश्वपाकानभिव्याप्यवरैःअभीष्टदानैश्चमानंकृतवान् २३ अन्यैश्चबंदिभिश्च २४

भा० तस्येक्षणे महानुत्सवो यासां २५ यद्यस्मान्नित्यं दोसे अच्युतं निरीक्षमाणानामपि दृशो नैव तृप्यंति अत आहुः श्रियः शोभा प्र०
४० याः धामस्थानं अंगं यस्य तं २६ एतदेवाभिनयेनाह श्रियो लक्ष्म्याः यस्योरः वक्षः निवासः यस्य मुखं सर्वप्राणिनां दृशां सौंदर्या
मृतपानाय पात्रं यस्य बाहवो लोकपालानां निवासः सारंगायंतीति सारंगा भक्तास्तेषां यस्य पादांबुजं वासः तन्निरीक्षमाणा
नां दृश इति पूर्वेणान्वयः २७ सितेरातपत्रव्यजनैरुपस्कृतो मंडितः अर्कश्च उडुपो नक्षत्रसहितश्चंद्रश्चापमिंद्रधनुर्वैद्युतं वि
द्युत्तेजः अर्कश्छत्रस्योपमानं नक्षत्राणि पुष्पवृष्टेः चंद्रः परिभ्रमकृतमंडलाकारयोश्चामरव्यजनयोः चापं वनमालायाः
विद्युत्तेजः पिशंगवाससः अभ्रतोपमेयं यदि घनस्योपरि सूर्यबिंबं उभयतश्चंद्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं

राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः २५ नित्यं निरीक्षमाणानां यद्यपि
द्वारकौकसां न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं २६ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां बाहवो लो
कपालानां सारंगाणां पदांबुजं २७ सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि पिशंगवासा वनमाल
या बभौ घनो यथार्कोडुपचापवैद्युतैः २८ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमु
खा मुदा २९ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ३० अथाविशत्स्वभ
वनं सर्वकाममनुत्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ३१ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातम
नोमहोत्सवाः उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ३२ श्रीरामजयरामजयजयराम

स्त्विंद्रं विद्युत्तेजो यदि स्यात् तर्हि स घनो यथा भवति तथा हरिर्बभासेत्यर्थः २८ देवकीप्रमुखाः सप्त ववंदे इति मातृसौंदर्यादादर
विशेषज्ञापनार्थमुक्तं अष्टादशापि वसुदेवस्य भार्या मातृतुल्यत्वान्नमस्कृता एव २९.३० सहस्राणि षोडशेति चकारात् षोडश
शताधिकानीति ज्ञेयं ३१ प्रोष्य देशांतरे उषित्वा आराद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः आसनादाशया
च आसनाद्देहेन उत्तस्थुः आशयांतःकरणं तस्मादप्यात्मनोत्तस्थुः श्रीकृष्णेनात्मनः संश्लेषे अंतःकरणव्यवधानमपि नास
हंतेत्यर्थः व्रीडितानि लोचनानि आननानि यासां अपांगैरेव वीक्षणात् व्रीडितलोचनाः अवनतमुखत्वात् व्रीडितानना: ४०

87
1981

साकं व्रतैरिति हास्यक्रीडावर्जनादिनियमा अपि ताभ्य उत्तस्थुरित्यर्थः धृतव्रता एवोत्तस्थुरिति वा व्रतानि च याज्ञवल्क्येनोक्ता
नि क्रीडा शरीरसंस्कारसमाजोत्सवदर्शनं हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृकेति ३२ आर्यात्तं पतिं दर्शनात् पूर्वमात्मना बु
द्ध्या परिरेभिरे ततो दृष्टिभिः ततः समीपमागतं आत्मजैः पुत्रैर्गृहीतकंठमालिंगयंत्य इव स्वयमालिंगितं इत्यर्थः अत्र हेतुः
दुरंतभावाः गंभीराभिप्रायाः तदा च तासां नेत्रयोः निरुद्धमप्यंबु बाष्पं वैक्लव्यात् वैवश्यात् आस्रवत् इषत्सुस्राव अत ए
व धैर्यहान्या विलज्जतीनां हे भृगुवर्य चित्रं शृणुध्विति ३३ पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकांते प्रवर्तते स्म
पदे पदे प्रतिक्षणं नवं नवमेव अत्रैके मुतिकन्यायः का विरमतेति चला चंचलस्वभावापि ३४ उक्तं श्रीकृष्णचरितं संक्षिप्या

तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात्
३३ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति क
र्हिचित् ३४ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां विधाय वैरं श्वसनो यथानलं मिथो वधे
नोपरतो निरायुधः ३५ स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ३६
उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विम
थितुं कुहकैर्न शेकुः ३७

ह एवमिति द्वाभ्यां क्षितेर्भारायजन्म एषां ते अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां श्वसनो वायुर्वे
णूनां अन्योन्यसंघर्षणानलं विधाय मिथो दाहेन यथोपशाम्यति तद्वत् ३५ स्त्रीरत्नकूटस्थः उत्तमस्त्रीकदंबस्थः ३६ नन्वेवं
स्त्रीसंगादिभिः संसारप्रतीतेः कथं भगवानवतीर्ण इत्युच्यते तत्राह उद्दामेति द्वाभ्यां यासां उद्दामः गंभीरो यो भावोऽभिप्रा
यः तस्य पिशुनः सूचकः अमलो वल्गुः सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतः अमदनो श्रीमहादेवोऽपि संमुह्य लज्जया चा
पं पिनाकं अजहात् अथवा निहतस्ताडितो मदनोऽपि जगद्विजयी संमुह्य इति कर्तव्यतामूढः सन् चापं अजहात् जहौ एवं प्र
भावायाः स्त्रियः इत्येतावद्विवक्षितं यद्वा भगवतो मोहिनीरूपेण महेशोऽपि मोहित एव एताश्च तद्विलास एवेति तथोक्तं ताः
कुहकैः कपटैर्विभ्रमैर्यस्येंद्रियं मनः विमथितुं क्षोभयितुं न शेकुः ३७ ७ ७ ७ ७ ७ ७ राम

तं श्रीकृष्णं अयंप्राकृतोलोकः आत्मौपम्येनस्वसादृश्येनसंगिनंमनुजंमन्यते अत्रहेतुः व्यावृण्वानंमनुष्यवत्व्यापारं कुर्वा
णं यतोयमबुधः अतत्वज्ञः ३८ कुतइत्यपेक्षायामैश्वर्यलक्षणमाह एतदिति ईशस्येशनमैश्वर्यंनामैतदेवप्रकृतिस्थोपित=
स्याः गुणैः सुखदुःखादिभिः सदानयुज्यतइतियत्तद्यथा आत्मस्थैः आनंदादिभिः आत्माश्रयापिबुद्धिर्नयुज्यतेतद्वत् वै
धर्म्यदृष्टांतोवा आत्मस्थैः सत्ताप्रकाशादिभिर्यथाबुद्धिर्युज्यतइति एवंवा असदात्मादेहः तत्रस्थैर्गुणैः सदाश्रयाबुद्धि
स्तदुपाधिर्जीवोयथायुज्यते एवंप्रकृतिस्थोपितद्गुणैर्नयुज्यतइति यतः एतदीशनमीशस्येति ३९ तत्पत्न्योपितस्यतत्त्वं
नविजानंतीत्याह तंस्त्रैणं आत्मवश्यंरहः एकांते अनुव्रतं अनुसृतं चमेनिरे भर्तुरप्रमाणविदः अप्रमाणभियत्ता महिमानम

तमयंमन्यतेलोकोह्यसंगमपिसंगिनं आत्मौपम्येनमनुजंव्यापृण्वानंयतोबुधः ३८ एतदीशनमीशस्यप्रकृ
तिस्थोपितद्गुणैः नयुज्यतेसदात्मस्थैः यथाबुद्धिस्तदाश्रया ३९ तंमेनिरेबलामूढास्त्रैणंचानुव्रतंरहः अप्रमा
णविदोभर्तुरीश्वरंमतयोयथा ४० इतिश्रीभागवतेमहापुराणेप्रथमस्कंधे एकादशोध्यायः श्री राम
शौनकउवाच अश्वत्थाम्नोपसृष्टेनब्रह्मशीर्ष्णोरुतेजसा उत्तरायाहतोगर्भईशेनाजीवितःपुनः १ राम

जानंत्यइत्यर्थः ईश्वरंक्षेत्रज्ञंमतयः अहंवृत्तयोयथास्वाधीनंस्वधर्मयोगिनंमन्यतेतद्वत् यद्वायथातासांमतयः क=
ल्पनाः तमीश्वरंस्त्रैणंवश्यंमेनिरइत्यर्थः ४० इति श्रीप्रथमस्कंधेटीकायांएकादशोध्यायः पुरोक्तंयत्प्रसंगाद्द्रौणिद्रे
ड्यादिविस्तरात् द्वादशेतुतदेवाथपरिक्षिज्जन्मवर्ण्यते १ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थांचपांडुपुत्राणां
वक्ष्येकृष्णकथोदयमितिप्रतिज्ञायपांडवानांराज्यस्थितिरूपोद्घातभूतासप्रसंगंसप्तमाध्यायमारभ्यनिरूपिता इ
दानींओपोद्घातिकमुक्त्वानुवादपूर्वकंपृच्छति अश्वत्थाम्नेति उपसृष्टेन विसृष्टेन तस्यजन्मादीनिब्रूहीत्युत्त
रेणान्वयः १ हरेकृष्ण श्रीरामजयरामजयजयराम नारायणनारायणजयगोविंदहरे ७

89
1981

सपरिक्षित प्रेत्यदेहंत्यक्त्वा २ प्रार्थयेनत्वाज्ञापयामीत्या गदितुंयदिमन्यसे अनुग्रहेणतर्हिब्रूहि यस्यज्ञानमदाच्छुक
इतिश्रवणेच्छायांकारणं ३ निस्पृहस्यापिराज्ञः श्रीकृष्णानुग्रहावताद्दृक्पौत्रः समजनीतिवक्तुंतस्यश्रीकृष्णेभनुसुद्र्क
माह अपीपलदितित्रिभिः पितृवदपीपलत्पालयामास ४ ऋतवः तदुपार्जितालोकाश्च ५ सुरस्पार्हाः सुराणांस्पृहणी
यास्तसंपदादयः कामाविषयाः राज्ञः किंमुदंप्रीतिंअधिजह्रुः किंकृतवंतइत्यर्थः अत्रहेतुः मुकुंदेएवमनोयस्येति

तस्यजन्ममहाबुद्धेकर्माणिचमहात्मनः निधनंचयथैवासीत्सप्रेत्यगतवान्यथा २ तदिदंश्रोतुमिच्छामि
गदितुंयदिमन्यसे ब्रूहिनःश्रद्दधानानांयस्यज्ञानमदाच्छुकः ३ सूतउवाच अपीपलद्धर्मराजः पितृव
द्रंजयन्प्रजाः निस्पृहः सर्वकाम्येभ्यः कृष्णपादानुसेवया ४ संपदः क्रतवोविप्रामहिषीभ्रातरोमही जं
बुद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं ५ किंतेकामाः सुरस्पार्हासुकुंदमनसोद्विजाः अधिजह्रुर्मुदंराज्ञः
क्षुधितस्यपथेतरे ६ मातुर्गर्भगतोवीरः सतदाभृगुनंदन ददर्शपुरुषंकंचिद्दह्यमानोस्त्रतेजसा ७ अं
गुष्ठमात्रममलंस्फुरत्पुरटमौलिनं अपीच्यदर्शनंश्यामंतडिद्वाससमच्युतं ८ श्रीमद्दीर्घचतुर्बाहुंतप्त
कांचनकुंडलं क्षतजाक्षंगदापाणिमात्मनः सर्वतोदिशं ९ परिभ्रमंतमुल्काभांभ्रामयंतंगदांमुहुः अस्त्र
तेजः स्वगदयानीहारमिवगोपतिः १०
क्षुधितस्यअन्नैकमनसः यथाइतरेस्रक्चंदनादयोनकुर्वंतितद्वत् ६ प्रस्तुतमाह मातुरिति ७ पुरटंसुवर्णंस्फुरत्पुर
टमौलिर्यस्यास्तितं श्रीत्यादिष्वप्येवंतिनिप्रत्ययः अपीच्यं अतिसुंदरंदृश्यतइतिदर्शनंरूपंयस्य तडिद्वाससीयस्य
तिश्याममितिचपदाभ्यांविद्युद्भूषितमेघोपमास्सूचिता अच्युतंअविकारं ८ तप्तंदाहोत्तीर्णंयत्कांचनंतन्मयेकुंडलेयस्य
क्षतजाक्षंसंरंभाद्रक्तनेत्रं ९ अहोमद्भक्तस्यापिगर्भस्थादिपीडेतिभावः अस्त्रतेजोविधमंतंविनाशयंतं नीहारंहि
मंगोपतिः सूर्यइव १० राम ७ श्री ७ श्री ७ श्री राम ७ राम ७ श्री ७ राम ७ श्री ७

संनिकर्षेसमीपेददर्शदृष्ट्वाचासौकइतिपर्यैक्षतवितर्कितवान् अमेयात्माकथंतद्विधूतवानित्यवितर्क्यरूपः धर्मंगोपायती
ति धर्मगुप् ११ दशमासपरिछेद्यस्यतस्यमिषतःपश्यतः यत्रदृष्टःतत्रैवांतर्हितः नत्वन्यत्रगतः यतोविभुः सर्वगतः उद
र्कः उत्तरंफलंसर्वगुणानामुत्तरोत्तराधिक्यसूचकेलग्ने तत्रहेतुः अनुकूलैरन्यैर्ग्रहैः सहितानांशुभग्रहाणामुदयोयस्मि
न् १२जातकंजातकर्ममंगलंपुण्याहं १३ वरान्श्रेष्ठान् स्वन्नंशोभनमन्नंच तीर्थवित् इतिकालज्ञः यावन्नछिद्यतेनालं
तावन्नाप्नोतिसूतकं छिन्नेनालेततःपश्चात्सूतकंतुविधीयतइतिवचनात्ततःपूर्वंप्रादात् आमान्नंवाप्रजातीर्थपुत्रो

विधमंतंसंनिकर्षेपर्यैक्षतचइत्यसौ विधूयतदमेयात्माभगवान्धर्मगुप्विभुः ११ मिषतोदशमासस्यतत्रैवांत
र्दधेहरिः ततःसर्वगुणोदर्केसानुकूलग्रहोदये १२ जज्ञेवंशधरःपांडोर्भूयःपांडुरिवौजसा तस्यप्रीतमनाराजा
विप्रैर्धौम्यकृपादिभिः १३ जातकंकारयामासवाचयित्वाचमंगलं १३ हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृ
पतिर्वरान् प्रादात्स्वन्नंचविप्रेभ्यःप्रजातीर्थेसतीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टाराजानंप्रश्रयानतं एषह्यस्मि
न्प्रजातंतोकुरूणांकौरवर्षभ १५ दैवेनप्रतिघातेनशुक्लेसंस्थामुपेयुषि रातोवोनुग्रहार्थायविष्णुनाप्रभविष्णु
ना १६ तस्मान्नाम्नाविष्णुरातइतिलोकेबृहच्छ्रवाः भविष्यतिनसंदेहोमहाभागवतोमहान् १७ रामकृष्ण

त्यतिपुण्यकाले पुत्रेजातेव्यतीपातेदानंभवतिचाक्षयमितिस्मृतेः देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां आयांति
हिनृपश्रेष्ठपुण्याहमितिचाब्रुवन् १४ हेकौरवर्षभकुरूणांकुरुवंश्यानां १५ शुक्ले शुद्धेअस्मिन्प्रजातंतोदैवेनअप्र
तिघातेनउर्वरिणसंस्थांनाशमुपेयुषिगतेसति वोनुग्रहार्थाययस्मात् प्रभवशीलेनविष्णुनारातोदत्तःरक्षितोवा १६
तस्माल्लोकेविष्णुरातनाम्नाभविष्यति महाभागवतश्चगुणैश्चमहान्भविष्यति नात्रसंदेहइतितंराजानंब्राह्मणाऊचुरि
तित्रयाणामन्वयः १७

महाभागवतोभविष्यतीत्युक्तेहृष्टःपृछति अपिस्वित्साधुवादेनयशसासमत्कीर्त्या अनुवर्तिताभविष्यतीतिपूर्वस्यैवातःपर
मप्यनुषंगः १८ प्रजानामविताराक्षकःमानवःमनोःपुत्रः ब्राह्मणेषुहितःसत्यप्रतिज्ञश्च श्रीरामोयथा १९ उशीनरदेशाधिप
तिः शिबिःयेनस्वमांसंश्येनायदत्वाशरणागतःकपोतोरक्षितः स्वानांज्ञातीनांयज्वनांचयशोविस्तारकोदौष्यंतिभरतइति
२० अर्जुनयोःपार्थकार्तवीर्ययोः २१ हिमवानिवसतांनिषेव्यः अनन्यगतिकत्वेवसुधेवतितिक्षुःसंताप्रीत्यामातापितराविव

युधिष्ठिरउवाच अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः अनुवर्तितास्वित्यशसासाधुवादेनसत्तमाः
१८ ब्राह्मणाऊचुः पार्थप्रजाविताराक्षादिक्ष्वाकुरिवमानवः ब्रह्मण्यःसत्यसंधश्चरामोदाशरथिर्यथा १९ ए
षदाताशरण्यश्चयथाह्यौशीनरःशिबिः यशोवितनितास्वानांदौष्यंतिरिवयज्वनां २० धन्विनामग्रणीरेषतु
ल्यश्चार्जुनयोर्द्वयोः हुताशइवदुर्धर्षःसमुद्रइवदुस्तरः २१ मृगेंद्रइवविक्रांतोनिषेव्योहिमवानिव तितिक्षुर्व
सुधेवासौसहिष्णुःपितराविव २२ पितामहसमःसाम्येप्रसादेगिरिशोपमः आश्रयःसर्वभूतानांयथादेवोर
माश्रयः २३ सर्वसद्गुणमाहात्म्यएषकृष्णमनुव्रतः रंतिदेवइवोदारोययातिरिवधार्मिकः २४ धृत्याबलिस
मःकृष्णेप्रह्लादइवसद्ग्रहः आहर्तैषोश्वमेधानांवृद्धानांपर्युपासकः २५ राजर्षीणांजनयिताशास्ताचापथ
गामिनां निग्रहीताकलेरेषभुवोधर्मस्यकारणात् २६ तक्षकादात्मनोमृत्युंद्विजपुत्रोपसर्जितात् प्रपत्स्यतउ
पश्रुत्यमुक्तसंगःपदंहरेः २७ जिज्ञासितात्मयाथात्म्योमुनेर्व्याससुतादसौ हित्वेदंनृपगंगायांयास्यत्यद्धाकुतोभयं २८

वसहिष्णुः २२ पितामहोब्रह्मातेनसमःसाम्येसमत्वेरमाश्रयोहरिः २३ सर्वैःसद्गुणैर्यन्महात्म्यंतस्मिन्श्रीकृष्णतुल्यः २४ सत्
ग्रहःआग्रहोअभिनिवेशोयस्यआहर्ताकर्ता २५ द्विजपुत्रेणप्रेरितात्तक्षकात् आत्मनोमृत्युमुपश्रुत्यहरेःपदंप्रपत्स्यतेस
जिष्यति २७ ततश्चजिज्ञासितमात्मनोयाथात्म्यंयेनसःइदंशरीरंगंगायांहित्वा अकुतोभयंयास्यति २८ राम

राजर्षेऊणांजनमेजयादीनांलब्धाउपचितिः पूजायैः २८ परीक्षिदितिनामनिर्वक्तिसएषइति यद्यस्मात्प्रभुः समर्थः स
न्गर्भेदृष्टंपुरुषंअनुध्यायन् इहदृश्यमानेषुनरेषुमध्ये सर्वमपिनरंपरीक्षेत अयमसौभवेदितिनोवा इतिविचारयेत् अ
तःपरीक्षिदितिविख्यातः पूर्वदृष्टमितिवापाठः ३० शुक्ले शुक्लपक्षे सप्रसिद्ध उडुपोन्वहंयथाकाष्ठाभिः पंचदशकलाभिः
आपूर्यमाणोवर्धते एवंपितृभिःयुधिष्ठिरादिभिः कामैश्चतुषष्टिकलाभिश्चापूर्यमाणोववृधे ३१ पूर्वमपाकृष्योक्तान्

इतिराज्ञउपादिश्यविप्राजातककोविदाः लब्धोपचितयः सर्वेप्रतिजग्मुःस्वकान्गृहान् २९ सएषलोकेविख्या
तःपरीक्षिदितियत्प्रभुः पूर्वदृष्टमनुध्यायन्परीक्षेतनरेष्विह ३० सराजपुत्रोववृधेआशुशुक्लइवोडुपः आपू
र्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ३१ यक्ष्यमाणोश्वमेधेनज्ञातिद्रोहजिहासया राजालब्धधनोदध्यौनान्य
त्रकरदंडयोः ३२ तदभिप्रेतमालक्ष्यभ्रातरोच्युतचोदिताः धनंप्रहीनमाजह्रुरुदीच्यांदिशिभूरिशः ३३ तेन
संभृतसंभारोलब्धकामोयुधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमजयद्धरिं ३४ आहूतोभगवान्राज्ञा
याजयित्वाद्विजैर्नृपं उवासकतिचिन्मासान्सुहृदांप्रियकाम्यया ३५ ततोराज्ञाभ्यनुज्ञातःकृष्णयासहबंधु
भिः ययौद्वारवतींब्रह्मन्सार्जुनोयदुभिर्वृतः ३६ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्वादशोध्यायः १२

श्वमेधान्स्तावसरेसप्रकारंकथयति ज्ञातिद्रोहस्यहानेच्छया यक्ष्यमाणः करदंडयोरन्यत्रताभ्यांविनानलब्धध
नः दध्यौचिंतयामास करदंडस्यपरिजनभरणमात्रोपक्षीणत्वात् ३२ प्रहीनंमरुत्तस्ययज्ञेत्युक्तंसुवर्णपात्रादि
कमानीतवंतः ३३ संभृतसंभारः संपादितयज्ञोपकरणः भीतोज्ञातिद्रोहात् ३४ ३५ ३६ रामचंद्रप्रस-

४३

93
1981

निर्गमोधृतराष्ट्रस्यविदुरोक्त्यात्रयोदशे उक्तःपौत्राभिषेकेणवकुराज्ञोमहोदयं इदानींपरिक्षितःकलिनिग्रहादिकर्मा
णिकथयिष्यन् विदुरागमनेनधृतराष्ट्रप्रस्थानंततोर्जुनागमनंततःकृष्णांतर्धानंनिशम्यपांडवप्रस्थानंचनिरूपयति
त्रिभिरध्यायैर्गतिंहरिंआत्मस्वरूपंवा तथात्मगत्याअवाप्तंविधित्सितंज्ञातमिष्टंसर्वंयेन १ तदेवाह यावतःकर्मयोग
व्रतादिविषयान्प्रश्नान्प्रथमंकृतवान् कौशारवस्यपुरतः पश्चात्त्रिचतुरप्रश्नार्थज्ञानमात्रेणगोविंदेजातैकांतभक्तिः

सूतउवाच विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिं ज्ञात्वागाद्धस्तिनपुरंतयावाप्तविधित्सितः १ यावतः
कृतवान्प्रश्नान्क्षत्ताकौशारवाग्रतः जातैकभक्तिर्गोविंदेतेभ्यश्चोपरराम ह २ तंबंधुमागतंदृष्ट्वाधर्मराजः
सहानुजः धृतराष्ट्रोयुयुत्सुश्चसूतःशारद्वतःपृथा ३ गांधारीद्रौपदीब्रह्मन्सुभद्राचोत्तराकृपी अन्या
श्चाजामयःपांडोर्ज्ञातयःससुताःस्त्रियः ४ प्रत्युज्जग्मुःप्रहर्षेणप्राणंतन्वइवागतं अभिसंगम्यविधिव
त्परिष्वंगाभिवंदनैः ५ मुमुचुःप्रेमबाष्पौघंविरहोत्कंठ्यकातराः राजातमर्हयांचक्रेकृतासनपरिग्रहं ६
तंभुक्तवंतमासीनंविश्रांतंसुखमासने प्रश्रयावनतोराजाप्राहतेषांचशृण्वतां ७ युधिष्ठिरउवाच
अपिस्मरथनोयुष्मत्पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचितायत्समातृकाः ८ कयावृत्त्या
वर्तितंवश्चरद्भिःक्षितिमंडलं तीर्थानिक्षेत्रमुख्यानिसेवितानीहभूतले ९ रामकृष्णहरीवासुदेवायनमः

कृतार्थःसन्तेभ्यः प्रश्नेभ्यःउपररामततःपरंविजिज्ञासितवान् सूतःसंजयःशारद्वतःकृपः ३ कृपीद्रोणभार्याजाम
योज्ञातिभार्या अन्याश्चस्त्रियः ४ प्राणंतन्वइतिकुतश्चिन्मूर्छादिदोषतःप्राणेसन्नेसतितन्वःकरांघ्र्यादयःनिश्चे
ष्टाभवंतिपुनस्तस्मिन्नाविर्भूतेयथोत्तिष्ठंतितद्वत् ५ विरहेनयदौत्कंठ्यंतेनकातराविवशाः ६ ७ पक्षिणोयथापत्यानियथा
स्नेहपक्षच्छाययावर्धयंतितद्वद्युष्मत्पक्षपातच्छाययासमेधितानःअस्मान्किंस्मरथ समेधितत्वमेवाह विपद्गणा
द्यस्मान्मोचिताःस्म ८ वोयुष्माभिःकयावृत्त्यावर्तितंदेहवृत्तिःकृता कानिचित्तीर्थानिसेवितानीति ९ राम

भवतांचतीर्थाटननस्वार्थकृतं किंतुतीर्थानुग्रहार्थमित्याह भवद्विधेति मलिनजनसंपर्केतीर्थानिमलिनानिसंतिसंतः
मुनिः स्वयंतीर्थीकुर्वंतिस्वांतंमनः तत्रस्थेनसस्वांतस्थितेनेतिवा १० अपिकिंसुखमासतेभवद्भिः काप्रदृष्टाः श्रुतावा ११
यदुकुलक्षयावर्णनेकारणमाह नन्विति श्रेयस्कृत्तत्समुपदिशेत् १४ ननुशूद्रोसौकथमुपदिशेत्तत्राह नह्यसौशूद्रः
किंतुयमस्तद्रूपेणासीत् किंतत्रकारणंयमेचात्रगतेकोदंडधरइत्यपेक्षायामाह अर्यमास्त्र्यः दंडंबिभ्रदितिधृतवानि

भवद्विधाभागवतातीर्थभूताःस्वयंविभो तीर्थीकुर्वंतितीर्थानिस्वांतस्थेनगदाभृता १० अपिनःसुहृदस्ता
तबांधवाकृष्णदेवताः दृष्टाश्रुतावायदवःस्वपुर्यांसुखमासते ११ इत्युक्तोधर्मराजेनसर्वंतत्समवर्णयन्
यथानुभूतंक्रमशोविनायदुकुलक्षयं १२ नन्वप्रियंदुर्विषहंनृणांस्वयमुपस्थितं नावेदयत्सकरुणोदुःखि
तान्द्रष्टुमक्षमः १३ किंचित्कालमथावात्सीत्सत्कृतोदेववत्सुखं भ्रातुर्ज्येष्ठस्यश्रेयस्कृत्सर्वेषांप्रीतिमावह
न् १४ अबिभ्रदर्यमादंडंयथावदघकारिषु यावद्दधारशूद्रत्वंशापाद्वर्षशतंयमः १५ युधिष्ठिरोलब्धरा
ज्योदृष्ट्वापौत्रंकुलंधरं भ्रातृभिर्लोकपालाभैर्मुमुदेपरयाश्रिया १६ एवंगृहेषुसक्तानांप्रमत्तानांतदी
हया अत्यक्रामदविज्ञातः कालःपरमदुस्तरः १७

त्यर्थः मांडव्यस्यशापात्कश्चिच्चोराननुधावंतोराजभटामांडव्यऋषेस्तपश्चरतःसमीपेतेतान्संप्राप्यतेनसहनिब
ध्यानीयराज्ञेनिवेद्यतद्राज्ञयासर्वान्शूलमारोपयामासुः ततःराजाऋषिंज्ञात्वाशूलादवतार्यप्रसादयामास न
तोमुनिंगत्वाकुपितउवाच कस्मादहंशूलमारोपितइतितेनोक्तं त्वंबाल्येशलभंकुशाग्रेणाविध्यत्क्रीडितवानितित
च्छ्रुत्वामांडव्यस्तंशशापबाल्येअजानतोममहांतंदंडंयतस्त्वंकारितवान् अतःशूद्रोभवेति १५ इदानींराज्यापकर्षनि
रूपयितुंउत्कर्षंनिगमयति युधिष्ठिरइति कुलधरंवंशधरं १६ तदीहयागृहव्यापारेणप्रमत्तानांअत्यक्रामत् आयुःका
लोअतिक्रांतः यद्दातानस्यभवदित्यर्थः १७ ४४

१५
१७४।

अभिप्रेत्यज्ञात्वातत्प्रतीकारःक्रियतांकिंनिर्गमनेन १८ तत्राह प्रतिक्रियेति सर्वेषामपियःप्रतिकर्तव्यंतेषामपीत्यर्थः
१९ कथंधनादिवियोगःसोढुशक्यअतआह येनचेति अभिपन्नःअभिग्रस्तः २० अत्रावस्थानमतिदैन्यमितिदर्शयन्वैरा
ग्यमुत्पादयति पितृभ्रातृप्रभृतिसप्तभिःआत्माचदेहः येनपुत्राहतास्तेनभीमेनदत्तंपिंडंगृहपालइवगृहपालःश्वा २२

विदुरस्तदभिप्रेत्यधृतराष्ट्रमभाषत राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतं १८ येनचैवाभिपन्नोयंप्रा
णैःप्रियतमैरपि जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः २० प्रतिक्रियानयस्येहकुतश्चित्कर्हिचित्प्रभो
सएषभगवान्कालःसर्वेषांनःसमागतः १९ पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः आत्माचजरयाग्रस्तःप
रगेहमुपाससे २१ अहोमहीयसीजंतोर्जीविताशायययाभवान् भीमेनावर्जितंपिंडमादत्तेगृहपालवत् २२
अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदूषिताः हृतंक्षेत्रंधनंयेषांतद्दत्तैरसुभिःकियत् २३ तस्यापितवदेहोयं
कृपणस्यजिजीविषोः परैत्यनिच्छतोजीर्णोजरयावाससीइव २४ गतस्वार्थमिमंदेहंविरक्तोमुक्तबंधनः
अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः २५ यस्स्वकात्परतोवेहजातनिर्वेदआत्मवान् हृदिकृत्वाहरिंगे
हात्प्रव्रजेत्सनरोत्तमः २६ अथोदीचींदिशंयातुस्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशःकालःपुंसांगुणविकर्षणः
२७

निसृष्टः प्रक्षिप्तःगरोविषंदूषिताअवमतास्तद्दत्तैरन्नादिभिर्लब्धैरसुभिः कियत्प्रयोजनंनकिंचिदित्यर्थः २३ तस्यापि
एवंदैन्यमनुभवतोपिपरैति क्षीयते २४ गतःस्वार्थयशोधर्मादिशून्यंमुक्तबंधनःत्यक्ताभिमानःकगतइत्यविज्ञा
तागतिर्यस्यसः धीरःप्रासदुःखस्यस्वयंसहनेनमुक्तिप्राप्तेः २५ नरोत्तमस्तुततःप्रागेवकृतप्रतीकारः स्वकात्स्वतएव
परतःपरोपदेशतोवात्वंतुनरोत्तमोनाभूः २६ अतःइदानींधीरोभवेत्याह अथेति अर्वाक्अर्वाचीनःएष्यन्नित्यर्थः गुणा
न्धैर्यदादीन्विकर्षतिआछिनत्तीतितथा २७ राम ७ ७ ७ ७ ७७ ७७ ७७ ७राम

भा० ४५ अजमीढः अजमीढवंशजः प्रज्ञाचक्षुः अंधएवंबोधितः सन्दृढस्नेहविततपाशात् भ्रात्रा संदर्शितः अध्वावनमोक्ष प्र०
योर्मार्गोयस्यसः २८ सुबलस्यपुत्रीगांधारीसाध्वीसुशीलाहिमालयंप्रयातंपतिं अनुजगाम कथंसुकुमारीहिमाद्रि
दुःखबहुलंहिमवंतंगता अतआह न्यस्तदंडानांप्रहर्षोयस्मिन्नतंदुःखदमपिकेषांचित्प्रहर्षहेतुर्भवति अत्रदृष्टांतः
मनस्विनांशूराणांयुद्धेसन्तीव्रःप्रहारोयथापाठांतरेसत्कृतप्रहारंयुद्धंयथेति २९ कृतंमैत्रंमित्रदेवत्यंसंध्यावंदनं
येननतासंपूज्यपितरौविदुरधृतराष्ट्रौ ३० हेगावल्गणेगवल्गणस्यपुत्रसंजय ३१ अकृतप्रज्ञेमंदमतौ ३२ शमलंअप

एवंराजाविदुरेणानुजेनप्रज्ञाचक्षुर्बोधितआजमीढः छित्वास्वेषुस्नेहपाशाद्द्रढिम्नोनिश्चक्रामभ्रात्रसंदर्शि
ताध्वा २८ पतिंप्रयातंसुबलस्यपुत्रीपतिव्रताचानुजगामसाध्वी हिमालयंन्यस्तदंडप्रहर्षंमनस्विनामिव
सत्संप्रहारं २९ अजातशत्रुःकृतमैत्रोहुताग्निर्विप्रान्नत्वातिलगोभूमिरुक्मैः गृहंप्रविष्टोगुरुवंदनायन
चापश्यत्पितरौसौबलिंच ३० तत्रसंजयमासीनंपप्रच्छोद्विग्नमानसः गावल्गणेक्वनस्तातोवृद्धोहीनश्चनेत्र
योः ३१ अंबाचहतपुत्रार्तापितृव्यःक्वगतःसुहृत् अपिमय्यकृतप्रज्ञेहतबंधुःसभार्यया ३२ आशंसमा
नःशमलंगंगायांदुःखितोपतत् पितर्युपरतेपांडौसर्वान्नःसुहृदःशिशून् ३३ अरक्षतांव्यसनतःपितरौक्व
गतावितः सूतउवाच कृपयास्नेहवैक्लव्यात्सूतोविरहकर्षितः आत्मेश्वरमचक्षाणोनप्रत्याहातिपीडि
तः ३४ विमृज्याश्रूणिपाणिभ्यांविष्टभ्यात्मानमात्मना अजातशत्रुंप्रत्यूचेप्रभोःपादावनुस्मरन् ३५

राधंआशंसमानः प्राशंकमानः भार्ययासहकिंगंगायामपतत् पांडौपरेतेमृतेनःशिशून्वयोअरक्षतांतौइतःस्थाना
त् ३३ कृपयास्नेहवैक्लव्यादतिपीडितः आत्मेश्वरंधृतराष्ट्रंअपश्यन् विरहकर्षितश्चसूतःसंजयः प्रत्युत्तरंना
ह ३४ आत्मनाबुध्याआत्मानंमनोविष्टभ्यधैर्ययुक्तंकृत्वाप्रभोधृतराष्ट्रस्यगांधार्याश्च ३५ श्रीरामचंद्र ४५

97
1981

व्यवसितुंनिश्चयंकर्तुंदृश्यंयतोमुषितःवंचितोस्मि ३६ एवंकंचित्कालंशोचतितस्मिन् अथनारदआजगाम अत्रास्तिकश्चित्पुस्त
केपाठांतरेतदुल्लंघ्ययथासंप्रदायंव्याख्यास्यतेशोकवेगादभ्यर्चयन्निवाह राजानलभ्यर्चयत शोकाक्रांतःक्रुद्धाविष्टोऽप्र
त्युथायहितःपुमान् गुरुदेवद्विजातीनांपूजनंनसमाचरेदितिस्मृतेः ३७ नाहंवेदवयोतपस्विनीदुःखयुक्ता अपारशोकार्ण
वेभगवान्त्वमेवपारदर्शकः अतोब्रूहीतिशेषः ३८ आदावेवयथावृत्तकथनेशोकेनमूर्छितःपतेदितिप्रथमंतावच्छोकमु
पशमयति कथंचनमाशुचः माशोचकेवलंतावदवश्यस्मादीश्वराधीनंजगत् तदेवाह लोकाइति ४० गावलीवर्दाः नसि

संजयउवाच नाहंवेदव्यवसितंपित्रोर्वःकुलनंदन गांधार्यावामहाबाहोमुषितोस्मिमहात्मभिः ३६ अथाजगा
मभगवान्नारदःसहतुंबरः प्रत्युत्थायाभिवंद्याहसानुजोभ्यर्चयन्निव ३७ युधिष्ठिरउवाच नाहंवेदगतिंपि
त्रोर्भगवन्क्वगतावितः अंबावाहतपुत्रार्ताक्वगताचतपस्विनी ३८ कर्णधारइवापारेभगवान्पारदर्शकः अथा
बभाषेभगवान्नारदोमुनिसत्तमः ३९ माकंचनशुचोराजन्यदीश्वरवशंजगत् लोकाःसपालायस्येमवहंतिबलि
मीशितुः ४० ससंयुनक्तिभूतानिसएववियुनक्तिनक्तिच ४१ यथागावोनसिप्रोतास्तंत्यांबद्धाःसुदामभिः
वाक्तंत्यांनामभिर्बद्धावहंतिबलिमीशितुः ४२ यथाक्रीडोपस्काराणांसंयोगविगमाविह इच्छयाक्रीडितुः
स्यातांतथैवेशेच्छयानृणां ४३ यन्मन्यसेध्रुवंलोकमध्रुवंवानचोभयं सर्वथाहिनशोच्यास्तेस्नेहादन्यत्रमोहजात्
४४

नासिकायांप्रोताःसुदामभिः तंत्यांदीर्घतंत्यांबद्धाईशितुःस्वामिनोबलिंवहंतियथाएवंवाक्तंत्यांकर्तव्याकर्तव्यविधेयायां
वेदलक्षणायांवर्णाश्रमलक्षणेर्बद्धाःपरमेश्वरस्यसर्वेबलिंवहंतिवेदस्मृत्युक्तामाज्ञांवहंतीत्यर्थः ४१ एकत्रटीकाअसे ४२
प्रवृत्तोपारतंत्र्यमुक्तासंयोगवियोगयोरप्याह क्रीडोपस्काराणांक्रीडासाधनानां ४३ ईश्वराधीनत्वान्नशोकःकार्यइत्युक्तं
लोकतत्वेचविचार्यमाणेनिर्विषयोयंशोकइत्याह यद्यदिलोकंजनंध्रुवंजीवरूपेण अध्रुवंदेहरूपेणनचेतिध्रुवंनाप्यध्रुवं
शुद्धब्रह्मरूपेण अनिर्वचनीयत्वेनवाउभयंवाध्रुवंअध्रुवंवाचिज्जडांशतः सर्वथाचतुर्ष्वपिपक्षेषुतेपित्रादयोनशोच्याःस्ने
हादन्यत्रस्नेहएवकेवलंशोकहेतुः सचाज्ञानमूलइत्यर्थः ४४ ७ ७ ७ ७ ७ ७ ७ ७ ७

भा०
४६

तस्मात्वमांविनाकथंवर्तेरन्नितिमनसावैक्लव्यंव्याकुलतांत्यज ४४ तत्रत्वदृहतःतेषांहन्तिरेतत्तावन्नास्तीत्याह कालोगुणक्षो
भकः कर्मजन्मनिमित्तं गुणउपादानंतदधीनःपंचभौतिकः जडतद्विभागेननाशवांश्चसर्पग्रस्तः अजगरगिलितःयथाअन्यं
नरक्षितदृत ४५ ईश्वरेणविहितावृत्तिःसर्वेषांसर्वतःसुलभैवेत्याह अहस्तानिपश्वादीनिअपदानितृणादीनितत्रतेषुअह
स्तादिष्वपिफल्गूनिअल्पानिमनुष्यादीनिमहतांराक्षसानांजीवनंएवंजीवःसर्वोपिसर्वस्यजीवनंजीविका तेनैवसर्वतोमृत्यु
ग्रासत्वंचोक्तं ४६ मोहनिवृत्त्यर्थंहितस्यावस्तुत्वमाह तदिदंअहस्तसहस्तादिरूपंजगत् स्वदृक्भगवानेव नततःपृथक् स चै

तस्माज्जह्यंगवैक्लव्यमज्ञानकृतमात्मनः कथंत्वनाथाःकृपणावर्तेरंस्त्वनमाश्रिताः ४५ कालकर्मगुणाधीनोदे
होयंपांचभौतिकः कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं ४६ अहस्तानिसहस्तानामपदानिचतुष्पदां फ
ल्गूनितत्रमहतांजीवोजीवस्यजीवनं ४६ तदिदंभगवान्राजन्एकआत्मात्मनांस्वदृक् अंतरोनंतरोभातिप
श्यतांमाययोरुधा ४७ सोयमद्यमहाराजभगवान्भूतभावनः कालरूपोवतीर्णोस्यामभावायसुरद्विषां ४८
निष्पादितंदेवकृत्यमवशेषंप्रतीक्षते तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वरः ४९ श्रीरामजयरामजयजयराम

कएव ननुनाना ननुसजातीयविजातीयभेदप्रत्यक्षेकुतएतत्तत्राह आत्मनांभोक्तॄणांआत्मास्वरूपंअतोनसजातीयभेदः
अंतरोनंतरश्च अंतर्बहिश्चभोग्यरूपश्चभातिअतोनविजातीयभेदोपि एकःकथंतथाप्रतीयतेअतआहमाययाउरुधा
बहुधातंपश्यतेति ४७ कासावत्तीदृशोमहामायावीद्वारकायामित्याह सोयमिति असोभूमौअभवायनाशाय ४८ त
र्हिश्रीकृष्णोनास्तीत्यत्रैवास्तांमाथौकृइत्याह तच्चदेवानांकार्यंतेननिष्पादितंकेवलमवशेषंप्रतीक्षते यदुकुलक्षयमितिह
रिस्तंततोनिजंधामयास्यतिततोयूयमपिगच्छतेत्यर्थः तच्चभूतमपिविदुरवदेवनावर्णयत् ४९ श्रीकृष्णनारायण
४६

99
1981

तदेवंशोकमास्त्वांनिवार्यजिज्ञासवेतस्मैयथावत्तंकथति धृतराष्ट्रइतिषड्भिःहिमवतोदक्षिणभागःतदपिकुत्रेत्यतआह ५०
यावैप्रसिध्यास्वधुंनीसाआत्मानंयथासप्तधाव्यधात् किमर्थंनानापृथक्सप्तभिःस्रोतोभिःप्रवाहैःसप्तानामृषीणांप्री
तये अतएवतत्तीर्थंसप्तस्रोतोवदंति ५१ तत्रधृतराष्ट्रेणकृतं अष्टांगयोगमाह स्नात्वेतिचतुर्भिः तत्रस्नानंहोमंअंबुभक्षणं
चनियमाउक्ताभक्षस्थाने अयांस्वीकारोदक् भक्षाःउपशांतः आत्मायस्य विगताःपुत्रादिइषणायस्मादितिनियमाउक्ताः
५२ जितासनइत्यादिनाआसनप्राणायामप्रत्याहाराउक्ताः हरिभावनयेतिधारणोक्ता ध्वस्ताःरजःसत्वतमोरूपाःमलाःयस्य

धृतराष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया दक्षिणेनहिमवतोऋषीणामाश्रमंगतः ५० स्रोतोभिःसप्तभिर्यावैस्व
र्धुनीसप्तधाव्यधात् सप्तानांप्रीतयेनानासप्तस्रोतःप्रचक्षते ५१ स्नात्वानुसवनंतस्मिन्हुत्वाचाग्नीन्यथावि
धि अब्भक्षउपशांतात्मासआस्तेविगतैषणः ५२ जितासनोजितश्वासःप्रत्याहृतषडिंद्रियः हरिभावन
याध्वस्तरजःसत्वतमोमलः ५३ विज्ञानात्मनिसंयोज्यक्षेत्रज्ञेप्रविलाप्यतं ब्रह्मण्यात्मानमाधारेघटांबरमि
वांबरे ५४ ध्वस्तमायागुणोदर्कोनिरुद्धकरणाशयः निवर्तिताखिलाहारआस्तेस्थाणुरिवाचलः ५५ रामचं

तिफलतोध्यानमुक्तं ५३ समाधिमाह विज्ञानेतिद्वाभ्यां आत्मानमहंकारास्पदंस्थूलदेहाद्वियोज्यविज्ञानात्मनिबुद्धौसं
योज्यएकीकृत्यतंविज्ञानात्मानंदृश्याद्वियोज्यक्षेत्रज्ञेद्रष्टरिप्रविलाप्यतंचक्षेत्रज्ञं दृष्टंशाद्वियोज्य आधारे आश्रयसं
ज्ञेब्रह्मणिप्रविलाप्यघटांबरंघटोपाधेर्वियोज्ययथामहाकाशेप्रविलाप्यतेतद्वत् ५४ सुत्थानाभावमाह ध्वस्तेति अंत
र्गुणक्षोभाद्वाबहिरिंद्रियविक्षेपात्सुत्थानंभवेत् तदुभयंयस्यनास्तित्थ ध्वस्तोमायागुणानामुदर्कःउत्तरफलंवासना
यस्यनिरुद्धानिकरणानिचक्षुरादीनिआशयोमनश्चयस्य अतएवनिवर्तितआखिलआहारोभोज्यंइंद्रियैर्विषयाहरणं
येनसः स्थाणुरिवनिश्चलआस्ते ५५ राम

भा०
४७

तथाप्यतमप्यानेतुंउद्यतंप्रत्याह तस्येति अंतरायोविघ्नः मैवाभूदित्युडागमः छांदसः दर्शनमपितावत्कुर्यामित्युद्यतंप्रत्या प्र०
ह सवाअद्यतनाद्र्ऊः स्वंस्वाधीनं तर्हितद्दाहार्थंगमिष्यामीनेत्याह तच्चेति ५६ तर्हिगांधार्यानयनार्थंगमिष्यामीनेत्याह
पत्युर्देहेसहोटजेपर्णशालासहितेयोगाग्निनासहगार्हपत्यादिभिः दह्यमानेतस्यपत्नीबहिःस्थितासतीपतिमनुअग्निंवक्ष्य
ति ५७ तर्हिविदुरानयनार्थंगंतव्यमेवनेत्याह विदुरस्तुतन्निशाम्यदृष्ट्वाभ्रातुःसुगत्याहर्षःतन्मृत्युनाशोकश्चताभ्यांयुक्तस्त
मात्स्थानात्तीर्थानिसेवितुंगंतागमिष्यतिशुचःशोकान् ५९ इतिप्रथमेत्रयोदशोध्यायः १३ चतुर्दशेत्वरिष्टानिदृष्ट्वाराजा

नस्यांतरायोमेवाभूत्सन्यस्ताखिलकर्मणः सवाअद्यतनाद्राजनपरतःपंचमेहनि ५६ कलेवरंहास्यतिस्वंतच्चभ
स्मीभविष्यति दह्यमानेग्निभिर्देहेपत्युःपत्नीसहोटजे ५७ बहिःस्थितापतिंसाध्वीतमग्निमनुवेक्ष्यति ५७ वि
दुरस्तुतदाश्चर्यंनिशाम्यकुरुनंदन हर्षशोकयुतस्तस्मात्गंगातीर्थनिषेवकः ५८ इत्युक्त्वाथारुहत्स्वर्गंनारदःसह
तुंबरुः युधिष्ठिरोवचस्तस्यहृदिकृत्वाजहाच्छुचः ५९ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेत्रयोदशोध्यायः १३
सूतउवाच संप्रस्थितेद्वारकायांजिष्णौबंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं १ व्यतीताःक
तिचिन्मासास्तदानायात्ततोर्जुनः ददर्शघोररूपाणिनिमित्तानिकुरूद्वहः २ कालस्यचगतिंरौद्रांविपर्यस्तर्तु
धर्मिणः ३ पापीयसींनृणांवार्तांक्रोधलोभानृतात्मनां ३ जिह्मप्रायंव्यवहृतंशाठ्यमिश्रंचसौहृदं पितृमातृ
सुहृद्भ्रातृदंपतीनांचकल्कनं ४ वन्यविक्रयिणांतावत्सुतंपित्रोरपोषकं आलसणान्वेदविमुखान्शूद्रान्वेब्रह्मवादिनः

विशंकितः अश्रुणोदर्जुनात्कृष्णतिरोधानमितीर्यते १ श्रीकृष्णस्यचेतिचकारेणाभिप्रायंचज्ञातुं १ कतिचित्समतदाकाला
तिक्रमेपितत:द्वारकायाःनप्रायात् नागतःनिमित्तानिउत्पातान् कुरुद्वहोयुधिष्ठिरः २ रौद्रांघोरांतदेवाह विपर्यस्ताऋ
तुधर्मायस्मिनतस्यावार्ताजीविकांक्रोधलोभानृतैर्युक्तः आत्मायेषां ३ जिह्मप्रायंकपटबहुलंव्यवहृतंव्यवहारंशाठ्यंवच
नंतन्मिश्रंसौहृदंसख्यंपित्रादीनांस्वप्रतियोगिभिःकत्थनंकलहादि ४ अरिष्टानिअत्यंतमशुभानिदृष्ट्वानृणांलोभाद्यध ४७
मप्रकृतिंचदृष्ट्वा अनुजंभीमं ५

६ वेतिवितर्केकस्माद्धेतोःनायातीत्यहंनवेद्मि ७ अपिकिंयदा आत्मनःआक्रीडंक्रीडासाधनंअंगंमनुष्यनाट्यंउत्स्रष्टुं
इच्छतिसकालःप्राप्तः ८ अस्माकंसकलपुरुषार्थत्वेहेतुः श्रीकृष्णःअतःतद्वियोगंविनानिष्टंनस्यादित्याशयेनाह यस्मात्श्री
कृष्णाद्धेतोःएतच्चोपरिष्टादर्जुनःस्पष्टीकरिष्यति लोकाश्चयज्ञकरणरूपायस्यानुग्रहात् अदूरात्सन्निहितंनोअस्माकं
आशंक्तः १० उत्पातान्दैहिकानाह साद्धैश्चतुर्भिः उर्वादयोवामास्फुरंतिवेपथुःकंपश्चहृदयेवर्तते एतमत्यंआरात्सन्निहि

युधिष्ठिरउवाच संप्रेषितोद्वारकायांजिष्णुर्बंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं ६ निमि
त्तान्यत्यरिष्टानिकालेत्वनुगतेनृणां लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ५ गताःसप्ताधुनामासाभीम
सेनतवानुजः नायातिकस्यवाहेतोर्नाहंवेदेदमंजसा ७ अपिदेवर्षिणादिष्टःसकालोयमुपस्थितः यदात्मा
नोंगमाक्रीडंभगवानुत्सिसृक्षति ८ यस्मान्नःसंपदोराज्यंदाराःप्राणाःकुलंप्रजाः आसन्सपत्नविजयो
लोकाश्चयदनुग्रहात् ९ पश्योत्पातान्नरव्याघ्रदिव्यान्भौमान्सदैहिकान् दारुणान्शंसतोदूराद्भयंनोबुद्धि
मोहनं १० उर्वक्षिबाहवोमह्यंस्फुरंत्यंगपुनःपुनः वेपथुश्चापिहृदयेआराद्दास्यंतिविप्रियं ११ शिवैषोद्यंत
मादित्यमभिरौत्यनलानना मामंगसारमेयोयमभिरौतित्यभीरुवत् १२ शस्ताःकुर्वंतिमांसव्यंदक्षिणंपश
वोपरे वाहांश्चपुरुषव्याघ्रलक्षयेरुदतोमम १३ मृत्युदूतःकपोतोयमुलूकःकंपयन्मनः प्रत्युलूकश्चकुह्वानैरनिद्रौ
शून्यमिच्छतः १४

तंविप्रियंदास्यंति ११ सामान्याह सार्द्धाभ्यांशिवाक्रोष्ट्री आदित्यमभिरौति उद्यत्सूर्याभिमुखंक्रोशति अनलानना अ
ग्निमुखेनवमंती अंगहेभीममामभिलक्ष्यसारमेयश्वाप्युतरौति अभीरुवत्निःशंकं १२ शस्ताःगवादयोमांसव्यंवामंकु
र्वंति अपरेगर्दभाद्याःप्रदक्षिणंकुर्वंतिवाहान्अश्वान् १३ अयंकपोतोमृत्युदूतोमृत्युसूचकःउलूकोघुकःप्रत्युलूकः
तत्प्रतिपक्षोघुकःकाकोवाकुह्वानैःकुत्सितशब्दैर्विश्वंशून्यमिच्छतः १४ श्रीरामजयरामजयजयरामहरे

101
1981

धूम्राः धूसरादिशः परिधयइवअग्निंलोकमाद्वृण्वंति दिव्यानाह सार्द्धद्वाभ्यांनिर्घातोनिरभ्रवज्रपातः स्तनयित्नवोन्न: प्र०
जगर्जितानिते:सहतमः विशेषणसृजत १५ असृक्वरक्तं गृहाणांमर्द्दयुद्धंभूतारुद्रानुचराः तेषांगणैः संकुलैर्व्यामिश्रैःपा
णिभिः सहितैःरोदसीद्यावापृथिव्योज्वलितेदीप्तेइवचपश्यति १६ पुनर्भौमानाह नद्यइतिसार्द्धस्त्रिभिःप्राणिनांमनांसि
च १७ दुह्यंतीतिकर्मकर्तर्यार्षं नप्रस्नुवंतीत्यर्थः देवतानिप्रतिमाः अथंडुःरवं एतैः कृत्वानविद्यते अन्येषुपुरुषेषुश्री

धूम्रादिशःपरिधियःकंपतेभूःसहाद्रिभिः निर्घातश्चमहानासीत्साकंचस्तनयित्नुभिः १५ वायुर्वातिखरस्पर्शोर
जसाविसृजंतमः असृग्वर्षंतिजलदाबीभत्समिवसर्वतः १६ सूर्यंहतप्रभंपश्यग्रहमर्दंमिथोदिवि ससंकुलैर्भू
तगणैर्ज्वलितेइवरोदसी १७ नद्योनदाश्चक्षुभिताःसरांसिचमनांसिच नज्वलत्यग्निराज्येनकालोयंकिंविधा
स्यति १८ नपिबंतिस्तनंवत्सानदुह्यंतिचमातरः रुदंत्यश्रुमुखागावोनहृष्यंत्यृषभाव्रजे १८ देवतानिरुदंतीव
स्विद्यंतिह्युच्चलंतिच १८ इमेजनपदाग्रामापुरोद्यानावनाश्रमाः भ्रष्टश्रियोनिरानंदाःकिमघंदर्शयंतिनः १९
मन्यएतैर्महोत्पातैर्नूनंभगवतःपदैः अनन्यपुरुषश्रीभिर्हीनाभूर्हतसौभगा २० इतिचिंतयतस्तस्यदृष्टारिष्टे
नचेतसा राज्ञःप्रत्यगमन्ब्रह्मन्यदुपुर्याःकपिध्वजः २१ तंपादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिं
दूनसृजंतंनयनाब्जयोः २२ विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः पृच्छतिस्मसुहृन्मध्येसंस्मरन्नारदेरितं २३
युधिष्ठिरउवाच कच्चिदानर्तपुर्यांनःस्वजनाःसुखमासते मधुभोजदशार्हार्हसात्वतांधकवृष्णयः २४

वज्रांकुशादिशोभायेषांतैर्भगवतःपदैर्हीनाभूरित्यहंमन्ये २० तस्यराज्ञः इत्येवंदृष्टानि अरिष्टानियेनतेनचेतसा चिं
तयतःसतः २१ अयथापूर्वंनिपतितंनदेवाह आतुरमित्यादि अपांबिंदून् अश्रूणिनेत्राभ्यांविसृजंतमित्यर्थः
२२ उद्विग्नंकंपितंहृदयंयस्यविच्छायंविगतकांतिं २३ स्वजनाः बांधवाः २४ नमः श्रीकृष्णायहरयेरामाय ४८

103
1981

किंपृच्छतीतिशंकयाव्यवहितक्रमेणपृच्छति शूरइत्यादिना मारिषःमान्योमातामहः शूरोनामयादवः कुंत्याःपिता आ
नकदुंदुभिःवसुदेवः २५ स्वसारः वसुदेवक्षेमेनतासामपिक्षेमंपृष्टमेव तथापि पृथगपिपृच्छतियत्स्वमिति २६ आहुकः
उग्रसेनःअसत्पुत्रोयस्य अतएवजीवनमात्रमेवपृष्टं अनुजश्चदेवकः हृदिकःसुतः कृतवर्माजयंतादयःकृष्णभ्रातरः
२० सर्ववृष्णीनांमध्येमहारथः गंभीररथः युद्धेमहावेगः वर्धतमादते इत्यर्थः २८ श्रीकृष्णस्यापत्यानिकार्ष्णयाःतेषुप्रवराः

शूरोमातामहःकच्चिदास्तेस्वस्त्यास्तेचाथमारिषः मातुलःसानुजःकच्चित्कुशल्यानकदुंदुभिः २५ सप्तस्वसा
रस्तत्पत्न्योमातुलान्यःसहात्मजाः आसतेसस्नुषाःक्षेमंदेवकीप्रमुखाःस्वयं २६ कच्चिद्राजाहुकोजीवत्य
सत्पुत्रोस्यचानुजः हृदीकःससुतोक्रूरोजयंतगदसारणाः २७ आसतेकुशलंकच्चित्येचशत्रुजिदादयः
कच्चिदास्तेसुखंरामोभगवान्सात्वतांप्रभुः २८ प्रद्युम्नःसर्ववृष्णीनांसुखमास्तेमहारथः गंभीररयोनिरुद्धोव
र्धतेभगवानुत २९ सुषेणश्चारुदेष्णश्चशांबोजांबवतीसुतः अन्येचकार्ष्णिप्रवरासपुत्राऋषभादयः ३० त
थैवानुचराःशौरेःश्रुतदेवोद्धवादयः सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः ३१ अपिस्वस्त्यासतेसर्वेरा
मकृष्णभुजाश्रयः अपिस्मरंतिकुशलमस्माकंबद्धसौहृदाः ३२ भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः क
च्चित्पुरेसुधर्मायांसुखमास्तेसुहृद्वृतः ३३ मंगलायचलोकानांक्षेमायचभवायच आस्तेयदुकुलांभोधावा
द्योनंतसखःपुमान् ३४ यद्बाहुदंडगुप्तायांस्वपुर्यांयदवोर्चिताः क्रीडंतिपरमानंदंमहापौरुषिकाइव ३५

३० सुनंदनंदौशीर्षण्यौमुख्यौयेषांते ३२ भगवतिसुखमास्तइतिप्रश्नस्यानौचित्यमाशंक्याह पुरइत्यादिना ३३ भागवतो
चावस्थानेहिलोकानांमंगलंनान्यथेत्याशयेनाह चतुर्भिः मंगलायशुभायक्षेमायलब्धपालनायभवायउद्भवायअ
नंतसखःबलिभद्रसहायः ३४ अर्चिताःसर्वैर्पूजिताः परमानंदंयथाभवति महापौरुषिकाःवैकुंठनाथानुचराइव३५

यस्यपादशुश्रूषणमेवमुख्यंतपआदिश्रेष्ठंयत्कर्मतेनसत्यभामादयः संख्येयुद्धेश्रीकृष्णबलेनत्रिदशान्निर्जित्यतदाशि प्र०
षःदेवभोग्यान्पारिजातादीनवज्रायुधस्यवल्लभाशचीतस्याउचिताः ३६ यद्बाहुदंडप्रभावोपजीविनः सुधर्मामंघ्रिभिरति
क्रामंति सगोविंदः सुखमास्तेइतिगतपंचमश्लोकान्वयः ३७ इदानींतस्यैवअर्जुनस्यकुशलंपृच्छतिकच्चिदितिषड्भिः अनाम
यंआरोग्यंनलब्धोमानोयेनबंधुभ्यःसकाशात् किंवाते ःअसुतअवज्ञातःतिरस्कृतः यतश्चिरोषितंबहुकालंतत्रस्थितः

यत्पादशुश्रूषणमुख्यकर्मणासत्यादयोद्व्यष्टसहस्रयोषितः निर्जित्यसंख्येत्रिदशांस्तदाशिषोहरंतिवज्रा
युधवल्लभोचिताः ३६ यद्बाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभयामुहुः अधिक्रमंत्यंघ्रिभिराहृ
तांबलात्सभांसुधर्मांसुरसत्तमोचितां ३७ कच्चित्तेनामयंतातभ्रष्टतेजाविभासिमे लब्धमानोवज्ञातः किं
वातातचिरोषितः ३८ कच्चिन्नाभिहतोभावैःशब्दादिभिरमंगलैः नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रु
तं ३९ कच्चित्त्वंब्राह्मणंबालंगांवृद्धंरोगिणंस्त्रियं शरणोपसृतंसत्वंनात्याक्षीःशरणप्रदः ४० कच्चित्त्वंना
गमोगम्यांगम्यांवासत्कृतांस्त्रियं पराजितोवाथभवान्नोत्तमैर्नासमैःपथि ४१ रामकृष्णहरिराम

३८ अभावैरितिच्छेदः प्रेमशून्यैरमंगलैःपरुषैःशब्दादिभिर्नाभिहतःनताडितोसिकिं यद्वाअर्थिभ्यःकिमपिनोदास्या
मीतिनोक्तंकिं यद्वाआशयासहयथाआशाभवतितथादास्यामीतिप्रतिश्रुतंसत्वनदत्तंकिं ३९ अन्यद्वाशरणागतंस
त्वंप्राणिमात्रंनत्यक्तवानसिकिं यतस्त्वंपूर्वंशरणदःआश्रयदः ४० अगम्यामितिच्छेदः नोनंदितांस्त्रियंअगमः
किंनगतवानसि असत्कृतामलिनवस्त्रादिनागमः किंनोत्तमैरनुत्तमैःसमैरित्यर्थः असमैरधमैर्वाकिंनपराजितोसीत्य ४९
र्थः ४१

105
1981

भोज्यान्भोजनार्हान्बालकांश्चकिंस्वित्पर्यभुक्थत्यक्त्वाभुक्तवानसि अक्षमंकर्तुमयोग्यंयत्तत्कृतवानसिकिं ४२
नित्यंसदाप्रेष्ठतमेनतमेनहृदयेनांतरंगेणस्वबंधुनाश्रीकृष्णेनरहितः शून्योस्मीतिआत्मानंकच्चिन्मन्यसे अन्यथावरुक्
मनःपीडानघटते ४३ इतिभागवतेप्रथमेटीकायांचतुर्दशोध्यायः कलिप्रवेशमालक्ष्यधुरंन्यस्यपरीक्षिति आरुरोह
नृपःस्वर्गमितिपंचदशेब्रवीत् १ कृष्णार्जुनःनानाशंकास्पदंरूपमालक्ष्यविकल्पितइत्यर्थः प्रतिभाषितुंनशक्नोदित्युत्त
रेणान्वयः तत्रहेतुःकृष्णविश्लेषणकर्शितःकृशः १ शोकेनहेतुनावदनंवक्त्रंचतदेवसरोजं शुष्यतीवदनहृत्सरोजंयस्य

अपिस्वित्पर्यभुक्थास्त्वंसंभोज्यान्वृद्धबालकान् जुगुप्सितंकर्मकिंचित्कृतवान्नयदक्षमं ४२ कच्चित्प्रेष्ठतमेनाथ
हृदयेनात्मबंधुना शून्योस्मिरहितोनित्यंमन्यसेतेन्यथानरुक् ४३ इतिश्रीभागवतेपुराणेप्रथमस्कंधेयुधि
ष्ठिरदर्शनामचतुर्दशोध्यायः १४ सूतउवाच एवंकृष्णसखःकृष्णोभ्रात्राराज्ञाविकल्पितः नानाशंकास्प
दंरूपंकृष्णविश्लेषकर्षितः १ शोकेनशुष्यद्वदनहृत्सरोजोहतप्रभः विभुंतमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं २
कृच्छ्रेणसंस्तभ्यशुचःपाणिनामृज्यनेत्रयोः परोक्षेणसमुन्नद्धप्रणयौत्कंठ्यकातरः ३ सख्यंमैत्रींसौहृदंचसार
थ्यादिषुसंस्मरन् नृपमग्रजमित्याहबाष्पगद्गदयागिरा ४ अर्जुनउवाच वंचितोहंमहाराजहरिणाबंधुरूपिणा
येनमेपहृतंतेजोदेवविस्मापनंमहत् ५ यस्यक्षणवियोगेनलोकोह्यप्रियदर्शनः उक्थेनरहितोह्येषमृतकःप्रोच्यते
यथा ६
हताप्रभातेजोयस्य २ शुचःशोकाश्रूणियान्युद्गच्छंतितानिनेत्रयोरेवसंस्तभ्यगलितानिपाणिनाआमृज्यपरोक्षेणदर्शनागो
चरेणश्रीकृष्णेनहेतुनासमुन्नद्धं अधिकंयत्प्रेमौत्कंठ्यंतेनकातरःव्याकुलः नृपमित्याहेत्युत्तरेणान्वयः ३ सख्यंहितैषितां
मैत्रींउपकारितांसुहृत्त्वंसंबंधितांचबाष्पेणकंठावरोधाद्गद्गदया ४ देवान्विस्मापयति ५ यत्यस्यक्षणवियोगेनसादिय
छब्दानांतेनाहमद्यमुषितमितिसप्तमश्लोकस्थेनतच्छब्देनसंबंधःप्रियस्याप्रियत्वेदृष्टांतउक्थेनप्राणेनएषापिआदि ६

श्रीकृष्णोपकारान् अनुस्मरति यत्संश्रयादिति दशभिः यस्य संश्रयात् बलात् स्मरेण न कामेन दुर्मदानाम् अतिप्रमत्तानां तेजः प्र भ०
भावः हृतं धनुर्ग्राहणेनैव पश्चात् तद्धनुः सज्जीकृतं च तेन मत्स्योयं त्रोपरि भिन्नमत्स्यविद्धः ततस्तान् विजित्य द्रौपदी प्राप्ताबा ७ उद्
तिविस्मयेः खांडवं इदं इस्य वनं अदाहत् तवानाम्मि खांडव दाहे रक्षितेन मयेन कृता च सभा लब्धा अद्भुतशिल्परूपा मायायस्यां सा
ते अध्वरेयागे राजसूये ८ अनंतरश्लोको विगीतः तथापि व्याख्यायते नृपशिरस्सु अंघ्रिर्यस्य तं जरासंधं तव अनुजो भीमः
मखार्थमहत् तं निर्जयं विना राजसूयमखानुपपत्तेः गजायुतस्येव सत्वमुत्साह शक्तिर्वीर्यं बलं च यस्य सः तं हत्वा प्रथ

यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृ
तेन धनुषाधिगता च कृष्णा ७ यत्संनिधावहमु खांडवमग्नयेदामिंद्रं च सामरगणं तरसा विजित्य लब्धा सभा
मयकृताद्भुतशिल्पमाया दिग्भ्योहरन्नृपतयो बलिमध्वरे ते ८ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थे आर्योनुज
स्तव गजायुतसत्ववीर्यः तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरे ते ९ पत्न्यास्तवा
धिमखकॢप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायां स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्तत्स्त्रियोऽकृ
तहतेशविमुक्तकेशाः १०

मनाथो महाभैरवः तस्य मखाय येराजानः तेनाहृता ते यस्मान्मोचिताः ततस्मात्ते अध्वरे मलिमानीतवंतः ९ यैः कितवैः
दुःशासनादिभिः तव पत्न्याः कबरं विकीर्य उन्मुच्य स्पृष्टं आकृष्टं न तु केवलं स्पृष्टं किंतु आकृष्टं च न तेषामेव किंतु येरा
कृष्यमाणाद्दृष्टा द्रौपदी तेषामपि तेषां स्त्रियो हतेशाः अत एव वैधव्यात् मुक्तकेशा अकृत चकार कथंभूतं कबरं अधिमखं
राजसूयमधिकृत्य कॢप्तो रचितो यो महाभिषेकस्तेन श्लाघ्यतमं चारुरम्यं द्रौपद्याः स्मरणात् तदानीमेव प्राप्तस्य श्रीकृष्णस्य
नमने पदयोः पतितान्यश्रूणि मुखाद्यस्याः पदशब्दसापेक्षस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षितत्वात् १० ५०

107
1481

शिष्याणामयुतस्याग्रेतत्संक्षोभुंक्ष्वेय तस्मात् दुर्वाससोहेतोः अरिणा दुर्योधनेन रचितं यत् दुरंतं कृच्छ्रं शापलक्षणं तस्मात्
सकाशात् नो अस्मान् वनं एत्य जुगोप किं कृत्वा शाकमेवान्नं तदेव पात्रे अवशिष्टं उपभुज्य जग्ध्वा यत उपभोगात् सलिले
विनिमग्नो मुनीनां संघस्त्रिलोकी तृप्ताममंस्त एवं हि भारते कदाचिद् दुर्वाससा दुर्योधनेनातिथ्यं कृतं तेन च परितुष्टेन वरं वृ
णीष्वेत्युक्तं दुर्वाससः शापात् पांडवान् पश्येयमिति मनसि विधाय दुर्योधनेनोक्तं युधिष्ठिरो स्मत्कुलमुख्यः अतस्तस्या
पि भवतैवं शिष्यायुतसहितेनातिथिना भवितव्यं किंतु द्रौपद्यां यथासुखं भुक्तवत्यां तद्गृहं गंतव्यमि
ति ततस्तथैव दुर्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघो घमर्षणा

योनो जुगोप वनमेत्य दुरंतकृच्छ्रात् दुर्वाससोरिविहितादयुताग्रभुग्यः शाकान्नशिष्टमुपभुज्य यतस्त्रिलो
कीं तृप्तामममंस्त सलिले विनिमग्नसंघः ११ यत्तेजसाथ भगवान् युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्र
मदान्निजं मे अन्येपि चाहममुनैव कलेवरेण प्राप्तो महेंद्रभवने महदासनार्धं १२ गोविंद गोपाल श्रीकृ०

यजले निममज्जत च चिंतातुरया द्रौपद्या स्मृतमात्रः कृष्णः अंकस्थां तु चर्ष्मीमीत्य त्यक्त्वा तत्क्षणमेव वात्सल्यतया आगतः तया चा
वेदिते वृत्तांते भगवतोक्तं द्रौपद्यहं च बुभुक्षितोस्मि प्रथमं मां भोजय तया चातिलज्जया उक्तं स्वामिन् मद्भोजनपर्यंतमक्षय्यमं
नं सूर्यदत्तस्थाल्यां मया च सर्वान् संभोज्य भुक्तं अतो नास्त्यन्नमिति तथाप्यतिनिर्बंधेन स्थालीमानाय्य तत्कंठलग्नं किंचि
च्छाकान्नं प्राश्योक्तं अनेन विश्वात्मा भगवान् प्रियतां अथ भोक्तुं मुनिसंघमाह्वयेति भवता वनाति तृप्तः इत्यापाकमयेनाप
लाय्यत इति ११ गिरिजासहितो विस्मापितः सन् निजं पाशुपतमस्त्रं अन्येपि लोकपाला निजान्यस्त्राणि अदुः अदुः अन्यदप्या
श्चर्यमाह अमुनैवेति महदर्धं इंद्रस्यासनार्धं १२

भा० ५३ तत्रैवस्वर्गेक्रीडतः गांडीवलक्षणंविकृष्यस्यतत अरातयोनिवातकवचारेत्याः तेषांवधार्थमाश्रितवंतः येनानुभावितंप्र प्र०
भावयुक्तंकृत हेअजमीढयुधिष्ठिरतेनमुषितःवंचितोस्मी कथंभूतेनभूम्नानिजमहिमावस्थानेन १३ यद्बांधवइत्यादिश्लो
कत्रयस्यापितेनमुषितोहमिति पूर्वेणैवसंबंधः श्रीकृष्णबांधवएकएवाहंकौरवसैन्याब्धिंनास्संतो गांभीर्येणापारंवदंशतोय
स्य ततरेतीर्णवानउत्तरगोग्रहे अतीर्याणिदुस्तराणिसत्वानितिमिंगिलादीनिभीष्मादिरूपाणियस्मिन् परैर्नीतंगोधनंप्र
त्याहृतं परेषांचशिरोभ्यः सकाशात्तेजस्पदं प्रभावास्पदमुष्णीषरूपंमणिमयंमुकुटरत्नरूपंचवकूधनंतान्मोहनास्त्रेणमा

तत्रैवमेविहरतोभुजदंडयुग्मंगांडीवलक्षणमरातिवधायदेवाः सेंद्राःश्रियातदनुभावितमाजमीढतेनाहमद्यमु
षितःपुरुषेणभूम्ना १३ यद्बांधवःकुलबलाब्धिमनंतपारमेकोरथेनततरेहमतीर्यसत्वं प्रत्याहृतंवकूधनंच
मयापरेषांतेजस्पदंमणिमयंचहृतंशिरोभ्यः १४ योभीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडि
तासु अग्रेचरोममविभोरथयूथपानामायुर्मनांसिचदृशासहओजआर्छत् १५ यद्दोस्सुमाप्रणिहितंगुरुभी
ष्मकर्णद्रोणित्रिगर्तशलसैंधवबाह्लिकाद्यैः अस्त्राण्यमोघमहिमानिनिरूपितानि नोपस्पृशुर्नृहरिदासमिवा
सुराणि १६

हृत्वाहृतं यद्बांधवेनमया १४ अदभ्राअनल्पायेराजन्यवर्याः तेषांरथमंडलैर्मंडितासुभीष्मादीनांचमूषुसारथिरूपे
णसमाग्रेचरःसन् हेविभोतेषांरथयूथपानां आयुरादीनियोदृशाहृष्ट्वैवआर्छतहृतवान् मनांसीउत्साहादिशक्तिः स
होबलंओजःशस्त्रादिकौशलं १५ यस्यदोस्सुभुजेषुमामांप्रणिहितंस्थापितंतेनैवगुर्वादिभिर्निरूपितानि प्रयुक्तानिअ
स्त्राणिनस्पृशंतिस्म गुरुर्द्रोणःत्रिगर्तःत्रिगर्तदेशाधिपतिःसुशर्माशलःशल्यःसैंधवःजयद्रथःबाह्लीकःशंतनोर्भ्राता
अमोघोमहिमायेषांतथाभूतान्यपिपाठांतरेपिसएवार्थः प्रतीकाराकरणेप्यस्पर्शेदृष्टांतः नृहरिदासंप्रह्लादमिवेति १६ ५३

109/1981

स्वापराधमनुस्मरन्संप्यमानआहसोत्यसारथ्यकुमतिनामेमयाभवतः कुमतित्वमेवाह आत्मदइत्यादिना अभयाय
मोक्षाय भव्याःश्रेष्ठाःश्रांताःवाहाअश्वायस्यतंमांजयद्रथवधेहिजलःपानंविना अश्वाःश्रांताःततोरथादवतीर्यबाणैः
भुवंभित्वाजलंसंपादितंमया तदायस्यानुभावेननिरस्तचित्ता अरयोमानंप्रहृतवंतःससोत्यंतइतिकुमतित्वं १७ हेनर
देवउदारंगभीरंरुचिरंयत्स्मितं तेनशोभितानि नर्माणिपरिहासवाक्यानि तथाकार्यप्रस्तावेषुहेपार्थेत्यादीनिमधुराक्ष
राणिसंजल्पितानिचहृदिस्पृशानिमनोज्ञानिमाधवस्ययान्येतानिइदानींस्मर्तुर्ममहृदयंलुठंतिलोडयंतिक्षोभयंतिणिजा

सोत्यंतःकुमतिनात्मदईश्वरोमेयत्पादपद्मभयायसर्जंतिभव्याः संश्रांतवाहमरयोरथिनोभुविष्ठंनप्राहर
त्यदनुभावनिरस्तचित्ताः १७ नर्माण्युदाररुचिरस्मितशोभितानिहेपार्थहेर्जुनसखेकुरुनंदनेति संजल्पिता
निनरदेवहृदिस्पृशानिस्मर्तुर्लुठंतिहृदयंममधवस्य १८ शय्यासनाटनविकत्थनभोजनादिष्वैक्यादयस्य
ऋतुमानितिविप्रलब्धः सख्युःसखेवपितृवत्तनयस्यसर्वंसेहेमहान्महितयाकुमतेरघंमे १९ सोहंनृपें
द्ररहितःपुरुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः अध्वन्युरुक्रमपरिग्रहमंगरक्षंनगोपैरसद्भिरबलेव
विनिर्जितोस्मि २०

भावआर्षः १८ विकत्थनंगुणश्लाघनादि शय्यादिष्वैक्यात् अव्यतिरेकाद्धेतोः कदाचिद्व्यभिचारंदृष्ट्वाहेवयस्यऋतमा
नससत्युक्तस्त्वं इतिवक्रोक्त्याविप्रलब्धःतिरस्कृतोपिऋभुमानइतिपाठेऋभवोदेवाःसेवकाःसंतियस्यअसौमहानपि
मयावयस्यइतिमत्वाविप्रलब्धःतिरस्कृतइत्यर्थः ऋभुयानितिपाठेचत्वाभावआर्षः मेअघंअपराधंअसहतामहित
यामहित्वेनएकपदेअतिमहत्वेनेत्यर्थः सख्युरघंसखेव तनयस्याघंपितेव १९ तथाशंकितंपराजयंचप्राप्तोहमित्याह
तेनसख्यारहितःअतोहृदयेनशून्यः अंगहेराजन्उरुक्रमस्यपरिग्रहंषोडशसहस्रस्त्रीलक्षणंअसद्भिःअबलायोप
न २०

भा०
५२

श्रीकृष्णवियोगएवात्रहेतुर्नान्यइत्याह तदिति यतःयेभ्यः ईशेनरिक्तंशून्यं असत्कार्याक्षमं सन्मंत्रविधानैरपिमस्मनिहुतमि वअतिप्रीतादपिकुहकात् मायाविनः सकाशाद्वराद्वंलब्धंयथासम्यक्कर्षणादिनापिउखरक्षमौउप्तंबीजमिव २२ सुहृत्सु रेत्वयापृष्टानांनसुहृदांमध्येचत्वारःपंचवावशेषिताःतत्रहेतुः प्रविशापेत्यादि २२ वारुणीअन्नमयीअजानतामिवान्योन्यमि रकामुष्टिभिर्निघ्नतांअवशेषितइत्यनेनोक्तंहेतुकर्तारमाहत्रिभिः प्रायेणेति भावयंतिपालयंति २४ जलौकसामत्स्यादी प्र०

तदिदंधनुस्तइषवःसरथोहयास्तेसोहंरथीनृपतयोयतआनमंति सर्वंक्षणेनतदभूदसदीशरिक्तं भस्मन्हुतंकुहक राद्धमिवोप्तमुष्याम् २१ अर्जुनउवाच राजन्त्वयानुपृष्टानांसुहृदांनःसुहृत्पुरे विप्रशापविमूढानांचतुःपंचाव शेषिताः २२ वारुणींमदिरांपीत्वामिथोन्मथितचेतसाम् अजानतामिवान्योन्यंनिघ्नतांमुष्टिभिर्मिथः २३ प्रा येणैतद्भगवतईश्वरस्यविचेष्टितं मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः २४ जलौकसांजलेयद्वन्महां तोदंत्यणीयसः दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः २५ एवंबलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः यदून्य दुभिरन्योन्यंभूभारान्संजहारह २६ देशकालार्थयुक्तानिहृत्तापोपशमानिच हरंतिस्मरतश्चित्तंगोविंदाभिहि तानिमे २७ एवंचिंतयतोजिष्णोःकृष्णपादसरोरुहं सौहार्देनातिगाढेनशांतासीद्विमलामतिः २८

नांमध्येमहांतःस्थूलाःअणीयसःसूक्ष्मान्यथाभक्षयंति २५ यदुभिरितरान्शाल्वादीन्निहत्यबलिष्ठैर्निहत्यमहद्भिः पांडवैर्दुर्योधनजरासंधादीन्निहत्ययदूनयदुभिरन्योन्यंनिहत्यविभुर्भगवान्भूभारंसंजहार २६ अतःपरंचकुंस्म रयन्नाह देशकालोचितार्थयुक्तानिमनःपीडोपशमनकराणिचगोविंदस्यवचनानिस्मरतोममचित्तंहरंतिआकर्ष यंति २७ एवमितिस्पष्टोक्तिः अतिदृढेनस्नेहेनचिंतयतोमतिः शांताविशोकाविमलाविरक्ताचासीत् २८ राम ५२

111
1981

मतिवैफल्येफलमाह वासुदेवांघ्र्यनुध्यानेनपरिबृंहितं रंहोवेगोयस्याःतयानिर्मथिताःउन्मूलिताअशेषाःकाषायाः कामादयोयस्याःसाधिषणाबुद्धिर्यस्यसः २९ ज्ञानंपुनरध्यगमदित्युत्तरेणान्वयः कालेनकर्मभिस्तमसाभोगाभिनिवेश नबरूढंआवृतंसत् ३० ज्ञानफलमाह विशोकइति एतदेवशोकहेतुभावनोपपादयति शोकस्यहिहेतुर्द्वैतभ्रमःतस्य हेतुःतस्यलिंगंतस्यगुणाःतेषामविद्यातत्रब्रह्मसंपत्त्याब्रह्माहमिति ज्ञानेनलीनाप्रकृतिरविद्यायस्मिन्तेननैर्गुण्यंभ वति नतुसुप्तिप्रलययोरिवाविद्याशेषःतस्मान्नैर्गुण्यात्गुणकार्यलिंगनाशःआलिंगत्वाच्च असंभवःसम्यक्भोगा

वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा भक्त्यानिर्मथिताशेषकषायधिषणोर्जुनः २९ गीतंभगवताज्ञानंय त्तत्संग्राममूर्द्धनि कालकर्मतमोरुद्धंपुनरध्यगमद्विभुः ३० विशोकोब्रह्मसंपत्त्यासंछिन्नद्वैतसंशयः ली नप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ३१ निशम्यभगवन्मार्गंसंस्थांयदुकुलस्यच स्वःपथायमतिंचक्रेनि भृतात्मायुधिष्ठिरः ३२ पृथाप्यनुश्रुत्यधनंजयोदितंनाशंयदूनांभगवद्गतिंचतां एकांतभक्त्याभगवत्यधो क्षजेनिवेशितात्मोपरराससंसृतेः ३३ ययाहरद्भुवोभारंतांतनुंविजहावजः कंटकंकंटकेनेवद्वयंचापीशितुः समं ३४

यभवतिपुनःपुनरितिसंभवःस्थूलशरीरंतद्रहितः ततश्चतत्परिच्छेदाभावात् संछिन्नोद्वैतलक्षणःसंशयोभ्रमोयस्य सः विशोकोजातइति ३१ भगवतोमार्गंआलक्ष्ययदुकुलस्यसंस्थांनाशंश्रुत्वानारदोक्तंचानुस्मृत्यस्वःपथास्वर्गमार्गाय निभृतात्मानिश्चलचित्तः तांगतिंदुर्विज्ञेयांवक्ष्यतिहि सौदामिन्यायथाकाशेयांत्याभित्वाभ्रमंडलं गतिर्नलक्ष्यतेमर्त्यै स्तथाकृष्णस्यदैवतैरिति संसृतेरुपरराम जीवन्मुक्ताबभूवदेहंजहावितिवा तदेवमुक्तमपियादवेभ्योभगवतोविलक्षण्यम बुध्यतत्साम्यंवदतांमंदमतीन्प्रतिवैलक्षण्यंस्पष्टयतिद्वाभ्यां ययायादवरूपयातन्वाभुवोभारंकंटकेनकंटकमिवाज हरत् यादवतनुर्भूभारतनुश्चेतिद्वयमपिईश्वरस्यसंहार्यत्वेनसममेव ३४ श्रीराम ७ ७ ७ ७ ७

श्रीकृष्णमूर्तेर्विशेषमाह यथेति नामान्यपि यथा धत्ते जहाति च तदाह यथा नटो निजरूपेण स्थितो यथा रूपांतराणि धत्ते अं
तर्धत्ते वा तथा तदपि कलेवरं जहौ अंतर्दधावित्यर्थः ३५ युधिष्ठिरस्य स्वर्गारोह प्रसंगाय कलिप्रवेशमाह स्वतन्वा जहौ स्वत
नोर्वैकुंठारोहात् श्रवणाहा सती कथा यस्य तदा यदहस्तस्मिन्नेव अहीरिति लुप्तसप्तम्यंतं पदं अप्रतिबुद्धचेतसामिति
विवेकिनां तु न प्रभुरित्युक्तं अन्ववर्तते ति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ३६ बुद्धो युधिष्ठिरस्तस्य कलेः परि
सर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यस्मिं जिह्मं कौटिल्यं पर्यधात् तदुचितं परिधानमकरोत् पुरेलोभः

यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः भूभारः क्षपितो येन जहौ तच्च कलेवरं ३५ यदा मुकुंदो भगवा
निमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्तत ३६ युधिष्ठिर
स्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्य
धात् ३७ स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ३८ मथु
रायां तथा वज्रं शूरसेनपतिं ततः प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ३९ विसृज्य तत्र तत्सर्वं दुकूलवल
यादिकं निर्ममो निरहंकारः संछिन्नाशेषबंधनः ४० वाचं जुहाव मनसि तत्प्राण इतरे च तं मृत्यावपानं सोत्सर्गं तं पं

राष्ट्रे अनृतं गृहे जिह्मं आत्मनि हिंसनं अरिष्टमित्यर्थः ३७ आत्मनः स्वस्य गुणैः सुसमं अतिईदृशं तोयं सर्वतः स्थितं समुद्रो
दकमेव नीवी परिधानविशेषो यस्याः भूमेः पतित्वेनाभिषिक्तवान् ३८ वज्रं अनिरुद्धस्य पुत्रं निरूप्य कृत्वेत्यर्थः अपिबत् आत्म
न्यारोपयामास ईश्वरः ३९ संछिन्नान्यशेषाणि बंधनादिउपाधयो येन ४० तदेव दर्शयति द्वाभ्यां वाचमित्युपलक्षणं सर्वेंद्रिया
णि मनसि प्रविलापितवानित्यर्थः तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् तं प्राणं इतरे अपाने तेनाकर्षणात् अपानव्यापार
उत्सर्गः तत्सहितमपानं मृत्यौ तदधिष्ठातृदेवतायां अनेनैव गायादिषु पितृवत्तत्कर्मसाहित्यं ज्ञेयं तं मृत्युं पंचत्वे पंचभू
तानामैक्ये देहारंभकत्वेन देहस्यैव मृत्युर्नात्मन इति भावितवानित्यर्थः अतो हवीदिति यंतु गात् लुङि रूपं ४१ श्रीकृष्णाय नमः ५३

113
1981

त्रित्वे गुणत्रये तच्च त्रितयं एकत्वे अविद्यायां सर्वसर्वारोपहेतुमविद्यां आत्मनि जीवे अजोहवीदित्यार्थं एवं शोधितं आत्मानं ब्र
ह्मणि अव्यये कूटस्थेन तस्यान्यत्र लय इत्यर्थः ४२ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासा इति द्वाभ्यां बद्धवाक्
मौनी ४३ अनवेक्ष्यमाणः अनुजादिप्रतीक्षामकुर्वन् आशां दिशां गतपूर्वां पूर्वं प्रविष्टा ४५ यतः यां दिशं ४५ अधर्मो मित्रं
यस्य तेन साधुकृताः सर्वे अर्था धर्मादयो यैः ४६ अतएव वैकुंठस्य चरणांबुजमेव अत्यंतिकशरणं ज्ञात्वा ४७ विधूतकल्मषाणां

त्रित्वे हुत्वा तु पंचत्वं तच्चैकत्वे जुहोन्मुनिः सर्वमात्मान्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४२ चीरवासा निराहारो बद्ध
वाङ् मुक्तमूर्धजः दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ४३ अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा उ
दीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ४४ हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः सर्वे तमनुनिर्जग्मुर्भ्रातरः कृ
तनिश्चयाः ४५ कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः ४६ मन
साधारयामासुर्वैकुंठचरणांबुजं तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणा परे ४७ तस्मिन्नारायणपदे एकांत
मतयो गतिं अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ४८ विधूतकल्मषस्थानं विरजेनात्मनैव हि विदुरोपि परि
त्यज्य प्रभासे देहमात्मवान् ४९ कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ द्रौपदी च तदाज्ञाय पतीनामनपेक्ष
तां ५० वासुदेवे भगवति ह्येकांतमतिराप तं यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्रयाणं शृणो
त्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ५१ इति श्रीभागवते पुराणे प्रथमस्कंधटीकायां पंचदशोध्यायः

स्थानं निवासस्थानं यत् विरजेनात्मनैव प्रापुः न तु षोडशकलेन लिंगेन गते वा विशेषणं विरजेनात्मनेवा च स्थानरूपं गतिं तु विधू
तकल्मषाः प्रापुरिति ४९ तीर्थान्यटन् प्रभासे श्रीकृष्णावेशेन श्रीकृष्णे चित्तमावेश्य देहं परित्यज्य तच्चित्तः सन् तदा नीनितुमागतैः पि
तृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ आत्मानं प्रति अनपेक्षमाणं तदा ज्ञात्वा तानि तमाप ५० इति एवं यत्प्रयाणं अलं अतिशयेन स्व
स्त्ययनं मंगलास्पदं अलं पवित्रं ५१ इति भागवते महापुराणे प्रथमस्कंधटीकायां पंचदशोध्यायः १५ वासुदेवाय नमः

ततश्चषोडशेप्रमिधर्मयोः कलिविजयोः संवादेवर्ण्यतेप्राप्तिपालकस्यपरिक्षितः १ द्विजवर्याणांशिक्षयास्त्वांजन्मनि अ
भिजातकोविदाः जातकर्मविदः हेविप्रामहतांगुणायस्मिन्नसः जनमेजयादीनीत्यक्षराधिक्यंछांदसं २ आजहारकृतवानि
त्यर्थः शारद्वतंकृपं ३ यत्रयेष्वश्वमेधेषुनिजग्राहनिगृहीतवान् कलिमेवनिर्दिशतिनृपति कस्यहेतोरिति कलिंकस्माद्धेतोः
केवलंनिजग्राहनतुहतवान्यतोसोशूद्रकः अतिकुत्सितः योगांपदा अहान्निति अस्यविष्णोःपदांभोजयोः योमकरंदः

सूतउवाच ततःपरिक्षिद्विजवर्यशिक्षयामहींमहाभागवतःशशासह यथाहिसूत्यामभिजातकोविदाःसमादि
शन्विप्रमहद्गुणास्तथा १ सउत्तरस्यतनयामुपयेमइरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् २
आजहाराश्वमेधांस्त्रीगंगायांभूरिदक्षिणान् शारद्वतंगुरुंकृत्वादेवायत्राक्षिगोचराः ३ निजग्राहौजसावीरः
कलिंदिग्विजयेक्वचित् नृपलिंगधरंशूद्रंघ्नंतंगोमिथुनंपदा ४ शौनकउवाच कस्यहेतोर्निजग्राहकलिंदि
ग्विजयेनृपः नृदेवचिन्हधृक्शूद्रःकोसौगांयःपदाहनत् ५ तत्कथ्यतांमहाभागयदिकृष्णकथाश्रयं अ
थवास्यपदांभोजमकरंदलिहांसतां ६ किमन्यैरसदालापैरायुषोयदसद्व्ययः क्षुद्रायुषांनृणामंगमर्त्यानाम्
तमिच्छतां इहोपहूतोभगवान्मृत्युःशामित्रकर्मणि ७ नकश्चिन्म्रियतेतावद्यावदास्तइहांतकः एतदर्थंहिभग
वांआहूतःपरमर्षिभिः ८ अहोनृलोकेपीयेतहरिलीलामृतंवचः यस्मिन्पीन्मिकृतंसर्वमिष्टापूर्तादिकंभवेत् ९

तंलिहंतिआस्वादयंतिएतेषांसतांमहतांवाकथाश्रयमितिसमासान्तिःकृष्टस्यानुषंगः ६ तर्हिकथ्यतांनचेत किमन्यैरस
द्विरालापैयत्नयैः आयुषोवृथाक्षयः अस्माकमयंसत्रप्रयत्नोहरिकथामृतपानार्थएवेत्याह माईद्वाभ्यां क्षुद्रमल्पायुर्येषांअ
तोमर्त्यानांमरणवतांतथापिऋतंसत्यंमोक्षमिच्छतांयोमृत्युःसइहसत्रेशमितुरिदंशामित्रंकर्मपशुहिंसनंतदर्थंउपहूतःततः
किमतआह ७ नकश्चिदिति ततोपिकिमतआह अहोनृलोकेहरिकथामृतंवचःपीयेतेत्येतदर्थंहरिलीलेवामृतंयस्मिन् ९

115
1981

तदभावेवृथैवजीवनमित्याह मंदस्यअलसस्यनृक्तंरात्रौयद्वयःआयुःतन्निद्रयादिवाक्लिचयद्वयःतद्व्यर्थकर्मभिरपक्रियतेतत्र
तावत्कलिनिग्रहप्रसंगमाह यदानिजचक्रवर्तितेस्वसेनयापालितेदेशेकलिंप्रविष्टंसुश्राव तदातांअनतिप्रियांवार्तांकिंचि
त्प्रियांचयुद्धकौतुकसंपत्तेःतांनिशाम्यततः शरासनंदुष्टनिग्रहार्थमादद संयुगशौंडिर्युद्धेप्रगल्भः पाठांतरयुद्धशौरितुल्यः
१० ततश्चदिग्विजयायनिर्गतः ११ भद्राश्वादीनिपूर्वपश्चिमदक्षिणोत्तरतःसमुद्रलग्नानिवर्षाणिसर्वाणिमेरोःसर्वतइलावृतं

मंदस्यमंदप्रज्ञस्यवयोमंदायुषस्त्वैवे निद्रयाक्रियतेनक्तंदिवाचव्यर्थकर्मभिः ९ सूतउवाच यदापरीक्षित्कुरुजां
गलेवसन्कलिंप्रविष्टंनिजचक्रवर्तिते निशाम्यवार्तामनतिप्रियांततःशरासनंसंयुगशौंडिराददे १० स्वलंकृतंश्या
मतुरंगयोजितंरथंमृगेंद्रध्वजमाश्रितःपुरात् वृतोरथाश्वद्विपपत्तियुक्तयास्वसेनयादिग्विजयायनिर्गतः ११ भ
द्राश्वंकेतुमालंचभारतंचोत्तरान्कुरून् इस्तवृत्ताद्युरतोरम्यकंचहिरण्मयं किंपुरुषादीनिसर्वाणिविजित्यजगृहेब
लिं १२ तत्रतत्रोपशृण्वानःस्वपूर्वेषांमहात्मनां प्रगीयमानंचयशःकृष्णमाहात्म्यसूचकं १३ आत्मानंचपरित्रा
तमश्वत्थाम्नोस्त्रतेजसः स्नेहंचवृष्णिपार्थानांतेषांभक्तिंचकेशवे १४ तेभ्यःपरमसंतुष्टःप्रीत्युज्जृंभितलोचनः
महाधनानिवासांसिददौहारान्महामनाः १५ यत्किंचित्तस्यमेन्येषुवसुमात्रमनुत्तमं तत्सर्वमददत्प्रीतःकृष्णगा
यात्हृताशयः १६ सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामं स्निग्धेषुपांडुषुजगत्प्रणतिंच
विष्णोर्भक्तिंकरोतिनृपतिश्चरणारविंदे १६

ततउत्तरतोरम्यकंहिरण्मयंचदक्षिणतोहरिवर्षंकिंपुरुषंचतानिविजित्य १२ प्रगीयमानंयशः यशआदीनिशृण्वन् तेभ्योददा
वितितृतीयेनान्वयः १३ किंचस्निग्धेषुपांडवेषुविष्णोर्यानिसारथ्यादीनिकर्माणितानिशृण्वन् यथाविष्णोर्जगत् कर्तृकांप्रण
तिंचशृण्वन् नृपतिःपरिक्षित् १४ १५ १६ श्रीराम श्री रामजयरामजयजयराम नारायणवासुदेव

भा०
५५

विष्णोश्चरणारविंदेभक्तिंकरोतिस्म पारषद्‌मितिरेफषकारयोर्विश्लेषः छांदसः तत्रपार्षदंसभापतिलंसेवनंचिंतानुवृत्तिःवीरास प्र०
नंरात्रौरवड्गहस्तस्यतिष्ठताजागरणंवृत्तिमनुवर्तमानस्यनातिदूरेशीघ्रमेव १७ धर्मोवृषरूपःविछायांहतप्रभांगांगोरूपांपृ
थिवींविवत्सांनष्टापत्यां १८ तेआत्मनोदेहस्य यद्यपिबहिरामयोनलक्ष्यते तथाअंतर्मध्ये आधिःपीडायस्याः तांत्वामालक्ष
येकेनयतोविछायासि अतइषत्म्लायतावैवर्ण्यभजतामुखेनलिंगेन १९ तत्रकारणानिकल्पयन्पृच्छतिदूरेबंधुमित्यादिपंचभि
र्दूरस्थितंबंधुंत्रिभिःपादैर्नूनंअतएवैकपादंममांवृषलैरधर्मिष्ठैः इतःऊर्ध्वंभोक्ष्यमाणंपुंस्त्वमात्मपदविशेषणत्वात्हृतयज्ञभा

तस्यैवंवर्तमानस्यपूर्वेषांवृत्तिमन्वहं नातिदूरेकिलाश्चर्यंयदासीत्तंनिबोधमे १७ धर्मःपदैकेनचरन्विछायामुपलक्ष्य
गां पृच्छतीस्माश्रुवदनांविवत्सामिवमातरं १८ धर्म० कच्चिद्भद्रेनामयमात्मनस्तेविछायासिम्लायतीयन्मुखेन आल
क्षयेसवतीमंतराधिंदूरेबंधुंशोचसिकंजनंबा १९ पादैर्न्यूनंशोचसिमैकपादमात्मानंवाद्वृषलैर्भोक्ष्यमाणं आहोसुरा
दीन्हतयज्ञभागान्प्रजाउतस्विन्मघवत्यवर्षति २० आरक्ष्यमाणाःस्त्रियउर्विबालान्शोचस्यथोपुरुषादैरिवा
र्तान् वाचंदेवींब्रह्मकुलेकुकर्मण्यब्रह्मण्येराजकुलेकुलाग्र्यान् २१ श्रीरामजयरामजयजयराम वासुदेव

गायेषां यज्ञाद्यकारणात्हेउर्वि पृथ्वीसत्पतिभिररक्ष्यमाणाःस्त्रियःपितृभिररक्ष्यमाणान्बालान्शोचसितैरेवनिर्दयैःपुरुषादैरे
वआर्तान्क्लिष्टान्वाचंदेवींसरस्वतींकुकर्मणिदुराचारैस्थितान्कुलाग्र्यान्ब्राह्मणोत्तमान्सेवकानुपसृष्टान्व्याप्तानवा
तरोपितानिउद्वासितानिव्यवायोमैथुनंनिषेधानादरेणसर्वतोषणादिषूश्रुन्मुखंवर्तमानंजीवलोकंवा हेअंबमातर्धरित्रिते
तवयोभूरिभारः तस्यावतरणार्थंकृतावतारस्यकर्माणिस्मरंतीतेनविसृष्टासती शोचसिनिर्वाणंविलंबितं आश्रितंयैस्तानि
पाठांतरेनिर्वाणंमोक्षंविडंबितंउपहसितंयैःमोक्षादप्यधिकसुखानीत्यर्थः १९ हेअंबतेसोभाग्यंकालेनाद्यहृतं भवानजाना ५५
त्येवतथापिवक्ष्यामीत्याह येनहेतुभूतेनतंचतुर्भिः पादैर्वर्तसेयत्रचसत्यादयोगुणानश्यंतितेनश्रीनिवासेनरहितंलोकं

117
1981

शोचामीतिषष्ठेनान्वयः सत्यंयथार्थभाषणंशौचंशुद्धत्वं दयापरदुःखासहनं क्षांतिःक्रोधप्राप्तौचित्तसंयमनं त्यागःअर्थिषुमु
क्तहस्तता संतोषंयथाप्राप्तेनअलंबुद्धिःआर्जवं अवक्रताशमोमनोनैश्चल्यं दमोबाह्येंद्रियनैश्चल्यं तपःस्वधर्मः साम्यंअरिमि
त्राद्यभावः तितिक्षापरापराधसहनंउपरतिलाभप्राप्तावौदासित्वं काम्यकर्मनिवृत्तिर्वाश्रुतंशास्त्रविचारः ज्ञानमात्मविष
यं विरक्तिःवैतृष्ण्यं ऐश्वर्यंनियंतृत्वं शौर्यंसंग्रामोत्साहः तेजःप्रभावः बलंदक्षत्वं स्मृतिःकर्तव्यानुसंधानं स्वातंत्र्यंअप

किंस्त्रबंधून्कलिनोपसृष्टान्राष्ट्राणिवातैरवरोपितानि इतस्ततोवाशनपानवासस्नानव्यवायोन्मुखजीवलो
कं २२ यद्वांबतेभूरिभरावतारकृतावरस्यहरेर्धरित्री अंतर्हितस्यस्मरतीविसृष्टाकर्माणिनिर्वाणविडंबितानि २३
इदंममाचक्ष्वतवाधिमूलंवसुंधरेयेनविकर्षितासि कालेनवातेबलिनांबलीयसासुरार्चितंकिंहृतमद्यसौभगं
२४ धरण्युवाच भगवान्हिवेदतत्सर्वंयन्मांधर्मानुपृच्छसि चतुर्भिर्वर्तसेयेनपादैर्लोकसुखावहैः २५ सत्यं
शौचंदयाक्षांतिस्त्यागःसंतोषआर्जवं शमोदमस्तपःसाम्यंतितिक्षोपरतिश्रुतं २६ ज्ञानंविरक्तिरैश्वर्यंशौर्यं
तेजोबलंस्मृतिः स्वातंत्र्यंकौशलंकांतिर्धैर्यंमार्दवसौभगं २७ प्रागल्भ्यंप्रश्रयःशीलंसह ओजोबलंभगः
गांभीर्यंस्थैर्यमास्तिक्यंकीर्तिर्मानोनहंकृतिः २८ एतेचान्येचभगवन्नित्यायत्रमहागुणाः प्रार्थ्यामहत्त्वमिच्छ
द्भिर्नव्ययंतिस्मकर्हिचित् २९ तेनाहंगुणपात्रेणश्रीवासेनसांप्रतं शोचामिरहितंलोकंपाप्मनाकलिनेक्षितं ३०

राधीनता कौशलंक्रियानिपुणता कांतिःसौंदर्यं धैर्यंअव्याकुलता मार्दवंचित्ताकाठिन्यं २७ प्रागल्भ्यंप्रतिभातिशयः प्र
श्रयोविनयः शीलंसुस्वभावः सह ओजः बलानिमनसःज्ञानेंद्रियाणांकर्मेंद्रियाणांचपाटवानिति भगःभोगास्पदत्वं गांभी
र्यंअक्षोभ्यत्वं स्थैर्यंअचंचलता आस्तिक्यंश्रद्धाकीर्तिर्यशः मानःपूज्यत्वं अनहंकृतिगर्वाभावः २८ एतेएकोनचत्वारिंशत्अ
न्येचब्रह्मण्यत्वशरण्यत्वादयोमहांतोगुणायतयस्मिन्नित्यासहजानवियंति नक्षीयंतेस्म २९ तेनगुणपात्रेणगुणालयेनपाप्म
नापापहेतुना ३०

३१ तस्यविरहोदुःसहइत्याहचतुर्भिः ब्रह्मादयोयस्याश्रयः अपांगमोक्षः स्वस्मिन्दृष्टिपातः तत्कामाः संतः बहुतिथंबहुकालंतपः
समचरत्सम्यक्चरंतिस्मभगवद्भिरुत्तमैः प्रपन्नासेव्यमाना अपिसाश्रीर्यस्यपादलावण्यंअलमनुरक्तासतीसेवते ३२ तस्यभ
गवतःश्रीमद्भिःपदैःकेतुर्ध्वजः अब्जादयोकैतान्श्चिह्नानियेषांतैः यद्वाअब्जादीनामाश्रयैः सम्यगलंकृतमंगंयस्याः साहंततो
भगवतःविभूतिसंपदंउपलभ्यप्राप्यत्रीन्लोकानअतिक्रम्यअरोचेशोभितवत्यस्मि पश्चात्तस्याविभूतेरंतेनाशकालेप्राप्तेसति

आत्मानंचानुशोचामिभवंतंचामरोत्तमं देवान्पितॄन्ऋषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३१ ब्रह्मादयोबहुति
थंयदपांगमोक्षकामास्तपःसमचरन्भगवत्प्रपन्नाः साश्रीःस्ववासमरविंदवनंविहाययत्पादसौभगमलंभजतेनु
रक्ता ३२ तस्याहमब्जकुलिशांकुशकेतुकेतैःश्रीमत्पदैर्भगवतःसमलंकृतांगी त्रीनत्यरोचउपलभ्यततोविभूतिं
लोकान्समांव्यसृजदुत्स्मयतींतदंते ३३ योवैममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः त्वांदुः
स्थमूनपदमात्मनिपौरुषेणसंपादयन्यदुषुरम्यमबिभ्रदंगं ३४ कावासहेतविरहंपुरुषोत्तमस्यप्रेमावलोकरुचि
रस्मितवल्गुजल्पैः स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकितायाः ३५ तयोरेवंकथय
तोःपृथिवीधर्मयोस्तथा परीक्षिन्नामराजर्षिःप्राप्तःप्राचींसरस्वतीं ३६ इतिभागवतेप्रथमेषोडशोध्यायः १६

उत्स्मयंतींगर्वंकुर्वाणांमांव्यसृजत्त्यक्तवान् किंच ३३ किंच योवैआसुरोवंशोयेषांतेतेषांराज्ञां अक्षौहिणीशतरूपंममाति
भरंअपनीतवान् त्वांचऊनपदत्वाद्दुःस्थंदुःखेनस्थितंसंतंपौरुषेणपुरुषकारेणआत्मनिस्वस्मिन्संपूर्णपदंस्वस्थंसंपादयत
लक्षणहेत्वोःक्रियायाइतिहेतौशतृप्रत्ययः संपादयितुमित्यर्थः अबिभ्रतधृतवानित्यर्थः ३४ तस्यविरहंकावासहेतप्रेमाव
लोकश्चरुचिरंस्मितंचवल्गुजल्पश्चतैर्मधुमाधवीनांसत्यभामादीनांसमानंगर्वसहितंस्थैर्यंतच्चतंयःअहरत ३५,३६
इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेटीकायांषोडशोध्यायः १६ श्रीनारायणवासुदेवहरेकृष्णरामजयराम

119
1981

ततःसप्तदशेराज्ञःकलेर्निग्रहउच्यते तस्यैवंवीर्यभाजोपिवैराग्यंचकुमद्भुतं १ हन्यमानंताड्यमानं मृणालंपद्मकंदः यस्यांघ्रिर
जसाउत्थितेनविटंकितायाः अलंकृतायाः तस्यादिमिषेणरोमोत्सवोभवति कथयतोःसतोःप्राचीपूर्ववाहिनीकुरुक्षेत्रे मृणालकं
दवत्धवलंभयान्मेहंतंमूत्रयंतंइवत्यनेनपादावशेषोधर्मोभयान्मूत्रयन्निवप्रतिक्षणंक्षीयमाणांशः तस्याप्यनिर्वाहात्कंपमा
नाइवेतिदर्शितं धर्मदुघांहविर्दोग्ध्रींक्षामांईदृशांयवसंतृणंतत्रापिसस्यादिप्रसवक्षयादिवत्सेव यज्ञाभावात् कृशा अतए
वयज्ञभागमिच्छंतीपृथिवीतिसूचितं ३ कार्तस्वरंसुवर्णंपरिच्छदःपरिकरोयस्यस्वर्णनिबद्धमित्यर्थः सज्जीकृतकार्मुकः हंसि=

सूतउवाच तत्रगोमिथुनंराजाहन्यमानमनाथवत् दंडहस्तंचददृशेनृपलांछनं १ वृषंमृणालधवलंमेहं
तमिवबिभ्यतं वेपमानंपदैकेनसीदंतंशूद्रताडितं २ गांचधर्मदुघांदीनांभृशंशूद्रपदाहतां विवत्सामश्रुवदनांक्षामां
यवसमिच्छतीं ३ पप्रच्छरथमारूढःकार्तस्वरपरिच्छदं मेघगंभीरयावाचासमारोपितकार्मुकः ४ कस्त्वंमच्छरणेलोके
बलाद्धंस्यबलांवली नरदेवोसिवेषेणनटवत्कर्मणाद्विजः ५ कस्त्वंकृष्णेगतेदूरंसहगांडीवधन्वना शोच्योस्यशोच्या
न्रहसिप्रहरन्वधमर्हसि ६ त्वंवामृणालधवलःपादैर्न्यूनःपदाचरन् वृषरूपेणकिंकश्चित्देवोनःपरिखेदयन् ७
नजातुकौरवेंद्राणांदोर्दंडपरिरंभिते भूतलेनुपतंत्यस्मिन्विनातेप्राणिनांशुचः ८ मासौरभेयानुशुचोव्येतुतेवृष
लाद्भयं मारोदीरंबभद्रंतेखलानांमयिशास्तरि ९

घातयसि राजाअहमितिचेत्तत्रा नटवेशमात्रेणनरदेवोसिकर्मणातुअद्विजःशूद्रः अशोच्यान्निरपराधान्रहसित्वंयंप्रह
रसि अतएवशोच्यःसापराधोसिअतोवधमर्हसि वृषंप्रत्याहत्वंवाकःस्वयमेवसंभावयति किकश्चिद्देवोवृषरूपेणास्मान्प
रिखेदयन्वर्तसेदोर्दंडैःपरिरंभितरक्षितेशुचःअश्रूणितेत्वांविनाअन्येषामश्रूणिनानुपतंतीतिखेदहेतुत्वंदर्शितं एवमुक्ते
पुनरपिशोचंतंप्रत्याह भोसुरभेःपुत्रमाशुचःशोकंमाकुरुव्येतुअपयातुगांप्रत्याह अंबमातःशास्तरिमयिजीवतिसतितेभ
द्रमेव अतोमारोदीः ९

ममतद्धितार्थमेवैनंहनिष्यामीनतवोपकारायेत्याह यस्येतिद्वाभ्यां हेसाध्विसर्वाः याः काश्चिदपीत्यर्थः असाधुभिः त्रस्यंते
पीड्यंतेत्यर्थः भगोभाग्यं गतिः परलोकः पुनरपिशोचंतंवृषभप्रत्याह कः अवृश्चत्तवच्छेदवाहशाः तद्विधाः दुःखिता वोभ
द्रमस्तु आत्मनस्तवपादच्छेदेनवैरूप्यंकृतवंतंकीर्तिंदूषयतीति तथातंआख्याहितदाख्यानेकृतेकथंभद्रंस्यादित्यत आह
यस्मादनागसिजनेयः अघंदुःखंयुंजन् किंभवति तस्यएवंभूतस्यमत्तः सकाशात्सर्वत्रापिसर्वस्मिन्लोकेभयंचभवति ततः
साधूनांभद्रंभवेदिति एतस्यदंडेअहमसमर्थइतिमाशंकीत्याह अनागस्विति आगस्कृत अपराधकर्तातस्यामर्त्यस्यदेवस्या

यस्यराष्ट्रेप्रजाः सर्वास्त्रस्यंतेसाध्व्यसाधुभिः तस्यमत्तस्यनश्यंतिकीर्तिरायुर्भगोगतिः १० एषराज्ञापरोधर्मोह्या
र्तानामार्तिनिग्रहः अतएनंवधिष्यामिभूतद्रुहमसत्तमं ११ कोवृश्चत्तवपादान्स्त्रीन्सौरभेयचतुष्पद माभूत्वं
त्वादृशाराष्ट्रेराज्ञांकृष्णानुवर्तिनां १२ आख्याहिवृषभद्रंवः साधूनामकृतागसं आत्मवैरूप्यकर्तारंपार्थानांकी
र्तिदूषणं १२ जनेनागस्यघंयुंजन्सर्वतोस्यचमद्भयं साधूनांभद्रमेवस्यादसाधुदमनेकृते १३ अनागस्विह
भूतेषुय आगस्कृन्निरंकुशः आहर्तास्मिभुजंसाक्षादमर्त्यस्यापिसांगदं १४ कृतेवेब्राह्मणान्विष्णोर्भक्तान्य
तकृपालवः सर्वेषांप्रभवोयस्मान्निग्रहानुग्रहेक्षमः १५ राज्ञोहिपरमोधर्मोस्वधर्मस्थानुपालनं शासतोन्यान्य
थाशास्त्रमनापद्युत्पथानिह १६ धर्मउवाच एतद्वः पांडवेयानांयुक्तमार्ताभयंवचः येषांगुणगणैः कृष्णोदौत्यादौभ
गवान्कृतः १७

पिभुजंआहर्तास्मि आहरिष्यति सांगदमित्यनेनमूलतउत्पाट्या हरिष्यामीतिदर्शितं ननुसर्वेषांप्रभुरहंकिंतु अतएवब्रा
ह्मणान्विष्णुभक्तांश्चकृतेयस्मात्तएवेति सर्वेषांप्रभवः नतेकस्यनिग्रहेणान्यस्यानुग्रहेतवकिंप्रयोजनंतत्राह अन्यान्
अधर्मिष्ठान् शासतः दंडयतः आर्तानामभयंयस्मात्तत् द्वः वः युक्तंउचितमेव वयंतुयतः पुरुषात्प्राणिनांक्लेशहेतवोभ
वेयुः तंपुरुषंनविजानीम यतः वादीनांवाक्यभेदैः विमोहिताः वाक्यभेदानाह विकल्पभेदंवसते आच्छादयंतियेयोगिनः ते

121/1981

आत्मानमेवात्मानः प्रभुंसुखदुःखप्रदमाहुः तदुक्तं आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः यद्वाविकल्पैः कुतर्कैः प्राकृताः
नास्तिकाः एवंहितेवदंति नतावद्देवतादीनांप्रभुत्वं कर्माधीनत्वात् नचकर्मणः स्वाधीनत्वात् अयः स्वयमेवप्रभुर्वानकश्चिदिति
अन्यदैवज्ञाः दैवंग्रहादिरूपांदेवतांपरतुमीमांसकाः कर्मअपरलोकायतिकाः स्वभाव १९ केष्वपिसंश्वरेषु केषपीतिदुर्लभतत्वदर्शिनं
निश्चयइतिसिद्धांततत्वं अप्रतर्क्यात् मनोगोचरात् अनिर्देश्यात् वचनागोचरात् परमेश्वरात्सर्वं भवतीतिविमृष्यविचारयस्य
बुद्ध्या विरवदः गतमोहः पर्यचष्टपर्यभाषत ज्ञानवानितिवा अनिर्द्धारितमिवब्रुवन् घातकं जानन्नपिनवेददित्येवरूपं धर्मब्रव

नवयंक्लेशबीजानियतः स्युः पुरुषर्षभ पुरुषंतंविजानीमोवाक्यभेदविमोहिताः १८ केचिद्विकल्पवसना आहुरात्मान
मात्मनः दैवमन्येपरेकर्मस्वभावमपरेप्रभुं १९ अप्रतर्क्यादनिर्देश्यादितिकेष्वपिनिश्चयः अत्रानुरूपंराजर्षेविमृषस्व
मनीषया २० एवंधर्मेप्रवदतिससम्राट्द्विजसत्तम समाहितेनमनसाविखेदः पर्यचष्टतं २१ धर्मंब्रवीषिधर्मज्ञ
धर्मोसिवृषरूपधृक् यदधर्मकृतस्थानंसूचकस्यापितद्भवेत् २२ अथवादेवमायायानूनंगतिरगोचरा चेतसोव
चसश्चापिभूतानामितिनिश्चयः २३ तपः शौचंदयासत्यमितिपादाः प्रकीर्तिताः अधर्मांशैस्त्रयोभग्नाः स्मयसंग
मदैस्तव २४ इदानींधर्मपादस्तेसत्यंनिर्वर्तयेत्ततः तंजिघृत्यस्यधर्मोयमनृतेनैधितः कलिः २५ वासुदेवहरेना

षि अतोधर्मोसिसूचकोदोषइत्यत आह यदिति स्थानंनरकादि यद्वा आज्ञानादप्यकथनंभवतीत्याह अथवेति देवस्यमाया
यागतिर्बध्यघातकलक्षणावृत्तिः भूतानांचेतसोवचसश्चागोचराज्ञेयानभवतीति निश्चयात्धर्मोसाविनिज्ञातातस्यपादान्
वादेनृत्यवस्थामाह तपइतिद्वाभ्यां अधर्मपादैस्तवत्रयः पादास्त्रिभिरंशैः भग्नाः स्मयोगर्वः संगोविषयासक्तिः इदानींकलौ
हेधर्मतेपादः चतुर्थांशः तत्रापिसत्यमेवास्ति यतः सत्याद्भवनात्मानं निवर्तयेत्कथंचिद्धारयेत् यद्वापुरुषस्तंसाधयेत् नृम
पिपादंअनृतेनसंवर्धितः कलिरूपोयमधर्मोग्रहीतुमिच्छति तत्रेयंस्थितिः कृतयुगेप्रथमंसंपूर्णश्चतुष्पाद्धर्मः त्रेतायांचतुर्णा

भा०
५८

मपिपादानांमध्येस्मयेनतपःसंगेनशौचंमदेनदयाअनृतेनसत्यमित्येवंचतुर्थांशोहीयतेद्वापरेतदर्द्धःकलौचतुर्थांशावशिष्यते= प्र०
सोप्यंतेनश्यतीति न्यासिताः अन्योन्यद्वारेणावतारितःउरुभारोयस्याःकृतंकौतुकंमंगलंयस्याः २६ अश्रूणिकलयतिमुंचति।
त्यश्रुकला तेनत्यक्तासतीशूद्राभोक्ष्यंतिमामिति २७ शोचति निशातंनिशितं अधर्महेतुर्यःकलिस्तंहंतुमित्यर्थः अभिप्रेत्यज्ञात्वा
शरण्यआश्रयार्हःश्लोक्यःसत्कीर्त्यर्हःगुडाकेशोर्जुनः तस्ययशोधरायेवयंतेषांतान्प्रतिबद्धांजलियेनतस्यतोकिंतुकथंचकेना

इयंचभूर्भगवतान्यासितोरुभरासती श्रीमद्भिस्तत्पदंन्यासैःसर्वतःकृतकौतुका २६ शोचत्यश्रुकलासाध्वीदुर्भगेवा
ज्झिताधुना आब्रन्यान्नृपव्याजाःशूद्राभोक्ष्यंतिमामिति २७ सूतउवाच इतिधर्मंमहींचैवसांत्वयित्वामहारथः नि
शातमाददेखड्गंकलयेधर्महेतवे २८ तंजिघांसुमभिप्रेत्यविहायनृपलांछनं तत्पादमूलंशिरसासमगाद्भयविह्वलः२९
पतितंपादयोर्वीरःकृपयादीनवत्सलः शरण्योनावधीच्छ्लोक्य आहचेदंहसन्निव ३० राजोवाच नतेगुडाकेशयशो
धराणांबद्धांजलेर्वैभयमस्तिकिंचित् नवर्तितव्यंतेभवताकथंचनक्षेत्रेमदीयेत्वमधर्मबंधुः ३१ त्वांवर्तमानंनरदेव
देहेष्वनुप्रवृत्तोयमधर्मपूगः लोभोनृतंचौर्यमनार्यमंहोज्येष्ठाचमायाकलहश्चदंभः ३२ नवर्तितव्यंतदधर्मबं
धोधर्मेणसत्येनचवर्तितव्ये ब्रह्मावर्तेयत्रयजंतियज्ञैर्यज्ञेश्वरंयज्ञवितानविज्ञाः ३३ यस्मिन्हरिर्भगवानिज्यमा
नःइज्यात्ममूर्तिर्यजतांशंतनोति कामानमोघान्स्थिरजंगमानांअंतर्बहिर्वायुरिवैषआत्मा ३४ रामकृष्णहरे

प्यंशेननिवर्तितव्यंयस्मात्त्वमधर्मस्यबंधुः तदेवाह राजदेहेषुवर्तमानंत्वामनुसर्वतःप्रवृत्तःअनार्यंदौर्जन्यंअंहःस्वधर्मत्या
गज्येष्ठाअलक्ष्मीःमायाकपटं ततस्माद्वर्तितव्येवर्तितुमर्हेब्रह्मावर्तदेशेयज्ञस्यवितानंविस्तारस्तत्रविज्ञाःनिपुणाः इज्यास्या
गःस्तद्रूपामूर्तिर्यस्य शंक्षेममाकाश्च नचंद्रादयोदेवाइज्यंतेनतुहरिस्तत्राह एषस्थावरादीनामात्मेति तथापिजीववन्न
परिछिन्नइत्याह अंतर्बहिरिति यथावायुःप्राणरूपेणांतस्थोपिबहिरप्यस्ति सर्वांतर्यामीश्वरोपीति ३४ वासुदेवहरे ५८

123
1981

उद्यतासिंउद्यतखड्गंदंडपाणिंयमंउद्यतंउद्युक्तं ३५ अत्रनवस्तव्यमितियातवाज्ञातयायत्रक्वापिवत्स्यामि तत्रतत्रापिआत्तः
गृहीतःइषुःशरासनंचयेनतंत्वामेवलक्षयेतत्तस्मातनियतोनिश्चलोवत्स्यामि पानंमद्यादेःसूनाःप्राणिवधाः द्यूतेअनृतंपा
नेमदःपूर्वंमदोदयानाशकत्वेनोक्तःअत्रतुगर्वद्वारातपोनशकत्वेनाभिप्रेतःस्त्रीषुसंगःहिंसायांक्रोधंदयानाशकमितिज्ञेयं यद्यपि
सर्वंसंभवति तथापिप्राधान्येनानृतादीनांद्यूतादिषुयथासंख्यंज्ञेयं द्वादशस्कंधेतु सत्यंदयातपोदानमितिपादाविभोर्नृ

सूतउवाच परिक्षितैवमादिष्टःसकलिर्जातवेपथुः तमुद्यतासिमाहेदंदंडपाणिमिवोद्यतं ३५ कलिरुवाच यत्रक्वच
नवत्स्यामिसार्वभौमतवाज्ञया लक्षयेतत्रतत्रापित्वामात्तेषुशरासनं ३६ तन्मेधर्मभृतांश्रेष्ठस्थानंनिर्देष्टुमर्हसि तत्रै
वनियतोवत्स्येआतिष्ठंस्तेनुशासनं ३७ सूतउवाच अभ्यर्थितस्तदातस्मैस्थानानिकलयेददौ द्यूतंपानंस्त्रियःसू
नायत्राधर्मश्चतुर्विधः ३८ पुनश्चयाचमानायजातरूपमदात्प्रभुः ततोनृतंमदंकामंरजोवैरंचपंचमं ३९ अमू
निपंचस्थानानिह्यधर्मप्रभवःकलिः औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृत् ४० अथैतानिनसेवेतबुभूषुःपु
रुषःक्वचित् विशेषतोधर्मशीलोराजालोकपतिर्गुरुः ४१ ७ श्री राम राम मराम ७ ७ ७

प यत्रदानशब्देनशौचमेवोक्तं ततःशुद्धिरूपत्वात् भयदानस्य त्रेतायांधर्मपादानांतुर्यांशोहीयतेशनैः सधर्मपादेरनृतहिंसासं
तोषविग्रहैरित्यत्रच असंतोषशब्देनतस्यहेतुर्गर्वोलक्ष्यतेविग्रहशब्देनतद्धेतुःस्त्रीसंगइत्यविशेषः चतुर्विधस्याप्येकत्रैवावस्था
नंदेहीति पुनर्याचमानायजातरूपं सुवर्णंदत्तवान् ततःसुवर्णात् अनृतंमदं काममितिस्त्रीषुसंगं रजइतिरजोमूलंहिंसाएतानि
चत्वारिपंचमंवैरंचादादिति अमूनिअमूषुस्थानेषुन्यवसदित्यर्थः अथेतिहेतोःबुभूषुःउद्भवितुमिच्छुः स्त्रीषुसुवर्णयोरसेवनं
नामतयोरनासक्तिः एवंकलिंनिग्रह्य

भा०
५९

वृषस्यपादान्प्रतिसंदधे तत्रआदौभिप्रवर्तितवानित्यर्थः युष्मदीयसत्रप्रवृत्तिरपितत्प्रभावादेवेत्याह त्रिभिः एतर्हिइदानींयुधि
ष्ठिरेणारण्यंप्रवेष्टुमिछता उपन्यस्तंसमर्पितंआसनमध्यास्ते अधुनापालयतइतिचवर्तमानसामीप्यवर्तमानवन्निर्देशः स्मत्य
ध्याहारोवा सत्रायसत्रंकर्तुंदीक्षिताःदीक्षांकृतवंतः ४५ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधटीकायांसप्तदशोध्यायः १७
राज्ञस्त्वष्टादशेतस्यब्रह्मशापोनिरूप्यते सचानुग्रहएवास्यजातोवैराग्यमावहन् परिक्षितोनिर्याणमत्याश्चर्यंवक्तुं तत्संभाव

वृषस्यनष्टान्स्त्रीनपादान्तपःशौचंदयामिति प्रतिसंदधआश्वास्यमहींचसमवर्धयन् ४२ सएषएतर्ह्यध्या
स्तआसनंपार्थिवोचितं पितामहेनोपन्यस्तंराज्ञारण्यंविविक्षता ४३ आस्तेधुनासराजर्षिःकौरवेंद्रश्रियोल्लस
न् गजाह्वयेमहाभागश्चक्रवर्तीबृहच्छ्रवाः ४४ इत्थंभूतानुभावोयमभिमन्युसुतोनृपः यस्यपालयतःक्षोणीं
यूयंसत्रायदीक्षिताः ४५ इतिश्रीभागवमहापुराणेप्रथमस्कंधेसप्तदशोध्यायः १७ सूतउवाच योवैद्रौण्य
स्त्रविप्लुष्टोनमातुरुदरेमृतः अनुग्रहाद्भगवतःकृष्णस्याद्भुतकर्मणः १ ब्रह्मकोपोत्थितायस्तुतक्षकात्प्राण
विप्लवात् नसंमुमुहोरुभयात्भगवत्यर्पिताशयः २ उत्सृज्यसर्वतःसंगंविज्ञाताजितसंस्थितिः वैय्यासिकेर्ज
हौशिष्योगंगायांस्वंकलेवरं ३ नोत्तमश्लोकवार्तानांजुषतांतत्कथामृतं स्यात्संभ्रमोंतकालेपिस्मरतांतत्पदांबुजं
४

नायजन्माश्चर्यमनुस्मारयति योवाइति विप्लुष्टोनिर्दग्धः सब्रह्मकोपादुत्थितात्तक्षकात्यःप्राणविप्लवःप्राणनाशस्तस्मात्
उरुभयंतस्मान्नसंमुमोह अत्रहेतुः यस्तुभगवत्येवार्पिताशयइति १ कीतुउत्सृज्येतिवैय्यासिकेःशुकस्यशिष्यःसन्
विज्ञाता अजितस्यहरेःसंस्थितिस्तत्वंयेनसः नतच्चित्रमेवेत्याह उत्तमश्लोकस्यैववार्तायेषु अतएवनित्यंतत्कथारूप
ममृतं जुषतांसेवमानानांसंभ्रमोनस्यात् तस्मिन्नरात्रिसुतरांतन्नचित्रमित्याशयेनाह ४ श्रीरामजयराम ५९

भा०
६०

किंच अस्मिन्कर्मणिसत्रेअनाश्वासेअविश्वसनीयेवैगुण्यबाहुल्येनफलनिश्चयाभावात् धूमेनअग्निहोत्रादिकर्मणाधूम्रः
विवर्णआत्माशरीरंयेषांतान्अस्मान् कर्मणिषष्ठी आसवंमकरंदंमधुरंभगवत्संगिनोविष्णुभक्तास्तेषांसंगस्ययोलवःअत्य
ल्पःकालःतेनापिस्वर्गंनतुलयामः नसमंपश्यामःनचापवर्गंसंभावनायांलोट्मर्त्यानांतुच्छाआशिषोराज्याद्यानतुलयामे
ति किमुतवक्तव्यं १३ एवंसत्संगमभिनंद्यश्रवणौत्सुक्यमाविःकुर्वंति कोनामेतिरसवित् रसज्ञः महत्तमानामेकांतमपरंअप

कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान् आपाययतिगोविंदपादपद्मासवंमधु १२ तुलयामलवेनापिन
स्वर्गंनापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः १३ कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतपराय
णस्य नांतंगुणानामगुणस्यजग्मुर्योगेश्वरायेभवपद्ममुख्याः १४ तन्नोभवान्वैभगवत्प्रधानोमहत्तमैकां
तपरायणस्य हरेरुदारंचरितंविशुद्धंशुश्रूषतांनोवितनोतुविद्वन् १५ सवैमहाभागवतःपरीक्षित्येना
पवर्गाख्यमदभ्रबुद्धिः ज्ञानेनवैय्यासिकशब्दितेनभेजेखगेंद्रध्वजपादमूलं १६ तन्नःपरंपुण्यमसंवृ
तार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिरामं १७ रामकृष्ण

नंआश्रयोयःतस्यकथायांअगुणस्यप्राकृतगुणरहितस्यकल्याणगुणानामंतंयोगेश्वरास्तेपिनजग्मुः एतावंतइतिनपरिग
णयांचक्रुः भवःशिवःपाद्मोब्रह्माचमुख्यौयेषांते नोस्माकंमध्येभगवान्प्रधानंमुख्योयस्यसभगवान्नोशुश्रूषतांहरेश्च
रितंविस्तारयतु तच्चशुकपरीक्षित्संवादेनकथयेत्याह सवाइतिद्वाभ्यां वैय्यासकिनाशब्दितेनकथितेनयेनज्ञानेनज्ञानसाध
नेन अपवर्गइत्याख्यायस्य ततखगेंद्रध्वजस्यहरेःपादमूलंभेजे १६ ततअसंवृतार्थं यथातथाआख्याहितदेवगिरिंशानि १७ ६०

तावदिति अभिमन्योःपुत्रएकराट्चक्रवर्तीईशःपतिःतावत् नतुतदाकलेरप्रवेशएवास्तुप्रविष्टोपिनप्राभवदितिकुतस्तत्राह य स्मिन्निति यर्हियस्मिन्क्षणे गांपृथ्वीं अनुवृत्तःप्रविष्टः अधर्मस्यप्रभवोयस्मिन्ननन्वधर्महेतुंकलिंसर्वथाकिंनहतवान्तत्रा ह नानुद्वेष्टीति सारंगोभ्रमरइवसारग्राहीसारमाह यद्यस्मिन्कलौकुशलानिपुण्यानि आशुसंकल्पमात्रेणफलंति इतराणि पापानिआशुनसिध्यंति यतस्तानिकृतान्येवसिध्यंतिनतुसंकल्पितमात्राणीति ननुदोषाधिक्यात्द्वेषएवयुक्तः नकुपाधीरे

तावत्कलिर्नप्रभवेत्प्रविष्टोपीहसर्वतः यावदीशोमहानुर्व्यामाभिमन्यवएकराट् ५ यस्मिन्नहनियर्ह्येवभगवानुत्स सर्जगां तदैवेहानुवृत्तोसावधर्मप्रभवःकलिः ६ नानुद्वेष्टिकलिंसम्राट्सारंगइवसारभुक् कुशलान्याशुसिध्यंतिने तराणिकृतानियत् ७ किंनुबालेषुशूरेणकलिनाधीरभीरुणा अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्तते ८ उपव र्णितमेतद्वःपुण्यंपारिक्षितंमया वासुदेवकथोपेतमाख्यानंयदपृच्छत ९ यायाःकथाभगवतःकथनीयोरुक र्मणः गुणकर्माश्रयाःपुंभिःसंसेव्यास्ताबुभूषुभिः १० ऋषयऊचुः सूतजीवसमाःसोम्यशाश्वतीर्विशदंय शः यस्त्वंशंससिकृष्णस्यमर्त्यानाममृतंहिनः ११ रामकृष्णवासुदेवहरे नारायणवासुदेवनारायण

षुतस्याकिंचित्करत्वादित्याह किंतुतेनभवेत् बालेषुअधीरेषु अप्रमत्तःअवहितःसन्योवृकइववर्तनेपारिक्षितमा= ख्यानं अपृच्छतपृष्टवंतोयूयं किंबहुनानेरैरेतावदेवकर्तव्यमितिसर्वशास्त्रसारंकथयति यायाइति कथनीयानीउरूणि कर्माणियस्यतस्यगुणकर्मविषया बुभूषुभिःसद्भावमिच्छद्भिःपुनर्विस्तरेणकथनार्थंसूतोक्तिंसत्संगंवाअभिनंदति सूते तित्रिभिःशाश्वतीःसमाःअनंतान्संवत्सरान्जीवअत्यंतसंयोगेद्वितीयाविशुद्धंयशःकीर्तयसि तत्अस्माकंमर्त्यानांनोमृतमर णनिवर्तकं ११

124 / 1481

परीक्षितेकथितेपारिक्षितंआख्यानंश्रीभागवतंपुराणंपरंपुण्यंसत्वशोधकंअत्यद्भुतेयोगेनिष्ठायस्य अथवाअत्यद्भुतानांयोगा नांनिष्ठाअवधिर्यत्रतत् अनंतस्याचरितैरुपपन्नं युक्तंअतएवभागवतानांअभिरामंप्रियंएतैर्विशेषणेःकर्मज्ञानभक्तियोग प्रकाशकत्वंदर्शितं श्रीभागवतव्याख्यानेलब्धप्रसंगंमहतामादरपात्रमात्मानंश्लाघ्यतेद्वाभ्यां अहोइत्याश्चर्ये हर्षेइतिहर्षे वय मितिबहुवचनं श्लाघायांप्रतिलोमजाअपि अद्यजन्मभृतःसफलजन्मानःआस्माजाताः वृद्धानामनुवृत्त्याआदरेणज्ञानवृद्धः शुकः तस्यसेवयेतिवा यतोदुष्कुलत्वंतन्निमित्तंआधिंचमनःपीडांमहत्तमानांअभिधानयोगःलौकिकोपिसंभाषणलक्षणः

सूतउवाच अहोवयंजन्मभृतोद्यहास्मवृद्धानुवृत्त्यापिविलोमजाताः दौष्कुल्यमाधिंविधुनोतिशीघ्रंमहत्तमाना मभिधानयोगः १८ कुतःपुनर्गृणतोनामतस्यमहत्तमैकांतपरायणस्य योनंतशक्तिर्भगवाननंतोमहद्गुण त्वाद्यमनंतमाहुः १९ एतावतालंननुसूचितेनगुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतोविभूतिर्यस्यांघ्रि रेणुंजुषतेनभीप्सोः २०

संबंधः विधुनोतिअपनयति कुतःपुनःकिंपुनर्वक्तव्यंतस्य अनंतस्यनामगृणतःपुंसोमहत्तमानामभिधानयोगाद्दौष्कुल्य मिति यद्वागृणतःपुंसःतस्यनामदौष्कुल्यंविधुनोतीतिकिंवक्तव्यमिति कैमुत्यमेवाह अनंताःशक्तयोयस्यस्वतोप्यनंतः किं च महत्सुगुणायस्यसमहद्गुणस्तस्यभावस्तस्मात्यंगुणतोप्यनंतमाहुः एतत्प्रपंचयतित्रिभिः एतावतेति तस्यपदसाम्यं अ नतिशयज्ञंचगुणैस्तत्साम्यंतदाधिक्यंचान्यस्यनास्तीत्यस्यार्थस्यज्ञानंएतावतासूचितेन अलंपर्याप्तंकस्तद्विस्तरतोव क्तुंशक्नोति तदेवाह इतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वाविभूतिःश्रीःअनभीप्सोरपियस्यांघ्रिरेणुंसेवतइति २०

अथेत्यर्थांतरे यस्य पादनखादवसृष्टं निःसृतमपि विरिंच्येनोपहृतं समर्पितं अर्हणांभः अर्घोदकं ईशसहितं जगत्पुनाति विरिंच्यो
पहृतं सेशमिति च नयोरप्युपासकत्वमुक्तं तस्मान्मुकुंदव्यतिरिक्तः कोनाम भगवत्पदस्यार्थः सर्वेश्वर इत्यर्थः धीराः संतः ईदं
धृतं अत्यंपरमकाष्ठापन्नं तदाह यस्मिन्नहिंसाउपशमः सचस्वाभाविको धर्मः एवंस्वभावमपि नंद्यपारिक्षितो पाख्यानं वक्तु
माह अहंहीति अर्यमणः हेसूर्यमूर्तयः अत्रयावानात्मावगमः समज्ञानं तावत् आचक्षे प्रवक्ष्यामि तथाहि पक्षिणो नभः

अथापि यत्पादनखावसृष्टं जगद्विरिंच्योपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः
२१ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं यजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः २२
अहं हि पृष्टोर्यमणो भवद्भिराचक्ष आत्मावगमोत्र यावान् नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः
२३ एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं २४ जलाशयमचक्षाणः
प्रविवेश तमाश्रमं ददर्श मुनिमासीनं शांतं मीलितलोचनं २५ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं स्थानत्र
यात्परं प्राप्तं ब्रह्मभूतमविक्रियं २६ विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च विशुष्यत्तालुरुदकं तथाभूतमयाचत २७

आत्मसमं स्वशक्त्यानुरूपमेव उत्पतंति न कृत्स्नं तथा विपश्चितोपि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव वदंतीत्यर्थः
२३ अचक्षाणः अपश्यत् तं प्रसिद्धमाश्रमं तस्मिन्मुनिं शमीकं प्रतिरुद्धा प्रत्याहृता इंद्रियादयो येन अत एव उपरतं स्थान
त्रयात् जाग्रदादिलक्षणात् परं तु तुरीयं पदं प्राप्तं अत एव ब्रह्मभूतत्वादविक्रियं २६ विप्रकीर्णाभिर्जटाभिराछन्नं
रुरुर्मृगविशेषः तस्य चर्मणा चाछन्नं विशेषेण शुष्यत्तालुर्यस्य सः तथाभूतं मुनिं नलब्धं तृणं तृणासनं भूमिरूपवेश	६१

स्थानं च येन सः न संप्राप्तो अर्घः सूनृतं प्रियवचनं येन सः मत्सरः तदुत्कर्षासहनं गतात्मुं मृतं धनुष्कोट्या चापाग्रेण सर्पनिधाने र
ज्ञोभिप्रायमाह एष किं प्रत्याहृतसर्वेंद्रियः सन् मीलितेक्षणः स्थितः यद्वा क्षत्रबंधुभिरागतैर्वा किं तु स्यादित्येवं तया मृषा समा
धिः सन्निति जिज्ञासयेत्यर्थः तस्य पुत्रः शृंगीनाम अर्भकः तु स्वंतत्र अर्भकमध्ये पालानां राज्ञां पीनानां पुष्टानां अधर्ममेव निर्दि
शति स्वामिनि दासानां यद्वद्घं पापाचरणं बलिभुजां काकानामिव शूनामिवेति दासत्वं दर्शयति ब्राह्मणैरिति स भांडं भांड ए

अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः अविज्ञातमिवात्मानं मन्यमानश्चुकोप ह २८ अभूतपूर्वः सहसा क्षुत्तृ
ड्भ्यामर्दितात्मनः ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च २९ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा विनिर्गच्छन्
धनुष्कोट्या निधाय पुरमागमत् ३० एष किं निभृताशेषकरणो मीलितेक्षणः मृषासमाधिराहोस्वित्किं नु स्या
त्क्षत्रबंधुभिः ३१ तस्य पुत्रोतितेजस्वी विहरन्बालकोर्भकैः राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ३२ अहो
अधर्मः पालानां पीव्नां बलिभुजामिव स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ३३ ब्राह्मणैः क्षत्रबंधुर्हि द्वा
रपालो निरूपितः स कथं तद्गृहे द्वास्थः सभांडं भोक्तुमर्हति ३४ कृष्णे गते भगवति शास्तर्युत्पथगामिनां तद्भि
न्नसेतूनद्याहं शास्मि पश्यत मे बलं ३५ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् कौशिक्याप उपस्पृश्य वाग्वज्रं
विससर्जह ३६

वत्स्थितं तत्तदनंतरं अहं शास्मि दंडयामि इति वयस्यान् उक्त्वा रोषेण ताम्रे अक्षीणि यस्य कौशिकी नदी तस्या अपः संधिरा
र्षः वाग्वज्रं शापं इति एवं सर्पनिःक्षेपेण वक्ष्यति बभक्षयिष्यति पाठांतरे भस्मीकरिष्यति स्मेति पादपूरणो कुलस्यांग
रतुल्यं मे ममथाः ततेति कृत्स्नमार्षं गले सर्पकलेवरं यस्य इत्यलुक्समासः मृतकंठउच्चैरित्यर्थः श्रीरामजयरामजय

129
1981

भा०
६२

तंसर्पंविसृज्यकेनापकारःकृतः अनभिनंदनवाक्यं अहोइत्यादि बतकष्टंतेनयामहत्पापकृतं यतअल्पीयसिद्रोहेअपराधे प्र०
उरुधृतःकृतःदमोदंडः परःश्रेष्ठइत्याख्याख्यातिर्यस्यविष्णुरातइति तंनरदेवंनृपिःसमातुंसमंदृष्टुंअलक्ष्यमाणोअदृश्यमाने
अभिवरूथवत्मेघसंघवत्नष्टोनाथोयस्यलोकस्यतस्य वसोःवसुनोधनस्यविलुंपकास्यहर्तुश्चौरादेःहेतोर्यत्पापंभविष्य

इतिसंधितमर्यादंतक्षकःसप्तमेहनि धक्ष्यतिस्मकुलांगारंचोदितोमेपितुर्गृहं ३७ ततोभ्येत्याश्रमंबालोगलेस
र्पकलेवरं पितरंवीक्ष्यदुःखार्तोमुक्तकंठोरुरोदह ३८ सवाआंगिरसोब्रह्मन्श्रुत्वासुतविलापनं उन्मील्यशनकैर्ने
त्रेदृष्ट्वास्वांगेमृतोरगं ३९ विसृज्यपुत्रंपप्रच्छवत्सकस्माद्धिरोदिषि केनवातेप्रतिकृतमित्युक्तःसन्यवेदयत ४०
निशम्यशप्तमतदर्हंनरेंद्रंसब्राह्मणोनात्मजमभ्यनंदत अहोबतांहोमहदज्ञतेकृतं अल्पीयसि द्रोहउरुर्दमो
यतः ४१ नवैनृभिर्नरदेवंपराख्यंसंमातुमर्हस्यविपक्वबुद्धे यत्तेजसादुर्विषहेणगुप्ताविंदंतिभद्राण्यकुतोभयाः
प्रजाः ४२ अलक्ष्यमाणेनरदेवनाम्निरथांगपाणावयमंगलोकः तथाहिचौरप्रचुरोविनक्षत अरक्ष्यमाणोविव
रूथवत्क्षणात ४३ तदद्यनःपापमुपैत्यनन्वयंयन्नष्टनाथस्यवसोर्विलुंपकात परस्परंघ्नंतिशपंतिवृंजतेपशू
न्स्त्रियोर्थान्पुरुदस्यवोजनाः ४४ तदार्यधर्मश्चविलीयतेनृणांवर्णाश्रमाचारयुतस्त्रयीमयः ततोर्थका
माभिनिवेशितात्मनांशुनांकपीनामिववर्णसंकरः ४५ श्रीरामजयरामजयजयराम नारायणवासुदेवहरे

ति तत अस्मन्निमित्तत्वात अस्मानुपैष्यति अनन्वयंसंबंधशून्यमेव तदेवपापंदर्शयति परस्परमिति शपंतिपरुषंवदंति
पश्वादीन्वृंजतेअपहरंतीति पुरुदस्यवःचौरबहुलाः आर्यधर्मसदाचारः शुनांकपीनामिवचार्थकामयोरेवाभिनिवेशि ६२

131
1981

तचित्तानां एवंराजमात्रस्यशापानर्हत्वमुक्त्वाप्रस्तुतेविशेषमाह धर्मपालइतिसार्द्धेनाह यमेधराट् अश्वमेधयाजी अस्यम
हापापस्यान्यत्प्रायश्चित्तमदृष्ट्वापापमावेदयन भगवंतंप्रार्थयते अपापेष्विति राजाचेत्प्रतिशापंदद्यात तर्हिनिष्कृतिर्भवेत्त
त्तुनसंभवतितस्यभागवतत्वादित्याह तिरस्कृताःनिंदिताःविप्रलब्धावंचिताःक्षिप्ताअवज्ञाताहताःताडिताः अस्यतिरस्कारा
दिकर्तुर्नतत प्रतीकारंकुर्वंति तद्भक्ताःप्रभवःसमर्थाः अपिविप्रकृतःअपकृतः अद्यंअपराधंयुक्तंचेतदित्याह प्रायशइति

धर्मपालोनरपतिःसतुसम्राट्बृहच्छ्रवाः साक्षान्महाभागवतोराजर्षिर्हयमेधराट् ४६ क्षुत्तृट्श्रमयुतोदी
नोनैवास्मच्छापमर्हति अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना पापंकृतंतद्भगवान्सर्वात्माक्षंतुमर्हसि ति
रस्कृताविप्रलब्धाःशप्ताःक्षिप्ताहताअपि ४८ नास्यतत्प्रतिकुर्वंतितद्भक्ताःप्रभवोपिहि ४८ सूतउवाच
इतिपुत्रकृताघेनसोनुतप्तोमहामुनिः स्वयंविप्रकृतोराज्ञानैवाघंतदचिंतयत ४९ प्रायशःसाधवोलोके
परैर्द्वंद्वेषुयोजिताः नव्यथंतिनहृष्यंतियतआत्मागुणाश्रयः ५० इतिश्रीभागवतेमहापुराणेप्रथमस्कंधे
अष्टादशोध्यायः१८ सूतउवाच महीपतिस्त्वथतत्कर्मगर्ह्यंविचिंतयन्नात्मकृतंसुदुर्मनाः अहोमयानी
चमनार्यवत्कृतंनिरागसिब्रह्मणिगूढतेजसि १

द्वंद्वेषुसुखदुःखेषुअगुणाश्रयःसुखदुःखाद्याश्रयोनभवति ५० इतिप्रथमेटीकायांअष्टादशोध्यायः प्रायोपवि
ष्टेगंगायांराज्ञियोगिजनावृते शुकस्यागमनंतत्रप्रोक्तमेकोनविंशके १ स्वकृतंतत्कर्ममुनिस्कंधेसर्पप्रक्षेपणंगर्ह्यंनिंद्यं
चिंतयन्सुदुर्मनाजातश्चिंतामेवाह सार्द्धाभ्यां अहोइति नीचंपापं अमीवंइतिपाठेसएवार्थः ब्रह्मणिब्राह्मणेगूढंगुप्तं
तेजोयस्य

कृतंयद्देवहेलनंईश्वरावज्ञापापमित्यर्थः तस्मान्मेव्यसनंभविष्यति तच्चनातिदीर्घात्कालात् अचिरादेवास्तुतत्रापिअद्यसा
क्षात् ममैवनपुत्रादिद्वारेणेति प्रार्थनाकामंअसंकोचितः एवंप्रार्थनायाः प्रयोजनं अघनिष्कृताय प्रायश्चित्ताय यथापु
नरेवंनकुर्यामितिच एवंसाक्षात्स्वस्यैवव्यसनंप्रार्थनतः प्रागेवकिंचित्प्रार्थयते २ अद्यैवमेराज्यादितद्भूतप्रकोपितंब्रह्मकु
लमेवानलः पुनर्द्विजादीनपीडयितुंधीर्मेमाभूत् तन्माभवेदित्यर्थः इत्थंचिंतयन्सराजामुनेः सुतेनोक्तः सप्तमेहनिनिर्ऋतिर्मृत्यु

ध्रुवंततोमेकृतदेवहेलनादुरत्ययंव्यसनंनातिदीर्घात् ततस्तुकाममघनिष्कृतायमेयथानकुर्यांपुनरेवमद्धा २
अद्यैवराज्यंबलमृद्धकोशंप्रकोपितब्रह्मकुलानलोमे दहत्वभद्रस्यपुनर्नमेभूत्पापीयसीधीर्द्विजदेवगोभ्यः ३
संचिंतयन्नित्थमथाशृणोद्यथामुनेः सुतोक्तोनिर्ऋतिस्तक्षकाख्यः ससाधुमेनेनचिरेणतक्षकानलंप्रसक्तस्य
विरक्तिकारणं ४ अथोविहायेममसुंचलोकंविमर्षितौहेयतयापुरस्तात् कृष्णांघ्रिसेवामधिमन्यमानउपा
विशत्प्रायममर्त्यनद्यां ५

र्यथाभविष्यतितथाशृणोत् शमीकप्रेषितान्शिष्यान्श्रुत्वाचसः तक्षकस्यविषाग्निंसाधुमेनेयतोविषयेषुप्रसक्तस्य
विरक्तिकारणं ४ अथोअनंतरं उभौलोकौपुरस्तान्राज्यमध्यएवहेयतयाविचारितौविहायश्रीकृष्णांघ्रिसेवामेवअधिम
न्यमानः सर्वपुरुषार्थाधिक्यंजानन् प्रायमनशनंतस्मिन्नित्यर्थः तत्संकल्पेनोपाविशत् यावत् यद्वाप्रायंप्रकृष्टमयनं
शरणंयथाभवतितथा अमर्त्यनद्यामितिविशेषणस्यफलमाह श्रीरामजयरामजयजयराम नारायणवासुदे

६३

133
1981

यागंगालसंतीश्रीर्यस्याः तुलस्याः तयाविमिश्राः येकृष्णांघ्रिरेणवः तैरभ्यधिकंसर्वोत्कृष्टंयदंबुतस्यनेत्रीतद्वाहिनीउभय
त्रअंतर्बहिश्चसेशान्लोकपालैः सहितान्लोकान्पुनातिमरिष्यमाण आसन्नमरणः मरणस्यानियतकालत्वात्सर्वा
पितया अतस्तांकोनसेवेत इतिएवंविष्णुपद्यांगंगायांप्रायोपवेशंप्रतिव्यवस्थियनिश्चित्यपांडवेयइति तत्कुलोचित्यं
दर्शयति नास्त्यस्मिन्भावोयस्यसः कुतः मुनिव्रतः उपशांतः तत्कुतः मुक्तः समस्तसंगोयेनसः तत्रतदातद्दर्शनार्थंमुनय

याचैलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री पुनातिलोकानुभयत्रसेशानकस्तांनसेवेतमरि
ष्यमाणः ६ इतिव्यवच्छियसपांडवेयः प्रायोपवेशंप्रतिविष्णुपद्यां दध्यौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमु
क्तसमस्तसंगः ७ तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयः सशिष्याः प्रायेणतीर्थाभिगमापदेशैः स्व
यंहितीर्थानिपुनंतिसंतः ८ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च पराशरोगाधिसुतोथरा
मउतथ्यइंद्रप्रमदेध्मवाहौ ९ मेधातिथिर्देवलआर्ष्टिषेणोभारद्वाजोगौतमः पिप्पलादः मैत्रेयऔर्वः कवषः
कुंभयोनिर्द्वैपायनोभगवन्नारदश्च १० अन्येचदेवर्षिब्रह्मर्षिवर्याराजर्षिवर्याअरुणादयश्च नानार्षेयप्रव
रांस्तमेतान्अभ्यर्च्यराजाशिरसाववंदे ११ सुखोपविष्टेष्वथतेषुभूयः कृतप्रणामः स्वचिकीर्षितंयत् वि
ज्ञापयामासविविक्तचेताउपस्थितोग्रेभिगृहीतपाणिः १२ श्रीराम ७ ७ ७ ७ ७ ७ ७

उपागताः नतुतीर्थस्नानार्थंकृतार्थत्वात् नतुतादृशानापितीर्थयात्राद्रश्यतेतत्राह प्रायेणेतितीर्थयात्राव्याजैः ८ अरुणा
दयः कांडर्षित्वविशेषेणपृथक्निर्दिष्टाः नानायान्यार्षेयानिऋषीणांगोत्राणितेषुप्रवरान्श्रेष्ठान्शिरसामूर्ध्नाववंदे वि
ज्ञापनार्थंपुनः कृतप्रणामः विविक्तंशुद्धंचेतोयस्यअभिगृहीतौसंयोजितौपाणीयेनसः स्वचिकीर्षितंप्रायोपवेशनादि सूक्त
मयुक्तंचेति विज्ञापयामास १२

अनुमोदते नानुग्रहमालस्य आत्मानं श्लाघते अहो इति नृपाणां मध्ये महत्तमैरनुग्रहणीयं शीलं वृत्तं येषां एतच्च राज्ञामतिदु
र्लभमित्याह ब्राह्मणानां पादशौचात् पादक्षालनोदकात् दूराद् उच्छिष्टविण्मूत्रपात्रं भासि समुत्सृजेदिति स्मृतेः दूरस्थितैः तदि
सृज्यते ततोपि दूरादेव विसृष्टं क्षिप्तं तत्रापि स्थातुमयोग्यमित्यर्थः गर्ह्यं कर्म यस्येत्यात्मानमुद्दिश्योक्तं अत्यंता वरनुग्रहः ब्रह्म
शापोपि भगवत्प्रसाद एव जात इत्याह तस्य गर्ह्यकर्मण एव अतः अंधस्य पापात्मनः गृहेष्वासक्तचित्तस्य मेस्त्र आभय परावराणा
मीश एव द्विजशापतया बभूव यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं धन्नेनिर्विष्यणोभवति यतो निर्वेदमूलः वैराग्यं मू

परिक्षिदुवाच अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं
बत गर्ह्यकर्म १३ तस्यैव मेघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भ
यमाशु धत्ते १४ तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गा
यत विष्णुगाथाः १५ पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्व
त्र नमो द्विजेभ्यः १६ इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः उदङ्मुखो दक्षिणकूल आस्ते समु
द्रपत्न्याः स्वसुतन्यस्तभारः १७

लं प्राप्तिकारणं यस्मिन् स्वस्य वैराग्यप्राप्यत्वात्तस्य च भयमूलत्वात्तदर्थं द्विजशापं कारितवानित्यर्थः तान्प्रार्थयते तमिति
द्वाभ्यां तं मां उपयातं शरणागतं प्रतियंतु जानंतु देवी देवतारूपा गंगा च प्रसेतु वा शब्दः प्रतिक्रियानादरे गाथाः कथाः
आश्रयो येषां तेषु प्रकृष्टः संगो भूयात् तस्यां तस्यां सृष्टौ जन्मनि अध्यवसायो निश्चयः प्रागग्रेषु कुशेषु आस्ते स्म स्वसु
ते जनमेजये न्यस्तो भारो राज्यं येन सः उत्तरश्लोकस्य टीका प्रशस्य साधु साध्विति उक्त्वा मुक्ताव्यकिरन् देवसंघैर्वादिता
नेदुः प्रजानुग्रहे शीलं सारो बलं येषां १७

135/1981

उत्तमश्लोकगुणैरभिरूपं सुंदरमिव भवत्सु पांडोर्वंशेषु ये जकुरिति युधिष्ठिरादयो हि प्रायेण २० परस्परं मंत्रयंते सर्व इति परं श्रे
ष्ठं लोकं तत्र हेतुः विरजस्कं निर्मायं विशोकं च यास्यतीति कुतस्तत्राह अयमिति आश्रुत्य आकर्ण्य समं पक्षपातशून्यं मधु
स्रुत् अमृतश्रावि गुरु गंभीरार्थं अलीकं सत्यं त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके वेदाय यथामूर्तिधरा भवंति तत्तुल्यः २२ श्रा

एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयश्च नेदुः १८ महर्ष
यो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपं १९ न वा
इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ये ध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः २० सर्वे वयं ता
वदिहास्महे च कलेवरं यावदसौ विहाय लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः २१ आश्रुत्य तदृषिग
णवचः परीक्षित् समं मधुच्युद्गुरु चाव्यलीकं आभाषतैनानभिनंद्य युक्तं शुश्रूषमाणश्चरितानि विष्णोः २२ राजोवा
च समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलं २३
ततश्च वः पृच्छ्यमिदं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियु
क्ताः २४ तेन तदेवतातत्त्वं पृष्टवा वादान्वितेनिरे नानाशास्त्रविदो विप्रा मिथः साधनदूषणैः २५ हरिर्देवं शिवो देवं
भास्करो देवमित्यपि काल एव स्वभावश्च कर्मैवेति पृथक् जगुः २६ अथ खिन्नः स राजर्षिर्बहुवादाकुलांतरः नि
श्वसन्नभवत्तूष्णीं मोक्षे जातः संशयः २७

नातिशयमुक्त्वा कृपाकुलतामाह नेहेति भवतां प्रयोजनं परानुग्रहं विना नास्ति तर्हि स एवार्थः स्यात् २३ आत्मशीलं स्वभावं पृ
च्छ्यं प्रष्टव्यं विश्रभ्य विश्वासं कृत्वा एवं कर्तव्यमित्यस्य भावः इति कृत्यता तस्मिन्विषये सर्वात्मना सर्वावस्थासु कृत्यं विशेषत
श्च म्रियमाणैः तच्च शुद्धं पापसंपर्करहितं आमृशत विचारयत २४ २५ २६ २७ रामकृष्णवासुदेवं देवहरे

भा० तत्रतेषुयागयोगतपोदानादिभिर्विविदमानेषुमत्सुयदृच्छयागांपर्यटन्व्यासपुत्रःतत्र अभवत्प्राप्तः नलक्ष्यमाश्रमादिलिं प्र०
६५ गंयस्याअवधूतते अज्ञायजनैस्त्यक्तोयःतस्यैववेषोयस्य तमित्यादीनां प्रत्युत्थिताइतितृतीयश्लोकेनान्वयः द्विगुणान्यष्टौ
वर्षाणियस्यसुकुमारौपादौकरौउरूबाहूअंसौकपोलौगात्रंयस्य चारूणिआयतेअक्षीणियस्मिन्एवंभूतमाननंयस्य कंबुव
इवरेखात्रयान्वितःसुष्टुजातःकंठोयस्यकंठस्याधोभागयोःस्थितेअस्थिनीजत्रूनीगूढेजत्रूनीयस्य पृथुविस्तीर्णंतुंगंउन्नतंव

तत्राभवद्भगवान्व्यासपुत्रोयदृच्छयागामटमानोनपेक्षः अलक्ष्यलिंगोनिजलाभतुष्टोवृतश्चबालैरवधूतवे
षः २५ तंद्व्यष्टवर्षंसुकुमारपादकरोरुबाह्वंसकपोलगात्रं चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननंकंबुसुजात
कंठं २६ निगूढजत्रुंपृथुतुंगवक्षसमावर्तनाभिंबलिवल्गूदरंच दिगंबरंवक्त्रविकीर्णकेशंप्रलंबबाहुंस्वमरो
त्तमाभं २७ श्यामंसदापीच्यवयोंगलक्ष्म्यास्त्रीणांमनोज्ञंरुचिरस्मितेन प्रत्युत्थितास्तेमुनयःस्वासनेभ्यस्तल्ल
क्षणज्ञाअपिगूढवर्चसं २८ सविष्णुरातोतिथयआगतायतस्मैसपर्यांशिरसाजहार ततोनिवृत्ताह्यबुधाः स्त्रि
योर्भकामहासनेसोपविवेशपूजितः २९ ससंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः व्यरोचता
लंभगवान्यथेंदुर्ग्रहर्क्षतारानिकरैःपरीतः ३०

सोयस्य आवर्तवन्नाभिर्यस्यवलिभिस्तिर्यक्निम्नरेखाभिर्वल्गुरम्यंउदरंयस्य दिशएवअंबरंयस्य वक्त्रविकीर्णाःकेशा
यस्यप्रलंबौबाहूयस्य समरेषुश्रेष्ठेषुदेवेषुउत्तमोहरिस्तद्वत् आभायस्य सदाअपीच्यंअत्यंतोत्तमंयद्वयोयौवनंतेन
याअंगलक्ष्मीर्देहकांतिस्तयारुचिरस्मितेनचगूढवर्चसमपिप्रत्युत्थिताः तंदृष्ट्वाप्रत्युद्गमंकृतवंतइत्यर्थः शिरसैवसप
र्यामाजहार आत्मनिवेदनंकृतवान् तेनसहागतास्तस्यपश्चाद्याअनिवृत्ताः सउपविवेश श्रीरामजयरामजयजसरा ६५

137/1981

पूर्वश्लोकस्यटीका सभगवान्ब्रह्मर्षिसंघादिभिःसंवृतःसन्अलंव्यरोचत ग्रहाःशुक्रादयः ऋक्षाण्यश्विन्यादीनि अन्या
स्तारापावितास्इत्यर्थः नकुंठासर्वार्थेषु मेधायेषुप्रश्नार्थंपुनर्नत्वासूनृतयागिरा अन्वपृच्छत् अहोइतिपंचभिः सतांसेव्या
जाताः यतःअतिथिरूपेणहेतुना तीर्थकायोग्याकृताः विष्णोःसांनिध्यात्सुरागदयइव पांडुसुतानांप्रियः अतस्तेषांपैत्र

प्रशांतमासीनमकुंठमेधसंमुनिंनृपोभागवतोभ्युपेत्य प्रणम्यमूर्ध्नावहितःकृतांजलिर्नत्वागिरासूनृतया
न्वपृच्छत् ३१ राजोवाच अहोअद्यवयंब्रह्मन्सत्सेव्याःक्षत्रबंधवः कृपयातिथिरूपेणभवद्भिस्तीर्थकाः
कृताः ३२ येषांसंस्मरणात्पुंसांसद्यःशुध्यंतिवैगृहाः किंपुनर्दर्शनस्पर्शपादशौचासनादिभिः ३३ सान्नि
ध्यात्तेमहायोगिन्पातकानिमहांत्यपि सद्योनश्यंतिवैपुंसांविष्णोरिवसुरेतराः ३४ अपिमेभगवान्प्रीतः
कृष्णःपांडुसुतप्रियः पैतृष्वस्रेयप्रीत्यर्थंतद्गोत्रस्यात्तबांधवः ३५ अन्यथातेव्यक्तगतेर्दर्शनंनःकथंनृणां
नितरांम्रियमाणानांसंसिद्धस्यवनीयसः ३६ अतःपृच्छामिसंसिद्धिंयोगिनांपरमंगुरुं पुरुषस्येहयत्कार्यं
म्रियमाणस्यसर्वथा ३७ यच्छ्रोतव्यमथोजाप्यंयत्कर्तव्यंनृभिःप्रभो स्मर्तव्यंभजनीयंवाब्रूहियद्वाविपर्ययं ३८

ष्वस्रेयानांप्रीत्यर्थंतद्गोत्रस्यमेआत्तंस्वीकृतंबांधवंबंधुकृत्यंयेन अन्यथाश्रीकृष्णप्रसादंविनाअव्यक्तागतिर्यस्यम्रि
यमाणानांनितरांकथंस्यात् वनाथितावाचयितावनयित्रृतमोवनीयात्तस्याअत्युदारतयामांयाचयेति प्रवर्तकस्ये
त्यर्थः सम्यक्सिद्धिर्यस्मात्तं कार्यंकर्तुंयोग्यंकर्तव्यंत्वावश्यकमिति भेदः विपर्ययंअश्रोतव्यादि रामनारायण

त्वद्दर्शनस्यपुनर्दुर्लभत्वादिदानीमेवकथनीयमित्याशयेनाह नूनमिति गोदोहनकालमात्रमपि एवंअहोइत्यादिकया
लक्षणयामधुरयागिरा अभाषितः अभिमुखीकृतः इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेएकोनविंशतितमोध्या

नूनंभगवतोब्रह्मन्गृहिणांगृहमेधिनां नलक्ष्यतेह्यवस्थानमपिगोदोहनं
क्वचित् ३९ सूतउवाच एवमाभाषितःपृष्टःसराज्ञाश्लक्ष्णयागिरा
प्रत्यभाषतधर्मज्ञोभगवान्बादरायणिः ४० इतिश्रीभागवतेमहापु
राणेप्रथमस्कंधेशुकागमनंनामएकोनविंशोध्यायः १९श्रीकृष्णायनमः

यः १९ प्रथमस्कंधस्यटीकासमाप्तिर्जाता आर्यंधर्मजमाहतारिमवनौकृत्वापरीक्षिन्नृपंब्रह्मास्त्रादिभिरक्षितंकलि
जयाव्याप्तिंचकृत्वाभुवि अंतेयःशुकरूपतःस्वपरमज्ञानोपदेशेनतंशापादावदमुंनमामिपरमानंदाकृतिं १ राम

139
1981

इतिप्रथमस्कंधः समाप्तः

१३।
१५४।

अथद्वितीयस्कंधप्रारंभः

भा० श्रीगणेशायनमः श्रीवरदमूर्त्तिर्जयति श्रीकृष्णचरणावहमीडे द्वितीयेतुदशाध्यायेः श्रीभागवतमादितः द्वि०
१ उद्देश लक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते १ तत्रतुप्रथमेध्याये कीर्तनश्रवणादिभिः स्थविष्ठेभगवद्रूपेमनसोधारणे
च्यते २ यन्नामकीर्तनं दानतपोयोगादिसत्फलं तंनित्यंपरमानंदं हरिंनरहरिंस्मरेत् ३ अथद्वितीयस्कंदव्याख्या उक्तः
पूर्वमुपोद्घातः संप्रसंगशुकागमः राजापृष्टंनृणांकृत्यमथाहशुकसन्मुनिः ४ राज्ञः प्रश्नमभिनंदति वरीयानिति त्वयापुं
सांश्रोतव्यादिषुमध्येयः परश्रेष्ठः गोचरः प्रश्नः कृतः एषः वरीयान् यतोलोकहितमेतत् मोक्षहेतुत्वात् आत्मविदांमुक्तानांच
संमतोयतः तत्रतावत्स्वभाविकक्रियाणामनर्थहेतुत्वंवदन् ब्रूहियद्वाविपर्ययमित्यस्योत्तरमाह श्रोतव्यादीनित्रिभिः गृहेषुसक्ता

श्रीशुकउवाच वरीयानेषतेप्रश्नः कृतोलोकहितंनृप आत्मवित्संमतः पुंसांश्रोतव्यादिषुयत्परः १ श्रोतव्यादीनिरा
जेंद्रनृणांसंतिसहस्रशः आपश्यतामात्मतत्वंगृहेषुगृहमेधिनां २ निद्रयाह्रियतेनक्तं व्यवायेनचवायवः दिवाचा
र्थेहयाराजन्कुटुंबभरणेनवा ३ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि तेषांप्रमत्तोनिधनंपश्यन्नपिनपश्य
ति ४ तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः श्रोतव्यः कीर्तितव्यश्चस्मर्तव्यश्चेच्छताभयं ५ वासुदेव श्रीः

नांअतएवगृहमेधिनांतद्रूतपंचसूनापराणांमेधामतिर्हिंसार्था २ नेश्वरार्थेवायुर्व्ययोभवतीत्याह नक्तंरात्रौयद्वय आयु
स्तन्निद्रयाव्यवायेनरत्याचह्रियते दिवाह्रियद्व्ययस्तदर्थेहया अथार्थमुपमेनसि देर्घेकुटुंबपोषणेनवा चकारावनुक्तसमु श्रीः
च्चयार्थौ ३ ननुनश्वरकुटुंबार्थं आयुर्व्ययंकथंकुर्यात् तत्राहदेहादिषुआत्मनः सैन्येषुपरीकरेषुअसत्सुमिथ्याभूतेष्वपिप्रमत्तः प्रसक्तः
तेषांपित्रादिदृष्टांतेननाशंपश्यन्नपिनानुसंधत्ते एवंविपर्यप्रश्नोत्तरमुक्त्वाश्रोतव्यादिप्रश्नोत्तरमाह तस्मादिति हेभारतभरतवं १
श्य सर्वात्मेति श्रेष्ठत्वमाह भगवानिति सौंदर्यं ईश्वर इत्यावश्यकत्वं हरीरीति बंधहारित्वं अभयं मोक्षमिच्छतां ५ रामकृष्ण

143/1981

अतः परमन्यच्छ्रेयोनास्तीत्याह एतावानेवजन्मनोलाभः फलंतमाह नारायणस्मृतिरिति सांख्यादिभिः साध्यइति तेषांस्वातंत्र्य
लाभत्वंवारयति सांख्यमात्मानात्मविवेकः योगोअष्टांगअंतेनुस्मृतिः परोलाभः नतन्महिमावक्तुंशक्यतइत्यर्थः ६ तत्रसदाचा
रंप्रमाणयति प्रायेणेति विधिषेधतः विधिनिषेधाभ्यांनिर्वृत्ताः नैर्गुण्येब्रह्मणिस्थिताः अपिस्मप्रसिद्धं ७ किमिदमपूर्वंकथयसि
सत्यंअत्यपूर्वमेवेदमित्याह इदंभगवत्प्रोक्तंतन्नामैकप्रधानंपुराणंब्रह्मसंमितं सर्ववेदतुल्यंयद्वाब्रह्मसम्यक्मितंयेन कुतस्त
याप्राप्तमतआहअधीतवानिति सिद्धस्यतवकुतोध्ययनेप्रवृत्तिस्तत्राह ८ परिनिष्ठितोपीतिगृहीतचेताआकृष्टचित्तः ९ महापुरुषे

एतावान्सांख्ययोगाभ्यांस्वधर्मपरिनिष्ठया जन्मलाभः परः पुंसांअंतेनारायणस्मृतिः ६ प्रायेणमुनयोराजन्निवृ
त्ताविधिनिषेधतः नैर्गुण्यस्थारमंतेस्मगुणानुकथनेहरेः ७ इदंभागवतंनामपुराणंब्रह्मसंमितं अधीतवान्द्वापरादौ
पितुर्द्वैपायनादहं ८ परिनिष्ठितोपिनैर्गुण्यउत्तमश्लोकलीलया गृहीतचेताराजर्षेआख्यानंयदधीतवान् ९ तदहंतेभि
धास्यामिमहापौरुषिकोभवान् यस्यश्रद्दधतामाशुस्यान्मुकुंदेमतिः सती १० एतन्निर्विद्यमानानामिच्छतामकुतोभ
यं योगिनांनृपनिर्णीतंहरेर्नामानुकीर्तनं ११ किंप्रमत्तस्यबहुभिः परोक्षैर्हायनैरिह वरंमुहूर्तंविदितंयटेतश्रेयसेय
तः १२ खट्वांगोनामराजर्षिर्ज्ञात्वेयत्तामिहायुषः मुहूर्तात्सर्वमुत्सृज्य गतवानभयंहरिं १३

विष्णुस्तदीयः यस्ययस्मिन्श्रद्धांकुर्वतांसतीअहेतुकी १० साधकानांसिद्धानांचनातः परंअन्यच्छ्रेयोस्तीत्याह एतदिति इच्छतांकामिनां
तत्तत्फलसाधनमेतदेवनिर्विद्यमानानांमुमुक्षूणांमोक्षसाधनमेतदेव योगिनांज्ञानिनांफलंचैतदेवनिर्णीतंनात्रप्रमाणंवक्तव्य
मित्यर्थः ११ अल्पमेवायुरवशिष्टंकिमहंसाधयेयमितिमाशुचइत्याह किमितित्रिभिः परोक्षैरलक्षितैर्हायनैर्वर्षैर्विदितंख्यातानीति
ज्ञातंयेनज्ञानेनघटेतयत्नंकरोति १२ खट्वांगोहिदेवपक्षेस्थित्वादैत्यानजनयत्ततः प्रसन्नेर्वरंवृणीष्वेत्युक्तः ततस्तेनोक्तंप्रथमंमाताचन्म
मायुः कथ्यतामितिततोदेवैरुक्तंतत्तुमुहूर्तमात्रमस्तीतिततोतिशीघ्रंविमानेनभुवमागत्यहरिंशरणंगतइतियतइयंस्वर्गभूमीरजोधिकाक
र्मभूमिः पृथ्वी १३

भा० तवतुएतत्सर्वपि इदानींमपितावदिति तावताकालेनसांपरायिकंपारलौकिकंसाधनंसाधय १४ तत्रवैराग्यंतावदाह अंतंकाल टी०
२ इतिगतसाध्वसः मृत्युभयशून्यः असंगोनासक्तिः तेनशास्त्रेणस्पृहांसुखेष्वंतदेह मनुयेपुत्रकलत्रादयस्तेष्वपि स्पृहांछिंद्यात्
किंचगृहात्प्रव्रजितः निर्गतः गृहेस्थितस्यपुनरप्यासक्तिसंभवात् तत्राष्टांगयोगमाह धीरइति ब्रह्मचर्यादिनियमोपलक्षणंपुण्यती
र्थेतिस्नानादिनियमोपलक्षणंआसनमाह शुचाविति विविक्तेएकांतेविधिवत् कुशाजिनचैलैः क्रमेणनिर्मिते १६ जपगर्भप्राणा
यामंवक्तुंजपमाह त्रिवृत्त्रिभिरकारादिभिः वर्णैर्नितंग्रथितं ब्रह्माक्षरंप्रणवंमनसाभ्यसेत् आवर्त्तयेत् मनसाइंद्रियप्रत्याहारंवक्तुं
प्राणायामेनमनोनियमनमाह मनोयच्छेत् ब्रह्मबीजंप्रणवमविस्मरन् एवंजितश्वासःसन् १७ प्रत्याहारमाह नियच्छेत् अक्षा

तवाप्येतर्हि कौरव्य सप्ताहंजीवितावधिः उपकल्पयतत्सर्वंतावद्यत्सांपरायिकं १४ अंतकालेतुपुरुषआगतेगतसाध्व
सः छिंद्यादसंगशस्त्रेणस्पृहांदेहेनुयेचितं १५ गृहात्प्रव्रजितोधीरः पुण्यतीर्थजलाप्लुतः शुचौविविक्तआसीनोविधिव
त्कल्पितासने १६ अभ्यसेन्मनसाशुद्धंत्रिवृद्ब्रह्माक्षरंपरं मनोयच्छेज्जितश्वासोब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषये
भ्योक्षान्मनसाबुद्धिसारथिः मनःकर्मभिराक्षिप्तंशुभार्थेधारयेद्धिया १८ तत्रैकावयवंध्यायेत् अव्युच्छिन्नेनचेतसा मनोनि
र्विषयंयुक्त्वाततः किंचननस्मरेत् १९ पदंतत्परमंविष्णोर्मनोयत्रप्रसीदति रजस्तमोभ्यामाक्षिप्तंविमूढंमनआत्मनः यच्छेद्धार
णयाधीमान्हंतियातत्कृतंमलं २०

न् इंद्रियाणिनिश्चयात्मिकाबुद्धिः सारथिर्यस्यसः धारणामाह मनइतिपुनश्चकर्मभिस्तद्वासनाभिराक्षिप्तंआकृष्टंशुभार्थेभगवद्रूपे १८ श्री:
ध्यानमाहतत्रेति एकमेकंपादाद्यवयवंअव्युच्छिन्नेनसमग्ररूपादवियुक्तेन आश्रयविशेषेसामान्यतश्चित्तस्थिरीकरणंधारणावयवविभा
वनयादार्ढ्यं ध्यानमितिभेदः समाधिमाह निर्विषयंमनोयुक्त्वासमाधायस्थिराभूतेमनसिस्फुरत्परमानंदमात्राकारंकुर्यादित्यर्थः प्रसीदति २
उपशाम्यति गुणवशात्पुनरपिक्षोभेसति धारणामेवस्थिरीकुर्यादित्याह रजसाआक्षिप्तंतमसाविमूढंस्वीयंमनोनिरुध्यात् तत्कृतंरजस्तमो
भ्यांकृतं २०

1115
1981

यतः यस्यांक्रियमाणायांभद्रंसुखात्मकंआश्रयंपरंविषयंपश्यतः तत्रैवप्रीतिर्भवति २१ यथायत्रयादृशीचेतिकर्तव्यताविष
यतद्विशेषाणांप्रश्नाः २२ यस्मैयस्योत्तरंजितासनइतिविषयमाहस्थूलइतिसार्धेन २३ विशेषोविराड्देहः अतिस्थूलानामपिस्थूलतरः
सत्कार्यमात्रं २४ अस्यचोपलक्षणत्वेनविषयत्वंवक्तुंतस्यविराड्जीवानीयंताभगवानेवविषयइत्याह अंडकोशेतत्वनिर्मितकटाहएव
पृथिव्यावरणंततः अप्तेजोवाय्वाकाशाहंकारमहत्तत्वादीनितिसप्त २५ विराड्देहांतर्वर्तिजीवतदंर्यामिणामभेदमारोप्यापासनंक

यतः संधार्यमाणायांयोगिनोभक्तिलक्षणः आशुसंपद्यतेयोगआश्रयंभद्रमीक्षतः २१ राजोवाच यथासंधार्यतेब्रह्म
न्धारणायत्रसंमता यादृशीवाहरेदाशुपुरुषस्यमनोमलं २२ श्रीशुकउवाच जितासनोजितश्वासोजितसंगोजितेंद्रि
यः स्थूलेभगवतोरूपेमनःसंधारयेद्धिया २३ विशेषस्तस्यदेहोयंस्थविष्ठस्यस्थवीयसां यत्रेदंदृश्यतेविश्वंभूतंभव्यंभव
च्चसत् २४ अंडकोशशरीरेस्मिन्सप्तावरणसंयुते वैराजःपुरुषोयोसौभगवान्धारणाश्रयः २५ पातालमेतस्य
हिपादमूलंपठंतिपार्ष्णिप्रपदेरसातलं महातलंविश्वसृजोथगुल्फौतलातलंवैपुरुषस्यजंघे २६ द्वेजानुनीसुतलंविश्वमू
र्तेरूरुद्वयंवितलंचातलंच महीतलंतज्जघनेमहीपतेनभस्तलंनाभिसरोगृणंति २७ उरःस्थलंज्योतिरनीकमस्यग्रीवा
महर्वदनंवैजनोस्य तपोरराटींविदुरादिपुंसःसत्यंतुशीर्षाणिसहस्रशीर्ष्णः २८ वासुदेव नारायण गोविंद माधव राम

तव्यमित्याशयेनाह पातालमितिपादमूलंपादस्याधोभागंपातालादीनांतदवयवताविधीयते पातालादीन्यतलांतानिअधस्तलादार
भ्यसप्तविवराणिपठंतीत्यर्णंतीत्यादिप्रमाणदर्शनंपार्ष्णिप्रपदेपादस्यपश्चात्पुरोभागौ २६ ऊरुद्वयंतस्याधोभागेवितलंऊर्ध्वभागेअत
लंइतिज्ञेयं नाभिरेवसरः २७ ज्योतिरनीकंज्योतिषांसमूहंस्वर्गंमहर्लोकंगृणंति तपोलोकंरराटींललाटंसत्यंसत्यलोकं २८श्रीराम

भा० उस्राः देवाः तेजोमयशरीरत्वात् बाहवइत्याकुः दिशः अस्मदादिश्रोत्राधिष्ठात्र्योदेवताः कर्णौश्रोत्रस्याधिष्ठानंशब्दस्तुश्रोत्रवि टी०
२ षयः सतस्यश्रोत्रेंद्रियं एवंनासिकादिष्वपिनासत्यदस्रौअश्विनौनासेनासापुटेइद्धः दीप्तः २९ द्यौरंतरिक्षंअक्षिणीनेत्रगो
लकौचक्षुरिंद्रियंपतंगसूर्यः अहनीरात्र्यहनीपरमेष्ठिधिष्ण्यंब्रह्मपदंतालुरधिष्ठानंजिह्वाइंद्रियं ३० छंदांसिवेदाः शिरोब्रह्मरं

इंद्रादयोबाहव आहुरुस्राकर्णौदिशः श्रोत्रमनुष्यशब्दः नासत्यदस्रौपरमस्यनासेघ्राणंचगंधोमुखमग्निरिद्धः २९
द्यौरक्षिणीचक्षुरभूत्पतंगः पक्ष्माणिविष्णोरहनीउभेच तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यंआपोस्यतालुरसएवजिह्वा ३० छं
दास्यनंतस्यशिरोगृणंतिदंष्ट्रायमः स्नेहकलाद्विजानि हासोजनोन्मादकरीचमायादुरंतसर्गोयदपांगमोक्षः ३१ व्रीडो
त्तरोष्ठोधरएवलोभोधर्मस्तनोधर्मपथोस्यपृष्ठः कस्तस्यमेढ्रंवृषणौचमित्रौकुक्षिःसमुद्रागिरयोस्थिसंघाः ३२ नद्योस्य
नाड्योथतनूरुहाणिमहीरुहाविश्वतनोर्नृपेंद्र अनंतवीर्यश्वसितंमातरिश्वागतिर्वयःकर्मगुणप्रवाहः ३३ ईशस्य
केशान्विदुरंबुवाहान्वासस्तुसंध्यांकुरुवर्यभूम्नः अव्यक्तमाहुर्हृदयंमनश्चसचंद्रमाःसर्वविकारकोशः ३४

ध्रं स्नेहकलापुत्रादिस्नेहलेशाः द्विजानिदंताः षंढत्वमार्षंदुरंतः अपारः सर्गइतियत्सतस्यकटाक्षः ३१ अधर्ममार्गोस्यपृष्ठभागः श्री:
कः प्रजापतिः मित्रौमित्रावरुणौ ३२ अनंतवीर्यस्यसः वयः कालः तस्यगमनंगुणप्रवाहः प्राणिनांसंसारः कर्मतस्यक्रीडा ३३ भूम्नः २
विभोः अव्यक्तं प्रधानं सप्रसिद्धः चंद्रमाः तदीयंमनः सर्वेषांविकाराणांकोशइवाश्रयभूतं ३४ श्रीगोपाल श्रीयादवपते श्रीराम

1147
1581

विज्ञानशक्तिंचित्तंमहिंमहत्तत्वंअतः करणमहंकारंगिरित्रंश्रीरुद्रंगर्दभाद्दउवायामुत्पन्नाअश्वतरी ३५ वयांसिपक्षिणः तस्यव्या
करणंनामचूपेव्याकरणशाणीतिश्रुत्युक्तेःशिल्पनैपुण्यंयथाहुः येनशुक्लीकृताहंसाः शुकाश्चहरितीकृताः मयूराश्चित्रितायेनसमे
वृत्तिंविध्यास्यतीति मनुःस्वायंभुवः मनीषाबुद्धिः मनुजः पुरुषः निवासः आश्रयः पुरुषत्वेवाविस्तारामात्मेतिश्रुतेः गंधर्वादीनांद्व
द्वैक्यंगंधर्वादयः स्वरः स्मृतीः खड्जादिस्वरस्मृतयइत्यर्थः आसुरानीकंवीर्यंयस्यस्मृतिरसुरानीकवर्येतिपाठे गंधर्वादयः स्वरः असुर
सम्रहश्रेष्ठः प्रह्लादस्मृतिस्तस्येति ३६ ब्रह्मविप्रस्तस्याननंमुखंक्षत्रंक्षत्रियाः भुजायस्यविट्वैश्यः उरूयस्यअंघ्रिश्रितः कृष्णवर्णःशू
द्रोयस्यनानाभिधानामानियेषांचतेचअभीज्याः देवाः तेषांगणैर्वसुरुद्रादिभिरुपपन्नोयुक्तः द्रव्यात्मकोहविः साध्यः वितानयोगः यज्ञ

विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोंतःकरणंगिरित्रं अश्वाश्वतर्युष्ट्रगजानखानिसर्वेमृगाः पशवःश्रोणिदेशे ३५ वयां
सितद्व्याकरणंविचित्रंमनुर्मनीषामनुजोनिवासः गंधर्वविद्याधरचारणाप्सरः स्वरःस्मृतीरसुरानीकवीर्यः ३६ ब्रह्माननं
क्षत्रभुजोमहात्माविडूरुरंघ्रिश्रितकृष्णवर्णः नानाभिधाभीज्यगणोपपन्नोद्रव्यात्मकः कर्मवितानयोगः ३७ इयान
सावीश्वरविग्रहस्ययःसन्निवेशःकथितोमयाते संधार्यतेस्मिन्वपुषिस्थविष्ठेमनः स्वबुध्यायनतोस्तिकिंचित् ३८ ससर्व
धीवृत्त्यनुभूतसर्वआत्मायथास्वप्नजनेक्षितैकः तंसत्यमानंदनिधिंभजेत नान्यत्रसज्जेद्यतआत्मपातः ३९ हेयादवपतेश्रीः

यज्ञप्रयोगस्तस्यकर्मकार्यंअवश्यकोभिप्रेतइत्यर्थः ३७ इयान्एतावान्संनिवेशःअवयवसंस्थानंयस्मिन्स्वबुध्यामनः संधार्यते मुमुक्षुभिः
यतोयद्व्यतिरिक्तंकिंचिन्नास्तीतितस्मिन् ३८ तदेवंचित्तस्थैर्यार्थंविराड्देहजीवेश्वराणामभेदेनोपासनमुक्तं तत्रतुदेहजीवावीश्वरेप्रवि
लाप्यसएवध्येयइतिनिर्धारयतीतिसइतिसर्वेषांधीवृत्तिभिरनुभूतंसर्वंयेनसएकएव सर्वांतरात्मानमेवसत्यंभजेदन्यत्रोपलक्षणेन
सज्जेत यतः अन्यत्रप्रसंगादात्मनः पातः संसारोभवति एकस्यतत्तदिंद्रियैः सर्वाभूतोदृष्टांतः स्वप्नंजानानामीक्षितायथैवस्वप्नेहि
कदाचिद्बहून्देहान्प्रकल्प्यजीवस्तत्तदिंद्रियैः सर्वंपश्यति तद्वदीश्वरस्यतुविद्याशक्तित्वान्नबंधः ३९ श्रीवासुदेवजगन्नाथहरे

भा० इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेप्रथमोध्यायः १ द्वितीयेतुततस्थूलधारणातोजितंमनः सर्वसाक्षिणिसर्वेशेविष्णौधा २०
४ र्यमितीर्यते १ दृश्यालंबनरूपैवमुक्तावैराजधारणा इहोच्यतेतुसाध्यासर्वांतर्यामिधारणा २ तत्रतावत्पूर्वोक्तधारणायाअवांत
रफलमाह एवंयाधारणातयातुष्टाद्धरेःपुराब्रह्मयसमयेनष्टांस्मृतिस्मृतिःप्रत्यवरुध्यलब्ध्वायात्माएगिदंविश्वंयथासीत्तथाससर्ज
यसाथाप्तिबुद्धिर्यस्य अतएवमोघादृष्टिर्यस्येति अतस्तयाधारणयाविश्वसृष्टिसामर्थ्यंभवति १ उपासनाफलादपिविरक्तस्यश्रु
तमधारणायामधिकारः अतोवैराग्यार्थंसर्वकर्मफलंनिंदतिशाब्दंशब्दमयंब्रह्मवेदस्तस्यएषपंथाकर्मफलबोधनप्रकारःकोसौअर्थ

इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेमहापुरुषसंस्थानुवर्णनंनामप्रथमोध्यायः १ श्रीशुकउवाच एवंपुराधारणया
त्मयोनिर्नष्टांस्मृतिंप्रत्यवरुध्यतुष्टात् तथाससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः १ शाब्दस्यहिब्रह्मणएषपं
थायन्नामभिर्ध्यायतिधीरपार्थैः परिभ्रमंस्तत्रनविंदतेर्थान्मायामयेवासनयाशयानः २ अतः कविर्नामसुयावदर्थःस्या
दप्रमत्तोव्यवसायबुद्धिः सिद्धेन्यथार्थेनयतेतभूयःपरिभ्रमंतत्रसमीक्षमाणः ३ सत्यांक्षितौकिंकशिपोःप्रयासैःबा
हौस्वसिद्धेह्युपबर्हणैःकिं सत्यंजलौकिंपुरुधान्नपात्र्यादिग्वल्कलादौसतिकिंदुकूलैः ४ श्रीरामजयरामजयजयराम श्रीः

अन्यैरेवस्वर्गादिभिर्नामभिःसाधकस्यधीर्ध्यायतितत्तदिष्टांकरोतीतियतअपार्थत्वमेवाहतत्रमायामयेपथिसुखमितिवासनयाश
यानःस्वप्नान्यत् यतइवपरिभ्रमन् अर्थान्नविंदति तत्तल्लोकंप्राप्नोपिनिरवंधसुखंनलभतइत्यर्थः २ तर्हिसर्वथाकर्मफलत्यागे श्रीः
सद्यएवदेहपातस्यादित्याशंक्याह अतःकविर्नाममात्रेषुभोगेषुयावतार्थेनदेहनिर्वाहोयस्यतथाभूतस्यात् अप्रमत्तःतावन्मात्रेपिनासक्तः
व्यवसायबुद्धिर्नेदंसुखमितिनिश्चयवानतदापितत्रतस्मिन्नर्थेअन्यथेवसिद्धेसतितत्रयत्नेपरिभ्रमनपश्यन्नयतेत ३ अन्यथासिद्धिमाहद्वाभ्यां ४
सत्यामितिकशिपोःशय्ययास्वतःसिद्धेवाहौसति उपबर्हणेरुच्छीर्षकैःपुरुधाबहुप्रकारयाअन्नपात्र्याभोजनपात्रेण ४ वासुदेव

149/1981

ननुदिक्सद्भावोनाम नग्नत्वमेववल्कलमन्नंतोयंवासंस्थानंचप्रयत्नंविनाकथंप्राप्यतइतिचेत्तत्राह चीराणिवस्त्रखंडानिपरान्
बिभ्रतिपुष्णंतिफलादिभिर्येगुहागिरिदर्यः ननुकदाचिदेषामलाभेकिंकार्यंतत्राह अजितोहरिःउपपन्नान्किंनावतिनरक्षतिकिंशब्द
स्यपूर्वत्रापिसंबंधःधनेनयोदुर्मदस्तेनोधान् ५ तदानेनकिंकर्तव्यंहरिस्तस्सेव्यइत्याह एवंविरक्तःसन्तंभजेतभजनीयत्वेहेतवःस्वचि
त्तेस्वतएवसिद्धः यतआत्माअतएवप्रियःप्रियस्यचसेवासुखरूपैव अर्थःसत्यः नत्वानात्मवन्मिथ्याभगवानभजनीयगुणश्च अनंतः
नित्यःयएवंभूतस्तंभजेत नियतार्थःनिश्चयःस्वरूपःतदनुभावानंदेननिवृत्तयःसन्निति स्वतःसुखात्मकंदर्शितंकिंचियत्रयस्मिन्भजने

चीराणिकिंपथिनसंतिदिशंतिभिक्षांनैवांघ्रिपाःपरभृतःसरितोप्यशुष्यन् रुद्धागुहाकिमजितोवतिनोपपन्नान्कस्माद्भजंतिक
वयोधनदुर्मदांधान् ५ एवंस्वचित्तेस्वतएवसिद्धआत्माप्रियोर्थोभगवाननंतः तन्निर्वृतोनियतार्थोभजेतसंसारहेतूपरमश्च
यत्र ६ कस्तांमनादृत्यपरानुचिंतामृतेपशूनसतींनामयुंजात् पश्यंजनंपतितंवैतरण्यांस्वकर्मजान्परितापान्जुषाणं ७
केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रंपुरुषंवसंतं चतुर्भुजंकंजरथांगशंखगदाधरंधारणयास्मरंति ८ श्रीकृष्णवासु०

सतिसंसारहेतोरविद्यायाउपरमोनाशोभवति ६ एतदेवान्यचिंतानिंदयाद्रढयति कइतितांतथाभूतांपरस्यहरेरनुचिंतांधारणाम
नादृत्यपशून्कर्मजडान्विनायथापशुरेवंसदेवानामितिश्रुतेः असतींविषयचिंतांकोनामकुर्यात् तच्चिंतयावैतरण्यांपतितं
तत्रस्वकर्मजान् अध्यात्मिकादिक्लेशान्सेवमानंपश्यन् वैतरणीयमद्वारस्थनदीतत्तुल्यत्वात्संसृतिर्वैतरणी ७ तामेव
धारणांसविशेषामाह केचिदितिषड्भिःस्वदेहस्यांतर्मध्येयत्हृदयंतत्रयोवकाशस्तस्मिन्वसंतंप्रादेशमात्रं तर्जन्यंगुष्ठयो
र्विस्तारःसएवमात्राप्रमाणंयस्येति हृदयप्रमाणंतत्रोपचर्यतेकंजंपद्मंरथांगंचक्रं ८ वासुदेव नारायण गोविंद मुकुंद माधव

भा० ५

नलिनंपद्मंतद्वत् प्रसन्नेअयतेदीर्घेअक्षीणियस्यकदंबकुसुमस्यकिंजल्कः केसरः तद्वत्पिशंगेपीतेवाससीयस्यलसंतिमहारत्ना १६०
नियेषुयेषुतानिसुवर्णमयानिअंगदानियस्यस्फुरंतिचतानिमहारत्नानिचतन्मयानिकिरीटकुंडलानियस्य ९ उन्निद्रंविकसितंयत्हृत्पंक
जंतस्यकर्णिकैवआलयंस्थानंतस्मिन्योगेश्वरैरास्थापितौपादपल्लवौयस्यआम्लानालक्ष्मीः शोभायस्याः तयावनमालयाचिताभं १०
स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमानेआननेयोहासस्तेनपेशलंसुंदरं ११ अदीनंउदारंयल्लीलाहसितं तेनयदीक्षणंतस्मिनउल्लसंतौ
१५ श्रीवत्सलक्ष्मचिह्नंतद्युक्तयाभादिविहितोभक्तेर्योयोनप्रत्ययः कौस्तुभरत्नंकंधरायांयस्य ५२

प्रसन्नवक्त्रंनलिनायतेक्षणंकदंबकिंजल्कपिशंगवाससं लसन्महारत्नहिरण्मयांगदंस्फुरन्महारत्नकिरीटकुंडलं ९ उन्निद्र
हृत्पंकजकर्णिकालयेयोगेश्वरास्थापितपादपल्लवं श्रीलक्ष्मणंकौस्तुभरत्नकंधरंअम्लानलक्ष्म्यावनमालयाचितं १०
विभूषितंमेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ११ अदी
नलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ईक्षेतचिंतामयमेवमीश्वरंयावन्मनोधारणयावतिष्ठते १२ एकैक
शोंगानिधियानुभावयेत्पादादियावद्धसितंगदाभृतः जितंजितंस्थानमपोह्यधारयेत्परंपरंशुध्यतिधीर्यथायथा १३ याव
न्नजायेतपरावरेस्मिन्विश्वेश्वरेद्रष्टरिभक्तियोगः तावत्स्थवीयः पुरुषस्यरूपंक्रियावसानेप्रयतः स्मरेत १४ श्रीगोपाल

येभ्रूभंगाः भ्रूविक्षेपास्तैः संसूचितोभूरिरनुग्रहोयेनचिंतामयंचिंतयाआविर्भवंतं १२ अस्यैवध्यानमाह एकैकशइतिअनुभावयेत श्रीः
यद्यज्जितंअयत्नतः स्फुरितंपादगुल्फादिस्थानंअवयवस्तदपोह्यत्यक्त्वापरंपरंजंघाजान्वादिधारयेत् शुध्यतितस्मिन्निश्चलाभवति ५
पूर्वोक्तवैराजधारणायाएतत्पूरणांगत्वमाहयावदिति परेब्रह्मादयोअवरेयस्मात्कुतः विश्वेश्वरेद्रष्टरिनतुदृश्येचैतन्यघनतया इक्तियोगः
प्रेमलक्षणः क्रियावसानेअवश्यकर्मानुष्ठानानंतरं अनेनकर्मापिभक्तियोगपर्यंतमेवेत्युक्तं १४ श्रीमाधवगोविंदश्रीः

151
1981

एवंतावदासन्नमृत्योः पुंसः कृत्यमुक्तंइदानींतस्यैवंस्वपरंदेहंत्यक्तुमिच्छतः कृत्यमाहस्थिरमिति सार्धैश्चतुर्भिः अगहेराजन् एवंभू
तोयतिर्यदा इमंलोकंदेहंजिहासुर्हातुमिच्छति तदादेशेपुण्यक्षेत्रेकालेचउत्तरायणादौमनोनसज्जयेत् संगंनप्रापयेत्नदेशकालौयो
नः सिद्धहेतू किंतुयोगएवेतिदृढनिश्चयोभूत्वास्थिरंसुखकरंचासनमास्थितः सन्प्राणंनियच्छेदित्यर्थः १५ एतांबुद्धिंक्षेत्रज्ञेबुध्यादिद्रष्ट
रिनिनयेत् प्रविलापयेत् तंचक्षेत्रज्ञं आत्मनि शुद्धेतंचशुद्धमात्मानंआत्मैवाहंआत्मनिशुद्धेतंचशुद्धमात्मानंआत्मैवाहंआत्मनिब्रह्मणि
अवरुध्य एकीकृत्यलब्धोपशांतिः प्राप्तनिर्वृतिः सन्कृत्यात्विरमेत् ततः परंप्राप्याभावात् १६ तदेवाह यत्रात्मस्वरूपेकालोनप्रभुः कि

स्थिरंसुखंचासनमास्थितोयतिर्यदाजिहासुरिममंगलोकं कालेचदेशेचमनोनसज्जयेत्प्राणंनियच्छेन्मनसाजितासुः १५ मनः
स्वबुध्यामलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमात्मनि आत्मानमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्यात् १६ नयत्र
कालोनिमिषांपरः प्रभुः कुतोनुदेवाजगतांयईशिरे नयत्रसत्त्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानं १७ परंपदंवैष्णव
मामनंतितन्नेतिनेतीत्यतदुत्सिसृक्षवः विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यार्हपदंपदेपदे १८

मपिकर्तुंनशक्तः समर्थः अतएवदेवानप्रभवइत्याह अनिमिषांदेवानांपरः प्रभुः कालोपियत्रनप्रभुः तत्रकुतोदेवाः प्रभवाः स्युः
देवनियम्यानांतुजगतांकातत्रवार्त्तेत्याह जगतामिति कुतोनप्रभवंतीत्यपेक्षायांनिरुपाधित्वादित्याह नयत्रेति यद्वाजगत्का
रणान्यपिनयत्रसृष्ट्यादौप्रभवंतीत्याह नयत्रेति विकारोअहंकारः १७ निरुपाधित्वंकुतइत्यतआह परमिति यदात्मा
दन्यआत्मव्यतिरिक्तंनेतिनेतीत्येवमुत्स्रष्टुमिच्छवोदौरात्म्यंदेहाद्यात्मत्वं विसृज्य अर्हस्यपूज्यस्यश्रीविष्णोः पदंपदेपदेक्षणे
क्षणेहृदोपगुह्यआश्लिष्यनान्यस्मिन्सौहृदंयेषांतथाभूताः संतः तदेवंवैष्णवंपदंअतएवपरंसर्वतः श्रेष्ठमामनंतीत्यन्वयः १८

तस्मादित्थं ब्रह्मत्वेनव्यवस्थितोमुनिरुपरमेत् तुशब्देनयदिप्रयास्यन्निति वक्ष्यमाणात्पक्षाद्विशेषस्तमाह विज्ञा
यतेति विज्ञानं शास्त्रं तेनजाताद्दृक् ज्ञानं तस्यवीर्यं बलेन तेनसुरंधिताः विहिंसिताः आशयाविषयवासनायस्यसः इदानीं तस्य
देहस्यत्यागप्रकारमाह स्वपार्ष्णिमूलेन गुदं मूलाधारं अपीड्य निरुध्य अनिलं प्राणं उन्नमेत् उर्ध्वं नयेत् जितः क्रमोयेन षट्
सुस्थानेषु नाभ्यादिषु १९ नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य उरसि कंठाद्धोदेशे स्थिते विशुद्धचक्रे
मनस्वीजितचित्तः स्वतालुमूलं तस्यैवचक्रस्याग्रदेशं ततोबहुधागमनसंभवाच्छनैरित्युक्तं २० तस्माद्भ्रुवोरंतरं आज्ञा
चक्रं निरुद्धानि श्रोत्रेनेत्रेनासिके मुखं चेत्येवं सप्तअस्वयतनानि प्राणमार्गा येनसः अनपेक्षश्चेत्परं ब्रह्मगतः सन् मूर्धन् मूर्द्धनि

इत्थंमुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः स्वपार्ष्णिनापीड्यगुदं ततोनिलं स्थानेषु षट्सून्नमयेज्जित
क्रमः १९ नाभ्यांस्थितं हृद्यधिरोप्यतस्मादुदानगत्योरसि तंनयेन्मुनिः ततोनुसंधायधियामनस्वीस्वतालुमूलंशनकैर्नये
त २० तस्माद्भ्रुवोरंतरमुन्नयेतनिरुद्धसप्तायतनोनपेक्षः स्थित्वामुहूर्तार्धमकुंठदृष्टिर्निर्भिद्यमूर्धन्विसृजेत्परंगतः २१
यदिप्रयास्यन्नृपपारमेष्ठ्यं वैहायसानामुतयद्विहारं अष्टाधिपत्यंगुणसंनिवायेसहैवगच्छेन्मनसेंद्रियैश्च २२ योगे
श्वराणांगतिमाहुरंतर्बहिस्त्रिलोक्याःपवनांतरात्मनां नकर्मभिस्तांगतिमाप्नुवंति विद्यातपोयोगसमाधिभाजां २३

ब्रह्मरंध्रं निर्भिद्यदेहमिंद्रियाणिचविसृजेत् २१ यदितुपारमेष्ठ्यंपदंप्रयास्यन्भवति वैहायसानां खेचराणां सिद्धानांयद्विहा
रं क्रीडास्थानं कीदृशं अष्टाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन्तदपिप्रयास्यन् तत् गुणसंनिवायेगुणसमुदाये ब्रह्मांडसर्व
त्रेत्यर्थः तर्हिदेहत्यागावसरे मनश्चेंद्रियाणि च नत्यजेत् किंतुतैः सहैवनल्लोकभोगार्थंगच्छेत् २२ यतः कर्मगतिपरिच्छिन्नेत्याह
योगेश्वराणां त्रैलोक्या अंतश्चबहिश्चमहर्लोकादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः अत्रहेतुः पवनस्यांतः आत्मालिंगशरीरं येषां
इति विद्याउपासना तपोभगवद्धर्मः योगोअष्टांगः समाधिर्ज्ञानं तान्येभजंतितेषांयागतिस्तां २३ माधवगोविंदनारायण

153
1981

तृतीयेविष्णुभक्तेस्तुवैशिष्ट्यं श्रृणवतोमतः भक्त्युद्रेकेनतत्कर्तृश्रवणादरईर्यते १ इदानीं अन्यदेवताभजनस्यापिपुत्रादिभज
नवदेवतुच्छफलेनहेयत्वं वक्तुं पूर्वोक्तमनुवदति ममेति मांकदाचिद्दैवयोगेनमनुष्यत्वं प्राप्तेषुजीवेषुयेमनीषिणः तेषांतत्रापियेम्रि
यमाणाः तेषांविशेषेणतत्एवमेतद्धरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः १ ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं इंद्रियपाटवकामस्त्विं

श्रीशुकउवाच एवमेतन्निगदितंपृष्टवान्यद्भवान्मम नृणांयन्म्रियमाणानांमनुष्येषुमनीषिणां १ ब्रह्मवर्चसकाम
स्तुयजतेब्रह्मणस्पतिं इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन् २ देवींमायांतुश्रीकामोतेजस्कामोविभावसुं वसुका
मोवसून्रुद्रान्वीर्यकामस्तुवीर्यवान् ३ अन्नाद्यकामस्त्वदितिंस्वर्गकामोदितेःसुतान् विश्वान्देवान्राज्यकामःसाध्या
न्संसाधकोविशां ४ आयुःकामोश्विनौदेवौपुष्टिकामइलांयजेत् प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ ५ रूपाभिकामोगंधर्वा
न्स्त्रीकामोप्सरउर्वशीं अधिपत्यकामःसर्वेषांयजतेपरमेष्ठिनं ६ यज्ञंयजेद्यशःकामःकोशकामःप्रचेतसं विद्याकामस्तुगिरिशं
दांपत्यार्थमुमासतीं ७

इंद्रं प्रजापतीन्दक्षादीन् २ मायांदुर्गां विभावसुंअग्निं वसुकामः धनार्थी वीर्यंप्रभावः तत्कामोवीर्यवान्सन्रुद्रान्यजेत् ३ अन्नाद्यंभोज्यंभक्ष्यं
च अदितेःसुतान् द्वादशादित्यान् विशांदेशस्थप्रजानांस्वाधीनतामिच्छन्साध्यान्यजेत् ४ इलांपृथ्वीं प्रतिष्ठांस्थानादप्रच्युतिं रोदसीद्यावापृथि
वी ५ अप्सरश्चासौउर्वशीचतां परमेष्ठिनं ६ यज्ञंयज्ञोपाधिंयज्ञमूर्तिंविष्णुं कोशोवसुसंचयः वसुकामइत्यत्रभेदः दांपत्यमन्योन्यप्रीतिस्तदर्थायस्य ७

भा० टी०
६

धर्मार्थः धर्मकामः उत्तमश्लोकोधिपोविष्णुं तन्तून्तन्वन्संतानवृद्धिमन्विच्छन् रक्षाबाधानिवृत्तिः पुण्यजनान्यक्षान् ओजो
बलंतत्कामोमरुद्गणान् ८ देवान्राज्यंराजत्वंतत्कामोमनून्मन्वंतरपालान् राज्ञःकर्मराज्यंतत्कामोदेवान्विश्वान्देवानितिविशेषः
अभिचरन्शत्रुमरणमिच्छन् निर्ऋतिंराक्षसंकामकामः भोगेच्छुः अकामोवैराग्यकामःपुरुषंपरं प्रकृतिव्यतिरेकोपाधिकमीश्वरं ९ अका
मः एकांतभक्तःउक्तानुक्तसर्वकामोवापुरुषंपूर्णंनिरुपाधिं १० पूर्वोक्तनानादेवतायजनस्यापिसंयोगद्वारकत्वेनभक्तियोगफलत्वमाह

धर्मार्थउत्तमश्लोकंतन्तुंतन्वंपितॄन्यजेत् रक्षाकामःपुण्यजनान्ओजस्कामोमरुद्गणान् ८ राज्यकामोमनून्देवान्
निर्ऋतिंत्वभिचरन्यजेत् कामकामोयजेत्सोमम्सकामःपुरुषंपरं ९ अकामःसर्वकामोवामोक्षकामउदारधीः तीव्रेणभ
क्तियोगेनयजेतपुरुषंपरं १० एतावानेवयजतामिहनिश्श्रेयसोदयः भगवत्यचलोभावोयद्भागवतसंगतः ११ ज्ञानंय
दाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसादउतयत्रगुणेष्वसंगः कैवल्यसंमतपथस्त्वथभक्तियोगःकोनिर्वृतोहरिकथासुरतिंनकु
र्यात् १२

एतावानिति इदानीमपियजतांइहतद्यजनेभागवतानांसंयोगतोभगवत्यचलोभावोभक्तिर्भवतीति एतावानेवनिश्श्रेयसस्यपरमपुरुषस्यार्थ
स्योदयःलाभःअन्यत्तुसर्वंतुच्छमित्यर्थः ११ भागवतसंगतइत्यनेनसूचितांहरिकथारतिंस्तौति यत्यासुकथासुज्ञानंभवतिकीदृशं आसर्वतः
प्रतिनिवृत्तंअनुवृत्तंगुणाभीर्णांरागादीनांचक्रंसमूहोयस्मात् तदेवनूनमात्मप्रसादश्च अनंतरंयत्रयासुमनःप्रसादहेतुःगुणेषुविषयेष्वसंगोवैरा
ग्यंउभयत्रेतिपाठेइहअमुत्रचगुणेष्वसंगःकैवल्यमित्येवसंमतःपंथायोभक्तियोगःश्रवणात्सुखेनअन्यत्रानिर्वृतोरतिर्वा तासुहरिकथासुकोरतिंन
कुर्यात् १२

श्री:
६

155/1981

तामाह वैश्वानरमित्यभिः विहायसाआकाशेनतत्रचब्रह्मपथेनगतः सन्प्रथमंवैश्वानरंअग्न्यभिमानिनींदेवतांयाति केनोपाये
न सुषुम्नयानाड्यासाचदेहाद्बहिरपिविनतास्तीत्याह शोचिषाज्योतिर्मयाविधूतःत्यक्तःकल्कोमलोयेनसःक्वाप्यसज्जमानइत्यर्थःउर
स्ताउपरिष्टाद्वर्तमानंहरेःसंबंधितारान्रूपंनारायणाधिष्ठितमित्यर्थः शैशुमारंचक्रंपंचमस्कंधेवक्ष्यमाणंशिशुमाराश्रयंज्योतिश्चक्रं
चक्रस्थानिआदित्यवीतानिपदानिप्रयातीत्यर्थः २४ तद्विश्वोश्वकंविश्वस्यनाभिंसूर्याद्याश्रयभूतंअविष्टलिंगत्वात्नाभिशब्दस्य
नपुंसकत्वंअंतर्वर्त्यअतिक्रम्यपरतःस्वर्गिण्यांगत्यभावादेकएवनिर्मलेनलिंगशरीरेण ब्रह्मविदांस्थानंअन्येर्नमस्कृतंमहर्लोकमुपैति
यद्यस्मिन्विबुधामहाकल्पायुषोभृग्वादयः २५ अथोअनंतरंकल्पांतेविश्वंत्रैलोक्यंअतिशयेनदह्यमानंनिरीक्ष्यतत्रायुष्प्रा

वैश्वानरंयातिविहायसागतःसुषुम्नयाब्रह्मपथेनशोचिषा विधूतकल्कोथहरेरुदस्तात्प्रयातिचक्रंनृपशैशुमारं २४
तद्विश्वनाभिंत्वतिवर्त्यविष्णोरणीयसाविरजेनात्मनैकः नमस्कृतंब्रह्मविदामुपैतिकल्पायुषोयद्विबुधारमंते २५ अथोअनं
तस्यमुखानलेनदंदह्यमानंसनिरीक्ष्यविश्वं निर्यातिसिद्धेश्वरजुष्टधिष्ण्यंयद्द्वैपरार्ध्यंतदुपारमेष्ठ्यं २६ नयत्रशोकोन
जरानमृत्युर्नार्तिर्नचोद्वेगऋतेकुतश्चित् यच्चित्ततोदःकृपयानिदंविदांदुरंतदुःखप्रभवानुदर्शनात् २७

षः यद्द्विपरार्धस्थायितत्पारमेष्ठ्यंपदंप्रतिनिर्याति सिद्धेश्वरैर्जुष्टानिधिष्ण्यानिविमानानियस्मिन्तत् उद्गतिश्रेष्ठ्यंसूचितं २६ तदेवाह न
यत्रेति आर्तिदुःखंउद्वेगोभयंकिंतुचित्ततोहेतोअदोयत्दुःखं अदःऋतेनदेकंविनातत्कुतोभवति अनिदंविदां इदंभगवतोध्यानम
जानतांप्राणिनांदुरंतदुःखानांयःप्रभवोजन्मतस्यानुदर्शनात्तेषांकृपया यद्वाचित्ततोदःमनःपीडेतियत्तत्तत्विनाकुतश्चिदपियत्रशो
कादयोनसंतीति तत्रब्रह्मलोकंगतानांत्रिविधागतिः येपुण्योत्कर्षेणगताःतेकल्पांतरेपुण्यतारतम्येनाधिकारिताभवंति येतुहिरण्य
गर्भाद्युपासनाबलेनगतास्तेब्रह्मणासहमुच्यंते येतुभगवदुपासकाःतेस्वेच्छयाब्रह्मांडंभित्वावैष्णवंपदमारोहंति २७ वासुदेव

भा० तत्रप्रसक्तस्य भगवद्भक्तस्य ब्रह्मांडभेदनप्रकारमाह ततइत्यादिना तत्रेयंप्रक्रिया ईश्वराधिष्ठाच्याः प्रकृतेः के द्वि०
७ नचिदंशेन महत्तत्वंभवति तस्यांशेनाहंकारः तस्यांशेनाशब्दतन्मात्रद्वारानभः तस्यांशेनस्पर्शतन्मात्रद्वारावायुः तस्यां
शेनरूपतन्मात्रद्वारातेजः तस्यांशेनरसतन्मात्रद्वाराआपः तदंशेनगंधतन्मात्रद्वारापृथ्वीगोलः स्वमिलितैश्चतुर्दशभुवना
त्मकं विराट्शरीरं तस्यचपंचाशत्कोटिविशालभित्तिके अवश्च अबादीनां येपरिणताः अंशाः तान्येवोत्तरोत्तरदशगुणानिआ
वरणानि अष्टमंतु प्रकृत्यावरणंव्यापकमेव तदेवंस्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते ततोविशेषंप्रतिपद्यलिंगदे

ततोविशेषंप्रतिपद्यनिर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ज्योतिर्मयोवायुमुपेत्यकालेवाय्वात्मनाखंबृहदा
त्मलिंगं २८ घ्राणेनगंधंरसनेनवैरसंरूपंतुदृष्ट्याश्वसनंत्वचैव श्रोत्रेणचोपेत्यनभोगुणत्वंप्राणेनचाकूतिमुपैतियोगी २९

देनपृथिव्याप्रतांप्राप्येत्यर्थः एवमुत्तरत्रापिद्रष्टव्यं निर्भयः कथंयास्यामीतिशंकाशून्यः तेनात्मनापृथिवीरूपेण तन्निरंतरा श्रीः
आपः प्रतिपद्य अत्वरन् त्वरामकुर्वन् तनदात्मत्वेक्लेशदेहादिशंकाभावात्प्रयेष्टंभोगान् भुंजानइत्यर्थः एवंज्योतिर्मयः सन् कालेभो
गावसाने बृहदात्मनोलिंगंपरमात्मस्फूर्तित्वेनोपासनेप्रकं यद्वाशब्दात्मनातस्यप्रमापकमिति २८ इंद्रियार्थानांभूतसूक्ष्माणा ७
मितिक्रममाह घ्राणेनाधिष्ठितेनगंधमुपेत्यश्वसनंस्पर्शनंनभोगुणत्वंशब्दतांप्राणेनतत्कर्मेंद्रियेणआकूतिंतत्तत्क्रियां २९

157/1981

तदेवंस्थूलसूक्ष्मभूतानिक्रममुत्क्रम्यतदावरणभूताहंकारप्राप्त्यामहदादिप्राप्तिमाह सयोगीविकार्यंसंसाद्यविज्ञानतत्वंयातिवि
विधंकार्यमस्येतिविकार्योहंकारः सत्रिविधः तामसोराजसः सात्विकइति तत्रतामसाज्जडानिभूतसूक्ष्माणिआयंते राजसाद्ब
हिर्मुखानिदशेंद्रियाणि सात्विकाच्चमनइंद्रियदेवाश्च तेषांलयश्चतत्तदहंकारे तत्रभूतसूक्ष्माणांइंद्रियाणांचसन्निकर्षंलयस्थानंता
मसंराजसंचमनोमयंदेवमयंचसात्विकंप्राप्यगत्वाएवंगमनेनतेनाहंकारेणसहविज्ञानतत्वंयाति तत्रगुणानांसंनिरोधोलयो
यस्मिन् तत्प्रधानंयाति ३० तेनात्मनाप्रधानरूपेणानंदमयः सन् उपाधीनामवसानेशांतमविकृतमानंदंपरमात्मानमुपैति नवि

संभूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयंदेवमयंविकार्यं संसाद्यगत्यासहतेनयातिविज्ञानतत्वंगुणसंनिरोधं ३० तेना
त्मनात्मानमुपैतिशांतमानंदमानंदमयोवसाने एतांगतिंभागवतींगतोयः सवैपुनर्नेहविषज्जतेंग ३१ एतेसृ
तीतेनृपवेदगीते त्वयाभिपृष्टेचसनातनेच येवैपुराब्रह्मणआहपृष्ट आराधितोभगवान्वासुदेवः ३२ वासुदेव

षज्जतइत्यर्थः सृतीमार्गौप्रकाराविल्यर्थः हेनृपअनपेक्षोनिर्भिद्यमूर्द्धंविसृजेत्परंगतइतियासद्योमुक्तिः सैकासृतिः यदिप्रया
पास्यन् इत्यादिनाक्रममुक्तिः सृतिश्चयाति एतेश्रुतीवेदनगीतेउक्ते ननुस्वोत्प्रेक्षितेतत्र यदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः
अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइतिसद्योमुक्तिः तेर्चिषमभिसंभवंतीत्यादिनाक्रममुक्तिश्चवेदेनोक्ता यद्वानकर्मभिस्तांग
तिमाप्नुवंतीतिदक्षिणमार्गस्यापिसृतत्वात् एतेसृतीतिद्विवचनंत्वयाभिपृष्टेयष्टोतव्यमित्यादिप्रश्नेनार्थान्मुक्तिविषयेइअपि
सृतीपृष्टेब्रूहि यद्वाविपर्ययमितिचदक्षिणमार्गोप्यर्थात्पृष्टः एवंत्वयाचयेपृष्टेते एतेसृतीइत्यन्वयः ३२ श्रीगोपालगोविंदहरे

संतिसंसरतः पुंसो बहवोमोक्षमार्गाः तपोयोगादयः समीचीनस्त्वयमेवेत्याह नहीतिपतोनुष्ठिताद्भक्तियोगोभवेत् अतो
न्यः शिवः सुखस्वरूपोनिर्विघ्नश्चनास्त्येव ३३ कुतएतदाह भगवान्ब्रह्माकूटस्थः निर्विकारः एकाग्रचित्तः सन्नित्यर्थः त्रीन्वा
रान्कार्त्स्न्येनसाकल्येनब्रह्मवेदंअन्वीक्ष्यविचार्यअतआत्मनिहरौरतिर्भवेत् तदेवमनीषयाअध्यवस्यन्निश्चितवान् ३४ नन्वनु
भूतेर्थेरतिअननुभूतेभगवतिकथंरतिस्यात्तत्राहभगवानलक्षितः दृष्टः कथंस्वात्मनाक्षेत्रज्ञांतर्यामितयाकैर्दृश्यैर्बुध्यादिभिः तदे

नह्यतोन्यः शिवः पंथाविशतः संसृताविह वासुदेवेभगवतिभक्तियोगोयतोभवेत् ३३ भगवान्ब्रह्मकार्त्स्न्येनत्रिरन्वी
क्ष्यमनीषया तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ३४ भगवान्सर्वभूतेषुलक्षितस्वात्मनाहरिः दृश्यैर्बुध्यादि
भिर्द्रष्टालक्षणैरनुमायकैः ३५ तस्मात्सर्वात्मनाराजन्हरिः सर्वत्रसर्वदा श्रोतव्यः कीर्तितव्यश्चस्मर्तव्योभगवान्नृणां ३६
पिबंतियेभगवतआत्मनः सतांकथामृतंश्रवणपुटेषुसंभृतं पुनंतितेविषयदूषिताशयंव्रजंतितच्चरणसरोरुहांति
कं ३७ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेपुरुषसंस्थानुवर्णनंनामद्वितीयोध्यायः २

वद्बुध्यादर्शयति दृश्यानांजडानांदर्शनंस्वप्रकाशंद्रष्टारंविनानघटतइत्यनुपपत्तिमुखेनलक्षणैः स्वप्रकांतर्यामिलक्षकैः तथाबु
ध्यादीनिकर्तृप्रयोज्यानिकरणत्वाद्दास्यादिवदितिव्याप्तिमुखेनानुमापकैः स्वतंत्रश्चकर्तृत्वेनेवमीश्वरसिद्धिः ३५ यस्मादेवंतस्मात्श्रो
तव्यमित्यादिस्कंधार्थमुपसंहरतितस्मादिति ३६ श्रवणादिफलमभिनयन्नाहपिबंतीति सतांआत्मनः आत्मनेस्वप्रकाशमानस्यकथैवामृतंविषयैर्दूषितंमलिनी
कृतंआशयंपुनंतिशोधयंतितस्यचरणपर्यांतिकंश्रीविष्णुपदंव्रजंति ३७ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधटीकायांद्वितीयोध्यायः २

159
1981

अभिव्याहृतंउक्तंकविंशाब्दब्रह्मनिष्णातं १३ श्रवणेच्छायांहेतुः हरिकथाएवउदर्कः उत्तरफलंयासुताः कथाः सतांभागवतानांसदसिस
भायांस्युः १४ एतत्प्रपंचयतिसवाइतिद्वाभ्यांकृष्णपूजादिरूपांक्रीडांयः स्वीकृतवान् १५ उरुगायस्यगुणैरुदाराः महत्यः कथास्युः २६ किं
चयथैवक्षीयमाणायुर्हरिकथयासफलीकुर्वत्याशयेनाह आयुरितित्रिभिः असोसूर्यः उद्यन् उदयन् अस्तंअदर्शनंचयन्गच्छन् यत्येनस
णोनीतः तस्यआयुः ऋतेवर्जयित्वावृथैवहरति १७ ननुजीवनमेवतेषांआयुषः फलमस्तितत्राह तरवइति ननुतेषांश्वासोनास्ति तर्हिभस्त्राः

शौनकउवाच इत्यभिव्याहृतंराजानिशम्यभरतर्षभः किमन्यत्पृष्टवान्भूयोवैयासिकिमृषिंकविं एतच्छुश्रूषतांविद्वन्सूत
नोर्हसिभाषितुं कथाहरिकथोदर्काः सतांस्युःसदसिध्रुवं १४ सवैभागवतोराजापांडवेयोमहारथः बालक्रीडनकैः क्रीडन्कृष्ण
क्रीडांयआददे १५ वैयासिकिश्चभगवान्वासुदेवपरायणः उरुगायगुणोदाराः सतांस्युर्हिसमागमे १६ आयुर्हरतिवैपुं
सांमुद्यंनस्तंचयन्नसौ तस्यर्तेयत्क्षणोनीतः उत्तमश्लोकवार्तया १७ तरवः किंनजीवंतिभस्त्राः किंनश्वसंत्युत नखादंतिनमेहं
तिकिंग्रामपशवोपरे १८ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः नयत्कर्णपथोपेतोजातुनामगदाग्रजः १९ बिलेबतोरुक्रमवि
क्रमान्येनश्रृण्वतः कर्णपुटेनरस्य जिह्वासतीदार्दुरिकेवसूत नचोपगायत्युरुगायगाथाः २० वासुदेवनारायणमाधवगोविंद

चर्मकोशाः ननुतासामहादिकंनास्तितत्राह ननखादंतिनाश्नंतिनमेहंतिरेतः सेकंमैथुनंकुर्वंति किंतुतअपिनराकारंपशुंमत्वाहअपरेइति १८
तदेवाह श्वादिभिः संस्तुतः सदृशोनिरूपितः यस्यकर्णपंथंकदाचिदपिनगतः सः श्वभिः अवज्ञास्यदत्वात् श्वभिः करमलविषयासक्तत्वात् विड्वराहैर्ग्रा
मसूकरैः कंटकवदुःखदविषयासक्तत्वात् उष्ट्रैर्भारवाहत्वात्खरैस्तुल्यइत्यर्थः १९ तस्यांगानिचनिष्फलानीत्याह बिलेतिपंचभिः बेतखेदेनश्रृण्व
तोअश्रृण्वतः नरस्ययेकर्णपुटेतेबिलेवृथारंध्रेनचेउपगायतितस्यजिह्वाअसतीउष्ट्रादर्दुरीभेकस्तदीयाजिह्वेवं २० श्रीकृष्णमाधवगोपाल

पट्टवस्त्रोष्णीषेणकिरीटेननचजुष्टमपिशिरोयदिशिरोयद्दिननमेतर्हिकेवलभारएव शवोमृतकः तत्करतुल्यौलसंतिकांचन
कंकणानियथयोस्तौअथर्थेवाशवः २१ येनयनेविष्णोःमूर्त्तीःस्वरूपाणिननिरीक्षतेतेबर्हापितेमयूरपिच्छनेत्रतुल्येद्रुमवजन्मभ
जतश्तितथारक्षमूलतुल्याविसर्थः २२ नाभिलभेत् अभितोअस्पृशेत् श्रीविष्णुपदलग्नायाःतुलस्याः नवेदेतिअवघ्रायनाभि
नंदंतीत्यर्थः २३ अश्मवत्सारोबलंकाठिण्यंयस्यविक्रियालक्षणं अथेतिगात्ररुहेषुरोमसुहर्षउद्गमः २४ यस्मात्भक्तस्यसर्वमेतद्य

भारःपरंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदं शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा २१ बर्हायिते
तेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ २२ जीवन्शवो
भागवतांघ्रिरेणुंनजातुमर्त्योभिलभेतयस्तु श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसन्शवोयस्तुनवेदगंधं २३ तदश्मसा
रंहृदयंबतेदंयद्गृह्यमाणैर्हरिनामधेयैः नविक्रियेताथयदाविकारोनेत्रेजलंगात्ररुहेषुहर्षः २४ अथाभिधेह्यंगमनोनु
कूलंप्रभाषसेभागवतप्रधानः यदाहवैयासिकिरात्मविद्याविशारदोनृपतिंसाधुपृष्टः २५ इतिश्रीभागवतेमहापुराणेद्वितीय
स्कंधेतृतीयोध्यायः ३ सूतउवाच वैयासिकेरितिवचस्तत्वनिश्चयमात्मनः उपधार्यमतिंकृष्णेऔत्तरेयःसतींव्यधात् १

र्थमनसोनुकूलंचप्रियंब्रूषेअथकृतःसाधुपृष्टःसन् वैयासिकिःनृपतिंप्रतियदाहतदभिधेहीति २५ इतिश्रीभागवतेद्वितीयेतृतीयः३

चतुर्थेपरीक्षिताप्रष्टंसृष्ट्यादिहरिचेष्टितं शुकेनब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते १ राज्ञःप्रश्नंकथयितुंतस्यभक्तिनीस्थितिमाह चतुर्भिर्वै
यासिकेःशुकस्यइत्येवंभूतंआत्मनस्तत्वस्यनिश्चयोयस्मात् तद्वचःउपधार्यआकलय्यसतींकृष्णएवसेव्योनान्यइत्येवंभूतं॥ १ वासुदेव

161
1981

आत्मादिहःपशवोगजाद्यः २ इयमेवार्थंहरिलीलालक्षणं ३ संस्थांमृत्युंत्रैवर्गिकंधर्मार्थकामप्रधानंसन्यस्यत्यक्त्वाआत्मभा
वंपरमप्रेमास्पदं भगवदात्मतत्वंगतःप्राप्तःसन्पप्रच्छ ४ मत्स्यंममतमोज्ञानंनश्यतितवकथयतःसतः ५ अतःसमीचीनं ५
अतःसमीचीनंपुनश्चवेदितुमिच्छाभिद्दंदुर्विभाव्यंअवितर्क्यंयथासृजति ६ गोपायतिपालयतिसंयच्छतेसंहरते पुरुशक्तिःबहुशक्ति

आत्मजायासुतागारपशुद्रविणबंधुषु राज्येचाविकलेनित्यंविरूढांममतांजहौ २ पप्रच्छचेममेवार्थंयन्मांपृच्छथसत्त
माः कृष्णानुभावश्रवणेश्रद्दधानोमहामनाः ३ संस्थांविज्ञायसन्यस्यकर्मत्रैवर्गिकंचयत् वासुदेवेभगवतिआत्मभावंदृ
ढंगतः ४ राजोवाच समीचीनंवचोब्रह्मन्सर्वज्ञस्यतवानघ तमोविशीर्यतेमह्यंहरेःकथयतःकथां ५ भूयएवविवित्सामि
भगवानात्ममायया यथेदंसृजतेविश्वंदुर्विभाव्यमधीश्वरैः ६ यथागोपायतिविभुर्यथासंयच्छतेपुनः यांयांशक्तिमुपाश्रि
त्यपुरुशक्तिःपरःपुमान् ७ आत्मानंक्रीडयन्क्रीडन्करोतिविकरोतिच ७ नूनंभगवतोब्रह्मन्हरेरद्भुतकर्मणः दुर्विभाव्यमिवा
भातिकविभिश्चापिचेष्टितं ८ यथागुणांस्तुप्रकृतेर्युगपत्क्रमशोपिवा बिभर्तिभूरिशःस्वेकःकुर्वन्कर्माणिजन्मभिः ९
विचिकित्सितमेतन्मेब्रवीतुभगवान्यथा शाब्देब्रह्मणिनिष्णातःपरस्मिन्भगवान्खलु १० वासुदेव नारायण श्रीः

मान्क्रीडन्यथाकरोतिआत्मानंब्रह्मादिरूपिणंक्रीडयन्विकरोतिविविधंकरोति ७८ एकःपुरुषरूपेणयुगपज्जन्मभिःब्रह्मादयावता
क्रमशोवायथाप्रकृतेर्गुणान्गृह्णाति ९ विचिकित्सितंसंदिग्धंशाब्देब्रह्मणिविचारेणनिष्णातःपरस्मिन्ननुभवेन १० श्रीगोपाल०

उपामंत्रितः प्रार्थितः प्रार्थितः प्रचक्रमे देवतागुरुनमस्कारादिरूपमनुक्रमं मंगलं कृतवानित्यर्थः ११ तदेवाह त्रयोदशभिः परस्मै सर्वो
त्तमाय तत्रहेतुः भूयसे अपरिमितमहिम्ने तद्दर्शयन्निसतः प्रपंचस्य उद्भवादिसुनिमित्तभूतायलीलातयागृहीतं ब्रह्मादिरूपेणरजसा
आदिशक्तित्रयंयेनतस्मै अंतर्भावाय अंतर्यामिरूपिणे अतएव सर्वांतरत्वादनुपलक्ष्यं वर्त्मयस्यसः १२ विविधफलदातृत्वमनुस्मरन्
प्रणमति भूयः पुनश्चनमः सतां धर्मवर्तिनां वृजिनच्छिदे दुःखहंत्रे असतां धर्मशीलानामसंभवाय अनुद्भवहेतवे अखिलसत्वमूर्त

सूतउवाच इत्युपामंत्रितोराजा गुणानुकथने हरेः हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ११ श्रीशुकउवाच
नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने १२
भूयोनमः सद्वृजिनच्छिदेसतामसंभवायाखिलसत्वमूर्तये पुंसां पुनः पारमहंस्यआश्रमे व्यवस्थितानामनुमृग्यदाशुषे
१३ नमोनमस्तेस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेनराधसा स्वधामनि ब्रह्मणि रंस्यते नमः १४

येतत्तद्देवतादिरूपेण तत्फलदायेत्यर्थः समग्रसत्वमूर्तये इतिवा पूर्वोक्तोभयफलवैलक्षण्यमाह पारमहंस्ये प्रत्यक्‌निष्ठरूपे आश्र
मे व्यवस्थितानां पुंसां अनुमृग्यं अतन्निरसनेन पुनः पुनः मृग्यं यदात्मतत्वं तस्यदाशुषे दात्रे १३ सात्वतां भक्तानां ऋषभाय पाल
काय कुयोगिनां भक्तिहीनानां विदूराकाष्ठा दीर्घापि यस्य दुर्ज्ञेयायेत्यर्थः तदेवं वैषम्यप्रतीतावपि निर्दोषत्वायाचिंत्यमैश्वर्यमाह नि
रस्तंसाम्यं अतिशयश्च यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्तितेनराधसा ऐश्वर्येण स्वधामनि स्वरूपे ब्रह्मणि रममाणाय १४ श्रीः

श्रीः
११

163
1981

सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति यत्कीर्तनमितिद्वाभ्यां अर्हणं पूजनं सुभद्रं मंगलंश्रवो यशोयस्यतस्मै १५
विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजनात् अंतरात्मनो मनसः उभयत्रेहचपरत्रच संगंव्युदस्य गतक्ल
माः प्रयासरहिताः १६ भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमति तपस्विनइति मनस्विनो योगिनः सुमंगलाः सदाचाराः
यस्मिन्नुपआर्पणं विनासुभद्रश्रवसे नैवदूत्तस्य प्रवृत्तिः यशसः श्रवणादेः प्राधान्यज्ञापनायेति १७ भक्तेः परमशुद्धहेतुत्वंदर्शयन्ना

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमोनमः १५ विच
क्षणायच्चरणोपसादनात्संगं व्युदस्योभयतोंतरात्मनः विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमोनमः १६ तप
स्विनोदानपरायशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षेमं न विंदंति विनायदर्पणं तस्मै सुभद्रश्रवसे नमोनमः १७ किरातहूणा
न्ध्रपुलिंदपुल्कशा आभीरकंकायवनाः खसादयः येन्येचपापायदपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः १८ सएषआ
त्मात्मवतामधीश्वरस्त्रयीमयोधर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १९ श्रियः प
तिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतांगतिः २०

ह किरातादयो येपापजातयः अन्येचयेकर्मतः पापरूपाः यदपाश्रयाः भागवताः तदाश्रयाः संतः शुध्यंति असंभावनाशंकां
परिहरति प्रभविष्णवे प्रभवनशीलायेति १८ सर्वोपास्यमनुस्मरन् प्रार्थयते सएष आत्मवतां धीराणां आत्मा आत्मत्वेनोपास्य इ
त्यर्थः त्रयीमयत्वादिविशेषणैः तत्तन्मार्गेणोपास्यत्वं विवक्षितं गतव्यलीकैः निष्कपटैर्भक्तैर्वितर्क्यं अत्याश्चर्येण विलक्षणीयंलिं
गं मूर्तिर्यस्य सप्रसीदतु १९ उच्चावचसर्वपालकत्वमनुस्मरन्नाह श्रियइति गतिश्चसर्वापत्सुरक्षकः २० माधवगोविंदकृष्ण

ज्ञानप्रदत्वमनुस्मरन्नाह द्वाभ्यां यस्याङ्घ्रेरनुध्यानमेव समाधिः तेन च धौतया शोधितया धिया यथारुचं रुच्यनुसारेण सगुणादिभेदैः
यद्वा तत्त्वं प्रतिभाय यथामतीत्यर्थः २१ किंच पुरा कल्पादौ अजस्य हृदि सती स्मृतिं सृष्टिविषयां स्मृतिं वितन्वता येन पुरा प्रचोदिता सती स
रस्वती तस्य मुखतः किल प्रादुर्भूता स्वानि लक्षणानि शिक्षायुक्तानि यस्याः सा ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः २२ इदानीं स्व
वाचं श्रोतृजनाह्लादिनीं शृंगारादिकरुणादिशोभितां प्रार्थयते भूतैरितिसमे वचांसि अलंकृषीष्ट अलंकरोतु अन्यस्य वचसामन्येन
अलंकारासंभवमाशंक्य तस्यान्तर्यामित्वमाविष्करोति यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पूर्षु अन्तर्यामितया शेते वसति

यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वमात्मनः वदन्ति चैतत्कवयो यथारुचं स मे मुकुन्दो भगवान्प्रसीदतां
२१ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसी
दतां २२ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः भुंक्ते गुणान्षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवा
न्वचांसि मे २३ नमस्तस्मै भगवते वासुदेवाय वेधसे पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवं २४ एतदेवात्मभू राजन्नारदाय
विपृच्छते वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः २५ इति श्रीभागवते महापुराणे द्वितीयस्कंधे चतुर्थोऽध्यायः ४ वासुदेव

अत्र पुरुषसमाख्यां प्रमाणयति यद्यस्मात्पुरुष इति अतएव चयः एकादशेन्द्रियपंचमहाभूतरूपान्षोडशगुणान् कलाः भुंक्ते प्रकाशय
ति पालयतीति वा तदा त्वात्मनेपदमार्षं अत्र हेतुः यतः षोडशानामात्मा चेतयिता स्वार्थिकः न त्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् २३ श्रीः
श्रीव्यासं नमस्करोतीति नमः इति सौम्याः भक्ताः यस्य मुखाम्बुरुहे आसवो मकरंदः २४ इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति ए १२
तदिति गुप्तदिति समयएव वेदगर्भो यस्य साक्षाद्धरिर्यदाह २५ इति श्रीभागवते महापुराणे द्वितीयस्कंधे टीकायां चतुर्थोऽध्यायः ४

165
1381

पंचमे नारदेनाथ पृष्टः सृष्ट्यादि वक्त्यजः हरेर्लीलां विराट्सृष्टिं कालकर्मादिशक्तितः १ नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं
तत्र नारदप्रश्नमाह देवदेवेति भूतभावन अतएव सर्वेषां पूर्वज अनादे ज्ञायते नेनेति ज्ञानं तत्साधनं यत्तद्विजानीहि विशेषण ज्ञापय इत्य
र्थः कथंभूतं आत्मतत्त्वं नितरां दृश्यते येन तत् १ उपलक्षणभूतं विश्वमेवात्मज्ञानसाधनं अतएव तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्य
ते यदधिष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन्लीयते यत्परं यदधीनं यच्चेति यदात्मकं स्वतः सत्कारणतो वेत्यर्थः तस्य तत्त्वं यथा
तथ्यं तत्त्वतो वेद २ न जानामीति न च वक्तव्यमित्याह सर्वमिति भूतं जातं भव्यं जनिष्यमाणं भवज्जायमानं तेषां प्रभुर्नियंता अतो वि

श्रीनारद उवाच देवदेव नमस्तेऽस्तु भूतभावन पूर्वज तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपं यदधिष्ठानं यतः सृष्ट
मिदं प्रभो यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः २ सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं
तव ३ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः एकः सृजसि भूतानि भूतैरेवात्ममायया ४ आत्मन्भावयसे तानि न पराभवयन्स्वयं
आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ५ नाहं वेद परं ह्यस्मिन्नापरं न समं विभो नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ६

विशिष्टेन ज्ञानेनावसितं निश्चितं ३ आस्तामिदं आदौ तावत्त्वमेव कथयेत्याह यत इति विज्ञानं यस्य कस्त्वं विज्ञानद इत्यर्थः यदाधारः क
स्तवदाश्रयः यत्परः यदधीनः यदात्मकः यत्स्वरूपः मम तु त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिः तवतपश्चरणेन तु परं शंकया पृच्छामीत्याह
सा द्वैश्चतुर्भिः एकः असहायः ४ आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्राप्नुवन् अक्लमः श्रमरहितः यथोर्णनाभिरात्मन एव शक्तिम
वष्टभ्य सृजति तद्वत् ५ तस्मादहं तु अस्मिन्विश्वस्मिन् परं उत्तमं अपरं अधमं समं मध्यमं च तत्रापि नामरूपमनुष्यादिरूपं द्विपदत्वादिगुणः
शुक्लादिभिर्भाव्यं साध्यं तत्रापि सदसत्स्थूलसूक्ष्मं च किंचिदप्यन्यतो न वेद किंतु त्वत्त एव सर्वं भवतीति मन्ये ६ श्रीगोपालकृष्ण

भा० द्वि०
१२

सतथाविधोपिभगवान्तपोआचारदितियत्तेननोअस्मान्खेदयसेमोहयसियतः पराशंकांईश्वरांतरशंकांप्रयछसि
७ यथैवाहंत्वयानुशासितः शिक्षितः सन्बुध्येबुध्येयंतथापिविशेषणज्ञापय १८ प्रश्नमभिनंदति हेवत्सहेपुत्रतवेदंविचिकि
त्सितंसंदेहः तत्पूर्वकः प्रश्नोयंसम्यगित्यर्थः यतः कारुणिकस्यतवायंप्रश्नः अत्रहेतुः यद्यतः परमधर्मभगवद्वीर्यप्रकाशने
प्रवर्तितोस्मि अतस्त्वंजिज्ञासुरपिमयिकृपामेवकृतवानित्यर्थः ९ ननु त्वमेवभगवान् इत्युक्तंमया एकः सृजतिभूतानीत्यादिना
सत्यं यथामामीश्वरत्वेनप्रभाषसे तदपितवभाषणंनात्यंतमनृतंइत्याह यतः कारणात् एतावत्प्रभावस्यभावः वनावत्वं

सभावनाचरद्घोरंयत्तपः सुसमाहितः तेनखेदयसेनस्त्वंपराशंकांप्रयछसि ७ एतन्मेपृच्छतः सर्वंसर्वज्ञसक
लेश्वर विजानीहियथाचेदमहंबुध्येनुशासितः ८ ब्रह्मोवाच सम्यक्कारुणिकस्येदंवत्सतेविचिकित्सितं यद
हंनोदितः सौम्यभगवद्वीर्यदर्शने ९ नानृतंतव तच्चापियथामांप्रब्रवीषिभो अविज्ञायपरंमत्तएतावत्त्वंय
तोहिमे १० येनस्वरोचिषाविश्वंरोचितंरोचयाम्यहं यथार्कोग्निर्यथासोमोयथार्क्षग्रहतारकाः ११ नम
स्तस्मैभगवतेवासुदेवायधीमहि यन्मायया दुर्जयया मांब्रुवंतिजगद्गुरुं १२

मेस्तिकिंतुमत्तः परमीश्वरमविज्ञायब्रूषेअतः सादृश्यात्तवेयंभ्रांतिः नतुबुद्धिपूर्वमनृतमित्यर्थः यतईश्वरान्ममएतावत्त्वंतमवि
ज्ञायेतिवान्वयः १० तर्हिकोसावीश्वरइत्यपेक्षायांभक्त्यानमस्कुर्वन्नेवतंकथयतित्रिभिः येनस्वप्रकाशेनरोचितंप्रकाशितमेवप्र
काशयामिसृष्ट्याभिव्यक्तंकरोमि यथार्कादयश्चैतन्यप्रकाश्यमेवप्रकाशयंतितथाचश्रुतिः नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्यु
तोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंभातीति ११ तस्मान्नमोधीमहिध्यायेम यस्यमाययाविमोहिताः संतोयुष्मदा
दयोमांजगद्गुरुंजगत्कर्तारंवदंति १२ श्रीः

श्रीः
१२

167/1981

यन्मायायेतिमायासंबंधोक्तेतस्यापिदुर्जयत्वोक्तेश्चतस्यापिकिमपिसंसारः नैवेत्याह मत्कपटनसोजानातीतियस्यदृष्टिप
थेस्थातुं विलज्जमानयेवतस्मिन्स्वकार्यमकुर्वंत्याअमुयामाययाविमोहिताः अस्मदादयोदुर्धियः अविद्यावृतज्ञानाएवकेवलं
विकत्थंतेश्लाघंतेअनेनयद्रूपमित्यस्यप्रश्नोत्तरमुक्तंभवति १२ तदेवस्वस्मादन्यंपरमेश्वरंनिरूप्यदानींयदधिष्ठानमित्यादिनप्रश्नेव
श्नानांसएवाधिष्ठानादिकंसर्वंइत्युत्तरंवक्तुंतद्व्यतिरेकेणान्यस्यासत्वमाह द्रव्यमिति द्रव्यंमहाभूतानिउपादानरूपाणिकर्मजन्मनि
मित्तंकालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवोभोक्तावासुदेवात्परोअन्योर्थोनास्तिकारणाव्यतिरेकात्कार्यस्य १४ तत्पप

विलज्जमानयायस्यस्थातुमीक्षापथेमुया विमोहिताविकत्थंतेममाहमितिदुर्धियः १३ द्रव्यंकर्मचकालश्चस्वभावोजीवए
वच वासुदेवात्परोब्रह्मन्नचान्योर्थोस्तितत्वतः १४ नारायणपरावेदादेवानारायणांगजाः नारायणपरालोकानाराय
णपरामखाः १५ नारायणपरायोगाः नारायणपरंतपः नारायणपरंज्ञानंनारायणपरागतिः १६ तस्यापिद्रष्टुरीश
स्यकूटस्थस्याखिलात्मनः सृज्यंसृजामिसृष्टोहमीक्षयैवाभिनोदितः १७ सत्वंरजस्तमइतिनिर्गुणस्यगुणास्त्रयः स्थितिस
र्गनिरोधेषुगृहीतामाययाविभोः १८

चयतिद्वाभ्यांनारायणः परंकारणंयेषांतेअनेनैवशास्त्रयोनित्वप्रतिपादनेनैववेदाः प्रमाणंसर्वज्ञत्वादिकंचोक्तंदेवाश्चतदंगाज्जाताः
अतोनव्यतिरिक्ताः लोकाः स्वर्गादयः तदानंदांशाः मखाः तत्साधनभूताः १५ योगाः प्राणायामादयः तपस्तत्साध्यंचित्तैकाग्र्यंज्ञानंत
त्साध्यंगतिस्तत्फलं अनेनैवसर्वंतदधीनमित्युक्तं १६ तर्हिकिंकरोषीत्यपेक्षायामाह तस्यसृज्यमपि तेनसृष्टोहंसृजामि ईक्षयाकटाक्षेणत
त्रहेतवः द्रष्टुरित्यादयः १७ ननुकुतोयंजीवेश्वरविभागः यत्त्वंप्रेर्यः सचप्रेरकः स्यादित्यपेक्षायांजीवेश्वरविभागहेतुमाहत्रिभिः सत्वमितिनिर्गु
णस्यापीश्वरस्येतेत्रयोगुणाः बभूवुरित्युत्तरेणान्वयः कथंभूताः तेनैवस्वाश्रयेणस्थित्याद्यर्थंमाययागृहीताः १८ वासुदेव

वस्तुतः सर्वदामुक्तमपिमायिनंमायाविषयंजीवंपुरुषंबध्नंति कार्यमधिभूतं कारणमध्यात्मं कर्त्ता देवं तेषां भावस्तत्त्वंतस्मिन्द्रव्यं
महाभूतानिज्ञानशब्देनदेवताः क्रियाइंद्रियाणितदाश्रयाः तेषां कारणभूताः तत्तदभिमानेनबध्नंति १९ अतः सएवबध्यमानः ए
भिर्लिंगैर्गुणैर्जीवानामावरणकैरुपाधिभिः सुष्ठुअलक्षितागतिस्तत्त्वंयस्यसः स्वैभक्तैरेवलक्षितागतिर्यस्येतिवा २० तस्यसृष्टि
प्रकारमाह कालमिति कर्मजीवादृष्टं विबुभूषुः विविधंभवितुमिच्छन् २१ गुणानांव्यतिकरः क्षोभः साम्यत्यागः स्वभावतोपरिणामो
रूपांतरापत्तिः पुरुषः ईश्वरः तेनाधिष्ठितत्वंत्रयाणांविशेषणंमहतः महत्तत्त्वस्य २२ विकुर्वाणात् विक्रियमाणात् तस्यचक्रियाज्ञा

कार्यकारणकर्तृत्वेद्रव्यज्ञानक्रियाश्रयाः बध्नंतिनित्यदामुक्तं मायिनंपुरुषंगुणाः १९ सएषभगवांल्लिंगैस्त्रिभिरेभि
रधोक्षजः स्वलक्षितगतिर्ब्रह्मन्सर्वेषांममचेश्वरः २० कालंकर्मस्वभावंच मायेशोमाययास्वया आत्मन्यदृच्छयाप्राप्तं वि
बुभूषुरुपाददे २१ कालाद्गुणव्यतिकरः परिणामः स्वभावतः कर्मणोजन्ममहतः पुरुषाधिष्ठितादभूत् २२ महतस्तुविकु
र्वाणाद्रजःसत्त्वोपबृंहितात् तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २३ सोऽहंकारइतिप्रोक्तोविकुर्वन्समभूत्त्रिधा वैकारि
कस्तैजसश्चतामसश्चेतियद्भिदा २४ द्रव्यशक्तिःक्रियाशक्तिर्ज्ञानशक्तिरितिप्रभो तामसादपिभूतादेर्विकुर्वाणादभून्नभः २५

नशक्तित्वात् त्रिगुणेपिरजःसत्त्वाभ्यामुपबृंहितात् अहंकारस्यचावरकत्वात्तमःप्रधानत्वं २३ अतएवाहंकार्येषुतामसमाकाशादिकंव
ऽुराजसं सात्विकंचान्यंएवंतदुपाधिषुजीवेष्वपितथैवतामसाधिक्यं सचा विकुर्वन् रूपांतरंगच्छन्त्रैविध्यमेवाह वैकारिकः सात्वि
कोतैजसोराजसः यद्भिदायस्यभेदः २४ द्रव्यशक्तिरित्यादीनिप्रातिलोम्येनत्रयाणांलक्षणानि द्रव्येमहाभूतास्वेशक्तिर्यस्य १४
क्रियास्वइंद्रियेषुशक्तिर्यस्य ज्ञानेषुदेवेषुशक्तिर्यस्य हेप्रभोबोद्धुंशक्तः भूतादेरितितामसस्यविशेषणं २५ वासुदेव गोपाल

169
1981

ननुतामसात्प्रथमंशब्दे भवतीतिप्रसिद्धंसत्यंसतुतस्यनभसोमात्राप्रसूक्ष्मंरूपंगुणश्च असाधारणः व्यावर्तकोधर्मः शब्दद्वारानभउत्प
द्यतेइतिएवमेवशब्दस्पर्शादिष्वपिद्रष्टव्यंशब्दस्यलक्षणंलिंगमितिकुड्याद्यंतरितेनकेनचिदुच्चैर्गजोगजइत्युक्तेयोगजद्रष्टायश्चतेनदृश्य
गजः तयोर्लिंगंबोधकंलिंगविशेषणत्वाच्चशब्दस्यघंटत्वंपरस्यनभसः कारणत्वंनान्वयात्स्वांश्चवायुः २५ तस्यैवलक्षणं प्राणोदेहधार
णंओजः सहोबलानिइंद्रियंमनः शरीराणांपाटवानितेषांहेतुरित्यर्थः २६ स्वतोरूपवत्तेजः वायुनभसोः कारणभूतयोरन्वयात्स्पर्शशब्दव

तस्यमात्रागुणः शब्दोलिंगंयद्द्रष्टृदृश्ययोः नभसस्तुविकुर्वाणादभूत्स्पर्शगुणोनिलः २५ परान्वयाच्छब्दवांश्चप्राणःओजःसहोब
लं २६ वायोरपिविकुर्वाणात्कालकर्मस्वभावतः उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् २७ तेजसस्तुविकुर्वाणादासीदंभोरसात्मकं
रूपवत्स्पर्शवच्चांभोघोषवच्चपरान्वयात् २८ विशेषस्तुविकुर्वाणादंभसोगंधवानभूत् परान्वयाद्रसस्पर्शशब्दरूपगुणान्वि
तः २९ वैकारिकान्मनोजज्ञेदेवावैकारिकादश दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ३० तैजसात्तुविकुर्वाणादिंद्रियाणि
दशाभवन् ज्ञानशक्तिःक्रियाशक्तिर्बुद्धिःप्राणस्तुतैजसः॥ श्रोत्रंत्वक्घ्राणदृक्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ३१

च्च २७ एवमंभसश्चपृथिव्याश्चपरान्वयाधिक्यात्गुणाधिक्यंघोषः शब्दविशेषः २८ पृथिवीमनःशब्देनैवतदधिष्ठानाच्चंद्रोपिद्रष्टव्यः
२९ अन्येनदशदेवाः वैकारिकाः सात्विकाहंकारकार्याः तानाह दिशश्चवातश्चअर्कश्चप्रचेताश्चअश्विनौचएतेपंचश्रोत्रत्वक्चक्षु
जिह्वाघ्राणानामधिष्ठातारः वह्निश्चेंद्रश्चोपेंद्रश्चमित्रश्चकश्चप्रजापतिः एतेपंचवाक्पाणिपादपायूपस्थानांअधि
ष्ठातारः ३० यतोज्ञानशक्तिःबुद्धिः क्रियाशक्तिः प्राणश्चतैजसाहंकारकार्यौअतोज्ञानक्रियाविशेषरूपाणिंद्रियाण्यपितैजसाद
भवन्नित्यर्थः तान्याह श्रोत्रमिति दोःपाणिमेंढ्रमुपस्थः क्रमस्त्वप्रनविवक्षितः ३१ श्रीगोविंद नारायण वासुदेव गोपालकृष्ण

भा० एवंकारणसृष्टिमुक्त्वा कार्यसृष्टिमाह यदाएतेअसंगताः अमीलिताआसन् अतएवयदा आयतनस्य शरीरस्यनिर्माणेनशेकुः ३२ द्वि०
सदसत्वंप्रधानगुणभावमुपादायस्वीकृत्यउभयंसमष्टिव्यष्ट्यात्मकंशरीरं ३३ कालकर्मस्वभावानधिष्ठायस्थितोजीवयन्नजीवः
१५ परमात्माअजीवमचेतनंअजीवन्नूचेतयतिस्म ३४ निर्भिद्यपृथक्कृत्यस्थितइत्यर्थः ३५ तदवयवैर्लोकरचनामाहयस्येतिकटिप्रति
ऊरुमूलयोःपश्चाद्भागःजघनंपुरोभागःअधोधःसप्तलोकान्अतलादीन्ऊर्ध्वंभूरादीन्सप्त ३६ वर्णानांतत्रउत्पत्तिंवर्णयतिपु

यदैतेसंगताभावाभूतेंद्रियमनोगुणाः यदायतननिर्माणेनशेकुर्ब्रह्मवित्तम ३२ तदासंहत्यचान्योन्यंभगवच्छक्तिचोदि
ताः सदसत्वमुपादायचोभयंससृजुर्ह्यदः ३३ वर्षायुतसहस्रांतेतदंडमुदकेशयं कालकर्मस्वभावस्थोजीवोजीवम
जीवयत् ३४ सएवपुरुषस्तस्मादंडंनिर्भिद्यनिर्गतः सहस्रोर्वंघ्रिबाह्वक्षःसहस्राननशीर्षवा ३५ यस्येहावयवैर्लोकान्
कल्पयंतिमनीषिणः कट्यादिभिरधःसप्तसप्तोर्ध्वंजघनादिभिः ३६ पुरुषस्यमुखंब्रह्मक्षत्रमेतस्यबाहवः ऊर्वोर्वै
श्योभगवतः पद्भ्यांशूद्रोव्यजायत ३७ भूर्लोकः कल्पितः पद्भ्यांभुवर्लोकोस्यनाभितः हृदास्वर्लोकउरसामहर्लो
कोमहात्मनः ३८ ग्रीवायांजनलोकोस्यतपोलोकस्तनद्वयात् मूर्द्धभिसत्यलोकश्चब्रह्मलोकःसनातनः ३९

रुषस्येतिब्रह्मब्राह्मणाःमुखमितिकार्यकारणयोरभेदविवक्षयोक्तंबाहवइतिक्षत्रंक्षत्रियाः ३७ इदानीमुपासनार्थंलोककल्पनार्थंलो श्रीः
ककल्पनान्दर्शयनसप्तलोकपक्षमाहद्वाभ्यांभूर्लोकपातालमारभ्यपद्भ्यांकटिपर्यंताभ्यां ३८स्तनद्वयादितिद्विउपासनार्थत्वातऊर्ध्वाधोभा १५
वैवपरीत्यंनदोषः यद्वास्तनतःशब्दंकुर्वंश्यद्वाश्वद्वयंतस्मादित्यर्थः ब्रह्मलोकःवैकुंठाख्यःसनातननित्यःनतुसृज्यप्रपंचांतर्वर्तीत्यर्थः ३९

171
1981

इदानींचतुर्दशलोकपक्षंदर्शयति तत्रजघनादिभिः भूरादयः पूर्वोक्ताएवसप्तकट्यादिभिरधःसप्तलोकानात्मतलकट्यादि
भिरितिद्वाभ्यांशुद्धिहरिभक्तनिवासत्वात् ४१ त्रैलोक्यपक्षमाह भूर्लोकः पातालादिसहितः ४२ इतिद्वितीयेपंचमः ५ षष्ठेविरा
ड्विभूतिश्चप्रोक्ताध्यात्मादिभेदतः दृढीकृतंचपूर्वोक्तंसर्वंपुरुषंततस्ततः १ इदानींवैराजस्यविभूतिःसप्रपंचमनुवर्ण्यतेवाचांअस्म
दादिवागिंद्रियाणांतदधिष्ठातुर्वह्नेश्चतस्यमुखंक्षेत्रंउत्पत्तिस्थानंछंदसांगायत्र्यादीनांसप्तानांतस्यधातवःत्वगादयःक्षेत्रंहव्यंदेवा

तलकट्यामतलंक्लृप्तमुरुभ्यांवितलंविभोः जानुभ्यांसुतलंशुद्धंजंघाभ्यांतुतलातलं ४० महातलंचगुल्फाभ्यांप्रपदाभ्यांर
सातलं पातालंपादतलतः इतिलोकमयःपुमान् ४१ भूर्लोकः कल्पितःपद्भ्यांभुवर्लोकोस्यनाभितः स्वर्लोकःकल्पितोमू
र्द्ध्नाइतिवालोककल्पना ४२ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेपंचमोध्यायः ५ ब्रह्मोवाच वाचांवह्नेर्मुखंक्षेत्रं
छंदसांसप्तधातवः हव्यकव्यामृतान्नानांजिह्वासर्वरसस्यच १ सर्वासूनांचवायोश्चतन्नासेपरमायने अश्विनोरोष
धीनांचघ्राणोमोदप्रमोदयोः २ रूपाणांतेजसांचक्षुर्दिवःसूर्यस्यचाक्षिणी कर्णौदिशांचतीर्थानांश्रोत्रमाकाशश
ब्दयोः २ तद्गात्रंवस्तुसाराणांसौभाग्यस्यचभाजनं २

नामन्नंकव्यंपितृणाममृतंतदुभयशेषंमनुष्याणांतेषामन्नानांसर्वरसस्यमधुरादेःषड्विधस्यचकाराद्रसादिरसनेंद्रियस्यतदधिष्ठा
तुर्वरुणस्यापितस्यजिह्वाक्षेत्रंउत्पत्तिस्थानं १ एवंसर्वत्रानुक्तमुन्नेयंसर्वासूनामसूनांप्राणानांतस्यसेनासारंध्रेपरमायनेउत्तमक्षेत्रे
मोदप्रमोदयोश्चसामान्यविशेषगंधयोघ्राणेंद्रियंपरमायनं २ तेजसांरूपप्रकाशानांचक्षुरिंद्रियंअक्षणीनेत्रगोलकेसर्वत्रषष्ठ्यं
तानांप्रथमांतंक्षेत्रंद्रष्टव्यं कर्णौश्रोत्राधिष्ठानेश्रोत्रमिंद्रियंतस्यगात्रंशरीरंवस्तूनांयेसारांशास्तेषांभाजनंस्थानं २ राम

भा० अस्यत्वक्त्वस्पर्शस्यवायोश्चेत्यर्थः सर्वस्यमेधस्ययज्ञस्यउद्भिज्जजातीनांसर्ववृक्षाणांयैर्वृक्षैर्यज्ञः सम्यक्साधितः तेषामेववा ४ टी०
१६ केशामेघानांक्षेत्रं पूर्ववत्तथोक्तेश्मश्रूणिविद्युतांपादकरनखानि शिलालोहानामितिसादृश्याद्रूत्वं क्षेमकर्मणांपालककर्तृणा ५
विक्रमः पादन्यासो भूरादिलोकानामास्पदं आश्रयः भूरादिशब्दानामव्ययत्वात् षष्ठ्यालुक् क्षेमोलब्धरक्षणंशरणंभयाद्रक्षणंसर्वे
षांकामानांवस्यवरणस्यापिहरेरंघ्रिरास्पदं ६ अपांवीर्यस्यशुक्रस्यशिश्नोधिष्ठानंउपस्थस्त्विंद्रियंप्रजात्यानंदः संतानार्थः संभो

त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि रोमाण्युद्भिज्जजातीनांयैर्वायज्ञस्तुसंभृतः ४ केशश्मश्रुनखान्यस्यशि
लालोहाभ्रविद्युतां बाहवोलोकपालानांप्रायशः क्षेमकर्मणां ५ विक्रमोभूर्भुवःस्वश्चक्षेमस्यशरणस्यच सर्वका
मवरस्यापिहरेश्चरणआस्पदं ६ अपांवीर्यस्यसर्गस्यपर्जन्यस्यप्रजापतेः पुंसः शिश्नउपस्थस्तुप्रजात्यानंदनिर्वृतेः ७
पायुर्यमस्यमित्रस्यपरिमोक्षस्यनारद हिंसायानिरृतेर्मृत्योर्निरयस्यगुदंस्मृतः ८ पराभूतेरधर्मस्यतमसश्चापिपश्चि
मः नाड्योनदनदीनांतुगोत्राणामस्थिसंहतिः ९ अव्यक्तरससिंधूनांभूतानांनिधनस्यच उदरंविहितंपुंसोहृदयंमनसः
पदं १० धर्मस्यममतुभ्यंचकुमाराणांभवस्यच विज्ञानस्यचसत्वस्यपरस्यात्मापरायणं ११

गस्तेनिर्वृतिः तापहानिस्तस्याः ७ परिमोक्षस्यमलत्यागस्यपायुरिंद्रियंगुदस्थानंनिरृतेरलक्ष्म्याः ८ तमसोअज्ञानस्यपश्चिमः पृष्ठभा श्रीः
गः गोत्राणांगिरीणांअस्थिसंघातः ९ अव्यक्तंप्रधानंरसोअन्नादिसारः सिंधवः समुद्रास्तेषांनिधनस्यलयस्यउदरंपरंस्थानंविहि १६
तंज्ञानिभिमनसःअस्मदादिलिंगशरीरस्यतुभ्यंतवकुमाराणांसनकादीनांभवस्यश्रीरुद्रस्यआत्माचित्तंपरमायनं ११ श्रीराम्

173/1981

एवंतावत्परमेश्वराज्जातंविश्वंततोनिभिन्नं यथाकुंडलंसुवर्णान्नपृथक्सतुसर्वनियंतासर्वप्रकाशकोनित्यमुक्तइत्यर्थाउ
क्तं एतदेवपुरुषसूक्तार्थकथनेनदृढयति तत्रसहस्रशीर्षेत्यस्यईस्यैर्च्चे ब्राह्मणोस्यमुखमासीदित्यादिश्चऋतयस्यार्थः पूर्वाध्या
यएवदर्शितः पुरुषएवेदंसर्वमित्येतस्यार्थंदर्शयति अहंभवानितिसार्धैस्त्रिभिः तेअग्रजाइमेसनकादयः मरीच्यादयश्च १२
१३ जलंचस्थलंचनभश्चएतेषुओकांसिएषांतेनभोकसइतिसंधिरार्षः १४ सर्वपुरुषएवनततः पृथगित्यर्थः भपंचेनतस्यापरि
च्छेदंवक्तुंसभूमिमित्यस्यार्थमाहतेनपुरुषेणविश्वमितिभूमिपदस्यार्थः वितस्तिमितिदशांगुलपदस्यअधात्यतिष्ठदित्यस्यसचवित

अहंभवान्भवश्चैवतेइमेमुनयोग्रजाः सुरासुरनरानागागावोमृगसरीसृपाः १२ गंधर्वाप्सरसोयक्षारक्षोभूतग
णोरगाः पशवः पितरः सिद्धाविद्याध्राश्चारणाद्रुमाः १३ अन्येचविविधाजीवाजलस्थलनभोकसः ग्रहर्क्षकेतवस्तारास्तडि
तस्तनयित्नवः १४ सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत् तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति १५ स्वधिष्ण्यंप्रतपन्प्राणो
बहिश्चप्रतपत्यसौ १५ एवंविराजंप्रतपंस्तपत्यंतर्बहिःपुमान् सोमृतस्याभयस्येशोमर्त्यमन्नंयदत्यगात् १६

स्तिमधिकंव्याप्यअधितिष्ठति अधिक्यमात्रंविवक्षितंनप्रमाणंअनुपयोगादपरिच्छिन्नत्वाच्च १५ एतत्सदृष्टांतमाह असौप्राणःआ
दित्यः असौवावआदित्यः प्राणइतिश्रुतेः स्वधिष्ण्यंमंडलंप्रकाशयत् यथाबहिश्चप्रकाशयति १५ एवंविराड्देहंप्रकाशयन्ब्रह्मां
डमंतर्बहिश्चप्रकाशयतिनित्यमुक्तत्वंदर्शयितुंउतामृतत्वस्येत्यस्यार्थमाह सइतिअभयस्येतिमंत्रगतामृतपदव्याख्या अन्नेनेतिपदा
विभक्तिव्यत्ययेनव्याचष्टे मर्त्यंमरणधर्मकंअन्नंकर्मफलंयस्मादत्यागात्अतोनकेवलंसर्वात्मकः किंतुअमृतत्वस्यनिजानंदस्यापीश्वर
इत्यर्थः १६

नन्वप्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति प्रपंचात्मकस्याप्यमृतेशत्व
मित्येषमहिमा दुरत्ययः अपारः प्रपंचानभिभूतत्वादिति भावः मंत्रेण च एतावानस्य महिमा अतो ज्यायांश्च पूरुषः ततो ज्यायान् महत्तर इति वदता अय
मेवार्थ उक्तः तदेवमीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां तु भूतानां बंधमोक्षौ व्यवस्थयेति दर्शयन् पादोस्य भूतानीत्यस्यार्थमाह पादे
तिष्ठंत्यत्रेति स्थितयो भूरादिलोकाः ते पादा इव पादाः अंशा यस्य सः स्थितिपात् तस्य पादेषु अंशभूतेषु लोकेषु सर्वान् जीवान् विदुः मंत्रे तु
पादोस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इति एकवचनं सामान्याभिप्रायेणेति व्याख्यातं भव
ति तेषु फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह अमृतं स्वेस्य स्वसंबंधि त्रिपाद् नित्यसुखं दिवि ऊर्ध्वलोकेषु न त्रिलोक्या
मित्यर्थः तदेवं त्रिपात्त्वं दोक्तं त्रैविध्यं दर्शयन्नाह त्रयाणां लोकानां मूर्ध्नि महर्लोकस्तस्य मूर्द्धनि तदुपरि लोकाः तेषु यथाक्रमं अमृतादि

महिमैषः ततो ब्रह्मन् पुरुषस्य दुरत्ययः पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः १७ अमृतं क्षेममभयं त्रिमूर्ध्नोधायि मूर्द्धसु पादा
स्त्रयो बहिश्चासन् अप्रजानां च आश्रमाः १८ अंतस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः सृती विचक्रमे विष्वक् साशनानशने उभे १९

कं अध्यायि निहितं तत्र त्रैलोक्यां नश्वरमेव सुखं महर्लोकस्य क्रममुक्तिस्थानत्वेपि कल्पांते तत्रस्थानां स्थानत्यागान्नाविनाशिसुखं जन
लोकेत्वमृतं अविनाशिसुखं यावज्जीवं स्वस्थानापरित्यागात् किंतु महर्लोकवासिनां कल्पांते त्रिलोकदाहोष्मपीडितानां तदा तत्र गमना
त् क्षेमगमनमस्ति तपोलोके तस्याभावात् क्षेममेव वक्ष्यति हि त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लोकाज्जनं
भृग्वादयोर्दिताः इति सत्यलोके त्वभयं मोक्षः तन्मूर्त्यया सत्तेः एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्यस्यार्थमाह न प्रजायंते
पुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषां आश्रमाः त्रिलोक्या बहिरासन् १८ गृहमेधस्त्वंतः यस्माद् ब्रह्म द्व्रतः
ब्रह्मचर्यव्रतरहितः अयं चाधिकारिभेद एकस्यैवावस्थाभेदेन न त्वत्यंतभिन्नविषय इति दर्शयन् ततो विष्वङ् इत्यस्यार्थमाह विविधं सुष्ठु
अवतीति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चलति स्म कथं भूते सृती शासनानशने भोगापवर्गप्राप्तिसाधनभूते १९

175
1981

अत्र हेतुत्वेन पुनर्विशेषणं यद्यतः अविद्या कर्मरूपा विद्या च तत्साधनोपासनरूपान्या १९ तदेव विराड्वर्णितानां फलवैचित्र्यमुक्त्वा
तत्कारणेश्वरस्य तद्वैलक्षण्यं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह यस्मादंडं जज्ञे नत्र च भूतेंद्रियगुणात्मको विराडजनि स जातोत्य
रिच्यते सोरिरिच्यते ईश्वरः तत्र विश्वं विराड्देहं द्व्यमंडं च अत्यगात् अतिक्रांतवान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः २० नन्वेवं पुरुष एव
चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च वा पृथक् भावापत्तेः पुरुषाराधनं न तत्त्वात् नाभीभवनाभ्यं तस्माद्यज्ञसंभारान्साधनानि नापश्य
न् २१ तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैरेवं ते संभाराः संभृता इति चतुर्थेनान्वयः वनस्पतयो यूपाः देवयजनं यज्ञभूमिः

यद्यविद्या च विद्या च पुरुषस्तूभयाश्रयः १९ तस्मादंडं विराड्जज्ञे भूतेंद्रियगुणात्मकः तद्द्रव्यमत्यगाद्विश्वं गो
भिः सूर्य इवातपन् २० यदास्य नाभ्यान्नलिनादहमासं महात्मनः नाविदं यज्ञसंभारान् पुरुषावयवादृते २१
तेषु यज्ञेषु पशवः सवनस्पतयः कुशाः इदं च देवयजनं कालश्चोरुगुणान्वितः २२ वस्तून्योषधयः स्नेहा रसलो
हमृदो जलं ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम २३ नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च देवतानुक्रमः कल्पः
संकल्पस्तंत्रमेव च २४ गतयो मतयश्चैव प्रायश्चित्तं समर्पणं पुरुषावयवैरेते संभाराः संभृता मया २५

इदं चेति वचनाद्यज्ञार्हे स्थाने उपविष्टः कथयतीति गम्यते बहुगुणान्वितो वसंतादिकालः २२ वस्तूनि पात्रादीनि ओषधयो व्री
ह्यादयः स्नेहाः घृतादयः रसा मधुरादयः सुवर्णादीनि लोहानि मृदश्च चातुर्होत्रं होत्रादिकं कर्म २३ नामधेयानि ज्योतिष्टोमादि
निरूढादीनां सुकृत्वान्मंत्रा इति स्वाहाकारादयः देवतानामनुक्रम उद्देशः कल्पो बोधायनादिः कर्मपद्धतिग्रंथः अनेनाहं यक्ष्य इति
संकल्पः तंत्रमनुष्ठानप्रकारः २४ गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि कृतस्य भगवति समर्पणं २५ सुभं भवतु

भा० संभृताः संपादिताः संभाराः अर्थाः येन सोहं तेनैव यज्ञेनेक अनेन यज्ञेन यज्ञमयजं तेनेति मंत्रार्थः सूचितः २६ तेन देवा अ द्वि
१८ यजंतेत्यस्यार्थं सप्रपंचं दर्शयति ततइति द्वाभ्यां व्यक्तं इंद्रादिरूपेण अव्यक्तं स्वतः अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः २७
काले स्वस्वावसरे २८ यदधिष्ठानमित्यत्र तत्प्रश्नोत्तरमुपसंहरति नारायणइति आहितं अधिष्ठितं भगवत्तेहेतुः यः स्वतो गुणास
र्गादि गृहीताः मायया उरवो गुणा येन तस्मिन् २९ यत् परस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं सएष भगवान् सर्वेषां मम चेश्वरइति तदुपसं
रति सृजामीति पालनं तु स्वयमेव करोतीत्याह विश्वमिति पुरुषरूपेण त्रिशक्तिर्माया तां धारयतीति सः ३० यद्विदं विश्वं यदात्म

इति संभृतसंभारः पुरुषावयवैरहं तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं २६ ततस्ते भ्रातर इमे प्रजानां पतयो नव
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः २७ ततश्च मनवः काले ईजिरे ऋषयोपरे पितरो विबुधा दैत्याः मनुष्याः क्र
तुभिर्विभुं २८ नारायणे भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः सर्गादावगुणः स्वतः २९ सृजामि तन्नियुक्तो
हं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३० इति तेभिहितं तात यथेदमनुपृच्छसि नान्यद्भगव
तः किंचित् भाव्यं सदसदात्मकं ३१ न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः न मे हृषीकाणि पतंत्य
सत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ३२

कश्च त्वमेवादि सर्वप्रश्नानां साधारण्योत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन् न चान्योर्थोस्ति तत्त्वत इति पुरुष एवेदं सर्वमिति वि श्रीः
त्याच यद्दृढीकृतं तदुपसंहरति कार्यकारणात्मकं भाव्यं सृज्यं भगवतः सकाशादन्यत् पृथक् न भवतीत्यभिहितं ३१ यदुक्तं १८
एतावत्त्वं यतोहि मे तद्विज्ञापयामीश्वरं प्रब्रवीषीति तदुपपादयोपसंहरति न भारतीति यथास्मान्मे मया औ
त्कंठ्यं भक्त्युद्रेकः तद्युक्तेन हृदा हरिर्धृतः ध्यातः अंग हे नारद अतः मे वाङ्मनइंद्रियाणां वृत्तयः सत्यथाः न तु मृषा भावेन स
र्थः ३२

177
1981

अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां सोहं समाम्नायादिभिः सर्वोत्कृष्टोपि योगमाश्रित्यापि यतः आत्म
नो मम संभवो जन्म तमेव न ज्ञातवान् कुतोन्यस्य वार्ता एतच्च तृतीयस्कंधे पाद्मोद्भवे च वक्ष्यते ३३ तदा समीयुषां शरणागतानां
संसारनिवर्तकं मंगलावहं सुसेव्यं तस्य चरणं नतोस्मि ततो चिंत्यमहिमत्वेन ज्ञानवानस्मीति केमुतिकन्यायमाह योहीति
स्वमायाविस्तारं यः स्वयमपि न पर्यगान् परिशब्दो निषेधे एतावानिति न ज्ञातवानित्यर्थः अपरे कुतो जानीयुः तस्य चरणं
नतोस्मीति पूर्वेण संबंधः ननु सर्वज्ञः कथं न जानाति अंताभावादिति दृष्टांतेनाह यथा स्वस्यांतं नभो नाप्नोति तद्वत् न हि खपु
ष्पादर्शनं सार्वज्ञं विहंतीति भावः तथा च वक्ष्यति द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचयानुसारेण

सोहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसंभ
वः ३३ नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं यो ह्यात्ममायाविभवं स्वपर्यगात् यथा नभः स्वांतम
थापरे कुतः ३४ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं
विचक्ष्महे ३५ यस्यावतारकर्माणि गायंतोत्यस्मदादयः न यं विदंति तत्त्वेन तस्मै भगवते नमः ३६ सएष आद्यः पुरुषः क
ल्पे कल्पे सृजत्यजः आत्मन्येवात्मनात्मानं संयच्छति च पाति च ३७

इत्यादिश्रुतिश्च यो अस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि वा न वेदेति ३४ एतत्प्रपंचयति नाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य
ऋतां गतिं परावरस्वरूपं किं त्विदं प्रपंचरूपं तस्य मायया विनिर्मितं विचक्ष्महे विद्मः तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहित
बुद्धय इत्ययं तदज्ञाने प्रपंचज्ञाने च हेतुः ३५ ननु सर्वे पि तं वर्णयंतो दृश्यंते तत्राह यस्येति अवतारकर्माणि ३६ संक्षेपतो दर्शयति
सएष आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादि करोति आत्मात्मन्यात्मनात्मानमिति कर्ता अधिकरणं साधनं कर्म
च स्वयमेवेत्यर्थः पुरुषावतारः सृष्ट्यादीनि कर्माणीति संक्षेपतोक्तिः ३७ वासुदेव नारायण माधव गोपाल रामकृष्ण

भा० नयं विंदंतित त्वेनेत्युक्तं किं तत्वमित्यापेक्षायामाह ज्ञानं केवलं सत्यं तत्त्वं घटाकार वृत्तिज्ञानव्ये वच्छेदार्थं विशेषणानि द्वि०
१९ विशुद्धं विषयाकार शून्यं यतः प्रत्यक् सर्वांतरं अत एव सम्यक् संदेहादि रहितं अवस्थितं यतो निर्गुणं गुणकार्यं हि गुणाव्याति
कराच्चं चलं भवति यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चांचल्यादि दोषयुक्तं तथाप्यंतः करणवृत्तिदोषैः तथातथा
भवतीति व्यवच्छिद्यते एभिरेव विशेषणैः सत्यत्वमपि समर्थितं न च यद्विकारवत् तद् असत्यं दृष्टं न चास्य जन्मादयः षड्विका

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ३८ ऋ
षे विंदंति मुनयः प्रशांतात्मेंद्रियाशयाः यदा सदेवासत्तर्कैस्तिरोधीयत विप्लुतं ३९

राः संतीत्याह अनाद्यंतं जन्मनाशरहितं अत एव जन्मानंतरास्तित्व लक्षणोपि विकारो नास्ति वृद्धिविपरिणामापेक्षया श्रीः
श्च न संति यतः पूर्णं सर्वत्र हेतुः नित्यमद्वयं नित्यं सर्वदा तत्र द्वैत प्रतीति समयेपि परमार्थतो द्वयमिति ३८ अत्र विद्वदनुभवं प्र १९
माणयति हे ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्न देहेंद्रिय मनसो यदा भवंति तदा विंदंति अन्यदा तद् ज्ञाने कारणमाह
यदा तु सदेवं प्रकाशमानमेव असत्तर्कैः विप्लुतं स्यात् तदा तिरोधीयेतेति ३९ वासुदेव नारायण जनार्दन माधव श्रीः

179
1981

अवतारान्विस्तरेणाह आद्य इत्यादि यावत्समाप्तिः परस्य भूम्नः पुरुषः प्रकृति प्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः
स आद्योवतारः वक्ष्यति हि भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप नाराय
ण आदिदेवः इति यच्चोक्तं विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूत
स्थं तानि ज्ञात्वा विमुच्यते इति यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका
प्रकृतिश्च एताः शक्तयः मन आदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतयः इति विवेक्तव्यं मनः महत्तत्त्वं द्रव्यं महाभू

आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ४०
अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ४१
गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ये वा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ४२
अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् ४३
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं ४३
तानि क्रमात् अत्र विवक्षितः विकारो अहंकारः गुणः सत्त्वादिः विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरी
रं ४० अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशाः तललोकपालाः पातालाद्यधिपतयः ४१ गंधर्वादीनामीशाः यक्षादीनां
नाथाः रक्षोरगति संधिः आर्षः ऋषीणां पितॄणां च श्रेष्ठाः ४२ प्रेतादीनामधीशाः किं बहुना यत्किंचि भगवद्यादि तत्सर्वं परिमेव तत्त्वमित्य
न्वयः भगवदैश्वर्ययुक्तं महत् स्वतेजोयुक्तं ओजः महसीइंद्रियमनः शक्तिः तद्युक्तं बलं धार्ढ्यं श्रीः शोभा ह्रीः कर्मजुगुप्सा विभूतिः संपत्तिः
आत्मा बुद्धिः तद्युक्तं अर्णो वर्णः अत्यद्भुतार्णं अत्याश्चर्यवर्णमित्यर्थः रूपमिव रूपं रूपवत् तत्सर्वं परं तत्त्वं तद्विभूतिरित्यर्थः ४२ राम

भा० शुद्धसत्वावतारान् वक्तुमाह प्राधान्यत इति असत्कथाश्रवणे येकार्णयोः कषायाः मलातान् शोषयतीति तथा तानसुपे द्वि०
२० शान् सुंदरानूलकारलोपश्छांदसः हे ऋषे तुभ्यं अनुक्रमिष्येतदनुक्रमणामृतं त्वयापीयतामित्यर्थः यद्वा अपीयतामिति शत्रुंतक
र्णकषायशोषामित्यर्थः ४४ इति द्वितीये टीकायां षष्ठोध्यायः ६ सप्तमे भगवल्लीलावताराब्रह्मणोदिताः नारदायतु
तत्कर्मप्रयोजनगुणैः सह यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् सन् उद्यतो नंतः तदा तं सुप्रसिद्धं हिरण्याक्षमंदं
ष्ट्रयादद्दार १ यज्ञावतारमाह रुचेः प्रजापतेः सकाशात द्भार्यायां आकूतेः सुतुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणा

प्राधान्यतोयानृषआमनंतिलीलावतान्पुरुषस्य भूम्नः आपीयतां कर्णकषायशोषान् अनुक्रमिष्येतइमान्
सुपेशान् ४४ इति श्रीभागवते० षष्ठोध्यायः ६ ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडींतनुंसक
लयज्ञमयीमनंतः अंतर्महार्णवउपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरोददार १ जातोरुचेरजनयत्सुयमान्
सुयज्ञआकूतिसूनुरमरानथदक्षिणायां लोकत्रयस्य महतीमहरद्यदार्तिंस्वायंभुवेन मनुना हरिरित्यनूक्तः २ जज्ञे
च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं
प्रपेदे ३

यांसुयमान् देवानजनयत् स एवेंद्रः सन् यदा आर्तिमहरत् तदा पूर्वं सुयज्ञ इत्युक्तोपि अनुपश्चात्मनुनामातामहेन हरिरित्यु श्रीः
क्तः अनेन देवोत्पादनलोकत्रयार्तिहरणं च तस्य कर्मदर्शितं एवं सर्वत्रावतारस्तत्कर्मविवेतयं २ कपिलावतारमाह कर्दम
स्य प्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां जातो नवभिस्त्रीभिर्भगिनीभिः सह स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् ययाआत्मग २०
त्यासा आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेवजन्मनि निविधूय कपिलस्य गतिं मुक्तिं प्रापवती ३ राम

181
1981

दत्तात्रेयावतारमाह मयाहमेव तुभ्यं दत्त इति यत् आह ततः स नाम्ना दत्तो जातः स्वभक्तेभ्यो योगैश्वर्यदानं तच्चरितं दर्शयति
यस्य पादपंकजयोः परागः तेन पवित्राः देहाः येषां ते उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिमुक्तिरूपां च ४ कुमारावतारमाह मेमया
आदौ यत्तपः स्तप्तं तस्मात् स्वतपसः मत्तपसो हेतोः स हरिः चतुः सनो अखंडितात् यद्वा स्वतपसः सना हृदानात् समर्पणादित्यर्थः
षान्दाने स च पूर्वकल्पस्य संप्लुवे प्रलये विनष्टं उत्थिन संप्रदायं आत्मतत्वं इह अस्मिन् कल्पे सम्यक् जगाद उक्तवान् सम्यक् तं दर्शय

अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान् स दत्तः यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरु
भयीं यदुहैहयाद्याः ४ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात् स्वतपसः स चतुःसनोभूत् प्राक्कल्पसंप्लव
विनष्टमिहात्मतत्वं सम्यक् जगाद मुनयो यदचक्षतात्मन् ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरइ
तिस्वतपः प्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं स्वर्णं गप्त्यनना घटितुं नशेकुः ६

ति यद्वदि तमात्रमेव मुनयः आत्मन् मनसि अचक्षत साक्षादपश्यन् ५ नरनारायणावतारमाह धर्मस्य पत्न्यां दक्षदुहितरि मू
र्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जातः कथंभूतः स्वः असाधारणस्तपः प्रभावो यस्य तदेवाह अनंगस्य पृतनादेव्योप्सर
सः भगवतः सकाशात् आत्मनस्तस्य प्रतिरूपा उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटयितुं नशेकुः यद्वा आत्मनः
स्वस्य यो नियमः तपो नाशरूपः तस्यावलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं नशेकुरिति एतद्व्याख्यानमेकादशे भविष्यति ६

भा० यत्रकामजयीक्रोधोपि दिभेतितत्र कामोपिनप्रभवतीति किंवक्तव्यमित्याह कामंमिति छतिनः श्रीगुरुरुद्रप्रमुखाः रो द्वि०
२१ षयुक्तयादृष्ट्याकामंदहंतिरोषंत्वामानंदहंतमपितेनदहंतिक्रोधेनाभिभूयंतइत्यर्थः ननुअहोसोयंरोषयदंतरंयन्मध्यं प्राविशं
न्नलंबिभेति यद्वा तस्यांतः मनः कथंभूतममलंनिर्मलंप्रविशति चरित्रेणैकमप्यवतारंसूचयेदेति मातुः सपत्न्यासुरुच्याउदि
तानिवाक्यान्येवपत्रिणोबाणाः तैर्विद्धोध्रुवः राज्ञः उत्तान परः अंतिसमीपेतपसे तपस्तप्तुंध्रुवगतिं ध्रुवपदंयत् यांउपरिस्थितां
अधस्तात् स्थिताः दिविभवादिव्याः सप्तर्षयस्स्तुवंति यद्वाउपरिष्टादूर्ध्वादयोरधस्ताद्गतस्सप्तर्षयइति ८ पृथ्व्यवतारमाह यद्यदाऽ

कामंदहंतिकृतिनोननुरोषदृष्ट्यारोषंदहंतंमुततेनदहंत्यसह्यं सोयंयदंतरमलंनिविशन्बिभेति कामः कथंनुपुनरस्य
मनः श्रयेत ७ विद्धः सपत्न्युदितपत्रिभिरंतिराज्ञोबालोपिसन्नुपगतस्तपसेवनानि तस्माअदाद्ध्रुवगतिंगृणतेप्रसन्नो
दिव्यास्तुवंतिमुनयोयदुपर्यधस्तात् ८ यद्वेनमुत्पथगतंद्विजवाक्यवज्रविप्लुष्टपौरुषभगंनिरयेपतंतं त्रात्वार्थितोजग
तिपुत्रपदंचलेभेदुग्धावसूनिवसुधासकलानियेन ९ नाभेरसावृषभआससुदेविसूनुर्योवैचचारसमदृग्जडयोगच
र्यां यत्पारहंस्यमृषयः पदमामनंतिस्वस्थः प्रशांतकरणःपरिमुक्तसंगः १० परीतोमुक्तसंगः १० राम

षिभिरर्थितस्तदावेनंत्रात्वाअन्वर्थंतत्पुत्रइतिपदंनामलेभे पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइतिप्रोक्तोस्वय श्री:
मेवस्वयंभुवेतिहिपुत्रपदस्युत्पत्तिः कथंभूतंद्विजानांशापवाक्यमेववज्रंतेनविप्लुष्टंदग्धंपौरुषंभगमैश्वर्यंचयस्यतं चास्त्रांतरमाह येन २१
जगतिजगदर्थंवसूनिअन्नादिद्रव्याणिदुग्धा ९ ऋषभावतारमाह असौहरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास नाभेर्भार्यामेरुदेव्याएवसुदेवी
तिअपिसंज्ञाजडवद्योगेननित्यसमाधिनाचर्यांयदितियां तत्रहेतुः समदृक्तत्रापिहेतुः स्वस्थः स्वस्वरूपेस्थितः यतः शांतेंद्रियः तत्कृतः यतः

183
1981

हयग्रीवावतारमाह सत्रइति अथोइत्यर्थांतरे सएवसाक्षाद्भगवान्मम ब्रह्मणः सत्रेयज्ञे हयशीर्षाआस तपनीयंसुवर्णंतद्व
द्वर्णोयस्य छंदोमयः वेदमयः तद्विधायेमखास्तन्मयः अमृतमयइतिवापाठः मखैर्यजनीयाअखिलादेवतास्तदात्माचअ
स्यश्वसतः श्वासंमुंचतः नस्तः श्वासापुटात् उशत्यः कमनीयाः वेदलक्षणावाचोबभूवुः ११ मत्स्यावतारमाह मत्स्योभाति
नावैवस्वतेनमनुना दृष्टः क्षोणीमयाःपृथ्वीप्रधानः तदाश्रय इत्यर्थः अतएवनिखिलंजीवनिकायानांआश्रयः ममममुखा
द्विस्रंसितान्गलितान्वेदस्यमार्गान् वेदानादाय तत्रयुगांतसलिले विजहार हहर्षेण १२ कूर्मावतारमाह क्षीरोदधौकच्छ

सत्रेममासभगवान्हयशीर्षएवसाक्षात्सयज्ञपुरुषस्तपनीयवर्णः छंदोमयोमखमयोखिलदेवतात्मावाचोबभू
वुरुशतीःश्वसतोस्यनस्तः ११ मत्स्योयुगांतसमयेमनुनोपलब्धः क्षोणीमयोनिखिलजीवनिकायकेतः विस्रंसि
तानुरुभयेसलिलेमुखान्मेआदायतत्रविजहारहवेदमार्गान् १२ क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्ध
यआदिदेवः पृष्ठेनकच्छपवपुर्विदधारगोत्रंनिद्राक्षणोद्रिपरिवर्तकषाणकंडूः १३ त्रैविष्टपोरुभयहासनृसिंहरूपंकृत्वाभ्र
मद्भ्रुकुटिदंष्ट्रकरालवक्त्रं दैत्येंद्रमाशुगदयाभिपतंतमाराद्वोरौनिपात्यविददारनखैः स्फुरंतं १४

पवपुषागोत्रंमंथनार्थंमंदरगिरिंपृष्ठेधृतवान् कदाअमृतलब्धयेक्षीराब्धिमुन्मथ्यतांसतांनिद्रायाःक्षणः अवसरः उत्सवो
यस्य सः निद्रायाः अवसरः कः तत्राह अद्रेः परिवर्तः परिभ्रमणः कषाणः कर्षन् घर्षणंसुखप्रदायस्यासा कंडूर्यस्य यद्वाअद्रिपरि
वर्तएवकषः कषणंतेन अपाति अपयायतीतिकषाणकंडूर्यस्य १३ श्रीनृसिंहावतारमाह त्रैविष्टपादेवास्तेषामुरुभयंहं
तीतितथासभगवान् कथंभूतंभ्रमंत्यौभ्रुकुटीदंष्ट्राश्चयस्मिन् तत् करालंवक्त्रंयस्मिन् तंदैत्येंद्रंआरात्समीपमेवगद
याउपलक्षितंअभिपतंतंनखैर्विददार १४ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

भा०

हरिसंज्ञकावतारमाह अंतरिति ग्रस्तेन गजयूथस्य पतिः तीर्थरूपं श्रवो यस्य स तीर्थश्रवाः हे तीर्थश्रवणे श्रवणे नैव मंगलं नामधेयं यस्य १५ तद्वचनं श्रुत्वा आरणार्थिनं तं हस्ते शुंडायां प्रगृह्य किं कृत्वा नक्रस्य वदनं विनिष्पाद्य विदार्य तस्मा ६०

२२ दुद्धृतवान् १६ वामनावतारमाह अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणे ज्यायान् ज्येष्ठः गुणानेवाह यः इमाल्लोकान् विचक्रमे पादन्यासैः क्रांतवान् अथ प्रतिश्रुतानंतरमेव तत्र हेतुः बलेः क्ष्मां वामनरूपेण जगृहे नन्वीश्वरः स्वयं किमिति दुर्बलवत् तथा चकेत तत्राह यां च्यां विना धर्ममार्गाद् वर्तमानो विभुर्न चाल्यः ऐश्वर्यान्न

श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार १६ अंतः सरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेयं १५ ज्यायान् गुणैरवरजोप्यदितेः सुतानां लोकान् विचक्रम इमान् यदथाधियज्ञः क्ष्मां वामनेन जगृहे त्रिपदच्छलेन यांच्यामृते पथि चरन् प्रभुभिर्न चाल्यः १७ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखा धृतवतो विबुधाधिपत्यं यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने १८

भ्रंशनीय इति १७ ननु तर्हि वांच्ययापि चालनमनुचितमेवेत्याशंक्य ततोधिकं स्वसाल्योक्यादि दास्यामीत्याशयेन हृतवान् इत्याह नार्थ इति यद्विबुधाधिपत्यं इदानीं बलात्यार्मं अग्रे दीयमानं च अयं बलेः पुरुषार्थो न भवति कुत इत्यत आह आप इति छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा आपः आसमंतात् धृतवतः शिखा शिखायां भूम्नि इत्यर्थः किं च प्रभुक्रेण वारितः शप्तोपि हे अंग नारद प्रतिश्रुतं विना अन्यत् न चिकीर्षत् कर्तुं नैच्छत् यः तृतीयपादपूरणार्थं हरये आत्मानं देहमपि अभिमेने अंगीकृतवान् एवं सदेहं त्रैलोक्यं श्रद्धया दत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः १८ श्रीवरदमूर्तये नमः श्रीः

२२

185
1981

हंसावतारमाह तुभ्यमिति भृशं विवृद्धेन भावेन अत्युद्रिक्तया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथा उवाच ज्ञानं चेति ज्ञानसाधनं तत् भागवतं नाम कथं भूतं तत्त्वमेव सतत्त्वं आत्मतत्त्वदीपकं विवृद्धभावेनेति विशेषणस्य फलमाह यदिति १९ तत्तन्मन्वंतरावतारमाह चक्रमिति स्वतेजः निजप्रभावमेव चक्रं सुदर्शनं बिभर्ति चक्रवदप्रतिहतं प्रभावं बिभर्तीत्यर्थः तदेवाह मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठे उपरि स्थितः सत्यलोकेपि कमनीयां स्वकीर्तिं विस्तारयन् राजसु दंडं विधत्ते २० धन्वंतर्यवतारमाह लोके अवतीर्य धन्वंतरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजो रोगान् हंति स्वयमेव कीर्तिरिति स्व

तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधुपरितुष्ट उवाच योगं ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव १९ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्ति दुष्टेषु राजसु दमं व्यदधात् स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः २० धन्वंतरिश्च भगवान् स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति यज्ञे च भागममृतायुरवावरुंधमायुष्यवेदमनुशास्त्यवतीर्य लोके २१ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन २२

कीर्त्यतिशयोक्तिः अमृतमरणशून्यमायुर्यस्मात् सः अवसन्नं पूर्वं दैत्यैः प्रतिरुद्धं यज्ञभागं च अवरुंधे लभते अवापरुद्धमितिपाठे यमेवार्थः आयुर्विषयं वेदं चानुशास्ति प्रवर्तयति २१ परशुरामावतारमाह जगतः क्षयाय विधिना देवेन उपभृतं संवर्द्धितं ब्रह्मद्वेसमर्पितमिति वा ब्राह्मणेभ्यो दुह्यतीति तथा अत उज्झितः पंथा वेदमार्गो येन अत एव नरकार्तिलिप्सतीव एवंभूतमवनेः कंटकतुल्यं क्षत्रं असौ महात्मा हरिः उद्धंति उत्पाटयति दीर्घतीक्ष्णधारेण परशुना २२ श्रीनारायणवासुदेव हरे नमः

भा० रामावतारमाह त्रिभिः अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलयाभरतादिरूपयासह कलामायातस्यार्दृशः गुरोर्दशरथस्या द्वि०
२३ ज्ञायांतिष्ठन् सीतालक्ष्मणाभ्यांसहितोवनमाविवेश यस्मिन् विरोधं कृत्वारावणोनाशं प्राप्तः २३ तस्मैरामायउदधिमार्गंददौस
पदिशीघ्रंहरोयथात्रिपुरंदिधिक्षुः तद्वद्रिपुरंलंकांदग्धुमिच्छोः षष्ठीचतुर्थ्यर्थेयद्वापंचमीयं दिधक्षोरामात् यतभयंप्राप्तंतेनां
गेकंपोयस्येति कथंभूतउदधिः उरंप्राप्तंयद्भयंतेनअंगेषुवेपः कंपोयस्य अत्रहेतुः दूरेवर्तमानासुहृत्सीतातयानिमित्तभूतया
मथितः क्षुभितः रोषः तेनसुषोणाअरुणादृष्टिः तयाअत्यंतंतप्यमानंमकराणामुरगाणांचनक्राणांचचक्रंयस्मिन् २४ किंच

अस्मत्प्रसादसुमुखः कलयाकलेशईक्ष्वाकुवंशअवतीर्यगुरोर्निदेशे तिष्ठन्वनंसदयितानुजआविवेशयस्मि
न्विरुद्धदशकंधरआर्तिमार्छत् २३ तस्मायदादुदधिरूढभयांगवेपोमार्गंसपद्यरिपुरंहरवद्दिधक्षोः दूरेसुहृन्म
थितरोषसुषोणदृष्ट्यातातप्यमानमकरोरगनक्रचक्रः २४ वक्षस्स्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुज्जु
षरूढहासं सद्योसुभिः सहविनेष्यतिदारहर्तुर्विस्फूर्जितैर्धनुषउच्चरतोधिसैन्ये २६ वासुदेवाय कृष्णाय दामोदराय

युद्धेरावणस्यवक्षस्स्थलस्पर्शेनरुग्णाभग्नायेमहेंद्रवाहस्यऐरावतस्यदंतास्तैर्विडंबितास्वधवलिम्नाधवलीकृताः तत्तद्दिक्षप श्रीः
तितैः प्रकाशिताइत्यर्थः याएवंभूताककुभोदिशः ताः जुषतेसेवनेपालयतीतितथातस्यदारहर्तुः रावणस्यअहोमत्समः कोन्योस्तीति
महागर्वेणउदंप्राप्तंहासं असुभिः प्राणैः सहसद्यः शीघ्रंविनेष्यतिअपनेष्यतिकेर्धनुषोविस्फूर्जितैः टंकारघोषैरेवकथंभूतस्यअधिसे २२
न्येस्वपरसैन्यमध्येउच्चरतः उत्कर्षेणविचरतः ककुब्जुषरूढहासमितिपाठेदंतैरुज्वलितानांककुभांरूढहासंहासः संजातोगर्वोतमपनेष्य
तीत्यर्थः २५

184
198

केशत्वंशोभेवनतुवयः परिणामकृतं अविकारित्वात् यदुक्तं विष्णुपुराणेउज्जहारात्मनः केशौसितकृष्णौ श्रीकृष्णावतारमाह
भूमेरिति दशभिः सुरेतराः असुराशभूताः राजानस्तेषां वरूथैः सैन्यैः विमर्दितायाभारेणपीडितायाः कलयारामेणसहजातः सन्
कोसौजातः सितकृष्णःकेशोयस्यभगवतः सएवसाक्षात् सितकृष्णौमहामुनेइति यच्चभारते सचापिकेशौहरिरुच्चजहेशुक्लमेकम
परंचापिकृष्णं तौचापिकेशावविशतांयदूनांकुलेस्त्रियोरोहिणींदेवकींच उभावपिकेशास्वर्गस्येशावा तयोरेकोबलभद्रोब
भूवयोसौश्वेतस्तस्यदेवस्यकेशः कृष्णोद्वितीयकेशतः संबभूवकेशोयोसौवर्णतः कृष्णउक्तइति नतुनकेशमात्रावताराभिप्रा

भूमेसुरेतरवरूथविमर्दितायाः क्लेशव्ययायकलयासितकृष्णकेशः जातः करिष्यतिजनानुपलक्ष्यमार्गः कर्मा
णिचात्ममहिमोपनिबंधनानि २६ तोकेनजीवहरणंयदुपूतनायाः त्रैमासिकस्यचपदाशकटोपवृत्तः
यद्रिंगतांतरगतेनदिविस्पृशोर्वाउन्मूलनंत्वितरथार्जुनयोर्नभाव्यं २७ वासुदेवनारायणमाधवायनमः

यंकिंतुभूभारावतरणरूपंकार्यंकियदेतत् मत्केशावेवतत्कर्तुंशक्ताविति योतनार्थंरामकृष्णयोर्वर्णसूचनार्थंचकेशाद्धारणाभिति
गम्यते अन्यथा तत्रैवंपूर्वापरविरोधापत्तेः कृष्णस्तुभगवान्स्वयमित्येतद्विरोधाच्चकथंभूतः परमेश्वरः तथाजनैरनुपलक्ष्योमा
र्गोयस्य तर्हिईश्वरत्वेकिंप्रमाणंअतिमानुषकर्माण्यपयनुपपत्तिरेवाह आत्मनामहिमाउपनिबध्यतेअभिव्यज्यतेयेषुतानि
२६ एतदेवप्रपंचयति तोकेनेत्यादिना बालेनपूतनायाः जीवहरणंयत्रिंगताजानुभ्यांगच्छताअंतरगतेनमध्यंप्राप्तेनदिवि
अस्पृशयोः इतरथानीश्वरत्वेतन्नभवितव्यं २७ हरेरामहरेरामरामरामहरेहरे हरेकृष्णहरेकृष्णकृष्णकृष्णहरेहरे श्रीः

भा० द्वि०

२४

विषतोयपीतान् विषमयतोयस्य पानं येषां तान् पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्री
उन् उरगं कालियं उच्चाटयिष्यति तच्छुद्धये तस्याः ह्रदिन्याः निर्विषत्वाय अनिविषवीर्येण विलोला चंचला जिह्वा यस्य २८
दिव्यमलौकिकद्रव्यवेतिलोकोक्तिः उन्नेष्यति उद्धरिष्यति शुचि ग्रीष्मः तत्संबंधिनि वने शुष्क इत्यर्थः अतो दावाग्नेर्हेतो अव
क्षितो निश्चितो अंतकालो यस्य तं सबलः सरामः अनधिगम्यं उरुं यं वीर्यं यस्य सः तत्र निशिनिः शयानाभिति कालियदमने रात्र्यां

यं द्वै व्रजे व्रजपशून् विषतोयपीतान् पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या तच्छुद्धयेति विषवीर्यविलोलजिह्वमु
च्चाटयिष्यदुरगं विहरन् ह्रदिन्यां २८ तत्कर्मदिव्यमिव यन्निशिनिः शयानां दावाग्निना शुचिवने परिदह्यमाने
उन्नेष्यति व्रजमतो वसितांतकालं नेत्रे पिधाप्य सबलो नधिगम्यवीर्यः २९ गृह्णीत यद्युपबंधनमस्य माता शुल्वं
सुतस्य न तु तत्तदमुष्य माति यज्जृंभतोस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ३० नंदं
च मोक्ष्यति भयाद्वरुणस्य पाशात् गोपान् बिलेषु पिहितान् मयसूनुना च अन्व्यापृतं निशि शयानमतिश्रमेण लोकं वि
कुंठमुपनेष्यति गोकुलं स्म ३१

यमुनातीरे नेत्रे पिधाप्य पिहिते कारयित्वेति मुंजाटव्यामिति शेषं २९ उपबध्यते नेनेति उपबंधनं तत्साधनं शुल्वं दाम अमुष्य माता
यशोदा गृह्णाति तदमुष्य न माति बंधनसंश्रितं न भवति न पूर्यत इत्यर्थः गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता रयभिति संजातबोधा प्र
तिबोधिता निजैश्वर्यं ज्ञापिता आसीदिति यत् तच्च कर्म दिव्यमेवेति सर्वत्र पूर्वेणान्वयः ३० वरुणस्य पाशाद् यं तस्मान्मोचयिष्यति भय
सूनुना व्योमनाम्ना व्यापृतं व्यासं निशि शयानमिति चैवे कुंठप्राप्तिसाधनानुष्ठानाभावाद्दर्शितः उपनेष्यति गोकुलवासिनं जनं स्मेत्याश्चर्ये ३१

श्रीः

२४

189
1981

देवे इंद्रे पशून् रिरिक्षुः रक्षितुमिच्छुः अनघे श्रमरहिते एकस्मिन्नेव करे सलीलं यथा महध्रं गोवर्द्धनं धर्त्ता धारयिष्यति उच्छिलीं
ध्रं उद्धृतं छत्राकमिव सप्तवर्षाणि वयो यस्य सः ३२ निशि रात्रौ निशाकररश्मिभिः गौर्यां धवलायां वने क्रीडन् कलैर्मधुरैः पदैः आय
तमाध्मापेन दीर्घतां नीतं मूर्छनाख्यां गीतकलानि मंजुलानि पदानि यस्मिन् ततच्चततः आयतं दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं ते
न उद्दीपिता स्मर एव रुक् रुजा यासां तासां गोपीनां हर्त्तुः शंखचूडस्य शिरो हरिष्यतीति ३३ ये च प्रलंबादयः ते सर्वे हरिणा हेतुभूतेन तदि

गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून् कृपया रिरिक्षुः धर्त्तोच्छिलींध्रमिव सप्तदिनानि सप्तवर्षो महीध्रम
नघैककरे सलीलं ३२ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन उद्दीपितस्मररुजां व्रज
भृद्वधूनां हर्त्तुर्हरिष्यति शिरो धनदानुजस्य ३३ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः
अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ३४ ये वा मृधे समितिशालिन आत्तचापाः
कांबोजमत्स्यकुरुकेकयसृंजयाद्याः यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ३५

यं निलयं अदर्शन दर्शनायोग्यं वैकुंठं अलं यास्यंतीत्युत्तरेणान्वयः खरो धेनुः दर्दुर इव दर्दुरो बकः इभः कुवलयापीडः कपिः द्विवदः
कुजो नरकः ये च मृधे आत्तचापाः समितौ संग्रामे शालंते श्लाघंते समितिशालिनः ननु प्रलंबखरकपिबल्वलरुक्मिप्रमुखाः बलभद्रेण नि
हताः कांबोजादयश्च भीमार्जुनादिभिः शंबरः प्रद्युम्नेन यवनो मुचकुंदेन न तु हरिणा तत्राह बलभीमपार्थ इत्यादयः व्याजाह्वयामि कपटनाम
धेयानि यस्य तेन सम्यक्ताक्षाणस्तेन दमिताः कालांतरे यास्यंतीत्यर्थः एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथा न भाव्यमिव भातीति पूर्वेणैव सं
बंधः ३५

भा०
२५

व्यासावतारमाह कालेनेति अनुयुगं मीलिता संकुचिता धीर्येषां स्तोकमल्पमायुर्येषां स्वनिगमः स्वकृतो वेदराशिः बत अ द्वि०
हो दूरेपारं यस्येति दुर्गम इत्यवमृश्य सत्यवत्यामाविर्भूतः सन् स एव हरिः विपटशः शाखाभेदेन ३६ बुद्धावतारमाह वेदद्विषांधि
ष्ठितानां नितरां स्थितानां विमोहनाया दृश्यमूर्तिः सन् तद्बलेन च पूर्भिः अदृश्यरूपाभिर्मतैर्विमोहः योग्यतात्याणीयस्मान्मतेः
प्रलोभश्च असुकेस्वीकारो यस्मात्तं पाखंडवेषं विधाय तेन औपधर्म्यस्यार्थे यथ बहु भाषिष्यत इत्यर्थः ३७ कल्क्यवतारमा

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं
विपटशो विभजिष्यते स्म ३६ वेदद्विषां निगमवर्त्मनि धिष्ठितानां पूर्भिर्मयेन रचिताभिरदृश्यमूर्तिः लोकान्
घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं ३७ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखं
डिनो द्विजजना वृषला नृदेवाः स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगांते ३८ सर्गे त
पोहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः अंते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पु
रुशक्तिभाजः ३९

ह यर्हि यदा सतामप्यालयेषु गृहेषु हरेः कथा न स्युः त्रैवर्णिकाः पाखंडिनः स्युः शूद्राश्च राजनः स्युः स्वाहा स्वधा वषडिति गिरो न श्रीः
स्युः तदा कल्किरूपेण कलेः शास्ता भविष्यति अत्र ब्रह्मनारदसंवादात् प्राग्भाविनो वराहादयः मन्वंतरावताराभूताः भाविनश्च धन्वं
तरिपरशुरामौ तदा वर्तते श्रीरामादयस्तु भाविनः तत्र तु कदाचित्कृतादिनिर्देशः श्यांदस इति द्रष्टव्यं सृष्ट्यादिकार्यभेदेन मायागुणावता २५
रविभूतीराह सर्ग इति स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्च अवनीशाश्च अंते संहारे हरो रुद्रः मन्युवशाः सर्पाः बाहुशा

191
1981

क्तिधारिणो भगवत इमा विभूतयः ३९ राम इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोपि समर्थ इत्याह पृथिव्याः परमाणू
नपि यो विममे गणितवान् तादृशोपि कोनु वीर्यगणनां कर्तुमर्हति कथंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कंभ धृत
वान् किमिति चस्कंभ यस्मात्त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधा
नं तस्मादारभ्य उरु अधिकं कंपयानं यस्येति वा अतः कारणात् चस्कंभ धृतवान् आत्रिपृष्ठमिति वा छेदः सत्यलोकमभि
व्याप्य यः सर्वं धृतवानित्यर्थः तथा च मंत्रः विष्णोर्नुकमिति अस्यार्थः विष्णोर्वीर्याणि कं प्रवोचं कः प्रवोचदित्यर्थः यः पा

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि चस्कंभ यः स्वरंहसास्खलता त्रिपृष्ठं
यस्मात्त्रिसाम्यसदनादुरुकंपयानं ४० नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये गाय
न्गुणान्दशशतानन आदिदेवः शेषोधुनापि समवस्यति नास्य पारं ४१ येषां स एव भगवान्दययेदनंतः
सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ते दुस्तरामतितरंति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ४२

र्थिवानि रजांसि विममे सोपि यो विष्णुः त्रेधा विचक्रममाणः त्रिविक्रमं कुर्वन् उत्तरं लोकं अस्कंभयन् अवष्टब्धवान् कथंभूतं
सधस्थं सह स्यस धादेशः तिष्ठंतीति स्थाः तत्रस्थैर्देवैः सह वर्तमानमित्यर्थः ४० एतत्प्रपंचयति नांतमिति पुरुषस्य यन्मायाब
लं तस्यांतं न विदामि न वेद्मि दशशतान्याननानि यस्य सोपि अस्य गुणान् गायन् पारं न समवस्यति न प्राप्नोति ४१ यदि न कोपि विंदंति
तर्हि कथं मुच्येरन् तत्कृपयैवेत्याह येषामिति दययेत् दयां कुर्यात् ते च यदि निष्कपटं आश्रितचरणा भवंति ते दुस्तरां देवमायां अतित
रंति चकारान्मायां ते भवं विंदंति च अथो तिवा पाठः अस्य समेव तेषां मायातरणमित्याह नैषामिति श्वसृगालानां भक्ष्ये देहे ४२ राम

47585

अंतर्ज्ञानाभावेपि मायेयमिति ज्ञानंतत्कृपयाबहूनामस्तीत्याह वेदाहमिति त्रिभिः गूढमिति सनकादीनामंतर्भावयबहुत्वंदे
त्ववर्यः प्रह्लादः मनुस्वायंभुवः तस्यपत्नीचशतरूपातदात्मजाः प्रियव्रतादयःपुत्राश्चकन्याश्चप्राचीनबर्हिषोविसर्गलोकःध्रुवांद
दसः ४२ शतधेनुः अनुश्चसंधिरार्षः रंतिदेवाइतिपाठः सुगमः ऐकपद्येएतैःसहितो देवव्रतइत्यर्थः ४४ उपेंद्रदत्तः शुकः विभीषणा

वेदाहमंगपरमस्यहियोगमायांयूयंभवश्चभगवानयदैत्यवर्यः पत्नीमनोःसचमनुश्चतदात्मजश्चप्राचीनब
र्हिर्ऋभुरंगउतध्रुवश्च ४२ ईक्ष्वाकुरैलमुचकुंदविदेहगाधिरघ्वंबरीषसगरादयनाहुषाद्याः मांधात्रलर्कशत
तधन्वनुरंतिदेवदेवव्रतोबलिरमूर्तरयोदिलीपः ४४ सौभर्युतंकशिबिदेवलपिप्पलादाःशारद्वतोद्धवपराशरभू
रिषेणाः येन्येविभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ४५ तेवैविदंत्यतितरंति चदेवमायां
स्त्रीशूद्रहूणशबराअपिपापजीवाः यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जनाअपिकिमुश्रुतधारणाये ४६

दयोवर्यामुख्याः येषांते ४५ किंबहुनासर्वेपिसत्संगेन विंदंतीत्याह तेवाइति अद्भुताक्रमाः पादन्यासाः यस्यहरेस्तत्परायणास्त
द्भक्ताः तेषांशीलंशिक्षायेषांतेतथायदिभवंति तर्हि तेपिविंदंतीत्यर्थः श्रुतेभगवतोरूपे धारणामनोनियमनंयेषांतेतेविंदंतीति
किमुवक्तव्यं ४६ कृष्णायवासुदेवायहरयेपरमात्मने प्रणतःक्लेशनाशायगोविंदायनमोनमः नारायणवासुदेवगोविंदहरेश्रीः

193
1981

किंतत्भागतोरूपंयस्मिन्मनोधारणंविधायमायांतरंतीत्यपेक्षायामाह शश्वदितिद्वाभ्यांयतब्रह्मेतिविदुः मुनयस्तद्वैभगव
तःस्वरूपंकिंतद्रूपंतदाह अजस्रंनित्यंचतत्सुखंचविशोकंचेति अजस्रसुखत्वेहेतुः शश्वत्सदाप्रशांतंअतोनित्यसुखरूपंविशो
कत्वेहेतुः अभयंकुतः यतःसमंभेदशून्यंअतोभयंद्वितीयाद्वैभयंभवतीतिश्रुतेः तत्कुतःयतःप्रतिबोधमात्रंज्ञानैकरसंननुज्ञान
स्यापिनीलपीताद्याकारेणचक्षुरादिकरणभेदेनचभेदोदृश्यतेनशुद्धनिर्मलं ननुदर्शितोविषयकरणोपरागरूपोमलइत्य
तआह सदसदतःपरंविषयकरणसंगशून्यंचतैरेवतदुपरागोनाज्ञानस्येतिभावः ननुतथापिज्ञानासहभेदस्यात् नआत्मतत्वं

शश्वत्प्रशांतमभयंप्रतिबोधमात्रंशुद्धंसमंसदसतःपरमात्मतत्वं शब्दोनयत्र
पुरुकारकवान्क्रियार्थोमायापरैत्यभिमुखेचविलज्जमाना ४७ वासुदेव श्रीः

आत्मनोज्ञातुःस्वरूपमेवनततोभिन्नं नतुनत्वौपनिषदंपृच्छामीतिशब्दबोध्यत्वप्रतीतेः कुतोबोधरूपत्वंतत्राह शब्दोनयत्रेति आरो
पितनिरसनाद्वेवशब्दस्यव्यापारोनततबोधकइत्यर्थः ननुभवतुनाममनिरस्तभेदज्ञानरूपत्वाद्विशोकत्वंसुखस्यतुनानाकारसाध्यक्रि
याफलत्वात्कथमजस्रसुखत्वंतस्येत्यतआह यत्रबहुकारकसाध्यक्रियार्थउत्पत्यादिचतुर्विधंउत्पाद्याप्यविकार्यसंस्कार्यादिक्रिया
फलंचनास्ति इंद्रियैर्ज्ञानांशाभिव्यक्तिरेवक्रियाभिरानंदांशाभिव्यक्तिमात्रंक्रियतेनोत्पत्यादिकमितिभावः ननुउक्तस्यायभावेपिमाया
मलापकरणेनविकार्यत्वंस्यादिवव्रीहिणापिवतुषापकरणेनेत्याशंक्याह मायाअभिमुखेस्थातुंविलज्जमानेवयस्मात्तैरैनिहूरतोपसरति ४७

भा० तस्मादेवं भूते भगवति नियमितमनसां कृतार्थानां न किमपि कृत्यमस्तीत्याह सद्धांचतीतिस भ्युरु सहचरं मनः यमकर्तहेतिं द्वि०
२७ जह्यः त्यजंति यमनिश्चितनियमनप्रयत्नः सएव कर्तहेतिः हृदयग्रंथिभेदेन शास्त्रेषायं त्यजंतीत्यर्थः यंप्रतिनियम्य यस्मिंस्थिरीकृत्य
यतयोयत्नशीलाः कर्तृभेदस्तन्निरासो कर्त्ता तत्रहेतिः साधनं जह्यः त्यजेयुः अनुपयोगात्तन्नाद्रियंत इत्यर्थः उपयोगाभावेन साधना
नादरे दृष्टांतः निपीयते स्मिन्निति निपानं कूपः तत्र खनित्रं खननसाधनं यथा स्वराट् दरिद्रः सयथा कर्मकारदशायांगृहीतं
४ स्वयमेवपर्जन्यरूपेण विराजमानो इंद्रः नाद्रियते तद्वदिति यद्वा स्वयमेव राजत इति स्वराट् ४ निपानखनित्रं इंद्रः समृद्धः सन् जहा

तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं सध्र्यङ्नियम्य मुनयो यमकर्तहेतिं जह्युः
स्वराडिव निपानखनित्रमिंद्रः ४८ स श्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्रसिद्धिः
देहेन धातुविगमेनु विशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेजः ४९ नारायण वासुदेव श्रीःमाधवश्रीः

नितद्वदित्यर्थः ४८ एवं तावदजस्रसुखं विशोकं ब्रह्मैव भगवतः स्वरूपं तत्प्राप्तानां च न प्राप्यं कृत्यं न किंचिदस्तीत्युक्तं इदानीं ततः प्रा श्रीः
कृस एव सर्वफलदाता सर्वकर्मप्रवर्तकश्चेत्याह सएव श्रेयसां फलानां विभुः दातापि तत्रहेतुः भावानां ब्राह्मणादीनां स्वभावैः शम
दमादिभिर्विहितस्य सतः शुभस्य कर्मणो यतः प्रवर्तकात् प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः २७
कार्यस्य प्रसिद्धिः सएव स्वर्गादीनां दातेत्यर्थः ननु कर्मकर्तुर्मृतस्य कथं स्वर्गादिफलं स्यात्तत्राह स्वारंभकधातूनां भूतानां विगमे वि
योगे सति अन्वनुविशीर्यमाणेपि देहे तत्रस्थं व्योमेव यस्तेन सह न विशीर्यते यतः अजः तेन सह न जातः तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ४९

195
1981

अध्यायत्रयस्यार्थमुपसंहरति सोयं ते समासेन संक्षेपेणाभिहितः तमेवाह सदसत्कार्यं कारणं च हरेरन्यत् नभवति ननु हरेस्तदैते
व्यतिरेके ह्यतिरेकेत कृतविकारप्रसंगस्यात् न अन्यस्मात्कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः ५० अयं च विभूतीनां संग्रह
तद्व्यतिरेके उदितः ५१ यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य संचिंत्य तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय ५२
ननु भक्तिरसः विद्यातनभक्तिरसेन केवलं तत्त्वमित्यर्थः ५३ ननु लीलामायाश्रयाकिं तद्वर्णनेनेत्यत आह मायामिति ५२ यद्यपिव

सोयं तेभिहितस्तात भगवान्विश्वभावनः समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ५० इदं भागवतं नाम यन्मे भगव
तोदितं संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ५१ यथा हरौ भगवति नृणां भक्तिर्भविष्यति सर्वात्मन्यखिलाधारइ
ति संकल्प्य वर्णय ५२ नजन्मनि नतुष्येत किं कार्यमनुन त्वरैः कृष्णेयथपवर्गेशोभक्तिः स्यादनपायिनी ५३ मायां वर्णयतो
मुष्य ईश्वरस्यानुमोदितः शृण्वतः श्रद्धया नित्यं मायया त्मा न मुह्यति ५४ इतिश्रीभागवते द्वितीयस्कंधे सप्तमोध्यायः ७
राजउवाच ब्रह्मणा नोदितो ब्रह्मन् गुणाख्यानेगुणस्य च यस्मै यस्मै यथा प्राह नारदो देवदर्शनः १ एतद्वेदितुमिच्छामि
तत्त्वं वेदविदांवर हरेरद्भुतवीर्यस्य कथा लोकसुमंगला २ कथयस्व महाभाग यथाहमखिलात्मनि कृष्णे निवेश्य निःसंगं मन
स्त्यक्ष्ये कलेवरं ३ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितं कालेन नातिदीर्घेण भगवान्विशते हृदि ४ ॥ श्रीराम

र्णनं मायात्मकं तथापि तच्छ्रद्धया वर्णितं क्रममनुमोदितुं मायां निवर्तयेति श्रीभागवते हरेर्भगवत्त्वं सर्वात्मकत्वं च सर्वाधारत्वं च वर्ण्यते न तत्त्वम
त्किं दृश्यते ५४ इतिश्रीभागवतेटीकायां द्वितीये सप्तमः ७ अष्टमे देहसंबंधमाक्षीपलीशजीवयोः बहून्परीक्षिताष्टच्छ पुराणार्थान्बुभुत्सि
तान् त्वमेतद्विपुलीकुर्वित्युक्तं नदेव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः अगुणस्य च गुणातीतस्यापि देववद्दर्शनं यस्य निःसंगं मनः श्रीकृष्णे
निवेश्येति स्वप्रयत्नो दर्शितः ३ सोपि श्रद्धया शृण्वतो नावश्यक इत्याह शृण्वत इति स्वप्रयत्नं विना भगवान् स्वयमेव हृदि विशति ४ वासुदेवेति

भा० भावसरोरुहं हृदयकमलं प्रविष्टश्च तत्कृतं सर्वमलं धुनोति सलीलस्येति दृष्टांतस्यायमभिप्रायः नादीनां कुंभस्थले जले शोधिते तद्देव
२८ केवलं शुध्यति नतु नदीतटागादिगतं स च मलः कुंभस्थांतस्तिष्ठत्येव नतु सर्वथा विलीयते अत एव किंचिच्चलने पुनः क्षुभ्यति
एवं तपोदानादिप्रायश्चित्तं न सर्वथा सर्वेषां सर्वपापं धुनोति किंतु सावशेषं तच्च कस्यचिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वेषां स
र्वपापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति नतु हृदिस्थोपि कदाचिद्गमिष्यतीति ५ ततश्च कृतार्थो
भविष्यतीत्याह धौतात्मा निःपापः मुक्ताः सर्वरागद्वेषादयः परिक्लेशाः येन पांथः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति

प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ५ धौतात्मा पुरुषः कृष्णपाद
मूलं न मुंचति मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा ६ यदधातुमतो ब्रह्मन्देहारंभोस्य धातुभिः यदृच्छया हेतुना वा
भवंतो जानते यथा ७ आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः पृथक् ८ श्रीराम

तद्वत् ६ तदेवं श्रवणोत्कण्ठामाविष्कृत्य संदिग्धानर्थान्पृच्छति अधातुमतः धातवो भूतानि तत्संबंधशून्यस्य अस्य लौकिक
स्यात्मनः धातुभिर्देहारंभ इति यत् एतत्किं यदृच्छया निर्निमित्तं हेतुना वा अस्मदादिवत्कर्मादिना भवंतो यथावज्जानंते अतः
कथयंत्विति शेषः ७ यश्चायमसावीश्वरः सोपि तत्तुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्धेन
सर्वलोकानां संस्थारचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् असावीश्वरः इयत्तायुक्तैः स्वपरिमितैः स्वयवैः र
यं लौकिकः पुरुषो यावान् यत्संख्याकावयवयुक्तः तावान्प्रोक्तः संस्थावान् अवयववानिति च प्रोक्तः अतः को विशेष
स्तस्येति अवश्यं च विशेषो वाच्य इत्याह अजो ब्रह्मा भूतानि सृजति भूतानामात्मानि यंता ८ श्रीरामजयरामजयजयराम

197
1981

समष्ट्युपाधित्वात् येन च अनुगृहीता तस्य रूपं ददृशे ददृष्टवान् यो नाभिपद्मस्य संभवः कारणं स कथं तावानिति प्रश्नाय ददृ
शे ददृष्टवान् एतच्च तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः सृजं सृजामि सृष्टोहमीक्षयेवाभिनोदितः इत्यादिनोक्तमनूद्य
ते अग्रे तु स्पष्टं भविष्यति प्रश्नांतरमाह स चापीति यत्र शेते येन रूपेणावतिष्ठते विश्वस्य स्थित्यादयो यस्मात् एवमादि प्रश्नं
तत्त्वतोर्हसि उदाहर्तुमिति सर्वेषामंते क्रियया संबंधः प्रश्नांतरमाह सर्वस्य प्रपंचस्य पुरुषरूपत्वे कल्पनादिव्यवस्था घटते
कीदृशी चेति प्रश्नः पुरुषावयवैः पूर्वं कल्पिताः यस्येहावयवैः सर्वान्लोकान्कल्पयंतीत्यादौ लोकैश्चामुष्यावयवैरिति पाता

तावानसाविति प्रोक्तः संस्थावयववानिव अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ९ ददृशे येन तद्रूपं ना
भिपद्मसमुद्भवः स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः १० मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः १० पुरु
षावयवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ११ यावान्कल्पो विकल्पो
वा यथा कालोनुमीयते भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः १२ कालस्यानुगतिर्या तु लक्ष्यतेण्वी बृहत्यपि
यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम १३ यस्मिन्कर्मसमावायो यथा येनोपगृह्यते गुणानां गुणिनां चैव परिणा
मभीप्सतां १४

लमेतस्य हि पारमूलं इत्यादौ च त्वन्मुखात् श्रुतवंतो वयमेवं संदेहविपर्ययाभ्यां पृष्टं ११ इदानीमज्ञातान्बहूनर्थान्पृच्छति या
वानित्यादिना कल्पो महान् विकल्पो वांतरः भूतादिशब्दो यस्मात् यस्य वाचक इति वा सतः स्थूलदेहाभिमानिनो मनुष्यपित्र
वादेः आयुषः प्रमाणं अनुमानप्रकारः पृष्टः १२ विशेषं पृच्छति कालस्येति अनुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्यानि स्थानानि
यादृशीः यादृश्यः गुणानां सत्वादीनां परिणामं देवादिरूपमिच्छतां गुणिनां जीवानां मध्ये यस्मिन्परिणामे कर्मणां पुण्यपा
पानां समवायः समुदायः केन कर्मसमुदायेन कथं कृतेन कोधिकारी देवादिभावं प्राप्नोतीत्यर्थः १४ श्रीकृष्णार्पणमस्तु

ष्टरादीनांसंभवः एतानि ओकांसि येषांप्राणिनांतेषांचसंभवः यथेतिसर्वत्रानुषंगः १५ वर्णानामाश्रमाणांचविनिश्चयः १६ त
त्वेन भावैर्निर्धारितः युगेयुगेप्रतियुगंयोधर्मः यच्चहरेरवतारानुचरितं १७ सविशेषःवर्णाश्रमनिबंधनः श्रेणीनांतत्तद्व्यवसा
योपजीविनांव्यवहारनियमोपलक्षणोधर्मः राजर्षीणांप्रजापालनाधिकारिणांकृछ्रेषु आपत्सुजीवतां १८ सर्वेषांतत्त्वानांप्रकृ
त्यादीनांपरिसंख्यानंसंख्यालक्षणंस्वरूपंहेतुतोलक्षणंतत्तत्कार्यहेतुत्वेनलक्षणमित्यर्थः पुरुषाराधनस्यविधिः देवपूजाप्र

ष्टपातालककुभ्व्योमग्रहनक्षत्रभूभृतां सरित्समुद्रद्वीपानांसंभवश्चतदोकसां १५ प्रमाणमंडकोशस्यबा
ह्याभ्यंतरभेदतः महतांचानुचरितंवर्णाश्रमविनिश्चयः १६ अवतारानुचरितंयदाश्चर्यतमंहरेः युगानियु
गमानंचधर्मोयश्चयुगेयुगे १७ नृणांसाधारणोधर्मःसविशेषश्चयादृशः श्रेणीनांराजर्षीणांचधर्मःकृछ्रेषु
जीवतां १८ तत्त्वानांपरिसंख्यानंलक्षणंहेतुलक्षणं पुरुषाराधनविधिर्योगस्याध्यात्मिकस्यच १९ योगेश्वरैश्व
र्यगतिंलिंगभंगंस्तुयोगिनां वेदोपवेदधर्माणांइतिहासपुराणयोः २० संप्लवःसर्वभूतानांविक्रमःप्रतिसं
क्रमः इष्टापूर्तस्यकाम्यानांत्रिवर्गस्यचयोविधिः २१

कारः अष्टांगयोगस्यचविधिः १९ योगेश्वराणामैश्वर्येण अणिमादिनाअर्चिरादिगतिः लिंगशरीरस्यभंगंकैवल्यंवेदाऋग्वेदा
दयः धर्माधर्मशास्त्राणितेषांइतिहासपुराणयोः गतिस्वरूपं २० संप्लवः आवांतरप्रलयः यद्वासंम्यक्प्लवनंउद्भवः विक्रमस्थि
तिः प्रतिसंक्रमोमहाप्रलयः इष्टंवैदिकंकर्मपूर्तंस्मार्तकर्म वापीकूपतडागादि देवतायतनानि अन्नप्रदानमारामःपू
र्तमित्यभिधीयते इतितत्रचकाम्यानामग्निहोत्रादीनांविधिःअविरोधप्रकारः २१ रामकृष्ण वासुदेवहरेरामकृ॰ २९

अनुशायिनांलीनोपाधीनांजीवानामात्मनोजीवस्यव्यवस्थानंबंधमोक्षातिव्यतिरिक्तस्वरूपेणावस्थानं २२ यथात्मतंत्रइति
भगवतः सगुणत्वंनिर्गुणत्वंचेत्यादि सर्वंदुर्घटमिवमेप्रतिभातितद्यथाघटतेनवातथाकथय उदात्तप्रलये २३ यशब्दादृष्ट
मपि २४ प्रमाणंसम्यक्ज्ञातायतस्तवब्रह्मनारदव्यासक्रमेणसंप्रदायोस्तीतिसामान्यन्यायेनाहपरेचेति यद्वातदन्येप्राय
शोगतानुगतिकाएवनतत्त्वविदइत्याहपरेचेति २५ ननुतवानशनद्विजकोपाभ्यांव्याकुलस्यकुतः श्रवणंतत्राहनेतिनपराय

यश्चानुशायीनांसर्गःपाखंडस्यचसंभवः आत्मनोबंधमोक्षौचव्यवस्थानंस्वरूपतः २२ यथात्मतंत्रोभगवान्
विक्रीडत्यात्ममायया विसृज्यवायथामायामुदास्तेसाक्षिवद्विभुः २३ सर्वमेतच्चभगवन्पृछतोमेनुपूर्वशः तत
त्त्वतोर्हस्युदाहर्तुंप्रपन्नायमहामुने २४ अत्रप्रमाणंहिभवान्परमेष्ठीयथात्मभूः परेचेहानुतिष्ठंतिपूर्वेषांपूर्वजैःकृ
तं २५ नमेसवःपरायंतिब्रह्मन्ननशनादमी पिबतोच्युतपीयूषमन्यत्रकुपिताद्द्विजात् २६ सूतउवाच सउपा
मंत्रितोराज्ञाकथायामितिसत्पतेः ब्रह्मरातोभृशंप्रीतोविष्णुरातेनसंसदि २७ प्राहभागवतंनामपुराणंब्रह्मसं
मितं ब्रह्मणेभगवताप्रोक्तंब्रह्मकल्पउपागते २८ यद्यत्परीक्षिदृषभःपांडूनामनुपृछति आनुपूर्व्येणतत्स
र्वमाख्यातुमुपचक्रमे २९ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेअष्टमोध्यायःसमाप्तः ८ गोविंदरा॰

णोतिनापगछंतिनव्याकुलीभवंतीत्यर्थः अच्युतकीर्तिपीयूषंपिबतः २६ उपामंत्रितःपृष्टःसंभ्रमासोपतिश्चतस्य २७ ब्रह्म
कल्पेसत्स्युपक्रमकल्पेभागवताख्यानेनैवप्रश्नात्तु सुत्तरंदातुमुपक्रांतवानित्यर्थः २८ पांडूनामृषभःश्रेष्ठः आनुपूर्व्येण
तिप्रस्तावक्रमोत्रनविवक्षितः नप्रश्नक्रमः २९ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेटीकायांअष्टमोध्यायः ८

भा० राज्ञः प्रश्नोत्तरंवक्ष्यन्ब्रह्मणोदितं कथयामासनवमेशुकोभागवतंपुनः तत्रतावदुक्तयद्धातुमतइत्यनेनजीवस्यकथं टि०
१० देहसंबंधइति तत्रोत्तरमाह यद्यप्यनशनंद्विजकोपेश्वहेतुरस्तितथापिअच्युतामृतपानादमरोहमितिदृढोबोधः एवंपृष्टः
शुकोभागवतं आहतत्रादौयद्यपूर्वेणपरीक्षितापृष्टंतत्संबंधुगपदेकेनोत्तरेणव्याख्यातवान् आत्मनोहरेर्मायामंतरेणअनुभ
वरूपस्यात्मनः अर्थेनदृश्येतदेहादिनासंबंधः अंजसातत्त्वतोनघटेत अत्रहेतुः परस्येतिस्वप्नद्रष्टुर्यथास्वप्नदेहसंबंधोनघ

श्रीशुकउवाच आत्ममायामृतेराजन्परस्यानुभवात्मनः नघटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा १ बहुरूप
इवाभातिमाययाबहुरूपया रममाणोगुणेष्वस्याममाहमितिमन्यते २ यर्हिवचमहिम्नित्वेपरस्मिन्काल
मानयोः रमेतगतसंमोहस्त्यक्त्वोदास्तेतदोभयं ३

टेतेतद्वत् १ तस्मात्संसारोपिमाययैवेत्याह बहुरूपः बालयुवादिरूपाः देवनरादिरूपश्चभातिगुणेषुदेहादिषु २ अतएवभक्ति श्रीः
योगेनतन्निरासेसतिमोक्षोपिघटतइत्याह यर्हितिवा शब्दएवार्थेस्वएवमहिम्नियदारमेततदेवाहकालमाययोःपुरुषप्रकृत्योः २०
परस्मिन्तदाउभयंअहंममेतित्यक्त्वाउदास्तेपूर्णस्वरूपेणावतिष्ठते तदुक्तं ययासंमोहितोजीवआत्मानंत्रिगुणात्मकं परोपि
मनुतेनर्थंतत्कृतंचाभिपद्यते अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतोव्यासश्चक्रेसात्वतसंहितां ३ श्रीः

201/1984

यच्चोक्तंपरमेश्वरस्यापिदेहसंबंधाविशेषात्कथंतद्भक्त्यामोक्षःस्यादित्याह आसीद्यदुदरात्पद्मंइत्यादिनातत्राह आत्मनो
जीवस्यतत्वविशुध्यर्थःतत्वज्ञानार्थंतद्भवस्येवकिंतत् यत्तपआदिनाभजनंभगवान्ब्रह्मणे आह किंकुर्वन्कृतंसत्यंचिह्नंरू
पंदर्शयन् दर्शनेहेतुःअव्यलीकेनव्रतेनतपसाआदृतःसेवितःसन् अयंभावःजीवस्याविद्ययामिथ्यारूपदेहसंबंधःईश्वर
स्यतुयोगमाययाचिद्घनलीलाविग्रहाविर्भावइतिमहान्विशेषःअतस्तद्भजनान्मोक्षोपपत्तिरितिभगवद्भजनादेवतत्वज्ञान
मित्येतत्प्रपंचयिष्यन्ब्रह्मणोपितत्वज्ञानंतत्प्रसादादेवेतिदर्शयितुंइतिहासमाह ४ सइत्यादिनापरोगुरुःभक्तिरहस्योपदे

आत्मतत्वविशुध्यर्थंयथाहभगवान्वं ब्रह्मणेदर्शयन्रूपमव्यलीकव्रतादृतः ४ सआदिदेवोजगतां
परोगुरुः स्वधिष्ण्यमास्थायसिसृक्षयैक्षत तांनाध्यगच्छद्दृशमत्रसंमतांप्रपंचनिर्माणविधिर्यथाभवेत्
५ संचिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्विर्गदितंवचोविभुः स्पर्शेषुयत्षोडशमेकविंशंनिष्किंचनानांनृपयद्धनंविदुः ६

ष्टास्वधिष्ण्यंपद्मंआस्थायअधिष्ठायतस्यअधिष्ठानान्वेषणायपूर्वंजलेनिमग्नःपरावृत्तस्वधिष्ण्येस्थितेत्यर्थः ऐक्षनत
त्कथंस्रष्टव्यमित्यालोचितवान्तांदृशंप्रज्ञांअत्रसृष्टिविषयेसम्मतां अव्यभिचारिणींविधिःप्रकारः ५ सृष्टिंचिंतयन्कदाचि
द्व्यक्षरंवचोअंभसिउपाशृणोत्उपसमीपेश्रुतवान्तेअक्षरेदर्शयतिकादयोमावसानाःस्पर्शाःतेषुयत्षोडशंतकारःय
च्चैकविंशंपकारःतत्सोनिर्देशार्थंतदर्थमाह हेनृपनिःकिंचनानांत्यक्तधनानांयद्धिवःयेनतपोधनाइतिप्रसिद्धाः तच्च
द्विर्गदितंतपतपेतिलोण्मध्यमपुरुषैकवचनं तस्यवीप्सांमादरेणविधिरूपामशृणोत्इत्यर्थः ६ श्रीकृष्णार्पणमस्तु

भा० एवंनिशम्यतस्यवचसोवकुर्दिदृक्षयाततःप्रचलितःसन्दिशोविलोक्यपुनःस्वधिष्ण्यंआस्थायकेनचित्प्रत्यसनियुक्तइव द्वि०
२१ तच्चात्मनोहितंविमृष्यतपसिमनोधृतवानित्यर्थः ७ ततश्चअखिलानांलोकानांतापनंप्रकाशकंतपःअतएवतत्कृतवान
तपतएवेतितस्यवचसोर्थेअमोघंदर्शनंयस्यजितःअनिलःआत्मामनश्चयेनविजितानिउभयेंद्रियाणिज्ञानकर्मात्मका
नियेनतपतांतपश्चरतांमध्येतपीयान्अतिशयेनतपस्वी ८ तस्मैब्रह्मणेस्वलोकंवैकुंठाख्यंपरंश्रेष्ठंनयत्परंयस्मात्पर

निशम्यतद्वक्तृदिदृक्षयादिशोविलोक्यतत्रान्यमदृश्यमानः स्वधिष्ण्यमास्थायविमृष्यतद्धितंतपस्युपादिष्ट
इवादधेमनः ७ दिव्यंसहस्राब्दममोघदर्शनोजितानिलात्माविजितोभयेंद्रियः अतप्यतस्माखिललोकता
पनंतपस्तपीयांस्तपतांसमाहितः ८ तस्मैतल्लोकंभगवान्सभाजितःसंदर्शयामासपरंनयत्परं व्यपेतसं
क्लेशविमोहसाध्वसंस्वदृष्टवद्भिर्विबुधैरभिष्टुतं ९ प्रवर्ततेयत्ररजस्तमस्तयोःसत्वंचमिश्रंनचकालविक्रमः
नयत्रमायाकिमुतापरेहरेरनुव्रतायत्रसुरासुरार्चिताः १० श्यामावदाताःशतपत्रलोचनाःपिशंगवस्त्राः
सुरुचःसुपेशसः सर्वेचतुर्बाहवउन्मिषन्मणिप्रवेकनिष्काभरणाःसुवर्चसः ११ श्रीरामजयरामजय

सुत्कृष्टमन्यन्नास्ति सभाजितःप्रीतःतमेवलोकमनुवर्णयतिपंचभिःव्यपेताःसंक्लेशाःरागादयोयस्मात्स्वदृष्टवद्भिःसत्तु
ष्यवद्भिः यद्वास्वस्यदर्शनमस्तियेषांआत्मविद्भिरित्यर्थः ९ ताभ्यांमिश्रंसत्वंचनप्रवर्ततेकिंतुशुद्धमेवसत्वंकालविक्र
नाशःअपरेरागलोभादयोनसंतीतिकिमुतवक्तव्यंअनुव्रताःपार्षदाः १० श्यामाश्चतेअवदाताश्चउज्वलाश्चपद्मनेत्राःपी
तांबराःसुरुचःअतिकमनीयाःसुपेशसःअतिसुकुमाराःउन्मीषंतइवप्रभावंतोमणिप्रवेकामण्युत्तमास्तेयुतानिनिष्कानि २१
पदकान्याभरणानियेषांतेसुवर्चसःअतितेजस्विनः ११ श्रीराम ७ ७ ७ ७ ७ ७ ७

203
1281

प्रवालादिवत्वर्णोयेषांतेप्रस्फुरंतिकुंडलानिचमौलयश्चमालाश्चसंतियेषांपार्षदाननुवर्ण्यपुनरपिलोकमनुवर्णयति भ्रा
जिष्णुभिर्देदीप्यमानाभिः प्रमदोत्तमानांदिवःकांतयस्ताभिःविद्योतमानाःमहाविद्युभिवर्तमानाःसविद्युतःताभिःअभ्रा
वलीभिःतत्रविद्युतइवस्त्रियःअभ्रपंक्तयइवविमानानितन्मद्वलोकः श्रीसंपत्रूपिणीमूर्तिमतीमानंपूजांविभूतिभिर्ना
नाविभवैःप्रेंखःआंदोलःतंश्रिताकुसुमाकरोवसंतःतस्यानुगाःभ्रमराःतैर्विविधंगीयमानास्वयंतुप्रियस्यहरेःकर्मगायं

प्रवालवैडूर्यमृणालवर्चसःपरिस्फुरत्कुंडलमौलिमालिनः भ्राजिष्णुभिर्यःपरितोविराजतेलसद्विमाना
वलिभिर्महात्मनां ११ विद्योतमानःप्रमदोत्तमाद्युभिःसविद्युदभ्रावलिभिर्यथानभः श्रीर्यत्ररूपिण्यु
रुगायपादयोःकरोतिमानंबहुधाविभूतिभिः १२ प्रेंखंश्रितायाकुसुमाकरानुगैर्विगीयमानाप्रियकर्म
गायती ददर्शतत्राखिलसात्वतांपतिंश्रियःपतिंयज्ञपतिंजगत्पतिं १३ सुनंदनंदप्रबलार्हणादिभिस्स्व
पार्षदमुख्यैःपरिसेवितंविभुं भृत्यप्रसादाभिमुखंदृगासवंप्रसन्नहासारुणचारुलोचनं १४ किरीटिनंकुं
डलिनंचतुर्भुजंपीतांबरंवक्षसिलक्षितंश्रिया १५ अध्यार्हणीयासनमास्थितंपरंवृतंचतुःषोडशपंचशक्तिभिः १६

तीवभवति परिसेवितंसादरेणाभिपूज्यमानंयएवंभूतोलोकःतत्रतस्मिन्भृत्यानांप्रसादे अभिमुखंदृगेव आसवइवदृष्ट
णांहर्षकारीयस्यतंप्रसन्नहासमरुणलोचनंआननंयस्य वक्षसिस्थितयाचश्रियालक्षितमलंकृतमित्यर्थः १५
अध्यर्हणीयंवरिष्ठंसिंहासनंचतत्रःप्रकृतिपुरुषमहदहंकाररूपाःषोडशएकादशेंद्रियमहाभूताख्याःपंचतन्मा
त्रारूपाःयाःशक्तयःताभिर्वृतं १६ श्रीराम ७ श्री ७ श्री ७ राम ७ राम

स्वैर्भगैः स्वाभाविकैः ऐश्वर्यादिभिरितरत्रयोगेषु अध्रुवैरागंतुकैः असाधारणैरित्यर्थः एवंसत्यपिस्वधामनस्वस्वरूपएव रममाणं अतएवईश्वरं तस्यदर्शनेनयः आह्लादः तेनपरिप्लुतंव्याप्तंआंतरं अंतःकरणंयस्य हृष्यतीरोमांचितातनुर्यस्यप्रेमभरेण अश्रूणिलोचनेयस्यविश्वसृक्ब्रह्मापारमहंस्येन यथाज्ञानमार्गेण तंब्रह्माणंभगवान्बभाषे प्रजाविसर्गेकार्येनिजशासनार्हणंस्वयोगार्थंप्रजाविसर्गेषुसमुपस्थितमितिचान्वयः ईषत्स्मितेनरोचिर्दीप्तिशोभायस्याः तयागिरासि

सुकं भगैः स्वैरितरत्रवाध्रुवैः स्वएवधामन्रममाणमीश्वरं तद्दर्शनाह्लादपरिप्लुतांतरोहृष्यत्तनुः प्रेमभरा
श्रुलोचनः ननामपादांबुजमस्यविश्वसृक्यत्पारमहंस्येनपथाधिगम्यते १७ तंप्रीयमाणंसमुपस्थितंतदा
प्रजाविसर्गेनिजशासनार्हणं बभाषईषत्स्मितरोचिषागिराप्रियः प्रियंप्रीतमनाः करेस्पृशन् १८ कृतांज
लिप्रश्रयनम्रकंधरंविलोकनेनद्दशामेधयन् श्रीभगवानुवाच त्वयाहंतोषितोसम्यक्वेदगर्भसिसृक्षया
चिरंभृतेनतपसादुस्तोषः कूटयोगिनां १९ वरंवरयभद्रंतेअशेषंमाभिवांछितं ब्रह्मन्परिश्रमः श्रेयः पुं
सोमद्दर्शनावधिः २० मनीषितानुभावोयंममलोकावलोकनं यदुपश्रुत्यरहसिचकर्थपरमंतपः २१ राम

सृसयाहेतुनाचिरंसंभृतेनतपसा अहंसम्यक् तोषितः दुस्तोषः तोषयितुंनशक्यः १९ इतिमांश्रेयसाफलानांपरिश्रमः श्रमसाधनंप्रयासः मद्दर्शनावधिर्यस्यसतथा अतोधिकंतुपुनः फलंनास्तीत्यर्थः २० एतच्चमत्कृपयैवत्वयाप्राप्तमित्याह म
नीषितमिच्छातुर्यंद्रष्टव्यमितियाममेच्छातस्यानुभावोयंकोसौनमाह ममलोकस्यावलोकनंयत्तनुचैवेदंममैवतपोबले
नप्राप्तमितिस्वांतंत्वंमन्यस्वतत्मत्कृतेरपिमत्कृतत्वादित्याह रहसितपतपेतियच्चउपश्रुत्यपरमंतपश्चकर्थकृतवानसि २१ ३२

205
1981

नदपित्वांप्रतिमयैवादिष्टंउपदिष्टं कदातत्रतदास्त्र्यारंसेत्वयिकर्मणिकार्यार्थेविमोहितेसतिकिंचतपोनाममममेवशक्तिरित्याह तपोमेहृदयं अंतरंगाशक्तिआत्मस्वरूपंयस्यज्ञानमयंतपइतिश्रुतेः २२ ग्रसामिसंहरामिबिभर्मिपालयामिवीर्यंशक्तिः २३
अध्यक्षः अधिष्ठातायोगुहायांबुद्धाववस्थितः यद्यपिवेदत्थापिइत्युत्तरेणान्वयः २४ नाथमानस्ययाचमानस्य उपतप्यमानस्येतिवाहेनाथनाथयआशंसयप्रयच्छ नाथितंयाचितं नाथ नाधृनाथृयांच्योपतापैश्वर्याशीःषुनाथितमेवाह परं

प्रत्यादिष्टंमयातत्रत्वयिकर्मविमोहिते तपोमेहृदयंसाक्षादात्माहंतपसोनघ २२ सृजामितपसैवेदंग्रसा
मितपसापुनः बिभर्मितपसाविश्वंवीर्यंमेदुश्चरंतपः २३ ब्रह्मोवाच भगवन्सर्वभूतानामध्यक्षोवस्थि
तोगुहां वेदह्यप्रतिरुद्धेनप्रज्ञानेनचिकीर्षितं २४ तथापिनाथमानस्यनाथनाथयनाथितं परावरेय
थारूपेजानीयांतेत्वरूपिणः २५ यथात्ममायायोगेननानाशक्त्युपबृंहितं विलुंपन्विसृजन्गृह्णन्बि
भ्रदात्मानमात्मना २६ क्रीडस्यमोघसंकल्पऊर्णनाभिर्यथोर्णुते तथातद्विषयांधेहिमनीषांमयिमा
धव २७ भगवच्छिक्षितमहंकरवाणिह्यतंद्रितः नेहमानः प्रजासर्गंबध्येयंत्वदनुग्रहात् २८ राम

सूक्ष्मंअवरंस्थूलंचतेरूपंयथाजानीयां यथाचतंक्रीडसि तथापितद्विषयांमनीषांमयिधेहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितंविश्वंविलुंपन्संहरन्विविधंसृजन्बिभ्रत्पालयत् आत्मनास्वयमेवआत्मानंब्रह्मादिरूपंगृह्णन्क्रीडसि २५ ऊर्णतेतंतुभिः आत्मानंछादयतितत्किंस्पृहरुद्विग्नएवंतत्ज्ञानंप्रार्थयसेनेत्याह भगवतात्वयाशिक्षितंअनुशिष्टंअतंद्रितः अनलसः सन्करिष्यामि तर्हिकिमनेनतत्ज्ञानेनतत्राह यस्मादेवंभूतात्तवानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नपिअहंकारादिभिर्बद्धोनभवेयमिति २८

भा० अवश्यंचमदोभवितामतुकंचित्कालंमाभूदितिप्रार्थयतेयावदिति भोईशतेत्वयालौकिकस्यसख्युःसखेवाहंकृतःकरस्पर्शा
२२ दिनाममत्वेनसंमानितःसन्प्रजासर्गरूपेतवपरिकर्मणिसेवायांस्थितोअधिक्लवोअव्याकुलंएवयावज्जनंविभजामिउत्त प्र०
ममध्यमादिभेदेनसृजामितावत् तत्संमानादहमप्यजःस्वतंत्रइतिमानिनोमेसमुन्नद्धउत्कटोमदोमाभूत् यद्वामदोमा
समुन्नद्धमासमुन्नत्यतांउद्रिक्तोनभवेदित्यर्थः २९ ज्ञानंशास्त्रोत्थंविज्ञानमनुभवःरहस्यंभक्तिःसुगोप्यमपिवक्ष्यामीत्या
दीनिर्देशात्तस्यांगंसंधानंयावत्स्वरूपतःयथाभावोयथाप्रकारेणभवामीतियादृक्सत्ववान्यानिरूपाणिगुणाःक

यावत्सखासख्युरिवेशतेकृतःप्रजाविसर्गेविभजामिभोजनं अविक्लवस्तेपरिकर्मणिस्थितोमामेसमुन्नद्धमदो
जमानिनः २९ श्रीभगवानुवाच ज्ञानंपरमगुह्यंमेयद्विज्ञानसमन्वितं सरहस्यंतदंगंचगृहाणगदितंमया
३० यावानहंयथाभावोयद्रूपगुणकर्मकः तथैवतत्वविज्ञानमस्तुतेमदनुग्रहात् ३१ अहमेवासमेवाग्रे
नान्यद्यत्सदसत्परं पश्चादहंयदेतच्चयोवशिष्येतसोस्म्यहं ३२ श्रीरामजयरामजयजयरामनाराय·

र्माणिचयस्य ३१ एतदेवसम्यगुपदिशतियावानित्यस्यार्थंस्फुटयति अहमेवाग्रेसृष्टेःपूर्वमासंस्थितःनान्यत्किंचित्प्रधा
नंतस्याप्यंतर्मुखतयातदामय्येवलीनत्वात् अहंचतदाआसमेवकेवलंनचान्यदकरवंपश्चात्सृष्टेःअनंतरमप्यहमेवा
स्मि यदेतद्विश्वंतदप्यहमेवास्मि प्रलयेयोवशिष्येतसोप्यहमेवअनेनचानाद्यंतत्वादद्वितीयत्वाच्चपरिपूर्णोहमि
त्युक्तंभवतियत्सत्स्थूलंअसत्सूक्ष्मंपरंतयोःकारणं ३२ यथात्ममायायोगेनेत्यनेनमायायाअपिदृष्टत्वाद्ब्रह्म
माणोपयोगित्वाच्चमायांनिरूपयति ३२ श्री ७ राम ७ ७ ७ ७ ७ ७ ७ ७ ७ राम २२

2017
1980

ऋतेर्थंविनापिवास्तवमर्थंयद्यतःकिमप्यनिरुक्तंआत्मन्यधिष्ठानेप्रतीयेत सदपिचनप्रतीयेततत्आत्मनोममायांवि
द्यात् यथाआभासोद्विचंद्रादिरितिअर्थंविनाप्रतीतौदृष्टांतः यथातमइतिसतोप्रतीतौ ३३ यथाभावइत्येतत्स्पष्टयति
यथामहाभूतानिभौतिकेषु अनुसृष्टेरनंतरंप्रविष्टानितेषूपलभ्यमानत्वात् अप्रविष्टानिचैवप्रागेवकारणतयातस्मिविद्य
मानत्वात्तथातेषुभौतिकेष्वहंनचतेष्वहंएवंभूतामममसत्तेत्यर्थः ३४ साधनमाह आत्मनस्तत्वजिज्ञासुनाएतावदेवमेव
जिज्ञास्यंविचार्यंतदेवाह अन्वयःकार्येषुकारणत्वेनानुवृत्तिःकारणावस्थायांचतेष्वाव्यतिरेकःतथाजाग्रदाद्यवस्थासु

ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि तद्विद्यादात्मनोमायांयथाभासोयथातमः ३३ यथामहांतिभू
तानिभूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानितथातेषुनतेष्वहं ३४ एतावदेवजिज्ञास्यंतत्वजिज्ञासुना
त्मनः अन्वयव्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदा ३५ एतन्मतंसमातिष्ठपरमेणसमाधिना भवान्कल्प
विकल्पेषुनविमुह्यतिकर्हिचित् ३६ श्रीशुकउवाच संप्रदिश्यैवमजनोजनानांपरमेष्ठिनं पश्यतस्तस्यत
द्रूपमात्मनोन्यरुणद्धरिः ३७ अंतर्हितेंद्रियार्थायहरयेविहितांजलिः सर्वभूतमयोविश्वंससर्जेदंसपूर्ववत् ३८

तत्साक्षितयान्वयःव्यतिरेकश्चसमाध्यादौएवमन्वयव्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदाचतदेवात्मेति ३५ यत्प्रार्थितं
नेहमानःप्रजासर्गमितितत्प्रसादादकरोतिएतन्मतंसम्यगनुतिष्ठतिसमाधिनाचित्तैकाग्र्येणकल्पेषुविकल्पाःविविधाः
सृष्टयस्तेषुविमोहंकर्तृत्वाभिनिवेशंनयास्यतीति ३६ एवंसंप्रदिश्यउपदिश्यजनानांपरमेष्ठिनंपरमेआधिपत्येस्थितंब्रह्मा
णंआत्मनस्तद्रूपंन्यरुणत् अंतर्हितवान् अंतर्हितःइंद्रियार्थःप्रत्यक्षरूपंयेनतस्मैबद्धांजलिःसन् ३८ श्रीरामजयराम

भा० तदनंतरं पूर्वोक्तब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति षं च भिः प्रजानां भद्रमन्विच्छन् विमृशन् स्वेनस्वार्थकाम्यास प्रयोज
३४ नेच्छातयायमनियमानन्वतिष्ठत् ३९ रिक्थादीनां पुत्राणां मध्ये प्रियतमः पितरं सेवमानः शीलादिना ४० परितोषयामास किं द्वि०
मन्विच्छन् मायां वेदितुमिच्छन् ४१ निशम्य दृष्ट्वा जातेत्यर्थः मामां ४२ भगवता चतुःश्लोक्यासंक्षेपेणोक्तं विस्तरेण प्राह दशल
क्षणानि लक्षणीया अर्था विद्यंते यस्मिन् तत् ४३ तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेनाह नारद इति ४४ भागवताख्या

प्रजापतिर्धर्मपतिरेकदा नियमान् यमान् भद्रं प्रजानामन्विच्छन् अतिष्ठत्स्वार्थकाम्यया ३९ तं नारदः प्रियतमो
रिक्थादीनामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४० मायां विविदिशन् विष्णोर्मायेशस्य महामुनिः म
हाभागवतो राजन् पितरं पर्यतोषयत् ४१ तुष्टं निशम्य पितरं लोकानां प्रपितामहं देवर्षिः परिपप्रच्छ भवान्यन्मा
नुपृच्छति ४२ तस्मा इदं भागवतं पुराणं दशलक्षणं प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ४३ नारदः प्रा
ह मुनये सरस्वत्यास्तटे नृप ध्यायते ब्रह्म परमं व्यासायामिततेजसे ४४ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं
यथासीत्तदुपोद्धरव्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४५ इतिश्रीभागवते महापुराणे नवमोध्यायः समाप्तः ९

नेनैव तत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः इत्यादिना वैराजात्पुरुषादिदं
विश्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यामि इति ४५ इति श्रीभागवते महापुराणे द्वितीयस्कंधे टीका
यां नवमोध्यायः समाप्तः ९ ततो भागवतव्याख्याद्वारे वदशमे स्फुटं राजप्रश्नोत्तरं च कुमारो बादरायणिः
दशलक्षणं पुराणं प्राहेस्मुक्तं तानि दशलक्षणानि दर्शयति श्री राम ७ ७ ७ ७ ७ ७ ३४

209
1931

अत्रेति मन्वंतराणि ईशानुकथा श्चेति द्वंद्वः सर्गादयो यत्र दशार्था लक्ष्यंते १ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह दशमस्याश्रय
स्य विशुध्यर्थं तत्ज्ञानार्थं नवानां लक्षणं स्वरूपं एकस्यैव प्राधान्यान्नायं दोष इत्यर्थः नन्वत्रैवं प्रतीयते अत्राह श्रुतेन श्रुत्ये
वस्तुयादिस्थानेषु अंजसा साक्षाद्वर्णयंति अर्थेन तात्पर्यवृत्त्या च २ तत्र दाख्यानेषु सर्गादीनां प्रत्येकं लक्षणमाह भूतानि आ
काशादीनि मात्राणि रूपादीनि इंद्रियाणि च धीशब्देन महदहंकारो गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् तत्कर्तुः भू
तानां यद्विराड्रूपेण स्वरूपतश्च जन्म स सर्गः पुरुषो विराज तत्कृतः पौरुषः चराचरसर्गो विसर्ग इत्यर्थः ३ वैकुंठस्य भगवतो वि

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः १ दशमस्य विशुध्यर्थं नवानामिह
लक्षणं वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २ भूतमात्रेंद्रियधियां जन्म सर्ग उदाहृतः ब्रह्मणो गुणवैषम्या
द्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ४ अ
वतारानुचरितं हरेरस्यानुवर्तिनां पुंसामीशकथा प्रोक्ता नानाख्यानोपबृंहिताः ५ निरोधोस्यानुशयनमात्मनः
सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ६ आभासश्च निरोधश्च यतश्चाध्यवसीयते स आश्रयः
परं ब्रह्म परमात्मेति शब्द्यते ७

जयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणं तदनुगृहीतानां सतां मन्वंतराधिपतीनां
धर्मः कर्मणां वासनाः वेभूतं तु संताने उयंते कर्मभिः स तन्यंत इत्यूतयः यद्वा वध्यर्थान्न संश्लेद्वायत धातोरिदं रूपं उयंते कर्म
भिः बद्धंते श्लिष्यंत इति वा उतय इत्यर्थः ४ हरेरवतारानुचरितं अस्यानुवर्तिनां च सत्कथा ईशानुकथा प्रोक्ता इत्यर्थः ५ अस्यात्म
नो जीवस्य हरेर्योगनिद्रामनुप्रश्चात् शक्तिभिश्चोपाधिभिः सह शयनं लयः निरोधः अन्यथारूपं अविद्यया ध्यस्तं कर्तृत्वादि हि
त्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ६ आभासः सृष्टिः निरोधो लयश्च यतो भवति अध्यवसीयते प्रकाशते च स ब्रह्मेति पर
मात्मेति प्रसिद्धः आश्रयः कथ्यते ७

आश्रयस्वरूपमपरोक्षानुभावेनस्पष्टंदर्शयितुंअध्यात्मादिविभागमाह योयमध्यात्मिकः पुरुषः चक्षुरादिकरणानीमानीद्रष्टा
जीवः सएवाधिदैविकः चक्षुराद्यधिष्ठातासूर्यादिः तत्रैकस्मिन्नेवउभयद्विरूपाविच्छेदोयस्मात् सआत्माभौतिकः चतुर्गोल
काद्युपलक्षितोदृश्योदेहः पुरुषइतिपुरुषस्यजीवस्योपाधिः सवाएषपुरुषोन्नरसमयइत्यादिश्रुतेः एकमेकतराभावइत्येतेषा
मन्योन्यतापेक्षासिद्धित्वेननानात्मत्वंदर्शयति तथाहि दृश्यंविनातत्प्रतीत्यनुमेयंकरणंनसिध्यति नापिद्रष्टानचतद्विनाकरणप्र
वृत्त्यनुमेयस्तदधिष्ठातासूर्यादिः नचतंविनाकरणंप्रवर्तते नचतद्विनादृश्यमित्येकतरस्याभावेएकंनोपलभामहे तत्रतदात्रित

योध्यात्मिकोयंपुरुषः सोसावेवाधिदैविकः यस्तत्रोभयविच्छेदः सस्मृतोह्याधिभौतिकः ८ एकमेकतराभावेयदा
नोपलभामहे त्रितयंतत्रयोवेदसआत्मास्वाश्रयाश्रयः ९ श्रीरामजयरामजयजयराम कृष्णायनमः

यंअलोचनात्मकेनप्रत्ययेनयोवेदसाक्षितयापश्यति सपरमात्मा आश्रयः तेषामपिपरस्परमाश्रयत्वमस्त्येवेतितद्व्यवच्छेदा
र्थंविशेषणंस्वाश्रयः अनन्याश्रयः सचासावन्येषामाश्रयश्चेतितथाचभगवान्वक्षति दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्य
ति यःस्वतःखे आत्मायदेषामपरोयआद्यः स्वयानुभूत्याखिलसिद्धिरिति एवंतेनवर्व्याभिचारित्वात्तेषांमायामयत्वमप्युक्तं
अतएवपुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरित्यनेनानोन्योविरोधोपिपरिहृतः ९उक्तमेवाध्या
त्मादिविभागंप्रपंचयन् यउताहंत्वयापृष्टोवैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्येइतिप्रतिप्रतिज्ञातं तदुत्पत्तिप्रकारमाह २८

211
1981

पुरुषइत्यादिना पुरुषोवैराजः अंडंविनिर्भिद्यपृथक्कृत्वविनिर्गतः पृथक्स्थितइत्यर्थः १० अयनंस्थानंअन्विच्छन्विमृशन्यतः
शुचिः स्वयंअतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः अस्राक्षीत् ससर्ज अप्सुवासंनारायणंनामनिरुक्त्यास्पष्टयति तेनअप्सु
वासेनयदस्मात्पुरुषोनरः तस्माउद्भवोयासांताः नाराः अपो अयनंअस्येतिनारायणइत्यर्थः तदुक्तं अपोनाराइतिप्रोक्ताअ
पोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणस्मृतइति ११ तस्यप्रभावमाह द्रव्यंउपादानं कर्मादीनिनिमित्तानि जीवो

पुरुषोंडंविनिर्भिद्ययदासौसविनिर्गतः आत्मनोयनमन्विच्छन्आपोस्राक्षीच्छुचिः शुचीः १० तास्ववात्सीत्स्व
सृष्टासुसहस्रपरिवत्सरान् तेननारायणोनामयदापःपुरुषोद्भवा ११ द्रव्यंकर्मचकालश्चस्वभावोजीवए
वच यदनुग्रहतः संतिनसंतियदुपेक्षया १२ एकोनानात्वमन्विच्छन्योगतल्पात्समुत्थितः वीर्यंहिरण्मयंदेवो
माययाव्यसृजत्त्रिधा १३ अधिदैवमथाध्यात्ममधिभूतमितिप्रभुः अथैकंपौरुषंवीर्यंत्रिधाभिद्यतततच्छृणु १४
अंतःशरीरआकाशात्पुरुषस्यविचेष्टितः ओजः सहोबलंजज्ञेततः प्राणोमहानसुः १५ अनुप्राणंतियं
प्राणाः प्राणंतंसर्वजंतुषु अपानंतमपानंतिनरदेवमिवानुगाः १६

भोक्ता यस्यानुग्रहात्संतिकार्यक्षमाभवंतीत्यर्थः १२ योगएवतल्पंशय्यातस्मात्वीर्यंगर्भरूपंदेहं हिरण्मयमिवप्रकाशंव
कुलं १३ तस्यैवप्रपंचः अथेत्यादिना अंतःशरीरेयआकाशः तस्मात्क्रियाशक्त्यात्त्रिविधंचेष्टमानस्यसतः ओजः इंद्रिय
शक्तिः सहोमनःशक्तिः बलंदेहशक्तिः ततश्चत्स्यात्मकात्सूक्ष्माद्रूपात्प्राणः सूत्रात्मा महान्मुख्यः असुः प्राणः सर्वेषां १५ मह
त्वंदर्शयति प्राणः इंद्रियाणि यंप्राणंतंचेष्टांकुर्वंतंअनुपश्चात्प्राणंतिचेष्टांकुर्वंति अपानंतंचेष्टांत्यजंतं अनुपानंतिचेष्टांत्यजंति
राजानमनुभृत्याइव १६

क्षिपता चालयिता निमित्तेन क्षुत्तृडादिकं च विराड्जीवाभेदेनोपासनार्थमुक्तं ततः अजायेतेस्मततः अक्षतः भक्षयितुमिछतइत्यर्थः प्राक्प्रथमंनिरभिद्यतविभक्तमभूत् १७ तानुअधिष्ठानं जिह्वाइंद्रियं नानारसोविषयः वरुणश्चदेवताज्ञातव्य एवंसर्वत्रअधिष्ठानमिंद्रियंदेवताविषयः इत्येतच्चतुष्टयं अनुक्तमप्यूह्यं १८ विवक्षोः वक्तुमिछोर्मुखतएव वह्निर्देवता वागिंद्रियं व्याहृतिर्भाषणं तयोरिति १९ इंद्रियदेवताधीनत्वंकर्मणोदर्शयति नासत्ति प्राणवायोरोधूयतिरोधूयमाने अत्यंतंप्रज्वलतिसति

प्राणेनक्षिपताक्षुत्तृडंतराजायतेप्रभोः पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत १७ मुखतस्तालुनिर्भिन्नं
जिह्वातत्रोपजायते ततोनानारसोजज्ञेजिह्वयायोधिगम्यते १८ विवक्षोर्मुखतोभूम्नोवह्निर्वाक्व्याहृतंत
योः जलेवैतस्यसुचिरंनिरोधः समजायत १९ नासिकेनिरभिद्येतांदोधूयतिनभस्वति तत्रवायुर्गंधवहो
घ्राणोनसिजिघृक्षतः २० यदात्मनिनिरालोकमात्मानंचदिदृक्षतः निर्भिन्ने अक्षिणीतस्यज्योतिश्चक्षुर्गुण
ग्रहः २१ बोध्यमानस्यऋषिभिरात्मनस्तज्जिघृक्षतः कर्णौचनिरभिद्येतांदिशः श्रोत्रंगुणग्रहः २२

तत्रचनासिकायांवायुर्देवता गंधंवहतीतितथा अनेनगंधोविषयोदर्शितः घ्राणेंद्रियंजिघृक्षतः गंधंग्रहीतुमिछतः २०
निरालोकंप्रकाशशून्यंआसीदितिशेषः निर्मक्षिकमितिवदेकवद्भावः तदा आत्मानंदेहं चकारादन्यच्च वस्तुदिदृक्षतः अक्षिणीस्थानं ज्योतिः आदित्योदेवताः चक्षुरिंद्रियं ततोगुणस्यरूपस्यग्रहः ग्रहणं अनेनरूपंविषयोदर्शितः २१ ऋषिभिर्देवैर्बोध्यमानस्यततः आत्मनः प्रबोधनंग्रहीतुमिछतः ततोगुणग्रहः शब्दग्रहणं २२ श्रीराम ७ ७ ७ ७

213
1381

मृदुत्वंच काठिन्यंच लघुत्वंच आडच्छत्वंईषद्दुष्णत्वं शीततांचेत्यर्थः यद्यप्युष्णत्वमपिइंद्रियविषयएव तथापितस्यजिघृक्षाभावादुष्णामित्युक्तं गुर्वुष्णपाठयणादेशः छांदसः वस्तुतएतान्धर्मान्जिघृक्षतः त्वक्निर्भिन्ना त्वगिंद्रियाधिष्ठानंचर्मजातमित्यर्थः तस्यांरोमाणिइंद्रियं महीरुहाश्चदेवताजाताः वस्तुनिहस्तेनालितेलघुत्वगुरुत्वयोर्ज्ञानात्तयोरपित्वगिंद्रियविषयत्वमितिपौराणिकाः २३ तत्रात्वचि अंतर्बहिश्चवातोवृतः आवृत्यस्थितः कर्तरिनिष्ठा कथंभूतः त्वचालब्धोगुणस्पर्शोयेन अयमर्थः त्वगिंद्रियमेवबहिः कंडूतिसहितंस्पर्शंगृह्णत्लोमशब्देनउच्यते तत्रमहीरुहाणांदेवत्वं अंतर्बहिश्चस्पर्शंगृह्णत्तदेवत्वक्शब्देनउच्यते तत्रवातोदेवता तथाचतृतीयवक्ष्यति त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः अंशेनलोमभिः कंडूंयैरसौप्रतिपद्यते निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोविशत् प्राणेनांशेनसंस्पर्शंयेनासौप्रतिपद्यतइति तत्र चर्माणीति चर्मोपलक्षितात्व

वस्तुनोमृदुकाठिन्यंलघुगुर्वोष्णशीततां जिघृक्षतस्त्वक्निर्भिन्नातस्यांरोममहीरुहाः २३ तत्रचांतर्बहिर्वायुः
त्वचालब्धगुणोवृतः हस्तौरुरुहतुस्तस्यनानाकर्मचिकीर्षया २४ तयोस्तुबलवानिंद्र आदानमुभयाश्रयं
गतिंजिगीषतः पादौरुरुहातेभिकामिकां २५ पद्भ्यांयज्ञः स्वयंहव्यंकर्मभिः क्रियतेनृभिः २६ निरभिद्यतशि
श्नोवैप्रजानंदामृतार्थिनः उपस्थआसीत्कामीनांप्रियंतदुभयाश्रयं २७

गीत्यर्थः प्राणेनांशेनेति प्राणवायुव्याप्तेनत्वगिंद्रियेणेत्यर्थः वक्तृचश्रुतौ त्वकएवांशोनिर्दिष्टः त्वग्भिरभिद्यत त्वचोलोमानिलोमभ्यओषधिवनस्पतयइति रुरुहतुः निर्भिन्नौ २४ बलमिंद्रियं इंद्रोदेवता तदुभयाश्रयं आदानंकर्म अभिकामिकं अभिष्टांविहितामित्यर्थः २५ पद्भ्यांसहयज्ञोविष्णुरेवस्वयंतदधिष्ठातृरूपेणस्थितः कर्मभिरिति गत्याख्यकर्मशक्तिरिंद्रियमुक्तं हव्यंक्रियतइतिगतिप्राप्यं यज्ञार्थंद्रव्यंविषयइत्युक्तं नृभिरिति व्यष्टिजीवेष्वपिइयमेवरीतिदर्शयन्नराधिकारित्वंयज्ञादीनांदर्शयति २६ प्रजाअपत्यं आनंदोरतिः अमृतंस्वर्गादितदर्थिनः शिश्नोधिष्ठानं उपस्थइंद्रियं प्रजापतिश्चासीदितिज्ञेयं तदुभयाश्रयं कामीनांस्त्रीणांसंभोगाख्यांसंबंधिप्रियंसुखंविषयः २७ श्रीराम राम ७ ७ ७ ७ ७ ७ ७ ७

भा० ३७ धातुमलं भुक्तान्नादीनामसारांशंत्यक्तुमिच्छोः गुदपायुमित्रोत्सर्गाः अधिष्ठानेंद्रियदेवताविषयाः २८ पुर्याः देहात्पुरः देहांतराणि द्वि०
आसिसृप्सोःसर्वतोगंतुमिच्छाः निरभिद्यतेत्सनुषंगः अपानतः अपगच्छतः पृथक्त्वंमरणं नाभ्यादीनाम्यधिष्ठानादीनि नाभ्यांहिप्रा
णापानयोर्बंधविश्लेषं मृत्युरितिप्रसिद्धं २९ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्च आंत्राणि च नाड्यश्चासन् तत्र कुक्षिरधि
ष्ठानं अंत्राण्यन्नसंग्रहेकरणमिंद्रियस्थानीयं नाड्यस्तु पानसंग्रहे तयोनाड्यंत्रवर्गयोः क्रमेणनद्यः समुद्राश्चदेवतोतुष्टिरुदर
भरणं पुष्टिस्तुरसपरिणामस्तौल्यं तदाश्रये तदुभयनिमित्ते तत्रान्नसंग्रहेच्छोः कुक्षात्रसमुद्रतुष्टयइति चतुष्टयं पेयसंग्रहहेच्छोः

उत्सिसृक्षोर्धातुमलंनिरभिद्यतवैगुदं ततः पायुस्ततोमित्रउत्सर्गउभयाश्रयः २८ आसिसृप्सोःपुरःपुर्यानाभि
द्वारमपानतः तत्रापानस्ततोमृत्युः पृथकत्वमुभयाश्रयं २९ आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः न
द्यःसमुद्राश्वतयोःतुष्टिःपुष्टिस्तदाश्रये ३० निदिध्यासोरात्ममायांहृदयंनिरभिद्यत ततोमनस्ततश्चंद्रःसं
कल्पः काम एव च ३१ त्वचर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्तप्राणोव्योमांबुवायुभिः ३२

कुक्षिनाडीनदीपुष्टयइतिविवेकः ३० निदिध्यासोः नितरांचिंतयितुमिच्छोः कामोभिलाषः हृदयंमनश्चंद्रसंकल्पाः अधिष्ठा
नादयः ३१ तदेवमधिदैवाधिभेदंविभज्यउक्त्वा तदंशभूतानां धात्वादीनांस्वरूपरूपमाह त्वगिति द्वाभ्यां त्वक्स्थूलंचर्म त
दुपरिस्थितं सूक्ष्मं चर्मत्वगादयो अरुध्यंताः इंद्रैकवद्भावेननिर्दिश्यः सप्तये धातवः तेभूम्यप्तेजोमयाः तेषांपांचभौति
कत्वेपि वाय्वाकाशयोराहाररूपेण संवर्धकताभावादेवमुक्तं ३२ श्रीरामजयरामजयजयराम नारायणवासुदेव ३७

215/1981

गुणात्मकानिर्गुणेषु शब्दादिष्वात्मायेषांविषयाभिमुखस्वभावानीत्यर्थः गुणाः शब्दादयः भूतादिरहंकारः ततःप्रकर्षेण भवंती
तितथा अहंकारकल्पितत्वाभनस्वभावाः नवस्तुतस्तथेत्यर्थः अत्रहेतुः यतोमनएवसर्वविकाराणांआत्मास्वरूपंबुद्धिस्तुतथा
भूतार्थविज्ञानरूपिणी नतुपरमार्थग्राहिणीतिवैराग्यार्थमुक्तं अनेनैवबुद्धिमनसोःस्वरूपंचोक्तं ३३ उपसंहरति एतदिति प्र
कृत्यासहाष्टभिः ३४ स्थूलमुक्त्वासूक्ष्मंसमष्टिलिंगशरीरमाह अतः परम अस्यकारणभूतंसूक्ष्मं अतींद्रियं ततःअव्यक्तंतत्कु
तः यतोनिर्विशेषणं तत्कुतः अनादिमध्यनिधनंउत्पत्तिस्थितिप्रलयशून्यं नित्यं सदेकरूपं अपक्षयादिशून्यमित्यर्थः अत

गुणात्मकानींद्रियाणिभूतादिप्रभवागुणाः मनःसर्वविकारात्माबुद्धिर्विज्ञानरूपिणी ३३ एतद्भगवतोरूपंस्थूलं
तेव्याहृतंमया मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३४ अतःपरंसूक्ष्मतममव्यक्तंनिर्विशेषणं अनादिमध्यनि
धनंनित्यंवाङ्मनसःपरं ३५ अमुनीभगवद्रूपेमयातेअनुवर्णिते उभेअपिनगृह्णंतिमायासृष्टेविपश्चितः ३६
सवाच्यवाचकतयाभगवान्ब्रह्मरूपधृक् नामरूपक्रियाधत्तेसकर्माकर्मकःपरः ३७ प्राजापतीन्मनून्देवान्
ऋषीन्पितृगणान्पृथक् सिद्धचारणगंधर्वान्विद्याध्राःसुरगुह्यकान् ३८ राम श्री ७ ७

एववाङ्मनश्चेति द्वंद्वैक्यं तस्मात्परं ३५ उपासनार्थंभगवत्यारोपितंरूपद्वयमपवदति अमुनीइतिनगृह्णंति वस्तुतोनांगीकुर्वं
ति यतोमायासृष्टे ३६ यद्रूपगुणकर्मकदितियदुक्तंभगवताब्रह्माणंप्रति तत्प्रपंचयितुंब्रह्मादिरूपाणितत्कर्माणिचाह सइत्या
दिना इत्थंभावेनेस्ततः प्राक्तनेनग्रंथेनसभगवान्ब्रह्मरूपधृक् वाच्यवाचकतया वाचकतयानामादि वाच्यतयारूपाणिक्रि
याश्चधत्तेसृजतीत्यर्थः माययासकर्मासव्यापारः सन्वस्तुतस्तु अकर्मकः ३७ एतत्प्रपंचयति प्रजापतीनितिसार्धैस्त्रिभिः द्वि
तीयानांधत्तइत्यनेनान्वयः तत्रप्राजापत्यादीनिनामानितद्वाच्यानिरूपाणि तत्कर्माणिचज्ञेयानि पृथक्त्वत्तदवांतरभेदेन ३८

भा० गिरीनिति अस्यानंतरंनृपेतिसंबोधनं ४० द्विविधाः स्थावरजंगमरूपेण चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण ०जल टि०
३८ स्थलनभांसिओकांसियेषांतानपि धत्तइतिपूर्वेणान्वयः यच्चराज्ञाप्रष्टंयावत्यकर्मगतयोयादृशीद्विजसत्तमेतितस्यापिप्रसंगा
दनेनैवोत्तरमाह कुशलाः उत्तमाः अकुशलानीचाः मिश्राइतिपदांतरमिश्रामध्यमाः कर्मणांपुण्यापुण्यामिश्राणांगतयःफ

किन्नराप्सरसोनागान्सर्पान्किंपुरुषोरगान् मातरक्षःपिशाचांश्चप्रेतभूतविनायकान् ३९ कूष्मां
डोन्मादवेतालान्यातुधानान्ग्रहानपि खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् ४० द्विवि
धाश्चतुर्विधायेन्येजलस्थलनभौकसः कुशलाकुशलामिश्राः कर्मणांगतयस्त्विमाः ४१ सत्वंरजस्त
मइतितिस्रः सुरनृनारकाः तत्राप्येकैकशोराजन्भिद्यंतेगतयस्त्रिधा ४२ यदैकैकतरोन्याभ्यांस्वभावउपहन्यते ४३

लानि ४१ सत्वादिभेदेनकर्मगतिवैचित्र्यंप्रपंचयति सत्वमितिसार्द्धेन सत्वादयस्तिस्रागतयः सुरादिशब्दाऋष्यादीनामुप
लक्षणार्थः ४२ अन्याभ्यांगुणाभ्यांस्वभावोगुणः उपहन्यते अनुविध्यते ४३ राम श्रीराम ७ ७ ३८

217/1981

ब्रह्मरूपेणस्रष्टृत्वमुक्त्वाविष्णुरूपेणपालकत्वमाह सएवभगवान्तिर्यगाद्यवतारैरिदंविश्वंस्थापयन्पालयन्धर्मरूपेण
पुष्णाति भोगैः संवर्द्धयति ४४ रुद्ररूपेणसंहर्तृत्वमाह ततइति आत्मनः सकाशाद्यदिदंसृष्टंतत्संनियच्छति संहरति ४५
कर्तृताद्यपवादेनदशमस्यशुद्धिमाह इत्थंभावेनस्रष्टृत्वादिरूपेण तस्माद्वाएतस्मादात्मनः आकाशः संभूतः सोकाम

सएवेदंजगद्धाताभगवान्धर्मरूपधृक् पुष्णातिस्थापयन्विश्वंतिर्यङ्नरसुरादिभिः ४४ ततः
कालाग्निरुद्रात्मायत्सृष्टमिदमात्मनः संनियच्छतिकालेनघनानीकमिवानिलः ४५ इत्थं
भावेनकथितोभगवान्भगवत्तम नेत्थंभावेनहिपरंद्रष्टुमर्हंतिसूरयः ४६ नास्यकर्माणि
जन्मादौपरस्यानुविधीयते कर्तृत्वप्रतिषेधार्थंमाययारोपितंहितत् ४७

यत बहुस्यांप्रजायेयेत्यादिश्रुत्याकथितः सूरयस्तुपरंकेवलमेवरूपेणैवद्रष्टुंनार्हंति ४६ तर्हिंयतः अस्यविश्वस्यज
न्मादौकर्मणिपरस्येश्वरस्यइत्थंभावः कर्तृत्वंनास्ति श्रुत्यापितात्पर्येणनप्रतिपाद्यते किंतु अनुविधीयते अनुवर्त्यते
किमर्थंकर्तृत्वप्रतिषेधार्थं हियतोमाययातदारोपितंप्रकाशितं तथाचश्रुतिः निष्कलंनिष्क्रियं शांतंनिरवद्यंनि
रंजनं इंद्रोमायाभिःपुरुरूपईयतेइत्याद्याः ४७ श्रीरामजयरामजयजयराम हरेवासुदेवहरेनारायणवासु

उक्तमर्थमुपसंहरति अयंत्विति ब्रह्मणः संबंधीकल्पोमहाकल्पः विकल्पोअवांतरः तत्सहितःउदाहृतः उदाहरणत्वेनसं
क्षेपतउक्तः कथंभूतः यत्रमहाकल्पेप्राकृतामहदादिसर्गाः अवांतरकल्पेचवैकृताःस्थावरादिसर्गाः इत्ययंविधिःप्रका
रः अन्यैर्महाकल्पादिभिःसाधारणः ४८ वक्ष्यमाणंविस्तारंप्रतिजानीते परिणामंस्थूलसूक्ष्मंच कल्पलक्षणंईयान् एवं

अयंतुब्रह्मणःकल्पःसविकल्पउदाहृतः विधिःसाधारणोयत्रसर्गाःप्राकृतवैकृताः ४८ परिमा
णंचकालस्यकल्पलक्षणविग्रहं यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृणु ४९ शौनकउवाच
यदाहभगवान्सूतक्षत्ताभागवतोत्तमः चचारतीर्थानिभुवःस्त्यक्त्वाबंधूंत्सुदुस्त्यजान् ५० कुत्र
कौषारवेस्तस्यसंवादोध्यात्मसंमतः यद्वैसभगवांतस्मैपृष्टस्तत्त्वमुवाचह ५१ ब्रूहिनस्तदिदंसौ
म्यविदुरस्यविचेष्टितं बंधुत्यागनिमित्तंचतथैवागतवान्पुनः ५२

रूपंविभागंचयथाविस्तरेणपुरस्तात्तृतीयस्कंधेव्याख्यास्यामीतत्रचपाद्मंकल्पंतथाइति कार्त्स्न्येनव्याख्यायमानंशृणु
४९ यदर्थंसृष्ट्यादिनिरूपणंतदेवसाक्षात्श्रोतुकामः कथांतरंपृच्छति यदाहेति भुवःसंबंधीनितीर्थानि यद्वाभुवःक्षेत्राणि
चेति ५० कौषारवेर्मैत्रेयस्यतस्यक्षत्तुः अध्यात्मज्ञानसंश्रितःसंवादः ५१ पुनरागतवान् तत्रचनिमित्तंब्रूहि ५२ रामकृ ३९

219
1981

राजापृष्टः अयमर्थः यत्त्वयंपृच्छथ इदमेवराजापिशुकंपृष्टवान् शुकोपिविदुरमैत्रेयसंवादंपुरस्कृत्ययेपूर्वंराज्ञाकृताःप्र
श्नाःतदनुसारेणसर्वंपुराणार्थमवोचत् तदेवाहंवोभिधास्यामि तथैवशृणुतेति ५३ इतिश्रीभागवतेमहापुराणेटीका
यांश्रीधरस्वामिविरचितायांभावार्थदीपिकायांद्वितीयस्कंधेदशमोध्यायः १० श्रीमद्भागवतंयेनसप्रसन्नमुखतोमि

सूतउवाच राज्ञापरिक्षितापृष्टोयदवोचन्महामुनिः तद्वोभिधास्येशृणुतराज्ञःप्रश्नानुसारतः ५३ इतिश्री
भागवतेमहापुराणेद्वितीयस्कंधेअष्टादशसहस्र्यांसंहितायांदशमोध्यायःसमाप्तः १० श्रीकृष्णार्पणमस्तु

तं ब्रह्मनारदयोःप्रोक्तंतंवंदेगुरुमीश्वरं यत्सूत्रयंत्रितंचित्रंनरीनर्ति जगत्त्रयं संतस्तमेवपृच्छंतुयदत्रलिखितंमम द्वि
तीयस्कंधेसंबंधपदभावार्थदीपिका उद्दीपितात्वियंसद्भिर्यथास्यात्तत्प्रदीपकं ईक्षतामीक्षयासंतःक्षम्यतांममसाहसं
मयाहिस्वीयबोधायकृतमेतन्नसर्वतः इतिद्वितीयस्कंधदीपिकासमाप्ता राम॰जयरामजयजयरामहरयेन॰

इतिद्वितीयस्कंधःसमाप्तः

221/1981

भा०

श्रीगणेशायनमः ॐ नमोभगवतेवासुदेवाय॥ तृतीयेतुत्रयस्त्रिंशदध्यायैः सर्गवर्णनं ईशेक्षयागुणक्षोभात्सर्गोब्रह्मांडसं
संभवः १ तत्रतुप्रथमेध्यायेबंधून्हित्वागतायुषः निर्गतस्योद्धवेनादौसंवादः क्षत्तुरुच्यते २ अथतृतीयस्कंधव्याख्या
भगवद्ब्रह्मसंप्रोक्तंसंक्षिप्तंवर्णितंपुरा प्राह्भागवतंशेषप्रोक्तंविस्तरतः पुनः ३ द्वेधाहिश्रीभागवतसंप्रदायप्रवृत्तिः
एकतःश्रीनारायणाद्ब्रह्मनारदादिद्वारेण अन्यतस्तुविस्तरतःशेषात्सनत्कुमारसांख्यायनादिद्वारेण तत्रद्वितीय
श्रीनारायणब्रह्मसंवादेनसंक्षेपतः चतुःश्लोक्याभागवंनिरूपितं तदेवब्रह्मनारदसंवादेनदशलक्षणतयाकिंचिद्विस्त
रेणोक्तं तदेवशेषोक्तमतिविस्तरतोवक्तुंतृतीयाद्यारंभः तत्रतृतीये प्रथमंक्षत्तुर्मैत्रेयसंगमश्चतुर्भिरध्यायैः ततोष्ट

श्रीमंगलमूर्तयेनमः श्रीशुकउवाच एवमेतत्पुराष्टोमैत्रेयोभगवान्किल क्षत्त्रावनंप्रविष्टेनत्यक्त्वा
स्वगृहमृद्धिमत् १ यद्वाअयंमंत्रकृद्वोभगवानखिलेश्वरः पौरवेंद्रगृहंहित्वाप्रविवेशात्मसात्कृतं २ श्रीकृष्ण

भिः सविसर्गप्रपंचः ततोविसर्गप्रस्तावेनसप्तभिर्वाराहावतारः ततएकेनविसर्गसमाहारः तत्प्रसंगेनचतुर्भिः कपिलाव
तारः ततोनवभिः कपिलाख्यानमितित्रयस्त्रिंशताध्यायैस्तृतीयस्कंधप्रवृत्तिः तत्रद्वितीयांतेपरिमाणंचकालस्यकल्पल
क्षणविग्रहंयथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृण्वितिप्रतिज्ञातमर्थंविस्तरेणानिरूपयितुंइतिहासंप्रस्तौति
एवमितिद्वाभ्यां ऋद्धिमत्सर्वसंपद्भिःसंपूर्णम् १ किंचअतिश्लाघ्यंत्यागानर्हमित्याह यद्वेतिप्रसिद्धंगृहंवःपांड
वानांमंत्रकृत्दौत्यकर्तासन् अयंश्रीकृष्णःबुद्धिसंनिधानादयमितिनिर्देशः पौरवेंद्रोदुर्योधनः तस्यगृहंहित्वाअना
हूतएवप्रविवेशतत्रहेतुः। आत्मसात्कृतं आत्मीयत्वेनगृहीतं २ हरेकृष्णहरेकृष्णकृष्णकृष्णहरेहरे श्रीराम् श्रीः
१

223/1931

कुत्रसंगमआसबभूव ३ वरीयसिश्रेष्ठेअल्पस्यार्थस्योदयोयस्मात्तथाभूतोनभवति साधुवादेनसतामनुमोदने
नउपबृंहितःसंवर्द्धितः यद्वा साधोर्मैत्रेयस्यवादेनोत्तरेणश्लाधितइत्यर्थः त्यागानर्हस्यापित्यागेहेतुत्वेनकौरवापरा
धानाह ४ यदेत्यादिदशभिः एतेषांचतदासक्षत्ताअयादित्येकादशेक्रियासंबंधः यविष्टस्यकनिष्ठस्यपांडोःविबंधून्नृप
त्वहीनान् ५ कुरुदेवस्ययुधिष्ठिरस्यदेव्याःद्रौपद्याःआत्मनःस्नुषायाःस्वीयैस्वस्रैरश्रुभिःस्वकुचकुंकुमानिरपुस्त्रीणां
८ राजोवाच कुत्रक्षत्तुर्भगवतामैत्रेयेणाससंगमः कदावासहसंवादएतद्वर्णयनःप्रभो ३ नह्यल्पार्थोदयस्तस्य
विदुरस्यामलात्मनः तस्मिन्वरीयसिप्रश्नः साधुवादोपबृंहितः ४ सूतउवाच सएवमृषिवर्योयंपृष्टोराज्ञापरी
क्षिता प्रत्याहतंसुबहुवित्प्रीतात्माश्रूयतामिति ५ शुकउवाच यदातुराजास्वसुतानसाधून्पुष्णन्नधर्मेणवि
नष्टदृष्टिः भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवनेददाह ६ यदासभायांकुरुदेवदेव्याःकेशाभिमर्शंसुत
कर्मगर्ह्यं नवारयामासनृपःस्नुषायाःस्वास्रैर्हरंत्याःकुचकुंकुमानि ७ द्यूतेत्वधर्मेणजितस्यसाधोःसत्यावलंबस्य
वनागतस्य नयाचतोदात्समयेनदायंतमोजुषाणोयदजातशत्रोः ८ यदाचपार्थप्रहितःसभायांजगद्गुरुर्यानिज
गादकृष्णः नत्तानिपुंसाममृतायनानिराजोरुमेनेक्षतपुण्यलेशः ९
वातद्भर्तृवधेनहरंत्याः ७ सत्यावलंबस्यसत्याश्रयस्यवनात्प्रत्यागतस्यसमयेनपूर्वकृतेनदायंयाचमानस्यपत् यदानआदात्
तमोर्हजुषमाणःपुत्रंसेवमानःअविवेकंवा ८ यानिवचनानिपुंसांभीष्मादीनाममृतायनानिअमृतप्रावीणि राजाधृतराष्ट्रःदुर्योधनोवा
उरुबहुनमेने क्षतोनष्टःपुण्यलेशोयस्यसः नसुखकीर्तिर्धर्मादिहेतुःकिंतुराज्यप्राप्तिमात्रहेतुःपुण्यलेशएवासीत् तस्यापिन
ष्टत्वादनादृतवानित्यर्थः इदानींविदुरस्यैवकृतंपराभवंदर्शयतिषड्भिः ९

यदापूर्वजेनमंत्रापहूतोंनएवगृहंप्रविष्टोमंत्रंपृष्टःसन् अथअनंतरंतदाह किंमंत्रिणोयापियद्वैदुरिकंविदुरवाक्यमितिप्रसिद्धंव
दंतितदाह अजातशत्रोरितित्रिभिः तवआगः अपराधंसहमानस्यदायंप्रतियछदेहि यत्रापराधेअनुजैःसहवर्तमानोवृकोदरवृपोभ
हिः क्रोधेनश्वसन्वर्त्ततेयस्मात्त्वमत्यर्थंबिभेषिममतादृशाबहवःपुत्राःसंतीतिगर्वंमाकृथाइत्याह पार्थाक्कमुकुंदआत्मीय
त्वेनगृहीतवान्सदेवः तत्रापिभगवान् नतुप्राकृतःकिंच सहक्षितिदेवैर्विप्रैश्चेंद्रादिभिर्वर्त्तमानः यतोसौतत्रैवविप्रादेवाश्चेत्य

यदोपहूतोभवनंप्रविष्टोमंत्रायपृष्टःकिलपूर्वजेन तथाहतंमंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति १० अजा
तशत्रोःप्रतियछदायंतितिक्षतोदुर्विषहंतवागः सहानुजोयत्रवृकोदराहिःश्वसन्रुषायत्वमलंबिभेषि ११ पा
र्थांस्तुदेवोभगवान्मुकुंदोगृहीतवान्सक्षितिदेवदेवः आस्तेस्वपुर्यांयदुदेवदेवोविनिर्जिताशेषनृदेवदेवः १२ सएव
दोषःपुरुषद्विडास्तेगृहान्प्रविष्टोयमपत्यमत्या पुष्णासिकृष्णाद्विमुखोगतश्रीःत्यजाश्वशैवंकुलकौशलाय १३

र्थः सचस्वपुर्यामेवसुखमास्तेनत्वन्यत्रगतः किंच यदुदेवानांदेवःपूज्यःयतोसौतत्रैवयदुप्रवीराइत्यर्थः किंच नृदेवेषुमंडलेश्वरे
षु दिव्यंतिप्रश्नार्शंतइतिनृदेवदेवाराजानःविनिर्जिताअशेषानृदेवदेवायेनयतोसौतत्रैवसर्वेराजानः अतःपार्थानांदायंदेहीति १२
दुर्योधनस्त्वन्नमन्यतइतिचेदतआह सएषमूर्तोदोषएवगृहान्प्रविष्टआस्तेदोषत्वेहेतुःपुरुषद्विट्श्रीकृष्णद्वेष्टाकोसौ यंत्वमपत्यम
त्यापुष्णासि नन्वपत्यमसौनपतत्यस्मादितित्यपत्यंप्राहुःगताश्रीर्यस्मात्सत्वमित्याकौशतिअतएनं अशैवंअमंगलं आशु
त्यजकथंपुत्रस्त्याज्यस्तत्राह कुलस्य कौशलाय त्यजेदेकंकुलस्यार्थे इतिहिन्यायः १२ ७ ७ ७ ७ ७ ७

225/1981

इत्युचिवानेवमुक्तवान् असौक्षत्तासतांस्पृहणीयंशीलंयस्यसः कर्णदुःशासनशकुनिसहितेनदुर्योधनेनअसत्कृ
तः तिरस्कारमाह कइतिदासीसुतोत्यत्राह्वानानर्हःजिह्मःकुटिलःजिह्मतामाह यस्यबलिनाअन्नेनपुष्टस्तस्मिन्नेवप्रती
पःप्रतिकूलःपरेषांकार्येवर्त्तते अतःपुरान्निर्वास्यतांश्वसानःश्वसन्जीवमात्रशेषइत्यर्थः पाठांतरेश्मशानवदमंगलं १५
अत्यल्बणैःकर्णयोर्बाणवत्प्रविशद्भिःपुरुषवाक्यैर्मर्मसुताडितोपिगतव्यथःतत्रहेतुःमायांउरुबहुमानयन् अहोमायाया
माहात्म्यमिति तामेवतत्रहेतुंमन्यमानः तन्निःसारणात्पूर्वंस्वयमेवआयात् निर्जगाम किंकृत्वाएतेनूनंमारिष्यंति किंध

इत्यूचिवांस्तत्रसुयोधनेनप्रवृद्धकोपस्फुरिताधरेण असत्कृतःसत्स्पृहणीयशीलःक्षत्तासकर्णानुजसौबलेन
१४ कएनमत्रोपजुहावजिह्मंदास्याःसुतंयद्बलिनैवपुष्टः तस्मिन्प्रतीपःपरकृत्यआस्तेनिर्वास्यतामाशुपुरान्श्वसा
नः १५ सइत्थमत्यल्बणकर्णबाणैर्भ्रातुःपुरोमर्मसुताडितोपि स्वयंधनुर्द्वारिनिधायमायांगतव्यथोयादुरुमानयानः
१६ सनिर्गतःकौरवपुण्यलब्धोगजाह्वयात्तीर्थपदःपदानि अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यांस्वधिष्ठितोयानिसहस्रमूर्तिः
१७

नुषेतितस्यद्वारिधनुर्निधायपद्धाभीमादिभिःसंगत्यास्माभिर्योत्स्यतीतिमाशंकीतिधनुर्निधानं १६ ततोनिर्गतस्यतीर्थाटनमका
रमाह सइत्यष्टभिः सगजाह्वयान्निर्गतःसन्तीर्थंपादोयस्यतस्यहरेःपदानिक्षेत्राणिपुण्यचिकीर्षयाअन्वाक्रमत् प्रत्यपद्यत कौर
वाणांपुण्येनलब्धइतितेषांभाग्यमेवतेनतद्रूपेणगतमितिसूचितं उर्व्यांसहस्रमूर्तिःब्रह्मरुद्राद्यनेकमूर्तिःसन्तीर्थपात्यानिअधिष्ठा
यस्थितः १७

भा० पुण्यानियानिउपवनादीनितेषुकुंभजलतादिगूढस्थानंअपंकानितोयानियेषांतेषुसरित्सरःसुच तीर्थेषुआ टी०
३ यतनेषुचक्षेत्रेषुकीदृशेषु अनंतस्यलिंगैमूर्तिभिः सम्यगलंकृतेषुअनन्यः एकाकी १८ किंचगांपर्यटन्व्रतानिचरेआ
चरत् मेध्यापवित्राविविक्ताअसंकीर्णावृत्तिर्जीविकायस्य सदाप्लुतप्रतितीर्थंस्नातः अधःशयनंयस्यअवधूतःअसं
स्कृतदेहः अवधूतवेषोवल्कलादिधारी अतएवस्वैरलक्षितः १९ एकस्यैवहिचक्रंसैन्यंयस्यांतां अजितेनश्रीकृष्णे

धुरेषुपुण्योपवनानिकुंजेषुर्यकतोयेषुसरित्सरःसु अनंतलिंगैःसमलंकृतेषुचचारतीर्थायतनेष्वनन्यः १८ गांपर्य
टन्मेध्यविविक्तवृत्तिःसदाप्लुतोधःशयनोवधूतः अलक्षितःस्वैरवधूतवेषोव्रतानिचेरेहरितोषणानि १९ इत्थं
व्रजन्भारतमेववर्षंकालेनयावद्गतवान्प्रभासं तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेनपार्थः २० तत्रा
थशुश्राववसुहृद्विनष्टिंवनंयथावेणुजवह्निसंश्रयं संस्पर्धयादग्धमथानुशोचन्सरस्वतींप्रत्यगियायतूष्णीं २१ तस्यांत्रि
तस्योशनसोमनोश्च पृथोरथाग्नेरसितस्यवायोः तीर्थंसुदासस्यगवांगुहस्य यच्छ्राद्धदेवस्यसआसिषेवे २२ अन्यानि
चेहद्विजदेवदेवैः कृतानिनानायतनानिविष्णोः प्रत्यंगमुख्यांकितमंदिराणियद्दर्शनात्कृष्णमनुस्मरंति २३ श्रीराम

नसहायेन २० तत्रप्रभासेपरस्परंस्पर्द्धयानिमित्तभूतयासुहृदांकौरवाणांविनष्टिंविनाशमशृणोत् परस्परनाशेदृष्टांतः
वेणुव्रजंवह्निंसंश्रयतेयद्वनंतद्यथादग्धंभवतितथा प्रत्यक्कृउदङ्मुखाभिमुखं २१ त्रितादीनामेकादशतीर्थानितत्तन्नाम्नाप्रसिद्धा श्रीः
न्यसेवितवान् २२ द्विजदेवैर्ऋषिभिर्देवैःकृतानि अंगमंगंप्रविवर्त्ततेइतिप्रत्यंगान्यायुधानि तेषांमुख्यंचक्रंतेनांकितानि मू ३
र्धन्यहेमकुंभेषुचिह्नितानिमंदिराणियेषुतानिनानाविधानिविष्णोरायतनानिक्षेत्राणितीर्थानिच आशिषेवे येषांचक्रांकितमंदि
रवतांदर्शनात् २२

227/1981

अतिव्रज्यअतिक्रम्ययावदुद्धवः प्राप्तः तावत्स्वयमपियमुनामुपेत्य २४ सविदुरःप्राक्तनयंपूर्वंशिष्यं नीतिशास्त्रेपा
ठंप्रेप्राप्तानयांनीतिशास्त्रंयेनतंप्रतीतंप्रख्यातंस्वानांज्ञातीनांभद्रमपृच्छत् प्रश्नेहेतुः भगवतः प्रजानांपोष्या
णां २५ प्रथमंतावद्रामकृष्णयोःकुशलंपृच्छति कच्चिदितिप्रश्ने स्वनाभोभवःस्वनाभ्यःपाद्मोब्रह्मा तस्यानुवृत्या
प्रार्थनयाइहावतीर्णौकुशलमासातेवर्त्तेते कृतक्षेणोदत्तावसरौ सर्वेषांकृतोत्सवावितिवानयोर्नित्यकुशलत्वेपिउ

ततस्त्वतिव्रज्यसौराष्ट्रमृद्धंसौवीरमत्स्यान्कुरुजांगलांश्च कालेनतावद्यमुनामुपेत्यतत्रोद्धवंभगवतंददर्श २४ सवा
सुदेवानुचरंप्रशांतंबृहस्पतेःप्राक्तनयंप्रतीति आलिंग्यगाढंप्रणयेनभद्रंस्वानामपृच्छद्भगवत्प्रजानां २५ कु
चित्पुराणौपुरुषौःस्वनाभ्यपाद्मानुवृत्त्येहकिलावतीर्णौ आसातउर्व्याःकुशलंविधायकृतक्षणौकुशलंशूरगेहे २६ कच्चि
त्कुरूणांपरमःसुहृन्नोभामःसआस्तेसुखमंगशौरिः योवैस्वसॄणांपितृवद्ददातिवरान्वदान्योवरतर्पणेन २७ कच्चि
द्वरूथाधिपतिर्यदूनांप्रद्युम्नआस्तेसुखमंगवीरः यंरुक्मिणीभगवतोभिलेमेआराध्यविप्रान्स्मरमादिसर्गे २८

कः विशेषणविशिष्टो शूरसेनस्यगृहेकच्चिदासाते २६ यदूनांकुशलंपृच्छतिनवभिः भामाप्रज्यः शौरिर्वसुदेवः यद्वाभामोभगि
नीभर्त्ताकुंतीवसुदेवस्यभगिनी अतोदेवकीपांडोर्भगिनीतिव्यवहारः वरानर्थान् वदान्यः अत्कदारः वराणांतत्पतीनांतर्प
णेनसंतोषेणसह २७ वरूथाधिपतिःसेनानीःआदिसर्गेपूर्वजन्मनिस्मरंकामंसंतंअभिलेभेपुत्रंलब्धवती २८ श्रीकृष्ण

सात्वतादीनामधिपः उग्रसेनः शतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परित्यज्य प्राणभयेन दूरात् स्थितमित्यर्थः २८
हे सौम्य हरेः सुतः तेन सदृक्षः सदृशः साधुसुखमास्ते गुहं स्वामिकार्तिकेयं अग्रे पूर्वजन्मनि यो भवान्याग भेधृतः तं ३० युयु
धानः सात्यकिः क्षेमं कुशलमास्ते फाल्गुनादर्जुनाल्लब्धं धनुषोरहस्यं येन तदीयो अधोक्षजसंबंधिनीं ३१ श्वफल्कपुत्रोऽक्रू
रः बुधो विद्वान् अतो भगवंतं प्रपन्नः अनुस्रतः अतएव अनमीवो निःपापः भक्तौ लिंगं यो वेष्टतल्लुठत्प्रेम्णा विभिन्नंवि

कच्चित्कुरुस्वं सात्वतवृष्णिभोजदाशार्णहकाणामधिपः स आस्ते यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात्
२९ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु सांबः आसूत यं जांबवती व्रताढ्या देवं गुहं यो विकया धृतोऽग्रे ३०
क्षेमं सकच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः लेभेंऽजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ३१ कच्चि
द्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ३२ कच्चि
च्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थं ३३ अपिस्विदास्ते
भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः यमामनंति स्म ह शब्दयोनिं मनोमयं सत्वतुरीयतत्वं ३४ वासुदेवनारायण

दीर्णं धैर्यं यस्य सः स्वस्ति क्षेममास्ते ३२ देवकनामा यो भोजः तस्य पुत्र्याः देवक्याः विष्णुप्रजा पुत्रो यस्याः तस्या देवमातुरदिते
रिव कच्चिच्छिवं यज्ञवितानरूपमर्थं त्रयी यथा प्रकाशतया बिभर्त्ति तथा दधार ३३ सात्वतानामुपासकानां कामान्दोग्धि पूरय
तीति कामदुघः भगवल्लेहेतुः यं शब्दस्य शास्त्रस्य योनिं कारणमामनंति वेदाः कुतो मनोमयं मनसः प्रवर्त्तकं तत्र कुतः सत्व
स्यांतःकरणस्य चतुर्विधस्य तुरीयं तत्वं चतुर्थमधिदेवं चित्ताहंकारबुद्धिमनसामंतःकरणभेदानां क्रमेण वासुदेवसंकर्षण

229/1981

प्रद्युम्नानिरुद्धा ह्यधिष्ठातारः मनसश्च शब्दयोनित्वं प्रसिद्धं मनः पूर्वरूपं वागुत्तररूपं इति तथा अन्योत्तर
आत्मा मनोमय इति प्रस्तुत्य तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः समोत्तरः पक्ष इत्यादि श्रुतेः तथा च शिक्षायां
आत्मा बुध्या समेत्यार्थान् मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स प्रेरयति मारुतं मारुतस्तूरसि चरन्मंद्रं
जनयति स्वरमित्यादि ३४ इयं अस्य श्लोकस्य टीका अपिस्वित्किंस्वित् अन्ये च स्वस्ति चरंति निजस्य देहाद्व्यतिरिक्त
स्यात्मनो देवं श्रीकृष्णमनन्यवृत्त्या एकांतभावेन ये सम्यगनुव्रताः अनुस्रताः हृदीकश्च सत्यभामाया आत्मजाश्च चा

अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौ
म्य ३५ अपिस्विदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुं दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या
विजयानुवृत्त्या ३६ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो
विचित्रं ३७ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ३८

रुदेष्णश्च गदश्चादिर्येषां ते ३५ इदानीं कुरून्पृच्छति षड्भिः अपि किं स्वदोर्भ्यां स्वबाहुवत् वर्त्तमानाभ्यां विजयाच्युताभ्यां अर्जु
नकृष्णाभ्यां धर्ममार्गेण धर्मो युधिष्ठिरः सेतुं धर्ममर्यादां परिपाति यस्य सभायां विजयानुवृत्त्या जयपरंपरया अर्जुनस्य
सेवयेति वा एवंभूतया स्यैश्वर्यमित्यर्थः ३६ कृताघेषु कृतापकारेषु कुरुषु स्वकर्तृकमघं दीर्घतमं बहुकालानुचिंतितं अ
हिवदत्यमर्षी भीमः किं विमुचत् नो वा गदाया विचित्रं विविधं मार्गं चरतः ३७ रथयूथपानां मध्ये यशोधाः कीर्तिधारी य
द्वा स्वीयानां तेषां कीर्तिप्रदः उपरता अरयो यस्मात् यस्य शरकूटेन बाणसमूहेन गूढः आच्छन्नः ३८ श्रीकृष्णाय०

उत स्वित् किंस्वित् यमौ नकुलसहदेवौ रेमाते क्रोडे ते इत्यर्थः माद्र्याः सुतावपि पृथायास्तनयौ पृथायाः पुत्रैर्वृतौ
सुपर्णाविव रेमातौ किंकृत्वा पराद्दुर्योधनात्स्वरिक्थं स्वीयं राज्यं उद्दाय आच्छिद्य वज्रिव क्षात् इंद्रमुखात्स्वरिक्थममृतं
गरुड इवेति यद्वा सुपर्णाविव इति यद्विद्वौ गरुडौ अमृतमानयेतां तर्हि तद्वत् अक्षिणी वेतिमणी वादिगणत्वात्संधिः
२९ पृथायाः किंतु कुशलं पृच्छेयं यतस्तस्याः पांडुना विना प्राणधारणमेवाश्चर्यमित्याह अहो इति म्रियते जीवति न
चात्याश्चर्यं यतो र्भकार्थे म्रियते न भोगार्थं तथापि त्वाश्चर्यमेवेत्याह तेन तथाभूतेन विना न देवाह यस्त्विति धनुरे

यमावुत स्वित्तनयौ पृथायाः पार्थैर्वृतौ यस्मभिरक्षिणीव रेमान उद्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रि
वक्त्रात् ३९ अहो पृथापि ध्रियते र्भकार्थे राजर्षिचर्येण विनापि तेन यस्त्वेकवीरो धिरथो विजिग्ये धनुर्द्वितीयः
ककुभश्चतस्रः ४० सौम्यानुशोचे तमधः पतंतं भ्रात्रे परेताय विदुद्रुहे यः निर्यापितो येन सुहृत्स्वपुर्या अहं स्व
पुत्रान्समनुव्रतेन ४१ सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि प
श्यन्गतविस्मयोऽत्र ४२

वद्वितीयं सहायो यस्य ४० पृथा अर्भकार्थे जीवतीति युक्तमेव किंतु हे सौम्य तं धृतराष्ट्रं जीवंतं अनुशोचामि तत्किं अधः पतंतं तं
तत्र हेतुः परेताय मृताय भ्रात्रे पांडवे तत्पुत्रद्रोहेण यो विदुद्रुहे द्रोहं कृतवान् किंच जीवतोपि भ्रातुर्ममापकृतवानित्याह
येन सुहृत् भ्राता अहं स्वपुर्याः सकाशान्निर्यापितः विवासितः ४१ अहो खलु विस्मयो जानतोपि तस्य वंदुश्चेष्टितं यतः त्वं
साधुरपि दुःखं प्रापितोसीत्यत आह सोहं हरेः प्रसादात्तस्य पदवीं महात्म्यं पश्यन् गतविस्मयः अत्र भूतले नान्योपलक्ष्यः
गूढः सन् सुखं चरामि कथंभूतस्य मर्त्यविडंबनेन ऐश्वर्याच्छादकेन मानुष्यानुकरणेन नृणां दृशश्चित्तवृत्तीश्चालयतः भ्रामयतः
४२

231/1981

ननु हरेः किमेवं लीलया स्वभक्तानां वनवासादिक्लेशा भवति स्वस्य च दौत्ये बंधनोद्यमादिपराभवः तद्वरं तेषां अप
राधानंतरमेव हननं नापराधोपेक्षेत्यत आह ननु निश्चितं त्रिभिर्मदैरुत्पथानां मुहुश्चलानां वधाद्धेतोः प्रपन्नाना
मार्त्तिजिहीर्षया ईशः अद्य समय एव हंतुं समर्थोपि कुरूणा मघमुपेक्षत तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्या
दित्याशयेनेत्यर्थः विद्यामदो धनमदस्तथैवाभिजनो मदः एते मदा मदांधानां त एव हि सतां दमाः इति त्रयो मदाः ४२
सर्वदुर्वृत्तवधाद्यर्थमेव भगवतो जन्मकर्माणि नान्यथेति कैमुत्यन्यायेनाह अजस्यापि जन्म अकर्त्तुरपि कर्माणि पुंसां

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चभूमिः वधात्प्रपन्नार्तिजिहीर्षयेशो ह्युपेक्षताघं भगवा
न्कुरूणां ४३ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां नन्वन्यथा कोर्हति देहयोगं परो गुणा
नामुत कर्मतंत्रं ४४ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे अर्थाय जातस्य यदुष्वजस्य वार्ता
सखे कीर्तय तीर्थकीर्तेः ४५ इति श्रीभागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमोध्यायः १

हणाय कर्मसु प्रवृत्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्तां कोवान्योपि गुणानां परो गुणातीतो देहयोगं कर्म
विस्तारं चार्हतीति ४४ तस्मादेवंभूताचिंत्यमायाविनोदस्य कथां कथयेत्याह तस्य प्रपन्नाये अखिललोकपालास्तेषामन्येषां च
स्वीयं नुशासने स्थितानां अर्थाय प्रयोजनाय यदुषु जातस्य तीर्थं संसारतारणी कीर्तिर्यस्येति ४५ इति श्रीभागवते महापुराणे
तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमः १ द्वितीये कृष्णविश्लेषादनुशोचन्नथोद्धवः क्षत्रे बालचरित्राणि कृष्णस्यावर्णयत्श्वसन् १

तदेवं प्रियवार्त्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाह षड्भिः इतीति स्मारितईश्वरोयस्य
१ एकदेवंकैमुत्यन्यायेन प्रपंचयति द्वाभ्यां यः पंचवर्षोपि बाललीलयेति कृष्णं कंचित्परिकल्प्य कल्पितैरेवसाधनैः परिच
र्यांकुर्वन् प्रातर्भोजनार्थं प्रार्थितोपितद्भोजनं नैछत् २ जरसंवृद्धत्वंगतः प्राप्तः २ श्रीकृष्णांघ्रिसुधयासाधुनिर्वृतः तस्या
मेवतीव्रेण विवशत्वापादकेन भक्तियोगेन भृशंनिमग्नश्च ४ पुलकैरुद्भिन्नानि उज्जृंभितानि सर्वाण्यंगानि यस्य मीलंत्या

श्रीशुकउवाच इतिभागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयां प्रतिवक्तुं नचोत्सेहओत्कंठ्यात्स्मारितेश्वरः १ यःपंचहा
यनोमात्रा प्रातराशाय याचितः तन्नैछद्रचयन् यस्यसपर्यां बाललीलया २ सकथं सेवया तस्य कालेन जरसं
गतः पृष्टोवार्त्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ३ समुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं तीव्रेण भक्तियोगेन
निमग्नः साधुनिर्वृतः ४ पुलकोद्भिन्नसर्वांगोमुंचन्मीलद्दृशाशुचः पूर्णार्थोलक्षितस्तेन स्नेहप्रसरसंप्लुतः ५ शनकै
र्भगवल्लोकान्नृलोकं पुनरागतः विमृज्यनेत्रे विदुरं प्रत्याहोद्धवउत्स्मयन् ६ उद्धवउवाच कृष्णद्युमणिनिम्लो
चेगीर्णेष्वजगरेणह किंनुनः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ७ रामकृष्ण रामकृष्ण रामकृष्ण रामकृष्ण

दृशाशुचः अश्रूणिमुंचन् तेन विदुरेण पूर्णार्थः कृतार्थोलक्षितः यतोभगवतियःस्नेहः तस्य प्रसरः पूरस्तस्मिन्संप्लुतोनिमग्नः ५
भगवानेवलोकः तस्मान्नृलोकं देहानुसंधानं उत्स्मयन् यदुकुलसंहारादि भगवच्चातुर्यस्मरणेन विस्मयं प्राप्नुवन् ६
श्रीकृष्णविरहेण संतप्यमानः प्रत्याह श्रीकृष्ण एवद्युमणिः सूर्यस्तस्य निम्लोचे अस्तमये सति अजगरेण कालमहा
सर्पेण गीर्णेषु गलितेषु नोगृहेषु तत्स्पृष्टानां बंधूनां किंनुब्रूयां ७ नमोभगवते वासुदेवाय श्रीकृष्णाय

233
1981

अनुशोचन्नाह दुर्भगोभाग्यहीनः येसहवसंतः श्रीहरिरयमिति नविदुः यथा क्षीरसमुद्रेजातमुडुपंतदात्तत्स्थामीनाः
केवलंकमनीयः कश्चिज्जलचर इत्येवं विदुः नत्वमृतमय इति तद्वत् यद्वा जलेप्रतिबिंबंवृंद्यथेति ८ भाग्यहीनत्वादेवनविदुः
नतुज्ञानसामग्र्यभावादित्याह इंगितं चित्तस्थं जानंतीति तथा पुरु अतिशयेन प्रौढा निपुणाः एकस्मिन्नेव स्थाने आरमंती
तितथा एवंभूता अपि क्षुतानामावासमीश्वरं संतं सात्वतामृषभं सात्वतश्रेष्ठं अमन्यंत ९ येयादवा देवमायया व्यामोः यास्त्वो
यमस्मद्बंधुरितिवदंति येचशिशुपालादयो सदेवान्यद्वैरमाश्रितानि तेषांवाक्यैरात्मनिहरौ उभात्मनो निक्षिप्तचित्तस्यबुद्धि

दुर्भगोबतलोकोयंयदवोनितरामपि येसंवसंतोनविदुर्हरिंमीनाइवोडुपं ८ इंगितज्ञाःपुरुप्रौढाएकारामाश्च
सात्वताः सात्वनामृषभंसर्वभूतावासममंसत ९ देवस्यमाययास्पृष्टायेचान्यदसदाश्रिताः भ्राम्यतेधीर्नतद्वाक्यै
रात्मन्युप्तात्मनोहरौ १० प्रदर्शात्मतपसामवितृप्तदृशांनृणां आदायांतरधाद्यस्तुस्वबिंबंलोकलोचनं ११ यन्मर्त्य
लोकोपयिकंस्वयोगमायाबलंदर्शयतागृहीतं विस्मापनंस्वस्यचसौभगर्द्धेःपरंपदंभूषणभूषणांगं १२ रामकृष्ण

र्नभ्राम्यते मोहं नप्राप्नुते अन्येतुमूढा एवेत्यर्थः १० कोसौ हरिरित्यपेक्षायामाह प्रदर्श्येति नमंतपोयैः अतो अवितृप्तदृशो
येषांतेषां स्वबिंबंमूर्तिं एतावंतंकालं दर्शयित्वायोंतर्हितवान् लोकस्य लोचनमादाय आछिद्यतादृशस्यान्यस्य विलोकनी
यस्याभावात् ११ नदेवबिंबंवर्णयतित्रिभिः यन्मर्त्यलीलासु औपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्या
तिशयस्य परंपदं पराकाष्ठा भूषणानां भूषणान्यंगानि यस्मिन् १२ गोविंद माधव मुकुंद वासुदेव रामकृष्ण

भा०
७

दृशांस्वस्त्ययनं परमानंदकरं त्रिभुवनस्थोलोकः प्राणिमात्रं अद्य इदानीं इह बिंबे अर्वाकृस्ततो अर्वाचीन संसारनिर्माणेम न०
नुष्यनिर्माणे वा लौकौशलं नैपुण्यं तत्कार्त्स्न्येन गतमुपक्षीणं नातः परं तस्य कौशलमस्तीत्येवं मेने तन्मूर्तेर्विधातुस्तदन्यत्वाभा
वे पि लोकस्य दृष्टिरियमुक्ता १३ अनुरागेण प्लुतो व्याप्तो हासः रासो विनोदः लीलावलोकश्च तैः स्वकृत हासाद्य नंतरं प्रतिलब्धो
मानो याभिस्ताः दृग्भिः सह अनुप्रवृत्ता गच्छंतं तमेवानुप्रवृत्ताधियो यासां ताः कृत्यशेषो यासां ताः असमापित कृत्या एव स्थुः १४
एवंभूतबिंबप्रदर्शने कारणमाह स्वीयान्येव शांतान्यशांतानि च रूपाणि तत्र शांतरूपेषु इतरैः पीड्यमानेषु अनुकंपितः कृता

यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यम
न्यत १३ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियो वतस्थुः किल कृत्य
शेषाः १४ स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथा
ग्निः १५ मां खेदयस्येतदजस्य जन्म विडंबनं यद्वसुदेवगेहे व्रजे च वासो रिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः १६

नुकंपः आत्मा यस्य अजोपि जातः आविर्भूतः महाभूतरूपेण नित्यसिद्ध एव अग्निर्यथा काष्ठेषु आविर्भवति तद्वत् अजस्य ज
न्मनि हेतुः महान् महत्तत्वमंशः कार्यलेशो यस्य अव्यक्तस्य तन्महदंशं तद्युक्त इति १५ ननु कुतोसौ परावराणामीशः पारतंत्र्य प्रतीतेस्त श्री:
त्राह द्वाभ्यां मामप्येतत् दुर्वितर्क्यं दुर्घटं च खेदयति तदेवाह वसुदेवगेहे बंधनागारे यज्जनो विडंबनं अनुकरणं ननु नृसिंहवद ७
कस्मादाविर्भावः कंसभयादिव निलीय व्रजे वासश्च कालयवनादि रिपुभयादिव पुरा मथुराया व्यवात्सीत् अपलायनः १६

235
1981

एतच्च हरेश्चरितं स्मरतो मम चेतः कर्मभूतं दुनोति व्यथयति तदेव दर्शयति तदाहेति हे तात हे अंब युवां प्रसीदतं प्र
प्रसादं कुरुतं न कृतानि कृतिः सुश्रूषणं यैः तेषां नो अस्माकं इति बहुवचनं तु रामाद्यभिप्रायं १७ ननु तत्र न ईश्वर एव किं
न स्यात् तव तु भ्रममात्रमेतत् तत्राह त्रिभिः को वा अंघ्रिसरोजयोरेणुस्तमपि विजिघ्रन् सेवमानः विस्मर्तुमीशीत शक्नु
यात् विस्फुरन् भ्रूविटपः भ्रूलता स एव कृतांतस्तेन १८ न च तस्येश्वरत्वं साधनीयं भवद्भिरपि दृष्टत्वादित्याह दृष्टेति यां सि
द्धिं सम्यक् योगेन प्राप्तुमिच्छंति १९ आहवे युद्धे पार्थस्यास्त्रैः पूताः निःपापाः संतः २० तदेवं परमैश्वर्ये सत्यपि यदुग्रसेना

दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः तातांब कंसादुरुशंकितानां प्रसीदतं नोकृतनिष्कृतीनां १७
को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन् यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार
१८ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोपि सिद्धिः यां योगिनः संस्पृहयंति सम्यक् योगेन कस्तद्विरहं सहे
त १९ तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुर
स्य २० स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः २१

वर्तितत्वं तत्पुनरस्मान् सुतरां व्यथयतीत्याह स्वयं तु य एवंभूतस्तस्य तत्कैंकर्यं नोस्मान्विग्लापयतीत्युत्तरेणान्वयः न साम्यातिश
यौ यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः तत्र हेतवः त्रयाणां पुरुषाणामीशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंप
त्त्यैव प्राप्तसमस्तभोगः बलिं करं अर्हणं वा हरद्भिः समर्पयद्भिः चिरकालीनैर्लोकपालैः किरीटाग्रेण ईडितं स्तुतं पादपीठं य
स्य प्रणमतां किरीटसंघट्टनध्वनिरेव स्तुतित्वेन उत्प्रेक्ष्यते २१ रामकृष्ण वासुदेव गोविंद माधव नारायण कृष्ण

अंगविदुर भ्रतान्भ्रत्यान् उग्रसेनेयत्किंकरत्वंतदेवाह परमेष्ठिधिष्ण्येराजासनेनिषण्णं आसीनंस्वयंतिष्ठन् हेदेव अवधार
येतिन्यबोधयत् ज्ञापितवान् २२ एवमनुवृत्तस्वरूपथैवेतिसूचयन्नपकारिष्वपिनस्य कृपाकुतांदर्शयन्नाह अहो आश्चर्यं कृपाकुता
याः हंतुमिच्छयापिस्तनयोः संभ्रतंकालकूटं विषंयमपाययत् बकीपूतनाअसाध्वीदुष्टापि धाव्यायशोदायाउचितांगतिंलेभेभ
कवेशमात्रेणयः सकृतिंदत्तवानित्यर्थः ततोन्यंकंवाभजेम २३ ननुभागवतानेवभगवाननुगृह्णातीतिप्रसिद्धंसत्यं असुरान्
यहंभागवतानेवमन्ये यतोभागवताद्वातेपिभगवानाभिनिवेशेनभगवंतमपरोक्षंपश्यंतीत्याह संरंभः क्रोधावेशः तेनमार्ग

नत्तस्यकैंकर्यमलंभ्रतान्नोविग्लापयत्संगयदुग्रसेनं तिष्ठन्निषण्णंपरमेष्ठिधिष्ण्येन्यबोधयद्देवनिधारयेति २२
अहोबकीयंस्तनकालकूटंजिघांसयापाययदप्यसाध्वी लेभेगतिंधात्र्युचितांततोन्यंकंवादयालुंशरणंव्रजेम २३ मन्ये
सुरान्भागवतांस्त्र्यधीशेसंरंभमार्गाभिनिविष्टचित्तान् येसंयुगेचक्षततार्क्ष्यपुत्रमंसेसुनाभायुधमापतंतं २४ वसुदे
वस्यदेवक्यांजातोभोजेंद्रबंधने चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः २५ ततोनंदव्रजमितः पित्राकंसाद्वि
बिभ्यता एकादशसमास्तत्रगूढार्चिः सबलोवसत् २६ वासुदेव रामकृष्ण नारायण माधव

णाभिनिविष्टंचित्तंयेषांतान् अतएवयेसंग्रामेतार्क्ष्यः कश्यपः तस्यपुत्रंगरुडं अंसेस्कंधेसुनाभायुधश्चक्रायुधोहरिर्यस्यतं
अचक्षत अपश्यन् तस्मात्तेषांयन्नुग्रहोयुक्तएवेत्यर्थः वक्ष्यतिच तस्मात्केनाप्युपायेनमनः कृष्णेनिवेशयेदिति २४ इदानींत
स्यांतर्धानप्रकारंवक्तुमादितआरभ्यतच्चरितंसंक्षेपतः कथयति वसुदेवस्यभार्यायांजातः भोजेंद्रः कंसः तस्यबंधनागारेअस्याः
पृथिव्याः शंसुखंस्वयंचिकीर्षुः अजेनयाचितःसन् २५ पित्राहेतुभूतेननंदव्रजंइतः गतः समाः संवत्सरान्गूढार्चिर्गूढतेजाः २६

237/1981

व्याहरत् आक्रीडत् कूजद्भिर्द्विजैः पक्षिभिः संकुलिताव्याप्ताः अंघ्रिपायस्मिन् २७ रुदन्निवेतिइवशब्दस्ययथायोगसर्व
त्राप्यन्वयः मुग्धोबालश्चयः सिंहः तद्वदवलोकनंयस्य २८ सएवाधिकंवयः प्राप्तः सन्लक्ष्म्याः शोभादिसंपदोनिकेतनं
सितागोवृषायस्मिन्नानावर्णगोसंघे रणन् शब्दंकुर्वन् वेणुर्यस्यअरीरमत् रमयामास २९ ध्यनुदत्तजघान क्रीडनकान्त्व
णादिनिर्मितान् सिंहादीन्यथा ३० विपन्नान्मृतानगोपान् गावइति गाश्चोत्थाप्यतदेवतोयंप्रकृतिस्थितंनिर्विषं ३१ इंद्रपूजासं

परितोवत्सयैर्वत्सात्चारयन्व्याहरद्विभुः यमुनोपवनेकूजद्द्विजसंकुलितांघ्रिपे २७ कैशोरींदर्शयंश्रेष्ठांप्रेक्षणीयां
व्रजौकसां रुदन्निवहसन्मुग्धबालसिंहावलोकनः २८ सएवगोधनंलक्ष्म्यानिकेतंसितगोवृषं चारयन्ननुगान्गो
पान्रणद्वेणुररीरमत् २९ प्रयुक्तान्भोजराजेनमायिनः कामरूपिणः लीलयाव्यनुदत्तांस्तान्बालः क्रीडनकानिव ३०
विपन्नान्विषपानेननिगृह्यभुजगाधिपं उत्थाप्यापाययद्गावस्तत्तोयंप्रकृतिस्थितं ३१ अयाजयद्गोसवेनगोपराजं
द्विजोत्तमैः वित्तस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः ३२ वर्षतींद्रेव्रजः कोपात्भग्नमानेतिविह्वले गोत्रलीलातपत्रे
णत्रातोभद्रानुगृह्णता ३३ शरच्छशिकरैर्मृष्टंमानयन्रजनीमुखं गायन्कलपदंरेमेस्त्रीणांमंडलमंडनः ३४ इति
श्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेद्वितीयोध्यायः २ वासुदेव रामकृष्ण माधव गोविंद

पूजाभंगेनकृतागवांपूजैवसोसवः तेन गोपराजंनंदं वित्तस्यचेतिचकारादिंद्रस्यमानभंगंकुर्वन् उरुभारस्य अतिसमृद्धस्य ३२ कोपा
द्वर्षति गोत्रः पर्वतएवलीलातपत्रंतेन हेभद्र ३३ मृष्टमुज्ज्वलांस्त्रीणांमंडलंमंडयतीतितथा ३४ इतिश्रीभागवतेमहापु
राणेतृतीयस्कंधेविदुरोद्धवसंवादेश्रीधरस्वामीविरचितायांभावार्थदीपिकायांद्वितीयोध्यायः २ नारायण वासुदेव कृष्ण

भा० तृतीयमथुरामेत्य व्रजात्कंसवधादिकं यत्कृतं द्वारकायां च कृष्णेन तद्वर्णयत् १ शमित्यव्ययं पित्रोः सुखस्य चिकीर्षये त्यर्थः तुंगात् राजमंचात् रिपुयूथानां नाथं कंसं व्यासोरपि निष्कर्षणं पित्रोः सुखार्थं १ ब्रह्मवेदं सविस्तरं षडंगादिसहितं द०
९ पंचजनोदरविदारीणद्वारा पुत्रमानीयेत्यर्थः २ भीष्मककन्यायारुक्मिण्यायेराजनः समाहृताः ह्रस्वमार्षं समाहृता इति पाठे आहूथा इत्यर्थः केनसाधनेन श्रियो लक्ष्म्याः सवर्णेन समानेन रूपेण यत्रापितया केवलं श्रीकृष्ण एवाहूतः नसर्वे तया पितस्यालावण्यं तेषामागमने हेतुरिति तयैवाहूता इत्युच्यंते एषां मिषतां मूर्ध्नि पदं दधत् तयासह गांधर्वरीत्या परस्पर

उद्धव उवाच ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षयन् शं बलदेवसंयुतः निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्ष व्यसुमोजसोर्व्यां १ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात् २ समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषां गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ३

समयरूपथा बुभूषया भवितुमिच्छया जहार कथंभूतां स्वभागं लक्ष्म्यंशत्वात्तया स्वात्मनोर्पितत्वाच्च सुपर्णः सुपतनः यद्वा सुपर्ण इव स्वभागं सुधामित्यर्थः यद्वा श्रियः रुक्मिण्याः समानं वर्णद्वयं वाचकं यस्य सः श्रियः सवर्णा रुक्मी तेन समाहूताः शिशुपा श्रीः
लादयः किमर्थं भीष्मककन्यया सह तेषां बुभूषया भूतिर्भवविस्येतदर्थं तत्र शिशुपालस्याज्ञानं वरत्वेन बुभूषया जरासंधादी १
नां तद्विवाहोत्सवेन शेषं पूर्ववत् ३ रामकृष्ण वासुदेव माधव मुकुंद गोविंद नारायण दामोदर

239/1381

ककुद्मतो वृषभान् अविद्धनासिकान् विद्धनासिकान् रुक्षेतिवा तैर्वृषभैस्तद्दमनेन च भग्नो मानो येषां तथापि तां गृध्यतः कामयमानान् अत एव ज्ञान् शस्त्रभृतो राज्ञः नघ्नस्त्रैरक्षत एव जघान ४ यदा आदित्याः कुंडले दातुं स्वर्गं गतः तदा प्रभुः स्वतं त्रोपि ग्राम्यः स्त्रीपरतंत्र इव प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः द्युतरुं पारिजातं आनीतवान् यदर्थं यन्निमित्तं रु ष्टवज्री स्त्रीप्रेरितः योद्धुमन्वधावन् स्वकार्यसाधकेन तेन श्रुद्धो यमस्तस्या शुक्र एवेत्याह क्रीडामृग इति अयं वज्री ५ सुनाभेन

ककुद्मतोविद्धनसोदमित्वा स्वयंवरे नाग्निजितीमुवाह तद्भग्नमानानपि गृध्यतो ज्ञान् जघ्नेक्षतः शस्त्रभृतः स्वशस्त्रैः ४ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्छद्द्युतरुं यदर्थे वज्र्याद्रवत्तं सगणो रुषांधः क्रीडामृगो नूनमयं वधूनां ५ सुतं मृधे खं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ६ तत्राहृ तास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्त्तबंधुं उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ७ आसां मुहूर्त एकस्मिन्नानागारेषु योषितां सविधिं जगृहे पाणीननुरूपः स्वमायया ८ तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः एकैकस्यां दश दश प्रकृतेर्विबुभूषया ९

चक्रेण उन्मथितं हतं सुतं भौमं दृष्ट्वा तस्य मात्रा धरित्र्या भूम्या आमंत्रितः प्रार्थितः सन् तस्य तनयाय भगदत्ताय हृत शेषं राज्यं दत्वा ६ तत्रांतःपुरे कुजेन भौमेन या आहृतास्ताः प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिताः प्रेरिताः ये वलोकास्तैर्जगृहुः स्वीकृत वत्यः ७ आसां योषितां पाणीन् तत्तदनुरूपः सन् सविधिं विवाहोचितप्रकारसहितं यथा भवति ८ सर्वतः सर्वैर्गुणैः स्व तुल्यानि प्रकृतेर्मायाया विविधं भवनं विस्तारः तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधं भवितुमिच्छया ९ माधव मुकुंद कृष्ण

भा० कालः कालयवनः रुंधतः आरुण्वतः मुचुकुंदभीमादिभिर्निमित्तमात्रैः स्वयमेव अजीघनत् घातितवान् तेषां टी०
१० तेनस्वपुंसां तेजः प्रभावं कीर्तिं वा दत्तवान् १० शंबरद्विविदबल्वलान न्यानपि कांश्चित् प्रद्युम्नरामादिभिर्घातयन् अघा
तयत् घातयन्निति वा पाठः दंतवक्रादीन् स्वयमवधीन् ११ नृपान् अघातयदित्यनुषंगः कथंभूतान् कुरुक्षेत्रमापततां
गच्छतां येषां बले सैन्ये भूः सर्वापि चचाल चकंपे १२ स कृष्णः हृताश्रीः आयुश्च यस्य भग्न ऊरुर्यस्य तं उर्व्यांशयानं पश्यन्नपि

कालमागधशाल्वादीननीकैः रुंधतः पुरं अजीघनत् स्वयं दिव्यं स्वपुंसां तेज आदिशत् १० शंबरं द्विविदं बाणं
मुरं बल्वलमेव च अन्यांश्च दंतवक्रादीन् अवधीत्कांश्च घातयत् ११ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपा
न् चचाल भूः कुरुक्षेत्रं येषामापततां बलैः १२ स कर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषं सुयो
धनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् १३ कियान्भुवोयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः
अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनां १४ मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानां
नैषां वधोपाय इयानतोन्यो मय्युद्यतेंतर्दधते स्वयं स्म १५

ननंद तोषं न प्राप १३ अनभिनंदनप्रकारमेवाह कियानिति द्रोणादिभिर्मूलैः कारणभूतैः यदिति य अष्टादशाक्षौहि श्रीः
णीयुक्तः हृ स्वमार्षं क्षपित उरुभारो भुवः अयं कियान् अत्यल्प इत्यर्थः यस्मात् मदंशैः प्रद्युम्नादिभिर्हेतुभूतैः दुर्विषहं बलमा
स्ते १४ न चात्रान्य उपायः प्रभवति किंतु मध्वनायआमदः सर्वतोमदः तेन आताम्रविलोचनानामेषां विवादो यथा १०
भविष्यति तदा इयानेवैषां वधोपायः अतो अन्यो नास्ति एकात्मनोपि मय्युद्यते सति स्वयमेव विवादेनांतर्दधीरन्नित्यर्थः १५

241
1981

एवं श्लोकद्वयेनोक्तक्रमेण संचिंत्य स्वराज्ये स्थापयित्वा १६ धृतः रक्षितः १७ अनुजैः सह १८ सांख्ये प्रकृतिपुरुष
विवेके १९ स्निग्धो यः स्मितसहितो वलोकस्तेन पीयूषकल्पया सुधातुल्यया पाठांतरे सुधाप्रवाहरूपया आत्मनादे
हेन २० क्षणदया रात्र्या दत्तः क्षणः अवसरः उत्सवो वा यासां स्त्रीणां तासु क्षणं सौहृदं यस्य सः २१ गृहमेधेषु गृहध

एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्मजं नंदयामास सुहृदः साधूनां वर्त्म दर्शयन् १६ उत्तरायां धृतः पूरोर्वं
शः साध्वभिमन्युना स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्वि
भुः सोपि क्ष्मामनुजैरक्षन् रेमे कृष्णमनुव्रतः १८ भगवानपि विश्वात्मा लोकवेदपथानुगः कामान्सिषेवे द्वार्व
त्यामसक्तः सांख्यमास्थितः १९ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया चरित्रेणानवद्येन श्रीनिकेतेन चा
त्मना २० इमं लोकममुं चैव रमयन्सुतरां यदून् रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवं रममाणस्य संवत्सर
गणान्बहून् गृहमेधेषु योगेषु विरागः समजायत २२ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् को विश्रंभेत यो
गेन योगेश्वरमनुव्रतः २३ पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४
ततः कतिपयैर्मासैर्वृष्णिभोजांधकादयः ययुः प्रभासं संहृष्टा रथैर्दैवविमोहिताः २५ तत्र स्नात्वा पितॄन्देवा
नृषींश्चैव तदंभसा तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः २६ श्रीकृष्ण वासुदेव माधव गोविंद

मेधुयोगेषु कामभोगोपायेषु विरागः औदासिन्यं जातमित्यर्थः २२ यदा स्वाधीनेष्वपि भगवतो विरागस्तदा दैवाधीनेषु को वि
श्रंभेत् विश्वासं प्रीतिं वा कुर्यात् योगेन चेत् योगेश्वरं श्रीकृष्णमनुव्रतः २३ शेपुः शापं ददुः भगवतो मते अभिप्रा
यकोविदाः अभिज्ञाः २४ वयःशीलादिबहुगुणोपेताः याः गावस्ताः २६ माधव गोविंद वासुदेव श्रीकृष्ण

कन्याश्चवृत्तिकरीं जीविकापर्यंतां २७ भगवदर्पणं यथा भवति गोविप्रार्था असवो येषां २८ इति तृतीये टीकायां तृ
तीयः २ चतुर्थे बंधुनिधनं श्रुत्वात्मज्ञानलुब्धये उद्धवस्योपदेशेन क्षत्ता मैत्रेयमागमत् १ तैर्ब्राह्मणैरनुज्ञाताः वारुणीं
पैष्टीं मदिरां १ वारुण्येव मैरेयं तस्य दोषेण निम्लोचति अस्तंगते सति मर्दनं कंदनं २ उपस्पृश्य सारस्वत्सा आचम्या ३ अ
हं चोक्तः पूर्वमेव द्वारकायां ४ तदभिप्रेतं कुलसंहारादिकं ५ कृतकेतं कृतवासं अकेतनं अनाश्रयं ६

हिरण्यरजतंशय्यां वासांस्यजिनकंबलान् यानंरथानिभान्कंन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं ते
भ्योदत्वा भगवदर्पणं गोविप्रार्थाशवः शूराः प्रणेमुर्भुवि मूर्द्धभिः २८ इति भागवते० तृती० विदुरोद्धवसंवादे
तृतीयोध्यायः ३ अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीं तया विभ्रंसितज्ञाना दुरुक्तैर्मर्मपस्पृशः १ तेषां
मैरेयदोषेण विषमीकृतचेतसां निम्लोचति रवावासीद्वेणूनामिव मर्दनं २ भगवान्स्वात्ममायाया गतिं ता
मवलोक्य सः सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ३ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह बदरीं त्वं
प्रयाहीति स्वकुलं संजिहीर्षुणा ४ अथापि तदभिप्रेतं जानन्नहमरिंदम पृष्ठतोन्वगमं भर्तुः पादविश्लेषणाक्षमः ५
अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनं ६ श्यामावदातं विरजं प्रशांतारु
णलोचनं दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च ७ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं अपाश्रितार्भकाश्वत्थ
मकृशं त्यक्तपिप्पलं ८
विरजं विरजसं संविदितं लक्षितं कोशांकौशेयं ७ अधिश्रित्य उपरि स्थापयित्वा अपाश्रितः पृष्ठतो यस्य अर्भकः बालः
कोमलोश्वत्थो येन तं त्यक्तं पिप्पलं विषयसुखं येन तथापि अकृशं आनंदपूर्णं ८ माधव गोपाल रामकृष्ण

243/1981

द्वैपायनः सुहृत्सखा च वयस्यः सः स्वगुरुपुत्रत्वात् पाराशरशिष्यो मैत्रेय इत्यर्थः ९ प्रमोदेन भावेन चानतकंधरायस्य पाठां
तरे प्रमोदस्य भारेण अनुरागेण सहहासो यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् १० तेन मनसीप्सितं अहं अं
तर्हितो वेद वेद्मि दानेहेतुः विश्वसृजां वसूनां च मिलितानां सत्रे हे वसो इति पुरा पूर्वजन्मनि त्वं वसुरभूः तदा मत्प्राप्तिका
मेन त्वयाहमिष्टः अतस्त्वत्ताधनं ददामि दास्यामि अन्यैर्यद्दुःखेन दुरापं ११ तस्य भाग्यमभिनंदति स एष भावो जन्म ते भ

तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः लोकाननुचरन्सिद्धः आससाद यदृच्छया ९ तस्यानुरक्तस्य मुनेर्मु
कुंदः प्रमोदभावानतकंधरस्य आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच १० श्रीभगवानुवा
च वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ११
स एष भावो चरमो भवानामासादितस्ते मदनुग्रहो यत् यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृत्त्या
१२ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदंति १३
इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोहं स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचञ्छुचः प्रांजलिराबभाषे १४

वानां मध्ये चरमः यद्यस्मिन्मदनुग्रहः आसादितः लब्धः यत्पुनर्मां रह एकांते विशदानुवृत्त्या एकांतभक्त्या ददृश्वान्दृष्टवानसि एतत्
दिष्ट्या भद्रं जातमित्यर्थः नृलोकान् नृशब्देन जीवास्तेषां लोकान् उत्सृजंतं वैकुंठं गच्छंतमित्यर्थः १२ यं ददामीति यदुक्तं तदेवाभिनिर्दिशति
पुरा पूर्वस्मिन्पाद्मे कल्पे आदिसर्गे सर्गोपक्रमे मम महिमा लीला अवभास्यते येन तत् १३ इत्येवमादृतश्चासावुक्तश्चाहं प्रतीक्षणं कृपावलो
क एवानुग्रहस्तस्य भाजनं पात्रभूतः पाठांतरे प्रतीक्षणमनुग्रहस्य पात्रमिति शुचः अश्रूणि मुंचन् आबभाषे उक्तवानस्मि १४

नहिस्वाज्ञाननिवृत्तिमात्रकामोहंकिंतुत्वन्निषेवणोत्कः त्वयिचाघटमानाचरणंदृष्ट्वामेमोहोभवति अतस्त्वंतत्वज्ञा
नंदेहीतिप्रार्थयितुंश्वाह कान्विति चतुर्षुधर्मादिषु तथापितानहंनप्रवृणोमि अघटमानाचरणंदर्शयति कर्माण्यनीह
स्यनिस्पृहस्यनिःक्रियस्यवा अभवस्यअजन्मनोभवोजन्मा कालात्मनस्तवारिभयात्दुर्गाश्रयःपलायनंच स्वात्मनिर
तिर्यस्यतस्यबह्वीभिःस्त्रीभिःगृहस्थाश्रमइतियत् इहयस्मिन्विषयेविदुषामपिधीःसंशयेनखिद्यति १६ किंच मंत्रेषुप्रस्तु
तेषुसत्कमामाकूयवैअहाघृष्टेःअघृष्टःअकुंठितःकालादिनाअखंडःसंततःसदात्मासंशयादिरहितोबोधोविद्याशक्तिर्यस्य

कोन्वीशतेपादसरोजभाजांसुदुर्लभोर्थेषुचतुर्ष्वपीहि तथापिनाहंप्रवृणोमिभूमन्भवत्पदांभोजनिषेवणोत्कः १५
कर्माण्यनीहस्यभवोभवस्यतेदुर्गाश्रयोथारिभयात्पलायनं कालात्मनोयत्प्रमदायुताश्रयःस्वात्मन्रतेःखिद्यतिधी
र्विदामिह १६ मंत्रेषुमांवाउपहूययत्वमकुंठिताखंडसदात्मबोधः पृच्छेःप्रभोमुग्धइवाप्रमत्तस्तन्नोमनोमोहयतीवदेव
१७ ज्ञानंपरंस्वात्मरहःप्रकाशंप्रोवाचकस्मैभगवान्समग्रं अपिक्षमंनोग्रहणायभर्त्तर्वदांजसायद्वृजिनंतरेम १८
इत्यावेदितहार्द्दायमह्यंसभगवान्परः आदिदेशारविंदाक्ष आत्मनःपरमांस्थितिं १९ सएवमाराधितपादतीर्थादधी
ततत्वात्मविबोधमार्गः प्रणम्यपादौपरिवृत्यदेवमिहागतोहंविरहातुरात्मा २० वासुदेव माधव मुकुंद

मुग्धवत् अज्ञवत् अप्रमत्तःअवहितःसन् १७ स्वात्मनस्तवरहःरहस्यंतत्वंतस्यप्रकाशकं कस्मैब्रह्मणेसर्वनामत्वमापि नोस्माकं
ग्रहणायअपिक्षमंयदियोग्यंतर्हिवदभर्त्तःस्वामिन् यत्यतःवृजिनंसंसारदुःखंअनायासेनतरिष्यामः१८आवेदिताहार्द्दाहृदिस्थितो
भिप्रायोयेनतस्मै १९आराधितपादोभगवान्सएवतीर्थंगुरुस्तस्माअधीनःअधिगतःतत्वात्मविबोधस्यपरमार्थात्मज्ञानस्यमार्गोयेन
देवंपरिवृत्यप्रदक्षिणीकृत्यटीकांतरंआराधितंशिवादिभिःसर्वोत्कृष्टत्वेनसेवितपादयोःसंबंधितीर्थंगंगादियस्यतत्तस्मात् २०

245
1381

तस्यदर्शनेनाह्लादोवियोगेनार्त्तिश्चताभ्यांयुतोबदर्याश्रमस्थानंगमिष्यामि २१ मृदुपरोपद्रवशून्यं तीव्रंदुश्चरं दीर्घं
आकल्पांतं तेपातेतपश्चरतइत्यर्थः लोकभावनोलोकानुग्रहकारकौ २२ ज्ञानेनविवेकेन २२ विस्रंभात्विश्वासात् २४
यद्यस्मात्त्वभृत्यप्रयोजनसाधकाःसंतश्चरंति नहिकृतार्थानामन्यत्कृत्यमस्तीत्यर्थः २५ तत्वायसंराध्यतइति अयंभावः
भगवतैवस्मरणमात्रेणतवापितत्वमुपदिष्टप्रायंकेवलमसंभावनादिनिवृत्तयेज्ञानिकश्चिदाराध्यःमैत्रेयःनत्वहंममां

सोहंतद्दर्शनाह्लादवियोगार्तियुतःप्रभोः गमिष्येदयितंतस्यबदर्याश्रममंडलं २१ यत्रनारायणोदेवोनरश्चभगवान्
ऋषिः मृदुतीव्रंतपोदीर्घंतेपातेलोकभावनौ २२ श्रीशुकउवाच इत्युद्धवादुपाकर्ण्यसुहृदांदुःसहंवधं ज्ञानेनाशमय
त्क्षत्ताशोकमुत्पतितंबुधः २३ सतंमहाभागवतंव्रजंतंकौरवर्षभः विस्रंभादभ्यधत्तेदंमुख्यंकृष्णपरिग्रहे २४ ज्ञानंप
रंस्वात्मरहःप्रकाशंयदाहयोगेश्वरईश्वरस्ते वक्तुंभवान्नोर्हतियद्धिविष्णोर्भृत्याःस्वभृत्यार्थकृतश्चरंति २५ उद्धवउवाच
ननुतेतत्वसंराध्यऋषिःकौषारवोंतिमे साक्षाद्भगवतादिष्टोमर्त्यलोकंजिहासता २६ श्रीशुकउवाच इतिसहविदुरेण
विश्वमूर्त्तेर्गुणकथयासुधयाप्लावितोरुतापः क्षणमिवपुलिनेयमस्वसुस्तांसमुषितऔपगविर्निशांततोगात् २७राजो
वाच निधनमुपगतेषुवृष्णिभोजेष्वधिरथयूथपयूथपेषुमुख्यः सतुकथमवशिष्टउद्धवोयद्धरिरपितत्यजआकृतिंत्र्यधीशः २८
श्रीशुकउवाच ब्रह्मशापापदेशेनकालेनामोघवांछितः संहृत्यस्वकुलंनूनंत्यक्ष्यन्देहमचिंतयत् २९ गोविंद माधव

तिकएवतत्वउपदेशोतस्यादिष्टत्वादिति २६ प्लावितःअपनीतःउरुस्तापोयस्य यमस्वसुर्यमुनायाःपुलिनेतीरेतांनिशांक्षणमिवसमुषि
तःऔपगविरुद्धवः २७ ब्रह्मशापेननिधनंप्राप्तेषुयद्यस्मात्त्रयाणांब्रह्मादीनांईशोहरिरपिआकृतिंमनुष्याकारंत्यक्तवान् २८ ब्रह्मशा
पःअपदेशोमिषंयस्यतेकालेनस्वशक्तिरूपेण अमोघंवांछितंयस्य नत्वत्रशापःप्रभुःकिंतुभगवदिच्छैवेत्यर्थः २९ गोविंद

भा० मयिउपरतेसतिज्ञानमर्हतिज्ञानयोग्योभवति ३० मत्तः सकाशादीषदपिन्यूनोनभवति यत्यस्माद्गुणैर्विषयैर्नक्षोभि टी०
१२ तः मद्वयुनंमद्विषयंज्ञानंलोकस्योपदिशन् ३१ एवमनेनाभिप्रायेणशब्दयोनिनाबदरिकाश्रमंप्रतिइजेपूजयामास ३२ ३३ पशुतु
ल्यानांविक्लवात्मनोअधीरचित्तानां ३४ मनसेप्सितंचिंतितं ३५ कालिंद्याः सकाशात्सिद्धएवविदुरः कतिपयैर्दिनैः स्वस
रितंगंगांप्रापयत्प्राप्तः ३६ इतिश्रीभागवतेतृतीयस्कंधेटीकायांचतुर्थः ४ पंचमेभगवल्लीलांक्षत्राष्टष्टोमहामुनिः
प्रोवाचमहदादीनांसर्गतेश्वरहरेःस्तुतिं १ उक्तश्चतुर्भिरध्यायैःक्षत्तुर्मैत्रेयसंगमः संवादःस्कंधद्वयेनाथनिगद्यते २

अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयं अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः नोद्धवोण्वपिमन्न्यूनोयद्गुणैर्नार्दि
तःप्रभुः अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु ३१ एवंत्रिलोकगुरुणासंदिष्टःशब्दयोनिना बदर्याश्रममासाद्य
हरिमीजेसमाधिना ३२ विदुरोप्युद्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः क्रीडयोपात्तदेहस्यकर्माणिश्लाघितानिच ३३
देहन्यासंचतस्यैवंधीराणांधैर्यवर्द्धनं अन्येषांदुष्करतरंपशूनांविक्लवात्मनां ३४ आत्मानंचकुरुश्रेष्ठकृष्णेनमनसे
क्षितंध्यायन्गतेभगवतिरुरोदप्रेमविह्वलः ३५ कालिंद्याःकतिभिःसिद्धअहोभिर्भरतर्षभः प्रापद्यतःस्वःसरितंयत्रमित्रा
सुतोमुनिः ३६ इतिश्रीभागव० चतुर्थोध्यायः श्रीशुकउवाच द्वारिद्युनद्याऋषभःकुरूणांमैत्रेयमासीनमगाधबोधं
क्षत्तोपसृत्याच्युतभावशुद्धःपप्रच्छसौशील्यगुणाभितृप्तः १ रामकृष्ण २ वासुदेव ७ माधव ७ गोविंद ७ नारायण श्री:

द्युनद्युःगंगायाः द्वारिहरिद्वारेआसीनंनतुकर्मव्यग्रंतत्रहेतुः अगाधः अपरिच्छिन्नोबोधोयस्येति मैत्रेयस्यसौशील्यंआर्जवा १२
दिगुणाश्चकरुणादयस्तैरभितृप्तः पाठांतरे क्षत्तुः सौशील्यादिभिरभितृप्तंसंतुष्टंमैत्रेयं १ माधव गोविंद नारायण

247/1981

प्रश्नानेवाह सुखायेतिपंचदशभिः तैः कर्मभिः सुखंवान्यस्यदुःखस्योपशमंवेत्यर्थः अथवान्यद्दानविंदेत किंतदित्यपेक्षा
यांतस्यैवनिर्देशः उपारमंवेति ततस्तैःकर्मभिः भूयः पुनःदुःखमेवविंदेत् अत्रएवंविधेसंसारेनोस्माकंयत्युक्तंकर्तुंयोग्यं
तत्सर्वज्ञोभवान्वदेत् निरूपयितु २ टीकांतरं त्वयानवदाभीतिनवक्तव्यं भवादृशांपरोपकारिस्वभावादित्याहजनस्येति
दैवात्प्राचीनकर्मणोनिमित्तभूतात् कृष्णाद्विमुखस्यअतःअधर्मशीलस्यअतःसुदुःखितस्यजनस्यानुग्रहायभव्यानि
मंगलानिभवंतःपरोपकारस्वभावाएवेत्यर्थः २ तत्तस्मात्हेसाधुवर्यशंसुखरूपंवर्त्मनःआदिशकथय येनवर्त्मनासंसारा

विदुरउवाच सुखायकर्माणिकरोतिलोकोनतैःसुखंचान्यदुपारमंवा विंदेतभूयस्ततएवदुःखंयदत्रयुक्तंभगवान्वदेन्नः
२ जनस्यकृष्णाद्विमुखस्यदैवादधर्मशीलस्यसुदुःखितस्य अनुग्रहायेहचरंतिनूनंभूतानिभव्यानिजनार्दनस्य २ तत्सा
धुवर्यादिशवर्त्मशंनःसंराधितोभगवान्येनपुंसां हृदिस्थितोयच्छतिभक्तिपूतेज्ञानंसतत्त्वाधिगमंपुराणं ४ करोतिकर्मा
णिकृतावतारोयान्यात्मतंत्रोभगवांस्त्र्यधीशः यथाससर्जाग्रइदंनिरीहःसंस्थाप्यवृत्तिंजगतोविधत्ते ५ यथापुनःस्वेख
इदंनिवेश्यशेतेगुहायांसनिवृत्तवृत्तिः योगेश्वराधीश्वरएकएतदनुप्रविष्टोबहुधायथासीत् ६ क्रीडन्विधत्तेद्विज
गोसुराणांक्षेमायकर्माण्यवतारभेदैः मनोनतृप्यत्यपिश्रृण्वतांनःसुश्लोकमौलेश्चरितामृतानि ७ नारायण

धितो हृदिस्थितःसतत्त्वाधिगमःआत्मापरोक्षंतत्सहितंपुराणंअनादिवेदप्रमाणकं ४ करोतिकर्माणीत्यादीनांवर्णयंतिपंचमश्लोके
क्रियासंबंधःयथायेनप्रकारेणपुरुषरूपेणकृतावतारःसन्त्र्यधीशःत्रिगुणमायानियंताअतःस्वतंत्रएवयानिकर्माणिकरोतिकर्मा
ण्येवविशेषतःपृच्छतियथेत्यादिनानिरीहःनिःक्रियःनिस्पृहोवासंस्थाप्यसुस्थितंकृत्वावृत्तिंजीविकां ५ स्वेस्वीयेस्वेदृदयावकाशे
निवेश्यस्थापयित्वा निवृत्तावृत्तयोयस्यगुहायांयोगमायायां बहुधाब्रह्मादिरूपेणमत्स्यावतारभेदैः क्रीडन्यानियथाकर्माणिवि

भा० धत्ते ६ पुनर्विशेषं प्रष्टुमौत्सुक्यमाविष्करोति मन इति सुश्लोकाः पुण्यकीर्तयस्तेषां मौलिरिवाधिक्येनोपरि विराजमानस्येत्यर्थः दृ०
१४ आधिलोकनाथः लोकनाथाधिपतिः अलोकान् लोकालोकपर्वताद्बहिर्भागान् अचीक्लृपत् कल्पयामास यत्र येषु सर्वाणि
थानि सत्वानि तेषां निकायास्तेषां भेदः अधिकृततत्तत्कर्माधिकारी आश्रितइ तिवानुत अपि च येन प्रकारेण जीवानां आत्मा
स्वभावः तत्कृतं तद्रूपं तत्कृता अभिधाना सा भेदं कृतवान् विश्वस्रष्टा स्वयं आत्मयोनिः स्वतः सिद्धः ९ ननु महाभारते त्वया स
र्वं श्रुतमेवेत्याह परे त्रैवर्णिकाः आचरं शूद्रादयः तेषां व्रतानि धर्माः मे मया अभीक्ष्णं पुनः पुनस्तेषां श्रवणेन अतृप्नुम तृप्ताः
स्म तेषां तुच्छसुखावहत्वात् यत्कृतं त्रकृष्णकथामृतौघः सूचितः तस्माद्बुते तत्र त्वलंबुद्धिर्नास्तीत्यर्थः १० तत्र हेतुः कृइति तीर्थप

यैस्तत्वभेदैरधिलोकनाथो लोकानलोकान्सह लोकपालान् अचीक्लृपद्यत्र हि सर्वसत्वनिकायभेदोऽधिकृतः प्रतीतः ८ येन
प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ९ परावरेषां भ
गवन्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् १० कस्तृप्नुयात्तीर्थ
पदोऽभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ११ मुनिर्विवक्षुर्भगव
द्गुणानां सखापि ते भारतमाह कृष्णः यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायां १२

दः कृष्णस्य अभिधाना कथामृतान् सत्रेषु सभाजेषु सूरिभिर्नारदादिभिः ११ महाभारतस्याप्यत्रैव तात्पर्यमित्याह मुनिः श्रीकृ
ष्णो वेदव्यासो भगवद्गुणान्मोक्षधर्मांते नारायणीयाख्याने वक्तुमिच्छुः सन् अर्थकामादिवर्णनं तु हरिकथायां मतिप्रवेशार्थमि श्रीः
त्याह यस्मिन्निति नृणां मतिः ग्राम्यसुखानुवादैः द्वारभूतैर्नु निश्चितं हरेः कथायां गृहीता नीता तदुक्तमितिहाससमुच्चये कामिनो वर्ण
यन् कामांल्लोभं लुब्धस्य वर्णयन् नरः किंफलमाप्नोति कूपे अंधमिव पातयन् लोकचित्तावतारार्थं वर्णयित्वा तत्र तेनतो इतिहासेः पवित्रा १४
र्थेषु नरश्रेवनिंदितो अन्यथा घोरसंसारबंधहेतू जनस्य तौ वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिः १२ माधव

249/1981

श्रीहरिकथामिति प्रवेशस्य फलमाह सा कथा मतिर्वा अन्यत्र ग्राम्यसुखे ततः किमत आह हरेरिति १३ एवंभूतायां
कथायां येन रमंते तान् शोच्यायते तेषामपि शोच्यांश्च तत्राविदो भारततात्पर्यानभिज्ञान् शोच्यान् येऽपि ज्ञात्वा हरेः कथायां
विमुखाः तान् तेषामपि शोच्यान् इतियोज्यं अनिमिषः कालो येषां आयुः क्षिपति अत्र हेतुः वृथैव वाग्गतिस्मृतयो वपुरे
हमनोव्यापाराः येषां १४ तत्तस्मात् हे कौषारव अस्य विश्वस्य शिवाय कथासु सारभूतां हरेः कथामेवोद्धृत्य नः कीर्तय यथापु

सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः हरेः परानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु
धत्ते १३ तान्शोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावा
दगतिस्मृतीनां १४ तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारं उद्धृत्य पुष्पेभ्य इवार्तबंधो शिवाय नः कीर्तय
तीर्थकीर्तेः १५ स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः चकार कर्माण्यतिपौरुषाणि यानीश्वरः कीर्त
यतानि मह्यं १६ श्रीशुकउवाच स एवं भगवान्पृष्टः क्षत्ता कौषारविर्मुनिः पुंसां निःश्रेयसार्थेन तमाह बहुमान
यत् १७ मैत्रेयउवाच साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता कीर्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः १८

ष्पेभ्यो मधुमधुप इव रतितद्वदुद्धृत्य १५ विशेषतः श्रीकृष्णकथाकथनीयेत्याशयेनाह योविश्वसर्गाद्यर्थं पूर्वं गृहीतशक्तिः स एव पु
रुषेषु कृतावतारः सन् पुरुषानतिक्रम्य वर्तमानानि यानि चकार १६ पुंसां निःश्रेयसमेवार्थः प्रयोजनं तेन हेतुना पृष्टः १७
बहुमानमेवाह साध्विति पंचभिः अधोक्षजएवात्मा मनो यस्य १८ गोविंद माधव मुकुंद हरे मुरारे रामकृष्ण वासुदे०

तस्यात्मतः स्वस्यकीर्तिंच प्रसंगाद्वितन्वता हरिर्यद्गृहीतः एतच्चित्रंनभवति कुतः बादरायणिवीर्यजे १९ तर्हिकथं
शूद्रत्वंकथंचलोकानुग्राहकत्वंतत्राह मांडव्यशापादिति भ्रातुर्विचित्रवीर्यस्यक्षेत्रे क्षेत्रत्वेनस्वीकृतायांभुजिष्या
यांदास्यांयमएवत्वंजातोसि २० किंच भवानितिकुतः यस्यतव ज्ञानोपदेशायमामादिष्टवान्चकारात्त्वयमपिस्मृत्यैचो
पदिष्टवानिति २१ विश्वस्थित्यादयः अर्थाविषयायासांताः २२ तत्रसृष्टिलीलावर्णयितुंततः पूर्वावस्थामाह इदंविश्वं
अग्रेसृष्टेः पूर्वंपरमात्माभगवानेकएव आसआसीत् आत्मनांजीवानांआत्मास्वरूपं विभुः स्वामिच नान्यद्द्रष्टृ दृश्यादि

नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे गृहीतोनन्यभावेन यत्त्वयाहरिरीश्वरः १९ मांडव्यशापाद्भगवान्प्रजा
संयमनोयमः भ्रातुःक्षेत्रेभुजिष्यायांजातः सत्यवतीसुतात् २० भवान्भगवतोनित्यंसंमतःसानुगस्यच यस्य
ज्ञानोपदेशायमादिशद्भगवान्व्रजं २१ अथतेभगवल्लीलायोगमायोपबृंहिताः विश्वस्थित्युद्भवांतार्थावर्णयाम्य
नुपूर्वशः २२ भगवानेकआसेदमग्रआत्मात्मनांविभुः आत्मेच्छानुगतावात्मानानामत्युपलक्षणः २३
सवाएषतदाद्रष्टानापश्यत्दृश्यमेकराट् मेनेसंतमिवात्मानंसुप्तशक्तिरसुप्तदृक् २४ माधव गोविंद रामकृष्ण

त्मकंकिंचिदासीत्कारणात्मतासत्त्वेपिपृथक्प्रतीत्यभावदित्याह अनानामत्युपलक्षणः नानाद्रष्टृदृश्यादिमतिभिर्नोपल
क्ष्यतइतितथा यद्वा अकारप्रश्लेषंविनैवायमर्थः यः सृष्टौनानामतिभिरुपलक्ष्यते सतदाएकएवासीदिति कुतः आत्मेच्छा
मातस्यांअनुगतोलयेसति यद्वा आत्मनएकाकित्वेनअवस्थानेच्छायामनुवृत्तायाइत्यर्थः २३ तत्रप्रथमंमायोद्भवप्रकारमाह
द्वाभ्यां सवैद्रष्टासन्दृश्यनापश्यत् यतःसएकराट् एकएवतदाप्रकाशतं असंतमिवमेने दृश्याभावेद्रष्टृत्वाभावात् तदाह
सुप्ताःमायाद्याःशक्तयोयस्यसः नत्वसंतमेवमेनेयतःआलुप्तादृक्चिच्छक्तिर्यस्येति २४ ७ ७ ७ ७ ७

251
1981

सावेदृष्टृदृश्यानुसंधानरूपासदसदात्मिका कार्यकारणरूपा यद्वा सत्दृश्यं असत् अदृश्यं आत्मस्वरूपंच त
योरात्माकार्यस्याः तदुभयानुसंधानरूपत्वात् २५ कालवृत्त्या कालशक्त्या गुणमय्यांक्षुभितगुणायां अधोक्षजः परमा
त्माआत्मांशभूतेनपुरुषेणप्रकृत्यधिष्ठातृरूपेणवीर्यंचिदाभासमाधत्त वीर्यवान्चिच्छक्तियुक्तः २६ कालप्रेरितादव्य
क्तामायातः तत्त्वंपदंपरित्यज्यमहत्तोलक्षणं अतःपुलिंगनिर्देशोविज्ञानात्मेति सत्वप्रधानत्वात् स्वदेहस्थंविश्वंउप्त्
नबीजगतमंकुरादिरूपंवृक्षमिवव्यंजन्व्यंजयन्प्रकाशयन् यतोसौतमोनुदततीतमोनुदः तदुक्तंसात्वतंत्रे विष्णोस्तु

सवाएतस्यसद्रष्टुःशक्तिःसदसदात्मिका मायानाममहाभाग ययेदंनिर्ममेविभुः २५ का
लवृत्त्यातुमायायांगुणमय्यामधोक्षजः पुरुषेणात्मभूतेनवीर्यमाधत्तवीर्यवान् २६ ततोभ
वन्महत्तत्वमव्यक्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थंविश्वंव्यंजंस्तमोनुदः २७ सोप्यंशगु
णकालात्माभगवद्दृष्टिगोचरः आत्मानंव्यकरोदात्माविश्वस्यास्यसिसृक्षया २८ महत्तत्वा
द्विकुर्वाणादहंतत्वंव्यजायत कार्यकारणकर्त्रात्माभूतेंद्रियमनोमयः २९ माधव गोविंद

त्रीणिरूपाणिपुरुषाख्यान्यथोविदुः प्रथमंमहतःस्रष्टृ द्वितीयंचांडसंस्थितं तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यतइ
ति २७ अहंकारोत्पत्तिमाह सार्धाभ्यां सोपीति अंशश्चिदाभासः निमित्तं गुणाउपादानं कालःक्षोभकः तदात्मातदधीनः
भगवान्सर्वाध्यक्षः तदृष्टिगोचरःसन्स्वयमात्मानंव्यकरोत्रूपांतरमनयत् २८ अहंकारस्यलक्षणमाह कार्यमधिभूतं
कारणमध्यात्मंकर्त्रअधिदैवतं तेषामात्माआश्रयः अत्रहेतुःभूतेंद्रियमनोमयः तद्विकारवान् मनइतिदेवानामुपलक्षणं २९

भा० एतदेवविभागतः प्रपंचयति वैकारिकइत्यादिना वैकारिकः सात्विकः तैजसोराजसः देवाश्चवैकारिकारिकाः कार्य टी०
१६ भूताइत्यर्थः यतः येभ्यः इंद्रियाधिष्ठातृभ्यः अर्थाभिव्यंजनं शब्दादिप्रकाशोभवति ३० तैजसान्येवेत्यन्वयः ज्ञानमया
नांसात्विकत्वशंकामाभूदित्येवकारः तामसोभूतसूक्ष्मस्य शब्दस्यादिः कारणं यतःशब्दात् खंआकाशोभवति आत्मनो
लिंगंस्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशतयावा यद्वालिंगंशरीरं आकाशशरीरं ब्रह्मेतिश्रुतेः ३१ नभसःस्वस्मात्प्र

वैकारिकश्चतैजश्चतामसश्चेत्यहंत्रिधा अहंतत्वाद्विकुर्वाणान्मनोवैकारिकादभूत् वैकारिकाश्चयेदेवाअर्था
भिव्यंजनंयतः ३० तैजसानींद्रियाण्येवज्ञानकर्ममयानिच तामसोभूतसूक्ष्मादिर्यतःखलिंगमात्मनः ३१ काल
मायांशयोगेनभगवद्वीक्षितंनभः नभसोनुसृतंस्पर्शंविकुर्वन्निर्ममेनिलं ३२ अनिलोपिविकुर्वाणोनभसोरु
बलान्वितः ससर्जरूपतन्मात्रंज्योतिर्लोकस्यलोचनं ३३ अनिलेनान्वितंज्योतिर्विकुर्वत्परवीक्षितं आधत्तांभोरस
मयंकालमायांशयोगतः ३४ ज्योतिषांभोनुसंसृष्टंविकुर्वद्ब्रह्मवीक्षितं महींगंधगुणामाधात्कालमायांशयोग
तः ३५ भूतानांनभआदीनांयद्यद्भव्यपरावरं तेषांपरानुसंसर्गात्यथासंख्यंगुणान्विदुः ३६ रामकृष्ण

नुसृतंबुद्धंतंस्पर्शंविकुर्वत् रूपांतरंनयत् एवंसर्वत्रतन्मात्रद्वाराभूतोत्पत्तिरितिज्ञातव्यं ३२ नभसासहितःस्वयंचो श्री
रुबलान्वितः ततोज्योतिस्तेजर्लोचनंप्रकाशकं ३३ ३४ ३५ हेभव्यविदुरःपाठांतरेभाव्यंकार्यं यद्यदवरमवरंकार्यं १६
तेषांकार्याणांपरैःकारणैरनुसंसर्गात् अन्वयात् यथासंख्यंयथाक्रममुत्तरोत्तरं अधिकान्गुणान्विदुःतथाहिनभसःश
ब्दएवगुणः अन्यान्वयाभावात् वायोस्तुस्पर्शआकाशान्वयाच्छब्दस्य एवंतेजसस्तौचरूपंचअंभसस्तानिरसश्चमत्याःसर्वे ३६

253
1981

देवामहदाद्यभिमानिनः विष्णोःकलाअंशाः काललिंगंविकृतिर्मायालिंगंविक्षेपः अंशलिंगंचेतनातानिवि
घ्नंतेयेषु अतःसमत्वेननानात्वात् परस्परासंबंधात्स्वक्रियायांब्रह्मांडरचनायांअनीशाःअशक्ताःसंतोविभुंपरमेश्व
रंप्रोचुः ३७ मिथःस्पर्धिष्णवोदेवानमिलंतःपरस्परं विश्वकर्मण्यनीशानानिर्विण्णाहरिमीडिरे प्रपन्नानांतापोपशमेआ
तपत्रंछत्रं तत्रहेतुः यस्यपदारविंदस्यमूलंतलंकेतनआश्रयोयेषांबहिर्दूरतउत्क्षिपंति परित्यजंति यथापांथाःस्वगृहंप्राप्य
मार्गश्रममिव ३८ श्रमंविनिवेदयंतआहुःहेधातःपितःयद्यस्मात् भवेसंसारेआत्मन् आत्मनिसंबोधनंवा शर्मसुखंस
तेयदितिपाठे यत्पादभंजनंविनाशर्मनलभंते ननुज्ञानादज्ञानकृतस्तापोनिवर्तते किमंदघ्रिछायाश्रयणेन तत्राहुः
एतेदेवाःकलाविष्णोःकालमायांशलिंगिनः नानात्वात्स्वक्रियानीशाःप्रोचुःप्रांजलयोविभुं ३७ देवाऊचुः नमाम
तेदेवपदारविंदंप्रपन्नतापोपशमातपत्रं यन्मूलकेतायतयोंजसोरुसंसारदुःखंबहिरुत्क्षिपंति ३८ धातर्यदस्मि
न्भवईशजीवास्तापत्रयेणोपहतानशर्म आत्मन्लभंतेभगवंस्तवांघ्रिछायांसविद्यामतआश्रयेम ३९ मार्गंतियत्ते
मुखपद्मनीडैःछंदःसुपर्णैरृषयोविविक्ते यस्याघमर्षोदसरिद्वरायाः पदंपदंतीर्थपदःप्रपन्नाः ४० माधव

सविद्यांतदाश्रयणमेवविद्याप्रापकमित्यर्थः ३९ अज्ञातस्याश्रयणायोगात् तत्ज्ञानसाधनमाहुः मार्गंतिअन्वेषयंतियतत
तीर्थपदस्तवपदं वयंप्रपन्नाःकैर्मार्गंतिछंदःसुपर्णैर्वेदपक्षिभिस्तवैवमुखपद्मंनीडंयेषांयथापक्षिणोनीडउड्डीनास्ततस्ततःपरि
भ्रम्यपुनस्तत्रैवविशंतितथावेदाअपित्वन्मुखाद्गतास्त्वय्यवपर्यवस्यंति अतोवेदानाश्रित्यत्वत्पदंमृगयंतइति विविक्तेअसंगेमन
सि किंच अघमर्षमघनाशकंउदंउदकंयासांसरितांतासुवरायाः गंगायाःपदंउद्गमस्थानं अतोगंगामनुसेवमानाअपित
दुद्गमस्थानंत्वत्पदंप्राप्नुवंतीत्यर्थः ४० माधव ५ मुकुंद ५ नारायण ५ रामकृष्ण ५ गोविंद

भा०
१७

ननुविषयाक्रुष्टचित्तानांकुतस्तदन्वेषणं तत्राहुः यच्छ्रद्धयाहृदयेअवधायध्यात्वा वैराग्यंबलंयस्यतेनज्ञानेनधी टी०
राभवंति सरागेचित्ते ध्यानमेवकुतः श्रद्धयाश्रवणपूर्विकयाभक्त्याचसंमृज्यमानेसंशोध्यमाने ४१ भक्तानुग्रहंस्मरंतआ
हुः विश्वस्येति ४२ अंतर्यामितयानित्यंसन्निहितेअनर्थकंव्रजनमित्याशंक्याह यदिति सानुबंधेसोपकरणे असतितुच्छे
पुर्यांस्वदेहएववसतोपियत्सुदूरंतर्हिअन्येषामपितथैवस्यात् अविशेषादित्याशंक्याहुः तानिति असद्वृत्तिभिर्बहिर्मुखैः
रक्षिभिरिंद्रियैः पराहृतंदूरमपहृतं अंतरस्थं मनोयेषांते अथेश्वरतएतेनूनंतान्नपश्यंति वैप्रसिद्धं कुतः पुनस्तेषांतत्संगः

यच्छ्रद्धयाश्रुतवत्याचभक्त्यासंमृज्यमानेहृदयेवधाय ज्ञानेनवैराग्यबलेनधीराव्रजेमतत्तेंघ्रिसरोजपीठं ४१
विश्वस्यजन्मस्थितिसंयमार्थेकृतावतारस्यपदांबुजंते व्रजेमसर्वेशरणंयदीशस्मृतंप्रयच्छत्यभयंस्वपुंसां ४२ य
त्सानुबंधेसतिदेहगेहेममाहमित्यूढदुराग्रहाणां पुंसांसुदूरंवसतोपिपुर्यांभजेमतत्तेभगवन्पदाब्जं ४३ तान्वा
असद्वृत्तिभिरक्षिभिर्येपराहृतांतर्मनसःपरेशः अथोनपश्यंत्युरुगायनूनंयत्तेपदन्यासविलासलक्ष्म्याः॥ ४४
पानेनतेदेवकथासुधायाःप्रवृद्धभक्त्याविशदाशयाये वैराग्यसारंप्रतिलभ्यबोधंयथांजसान्वीयुरकुंठधिष्ण्यं ४५

स्यात् कान् तेतवपदान्यासोगमनंतस्यविलासोविभ्रमः तस्यलक्ष्मीःशोभातस्याःयेत्वल्लीलाकथादिभिःशोभमानास्तान् त्व
द्भक्तानित्यर्थः यथइतिलक्ष्म्यानितिचपाठेत्वत्पदन्यासविलासोलक्ष्म्यायेषांतान् यद्वात्वमार्गभूतान्सतःमार्गान्वाश्रवणादीन् नप श्रीः
श्यंतीत्यर्थः यद्वायेएवंभूताभगवतातेतानुन्मत्तान्नूनंनैवपश्यंपश्यंतीत्यन्वयः सत्संगाभावेनहरिकथाश्रवणाभावाद्दूरस्थितमपिते १७
षांसुदूरमितिभावः ४४ एतदेवस्फुटयतिपानेनेतिद्वाभ्यांवैराग्यंसारोबलेयस्यबोधस्यतंलब्ध्वाअन्वीयुःअकुंठधिष्ण्यंवैकुंठलोकं ४५

255/1981

आत्मनिसमाधिर्मनस्थैर्यंसएवयोगउपायस्तस्यबलेनज्ञानयोगतः श्रमेणमोक्षः सत्संगतस्त्वत्कथाश्रवणादिनात्व
नायासेनैवअहंममताविष्टानांतुनकथंचिदितिभावः ४६ तदेवंस्तुत्वाप्रार्थयंतेचतुर्भिः ततस्मात् हेआद्यनेत्वदीयावयं
यस्माल्लोकानांविसृक्षयात्वयानुसृष्टाःक्रमेणोत्पादिताःत्रिभिरात्मभिः सत्वादिस्वभावैरतएवविरुद्धस्वभावत्वात् वियु
क्ताःसंतः यदर्थंसृष्टाः तत्त्वविहारतंत्रंत्वत्क्रीडोपकरणंब्रह्मांडंतेतुभ्यंप्रतिहर्तुंसमर्पयितुंनशक्नुमः अतस्त्वंनःस्वचक्षुः

तथापरेचात्मसमाधियोगबलेनजित्वाप्रकृतिंबलिष्ठां त्वामेवधीराःपुरुषंविशंतितेषांश्रमस्यान्नतुसेवयाते ४६
तत्तेवयंलोकसिसृक्षयाद्यत्वयानुसृष्टास्त्रिभिरात्मभिःस्म सर्वेवियुक्ताःस्वविहारतंत्रंनशक्नुमस्तत्प्रतिहर्तवेते ४७ या
वद्बलिंतेजहरामकालेयथावयंचान्नमदामयत्र यथोभयेषांतइमेहिलोकाबलिंहरंतोन्नमदंत्यनूहाः ४८ श्रीः

परिदेहीतित्रयाणांश्लोकानांचतुर्थेनान्वयः ४७ असामर्थ्यमेवप्रपंचयितुकार्यस्यातिवैचित्र्यमाहुः भोअजका
लेतत्तदवसरे बलिंभोगंयावत् सांकल्येनतुभ्यंहरामसमर्पयाम यथायेनप्रकारेणअन्नंअदाम भक्षयामेत्यनेनान्नमात्रं
चास्माकं ऐश्वर्येणतुभोगस्तवैवेत्युक्तंउभयेषांतवचास्माकंच यत्रस्थिताइमेजीवाः अनूहा अप्रत्यूहाःनिर्विघ्नाःयद्वा
अनूहा अवितर्काःनिःसंशयाइत्यर्थः तथाचश्रुतिः ताएनमब्रुवन् आयतनंनःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेति ४८

भा० अवश्यं चत्वयास्माकमेषांचकार्योपाधीनांजीवानांचरन्तिः परिकल्पनीयाजनकत्वादित्याहुः नोस्माकंसात्वयानां तृ०
१८ सकार्याणां यद्वा अन्वेतीत्यन्वयः कारणंतत्सहितायां त्वमेवाद्यःकारणं अत्रहेतवः कूटस्थः अविक्रियः पुरुषः अधि
ष्ठाता पुराणः पुरातनः एतदुपपादयंतित्वमितिहेदेव अजएवत्वंगुणानांसत्वादीनांकर्मणाजन्मादीनांचयोनौकारणभू
तायांशक्त्यामायायांप्रथमंरेत आदधेनिहितवानसीत्यर्थः कीदृशंविंकसर्वजंमहत्तत्वरूपं ४९ ततःहेआत्मन्हेदेवसत्वमुखा
महदादयोवयंयदर्थंबभूविमतत्किंतेकार्यंकरवामस्टष्टिमितिचेत्तत्राहुः तर्हिनोस्माकंत्वंस्वचक्षुःस्वीयंज्ञानंशक्त्यासह

त्वन्नःसुराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः त्वंदेवशक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविमादधे
अः ४९ ततोवयंसत्वमुखायदर्थेबभूविमात्मन्करवामकिंते त्वन्नःस्वचक्षुःपरिदेहिशक्त्यादेवक्रियार्थेयदनुग्रहाणां
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेपंचमोध्यायः ५ ऋषिरुवाच इतितासांस्वशक्तीनांसतीनामसमे
त्यसः प्रसुप्तलोकतंत्राणानिशाम्यगतिमीश्वरः१ कालसंज्ञांतदादेवींबिभ्रच्छक्तिमुरुक्रमः त्रयोविंशतितत्वानांगणंयु
गपदाविशत् २

परिदेहिप्रयच्छयस्मात् त्वत्तएवानुग्रहोयेषांतेयदनुग्रहास्तेषां अस्माकं क्रियार्थःइयानेवएतावाननुग्रहोयेषामित्येकंवाप
दं त्वदीयज्ञानक्रियाशक्तिभ्यामेवयंसृष्टौक्षमाःनान्यथेत्यर्थः ५० इतितृतीयेटिकायांपंचमः५ षष्ठेतैरीश्वराविष्टैस्सृष्टिमाह श्री
विराट्तनोः अधिदेवाधिभेदंचतत्रैवभगवत्कृतं स्वशक्तीनांमहदादीनामसमेत्यअमिलित्वासतीनांस्थितानांप्रसुप्तलोकतंत्रंविश्व
रचनायासांयद्वाप्रसुप्तजीवोपकरणानांगतिंस्थितिंदृष्ट्वाआविशदित्युत्तरेणान्वयः१ कालेनसंज्ञाउद्बोधोयस्याःकालयतिक्षोभ १८
यतिस्वकार्याणीतिवा कालसंज्ञाप्रकृतितांशक्तिंप्रकृत्यासहप्रवेशात् त्रयोविंशतितत्वानामित्युक्तं अंतर्यामितयाप्राविशत् २

257/1981

चेष्टारूपेणक्रियाशक्त्या कर्मतेषांक्रियाजीवानामदृष्टंवा २ प्रबुद्धंक्रियाशक्तिर्यस्यसः त्रयोविंशतिर्गणः देवेन
श्वरेणप्रेरितः मात्राभिरंशैः अधिपुरुषंविराट्देहं ४ जननमेवाह परेणाइश्वरेणविश्वसृजांतत्वानांगणः मात्रयानुप्रो
भपरिणतः नसर्वात्मना यस्मिन्लोकास्थिताः ५ सपुरुषोयोधिपुरुषदृत्युक्तः आंडकोशेब्रह्मांडमध्येसर्वैःसत्वैरनुशयि
भिर्जीवैः सहितः ६ गर्भःकायरूपोविराट् देवशक्तिर्ज्ञानशक्तिस्तयाएकधाहृदयावच्छिन्नचैतन्यरूपेणकर्मशक्तिःक्रिया

सोनुप्रविष्टोभगवांश्चेष्टारूपेणतंगणं भिन्नंसंयोजयामाससुप्तंकर्मप्रबोधयन् २ प्रबुद्धकर्मादैवेनत्रयोविं
शतिकोगणः प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषं ४ परेणविशतास्वस्मिन्मात्रयाविश्वसृग्गणः चुक्षु
भान्योन्यमासाद्ययस्मिंलोकाश्चराचरः ५ हिरण्मयःसपुरुषःसहस्रपरिवत्सरान् आंडकोशउवासाप्सु स
र्वसत्वोपबृंहितः ६ सवैविश्वसृजांगर्भोदेवकर्मात्मशक्तिमान् विबभाजात्मनात्मानंएकधादशधात्रिधा ७
एषह्यशेषसत्वानामात्मांशःपरमात्मनः आद्योवतारोयत्रासौभूतग्रामोविभाव्यते ८ साध्यात्मःसाधिदैव
श्चसाधिभूतइतित्रिधा विराट्प्राणोदशविधएकधाहृदयेनच ९ माधव गोविंद श्रीः श्रीः श्रीः श्रीः

शक्तिस्तयादशधाप्राणरूपेण प्राणादयःपंच नागःकूर्मश्चकृकरोदेवदत्तोधनंजयइत्येतेपंचैवंवृत्तिभेदेनदशविधःप्राणः
आत्मशक्तिर्भोक्तृकशक्तिस्तया अध्यात्मादिभेदेनत्रिधाआत्मानंविभक्तंकृतवान् ७ एवंविभागसामर्थ्यायतस्योत्कर्ष
माह एषहीति अशेषसत्वानांप्राणिनामात्मा व्यष्टीनांतदंशत्वात् अंशोजीवः अवतारलोकिस्तस्मिन्नारायणा
विर्भावाभिप्रायेण ८ पूर्वश्लोकार्थंविवृणोति साध्यात्मः अध्यात्मानींद्रियाणितत्सहितःविराडितिसर्वत्र ९ राम

भा० अध्यात्मादिभेदं प्रपंचयितुमाह स्मरन्निति विज्ञापितं यावद्धलिंतेजहरामइत्यादि स्वेनतेजसाचिद्वृत्त्याअत टी०
१९ पत् एवंकरिष्यामीत्यालोचितवान् यस्यज्ञानमयंतपइतिश्रुतेः विवृत्तयेविविधवृत्तिलाभाय १० मेमतःशृणु
११ आयतनान्येवाह तस्याग्निरित्यादिचतुर्दशभिः आस्यंनिर्भिन्नंपृथक्जातंपदंस्वस्थानंस्वांशेनस्वशक्त्यावा
चासहअविशत् अंसोजीवः वक्तव्यंप्रतिपद्यतेशब्दमुच्चारयतीत्यर्थः सर्वत्रयन्निर्भिन्नंतदधिष्ठानंअग्न्यादिप्रथ

स्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजः विराजमतपत्स्वेनतेजसैषांविवृत्तये १० अथतस्याभितप्त
स्यकतिचायतनानिह निरभिद्यंतदेवानांतानिमेगदतःशृणु ११ तस्याग्निरास्यंनिर्भिन्नंलोकपालो
विशत्पदं वाचास्वांशेनवक्तव्यंययासौप्रतिपद्यते १२ निर्भिन्नंतालु वरुणोलोकपालोविशद्धरेः जिह्व
यांशेनचरसंययासौप्रतिपद्यते १३ निर्भिन्नेअश्विनौनासेविष्णोराविशतांपदं घ्राणेनांशेनगंधस्यप्रति
पत्तिर्यतोभवेत् १४ निर्भिन्नेअक्षिणीत्वष्टालोकपालोविशद्विभोः चक्षुषांशेनरूपाणांप्रतिपत्तिर्यतो
भवेत् १५ निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोविशत् प्राणेनांशेनसंस्पर्शंयेनासौप्रतिपद्यते १६
कर्णावस्यविनिर्भिन्नौधिष्ण्यंस्वंविविशुर्दिशः श्रोत्रेणांशेनशब्दस्यसिद्धिंयेनप्रपद्यते १७ गोविंद४ श्री

मांतमधिदैवं वागींद्रियंततीयांतमध्यात्मंप्रतिपत्तव्यमधिभूतं १२ हरेः विराजः १३ १४ त्वष्टाआदित्यः १९
१५ प्राणेनेति प्राणवद्देहव्यापिनात्वगिंद्रियेणेत्यर्थः १६ शब्दस्यसिद्धिंज्ञानं १७ श्रीगोपाल श्रीगोविंद

259/1981

त्वचंचर्मओषधीः ओषधयः त्वगिंद्रियस्यैवस्थानभेदेनविषयद्वयंकंडूः स्पर्शश्चतत्रचायंनामभेदोदेवता
भेदश्चेतिद्वितीयस्कंधएवव्याख्यातं १८ कःप्रजापतिः १९ २० स्वर्पतिः स्वर्गस्यपतिः वार्त्तयाक्रयविक्रयादिरूपया वृ
त्तिंजीविकां २१ २२ विक्रियांसंकल्पादिरूपां २३ आत्मानंअहंकारंअभिमन्यतेअनेनेत्यभिमानोरुद्रः कर्मणा

त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः अंशेनरोमभिःकंडूं यैरसौप्रतिपद्यते १८ मेढ्रंतस्यवि
निर्भिन्नंस्वधिष्ण्यंकउपाविशत् रेतसांशेनयेनासावानंदंप्रतिपद्यते १९ गुदंपुंसोविनिर्भिन्नंमि
त्रोलोकेशआविशत् पायुनांशेनयेनासौविसर्गंप्रतिपद्यते २० हस्तावस्यविनिर्भिन्नाविंद्रःस्वर्पति
राविशत् वार्त्तयांशेनपुरुषोयथावृत्तिंप्रपद्यते २१ पादावस्यविनिर्भिन्नौलोकेशोविष्णुराविशत् गत्या
स्वांशेनपुरुषोयथाप्राप्यंप्रपद्यते २२ हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविशत् मनसांशेनयेनासौवि
क्रियांप्रतिपद्यते २३ आत्मानंचास्यनिर्भिन्नमभिमानोविशत्पदं कर्मणांशेनयेनासौकर्तव्यंप्रतिपद्यते २४
सत्त्वंचास्यविनिर्भिन्नंमहान्धिष्ण्यमुपाविशत् चित्तेनांशेनयेनासौविज्ञानंप्रतिपद्यते २५ शीर्ष्णोस्यद्यौ
र्धरापद्भ्यांखंनाभेरुदपद्यत गुणानांवृत्तयोयेषुप्रतीयंतेसुरादयः २६ माधव गोविंद नारायण

अहंवृत्त्याकर्तव्यमितिक्रियां २४ सत्त्वमितिबुद्धिचित्तयोरभेदेननिर्देशः महानितिब्रह्मा चित्तेनचेतनया २५ त्रि
लोकोत्पत्तिमाह शीर्ष्णइति वृत्तयःपरिणामाः २६ केशवाय नारायणाय माधवाय गोविंदाय विष्णवे

भा॰ एतदेवप्रपंचयति द्वाभ्यां आत्यंतिकेनउर्जितेन पणव्यवहारे पणंतेयागादिनाव्यवहारंनीतिपणयोमनुष्याः तान टी॰
२० तुनयेतदुपकरणभूतायेगवादयस्तेपिधरांप्रपेदिरे २७ तृतीयंतमः तदीयेनतामसेनउभयोर्द्यावापृथिव्योरंतरंमध्यंव्यो
मअंतरिक्षंतदेभगवतोनाभिस्तामाश्रिताः रुद्रपार्षदारुद्रस्यपार्षदानांभूतादीनांगणाः २८ अवर्त्ततप्रवृत्तं ब्रह्मवेदःयस्मा
उन्मुखत्वात् मुखोद्भवत्वात् वर्णानांमुख्यः मुखमिवप्रथमः गुरुश्चाभूत् सोपिमुखतोवर्त्ततेत्यनुषंगः आध्यापनादिनाब्रा

अत्यंतिकेनसत्वेनदिवंदेवाःप्रपेदिरे धरारजःस्वभावेनपणयोयेचतानन्नु २७ नार्तीयेनस्वभावेन
भगवन्नाभिमाश्रिताः उभयोरंतरंव्योमयेरुद्रपार्षदांगणाः २८ मुखतोवर्ततब्रह्मपुरुषस्यकुरूद्वह
यस्तून्मुखत्वाद्वर्णानांमुख्योभूद्ब्राह्मणोगुरुः २९ बाहुभ्योवर्ततक्षत्रंक्षत्रियस्तदनुव्रतः योजातस्त्राय
तेवर्णान्पौरुषःकंटकक्षतात् ३० विशोवर्त्तंततस्योर्वोर्लोकवृत्तिकरीर्विभोः वैश्यस्तदुद्भवोवार्तांनृणां
यःसमवर्तयत् ३१ पद्भ्यांभगवतोजज्ञेशुश्रूषाधर्मसिद्धये तस्यांजातःपुराशूद्रोयद्वृत्यातुष्यतेहरिः ३२

ह्मणस्यवेदोवृत्तिः तयावृत्त्यासहब्राह्मणोमुखतोजातइत्यर्थः एवमुत्तरत्रवर्णत्रयेपिज्ञातव्यं २९ क्षत्रंपालनरूपावृत्तिः तत्क्षत्रं श्री
अनुव्रतः अनुसृतः क्षत्रियोपिबाहुभ्योवर्ततेत्यर्थः तदनुव्रतत्वमेवाह यइतिपौरुषः पुरुषस्यविष्णोरंशः कंटकाश्चोरादयस्तेभ्योय २०
त् क्षतंउपद्रवस्तस्मात्त्रायतेरक्षति ३० विशः कृष्यादिव्यवसायाः लोकस्यवृत्तिकरीः जीविकाहेतवः तस्यविभोरुर्वोः प्रवृत्ताः तदु
द्भवः ऊरुजः वार्त्तांजीविकांयःस्ववृत्त्यासंपादितवान् ३१ तस्यांनिमित्तभूतायांयस्यवृत्त्याहरिःस्वयमेवतुष्यते ३२ वासुदेवाय

261
1981

यद्यस्माज्जाताः गुरुत्वाज्जनकत्वात् वृत्तिप्रदत्वाच्च हरेराराधनंतेषांपरोधर्मइत्यर्थः ३३ भोक्षत्तः देवकर्मात्मरूपिणः कालकर्मस्व
भावशक्तिमतः भगवतोयोगमायाबलेनोज्जृंभितमेतद्विराड्रूपंउपाकर्तुंसाकल्येननिरूपयितुंकःश्रद्दध्यात् इच्छेत् इच्छायश
क्यानिरूपणंतुदूरतइत्यर्थः ३४ अंगविदुर अथापिहरेः कीर्तिंकीर्तयामि यथाश्रुतंगुरुमुखात् तदपिनसर्वात्मनाकिंतुयथाम
तिस्वमत्यनुसारेण अन्याभिधाहरिव्यतिरिक्तार्थात् अभिधानतयासतींमलिनांस्वीयांवाचसत्कर्तुंपवित्रीकर्तुं ३५ अज्ञातापि
यथामतिकीर्तनेश्रवणेवाआवश्यकंकैवल्यमित्याह एकांततोलाभंनुनिश्चितमाहुः श्रुतेःश्रोत्रस्य उपाहृतायांनिरूपितायांउप

एतेवर्णाःस्वधर्मेणयजंतिस्वगुरुंहरिं श्रद्धयात्मविशुध्यर्थंयज्जाताःसहवृत्तिभिः ३३ एतत्क्षत्तर्भगवतोदैवकर्मात्मरू
पिणः कःश्रद्दध्यादुपाकर्तुंयोगमायाबलोदयं ३४ अथापिकीर्तयाम्यंगयथामतियथाश्रुतं कीर्तिंहरेःस्वांसत्कर्तुंगिर
मन्याभिधासतीं ३५ एकांतलाभंवचसोनुपुंसांसुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्चविद्वद्भिरुपाहृतायांकथासुधायामु
पसंप्रयोगं ३६ आत्मनोवसितोवत्समहिमाकविनादिना संवत्सरसहस्रांतेधियायोगविपक्वया ३७ अतोभगवतोमा
यामायिनामपिमोहिनी यत्स्वयंचात्मवर्त्मात्मानवेदकिमुतापरे ३८ यतोप्राप्यनिवर्त्तंतेवाचश्चमनसासह अहंचान्य
इमेदेवास्तस्मैभगवतेनमः ३९ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेषष्ठोध्यायः ६ वासुदेव

संप्रयोगंसंनिधावर्पणं ३६ नचातीवज्ञानेनिर्बंधःकर्तव्यःब्रह्मणोपिदुर्ज्ञेयत्वादित्याह आत्मनोहरेर्महिमायोगपक्वयापिसंवत्सरसह
स्रांतेपिआदिकविनाब्रह्मणापिकिमवसितंकाकूक्त्याएतावानितिनज्ञातएवेत्यर्थः ३७ यद्यस्मात्स्वयमपिआत्माहरिःआत्मवर्त्मस्वमाया
गतिंएतावदितिनवेद अनंतत्वात् ३८ अतोदुर्ज्ञेयत्वात्केवलंनमस्करोति यतइतियस्यज्ञानायप्रवृत्तावचोभिर्मनसासहतमप्राप्यैवनिवर्त्तंतेदु
र्ज्ञेयत्वात् नकेवलंवाङ्मनसी अहंअहंकारस्याधिष्ठानारुद्रोपिइमेइंद्रियाधिष्ठातारोदेवाअन्येच ३९ इतिभा॰तृतीयस्कं धेटी॰षष्ठोध्यायः

सत्यमेसंशयछेदिप्रतिनघमुनेर्वचः पुनः क्षत्राहृतानानाप्रश्नाःसम्यगुदीरिताः १ अथतेभगवल्लीलायोगमायोपबृंहि
ताइत्यादिनामायागुणैर्लीलयाभगवान्सृष्ट्यादिकरोतीत्येवं ब्रुवाणं भारत्या प्रार्थना त्रपया प्रीणयन्निवेति अभिप्रायात्ता
नेनाक्षेपात् १ निर्विकारस्यक्रियानिर्गुणस्यगुणाःकथं लीलयेत्युक्तिः प्रयोजनाभावंपरिहरतिनवस्तुविरोधइतिभावः २
अर्भकवल्लीलापिनयुज्यतेवैषम्यादित्याह उद्यमयतिप्रवर्तयतीतिउद्यमः अर्भकस्यक्रीडायांप्रवृत्तिहेतुः कामोस्ति अन्य
तस्तु वस्त्वंतरेणबालांतरप्रवर्तनेन वातस्यक्रीडेछाभवति ईश्वरस्यतुस्वतस्तृप्तस्यकथंकामः अन्यतःसदानिवृत्तस्यच

श्रीशुकउवाच एवंब्रुवाणंमैत्रेयंद्वैपायनसुतोबुधः प्रीणयन्निवभारत्याविदुरंप्रत्यभाषत १ ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः लीलयाचापियुज्येरन्निर्गुणस्यगुणाःक्रियाः २ क्रीडायामुद्यमोर्भस्यकामश्चिक्रीडिषान्यतः स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदान्यतः ३ अस्राक्षीद्भगवान्विश्वंगुणमय्यात्ममायया तयासंस्थापयत्येतद्भूयःप्रत्यभिधास्यति ४ माधव श्रीराम् १ लोम्येनात्मनिधारयिष्यति ४ गोविंद

असंगाद्द्वितीयस्यकथमन्यतश्चिक्रीडिषेत्यर्थः ३ यच्चोक्तंस्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजइत्यादिनाअविद्योपाधेजीवस्य
भोगार्थंईश्वरःसृष्ट्यादिकरोतीतितदप्याक्षेप्तुमनुवदति अस्राक्षीदिति गुणमयीआत्मनोजीवस्यकर्तृत्वभोक्तृत्वादिमोहोत्पादिकायामा
यातयासृष्टवान् तदुक्तंप्रथमे यथासंमोहितोजीवआत्मानंत्रिगुणात्मकं परोपिमनुतेनर्थंतत्कृतंचाभिपद्यतइत्यादिना अत्रच
अतोभागवतीमायामायिनामपिमोहिनींसंस्थापयतिपालयति प्रत्यभिधास्यतिप्रतिलोम्येनतिरोहितंकरिष्यति पाठांतरेप्राति

263
1581

एतच्चजीवस्याविद्याश्रयत्वेघटेतनतुतत्संभवतीत्याह देशतइति योसौदेशादिरविलुप्तावबोधआत्माजीवः ब्रह्मस्वरूपत्वा
त् सकथमजयाअविद्यायायुज्येततत्रदेशतोदीपप्रभायाइवलोपोनास्तिसर्वगतत्वात् नकालतोविद्युतइवनित्यत्वात् नावस्था
तःस्मृतिवत् अविक्रियत्वात् नस्वतःस्वप्नवत् सत्यत्वात् नान्यतः घटादिवत् अद्वितीयत्वात् एवमनेर्यस्यबोधोनलुप्यतेस
कथमजयायुज्येत अजाचात्राविद्यैवनमाया तस्याअवबोधेनविरोधाभावात् ५ किंच ब्रह्मरूपत्वादेवजीवस्यसंसारो
पिनविद्यतइति आक्षिपति सर्वक्षेत्रेष्ववस्थितोभोक्तापिवस्तुतोभगवानेवचिद्रूपत्वेनतद्व्यतिरेकाभावात् एवंचसतिअमुष्य

देशतःकालतोयोसावस्थातःस्वतोन्यतः अविलुप्तावबोधात्मासयुज्येताजयाकथं ५ भगवानेकएवैषसर्वक्षेत्रेष्ववस्थितः अमुष्यदुर्भगत्वंवाक्लेशोवाकर्मभिःकुतः ६ एतस्मिन्मेमनोविद्वन्खिद्यतेज्ञानसंकटे तन्नःपराणुदविभोकश्मलंमानसंमहत् ७ श्रीशुकउवाच सइत्थंचोदितःक्षत्रातत्त्वजिज्ञासुनामुनिः प्रत्याहभगवच्चित्तःस्मयन्निवगतःस्मयः ८ मैत्रेयउवाच सेयंभगवतोमायायन्नयेनविरुध्यते ईश्वरस्यविमुक्तस्यकार्पण्यमुतबंधनं ९ यदर्थेनविनामुष्यपुंसआत्मविपर्ययः प्रतीयतउपद्रष्टुःस्वशिरश्छेदनादिकः १०

जीवस्यदुर्भगत्वंआनंदादिभ्रंशः कर्मभिर्हेतुभूतैःक्लेशोवाकुतःकर्मसंबंधाभावात् अन्यथाईश्वरस्यापितत्प्रसंगस्यादितिभा
वः ६ अज्ञानमेवसंकटंदुर्गंतस्मिन्तन्मानसंकश्मलंमोहंपराणुदअपाकुरु ७ चोदितःआक्षिप्तःस्मयन्निवप्रौढिमाविःकुर्वन्नि
ववस्तुतस्तुगतस्मयः ८ भगवतोचिंत्यशक्तेरीश्वरस्यसेयंमायानयेनतर्केणविरुध्यतइतियत् तर्कविरोधमेवानुवदति विमु
क्तस्येवपुंसोविद्ययाबंधनंकार्पण्यंचेति ९ अत्रोदाहरणमाह यद्यथाअर्थेनशिरश्छेदादिनाविनापिउपद्रष्टुःस्वप्नसाक्षिणः
ममेदंशिरःछिन्नंइत्यात्मविपर्ययःकेवलंमृषैवप्रतीयतेतद्वत् १० श्रीः माधव गोविंद वासुदेव रामकृष्ण नारायण

तर्हि ईश्वरस्यापि किन प्रतीयेत तत्राह यथाजले प्रतिबिंबितस्येव चंद्रमसोजलोपाधिकृतः कंपादि धर्मो दृश्यते नत्वा
काशेस्थितस्य तथा अनात्मनो देहादेर्धर्मः असन्नपितद्भिमानिनो द्रष्टुरात्मनाजीवस्यैव नत्वीश्वरस्येत्यर्थः ११ तन्नि
वृत्त्युपायमाह सवै अनात्मनोगुणः निवृत्तिधर्मेण वासुदेवानुकंपातया च तस्मिन् भक्तियोगः तेनतिरोधत्ते अदृश्यो
भवति शनैरित्यनेन साधनानुसारेणोत्क्रमं १२ तर्हि सर्वानर्थनिवृत्तिः कदेत्यपेक्षायामाह यदेंद्रियाणामुपरामो नैश्च
ल्यं क्व द्रष्टुरात्मनि अंतर्यामिन्नपि अथ अनंतरमेव कृत्स्नक्लेशविलयमात्रे दृष्टांतः संसुप्तस्यैवेति नतु पुनरुत्थाने १३
भक्तियोगेन क्लेशनिवृत्तिं दर्शयति अशेषेति गुणानामनुवादश्च श्रवणं च आत्मनि मनसि लब्धा श्रवणकीर्तनो

यथाजले चंद्रमसः कंपादिस्तत्कृतोगुणः दृश्यतेसन्नपि द्रष्टुरात्मनोनात्मनोगुणः ११ सवैनिवृत्तिधर्मेण
वासुदेवानुकंपया भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रियोपरामोथ द्रष्टात्मनि परेहरौ विलीयं
ते तदाक्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः कुतः पुनस्तच्चरणार
विंदपरागसेवारतिरात्मलब्धा १४ श्रीविदुरउवाच सच्छिन्नः संशयो मह्यं तव सूक्तासिना विभो उभयत्रापि भगवन्
मनोमे संप्रधावति १५

पेक्षया सप्रेमध्याने किं पुनर्व्याथोक्तिः १४ उत्तरमभिनंदन्नात्मनः कृतार्थतामाविष्करोति संछिन्न इति षड्भिः चिद्रूपत्वा
त् विशेषेपि कथमीश्वरस्य जगत्कर्तृत्वादिकं कथं वा जीवस्य संसार इति यः संशयो ममासीत् स तव सूक्तं सोपपत्तिकं वाक्यमेवा
सिः खड्गः तेन संछिन्नः अत इदानीं मे मनः उभयत्रापि ईश्वरस्वातंत्र्ये जीवपारतंत्र्ये च संप्रधावति सम्यक् प्रविशति एवंवा अ
विलुप्तावबोधरूपस्यात्मनः कथमविद्ययाबंधः कुतो वा तन्निवृत्तिरिति संशयः उभयत्रेति बंधे मोक्षे चेत्यर्थः १५

265
1981

यस्मात्त्वयासाधुव्याहृतं किं तत् हरेः शक्तिर्या आत्ममाया जीवविषया तदनर्थं तदाश्रयमेतत् दुर्भगत्वादिकं
भातीति यस्मात् स्वशिरश्छेदादिवदपार्थमवस्तुभूतं मूलशून्यं च यस्मादस्य विश्वस्य मूलं स्वाज्ञानं विना बहिर्नास्ति
१६ अल्पज्ञत्वात्पूर्वं मम संशयो जात इत्याह यश्चेति मूढतमो देहाद्यासक्तः बुद्धेः प्रकृतेः परमीश्वरं प्राप्तस्तौ सुखं य
थाभवति तथा एधेते जीवत इत्यर्थः संशयक्लेशाभावात् यस्तु दुःखानुसंधानेन प्रपंचं जिहासति स्वानंदसंवेदना
भावात् हातुं न शक्नोति स तु क्लिश्यतीत्यर्थः १७ इदानीं तु कृतार्थोस्मि यतस्त्वया संशयः छिन्नः केवलं बाधितानुवृत्ति

साध्वेतद्व्याहृतं विद्वन् आत्ममायायनं हरेः आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः १६ यश्च मूढतमो लोके यश्च
बुद्धेः परंगतः तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः १७ अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः तां चापि यु
ष्मच्चरणसेवयाहं पराणुदे १८ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः १९
दुरापाल्पतपसः सेवा वैकुंठवर्त्मसु यत्रोपगीयते नित्यं देवदेवो जनार्दनः २० सृष्ट्वाग्ने महदादीनि सविकाराण्यनुक्र
मात् तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः २१ यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकं यत्र विश्व इमे लोकाः सविका
शं समासते २२ यस्मिन्दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः २३

रेवावशिष्टा सापि युष्मत्प्रसादान्निवर्तिष्यत इत्याह नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्यापि अर्थाभावं अर्थोत्र नास्ति किंतु
प्रतीतिमात्रं युष्मच्चरणसेवया निश्चित्य तां प्रतीतिमप्यहं पराणुदे अपनेष्यामीत्यर्थः १८ मधुद्विषः पादयोः रतिरासः प्रेमोत्सवः
तीव्रः दुर्वारः स्वाभाविकः व्यसनं संसारमर्दयति इति तथा १९ अहो दुर्लभं प्राप्तं मयेत्याह दुरापा दुर्लभा वैकुंठस्य विष्णोस्तद्भक्तस्य
वा वर्त्मसु मार्गभूतेषु महत्सु यत्र येषु महत्सेवया हरिकथाश्रवणं ततो हरौ प्रेम तेन च देहाद्यनुसंधानमपि निवर्तत इति तात्पर्यं
२० अर्थांतरं प्रष्टुं तदुक्तमनुवदति त्रिभिः सृष्ट्वेति विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशो विराजं सृष्ट्वा २१ प्रविष्ट

भा० प्रविष्टस्यस्वरूपमाह यमितिविराजंविशिनष्टि यत्रेति तेइमेविश्वेसर्वेलोकाः सविकाशंअसंकोचेन २२ प्राणादयः पंचनागाद् टी०
२३ यः पंचेति प्राणस्यबहिर्गमनं आपानस्याधोनयनं व्यानस्यव्यानयनं आकुंचनप्रसारणादि समानस्यअशीतपितानांसम्यक्
नयनं उदानस्योर्ध्वनयनं उद्गारे नागआख्यातः कूर्मउन्मीलनेस्मृतः कृकरः क्षुत्कृत्ज्ञेयोदेवदत्तोविजृंभणेनजहातिमृतंचापिसे
र्वव्यापीधनंजयः एवंदशविधः इंद्रियाणिचअर्थाश्चइंद्रियाणिचेतिपुनरुक्तिः तद्देवतालक्षणार्था तत्सहितः सर्वोपबृंहकत्वात् प्रा
णस्यतत्साहित्यं एवंत्रिवृत् त्रिविधःप्राणस्त्वयेरितउक्तः तस्यविभूतीर्ब्रह्माद्याः विसर्गशब्दवाच्याः २३ यत्रयासुइदंविश्वंततंया

यमाकृराद्यंपुरुषंसहस्रांघ्र्युरुबाहुकं यत्रविश्वइमेलोकाःसविकाशंसमासते २२ यस्मिन्दशविधःप्राणःसेंद्रियार्थें
द्रियस्त्रिवृत् त्वयेरितोयतोवर्णास्तद्विभूतीर्वदस्वनः २३ यत्रपुत्रैश्चपौत्रैश्चनप्तृभिःसहगोत्रजैः प्रजाविचित्राकृतयआ
सन्याभिरिदंततं २४ प्रजापतीनांसपतिश्चिक्लृपेकान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्चमनून्मन्वंतराधिपान् २५ एतेषामपि
वंशांश्चवंश्यानुचरितानिच उपर्यधश्चयेलोकाभूमेर्मित्रात्मजासते २६ तेषांसंस्थांप्रमाणंचभूर्लोकस्यचवर्णय तिर्यङ्मा
नुषदेवानांसरीसृपपतत्रिणां २७ वदनःसर्गसंव्यूहंगार्भस्वेदद्विजोद्भिदां गुणावतारैर्विश्वस्यसर्गस्थित्यप्ययाश्रयं २८सृज
तःश्रीनिवासस्यव्याचक्ष्वोदारविक्रमं २८ वर्णाश्रमविभागांश्चरूपशीलस्वभावतः ऋषीणांजन्मकर्मादिवेदस्यचविकर्षणं २९य
ज्ञस्यचवितानानियोगस्यचपथःप्रभो नैष्कर्म्यस्यचसांख्यस्यतंत्रंवाभगवत्स्मृतं ३०
मं २४ एवमेतत्पुराष्टृष्टोमैत्रेयोभगवान्किलेतिपरीक्षित् प्रश्नोत्तरतयाविदुरमैत्रेयसंवादःप्रस्तावितः अतस्तानेवविदुरेणकृतान्प्र श्रीः
श्नानाह यावत्समाप्ति प्रजापतीनांपतिर्ब्रह्मेत्यादीनांवर्णयेतिवक्ष्यमाणेनान्वयः चिक्लृपेअकल्पयत्सर्गान्नवविधान् अनुसर्गान् तद्भे
दान् २५ हेमित्रायआत्मजा २६ संस्थांसन्निवेशंसर्गाणांसंव्यूहंसंविभागं गार्भस्वेदद्विजोद्भिदांगार्भाजरायुजाः स्वेदजाश्चद्वाभ्यांचजाताःस्वेद २३
द्विजाःउद्भिदश्चतेषां २७ सर्गादीन्आश्रयंचसृजतः २८ रूपंलिंगंशीलमाचारः स्वभावःशमादिः ततः विकर्षणंविभागान् २९
वितानानिविस्तारान् नैष्कर्म्यस्यचज्ञानस्यतदुपायस्यच सांख्यस्यपथःमार्गान् तंत्रंचेत्यर्थः ३० श्रीः श्रीः श्रीः श्रीः श्रीः

267
1981

पाखंडानांपंथाः प्रवृत्तिः तदेववैषम्यं ३१ निमित्तान्युपायन् परस्पराविरोधेन ३२ ग्रहादीनांकालचक्रेसंस्थितिं ३३ ३४ येनमा
र्गेणसंतुष्येत् येषामितियादृशानां ३५ अनापृष्टमितिमयोगवक्तव्यमितिभावः ३६ प्रतिसंक्रमःप्रळयः तत्रप्रळयेइमंपरमेश्व
रंशयानंराजानमिवचामरेग्राहिणःकेवअनुशेरतेशयानमनुस्वपंति ३७ पुरुषस्यसंस्थानंजीवस्यतत्वंपरमेश्वरस्यस्वरूपंयेनज्ञा

पाखंडपथवैषम्यंप्रतिलोमनिवेशनं जीवस्यगतयोयाश्चयावतीर्गुणकर्मजाः ३१ धर्मार्थकाममोक्षाणांनिमित्तान्य
विरोधतः वार्त्तायादंडनीतेश्चश्रुतस्यचविधिंपृथक् ३२ श्राद्धस्यचविधिंब्रह्मन्पितृणांसर्गमेवच ग्रहनक्षत्रताराणांका
लावयवसंस्थितिं ३३ दानस्यतपसोवापियच्चेष्टापूर्तयोःफलं प्रवासस्थस्ययोधर्मोयश्चपुंसउतापदि ३४ येनवाभगवा
नतुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदतिवायेषामेतदाख्याहिचानघ ३५ अनुव्रतानांशिष्याणांपुत्राणांचद्विजोत्तम अना
पृष्टमपिब्रूयुर्गुरवोदीनवत्सलाः ३६ तत्वानांभगवंस्तेषांकतिधाप्रतिसंक्रमः तत्रेमंकउपासीरन्कउस्विदनुशेरते ३७ पुरु
षस्यचसंस्थानंस्वरूपंवापरस्यच ज्ञानंचनैगमंयत्तत्गुरुशिष्यप्रयोजनं ३८ निमित्तानिचतस्येहप्रोक्तान्यनघसूरिभिः स्वतो
ज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेववा ३९ एतान्मेपृच्छतःप्रश्नान्हरेःकर्मविवित्सया ब्रूहिमेज्ञस्यमित्रत्वादजयानष्टचक्षुषः ४०
सर्वेवेदाश्चयज्ञाश्चतपोदानानिचानघ जीवाभयप्रदानस्यनकुर्वीरन्कलामपि ४१ श्रीशुकउवाच सइत्थमापृष्टपुराणकल्पः
कुरुप्रधानेनमुनिप्रधानः प्रवृद्धहर्षोभगवत्कथायांसंचोदितस्तंप्रहसन्निवाह ४२ इतिश्रीभागव० तृतीय० सप्तमोध्यायः ७

शेनतयोरैक्यंतथाज्ञानंच नैगममौपनिषदं यानिसूरिभिःप्रोक्तानितस्यज्ञानस्यसाधनानितानिचब्रूहि ३८ गुरुंविनैतन्न
भवतीत्याह स्वतइति ३९ मेप्रश्नान्मेमित्रत्वात् स्निग्धत्वादिति अन्वयभेदान्नमेपदस्यपौनरुक्त्यं ४० तत्वोपदेशेनजीवाभयप्रदान
स्य ४१ पुराणेकल्पतेप्रकाशतइतिपुराणकल्पोबुभुत्सितोर्थः आपृष्टःपुराणकल्पोयंमुनिप्रधानःसः ४२ इतिभागवतेतृतीय
स्कंधेटीकायांसप्तमः ७ अष्टमेसमभूद्ब्रह्मानाभेस्तज्जलशायिनः तमजानन्जलेविभ्यत्तपसातोषयद्विभुं १ वासुदेव

श्रोतारमभिनंदति सतांसेवितुंयोग्यः बत अहोयथस्मात् इह अस्मिन्वंशेबभूविथआसीः कथंभूतः भगवानेवप्रधानंयस्य अजित यस्य कीर्तिमालां पदेपदेनूतनयसिनवीनांकरोषि १ अल्पसुखायमह दुःखं प्राप्तानां तस्यदुःखस्यविरामायप्रवर्त्तयेप्रारभे २ कोसौभगवान् केभ्यश्चऋषिभ्यः आह कथंचत्वयाप्राप्तमित्यपेक्षायामाह आसीनमिति सप्तभिः ऊर्ध्वांपातालतले अकुंठसत्वं अप्रतिहतज्ञानं अतः संकर्षणात्परस्यश्रीवासुदेवस्य ३ तमेवविशिनष्टि स्वयमेवधिष्ण्यंस्वीयमाश्रयं वासुदेवसंज्ञंपरमानंदरूपं ध्यानपथेनुभूयबहुमानयंतं सर्वोत्कर्षेण पूजयंतं प्रत्यग्धृतमंतर्मुखीकृतं नेत्रांबुजमुकुलं किंचिदुन्मीलयंतं कृपाव तृ०

मैत्रयउवाच सत्से वनीयोबतपूरुवंशोयल्लोकपालोभगवत्प्रधानः बभूविथेहाजितकीर्तिमालां पदेपदेनूतनयस्यभीक्ष्णं १ सोहंनृणांक्षुल्लसुखायदुःखंमहद्गतानांविरमायतस्य प्रवर्त्तयेभागवतंपुराणंयदाहसाक्षाद्भगवानृषिभ्यः २ आसीनमुर्व्यांभगवंतमाद्यंसंकर्षणंदेवमकुंठसत्वं विवित्सवस्तत्वमतः परस्यकुमारमुख्यामुनयोन्वपृच्छन् ३ स्वमेवधिष्ण्यंबहुमानयंतंयंवासुदेवाभिधमामनंति प्रत्यग्धृताक्षांबुजकोशमीषदुन्मीलयंतंविबुधोदयाय ४ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं पद्मंयदर्चंत्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्थाः ५ मुहुर्गृणंतोवचसानुरागस्खलत्पदेनास्यकृतानितज्ज्ञाः किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ६

लोकेनसनत्कुमारादीनामभ्युदयार्थं ४ मुनीनांविशेषणंसार्धेन स्वर्धुन्याउदकेनार्द्रैरिति श्रीभागवतश्रवणार्थंसत्यलोकात्पातालंप्रत्यवतरंतोनिरंतरं गंगामध्यतएवावतीर्णाइतिभावः चरणावुपधीयेतेयस्मिन्पद्मेतदुपस्पृशंतोनमंतः कथंभूतं तदाह यत्पद्मंप्रेमसहितंयथाभवत्येवंनानोपहारैः पूजयंति वरार्थाः पतिकामाः ५ कृतानिकर्माणि गृणंतः केन अनुरागेण संवलंतिपदानियस्मिन् तेनचवचसोच्चैः तानिजानंतीतितज्ज्ञाः सहस्रमेवसाहस्रंकिरीटानांसाहस्रेयेमणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितं उद्दामफणानांसहस्रंयस्यतं अपृच्छन्निति पूर्वेणान्वयः ६ माधव श्रीः गोविंद नारायण श्रीः श्रीः रामकृष्ण

श्रीः
२४

269
1981

तेनसंकर्षणेनसनत्कुमारायप्रोक्तं ७ पारमहंस्येधर्मेमुख्यः विवक्षमाणइत्यात्मनेपदंप्रबुवादेशस्यवचेरुभयपदित्वात् अन्विताय अनुगताय ८ पुलस्त्येनोक्तइत्यत्रैवमाख्यायिका पितरंराक्षसभक्षितः श्रुत्वा पराशरोराक्षससत्रेप्रवृत्तोवशिष्ठवचनान्निवृत्तस्ततः पुलस्त्येनस्वसंततिरक्षणात् तुष्टेनवरोदत्तः पुराणप्रवक्ताभविष्यसीति ९ तदेवंसंकर्षणात्संप्रदायप्रवृत्तिंप्रदर्श्यविभूतिकथनायपद्मोद्भवंवक्तुमाह उदाप्लुतं एकार्णवोदकेनिमग्नंयत्यदाअमीलितदृक् अतिरोहितचिच्छक्तिरेवश्रीनारायणोनेत्रेनिमीलितवानित्यर्थः मायाविनोदंपरित्यज्यस्वात्मरतोस्वरूपानंदएवकृतोत्सवः अतएवनिरीहः निःक्रियःसन् १० कालशक्तिप्रे

प्रोक्तंकिलैतद्भगवत्तमेननिवृत्तिधर्माभिरतायतेन सनत्कुमारायसचाहपृष्टः सांख्यायनायांगधृतव्रताय ७ सांख्यायनःपारमहंस्यमुख्योविवक्षमाणोभगवद्विभूतीः जगादसोस्मद्गुरवेन्विताय पराशरायाथबृहस्पतेश्च ८ प्रोवाचमह्यंसदयाकुरुक्तोमुनिः पुलस्त्येनपुराणमाद्यं सोहंतवैतत्कथयामिवत्सश्रद्धालवेनित्यमनुव्रताय ९ उदाप्लुतंविश्वमिदंतदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत् अहींद्रतल्पेधिशयानएकः कृतःक्षणः स्वात्मरतावनीहः १० सोंतः शरीरेर्पितभूतसूक्ष्मः कालात्मिकांशक्तिमुदीरयाणः उवासतस्मिन्सलिलेपदेस्वेयथानलोदारुणिरुद्धवीर्यः ११ चतुर्युगानांचसहस्रमप्सुस्वपन्स्वयोदीरितयास्वशक्त्या कालाख्ययासादितकर्मतंत्रोलोकानपीतान्ददृशेस्वदेहे १२ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थोरजसातनीयान् गुणेनकालानुगतेनविद्धः सूष्यंस्तदभिद्यतनाभिदेशात् १३ श्रीः ७ श्रीः ७ श्रीः श्रीराम

रणंपुनः सृष्ट्यवसरेप्रबोधनार्थंस्वेपदे अधिष्ठानेबहिर्वृत्त्यभावेदृष्टांतः यथानलइति ११ स्वयाचिच्छक्त्यासहवर्तमानएवयोगनिद्रयास्वपन् पूर्वमेवप्रबोधनार्थंनियुक्तयास्वकालशक्त्या आसादितंप्रापितंकर्मतंत्रंक्रियाकलापोयस्यसः अपीतान्लीनान्ददर्श १२ लोकसृष्ट्यर्थं अर्थसूक्ष्मे अभिनिविष्टादृष्टिर्यस्यकालानुसारिणारजोगुणेनविद्धः संक्षोभितः सन्तनीयान् अतिसूक्ष्मोर्थः सूष्यन् प्रसोष्यन् उद्भविष्यन् नाभिदेशाउद्भूतइत्यर्थः १३ माधव गोविंद मुकुंद मुरारे नारायणवासुदेवरामकृष्ण

भा० सतनीयानर्थः पद्मकोशः सद्युदतिष्ठत् कर्माणि जीवादृष्टानि प्रतिबोधयति यः कालस्तेन आत्मा श्रीविष्णुर्योनिर्यस्य १४ तत् त०
२५ लोकात्मकं पद्मं सर्वान् गुणान् जीवभोग्यानर्थान् च भासयतीति तथा तत् यस्माज्जातं स एव विष्णुः उ इति संबोधने प्राविशत्
प्रकर्षेण अलुप्तशक्तिरेवांतर्यामितया विवेश तस्मिन् विष्णुना अधिष्ठिते पद्मे विधाता ब्रह्मा आत्मतत्त्वभूतः स्वयमेव वेदमयः न त्वध्यय
नेन प्राप्तवेदः कोसौ अदृष्टपितत्वेन यं स्वयंभुवं वदंति सः प्राक्कल्पांते नारायणेन सह निद्रयैकीभूत आसीत् तस्मिंश्च प्रबुद्धे तत
एव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्त इत्यर्थः १५ स च तस्मिन् कल्पे चतुर्मुखोभूदित्याह तस्यामिति परिक्रमन् तत्रस्थ एव ग्रीवा
चालयन् लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य १६ तस्य च श्रीनारायणोपासनयैवाविर्भूतज्ञानक्रियाशक्तेर्लोककर्तृत्वं

स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः १४
तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोभूत् १५ तस्यां
स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः॥ परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनुदिशं मुखानि १६ तस्मा
द्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं अपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादिदेवः १७ क एष
योसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यं १८ माधव

न स्वतत्त्वं इति वक्तुं प्रथमं तस्य विमोहमाह तस्मात्सलिलात् विरूढं उद्भूतं कंजमपाश्रितोपि सा कल्पेन तत्कंजं लोकतत्त्वं चात्मानं च
साक्षात् न ज्ञातवान् उ इति विस्मये कथंभूतात् युगांतश्वसनः प्रलयवायुः तेनावघूर्णं तत्र तत्र प्रकंपितं यज्जलं तस्मात् श्रीः
सर्वत ऊर्मिचक्रं यस्मिन् १७ अविदुषस्तस्य वितर्कमाह स योसावहमब्जपृष्ठे एषः कः अन्येन तत् एकमेवैतदब्जं कुतो वा जातं २५
यत्रैतदधिष्ठितं तेन अधस्तात् सता वर्तमानेन नु निश्चितं भाव्यं स इत्थमुद्वीक्ष्येत्यत्रोत्तरेणान्वयः तथा च श्रुतिः सोपश्यत्पु
ष्करपर्णे तिष्ठन् सोमन्यत अस्ति वै तत् यस्मिन्निदमधितिष्ठतीति १८ गोविंद माधव मुकुंद वासुदेवाय नारायण

271
1951

तस्य च बहिर्मुखप्रवृत्त्या महतापि कालेन तदप्राप्तिमाह स इति द्वाभ्यां तस्याब्जस्य यत् नालं तस्य नाडीभिः अंतश्छिद्रैः त
स्य खरनालस्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन् गच्छन्नपि तत्तदा नाविंदत् १९ आत्मसर्गस्य कारणं त्रिणेमिः का
लः अजस्य विष्णोर्हेतिः सुदर्शनरूपं शस्त्रं देहभाजां नराणां भयमुत्पादयन्निति संवत्सरशतमतिक्रांतमित्युक्तं भवति २० अंत
र्मुखतया तु भगवंतं दृष्टवानित्याह द्वाभ्यां ततः अन्वेषणान्निवृत्तः न प्रतिलब्धकामो मनोरथो येन स्वधिष्ण्यं पद्मं जिते

स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविंदताजः
१९ तमस्यपारे विदुरात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिणेमिः यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः २०
ततो निवृत्तोप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः २१
कालेन सोजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः स्वयं तदंतर्हृदयेवभातमपश्यतापश्यत यन्न पूर्वं २२ मृणा
लगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये २२ श्रीमाधव

त श्वासेन निवृत्तं संयतं चित्तं यस्य अत एव आरूढ आश्रितः समाधियोगो येन तथाभूतः सन् न्यषीदत् उपविवेश २१ पुरुषा
युषा संवत्सरशतेन कालेन अभिप्रवृत्तः सुनिष्पन्नो योगस्तेन विरूढ उत्पन्नो बोधो यस्य यत्पूर्वं विचिन्वन्नपि नापश्यत् तत्स्वयमेवां
तर्हृदये च भातमपश्यत् २२ यदपश्यत्तद्वर्णयति मृणालेति नवभिः न व स्वयमपश्यदित्यस्यानुषंगः मृणालवत् गौरश्चासौ आ
यतश्च यः शेषस्य भोगो देहः स एव पर्यंकस्तस्मिन् कुत्र स्थिते पर्यंके फणातपत्रैरायुताः सर्वतो युक्ता ये मूर्धानस्तेषां रत्नानि
किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतध्वांते युगांततोये २३ माधव श्रीः श्रीः श्रीः श्रीः ॥ ॥ ॥ ॥ ॥

भा० कथंभूतंपुरुषंहरितोपलाद्रेर्मरकतशिलामयपर्वतस्यप्रेक्षांशोभांक्षिपंतं स्वलावण्यातिशयेनतिरस्कुर्वंतं संध्याभ्रंनीवी ३०
२६ परिधानंयस्यतस्यशोभांपीतांबरेणाक्षिपंतं उरुरुक्ममूर्भः अनेकस्वर्णशिखरस्यतस्यस्वकिरीटैः रत्नानिचउदधाराश्चओषधयश्चसौमनस्यानिचपुष्पसमूहाः सुमनसएवबातेषां वनस्रजः वनमालायस्य वेणवएवभुजायस्य अंघ्रिपाएवांघ्रयोयस्यसचासौ सचतस्य अयमर्थः यदितस्मिन्मालाइवस्थितारत्नादयोभवंति वेणवश्चभुजाइव वृक्षाश्चपादाइव तर्हितस्यशोभांस्वीयस्यन्नमुक्तातुलसीपुष्पदामभिः भुजैरंघ्रिभिश्चक्षिपंतमिव २४ किंचआयामतोदैर्घ्येण

प्रेक्षांक्षिपंतंहरितोपलाद्रेः संध्याभ्रनीचेरुरुरुक्ममूर्भः रत्नोदधारौषधिसौमनस्यवनस्रजोवेणुभुजांघ्रिपांघ्रेः २४ आयामतोविस्तरतःस्वमानदेहेनलोकत्रयसंग्रहेण विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहं २५ पुंसांस्वकामायविरक्तमार्गैरभ्यर्चतां कामदुघांघ्रिपद्मं प्रदर्शयंतंकृपयानखेंदुमयूखभिन्नांगुलिचारुपत्रं २६

विस्तरतश्चस्वमानदेहेन मीयतेनेनेतिमानःसुषमा शोभनश्चासावमानोनिरुपमोदेहः तेनयद्वासुष्ठः अमानः अपरिच्छिन्नः तेनयद्वा ताभ्यांस्वानुरूपप्रमाणेनअतएवलोकत्रयंसंगृह्यतेयस्मिन्तथाविचित्राणिविचित्राणीनानाविधानिदिव्यान्यपूर्वाभरणान्यंशुकानिचतेषांकृताअसमंतात् श्रीशोभायेनतेनदेहेनविशिष्टं एवंस्वतएवातिरम्यत्वेपिअपाश्रितवेषः श्रीः
स्वीकृतालंकारोदेहोयस्यतमपश्यत् यद्वाकेनप्रेक्षांक्षिपंतमित्यपेक्षायामेवंभूतेनदेहेनेतिसंबंधः २५ स्वाभिलषि २६
तफलायविविक्तैर्मार्गैःशुद्धैः वेदोक्तैर्मार्गैरभ्यर्चतांपुंसांकामदुघमंघ्रिपद्मं प्रदर्शयंतंकिंचिदुन्नमय्यसमर्पयंतं नखाइंदवः तेषांमयूखारश्मयस्तैर्भिन्नाः सभिन्ना अंगुलयएवचारूणिपत्राणियस्यतंतत् २६ श्रीः ७ ७ ७ ७ ७

273
1981

लोकार्तिहरंस्मितंयस्मिन्तेन परिस्फुरद्भ्यांकुंडलाभ्यांमंडितेन अधरबिंबदीप्त्याशोणवदाचरितेन शोभननासायुक्तेनस्रुभ्राशोभनयाभ्रुवाचप्रत्यर्हयंतं पूजकान्प्रतिपूर्यंपूजेतंसमानयंतं २७ कदंबकिंजल्कवत्पिशंगंपट्टवासस्तेनमेखलयाचनितंबेस्वलंकृतं हेवत्सः श्रीवत्सयुक्तंयद्वक्षस्स्थलंतस्यवल्लभेन वक्षस्यनर्घेणहारेणस्वलंकृतमित्यर्थः २८ महाचंदनवृक्षरूपकेणनिरूपयितुंविशिनष्टि परार्ध्यानिश्रेष्ठानिकेयूराणिअंगदानिमणिप्रवेकामण्युत्तमास्तैः पर्यस्ताव्याप्तादोर्दंडाएवसहस्रंअनंताःशाखायस्यचंदनवृक्षोपिकेयूरादितुल्येफलपुष्पादिभिर्व्याप्तशाखोभवति अव्यक्तंप्रधानंमूलमधोभागोयस्य यद्वा अव्यक्तंब्रह्म

मुखेनलोकार्तिहरस्मितेनपरिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासाप्रत्यर्हयंतंसुनसेनसुभ्र्वा २७ कदंबकिंजल्कपिशंगवाससास्वलंकृतंमेखलयानितंबे हारेणचानंतधनेनवत्सश्रीवत्सवक्षस्स्थलवल्लभेन २८ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलंभुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं २९ चराचरौकोभगवन्महीध्रमहींद्रबंधुंसलिलोपगूढं किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं ३० श्रीः श्रीः श्रीः

मूलंयस्यब्रह्माभिव्यक्तिरूपत्वात् वृक्षास्यापिमूलंनवकत्वंभुवनात्मकमंघ्रिपेंद्रं अहींद्रस्यानंतस्यभोगैः पर्णदेहावयवैर्वाअधिवीताः संवेष्टिताः स्पृष्टावल्शाः स्कंधायस्य वनस्पतेशानवल्शोविरोहेतिश्रुतेः सोपिसर्पैर्वेष्टितोभवति २९ प्रेक्षांक्षिपंतमित्यत्रैवपर्वतरूपेणानिरूपितमपिविशेषणांतरैःपुनर्निरूपयतिभगवानेवमहीध्रस्तं चराचराणामोकःस्थानं सोपितथा अहींद्रस्यबंधुःसोपिअहींद्राणांबंधुः सलिलेनोपगूढमावृतंपर्वतोपिमेनाकादिस्तथा किरीटसाहस्रमेवहिरण्यशृंगाणियस्यसोपिमेर्वादिस्तथापर्वतस्यगर्भेक्वचिद्रत्नमाविर्भवति तथाआविर्भवत्स्पष्टंदृश्यमानंकौस्तुभरत्नंगर्भेमूर्तिमध्येयस्यतं ३० माधव

भा० किंचवनमालयानिवीतंकंठलंबिन्याव्याप्तं आम्नायावेदाएवमधुव्रतास्तैः श्रीर्यस्यास्तयाहरिमितिपर्वतादिरूपंपश्यन् न०
२० हरिरसाविति ज्ञातवानित्यर्थः सूर्यादिभिरगमं अगम्यंस्वव्यापारैराकलयितुमशक्यमित्यर्थः किंच त्रिधपिलोकेषु धामस्फू
र्तिर्येषांतैः रक्षणार्थैः परिक्रामद्भिः परितोधावद्भिः प्राधनिकैः प्रधनंसंग्रामस्तत्प्रयोजनैः सुदर्शनादिभिर्हेतुभूतैर्दुरासदंदुः
प्रापं २१ यदेवहरिमपश्यत् तर्ह्येवतदेवलोकविसर्गदृष्टिः सन्तस्यनाभिसरसिसरोजंश्वसनं प्रलयवायुंवियत् आकाशं
चददर्श २२ कर्मबीजंलोकसृष्टेःकारणंउपरक्तः रजोगुणोपयुक्तः अतः परास्तष्टुमिच्छन् इयदेवनाभिसरोजादिपंचकमेव

निवीतमाम्नायमधुव्रतश्रियास्वकीर्तिमय्यावनमालयाहरिं सूर्येंदुवाय्वग्न्यगमंत्रिधामभिः परिक्रमत्प्राधनिकैर्दुरास
दं २१ तर्ह्येवतन्नाभिसरःसरोजमात्मानमंभःश्वसनंवियच्च ददर्शदेवोजगतोविधातानातःपरंलोकविसर्गदृष्टिः २२
सकर्मबीजंरजसोपरक्तः प्रजाःसिसृक्षन्नियदेवदृष्ट्वा अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा २३
इतिश्रीभागवते० तृतीयस्कंधेष्टमोध्यायः ब्रह्मोवाच ज्ञातोसिमेयसुचिरान्ननुदेहभाजांनज्ञायतेभगवतोग
तिरित्यवद्यं नान्यत्वदस्तिभगवन्नपितन्नशुद्धंमायागुणव्यतिकरायदुरुर्विभासि १ श्रीः श्रीः श्रीः श्रीः ध

वसर्गायअभिमुखःदत्तचित्तः अव्यक्तवर्त्मनिभगवतितेनवेशितचित्तः २३ इतितृतीयटीकायामष्टमः ८ नवमेतपसातुष्टंदृष्ट्वा
नारायणंत्वजः अस्तौदेकार्णवेसीदन् लोकसर्गचिकीर्षया १ भगवत्ज्ञानेनात्मनः कृतार्थतामाविष्कुर्वन्नज्ञांश्चशोचन्नाह श्रीः
ज्ञातोसीति सुचिराद्बहुकालोपासनेनअद्यमेमयाज्ञातोसिनतु अहोदेहभाजामेतदेवमहद्दोषः किंतत् यद्भगवतस्तवगतिःस्वत्वं
नज्ञायतइतियतस्त्वमेवज्ञातुंयोग्यः सत्यत्वात् नान्यत्असत्वादित्याह त्वत्तोन्यन्नास्तियदप्यस्तीतिप्रतिभातितदपिशुद्धंसत्यंनभ २७
वति कथमसतः प्रतीतिस्तत्राह मयतः मायागुणक्षोभात् त्वमेवउरुः बहुरूपोविभासि १ गोविंद माधव वासुदेव

275/1981

ननुत्वमपिसम्यक्नजानासियत्वयादृष्टंरूपमेतदपिगुणात्मकमेव निर्गुणंब्रह्मैवतुसत्यंतत्राह रूपमितिद्वाभ्यां अवबोध
रसोदयेनचिच्छक्त्याविर्भावेनशश्वत्सदानिवृत्तंतमोयस्मात्तस्यतवयदेतद्रूपंत्वयैवस्वातंत्र्येणसतामुपासकानामनुग्र
हायगृहीतमाविष्कृतं अवतारशतस्यशुद्धसत्वात्मकस्ययदेकंबीजंमूलंतत्प्रदर्शनार्थंगुणावतारबीजत्वंदर्शयतियन्नाभीति
२ हेपरम अविद्धवर्चः अनावृतप्रकाशं अतः अविकल्पंनिर्भेदं अतएवानंदमात्रं एवंभूतयद्भवतःस्वरूपंतत् अतोरूपात्प
रंभिन्नंनपश्यामि किंतुइदमेवतत् अतःकारणात्तेतवअदः इदंरूपमुपाश्रितोस्मियोग्यत्वादपीत्याह एकंउपास्येषुमुख्यंयतः

रूपंयदेतदवबोधरसोदयेनशश्वन्निवृत्ततमसःसदनुग्रहाय आदौगृहीतमवतारशतैकबीजंयन्नाभिपद्मभवना
दहमाविरासं २ नातःपरंपरमयद्भवतःस्वरूपमानंदमात्रमविकल्पमविद्धवर्चः पश्यामिविश्वसृजमेकमविश्वमा
त्मन् भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि ३ तद्वाइदंभुवनमंगलमंगलायध्यानेस्मनोदर्शितंतउपासकानां तस्मै
नमोभगवतेनुविधेमतुभ्यंयोनादृतोनरकभाग्भिरसत्प्रसंगैः ४ येतुत्वदीयचरणांबुजकोशगंधंजिघ्रंतिकर्णविव
रैश्रुतिवातनीतं भक्त्यागृहीतचरणपरयाचतेषांनापैषिनाथहृदयांबुरुहात्स्वपुंसां ५

विश्वसृजंअजएवअविश्वंविश्वस्मादन्यत् किंचभूतेंद्रियात्मकंभूतानामिंद्रियाणांचात्मानंकारणमित्यर्थः नन्वेवमपिसोपाधि
कमेतदर्वाचीनमेवेत्याशंक्याह तद्वै तदेवेदं हेभुवनमंगल यतःत्वयानोस्माकमुपासकानांमंगलायध्यानेदर्शितं नत्वव्यक्तव
र्त्मभिनिवेशितचित्तानामस्माकंत्वयासोपाधिकदर्शनंयुक्तमितिभावः अतस्तुभ्यंनमोनुविधेमअनुवृत्याकरवाम तर्हिकिमिति
केचिन्मानाद्रियंतेतत्राह येनादृतइति असत्प्रसंगैः निरीश्वरकुतर्कनिष्ठैः ४ आदरेणतुत्वांभजंतकृतार्थाइत्याह येत्वेति श्रुति
वेदःसएववातःतेननीतंप्रापितंनापैषिनापयासियेत्वत्कथाश्रवणमत्यादरेणकुर्वंतितेषांहृदिनित्यंप्रकाशसइत्यर्थः ५ माधव

भा० ततः किमंत आह तावदिति द्रविणादौ विद्यमाने भयं गते शोकः पुनश्च स्पृहा ततः परिभवः तथापि विपुलो लोभः त०
२८ तृष्णाः पुनः कथंचित्प्राप्ते ममेत्यसदाग्रहः आर्तिमूलं भयशोकादेः कारणं न प्रवृणीत नाश्रयेत् त्वत्पादाश्रयण
मात्रेण भयादिनिवृत्तिः किंपुनस्त्वत्प्रकाशे सतीति भावः ६ ये निष्कामा अपि संतस्त्वां नाद्रियंते ते नरकभाज इत्याह
ये तु त्वत्कथाश्रवणादिविमुखाः संतः काम्यकर्मपरास्ते ति मंदा इत्याह दैवेनेति हतदधियः नष्टमतयः प्रसंगात्
श्रवणकीर्तनादिरूपात् सर्वदुःखनिवर्तकात् विमुखानींद्रियाणि येषां अकुशलानि अक्षेमकराणि ७ अकुशल

ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या गृहीतचरणः परया च तेषां नापैषि
तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः तावन्ममेत्यसदवग्रह आर्तिमूलं याव
न्न तेंघ्रिमभयं प्रवृणीत लोकः ६ दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रिया ये कुर्वंति का
मसुखलेशलवाय दीना लोभाभिभूतमनसो कुशलानि शश्वत् ७ क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतो
ष्णवातवर्षैरितरेतराच्च कामाग्निनाच्युत रुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदतीमे ८ यावत्पृथक्त्वमिदमात्म
न इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ९

तमेव दर्शयति क्षुत्तृडिति त्रिधातवश्च वातपित्तश्लेष्माणस्तैः इमाः प्रजाः सुदुर्भरेण सुदुःसहेन कामाग्निना अच्युत या पुरुषाभि
विच्छिन्नक्रोधेन च पीड्यमानाः संपश्यतो मे मनः सीदतीति ८ ननु यंभूतायाः संसृतेः परमार्थत्वात्किमर्थं विषादः क्रियते तत्राह यावदिति श्रीः
आत्मन इदं पृथक्त्वं देहादिभावं भगवतस्तव इंद्रियार्थरूपा या माया तया बलमाधिक्यं यस्य तत् न प्रतिसंक्रमेत नोपरमे २८
त दुःखसमूहं प्रापयंती क्रियाणामर्थः फलं यस्यां ९ राम कृष्ण वासुदेव गोविंद माधव मुकुंद नारायणाय

277
1981

भवत्वेवमविवेकिनां विवेकिनस्तु मुक्ता एवेति किं तेषां भक्त्या इत्यत आह अह्न्यापृतेति आर्तानि च तान्यार्त्तानि क्लिष्टानि
करणानींद्रियाणि येषां रात्रौ विषयसुखलवोपि नास्ति यतो निःशयानाः समदर्शनेन च क्षणे क्षणे भग्ननिद्राः दैवेनाह
ताः सर्वतः प्रतिहता अर्थरचना अर्थार्थोद्यमो येषां १० तदेवमभक्तानां संसारानिवृत्तिमुक्त्वा भक्तानां तन्निवृत्तिमाह त्वमि
ति भक्तियोगेन शोधिते हृत्सरोजे आस्से तिष्ठसि श्रुतेन श्रवणेन ईक्षितः पंथा यस्य किंच न श्रवणं विनापि त्वद्भक्ता मनसा
यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तत्तत्प्रणयसे प्रकटयसि सतां भक्तानामनुग्रहाय ११ भक्तानां च निःकामानां त्वमति

अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः दैवाहतार्थरचना ऋषयोपि देव युष्मत्प्र
संगविमुखा इह संसरंति १० त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां यद्यद्धिया त उरुगाय वि
भावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ११ नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदिबद्धकामैः यत्सर्व
भूतदययासदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा १२ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतच
र्यया च आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः कर्हिचिद्म्रियते न यत्र १३

सुलभो नेतरेषामित्याह नेति उपचितैरूर्जितैः उपचारैः पुष्पोपहारादिभिः यत् यथा असतामभक्तानां अलभ्यया दयया
प्रियत्वे हेतुः एक इत्यादिना १२ यतः सकामानां भवान्नातिप्रसीदति अतः कामप्राप्तिः क्रियाणामुत्तमं फलं न भवति किंतु त्व
त्प्रीणनमेव कामसंयोगस्तु अवांतरफलेन पुरोचनार्थमित्याह पुंसामिति भगवतस्तवाराधनमेव सत्क्रियार्थः श्रेष्ठं क्रि
याफलं श्रेष्ठत्वे हेतुः यत्र त्वय्यर्पितो धर्मो न कदाचित् म्रियते नश्यति कामार्थस्तु धर्मः कामं दत्त्वा नश्यतीत्यर्थः १३ श्रीः

भा॰ अतस्त्वामेव वयं नता इत्याह शश्वत सर्वदा स्वरूपं चैतन्ये नैव निरस्त भेदभ्रमाय पुनश्च बोध एव धिषणा विद्याशक्ति ६०
२९ र्यस्य यद्वा धिषणमाश्रयः अतएव परस्मै अत्र हेतुः विश्वोद्भवादिनिमित्तं यामाया तस्या लीला विलासः तया रासक्रीडा
यस्य तेतुभ्यं इदं नमः नमनं च कृमकृतवंतो वयं १४ नामग्रहणमात्रतः कैवल्यप्रदत्वेनैश्वर्यव्यंजननमस्कारेणेति यस्येति
अवतारादीनां विडंबनमनुकरणमस्ति येषु तत्रावतारविडंबनानि देवकीनंदन इत्यादीनि गुणविडंबनानि सर्वक्षोभकत्व
त्सल इत्यादीनि कर्मविडंबनानि गोवर्द्धनोद्धरणः कंसारिरित्यादीनि असुविगमेपि विवशा अपि गृणंतिउच्चरयंति

शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै विश्वोद्भवस्थितिलयेषु
निमित्तलीलारासाय ते नम इदं च कृमेश्वराय १४ यस्यावतारगुणकर्मविडंबनानि नामा
नि येसु विगमे विवशा गृणंति तेनैकजन्मशमलं सहसैव हित्वा संयात्यपावृतमृतं तमजं प्रपद्ये
१५ येवा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवः प्रलयहेतव आत्ममूलं भित्वा त्रिपाद्ववृध ए
कउरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय १६ गोविंद वासुदेव माधव रामकृष्ण

केवलं शमलं पापं अपावृतं निरस्तावरणं कालं ब्रह्म प्राप्नुवंति १५ तत्र गुणावतारकर्माणि दर्शयन् प्रणमति येवा एकः श्री
त्रिपात्त्रयः ब्रह्मादयः पादाः स्कंधो यस्य प्रत्येकं च उरवः प्ररोहाः शाखोपशाखा मरीच्यादिमन्वादिरूपाय स्यत थाभूतःसन्
ववृधे तस्मै भुवनाकाराय द्रुमाय नमः किं कृत्वा ववृधे आत्मा स्वयमेव मूलं अधिष्ठानं यस्य तत्प्रधानं भित्वा गुणत्रयरूपेण विभ २९
ज्य त्रिपात्वमेवाह अहं ब्रह्मा गिरिशश्च स्वयं विभुर्विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो येवयं एवं त्रिपाद्भूत्वा योववृध इत्यर्थः १६

299/1981

एवं गुणावतारकर्मविडंबनमुक्ता तस्यैव कालाख्यं रूपं तत्कर्म च दर्शयन् प्रणमति लोक इति द्वाभ्यां विकर्मनिरतः
विरुद्धकर्मविष्टः कुशले हिते स्वे आत्मीये त्वदुदिते त्वयैव साक्षादुक्ते भवदर्चनरूपे कर्मणि उक्तं हि गीतासु यत्करोषि
यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणामिति तस्मिन्प्रमत्तः अदत्तचित्तो यावद्बलवत्
तावदस्य लोकस्य अनिमिषाय कालाय १७ आस्तां तावल्लोकस्य कथा यस्मात्कालाख्यात् त्वत्तः यद्विपरार्धावस्था
यिधिष्ण्यं स्थानं तत्रारूढोपि विभेमि भीतश्च सन् त्वामेवाववरुरुत्समानः प्राप्तुमिच्छन् तपस्तप्तवान् कथंभूतः
लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे यस्तावदस्य बलवानिह जीविताशां
सद्यः छिनत्त्यनिमिषाय नमोस्तु तस्मै १७ यस्माद्बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासितः सकललो
कनमस्कृतं यत् तेपे तपो बहुसवोवरुरुत्समानस्तस्मै नमो भगवतेधिमखाय तुभ्यं १८ तिर्यङ्मनुष्यविबुधा
दिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय १९

बहुसवः बहवः सवाः यागाः संवत्सरा यस्य बहून् यागान् कृत्वापि बहून् संवत्सरान् वा तपस्तप्तवानित्यर्थः अधिम
खाय मखाधिष्ठात्रे १८ इदानीं तत्तत्कालभाविलीलावतारकर्माणि दर्शयन्नाह तीर्यगादिषु जीवयोनिषु स्वेच्छया
स्वीकृतमूर्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रेमे वस्तुतः स्वानंदानुभावेनैव निरस्तरतिः विषयसुखोपि यः अतएव पुरु
षोत्तमः तत्तदुपाधिधर्मासंस्पर्शात् तदुक्तं गीतासु यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषो
त्तम इति १९

भा० इदानींतुदृश्यमानामेवमूर्तिंप्रणमतियोविद्ययेतिद्वाभ्यां दशार्द्धाः पंचवृत्तयोयस्यास्तयाअविद्ययानिद्रया टी०
२० निद्राभूतेरहेतुया अनभिभूतोपियोनिद्रामुवाह तस्मैनेनमःइत्युत्तरेणान्वयः जठरीकृताउदरेप्रविलापितालोक
यात्रालोकस्थितिर्येन अहिरेवकशिपुःशय्यातस्याःस्पर्शोनुकूलोयस्यास्तांनिद्रांभीमानाम्मूर्मीणामालाविद्यंतेय
स्मिन् अंतर्जले निद्राणस्याविवेकिनोजनस्यनिद्रासुखमीदृगितिविवृण्वन् प्रदर्शयन्उपहसन्नित्यर्थः अएवांत
र्जलादिविशेषणानियद्वापूर्वकल्पेआंतस्यजनस्यविश्रामसुखंविवृण्वनस्फोरयन् तदातुपरोपकारायस्वयंदुःस

योविद्ययानुपहतोपिदशार्द्धवृत्त्यानिद्रामुवाहजठरीकृतलोकयात्रः अंतर्जलेहिकशिपुस्पर्शानुकूलां
भीमोर्मिमालिनिजनस्यसुखंविवृण्वन् २० यन्नाभिपद्मभवनादहमासमीड्यलोकत्रयोपकरणोयदनुग्र
हेण तस्मैनमस्तउदरस्थभवाययोगनिद्रावसानविकसन्नलिनेक्षणाय २१ सोयंसमस्तजगतांसुहृदेक
आत्मासत्वेनयन्मृडयतेभगवान्भगेन तेनैवमेदृशमनुस्पृशताद्यथाहंस्रक्ष्यामिपूर्ववदिदंप्रणतप्रियोसौ २२

हमपिदुःखंसोढव्यमितिद्योतनार्थंविशेषणानि २० किंचयस्यनाभिपद्मे भवनंतस्मात् लोकत्रयमुपकरणंयस्य
यद्वालोकत्रयस्यसृष्ट्यादिद्वारेणोपकरोतीतितथा तादृशोहंयदनुग्रहेणासं उदरेस्थितःभवःसंसारप्रपंचोयस्ययोगनि श्री
द्रावसानेकिंचित् विकसत् नलिनवदीक्षणंयस्य २१ एवंस्तुत्वायाचतेसोयमितिचतुर्भिःयत्येनसत्वेनज्ञानेनभगेनैश्व ३०
र्येणचमृडयतेसुखयतिविश्वंदृशंप्रज्ञांअनुस्पृशतात् योजयतु यथाहंस्रष्टुंक्षमोभविष्यामि यतःप्रणतप्रियोसौअ
हंचप्रणतः नचान्यःसभगवानन्यःप्रार्थनीयोस्ति यतःसएवसमस्तजगतांसुहृत् यतोसौएकोनुस्यूतआत्माअंतर्यामी २२

2281
1981

आत्मशक्त्यापरमयासहयद्यत्कर्मकरिष्यति स्वविक्रमंविष्णोरेवविक्रमःप्रभावोयस्मिन् तदिदंविश्वं तदाज्ञयासृ
जतोपिमेचेतःसएवयुंजीतप्रवर्तयतु कर्मासक्तिंतत्कृतंशमलंचवैषम्यादिपापंयथाविजह्यांत्यक्ष्यामि २२ अंभसिसता
तोयस्यनाभिह्रदादिहासं विज्ञानेशक्तिर्यस्यमहत्तत्वात्मकस्यचित्तस्यतदभिमानी अस्यरूपमिदंविश्वंविस्तारयतोमेनि
गमस्यावयवभूतानांगिरांविसर्गउच्चारणंमारीरिषीष्ट हलातंब्रह्मवर्चसमितिन्यायेनमालुप्यतामित्यर्थः २४ विरूढप्रे

एषप्रपन्नवरदोरमयात्मशक्त्यायद्यत्करिष्यतिगृहीतगुणावतारः तस्मिन्स्वविक्रममिदंसृजतोपिचेतोयुंजीत
कर्मशमलंचयथाविजह्यां २३ नाभिह्रदादिहसतोंभसियस्यपुंसोविज्ञानशक्तिरहमासमनंतशक्तेः रूपंविचि
त्रमिदमस्यविवृण्वतोमेमारीरिषीष्टनिगमस्यगिरांविसर्गः २४ सोसावदभ्रकरुणोभगवान्विरूढप्रेमस्मितेन
नयनांबुरुहंविजृंभन् उत्थायविश्वविजयायचनोविषादंमध्वागिरापनयतात्पुरुषःपुराणः २५ मैत्रेयउवाच स्व
यंभवंनिशाम्यैवंतपोविद्यासमाधिभिः यावन्मनोवचस्तुत्वाविरराम सखिन्नवत् २६ अथाभिप्रेतमन्वीक्ष्यब्रह्मणोम
धुसूदनः विषण्णचेतसंतेनकल्पव्यतिकरांभसा २७ लोकसंस्थानविज्ञानेआत्मनःपरिखिद्यतः तमाहागाधयावा
चाकश्मलंशमयन्निव २८ श्रीभगवा० मावेदगर्भगास्तंद्रांसर्गउद्यममावह तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभवान् २९

स्मितेनविजृंभयन् विश्वस्यविजयायउद्भवायचकारादस्मदनुग्रहायचोत्थाय २५ स्वस्यसंभवोयस्मात् तंतपःशारीरंविद्या
उपासनासमाधिरेकाग्र्यंतैर्निशाम्यदृष्ट्वायथाशक्तिस्तुत्वाशांतवद्विराम २६ आत्मनोलोकसंस्थानविज्ञानेपरिखिद्यतोब्रह्मणो
भिप्रेतमालक्ष्यतमाहेतिद्वयोरन्वयः तेनप्रलयोदकेनविषण्णचेतसं २७ कश्मलंमोहंइवेतिसमस्तमोहाशमनंदर्शयति २८ हेवे
दगर्भतंद्रांविषादकृतमालस्यमागाः तेनैवमेदृशमनुस्पृशतादित्यादियत्प्रार्थयतेतदग्रेपूर्वमेवसंपादितं २९ श्रीः श्रीः

भा० तर्हि कथमहंनजानमीत्यत आह भूयइति ३० भक्तियुक्तसमाहितश्चसन् आत्मनिस्वस्मिन् लोकेचमाततं व्याप्तस्थितंद्र तृ०
३१ ष्टासिद्रक्ष्यसिआत्मनोजीवांश्च ३१ सर्वत्रमद्दर्शनेमोहोनिवर्त्ततइत्याह यदात्विति प्रतिचक्षीतपश्येत् ३२ तदाचमिथ्याज्ञा
ननिवृत्तोमुच्यतइत्याहयदेति भूतादिभिर्विरहितंआत्मानंजीवंशुद्धंत्वंपदार्थंस्वरूपेणस्वस्यात्मभूतेनमयातत्पदार्थेनउपे
तमेकीभूतपश्यन्भवति तदा स्वाराज्यंमोक्षंप्राप्नोतियतः वर्षीयान् वृद्धतरः अत्यधिकोस्तीत्यर्थः ३४ अनुग्रहमेवाह

भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयां ताभ्यामंतर्हृदि ब्रह्मन् लोकान्द्रक्ष्यस्यपावृतान् ३० ततआत्मनिलोकेच
भक्तियुक्तःसमाहितः द्रष्टासिमांततंब्रह्मन् मयिलोकांस्त्वमात्मनः ३१ यदातुसर्वभूतेषुदारुष्वग्निमिवस्थितं प्र
तिचक्षीतमांलोकोजह्यात्तर्ह्येवकश्मलं ३२ यदारहितमात्मानंभूतेंद्रियगुणाशयैः स्वरूपेणमयोपेतंपश्यन्स्वाराज्य
मृच्छति ३३ नानाकर्मवितानेनप्रजाबह्वीः सिसृक्षतः नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रहः ३४ ऋषिमाद्यंनब
भातिपापीयांस्त्वांरजोगुणः यन्मनोमयिनिर्बद्धंप्रजाःसंसृजतोपिते ३५ ज्ञातोहंभवतात्वद्य दुर्विज्ञेयोपिदेहिनां
यन्मांत्वंमन्यसेयुक्तंभूतेंद्रियगुणात्मभिः ३६ तुभ्यंमद्विचिकित्सायामात्मामेदर्शितोबहिः नालेनसलिलेमूलंपुष्कर
स्यविचिन्वतः ३७

ऋषिमितिचतुर्भिः यद्यतस्तेमनोमयिनिर्बद्धं ३५ यद्यस्मात् भूतैरिंद्रियैःगुणैःसत्वादिभिरात्मानाहंकारेणचायुक्तंम श्रीः
न्यसे ३६ तुभ्यंतवनालेनमार्गेणपुष्करस्यमूलमधिष्ठानंसलिलेविचिन्वतोमयिविचिकित्सायांभविलयमस्याश्रयेण ३१
नचदृश्यते ततोस्तिनास्तीतिसंदेहेसति आत्मास्वरूपंमेमयाअबहिरंतर्हृदिदर्शितः ३७ यमकृत्वा वसुदेव

283
1981

अंगहेब्रह्मन् चकर्थकृतवानसिमत्कथैवाभ्युदयः तेनांकितंसएषबंधाभावः मयिमनोनिबंधः मत्ज्ञानं मद्रूपस्यहृदिदर्श
नंमत्स्तुतिः तपोनिष्ठाचेतिलत् एषसर्वोपिमदनुग्रहः ३८ गुणमयत्वेनेप्रतीयमानमपिनिर्गुणमेवानुवर्णयन् ३९
तवप्रीतइतिकिंवक्तव्यमित्याह यइति ४० नचमत्प्रीतेरप्यधिकंकिंचिदस्तीत्याह पूर्त्तादिभिः राद्धंसिद्ध्यन्निश्रेयसफलं
तत् मत्प्रीतिरेवेतितत्वविदांमतं ४१ अत्रहेतुमाह अहमिति आत्मनांअहंकारोपाधीनांजीवानामात्माअतःप्रेयसां अति

यच्चकर्थांगमत्स्तोत्रंमत्कथाभ्युदयांकितं यद्वातपसितेनिष्ठासएषमदनुग्रहः ३८ प्रीतोहमस्तुभद्रंतेलोकानां
विजयेच्छया यदस्तौषीर्गुणमयंनिर्गुणंमनुवर्णयन् ३९ यएतेनपुमान्नित्यंस्तुत्वास्तोत्रेणमांभजेत् तस्याशुसं
प्रसीदेयंसर्वकामवरेश्वरः ४० पूर्त्तेनतपसायज्ञैर्दानैर्योगसमाधिना राद्धंनिश्रेयसंपुंसांमत्प्रीतिस्तत्वविन्मतं
४१ अहमात्मात्मनाधातःश्रेष्ठःसन्प्रेयसामपि अतोमयिरतिंकुर्याद्देहादिर्यत्कृतेप्रियः ४२ सर्ववेदमयेनेदमा
त्मानात्मात्मयोनिना प्रजाःसृजयथापूर्वंयाश्चमय्यनुशेरते ४३ मैत्रेयउवाच तस्माएवंजगत्स्रष्ट्रे प्रधानपुरुषेश्वरः
व्यज्येदंस्वेनरूपेणकंजनाभस्तिरोदधे ४४ इतिश्रीभागवतेमहापुराणेतृतीय॰विदुरमैत्रेयसंवादेनवमोध्यायः ९

प्रियाणामपिमध्येश्रेष्ठःप्रियतमःसन् निरवद्यत्कृतेयदर्थं ४२ अतस्त्वंकृतार्थएवतथापिमत्प्रियार्थंसृष्टिंकुर्वित्याह सर्वेति आ
त्मात्वंइदंत्रैलोक्यंयामय्यनुशेरतेताःप्रजाश्चसृज केनआत्मनैवान्यनिरपेक्षेण तत्रज्ञापकापेक्षाभावमाह सर्ववेदमयेनेति आत्मा
अहंकारयोनिःकारणंयस्येतिज्ञानक्रियाशक्त्यतिशयंसूचयतियथापूर्वमितितवात्राभ्यासोपयत्नीकर्त्तं मय्यनुशेरतइतिस्थिता
नामभिव्यक्तिमात्रमेवकर्त्तव्यं इच्छन्नायासत्वमुक्तं ४३ इदंसृज्यंव्यज्य प्रकाश्यपद्मनाभःश्रीनारायणरूपेणतिरोदधददृश्योभवत् ४४
तृतीयटीकायांनवमः ९

भा० दशमेकालसंप्रश्नं प्रतिवक्तुंतदुद्भवः प्राकृतादिविभागेन सर्गस्तुदशधोच्यते १ मेमयाथदस्ववदभासयस्वेतिवा २ संचोदि १०
३२ तः प्रार्थितः हदिस्थानेवाह नतुनेप्रश्नातेन विस्मृता इत्यर्थः ३ आत्मनिश्रीनारायणे आत्मानंमन आवेश्य अब्जसंभूतोब्र
ह्मायदधिष्ठायस्थितः कर्त्तारिक्तः तत्पद्मंअंभश्चविलोक्य कथंभूतंपद्मंअंभश्च तेनप्रलयकालेन कृतवीर्ययस्यतेनवा
युनाकंपितं न्यपादित्युत्तरेणान्वयः ५ विरुद्धंविज्ञानंबलंचयस्य न्यपात्सर्वंपीतवान् ६ पुष्करंपद्मं प्राक्लीनात

विदुरउवाच अंतर्हितेभगवतिब्रह्मालोकपितामहः प्रजाः ससर्जकतिधादैहिकीर्मानसीर्विभुः १ येचमेभगवन्
पृष्टास्त्वय्यर्थाबहुवित्तम तान्वदस्वानुपूर्व्येणछिंधिनः सर्वसंशयात् २ श्रीसूतउवाच एवंसंचोदितस्तेन क्षत्त्राकौषा
रवोमुनिः प्रीतः प्रत्याहतान्प्रश्नान्हदिस्थानथभार्गव ३ मैत्रेयउवाच विरिंचोपितथाचक्रेदिव्यंवर्षशतंतपः आ
त्मन्यात्मानमावेश्य यदाहभगवानजः ४ तद्विलोक्याब्जसंभूतोवायुनायदधिष्ठितः पद्ममंभश्चतत्कालकृतवीर्ये
णकंपितं ५ तपसाह्येधमानेन विद्यया चात्मसंस्थया विवृद्धविज्ञानबलोन्यपाद्वायुंसहांभसा ६ तद्विलोक्यवियद्व्या
पिपुष्करंयदधिष्ठितं अनेनलोकान्प्राग्लीनान्कल्पितास्मीत्यचिंतयत् ७ पद्मकोशंतदाविश्यभगवत्कर्मचोदि
तः एकंव्यभांक्षीदुरुधात्रिधाभाव्यंद्विसप्तधा ८

त्रीन्लोकान्कल्पितास्मिस्रक्ष्यामि ७ भगवतास्वयंकरणीयेकर्मणिचोदितोनियुक्तः सन्तदापद्मकोशंप्रविश्यतमेक श्रीः
मेवत्रिधालोकत्रयरूपेण व्यभांक्षीत् विबभाज एकेनकमलमुकुलेन कथंलोकत्रयसृष्टिरित्यसंभावनांवारयितुंतस्य
विशालतामाह द्विसप्तधाचचतुर्दशलोकरूपेण उरुधाततोपिबहुप्रकारेणभाव्यंभावयितुंयोग्यं अतोनतेनत्रिलो ३२
कीकरणंचित्रमित्यर्थः ८ श्रीगोविंद श्रीगोपालकृष्ण वासुदेव नारायण रामकृष्ण श्रीमाधव सीतापते

285
1981

त्रिलोकीरूपेणैवविभागेहेतुमाह उरुधाभाव्यंकिमिति त्रिलोकीरूपेणैवविबभाजेत्याशंक्य पूर्वकल्पेप्येवंरीतिरित्याह
एतावानिति एतावान्त्रिलोकीरूपः जीवलोकस्यजीवानांभोगस्थानस्यप्रत्यहंस्र न्यस्यसंस्थाभेदोरचनाविशेषउ
क्तः ननुपरमेष्ठिनोपिजीवत्वाविशेषाद्ब्रह्मलोकस्यापिकिमितिप्रत्यहंसृष्टिर्नभवतितत्राह हियस्मात् अनिमित्तस्यनि
ष्कामस्यधर्मस्यविपाकः फलरूपोसौउपलक्षणमेतत् सत्यलोकस्य महःप्रभृतिलोकानांतद्वासिनांचत्रैलोक्यस्यका
म्यकर्मफलत्वात् प्रतिकल्पमुत्पत्तिविनाशौभवतः महःप्रभृतीनांउपासनासमुचितनिष्कामधर्मफलत्वाद्द्विपरार्धपर्यंतंन
नाशः तत्रस्थानांचततःपरंप्रायेणमुक्तिरितिभावः ९ कालभेदेनलोकसृष्टिभेदंश्रुत्वातमेवकालंजिज्ञासुः पृच्छति या

एतावाञ्जीवलोकस्यसंस्थाभेदःसमाहृतः धर्मस्यह्यनिमित्तस्यविपाकःपरमेष्ठ्यसौ ९ विदुरउवाच यदा
त्थबहुरूपस्यहरेरद्भुतकर्मणः कालाख्यंलक्षणंब्रह्मन्यथावर्णयनःप्रभो १० मैत्रेयउवाच गुणव्य
तिकराकारोनिर्विशेषोप्रतिष्ठितः पुरुषस्तदुपादानमात्मानंलीलयासृजत् ११ माधवाय

तकालाख्यंलक्षणंस्वरूपं आत्थअब्रवीः कथंकालः कल्पतेकिंवातस्यसूक्ष्मंस्थूलंचरूपमितियथावद्वर्णयेत्यर्थः १० तत्र
सामान्यतःकालस्यस्वरूपमत्रोच्यते उत्तराध्यायेतुविशेषतः गुणानांव्यतिकरोमहदादिःपरिणामः तेनैवविक्रियतेयःस
कालइतिशेषः वक्ष्यतेचैकादशे गुणव्यतिकरःकालः स्वभावःसूत्रमेवचेतिस्वतस्तुनिर्विशेषः अप्रतिष्ठितः अपर्यवसितः
आद्यंतशून्यइत्यर्थः एतदेवदर्शयितुमीश्वरः सृष्ट्यादिनेननिमित्तभूतेनकरोतीत्याह पुरुषइति उपादीयतेनिमित्त
तयास्वीक्रियतइत्युपादानं सकालउपादानंनिमित्तंयस्मिन्तंआत्मानमेवविश्वरूपेणासृजत् स्वव्यतिरेकेणासृज्य
स्याभावात् एतच्चवस्तुकथनमात्रंकालेननिमित्तेनासृजदित्येतावदेवविवक्षितं ११ माधवगोविंदनारायण

भा० स्वव्यतिरिक्तसृज्याभावं दर्शयन्कालस्य सृष्टिनिमित्ततां दर्शयति विश्वमिति विष्णुमायया संस्थितं संहृतं ब्रह्मतन्मात्रं त०
३३ सद्रूपं ईश्वरेण कर्त्रा कालेन निमित्तेन परिछिन्नं पृथक्प्रकाशितं अव्यक्ता मूर्तिः स्वरूपं यस्येति स्वतो निर्विशेषतादर्शि
ता १२ अप्रतिष्ठितत्वं दर्शयितुं तत्कार्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्ति तथाग्रे पूर्वमप्यासीत् पश्चादपि भवि
ष्यति एवं सामान्यतः कालं निरूप्य विशेषतो निरुपयिष्यन् तन्निमित्तस्य सर्गस्य पूर्वोक्तानेव भेदाननुवदति सर्ग इति यस्तु प्रा
कृतो वैकृतश्च स दशमः १३ तन्निमित्तमेव यं त्रिविधं प्रलयमाह कालेनैव केवलेन नित्यः प्रलयः द्रव्येण संकर्षणाग्न्यादिना नै

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ईश्वरेण परिछिन्नं कालेनाव्यक्तमूर्तिना १२ यथेदानीं तथाग्रे च प
श्चादप्येतदीदृशं विश्वमेतदसंक्षिप्तं मायया दृश्यते न्यथा १३ सर्गो नवविधस्य प्राकृतो वैकृतस्तु यः १३ कालद्रव्य
गुणैरस्य त्रिविधः प्रतिसंक्रमः आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः १४ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियो
दयः भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् १५ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः वैकारिको देवस
र्गः पंचमो यन्मयं मनः १६ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः षडिमे प्राकृताः सर्गाः वैकृतानपि मे शृणु १७

मित्तिकः गुणैः स्वस्वकार्यग्रसद्भिः प्राकृतिकः तानेव सर्गान्प्रपंचयति आद्य इत्यादिना यावदध्यायसमाप्ति महतो लक्षणं आ
त्मनो हरेः सकाशाद्गुणानां वैषम्यमिति १४ अहमः अहंकारस्य तस्य लक्षणं यत्रेति द्रव्यादयो वक्ष्यमाणास्त्रयः सर्गाः १५ तन्मात्रो श्रीः
भूतसर्गः भूतसूक्ष्मसर्ग इत्यर्थः द्रव्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्मेंद्रियात्मकश्चतुर्थः १६ तमसः तमो मोहो महामोहो ता ३३
मिस्रं अंधतामिस्रं पंचपर्वा वियाया अबुद्धिः जीवानामावरणं विक्षेपश्च तं करोतीति त्वबुद्धिकृतस्य मे मत्तः शृणु १७ रज

287
1981

अनुद्वेगेन श्रोतव्यतामाह यद्विषयामेधा संसारं हरतीति तस्य हरेर्लीला यद्वा इयमिति तम आदिसर्गरूपा रजोभाज इति ब्र
ह्मरूपस्येत्यर्थः अस्मिन्पक्षे अबुद्धिकृत इति प्रथमांतं अवधाने कृतेन इत्यर्थः मुख्यमिव प्रथमं कृतो मुख्यसर्गः तस्थुषां
स्थावराणां १८ षड्विधत्वमेवाभिवाह येपुष्पं विना फलंतिते वनस्पतयः ओषधयः पूकपाकांताः लता आरोहणापेक्षाः
त्वक्सारा वेण्वादयः लता एव काठिन्ये नारोहणानपेक्षा विरुधः ये पुष्पैः फलंति ते द्रुमाः तेषां साधारणं लक्षणमाह ऊर्ध्वं स्रोत
आहारसंचारो येषां तमःप्रायाः अव्यक्तचैतन्याः अंतःस्पर्शाः स्पर्शमेव जानंति नान्यत् तदर्थं तैरेव न बहिः विशेषिणः अव्य
वस्थितपरिणामाद्यनेकभेदवंतः १९ तिर्यक्स्रोतसां सर्गमाह तिरश्वामिति स चाष्टाविंशतिभेदः तिरश्वां लक्षणं अविदः

रजोभाजो भगवतो लीलेयं हरिमेधसः सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः १८ वनस्पत्योषधिलतात्वक्सारा
वीरुधो द्रुमाः उत्स्रोतसस्तमःप्राया अंतस्पर्शा विशेषिणः १९ तिरश्वामष्टमः सर्गः सोष्टाविंशद्विधो मतः अविदो भू
रितमसो घ्राणज्ञा हृद्यवेदिनः २० गौरजो महिषः कृष्णः सूकरो गवयो रुरुः द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम २१
खरोश्वोश्वतरो गौरः सरभश्चमरी तथा एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् २२ श्वासृगालो वृको व्याघ्रो मार्जारः शश
शल्लकौ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः २३ कंकगृध्रवटश्येनभासभल्लूकबर्हिणः हंससारसचक्राह्वकाकोलूकादयः
खगाः २४

स्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिमात्रनिष्ठा घ्राणेनैवेष्टमर्थं जानंति हृदि अवेदिनः दीर्घानुसंधानशून्याः तथा च श्रुतिः
अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञानं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकाविति अष्टाविंशतिभेदा
नेवाह २० गवादय उष्ट्रांता द्विशफा द्विखुरा नव २१ खरादय एकशफाः षट् श्वादयो गोधांताः पंचनखा द्वादश एवमेते भूचराः सप्तविं
शति मकरादयो जलचराः २२ कंकादयश्च खगा अभूचरत्वेनैकीकृत्य गृहीताः तदेवमष्टाविंशतिभेदा भवंति तेषु कृष्णं गुरुर्गौराः
मृगविशेषाः अन्येषामपि तिर्यक्प्राणिणां यथायथामेतेष्वंतर्भावः २४ गोविंद माधव मुकुंद वासुदेव श्रीः

अथआहारसंचारोयस्यसोर्वाक्स्रोताः कस्तमार्षन्नृणांसर्गः नृणांलक्षणंरजअधिकंयेषुते २५ एतेत्रयोवैकृताएव
उर्ध्वतिर्यक्अर्वाक्स्रोतसः नकौमारवदुभयात्मकाः अष्टविधोवक्ष्यमाणोदेवसर्गश्चवैकृतइत्यनुषंगः वैकारिकस्तु
देवसर्गः प्राकृतेपूर्वमेवप्रोक्तः अयंतुततोन्यत्वाद्वैकृतः देवसर्गत्वात्तदंभूतेतश्चसनत्कुमारादीनांसर्गस्तुप्राकृतोवैकृ
तश्चदेवत्वेनमनुष्यत्वेनचसृज्यइत्यर्थः २६ वैकृतश्च देवसर्गोष्टविधः तत्रविबुधास्त्रयोभेदाः गंधर्वाप्सरश्चएकःय
क्षरक्षांस्येकः २७ भूतप्रेतपिशाचाइत्येकः सिद्धचारणविद्याधराएकः किंपुनरादयइत्येकः आदिशब्दाकिंपुरुषाश्वमुखा

अर्वाक्स्रोतस्तुनवमः क्षत्तरेकविधोनृणां रजोधिकाःकर्मपराउःखेनसुखमानिनः २५ वैकृतास्त्रयएवैतेदेवसर्ग
श्चसत्तम वैकारिकःस्तुयःप्रोक्तःकौमारस्तूभयात्मिकः २६ देवसर्गश्चाष्टविधोविबुधापितरोसुराः गंधर्वाप्सर
सःसिद्धायक्षरक्षांसिचारणाः २७ भूतप्रेतपिशाचाश्चविद्याध्राकिंनरादयः दशैतेविदुराख्याताः सर्गास्तेविश्व
सृक्कृताः २८ अतःपरंप्रवक्ष्यामिवंशान्मन्वंतराणिच एवंरजः प्लुतःस्रष्टाकल्पादिष्वात्मभूर्हरिः २९ सृजत्यमोघसं
कल्पआत्मैवात्मानमात्मना ३० गुणव्यतिकरएतस्मिन्मायावीत्वादधीशतुः नंपौर्वापर्यमिच्छंतिनधांभ्राम्यङ्कर्मयथा ३१
देवासुरादयःक्षतःकल्पेस्मिंयेप्रकीर्तिताः तएवनामरूपाभ्यामासन्मन्वंतरांतरे ३२ इतिभागवते० तृती० दशमोध्यायः १०

दयः एतत्विशेषोध्यायेस्पष्टंभविष्यति २८ २९ इतितृतीयटीकायांदशमः १० ततएकादशेकालपरमाण्वादिलक्षणैःयुगम
न्वंतरादिभ्यः कल्पमानादिवर्ण्यते तदेवंसामान्यतःकालस्योपलक्षणभूतंगुणव्यतिकरं दशविधंनिरूप्येदानींतस्यैवविशेषंनि
रूपयितुंतत्परिच्छेद्यंवस्तुलक्षयतिद्वाभ्यां सतःकार्यस्यविशेषाणामंशानांयश्चरमःअंत्यः यस्यांशोनास्तिअनेकःकार्यावस्थामप्रा
मःअसंयुतःसमुदायावस्थांचाप्राप्तः अतएवसदाकार्यसमुदायावस्थयोरपगमेप्यस्तिसंपरमाणुर्विज्ञेयः किंतत्रप्रमाणमतआह
यतः येभ्यःसमुदितेभ्यःनृणांव्यवहर्तॄणांऐक्यभ्रमः अवयविबुद्धिः तथाचपंचमेवयविनिराकरणेवक्ष्यतितेषांसमूहेनकृताविशेषइतिका
र्यानुपपत्त्याकल्प्यतेइतिभावः १ ७ मैत्रेयउवाच चरमःसद्विशेषाणामनेकोसंयुतःसदा परमाणुःसविज्ञेयोनृणामैक्यभ्रमोयतः १ ॥

289
1981

सूक्ष्मत्वात्स्थूलमाह सतएवेतियस्यचरमोंशःपरमाणुः तस्यैवसतःकार्यमात्रस्यस्वरूपावस्थितस्यपरिणामांतरमप्रा
प्तस्ययत्कैवल्यंऐक्यंसपरममहान् पुंस्त्वंतुपरमाणुप्रतियोगित्वात् ननुनानाविशेषवान्परस्परंभिन्नश्चसर्वःपदार्थः
कथमेक्यंतस्यतत्राह अविशेषः विशेषविवक्षारहितःनिरंतरः भेदविवक्षयारहितश्चसर्वोपिप्रपंचः परममहानित्यर्थः २
यथासूक्ष्मःस्थूलश्चायंपदार्थः एवंकालोप्यनुमितः चरोकोन्मध्यमावस्थागत्यते संस्थानंपरमाण्वाद्यवस्थातस्यभुक्तिः
व्याप्तिःतया भगवानितिहरेःशक्तिःस्वतोव्यक्तःथंक्तंभुंक्तेव्याप्नोतिपरिछिंनत्ति इतितथा विभुःउत्पादिषुदक्षः ३ तदेवप्रपं
चयतिसइत्यादिनासतःप्रपंचस्यपरमाणुतांपरमाण्ववस्थांयोभुंक्तेसकालःपरमाणुः तस्यैवअविशेषंसाकल्पतयायो

सतएवपदार्थस्यस्वरूपावस्थितस्ययत् कैवल्यंपरममाहान्नविशेषोनिरंतरः २ एवंकालोप्यनुमितःसौक्ष्म्ये
स्थौल्येचसत्तम संस्थानभुक्त्याभगवानव्यक्तोव्यक्तभुग्विभुः ३ सकालःपरमाणुर्वैयोभुंक्तेपरमाणुतां सतोविशेष
भुग्यस्तुसकालःपरमोमहान् ४ अणुर्द्वौपरमाणूस्यात्त्रसरेणुस्त्रयःस्मृतः जालार्करश्म्यवगतःखमेवानुपतन्नगात् ५

भुंक्तेसपरममहान् अयमर्थः ग्रहर्क्षताराचक्रस्थइत्यादिनायत्सूर्यपर्यटनंवक्ष्यतेतत्रसूर्योयावतापरमाणुदेशमतिक्राम
तितावान्कालःपरमाणुःयावताचद्वादशराश्यात्मकंसर्वभुवनकोशं अतिक्रामतिसपरममहान् संवत्सरात्मकःकालः तस्यैवाख्या
युगमन्वंतरादिक्रमेणद्विपरार्द्धंतत्वमिति तथाचपंचमेसूर्यगत्यैवकालादिविभागंवक्ष्यति ४ इदानींद्व्यणुकादिलक्षणपूर्वकंमध्य
मकालावस्थांकथयतिद्वौपरमाणूअणुःस्यात् त्रयोअणवस्त्रसरेणुसतुप्रत्यक्षइत्याह जालार्केतिगवाक्षेप्रविष्टघर्करश्मिष्व
वगतः कोसौयेनिलघुत्वेनखमेवानुपतन्नगात्गतः पाठांतरेखमेवानुपतन्नवगतः नतुगांपृथ्वीं ५ श्रीः श्रीः पाठांतरंगा

शतंभागाः त्रुटिरूपायस्मिन्सवेधः तैर्वेधैः ६ तैर्निमिषास्त्रयः क्षणइत्याम्नाताः काष्ठाः पंचदशएकं लघु ७ नाडिकाः
षट्सप्तवाप्रहरः सएवयामोदिनस्यरात्रेश्चतुर्थोभागः क्रासेषट्सप्तवृद्धौ संध्यांशमुहूर्तद्वयंविनेतिज्ञातव्यं तत्रार्थानिय
मार्थोवाशब्दः प्रत्यहंतद्देदानांगणयितुमशक्यत्वात् ८ नाडिकायाउन्मानमाह उन्मीयतेअनेनेत्युन्मानं पात्रंषट्पलता
म्रविरचितं पंचगुंजोमाषः तैश्चतुर्भिश्चतुरंगुलायामशलाकारूपेणरचितैः कृतमूलछिद्रं तेनछिद्रेणयावत्प्रस्थेतप्रमितं
जलंप्रविशतितेनप्लुतंनिमग्नंभवतितावान्कालोनाडिकाअत्रपलछिद्रयोराधिक्यशीघ्रंनिमज्जेत् अल्पत्वेचविलंबेनेति

त्रसरेणुत्रिकंभुंक्तेयः कालः सत्रुटिः स्मृतः शतभागस्तुवेधःस्यात्तैस्त्रिभिस्तुलवस्मृतः ६ निमिषस्त्रिलवोज्ञे
योअम्नातास्तेत्रयः क्षणः क्षणान्पंचविदुःकाष्ठालघुतादशपंचच ७ लघूनिवैसमाम्नातादशपंचचनाडिका तेद्वे
मुहूर्तः प्रहरः षड्यामः सप्तवान्नृणां ८ द्वादशार्द्धपलोन्मानंचतुर्भिश्चतुरंगुलैः स्वर्णमाषैःकृतछिद्रंयावत्प्रस्थ
जलप्लुतंयामाश्चत्वारश्चत्वारोमर्त्यानामहनीउभे॥ पक्षपंचदशाहानिशुक्लः कृष्णश्चमानद १० तयोःसमुच्चयो
मासः पितॄणांतदहर्निशं द्वौतावृतुषडयनंदक्षिणंचोत्तरंदिवि ११ अयनेचाहनीप्राहुर्वत्सरोद्वादशस्मृतः संवत्स
रशतंनृणांपरमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः परमाण्वादिनाजगत् संवत्सरावसानेनपर्येत्यनिमिषोविभुः १३

पलशलाकयोनियमः ९ अहनीअहोरात्रे १० ११ षण्मासाअयनं दिवीत्यस्योत्तरेणान्वयः देवानामहोरात्रेप्राहुर्द्वादशमासाः
१२ अनेनक्रमेणासौसूर्योनित्यमायुःक्षपतीत्याह ग्रहाश्चंद्रादयः ऋक्षाण्यश्विन्यादिनि ताराअन्यानिनक्षत्राणितदुपलक्षि
तं यत्कालचक्रंतत्रस्थितः अनिमिषः कालात्माविभुरीश्वरः सूर्यः जगत् द्वादशराश्यात्मकंभुवनकोशंपर्येतिपर्यटति १३

291
1981

संवत्सरादिभेदश्चसौरबार्हस्पत्यसावनचांद्रमसनाक्षत्रमासभेदेनद्रष्टव्यः केचित्पुनरेवमाहुः यदाशुक्लपक्ष
प्रतिपदिसंक्रांतिर्भवतितदासौरचांद्रमासयोर्युगपदुपक्रमोभवतिसंवत्सरः ततःसौरमानेनवर्षेषड्दिनानिव
र्द्धंते चांद्रमानेनवर्षेषड्दिनानिह्रसंतीति द्वादशदिनअवधानादुभयोरग्रपश्चाद्भावोभवति एवंव्यवधानतारतम्ये
नपंचवर्षाणिगच्छंति तन्मध्येद्वौमलमासौभवतः ततःपुनःषष्ठसंवत्सरोभवतीति १४ एवंभूतःकालात्मानित्यमु
प्रमत्तैः पूजनीयइत्याह यइति सृज्यंकार्यमंकुरादिवद्विषयांबीजादीनांशक्तिंकालरूपयास्वशक्त्याबहुधाउच्छ्वसन्

संवत्सरपरिवत्सरइडावत्सरएवच अनुवत्सरोवत्सरश्चविदुरैवंप्रभाष्यते १४ यःसृज्यशक्तिमुरुधोच्छ्वसयन्
स्वशक्त्यापुंसोभ्रमायदिविधावतिभूतभेदः कालाख्ययागुणमयंक्रतुभिर्वितन्वंस्तस्मैबलिंहरतवत्सरपंचका
य १५ विदुरउवाच पितृदेवमनुष्याणामायुःपरमिदंस्मृतं परेषांगतिमाचक्ष्वयेस्युःकल्पाद्बहिर्विदः १६
भगवान्वेदकालस्यगतिंभगवतोननु विश्वंविचक्षतेधीरायोगराद्धेनचक्षुषा १७ मैत्रेयउवाच कृतं
त्रेताद्वापरंचकलिश्चेतिचतुर्युगं दिव्यैर्द्वादशभिर्वर्षैःसावधानंनिरूपितं १८ श्रीवासुदेव श्रीकृष्णश्रीः

कार्याभिमुखींकुर्वन् दिविअंतरिक्षेधावतिकोसौ भूतभेदः महाभूतविशेषस्तेजोमंडलरूपीसूर्यः किमर्थंधावतिपुंसः
पुरुषस्यअभ्रमायभ्रमोमोहः तन्निवृत्तये आयुरादिव्ययेनविषयासक्तिंकिंन्निवर्तयन्नित्यर्थः सकामानांतुगुणमयंस्वर्गा
दिफलंक्रतुभिर्विस्तारयन् तस्मैसंवत्सरपंचकप्रवर्तकायपूजांकुरुत १५ इदंस्वस्वमानेनवर्षशतगणितंआयुर्मानंप्रत्यहंक
ल्पतेसृज्यतइति कल्पस्त्रैलोक्यं तस्माद्बाह्यतः विदोज्ञानिनः १६ योगराद्धेनयोगसिद्धेन १७ द्वादशभिर्वर्षसहस्रैरि
त्युत्तरश्लोकसामर्थ्यात्ज्ञातव्यं अवधीयतइत्यवधानंसंध्यांशश्चतत्सहितं १८ नमोभगवतेवासुदेवाय श्रीः

भा० कृतयुगे द्विमनुशरसमाः सपंक्तिमायाः वसुदिवसाः कृतिवह्निमानदंडाः सप्तविलयाः प्रपूरणीयाः प्रतिमनुकालमतः टी०
पलेतु शिष्टे पलद्वयस्य चतुर्दशोभागः एकैकस्मिन्प्रतिचतुर्युगस्याधिक्यं सहस्राणि संध्यांशयोश्चत्वारि चत्वारीत्यष्टौ शता
३६ निच एवं त्रेतादिष्वपि योज्यं १९ युगस्यादौ संध्या अंते संध्यांशः उक्ता निशतानि संख्यायोः तयोरंतरेण मध्ये युगांतस्य
विशेषमाह यत्रेति गवालंभादि धर्मविशेषो यत्र विधीयत इत्यर्थः साधारणधर्मस्तु संध्यांशयोरप्यस्त्येव २० चतुष्पात् संपूर्णः

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १९ संध्यांशयोरंतरेण यः
कालशतसंख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पात् मनुजान् कृते समनुवर्तते स एवान्ये
ष्वधर्मेण व्यतिपादेन वर्धता २१ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनं तावत्येव निशा तात यन्निमीलति विश्व
सृक् २२ निशावसान आरब्धो लोककल्पोनुवर्तते यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश २३ स्वं स्वं कालं मनुर्भुंक्ते सा
धिकां ह्येकसप्ततिं मन्वंतरेषु मनवस्तद्वंशा ऋषयः सुराः २४ भवंति चैव युगपत्सुरेशाश्चानु ये च तान् एष दैनंदिनः सर्गो
ब्राह्मस्त्रैलोक्यवर्तनः तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः २५ श्रीराम वासुदेव माधव गोविंद कृष्ण

त्रेतादिषु पादेन पादेन व्यतिक्रमः प्रतिपादेन पादेन वर्धमानेनाधर्मेण हेतुन एतच्च स्वरूपकथनमात्रं वैराग्यार्थं न तु धर्मसंकोच
नार्थं २१ त्रिलोक्या बहिर्महर्लोकप्रभृति ब्रह्मलोकमभिव्याप्य चतुर्युगसहस्रमेकं दिनं यत् यस्यां विश्वसृक् ब्रह्मा निमी श्री
लयति स्वपिति २२ तत्र दिनस्थितिमाह निशावसान इत्यादि सार्धैश्चतुर्भिः चतुर्दश मनून् भुंजन् पालयन् व्याप्नु ३६
वन्नित्यर्थः २३ किंचिदधिकां युगानामेकसप्ततिं मनुवंशाः पृथ्व्यादयः क्रमेण भवन्ति सप्तर्षिप्रभृतयस्तु युगपत्
समकालमेव भवंति सुरेशाः इंद्राः सप्ततानानुवर्तंते ये गंधर्वादयस्तेपि २४ त्रिलोक्यां वर्तयतीति तथा २५ श्रीगोविंद

293/1981

स्वमूर्तिभिर्मन्वंतरावतारैर्मन्वादिभिर्द्वारभूतैराविष्कृतपुरुषकारः सन् विश्वं रक्षति २६ रात्रीगतां स्थितिमाह
पंचभिः तमसो मात्रां लेशं प्रतिसंरुद्धः प्रत्याहृतो विक्रमो येन अनुगतमनुप्रविष्टमशेषं यस्मिन् २७ तदेव स्पष्टयति त
मेवेति अपिधीयंत इति कर्मकर्तरि प्रयोगः तिरोहिता भवंतीत्यर्थः कथं निर्मुक्तः रहितः शशिभास्कराभ्यां यथा भव
ति तथा २८ भगवच्छक्तिरूपो यः संकर्षणमुखाग्निस्तेन उष्मणा अर्दिताः संतः जनलोकं यांति २९ कल्पांते त एधिताः

मन्वंतरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्तिभिः मन्वादिभिरिदं विश्वमवत्युदितपौरुषः २६ तमोमात्रामुपादाय
प्रतिसंरुद्धविक्रमः कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये २७ तमेवान्वपिधीयंते लोका भूरादयस्त्रयः
निशायामनुवृत्तायां निर्मुक्तशशिभास्करं २८ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लो
काज्जनं भृग्वादयोर्दिताः २९ तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३०
अंतः स तस्मिन्सलिल आस्तेनंतासनो हरिः योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ३१ एवंविधैरहोरात्रैः
कालगत्योपलक्षितः अपक्षितमिवास्यापि परमायुर्वयःशतं ३२ यदर्धमायुषस्तस्य परार्धमभिधीयते पूर्वः
परार्धोपक्रांतो ह्यपरोद्य प्रवर्तते ३३

सिंधवः समुद्राः उत्कट आटोपः क्षोभो येषां ते च ते चंडवातैरीरितोर्मयश्च ३० जनलोक आलयो येषां महर्लोक
गतानामन्येषां च तैः ३१ वैराग्यार्थमाह एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणिनामायुषः परमधिकं अस्य ब्रह्म
णो यदायुस्तदप्यपक्षितं अपक्षीणं इवेति लोकोक्तिः गतप्रायमित्यर्थः ३२ तदेवाह यदिति ३३ श्रीगोविंद

भा० पूर्वस्यपरार्द्धस्या दाविति त्रिभिर्वस्तुकथनमात्रं ३४ पाद्मत्वेहेतुः यद्धेरिति ३५ अयंतुद्वितीयस्यादौकथितः ३६ तदेवंका टी०
३७ लेननिमित्तेन सृज्यानामायुः परिणाममुक्त्वा कालपरिच्छेदरहितं तत्त्वमाह कालोयमिति पंचभिः उपचर्यते केवलं नतत्त्वे
नापिक्रमेणायुर्गणनं तस्येत्याह अव्याकृतस्य कार्योपाधिशून्यस्य अतएवानंतस्य अनादेश्च जगदात्मनो जगत्कार
णस्य ३७ तत्परिच्छेदे कालस्यासामर्थ्यादित्याह कालोयमीश्वरः समर्थोपि भूम्नः परिभूम्नस्येशितुं नैवप्रभुसमर्थः यतो

पूर्वस्यादौपरार्द्धस्य ब्राह्मोनाम महानभूत् कल्पोयत्राभवद्ब्रह्मा शब्दब्रह्मेतियंविदुः ३४ तस्यैवचांते कल्पोभूद्यंपा
द्ममभिचक्षते यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ३५ अयंतुकथितः कल्पोद्वितीयस्यापिभारत वाराहइतिवि
ख्यातोयत्रासीच्छूकरोहरिः ३६ कालोयंद्विपरार्धाख्योनिमेषउपचर्यते अव्याकृतस्यानंतस्य अनादेर्जगदात्म
नः ३७ कालोयंपरमाण्वादिर्द्विपरार्द्धांतईश्वरः नैवेशितुंप्रभुर्भूम्नईश्वरोधाममानिनां ३८ विकारैः सहितोयुक्तै
र्विशेषादिभिरावृतः आंडकोशोबहिरयंपंचाशत्कोटिविस्तरः ३९ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् लक्ष्यतेंतर्ग
ताश्चान्येकोटिशोह्यंडराशयः ४० तदाहुरक्षरंब्रह्म सर्वकारणकारणं विष्णोर्धामपरंसाक्षात्पुरुषस्यमहात्मनः ४१ इति
श्रीभागवतेमहापुरा० तृतीय० एकादशोध्यायः ११

धाममानिनांदेहगेहाभिमानिनामेवेश्वरः ३८ भूम्नइत्युक्तं तत्प्रपंचयन्नाह विकारैः षोडशभिर्युक्तैः अष्टमप्रकृतिसंयुक्तैः सहितः श्रीः
तदारब्ध इत्यर्थः अयमांडकोशः यत्रप्रविष्टः परमाणुवल्लक्ष्यतइत्युत्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनवि
स्तृतः बहिश्चविशेषादिभिः पृथिव्यादिभिः सप्तभिरावृतः ३९ कीदृशैः आंडकोशप्रमाणाद्दशगुणमुत्तरोत्तरोधिकैः यथुतैः नके ३७
वलमयमेकएव अपितु अन्येपिलक्ष्यंते ४० सर्वेषांकारणानां कारणं धामस्वरूपं ४१ इतितृतीयेएकादशोध्यायः ११

2957
1981

द्वादशेतुकुमारादिर्यतः सर्गास्समेधनात् कायेद्द्धेनयोनस्तु मनुसर्गोनुवर्ण्यते १ अग्रइति ब्रह्मास्वसृष्टौ प्रथम
मविद्यावृत्तीः ससर्ज तत्रतमोनामस्वरूपाप्रकाशः मोहोदेहाद्यहंबुद्धिः महामोहोभोगेच्छा तामिस्रस्तत्प्रतिघाते क्रोधः
अंधतामिस्रस्तत्प्रतिघाते क्रोधः अंधतामिस्रं तन्नाशेहमेवमृतोस्मीतिबुद्धिः तदेवोक्तं वैष्णवे तमोविवेकोमोहस्यादंतः क
रणविभ्रमः महामोहस्तुविज्ञेयोग्राम्यभोगसुखैषणा मरणंह्यंधतामिस्रं तामिस्रः क्रोधउच्यते अविद्यापंचपर्वैषा

मैत्रेयउवाच इतितेवर्णितः क्षत्तः कालाख्यः परमात्मनः महिमावेदगर्भोथयथास्राक्षीन्निबोधमे १ ससर्जाग्रें
धतामिस्रं अंधतामिस्रमादिकृत् महामोहंचमोहंचतमश्चाज्ञानवृत्तयः २ दृष्ट्वापापीयसींसृष्टिं नात्मानंबहु
मन्यत भगवद्ध्यानपूतेनमनसान्यान्ततोसृजत् ३ सनकंचसनंदनंचसनातनमथात्मभूः सनत्कुमारंचमुनीन्
निष्क्रियानूर्ध्वरेतसः ४ तान्बभाषेस्वभूः पुत्रान्प्रजाः सृजतपुत्रकाः तन्नैच्छन्मोक्षधर्माणोवासुदेवपरायणाः ५
सोवध्यातः सुतैरेवंप्रत्याख्यातानुशासनैः क्रोधंदुर्विषहंजातंनियंतुमुपचक्रमे ६ श्रीगोपालकृष्णायनमः

प्रादुर्भूतामहात्मन इति पातंजलेच एताएवोक्ताः अविद्यास्मितारागद्वेषाभिनिवेशाः पंचक्लेशाइति श्रीविष्णुस्वामिप्रोक्ता
वा अज्ञानविपर्यासभेदभयशोकाः तदुक्तं स्वादृग्गुत्थविपर्यासेत्यादि २ स्वादृगुत्थविपर्यासभवभेदजभीशुचः यन्मा
ययाजुषन्नास्ते तमिमंनृहरिंनुमः २ नबहुमन्यत नाभ्यनंदत् ३ यद्यपिप्रतिकल्पंसनकादिसृष्टिर्नास्ति तथापिब्रह्म
सर्गत्वादिहोच्यते वस्तुतस्तुमुख्यसर्गादयएवप्रतिकल्पंभवति सनकादयस्तुब्राह्मकल्पसृष्टाएवानुवर्त्तंते ४ स्व
भूर्ब्रह्मा ५ अवध्यातः अवज्ञातः प्रत्याख्यातमनुशासनंयैः ६ गोविंद माधव मुकुंद गोपाल कृष्ण

भा० सचासौमन्युश्चतन्मन्युः ७ ८ ९ बालकइव १० अग्रेपूर्वमेवमायाकृतानि ११ १२ १३ सयोषणसस्त्रीकःसस्त्रीकः न०
३८ धियानिगृह्यमाणोपिभ्रुवोर्मध्यात्प्रजापतेः सद्योजायततन्मन्युःकुमारोनीललोहितः ७ सवैरुरोदरेवानां
पूर्वजोभगवान्भवः नामानिकुरुमेधातः स्थानानिचजगद्गुरो ८ इतितस्यवचःपाद्मोभगवान्परिपालयन्
अभ्यधाद्भद्रयावाचामारोदीस्तत्करोमिते ९ यदरोदीःसुरश्रेष्ठसोद्वेग इवबालकः ततस्त्वामभिधास्यंतिना
म्नारुद्रइतिप्रजाः १० हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलंमही सूर्यश्चंद्रस्तपश्चैवस्थानान्यग्रेकृतानिमे ११ म
न्युर्मनुर्महिनसोमहांछिवःऋतुध्वजः उग्ररेताभवःकालोवामदेवोधृतव्रतः १२ धीर्वृत्तिरुशनोमाचनियुत्स
र्पिरिळांबिका इरावतीसुधादीक्षारुद्राण्योरुद्रतेस्त्रियः १३ गृहाणैतानिनामानिस्थानानिचसयोषणः एभिः
सृजप्रजाबह्वीः प्रजानामसियत्पतिः १४ इत्यादिष्टःसगुरुणाभगवान्नीललोहितः सत्वाकृतिस्वभावेनससर्जा
त्मसमाःप्रजाः १५ रुद्राणांरुद्रसृष्टानांसमंताद्ग्रसतांजगत् निशाम्यासंख्यशोयूथान्प्रजापतिरशंकत १६ अलं
प्रजाभिःसृष्टाभिरीदृशीभिःसुरोत्तम मयासहदहंतीभिर्दिशश्चक्षुभिरुल्बणैः १७ तपआतिष्ठभद्रंतेसर्वभूतसु
खावहं तपसैवयथापूर्वंस्रष्टाविश्वमिदंभवान् १८ तपसैवपरंज्योतिर्भगवंतमधोक्षजं सर्वभूतगुहावासमंजसाविंद
तेपुमान् १९ मैत्रेयउवाच एवमात्मभुवादिष्टःपरिक्रम्यगिरांपतिं बाढमित्यमुमामंत्र्यविवेशतपसेवनं २० अ श्रीः
थाभिध्यायतःसर्गंदशपुत्राःप्रजज्ञिरे भगवच्छक्तियुक्तस्यलोकसंतानहेतवः २१ माधव गोविंद राम ३८
एभिस्थानैर्नामभिश्चयुक्तः १४ सत्वंबलंआकृतिनीललोहितताम्स्वभावस्तीव्रतातेन १५ रुद्राणांयूथानिदृष्ट्वाअशंकतशंकांप्राप १६
१७ स्रष्टास्रक्ष्यति १८ १९ २० २१

297
1981

२२ २३ २४ २५ अधरच्छदात् अधरोष्ठात् २६ २७ देहांतरेणकृतंसर्गंवक्तुंतद्देहत्यागेकारणमाह वाचमित्यादि
ना २८ २९ त्वत्तस्त्वत्तोयेपूर्वेब्रह्मादयोन्येवातैरेतन्नकृतं अगजंकामं ३० तेजीयसां अतितेजस्विनामपिसुश्लो
मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः भृगुर्वसिष्ठोदक्षश्चदशमस्तत्रनारदः २२ उत्संगान्नारदोजज्ञेदक्षोंगुष्ठा
त्स्वयंभुवः प्राणाद्वसिष्ठःसंजातोभृगुस्त्वचिकरात्क्रतुः २३ पुलहोनाभितोजज्ञेपुलस्त्यःकर्णयोर्ऋषिः अंगिरामुख
तोक्ष्णोत्रीमरीचिर्मनसोभवत् २४ धर्मस्तनाद्दक्षिणतोयत्रनारायणःस्वयं अधर्मपृष्ठतोयस्मान्मृत्युर्लोकभयंकरः २५
हृदिकामोभ्रुवःक्रोधोलोभश्चाधरदच्छदात् आस्याद्वाक्सिंधवोमेढ्रान्निर्ऋतिःपायोरघाश्रयः २६ छायायाःकर्द
मोजज्ञेदेवहूत्याःपतिःप्रभुः मनसोदेहतश्चेदंजज्ञेविश्वकृतोजगत् २७ वाचंदुहितरंतन्वींस्वयंभूर्हरतींमनः अका
मांचकमेक्षत्तःसकामइतिनःश्रुतं २८ तमधर्मेकृतमतिंविलोक्यपितरंसुताः मरीचिमुख्यामुनयोविश्रंभात्प्र
त्यबोधयन् २९ नैतत्पूर्वैःकृतंत्वद्यनकरिष्यंतिचापरे यत्त्वंदुहितरंगच्छेरनिगृह्यांगजंप्रभो ३० तेजीयसामपिह्येतन्न
सुश्लोक्यंजगद्गुरो यद्वृत्तमनुतिष्ठन्वैलोकःक्षेमायकल्पते ३१ तस्मैनमोभगवतेयइदंस्वेनरोचिषा आत्मस्थं
व्यंजयामाससधर्मंपातुमर्हसि ३२ सइत्थंगृणतःपुत्रापुरोदृष्ट्वाप्रजापतीन् प्रजापतिपतिस्तन्वंतत्याजव्रीडितस्त
दा ३३ तांदिशोजगृहुर्घोरांनीहारंयद्विदुस्तमः कदाचिद्ध्यायतःस्रष्टुःवेदाआसंश्चतुर्मुखात् ३४ श्रीमाधव
क्यंसत्कीर्तिदंनभवति येषांतेजीयसांवृत्तं ३१ ३२ तन्वतनुं ३३ कथंस्रक्ष्यामीत्यभिध्यायतःस्रष्टुर्ब्रह्मणश्चतुः
संख्यायुक्तात्मुखात् समवेतान् सुसंगतान् ३४ श्रीकृष्ण गोपालमाधव गोविंद मुकुंद रामकृष्ण नारायण

भा० चातुर्होत्रंहोत्रादीनांचतुर्णांकर्म कर्मतंत्रंयज्ञविस्तारः उपवेदैन्यायैश्चसह आश्रमाः तद्वृत्तयश्च आसन् ३५ मुखतः मुखे टी०
३९ भ्यः ३६ चातुर्होमसृष्टिक्रममाह शस्त्रंअप्रगीतमंत्रस्तोत्रंहेतुः कर्मईज्याअध्वर्योः कर्मस्तुतिः स्तोमः स्तुतिसंगीतं स्तोमतद्
धर्मकसमुदायंत्रिवृत्स्तोमोभवतीत्यादिविहितमुद्गात्प्रयोज्यंप्रायश्चित्तंब्राह्मं ३७ उपवेदक्रममाह आयुर्वेदमिति आत्मनो
मुखैःस्थापत्यंविश्वकर्मशास्त्रं ३८ ३९ क्रमतंत्रक्रममाह षोडशुक्थाविति पुरीषाचयनं अग्निष्टुत्अग्निष्टोमं ४० विद्ये
तिशौचं क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपरमामतेतिस्मृतेः दानमितिदया भूताभयप्रदानस्यकलांनार्हंतिषोडशीमितिवच

कथंस्रक्ष्याम्यहंलोकान्समवेतान्यथापुरा चातुर्होत्रंकर्मतंत्रमुपवेदान्नयैःसह धर्मस्यपादाश्चत्वारस्तथैवाश्रम
वृत्तयः ३५ विदुरउवाच सवैविश्वसृजामीशोवेदादीन्मुखतोसृजत् यद्यद्येनासृजद्देवस्तन्मेब्रूहितपोधन ३६ मै
त्रेयउवाच ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः शस्त्रमिज्यांस्तुतिस्तोमंप्रायश्चित्तंव्यधात्क्रमात् ३७ आ
युर्वेदंगांधर्ववेदमात्मनः स्थापत्यंचासृजद्वेदंक्रमात्पूर्वादिभिर्मुखैः ३८ इतिहासपुराणानिपंचमंवेदमीश्वरः स
र्वेभ्यएववक्त्रेभ्यः ससृजेसर्वदर्शिनः ३९ षोडश्युक्थौपूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ आप्तोर्यामातिरात्रौचवाजपेयं
सगोसवं ४० विद्यादानंतपःसत्यं धर्मस्येतिपदानिच आश्रमांश्चयथासंख्यमसृजत्सहवृत्तिभिः ४१ सावित्रंप्राजाप
त्यंचब्राह्मंचाथबृहत्तथा वार्तासंचयशालीनशीलोंछइतिवैगृहे ४२ नारायण वासुदेव माधव गोविंद

नात् एवंचतपःशौचंदयासत्यमितिपादाः कृतेकृताइतिप्रथमस्कंधोक्तेरविरोधः ४१ सावित्रंब्रह्मचर्यंउपनयनादारभ्यगायत्री श्रीः
मधीयानस्यत्रिरात्रंप्राजापत्यंव्रतान्याचरतःसंवत्सरंब्राह्मंवेदग्रहणांतंबृहत्नैष्ठिकं वार्ताअनिषिद्धकृष्यादिवृत्तिःसंचयोय ३९
जनादिवृत्तिःशीलोछनंपतितकणिशाकणवृत्तिःएकवचनमार्षंइत्येतागृहेवृत्तयइति यद्वाशीलोंछइतिद्वंद्वैकत्वेसप्तमी एवं
वृत्तिभेदेसतिगृहेस्थिताभवंतीत्यर्थः ४२

299
1981

वनेस्थिताश्चत्वारः तत्रवैखानसाः अकृष्टपच्यवृत्तयः वालखिल्याः नवेन्नेलब्धेपूर्वसंचितान्नत्यागिनः औदुंबराः
प्रातरुत्थाययांदिशंप्रथमंपश्यंतितत आहृतैःफलादिभिर्जीवंतः फेनपाः स्वयंपतितैःफलादिभिर्जीवंतः कुटीचकः
स्वाश्रमकर्मप्रधानः बहूदकःकर्मोपसर्जनीकृत्यज्ञानप्रधानः हंसोज्ञानाभ्यासनिष्ठः निष्क्रियः प्राप्ततत्वः एतेचसर्वेयथो
त्तरंश्रेष्ठाः न्यायादीनांपूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिकीति आन्वीक्षिक्यांया मोक्षधर्मकामार्थविद्याः भूर्भुवस्वरि
तिव्यस्तास्तिस्रः समस्ताश्चतुर्थी यथाह आश्वलायनः एवंव्याहृतयः प्रोक्ताव्यस्ताःसमस्ताइति यद्वामहइतिचतुर्थी तथाश्रु
तिः भूर्भुवःस्वर्भूर्भुवःस्वरितिवाएतास्तिस्रोव्याहृतयःतासामुहस्मैतांचतुर्थीमाहाचमस्य प्रवेदयते महइतीति हृदतःहृद

वैखानसावालखिल्यौदुंबराःफेनपावने न्यासेकुटीचकपूर्वंबह्वोदोहंसनिष्क्रियौ ४३ आन्वीक्षिकीत्रयीवार्ता
दंडनीतिस्तथैवच एवंव्याहृतयश्चासन्प्रणवोयस्यदह्रतः ४४ तस्योष्णिगासील्लोमभ्यो गायत्रीचत्वचोविभोः
त्रिष्टुप्मांसात्स्नुतोनुष्टुप्जगत्यस्थ्नःप्रजापतेः ४५ मज्ज्ञायाः पंक्तिरुत्पन्नाबृहतीप्राणतोभवत् स्पर्शस्तस्याभवज्जी
वःस्वरोदेहउदाहृतः ४६ उष्माणमिंद्रियाण्याहुरंतस्थाबलमात्मनः स्वराःसप्तविहारेणभवंतिस्मप्रजापतेः ४७
शब्दब्रह्मात्मनस्तस्यव्यक्ताव्यक्तात्मनःपरः ब्रह्मावभातिविततोनानाशक्त्युपबृंहितः ४८ ततोपरामुपादायससर्गायमनो

याकाशात् ४४ स्नुतःस्नायुतः अनुष्टुप्स्नावानीतिश्रुतेः ४५ महाकल्पेब्रह्माशब्दब्रह्मरूपोभवदित्युक्तंतदेवदर्शयन्वर्णानामु
त्पत्तिमाह स्पर्शइतिसार्द्धेनस्पर्शाःकादिवर्गपंचकंस्वरःआकारादिः ४६ उष्माणंशषसहचतुष्कंअंतस्थायरलवाः सप्तस्वराःष
डादयःविहारेणक्रीडया ४७ अतएवशब्दात्तनुत्वात् ब्रह्मणःपरमेश्वरोनित्यंप्रकाशतइत्याह व्यक्तोवैखरीअव्यक्तःप्रणवःतदा
त्मनस्तस्यब्रह्मणःपरःपरमेश्वरःअभातिकीदृशःब्रह्मपरिपूर्णःतत्राव्यक्तात्मनोब्रह्मरूपोविततोवभाति व्यक्तात्मनोनानाशक्त्युपबृंहि
तइंद्रादिरूपोवभाति याप्राग्विसृष्टासतीनीहारंतमोभवत्ततोपरांअनिषिद्धकामासक्तांतनुं शब्दब्रह्मतनुस्तस्यसदास्येव ४८

मन्वंतरग्रहणेकारणमाह ऋषीणामित्यादिना ४९ ५० युक्तकृतः यथोचितंकुर्वतः अतएकस्यब्रह्मणइदं
द्विधाभूतमित्याश्चर्यात्कायमद्याप्यभिचक्षते ५१ ५२ यास्त्रीमास्यमहिष्यासीत् एधांबभूविरे रहिंप्रा मा: ५३

ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतं ज्ञात्वातद्धृदयेभूयश्चिंतयामासकौरव ४९ अहोअद्भुतमेत
न्मेव्यापृतस्यापिनित्यदा कस्यनृप प्रजद्विधायत्कायमभिचक्षते ५१ ताभ्यांरूपमभागाभ्यांमिथुनंसम
पद्यतयस्तुतत्रपुमान्सोभून्मनुःस्वायंभुवःस्वराट् ५२ स्त्रियासीच्छतरूपाख्यामहिष्यस्यमहात्मनः तदा
मिथुनधर्मेणप्रजाह्येधांबभूविरे ५३ सचापिशतरूपायांपंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौति
स्रःकन्याश्चभारत ५४ आकूतिर्देवहूतिश्चप्रसूतिरितिसत्तम आकूतिंरुचयेप्रादात्कर्दमायतुमध्यमा
दक्षायादात्प्रसूतिंचयतआपूरितंजगत् ५६ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेद्वादशोध्यायः
१२ श्रीशुकउवाच निशम्यवाचंवदतोमुनेःपुण्यतमांनृप भूयःपप्रच्छकौरव्योवासुदेवकथादृतः १
श्रीविदुरउवाच सवैस्वायंभुवःसम्राट्प्रियःपुत्रःस्वयंभुवः प्रतिलभ्यप्रियांपत्नींकिंचकारततोमुने २
चरितंतस्यराजर्षेरादिराजस्यसत्तम ब्रूहिमेश्रद्दधानायविष्वक्सेनाश्रयोह्यसौ २ श्रीगोपाल

तदेवाहसचापीति ५४यतःयासांसंततिभिः ५५ इतितृतीयेटीकायांद्वादशोध्यायः १२ त्रयोदशेमिसदक्षाणांमनोश
कल्मिकाप्लुतां धरामुद्धर्तुमुद्भूतात्क्रोडादैत्यानुसूदनं १ स्वयंभुवःपुत्रः तद्देहांशत्वात्सः २ विष्वक्सेनो
४ नत्येधंतेप्रजानंतंदेवमत्रविधातकं ५० एवंयुक्तकृतस्तस्यदेवंचावेक्षतस्तदा ८ हरिरेवाश्रयोयस्य २

301
1981

अतस्तस्यचरितंश्रोतव्यमित्याहसुचिरंश्रमोयस्मिन् तस्यपुंसांअंजसासाकल्येनकृतस्यश्रयमेवार्थइंडितःकृतःननुमुकुंद
पादारविंदंयेषांहृदयेवितितेषांभागवतानांगुणानुश्रवणं ४ सहस्रशीर्ष्णःश्रीकृष्णस्तस्यचरणावुपधीयेतेयस्मिंश्रीकृष्णः
प्रीत्यायस्योत्संगेचरणौप्रसारयतीत्यर्थः तमभ्यचष्टअभ्यभाषतप्रणीयमानःतेनप्रवर्त्यमानः ५ ६ त्वमेवैकःपितासर्वे
षांयतोजन्मकृत्वृत्तिदःपोषकश्चत्वमेवअतस्तवयद्यपिसापेक्षा नामेवैकः पितासर्वेषांयतोजन्मकृत्वृत्तिदःपोषक

कृतस्यपुंसांसुचिरश्रमस्यनन्वंजसासूरिभिरीडितोर्थः तत्तद्गुणानुश्रवणंमुकुंदपादारविंदंहृदयेषुयेषां ४
श्रीशुकउवाच इतिब्रुवाणंविदुरंविनीतंसहस्रशीर्ष्णश्चरणोपधानं प्रहृष्टरोमाभगवत्कथायांप्रणीयमानो
मुनिरभ्यचष्ट ५ मैत्रेयउवाच यदास्वभार्ययासाकंजातःस्वायंभुवोमनुः प्रांजलिःप्रणतश्चेदंवेदगर्भमभाष
त ६ त्वमेकःसर्वभूतानाजन्मकृद्वृत्तिदःपिताअथापिनःप्रजानांतेशुश्रूषाकेनवाभवेत् ७ तद्विधेहिनम
स्तुभ्यंकर्मस्वीपात्मशक्तिषु यत्कृत्वेहयशोविश्वगमुत्रचभवेद्गतिः ८ ब्रह्मोवाच प्रीतस्तुभ्यमहंतातस्वस्तिस्ता
द्वांक्षितीश्वर यन्निर्व्यलीकेनहृदाशाधिमेत्यात्मनार्पितं ९ एतावत्यात्मजैर्वीरकार्याह्यपचितिर्गुरौ शक्त्याप्रमत्तैर्गृह्ये
तसादरंगतमत्सरैः १० सत्वमस्यामपत्यानिसदृशान्यात्मनोगुणैः उत्पाद्यशासधर्मेणगांयज्ञैःपुरुषंयज ११ श्रीः

श्चत्वमेवअस्ति अथाप्यस्माकंतेशुश्रूषाकेनकर्मणाभवेत्तद्विधेहीत्युत्तरेणान्वयः ७ हेईड्य आत्मशक्तिषु अस्मन् शक्येषुक
र्मसुमध्येकेनकर्मणाभवेत् तद्विधेहिइदंकर्तव्यमितिकथय यत्कृत्वायस्मिन्कृतेसतिविष्वक्सर्वतः ८ वांयुवाभ्यांस्वस्तिभद्रंस्ता
त्भूयात् यद्यत्तःमामांशाधिअनुशिक्षयेतिआत्मनास्वयमेवार्पितंनिवेदितंअतःप्रीतोस्मि ९ अपचितिपूजागृह्येतआज्ञानिशेषः
सनकादयोनकुर्वंति वयंकिमितिकरिष्यामइतिएवंभूतागतोमत्सरोयेभ्यः १० गांशासशाधिपालयेत्यर्थःपुरुषंहरिं ११

प्रजापालकस्यतेतुष्टोभविष्यति १२ यज्ञलिंगः यज्ञमूर्तिः अपगतोर्थोयस्मात्केवलं श्रमायैवेत्यर्थः यद्यस्मान्
आत्मैवस्वयंनादृतः तस्मिन्अतुष्टेस्वार्थस्यैवासिद्धेः सर्वाआत्माह्यतस्य १३ वर्त्तेयवर्तिष्ये अमीवसूदन पापनाश
नअनुजानीहि अत्रस्थानम्यमिति अनुज्ञांदेहि १४ महीचेत्अतआह यदोकः स्थानंसामही हेदेवअस्यादेव्याः १५ पूर्वपा

सत्वमस्यामपत्यानिसदृशान्यात्मनोगुणैः उत्पाद्यशासधर्मेणगांयज्ञैःपुरुषंयज परंशुश्रूषणंमत्यंस्यात्प्रजा
रक्षयान्नृप भगवांस्तेप्रजाभर्तुर्हृषीकेशोनुतुष्यति १२ येषांनतुष्टोभगवान्यज्ञलिंगोजनार्दनः तेषांश्रमोह्यपा
र्थाययदात्मानादृतःस्वयं १३ श्रीमनुरुवाच आदेशेभगवतोवर्त्तेयमीवसूदन स्थानंत्विहानुजानीहिप्रजा
नांममचप्रभो १४ यदोकःसर्वसत्वानांमहीमग्नामहांभसि अस्याउद्धरणेयत्नोदेवदेव्याविधीयतां १५
श्रीमैत्रेयउवाच परमेष्ठीत्वपांमध्येतथासन्नामवेक्ष्यगां कथमेनांसमुन्नेष्यइतिदध्यौधियाचिरं १६ सृजतो
मेक्षितिर्वार्भिप्लाव्यमानारसांगता अथात्रकिमनुष्ठेयमस्माभिःसर्गयोजितैः १७ यस्याहंहृदयादासंसईशोवि
दधातुमे कर्तव्यंकरुणासिंधुस्तीर्थकीर्तिरधोक्षज १८ इत्यभिध्यायतोनासाविवरात्सहसानघ वराहतोकोनिरगा
दंगुष्ठपरिमाणतः १८ तस्याभिपश्यतःस्वस्थःक्षणेनकिलभारत गजमात्रंप्रववृधेतदद्भुतमभून्महत् १९ मरीचिप्र
मुखैर्विप्रैःकुमारैर्मनुनासह दृष्ट्वातत्सौकरंरूपंतर्कयामासचित्रधा २० किमेतत्सौकरंव्याजंसत्वंदिव्यमवस्थितं
अहोबताश्चर्यमिदंनासायामेविनिःसृतं २१ दृष्टोंगुष्ठशिरोमात्रःक्षणाद्गंडशिलासमः अपिस्विद्भगवानेषयज्ञोमे

नेरुतेपिपुनरकांडेएवोद्धृतानामपांमध्येसन्नांअवसन्नांनिमग्नांसमुन्नेष्येउद्धरिष्यामि १६ चिंतामेवाहसृजतःसतःवा
र्भिःअद्भिःरसांरसातलंईश्वरेणसर्गेनियुक्तैः १७ मेअनुष्ठेयंसएवविदधातुसंपादयतु १८ वराहतोकःसूक्ष्मोवराहः १९ स्वस्थः
आत्माकाशस्थितःसन् १९ चित्रधा अनेकधा २० २१ पूर्वमंगुष्ठप्रमाणोदृष्टः गंडशिलास्थूलपाषाणः तत्समः यज्ञोविष्णुःनिज

303
1981

निजरूपतिरोधानेनमेमनःखेदयन् २२ श्रीः इतिमीमांसमानस्यसतः जगर्ज अतिगर्जनगिरिंद्रतुल्यः २३ गर्जनप्र
योजनमाह ब्रह्मणमिति २४ घर्घरितंतज्जात्यनुकरणध्वनिंअनिश्चयेनयःस्वखेदस्तस्यक्षयिष्णुक्षपयिष्णुनाशकंतेइ
तिपुनरुक्तिःप्रसिद्धिख्यापनार्थात्रिभिःपवित्रैः ऋग्यजुःसाममंत्रैरस्तुवन् २५ वेदेर्वितन्वनेस्तूयतेमूर्तिर्यस्यसः अतए
वात्मनोगुणान्अनुवदति तथातत्तेषांब्रह्मउच्चारितंवेदमवधार्यज्ञात्वा २६ कथंभूतःसन्नाविवेशेत्यपेक्षायामाह द्वा

इतिमीमांसतस्तस्यब्रह्मणःसहसूनुभिः भगवान्यज्ञपुरुषोजगर्जागेंद्रसंनिभः २२ ब्रह्माणंहर्षयामासहरि
स्तांश्चद्विजोत्तमान् स्वगर्जितेनककुभःप्रतिस्वनयताविभुः २४ निशम्यतेघर्घरितंस्वखेदक्षयिष्णुमा
यामयसूकरस्य जनस्तपःसत्यनिवासिनस्तेत्रिभिःपवित्रैर्मुनयोगृणन्स्म २५ तेषांसतांवेदवितानमूर्ति
र्ब्रह्मावधार्यास्वगुणानुवादं विनद्यभूयोविबुधोदयायगजेंद्रलीलोजलमाविवेश २६ उत्क्षिप्तबालःखच
रःकठोरःसटाविधुन्वन्खररोमशत्वक् खुराहताभ्रःसितदंष्ट्रईक्षाज्योतिर्बभासेभगवान्महीध्रः २७
घ्राणेनपृथिव्याःपदवींविजिघ्रन्क्रोडापदेशःस्वयमध्वरांगः करालदंष्ट्रोप्यकरालदृग्भ्यामुद्वीक्ष्यविप्रान्गृण
तोविशत्कं २८

भ्यांउच्चैःक्षिप्तोबालःपुच्छंयेनखचरःआकाशचारी कठोरःकठिनःसटाःस्कंधवालान् खराणितीव्राणिरोमाणियस्याःसात्व
क्यस्यखुरैराहतानिअभ्राणियेनसितदंष्ट्रः अतिशुक्लदंष्ट्रः ईक्षानिरीक्षणमेवज्योतिः आलोकोयस्य तदाप्रकाशांत
राभावात् बभासेआशोभत महीध्रःपृथिव्याःउद्धर्ता २७ क्रोडापदेशःवराहच्छद्मास्वयमध्वरांगोपिपशुरिव
घ्राणेनविजिघ्रन् गृणतःस्तोतॄन्विप्रानउद्वीक्ष्यऊर्ध्वंवीक्ष्यकंजलमाविशत् २८ माधव गोपाल गोविंद राम

तदानीं ततं समुद्ध्वनिमुक्ते क्षते सउदन्वान् समुद्रः आर्त्त इव स्तनयन् शब्दं कुर्वन् भो यज्ञेश्वर मां पाहि मामेव स्येवं चुक्रो
श आर्तसादृश्यमाह उत्सृष्टाः प्रसारिताः दीर्घा ऊर्मयः एव भुजास्तैर्विशिष्टः आर्तत्वे हेतुः वज्र कूटो वज्रमयः पर्वतः तद्वदंग
यद्भगवतः तस्य निपात वेगेन विशीर्णा कुक्षिर्यस्य २९ तदा रसायां तस्यातले गां पृथ्वीं ददर्श कः त्रिपरुः त्रिणि परूंषि सवना
त्मकानि पर्वाणि यस्य यज्ञमूर्तिरित्यर्थः किं कुर्वन् क्षुरप्रा आयताग्राः क्षुरास्तत्सदृशैः खुरैः अपोदरयन् कथं उत्पारपारं
उत्पाराणां पारशून्यानां मध्यपां पारं अवसानं यथा भवति तथा विदारयन् कथंभूतां अग्रे प्रलय समये तत्रतां स्वपक्षसुषुप्सुः

सवज्र कूटांगनिपातवेग विशीर्णकुक्षिः स्तनयन्नुदन्वान् उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति २९
खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ३० स्वदं
ष्ट्रयोद्धृत्य महीं निमग्नां सउत्थितः संरुरुचे रसायाः तत्रापि दैत्यं गदयापतंतं सुनाभ संदीपित तीव्रमन्युः ३१ श्रीः

सुषुप्सुरित्यनेन सूकरजातेः कर्दम शयन रुचिः स्वयं पूर्वकल्पे अभ्यधत्तेत्यनेन पूर्वमपि वराहावतारं सूचयति शिशयि
षुः सन् जीवाधीयंते तस्यां सर्व जीवाधार भूतां यां स्वयं अभ्यधत्त अभिमुख्येन दधार जठरे धृतवानित्यर्थः अनेन तदु
द्धरणे अनायासं द्योतयति ३० रसायाः सकाशादुत्थितः संरुरुचे सम्यग शोभत तत्रापि अंभसि गदामुद्यम्याग
छंतं कं धानं प्रतिघ्नंतं न सत्यः सहनानर्हो विक्रमो यस्य तं दैत्यं सुनाभं चक्रं तद्वत् संदीपितस्तीव्रो मन्युर्यस्य यद्वाम पि विद्य
माने किमिति परिभवं सहस इति सुनाभेन संदीपितस्तीव्रमनुः स भगवान् सिंहो गजं लीलया जघान ३१ नमो भगवते

305
1981

गजेंद्रो जगतीं क्रीडया विदारयन् गैरिकया यथा अरुणगंडतुंडो भवति तथा तस्य रक्तमेव पंकस्तेनांकितौ गंडो
तुंडं च यस्य सः जघानेति पूर्वेणैवान्वयः ३२ प्रताय आलक्ष्य अनुवाकैर्वैदिकं सूक्तं तत्सदृशैर्वाक्यैः तुष्टुवुः ३२ भो अ
जित ते त्वया जितं जितमिति संभ्रमे वीप्सा यज्ञैर्भाव्यते आक्रियते इति तथा त्रयीं वेदमयीं निलिल्युः लीन प्रायाः कारणं
पृथिव्युद्धरणं तेन सूकराय ३४ यज्ञात्मतां प्रपंचयंतः स्तुवंति रूपमित्यादि चतुर्भिः छंदांसि गायत्र्यादीनि यज्ञांगभूत

जघान रुंधानमसत्यविक्रमं सलीलयेभं मृगराडिवांभसि तद्रक्तपंकांकित गंडतुंडो यथा गजेंद्रो जगतीं विभिंद
न् ३२ तमालनीलासितदंतकोट्याक्ष्मामुत्क्षिपंतं गजलीलयांग प्रज्ञाय बद्धांजलयो नुवाकैर्विरिंच्यमुख्या उप
तस्थुरीशं ३४ ऋषय ऊचुः जितं जितं ते जित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः यद्रोमगर्तेषु निलिल्युर
ध्वरास्तस्मै नमः कारणसूकरायते ३४ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं छंदांसि यस्य त्वचि
बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं ३५ स्रुक्तुंड आसीत् स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे प्रा
शित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं ३६ श्रीगोविंद गोपाल माधव मुकुंद नारायण

छंदः आद्यनुवादेन भगवदवयवेषु तावि धीयते बर्हिः शब्दे दीर्घाभाव आर्षः दृशि चक्षुषि चातुर्होत्रं होत्रादि कामचतुष्ट
यं ३५ स्रुक् जुहूः तुंडे मुखाग्रे स्रुवो नासिकयोः इडाभक्षणपात्रं चमसाग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्म
भागपात्रं ग्रस्यते नेनेति ग्रसनं मुखांतर्विलछिद्रं चर्वणं भक्षणं ३६ श्री यज्ञपतये नमः श्री गोविंद गोपाल

भा० दीक्षादीक्षणीयेष्टिः अनुजन्म वारंवारमभिव्यक्तिः उपसदस्तिस्रः इष्टयः शिरोधरं ग्रीवाप्रायणीयादीक्षांतं नरे न०
ष्टिः उदयनीयासमाप्तेष्टिः तेएव दंष्ट्रेयस्य प्रवर्ग्योमहावीरः प्रत्युपसदं पूर्वं क्रियते सभ्योहोमरहितोग्नि आवसथ्यं
४३ औपासनाग्निस्तयोर्द्वंद्वैक्यं तत्तवक्रतुरूपस्य शीर्षं शिरः चितयष्टिकाचयनानिपंचअसवः प्राणाः ३७ प्रातःसवना
दीनि अवस्थितिः आसनं बाल्याद्यवस्थावा अग्निष्टोमोत्यग्निष्टोमउक्थं षोडशीवाजपेयोतिरात्रो अप्तोर्याम इति स
प्तसंस्थाविभेदाः त्वङ्मांसादिसप्तधातवः सत्राणिद्वादशाहादीनि बहुयागसंघातरूपाणि असोमायज्ञाः ससोमाः

दीक्षानुजन्मोपसदः शिरोधरंत्वंप्रायणीयोदयनीयदंष्ट्रः जिह्वाप्रवर्ग्यस्तवशीर्षकं क्रतोः सभ्यावसथ्यं चितयोसवोहि ते
३७ सोमस्तुरेतःसवनान्यवस्थितिः संस्थाविभेदास्तवदेवधातवः सत्राणिसर्वाणि शरीरसंधिस्त्वंसर्वयज्ञक्रतुरिष्टि
बंधनः ३८ नमोनमस्तेखिलमंत्रदेवताद्रव्यायसर्वक्रतवेक्रियात्मने वैराग्यभक्त्यात्मजयानुभावितज्ञानायविद्यागु
रवेनमोनमः ३९ दंष्ट्राग्रकोट्या भगवंस्त्वयाधृता विराजते भूधरभूःसभूधरा यथावनान्निःसरतोदताधृतामतंगजेंद्र
द्रस्यसपत्रपद्मिनी ४० त्रयीमयंरूपमिदंचसौकरंभूमंडलेनाथदताधृतेनते चकास्तिशृंगोढघनेनभूयसा कुलाचलेंद्र
स्ययथैवविभ्रमः ४१

क्रतवः तद्रूपस्त्वं इष्टिर्यजनमनुष्ठानं तदेवबंधनं यस्यसः ३८ पूर्वोक्तमेवसपरिकरं कीर्तयंतः प्रणमंति नमोनम इति अखि
लमंत्रादिरूपाय क्रियात्मने सामान्यव्यापाररूपाय किंचवैराग्ययुक्तकर्मसाध्या सत्वशुद्धिः ततोभक्तिः तत आत्मजयः चि श्रीः
त्तस्थैर्यं तेन अनुभावितं साक्षात्कृतं यत्ज्ञानं तस्मै एवंभूतज्ञानप्रदायगुरवे ३९ हेभूधरसभूधरा सपर्वता वनादुदकान्नि ४२
र्गच्छतो गजेंद्रस्य दंताग्रेण ४० त्वयाधृता भूर्विराजितइत्युक्तं इदानींभूमंडलेन त्वद्रूपं विराजत इत्याहुः त्रयीति अर्थेत्य
र्थांतरे नेदंरूपं दंतेनधृतं यद्भूमंडलं तेनचकास्ति शोभते शृंगेण उढोधृतो घनस्तेन भूयसा अतिमहता विभ्रमोविलासः ४१

307/1981

लोकापवाससृजनार्थं तेपत्नीं जगतांमातरं यतस्त्वंपितासि एवंसति तत्रस्थिताः संतः त्वयापित्रासह अस्यैमा
त्रेनमसाविधेम नमनं करिष्यामः नमस्कारेण परिचरेमेतिवा स्वतेजः साधारणशक्तिं याज्ञिकाः मंत्रतोग्निभरणाविव
व अधाः निहितवानसि ४२ इदं च त्वया अतिदुष्करं कृतमित्याहुः कइति हेप्रभो तवत्वयाहृतं भुवउद्विबर्हणं उद्धरणं त्वद
न्यः कः श्रद्धीतस्पृहयेत अध्यवस्येदित्यर्थः त्वयिपुनरसौविस्मयोनभवति यतोविश्वेसर्वे विस्मयाअस्मिन् कुतः
योभवान् अतिविस्मयं अत्यद्भुतं इदंविश्वं क्रियाविशेषणंवा ससृजे सृष्टवान् ४३ विस्मयंदर्शयंतः प्रार्थयंते विधुन्वतेति

संस्थापयैनांजगतांसतस्थुषांलोकायपत्नीमसिमातरंपिता विधेमचास्यैनमसासहत्वयायस्यांस्वतेजोग्निमि
वारणावधाः ४२ कःश्रद्दधीतान्यतमस्तवप्रभोरसांगतायाभुवउद्विबर्हणं नविस्मयोसौत्वयिविश्वविस्मये योमा
ययेदंससृजेतिविस्मयं ४३ विधुन्वतावेदमयंनिजंवपुर्जनस्तपःसत्यनिवासिनोवयं सटाशिखोद्धूतशिवांबुबिंदुभि
र्विसृज्यमानाभृशमीशपाविताः ४४ सवैबतभ्रष्टमतिस्तवैषते यःकर्मणांपारमपारकर्मणः यद्योगमायागुण
योगमोहितं विश्वंसमस्तंभगवन्विधेहिशं ४५ मैत्रेयउवाच इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः सलिलेस्व
खुराक्रांतउपाधत्तावितावनिं ४६

द्भ्यां सटानांशिखाभिरग्रैः उद्धूताः उच्छलिताः येशिवाअंबुबिंदवस्तैर्विसृज्यमानावयं पवित्रीकृताः ४४ तवकर्मणां
पारंयएषते अवलोकयति ज्ञातुमिच्छतीत्यर्थः यस्यतव योगमायया योगुणैः सह योगस्तेन मोहितं अतोविश्वस्य शं मंगलंवि
धेहि यथात्वामचिंत्यानंतशक्तिं ज्ञात्वा भजेत्तथानुग्रहाणेत्यर्थः ४५ उपस्थीयमानः स्तूयमानः स्वखुराक्रांत इ
तिजलेपि धारणाशक्त्या धानं दर्शयति अविता रक्षकः ४६ श्रीराम वासुदेव माधव गोविंद दामोदर श्रीः

भा० कथयोनींनिमायीनिमायावंतिचरित्राणियस्य श्रवयेत् कुस्वमार्षं उपनींकमनीयांहृदिप्रसीदति स्वमनसिसं टी०
४४ तुष्यतीत्यर्थः ४८ यद्यपिसुलभास्तथापिनप्रार्थनीयाइत्याह ताभिरासीभिरलंलब्धात्मभिः तुष्टाभिः नचतदाप्र
जनस्यवैकल्यंशंकनीयमित्याह भगवद्भजनव्यतिरेकेणफलांतरदृष्टिंविनाभजतांस्वपदप्राप्तिंस्वयमेवविधत्ते
गुहाशयत्वादहैतुकींभक्तिंजानन् ४९ अतः कोनाम पुराकथानांपूर्ववृत्तानांमध्येकथंचिदापीयविरज्येतविरमेत्

सइत्थंभगवानुर्वींविष्वक्सेनः प्रजापतिः रसायालीलयोन्नीतामप्सुन्यस्ययपौहरिः ४७ यएवमेतांहारि
मेधसोहरेः कथांसुभद्रांकथनीयमायिनः शृण्वीतभक्त्याश्रवयेतवोशतींजनार्दनोस्याशुहृदिप्रसीदति ४८
तस्मिन्प्रसन्नेसकलाशिषांप्रभोकिंदुर्लभंताभिरलंलवात्मभिः अनन्यदृष्ट्याभजतांगुहाशयः स्वयंविधत्तेस्वगतिं
परः परां ४९ कोनामलोकोपुरुषार्थसारवित्पुराकथानांभगवत्कथासुधां आपीयकर्णांजलिभिर्भवापहा
महोविरज्येतविनानरेतरं ५० इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेसूकररूपानुवर्णनेत्रयोदशोध्यायः १३
श्रीशुकउवाच निशम्यकौषारविणोपवर्णितांहरेः कथांकारणसूकरात्मनः पुनःसपप्रच्छतमुद्यतांजलिर्नचा
तितृप्तोविदुरोधृतव्रतः १ विदुरउवाच तेनैवतुमुनिश्रेष्ठहरिणायज्ञमूर्तिना आदिदैत्योहिरण्याक्षोहतइ
त्यनुशुश्रुमः २ तस्यचोद्धरतःक्षोणींस्वदंष्ट्राग्रेणलीलया दैत्यराजस्यचब्रह्मन्कस्माद्धेतोरभून्मृधः ३ श्रीः

ननुबाह्वोविरक्ताहश्यंतेतत्राह विनानरेतरमिति नरेतरमिति नरेतरंपशुंविना ५० इतितृतीयेटीकायांत्रयोदशः १३ ४४
चतुर्दशेनिदानंतुतद्वधेवक्तुमुच्यते संध्यायांकश्यपाद्गर्भसंभवः कामतोदितेः १ तेनैवयेनभूमिरुद्धृता अनुशुश्रुमतन्नुस्वात् १२
मृधोयुद्धं ३

309
1981

साधुत्वेहेतुः यस्मात्त्वंहरेरवतारकथांपृच्छसीति मृत्योः पाशांविशातयतिमोचयतीति ४ तदेवदर्शयति ययाकथया
उत्तानपदः पुत्रोध्रुवः मुनिनानारदेन अर्भकएव यदाध्रुवाय सुनंदादिभिर्विमानमानीतंतं तदास्यदेहत्यागोपे
क्षितः स्यादितिमत्वामृत्यावासन्नेपिदेहंनतत्याज किंतुसोपान इवतस्यमूर्ध्निपदंदत्वाविमानमारुह्यविष्णुपदमारू
ढः वक्ष्यतिहिपरित्वाभ्यर्च्यधिष्ण्याग्र्यंहृतस्वस्त्ययनोद्विजैः इयेषतदधिष्ठातुंबिभ्रद्रूपंहिरण्मयमिति ५ तयोःसंग्रहेतुंवक्तुमि

मैत्रेयउवाच साधुवीरत्वयापृष्टमवतारकथांहरेः यत्त्वंपृच्छसिमर्त्यानांमृत्युपाशविशातनीं ४ ययोत्तानपदःपुत्रो
मुनिनागीतयार्भकः मृत्योः कृत्वैवमूर्ध्न्यंघ्रिमारुरोहहरेःपदं ५ अथात्रापीतिहासोयंश्रुतोमेवर्णितःपुरा ब्रह्मणा
देवदेवेनदेवानामनुपृच्छतां ६ दितिर्दाक्षायणीक्षत्तर्मारीचंकश्यपंपतिं अपत्यकामाचकमेसंध्यायांहृच्छया
र्दिता ७ इष्ट्वाग्निजिह्वंपयसापुरुषंयजुषांपतिं निम्लोचत्यासीनमग्न्यागारेसमाहितं ८ दितिरुवाच एषमां
त्वत्कृतेविद्वन्कामआत्तशरासनः दुनोतिदीनांविक्रम्यरंभामिवमतंगजः ९ तद्भवान्दह्यमानायांसपत्नीनांसमृ
द्धिभिः प्रजावतीनांभद्रंतेमय्यायुंक्तामनुग्रहं १०
मितिहासंप्रस्तौति अथेति अनुपृच्छतांदेवानांब्रह्मणावर्णितइतिहासोमयाश्रुतः ६ देवप्रश्नप्रस्तावायप्रथमंहिरण्याक्षहिर
ण्यकशिपूत्पत्तिप्रसंगमाह दितिरित्यादिनायावदध्यायसमाप्तिः मरीचेः पुत्रंहृच्छयःकामस्तेनार्दिताअतःसंध्यायामेवकामितवती ७
तदथग्निहोत्रशालायां तत्रापिसमाहितं अग्निर्जिह्वायस्य यजुषांयज्ञानांपतिंपुरुषंश्रीविष्णुं ८ कृपणांबहुभाषिणीमिति तवएषमा
मिति द्वाभ्यांकार्पण्यंभर्तरीतिचतुर्भिश्चबहुभाषणंवर्ण्यते दुनोतिपीडयति विक्रम्यशौर्यमाविर्भाव्य रंभाकदलीं आयुंक्तांसर्वतोयु
नक्तुसम्यक्करोतु १०

भा० भर्त्तरिप्राप्तबहुमानानांस्त्रीणांअविशतेव्याप्नोति प्रजयापुत्ररूपेण तज्जायाजायाभवतियदस्यांजायतेपुनरितिश्रुतेः ११ नोस्माकंपिता नोस्मान् पृथक् अपृच्छन् अयंभावः त्रयोदशानामप्यस्माकंत्वयिभावसाम्येवैषम्याचरणंत न्द०
४५ नानुचितमिति १२ मोघंनभवतिहिमहीयसिलादशेमहत्त्वमे १४ प्रवृद्धानंगेनकश्मलंमोहोयस्यास्तां १५ सध्याकालवं

भर्त्तर्याप्तोरुमानानांलोकान्विशतेयशः पतिर्भवद्विधोयासांप्रजयाननुजायते ११ पुरापितानोभगवान् दक्षोदुहितृवत्सलः कंवृणीतवरंवत्सा इत्यपृच्छतनःपृथक् १२ सविदित्वात्मजानांनोभावंसंतानभावनः त्रयोदशाददात्तासांयस्तेशीलमनुव्रताः १३ अथमेकुरुकल्याण कामंकंजविलोचन आर्त्तोपसर्पणंभूमन्नमोघंहिमहीयसि १४ इतितांवीरमारीचः कृपणंबहुभाषिणीं प्रत्याहानुनयन्वाचाप्रवृद्धानंगकश्मलां १५ एषतेहंविधास्यामि प्रियंभीरुयदिच्छसि तस्याःकामंनकःकुर्यात्सिद्धिस्त्रैवर्गिकीयतः १६ सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् व्यसनार्णवमत्येतिजलयानैर्यथार्णवं १७ यामाहुरात्मनोह्यर्द्धंश्रेयस्कामस्यमानिनि यस्यांस्वधुरमध्यस्यपुमांश्चरतिविज्वरः १८ यामाश्रित्येंद्रियारातीन् दुर्जयानितराश्रयैः वयंजयेमहेलाभिर्दस्यून्दुर्गपतिर्यथा १९

चनायभार्याप्रशंसा एषइतिपंचभिःयतःयस्याःसकाशात् १६ सर्वाश्रमानुपादायेति तानयन्नादिदानेनकृष्णतस्तारयन्स्वयंतरतीत्यर्थः १७ आत्मनोदेहस्यार्द्धंकर्मसुद्वयोःसहाधिकारात् यच्छद्धानांमांत्वामितितृतीयश्लोकेनसंबंधः श्री
४५ स्वधुरंदृष्टादृष्टकर्मभारंविज्वरःनिश्चितः १८ हेलाभिर्लीलाभिर्जयेमेतिसभार्यस्येंद्रियाणिप्रायेणोनकालेनसर्पतीतिभावः १९

311
1981

नांअनेकोपकारकर्त्रीं त्वांकात्स्न्येन अनुकर्त्तुंप्रत्युपकारैःत्वत्सदृशाभवितुंनप्रभवः नसमर्थाः येचान्येगुणगृभवःगुणप्रियाः तेपिनसमर्थाःसंपूर्णेनाप्यायुषा वाशब्दाज्जन्मांतरैरपिनप्रभवइत्यर्थः २० यद्यपित्वदनुकरणमशक्यं प्रजात्यैपुत्रोत्पत्त्यै नातिवोचंतिनिनिंदति प्रतिपाल प्रतीक्षस्व २१ स्वनिंदामगणयंतींभीषयन् श्रीरुद्रमनुवर्णयति एषेतिसप्तभिः घोराणामेषावेलास्वयंचघोरदर्शना २२ भूतपर्षद्भिःभूतगणैः २२ तर्हितत्संमुखत्वमात्रंवर्जनीयमितिचेत्तत्राह श्मशानेयश्चक्रानिलःवातमंडलितस्मिन्याधूलिःतथाधूम्रःविकीर्णोविक्षिप्तःवियोतोद्यति

नवयंप्रभवस्त्वांत्वामनुकर्त्तुंगृहेश्वरि अप्यायुषावाकार्त्स्न्येन येचान्येगुणगृभवः २० अथापिकाममेतंतेप्रजात्यैकरवाण्यलं यथामांनातिवोचंतिमुहूर्त्तंप्रतिपालय २१ एषाघोरतमावेलाघोराणांघोरदर्शना चरंतियस्यांभूतानिभूतेशानुचराणिह २२ एतस्यांसाध्विसंध्यायांभगवान्भूतभावनः परितोभूतपर्षद्भिर्वृषेणाटतिभूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः भस्मावगुंठामलरुक्मदेहोदेवस्त्रिभिःपश्यतिदेवरस्ते २४ नयस्यलोकेस्वजनःपरोवानात्यादृतोनोतकश्चिद्विगर्ह्यः वयंव्रतैर्यच्चरणापविद्धामाशास्महेजांबतभुक्तभोगां २५

भान् जटाकलापोयस्यभस्मनावगुंठःप्रावृतः अमलरुक्मवद्देहोयस्य सदेवः त्रिभिः सोमार्काग्निःनेत्रैःपश्यतीत्यस्योत्तरश्लोकत्रयेष्वनुषंगः एकस्यजामातरःपरस्परंभ्रातरोव्यवह्रियंते अतोममभ्राता असौतवदेवरइतिलज्जार्थमुक्तं यद्यपिरुद्रःकश्यपापेक्षयाज्येष्ठःतथापितत्पत्नीसतीदित्यपेक्षया कनिष्ठेति सकश्यपापेक्षया कनिष्ठइतिमंतव्यं २४ ननुतथापिमहत्वेनादरणीयस्यस्वजनस्यचतवससर्वंक्षमेतएवतत्राह यस्यस्वजनानास्ति समत्वादीश्वरस्य ऐश्वर्यमेवाह येनचरणेनापविद्धांनिर्माल्यवतद्दूरतस्त्यक्तांतेनभुक्तभोगामजांमायांतन्मर्यादाविभूतिंमहाप्रसादइत्याशास्महेव्रतैस्तमाराध्य २५

भा० अनिषिद्धसुखत्यागादसौ पिशाचइत्युपहासो न कार्य इत्याह द्वाभ्यां यस्य अनवद्यं विषयासक्तिशून्यं आचरितं बिभ्रत्तवः तं०
४६ भेत्तुमिच्छवः २६ समीहितं अभिप्रेतं लोकशिक्षानुरूपं अविदुषः अविद्वांसः यद्वान्न विद्वान् यस्मादिति तस्य सर्वतस्येत्यर्थः
दुर्भगानेवाह येरिति श्वभोजनं शुनां भोज्यं शरीरं स्वात्मतया अयमेवात्मेति बुध्या २७ अहो अतर्क्यं तस्याचरणमित्या
ह ब्रह्मादयो येन कृतान् सेतून् स्वस्वाधिकारान् पालयंति यः कारणं यस्य येन कृतमिदं विश्वं माया च यस्याज्ञाकारी विभू

यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभत्सवः निरस्तसाम्यातिशयोपि यः स्वयं पिशाचचर्यामचरद्गतिः सतां २६ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितं यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितं २७ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनं २८ मैत्रेय उवाच सैवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा २९ स विदित्वा भार्यायास्तं निर्बंधं विकर्मणि नत्वा दिष्टाय रहसि तयाथोपविवेश ह ३० अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ध्यायन् जजाप विरजं ब्रह्म ज्योतिः सनातनं ३१ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ३२ दितिरुवाच न मे गर्भमिमं ब्रह्मन् भूतानामृषभोवधीत् रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं ३३

न्नः परमेश्वरस्य विडंबनं अतर्क्यमित्यर्थः २८ भर्त्रा निर्बंधेण एवं संविदिते ज्ञापितेपि सति वृषलीव वेश्येव २९ विकर्मणि नि श्रीः
षिद्धे दिष्टाय देवरूपायेश्वराय उपविवेशेति मैथुनं लक्ष्यते ३० उपस्पृश्य स्नात्वा भर्गः शब्दवाच्यं विरजं ज्योतिर्ध्यायन् ४६
सनातनं ब्रह्म गायत्रीप्रणवं वा जजाप ३१ कर्मावद्येन कर्मदोषेण ३२ नावधीत् माहं विल्वर्थः वधशंकाबीजमाह रुद्र
इति अहंसं अंहः अपराधं अकरवं कृतवत्यस्मि ३३ माधव मुकुंद गोपाल नारायण श्रीकृष्ण वासुदेव केशव

313
1981

रुत् दुःखं तत् द्रावयतीति रुद्रस्तस्मै उग्राय अनतिलंघ्याय मीढुषे सकामेषु फलसेचनकर्त्रे निष्कामेषु शिवाय वस्तु
तोन्यस्तदंडाय दुष्टेषु धृतदंडाय संहारे मन्यवे ३४ भामो भगिनीभर्ता उग्रः अनुग्रहो यस्य व्याधस्य निर्दयस्यापि सती पतिरस्य
नेन स्त्रीणां स्वभावं स्वयमपि वेत्तीति सूचयति ३५ ससर्गस्य स्वसंतानस्य आशिषं शुभं लोक्यां लोकद्वयार्हां संध्यायां योनि
यमः स निवृत्तो यस्य ३६ ते आत्मनि श्रित्तस्याप्रायत्यादशुचित्वात् मौहूर्तिकात् उत अपि मम निर्देशस्यात्ययात् अतिवा

नमो रुद्राय महते देवायोग्राय मीढुषे शिवाय न्यस्तदंडाय धृतदंडाय मन्यवे ३४ स नः प्रसीदतां भामो भगवाननुग्रहः व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः शचीपतेः ३५ श्रीमैत्रेय उवाच स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीं निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ३६ कश्यप उवाच अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत मन्निर्देशातिचारेण देवानां चैव हेलनात् ३७ भविष्यतस्तवाभद्रावभद्रे जाठराधमौ लोकान् सपालांस्त्रींश्चंडि मुहुराक्रंदयिष्यतः ३८ प्राणिनां हन्यमानानां दीनानामकृतागसां स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ३९ तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभावनः हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ४० दितिरुवाच वधं भगवता साक्षात्सुनाभोदारबाहुना आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ४१ न ब्रह्मदंडदग्धस्य न भूतभयदस्य च नारकाश्चानुगृह्णंति यां यां योनिमसौ गतः ४२

रेण अतिक्रमेण देवानां रुद्रानुचराणां ३७ एतैश्चतुर्भिर्हेतुभिः जाठरौ पुत्रौ अपसदौ हे चंडि कोपने ३८ हन्यमानानां सतां
३९ शतपर्वधृक् वज्रधर इंद्रः ४० सुनाभेनोदारो बाहुर्यस्य मत्वं मम कोपिते स्विन्नकृत्वात्तत् शांकितचित्तासती प्रार्थय
ते ब्राह्मणात् माभूदिति ४१ नारका अपि तथा यां यां योनिमसौ गतो भवति तमस्य तश्चनानुगृह्णंति कृपां न कुर्वंति ४२ माधव

भा० कृतोयोपराधस्तेन शोकस्ततोनुताप: तेनप्रत्यवमर्शनात् युक्तायुक्तविचारात् भगवतिहरौभवेश्रीरुद्रे एतै: पंचभि: कारणै: तृ०
४७ ४३ पुत्रस्य हिरण्यकशिपो: पुत्राणांमध्येएक: संतांमतोभविष्यति तमेववर्णयति गास्यंतीतिसार्द्धै: पंचभि: समंसहसदृशं
च ४४ हीनवर्णेहेमयथायोगैर्दाहादिभिरुपायैशोध्यतेयथायस्यशीलंस्वभावमनुवर्तितुं अनुगंतंप्राप्तं निर्वेदादिभिर्योगैरा
त्मानंभावयिष्यंति ४५ विश्वप्रसादेहेतु: यदात्मकं स्वदृक् आत्मसाक्षी यस्मानन्यया भगवानेवसत्यइत्येवंभूतया दृशातो

कश्यपउवाच कृतशोकानुतापेनसद्य: प्रत्यवमर्शनात् भगवत्युरुमाना च्चभवे मय्यपि चादरात् ४३ पुत्रस्यैवतु
पुत्राणांभवितैक: सतांमत: गास्यंतियद्यश: शुद्धंभगवद्यशसासमं ४४ योगैर्हेमेवदुर्वर्णंभावयिष्यंतिसाधव: सं
स्वदृक्भगवान्यस्य निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं ४५ यत्प्रसादादिदंविश्वंप्रसीदतियदात्मकं सस्वदृक्
भगवान्यस्य तोष्यतेनन्ययादृशा ४६ सवैमहाभागवतोमहात्मामहानुभावोमहतांमहिष्ठ: प्रवृद्धभक्त्यानुविभावि
ताशयेनिवेश्यवैकुंठमिमंविहास्यति ४७ अलंपट: शीलधरोगुणाकरो हृष्ट: परर्द्ध्याव्यथितोदु:खितेषु अभू
तशत्रुर्जगत: शोकहर्ता नैदाघिकं तापमिवोडुराज: ४८ अंतर्बहिश्चामलमब्जनेत्रंस्वपूरुषेच्छानुगृहीतरूपं पौत्रस्त
वश्रीललनाललामं द्रष्टास्फुरत्कुंडलमंडिताननं ४९

थतोषं प्राप्स्यते ४६ तत्रहेतु: सवाइतिमहात्मा अपरिछिन्नदृष्टि: महानुभाव: महाप्रभाव: महतामपिमध्येमहिष्ठ: अतिशयेनमहा श्री
न् प्रवृद्धया भक्त्यानुभावितेशोधितेचित्तेवैकुंठं हरिंनिवेश्यदेहाद्यभिमानं त्यक्ष्यति ४७ महाभागवतं तत्वमाह अलंपटनइतिशीलधर: सु
स्वभाव: गुणानांधैर्यादीनामाकरोजन्मभूमि: परेषांसमृद्ध्याहृष्ट: परेषुदु:खितेषुसत्सु नभूतोजात: शत्रुर्यस्य निदाघेभवंतापचं ४७
द्रोयथाहरतिएवंजगत: शोकहर्ताभविष्यति ४८ अपरिछिन्नदृष्टित्वमाह अंतरितिस्वपुरुषाणामिच्छयां पुन: पुनर्गृहीतानि
रूपाणियेन श्रीरेवललनासुंदरीचतस्या: ललामंडनं द्रष्टाद्रक्ष्यति ४९ श्री: ॥ ॥ ॥ ॥ ॥ ॥ ॥

315
1981

महामना: सोत्साहचित्ता हरिणासहयुद्धेनमरणेपुत्रयो: कीर्तिस्फूर्तिश्चभवेदिति ५० इतिभागवतेतृतीयस्कंधेटीकायां
चतुर्दशोध्याय: १४ हतप्रभैस्सुरै: पृष्ट: प्राहपंचदशेविधि: तद्बीजंविप्रशापादिवैकुंठेविष्णुभृत्ययो १ नदेवंदेवानांब्रह्मणश्चसं
वादप्रस्तावमुक्त्वेदानींतंसंवादंवक्तुमाह प्राजापत्यंकाश्यपंतेजोवीर्यं परेषांतेजोहंतीतितथा आर्ष: स्वपुत्राभ्यां करिष्यतेयत्सुरा
णामार्दनंपीडनं तस्माछंकमाना ११ तेनगर्भतेजसाहता लोकेनिरस्तसूर्यादिप्रकाशो हतौजस: हतप्रभावा: ध्वांतेनव्यतिक

मैत्रेयउवाच श्रुत्वाभागवतंपौत्रममोदतदितिर्भृशं पुत्रयोश्चवधंकृष्णाद्विदित्वासीन्महामना: ५० इतिश्रीभागवते०
दितिकश्यपसंवादेचतुर्दशोध्याय: १४ मैत्रेयउवाच प्राजापत्यंतुतत्तेज: परतेजोहनंदिति: दधारवर्षाणिशतंशं
कमानासुरार्दनात् १ लोकेतेनहतालोकेलोकपालाहतौजस: न्यवेदयन्विश्वसृजेध्वांतव्यतिकरंदिशां २ तमएत
द्विभोवेत्थसंविग्नायद्वयंभृशं नत्यव्यक्तंभगवत: कालेनास्पृष्टवर्त्मन: ३ देवदेवजगद्धातर्लोकनाथशिखाम
णे परेषामपरेषांत्वंभूतानामसिभाववित् ४ नमोविज्ञानवीर्यायमाययेदमुपेयुषे गृहीतगुणभेदायनमस्तेव्यक्त
योनये ५

रंसंकरं २ वेत्थजानासिकिंविचारयसि यद्यतोवयंसंविग्नाभीता: अव्यक्तंअज्ञातंनस्पृष्टंवर्त्मज्ञानप्रचारोयस्य ३
ब्रह्मणांपरमेश्वरत्वेनस्तुवंत: प्रार्थयंते देवदेवेतिसप्तभि: लोकनाथानांशिखामणे भाववित् अभिप्रायज्ञोसि केना
भिप्रायेणदितेगर्भोवर्द्धतइतिजानासीत्यर्थ: ४ विज्ञानंवीर्यंबलंवीर्यस्य इमंब्रह्मदेहमुपेयुषेप्राप्तवते गृहीतोगुणभेद:
रजोगुणोयेन व्यक्तस्यप्रपंचस्ययोनयेकारणाय नव्यक्ताकेनापिप्रमाणेनविज्ञाता योनिर्यस्येतिवा ५ वासुदेव श्री

सकामतयाप्रतिक्षणंदुःखमनुभवंतोनिष्काम भक्तांस्तवंत आकुर्द्धाभ्यां येत्वात्वां अनन्येननिष्कामेन भावेनभक्त्याध्यायं
ति आत्मनोजीवान् भावयतीतितथा स्वस्मिन्प्रोतानिग्रथितानि भुवनानि येन चेतनाचेतनप्रपंचकारणमित्यर्थः तत्रहेतुः
सदसदात्मकं कार्यकारणरूपं वस्तुतस्ताभ्यांपरं ६ जितः स्वासइंद्रियाणि आत्माभनश्चयैः अतः सुपक्वयोगाः अतः सु
पक्वयोगाः अतएवप्राप्तोयुष्मत्प्रसादोयैस्तेषां ७ अन्येतु नित्यंकर्मक्लेशिनइत्याहुः यस्येति तत्पादामन्या आयत्ता अधीनाः
मुख्यायनियंत्रे प्राणरूपायेतिवा तथाचश्रुतिः तस्यवाक्तंतिर्नामानिदामानिइत्यादि ८ तमसा अहोरात्रविभागाभा

येत्वानन्येनभावेनभावयंत्यात्मभावनं आत्मनिप्रोतभुवनंपरंसदसदात्मकं ६ तेषांसुपक्वयोगानांजितश्वासेंद्रिया
त्मनां लब्धयुष्मत्प्रसादानांनकुतश्चित्पराभवः ७ यस्यवाचाप्रजाः सर्वागावस्तंत्येवयंत्रिताः हरंतिबलिमायत्ता
स्तस्मैमुख्यात्मनेनमः ८ सत्वंविधत्स्वशंभूमनलोकानांलुप्तकर्मणां अदभ्रदययादृष्ट्या आपन्नानर्हसीक्षितुं ९
एषदेवदितेर्गर्भओजःकश्यपमर्पितं दिशस्तिमिरयन्सर्वावर्द्धतेग्निरिवैधसि १० श्रीमैत्रेयउवाच सप्रहस्यमहाबाहो
भगवाञ्छब्दगोचरः प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरयागिरा ११ श्रीब्रह्मोवाच मानसामेसुतायुष्मत्पूर्वजाःसन
कादयः चेरुर्विहायसालोकांल्लोकेषु विगतस्पृहाः १२ तएकदाभगवतोवैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयंसर्वलो
कनमस्कृतं १३ वसंतियत्रपुरुषाः सर्ववैकुंठमूर्तयः येनिमित्तनिमित्तेन धर्मेणाराधयन्हरिं १४ श्रीवासुदेव

वेन लुप्तानिकर्माणियेषां आपन्नान् आपद्गतानस्मान् ९ आपत्कारणमाहुः एषगर्भस्तस्यविशेषणं अर्पितंनिक्षिप्तंकाश्यप
मोजोवीर्यं दिशस्तिमिरयन् तमोव्याप्ताः कुर्वन् १० दितेः कुचेष्टितंज्ञात्वाप्रहस्य देवानां येशब्दाविज्ञप्तिवाक्यानितेषां गोचरोवि
शेषज्ञतः प्रत्यभाषत ११ युष्मत्सकाशात्पूर्वंजाताः १२ वैकुंठाख्यंलोकंययुः १३ तंवर्णयति वसंतीत्यादिद्वादशभिः वैकुंठस्य
हरेरिवमूर्तिर्येषांते निमित्तंफलंनिमित्तं प्रवर्त्तकंयस्मिन् निष्कामेन धर्मेणेत्यर्थः आराधयन् आराधितवंतः १४

317
1981

शब्दगोचरः वेदांतैकवेद्यः विरजंसत्वंमूर्तिंविष्टभ्यधृत्वावृषोधर्ममूर्तिः स्वानांस्वान् १५ तत्रत्यंवनंविशिनष्टि यत्रे
तित्रिभिः सर्वर्तुषुऋतुषुश्रीः पुष्पादिसंपत्येषांतैः १६ चरितानिचरित्राणिभर्त्तुः प्रभोः अनुविकसंत्यः मधुमकरंदः तद्यु
क्तामाधव्योवासंत्योलताः यद्वा अनुविकसन्मधवः प्रसरन्मकरंदाः माधव्यः मधुकालीनाः सुमनसः तासांगंधेनखंडि
ताविघ्निताधीर्येषां तेपिभगवद्गुणगानापकमनिलंक्षिपंतः तिरस्कुर्वंतोगायंति अनेनभगवत्पार्षदानांनिरति

यत्रचाद्यःपुमानास्तेभगवाञ्छब्दगोचरः सत्वंविष्टभ्यविरजंस्वानांनोमृडयन्वृषः १५ यत्रनैःश्रेयसन्नामवनंका
मदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिवमूर्तिमत् १६ वैमानिकाःसललनाश्चरितानियत्रगायंतिलोकश
मलक्षपणानिभर्त्तुः अंतर्जलेनुविकसन्मधुमाधवीनांगंधेनखंडितधियोअनिलंक्षिपंतः १७ पारावतान्यभृत
सारसचक्रवाकदात्यूहहंसशुकतित्तिरबर्हिणांयः कोलाहलोविरमतेचिरमात्रमुच्चैर्भृंगाधिपेहरिकथामिवगाय
माने १८ मंदारकुंदकुरवोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः गंधेर्चितेतुलसिकाभरणेनतस्या
यस्मिन्तपःसुमनसोबहुमानयंति १९

शयविषयसुखेपिभगवद्गुणगानानंदासक्तिर्दर्शिता १७ अन्यभृताः कोकिलाः दात्यूहश्चातकः अचिरमात्रंक्षणमात्रं क्ष
णमात्रंविरमति अनेनतत्रत्यपक्षिणामपिहरिकथाश्रवणादिपरमानंदोदर्शितः १८ मंदारपारिजातौसुरतरुविशेषौ
कुरवस्तिलवृक्षः उत्पलंरात्रिविकासि अंबुजंदिनविकासि नागोनागकेसरः एताःसुमनसः पुष्पजातयः सुगंधाअपि
तुलसिकाभरणेन श्रीहरिणा तुलस्याः गंधेर्चितेसतियस्मिन् वनेतस्यास्तपोबहुमानयंति अनेनतत्रत्यागुणग्राहि
णएवनमत्सरिण इत्युक्तं एवंभूतंवनंयत्रतद्वैकुंठंययुरितिपूर्वेणान्वयः १९ नमोभगवतेवासुदेवायनमोस्तु

भा०
४९

पुनर्वैकुंठमेवविशिनष्टि तत्संकुलंव्याप्तंभवति कैः हरिपादयोरानतः प्रणामः तावन्मात्रेण दृष्टैः भक्तानांविमा टी०
नैः नकर्मादिप्राप्यैः वैडूर्यमारकतैर्हेममयैश्चविमानैः बृहंतिकटितटानियासां स्मितशोभीनिमुखानियासां
ताअपि कृष्णेआत्मायेषां रजः कामंउत्स्मयाद्यैः परिहासादिभिः नआदधुः नजनयामासु २० श्रीर्लक्ष्मीरूपि
णीमनोहरमूर्तिधारिणी सतीश्रीहरेः सद्मनिसंमार्जनंकुर्वतीकस्मिंल्लोकेसंलक्ष्यते चरणारविंदंक्वणयतीनूपुरेण
शब्दयंती विरक्तोदोषश्चांचल्यंयया यद्वामुक्तेदोषाप्रसारितेनबाहुना कीदृशेसद्मनिस्फटिकमयानिकुड्यानि
यस्मिन् मध्येमध्येच शोभार्थंउपेतंसंयुक्तंहेमयस्मिं यस्याअनुग्रहणेश्रीरनुग्रहंकरोतुतदर्थमन्येषांप्रसादी

तत्संकुलंहरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः येषांबृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्म
नांनरजआदधुरुत्स्मयाद्यैः २० श्रीरूपिणीक्वणयतीचरणारविंदंलीलांबुजेनहरिसद्मनिमुक्तदोषा संलक्ष्यतेस्फ
टिककुड्यउपेतहेम्निसंमार्जतीवयदनुग्रहणेन्ययत्नः २१ वापीषुविद्रुमतटास्वमलामृताप्सुप्रेष्यान्विता
निजवनेतुलसीभिरीशं अभ्यर्चतीस्वलकमुन्नसमीक्ष्यवक्त्रमुच्छेषितंभगवतेत्यमतांगयच्छ्रीः २२ माधव

नांयत्नः साअयंभावः यद्यपितत्ररजोनास्त्येवतथापिस्वर्णपट्टिकावच्छिन्नभित्तिभागेषुबहुधाप्रतिबिंबितासतीलीलांबु
जभ्रामयंतीविनयभक्तिभ्यांतथालक्ष्यतइति २१ अंगहेदेवाः यद्यस्मिंल्लोकेश्रीरेवंअमंतअमंदत्नमेने किंकुर्वतीविद्रुमम
यानितटानियासांअमलाअमृततुल्याआपोयासांतासुवापीषुनिजवनेलक्ष्मीवने परिचारिकाभिरचिता तुलसीभिश्चवि श्रीः
ष्णुंपूजयंतीतदाउदकेप्रतिबिंबितंशोभनालकयुक्तंउत्कृष्टनासिकायुक्तंचस्ववक्त्रंवीक्ष्यभगवताउच्छेषितंचुंबितमित्यमन्यत ४९
स्वमुखलावण्यभगवत्कृतचुंबनेनैवनान्यथेत्यमन्यतेत्यर्थः अनेनलक्ष्म्याअपिसौभाग्यसुखंभगवदनुग्रहेणैवेतिद्योतितं २२

319/1881

पुनः कथंतत् यद्वैकुंठंनव्रजंति केयेकुकथाः शृण्वंति कास्ताः अर्थभिन्नानित्यघभित्तस्यहरेः रचनाः सृष्ट्यादिलीला
तस्याअनुवादादन्यविषयाः अर्थकामादिवार्त्ताः मतिभ्रंशिकाः तेषामव्रजनेहेतुः यास्कृहतभाग्यैः नरैः श्रुताः सत्यस्तां
स्तां श्रोतॄन् अशरणेषुनिराश्रयेषुतमस्तुनरकेषुक्षिपंति हंतखेदे कथंभूताः अतःसारः श्रोतॄणांपुण्यंयाभिस्ताः २३ प्र
संगाज्ज्ञानं शोचति नोस्माभिः ब्रह्मादिभिः रप्यभ्यर्थितांनृगतिंमनुष्यजातिंप्रपन्नाः प्राप्ताः संतोपिहरेराराधनंनकुर्वंति की
दृशींनृगतिंयत्रयस्यांधर्मसंहितंतत्त्वज्ञानंभवति तदुभयसाधकत्वात्तस्याः तेमुष्यभगवतोविस्तृतयामाययातनुसंमो
हिताः वतेतिखेदे यदिचैवंसंबंधः नकेवलंतएवनव्रजंति किंतुभगवदाराधनंनकुर्वंति तेपितेषांमायामोहितत्वादिति २४

यन्नव्रजंत्यघभिदोरचनानुवादात्शृण्वंतियेन्यविषयाः कुकथामतिघ्नीः यास्तुश्रुताहतभगैर्नृभिरात्तसारास्तां
स्तान्क्षिपंत्यशरणेषुतमःसुहंत २३ येभ्यर्थितामपिचनोनृगतिंप्रपन्नाज्ञानंचतत्त्वविषयंसहधर्मयत्र नाराधनंभग
वतोवितरंत्यमुष्यसंमोहिताविततयाबतमाययाते २४ यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनः स्पृह
णीयशीलाः भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यवाष्पकलयापुलकीकृतांगाः २५ तद्विश्वगुर्वधिकृतंभुवनेकवद्यं
दिव्यंविचित्रविबुधाग्र्यविमानशोचिः आपुःपरांमुदमपूर्वमुपेत्ययोगमायाबलेनमुनयस्तदथोविकुंठं २६ श्रीः

पुनः कथंभूतंयच्च नः उपरिस्थितंव्रजंति के अनिमिषांदेवानांऋषभः श्रेष्ठोहरिस्तस्यानुवृत्त्याहेयमोयेषां यद्वादूरीकृतय
मनियमाः पाठांतरेदूरीकृताहंकारादित्यर्थः स्पृहणीयंकरुणादिशीलंयेषां किंचभर्त्तुर्हरेर्यत्सुयशः तस्यमिथः कथनेयो
नुरागस्तेनवैवश्यंतेनवाष्पकलातयासहपुलकीकृतमंगंयेषां किंचभर्त्तु यद्वानः उपरीतिव्रजतांविशेषणंनिरहंकारत्वादस्म
त्तोपियेधिकास्तेयत्रव्रजंतीत्यर्थः २५ तत्तदापूर्वंविकुंठंअथोअनंतरमुपेत्यमुनयः परामुत्कृष्टांमुदमापुः अपूर्वत्वेहेतवः वि
श्वगुरुणाहरिणाअधिकृतंअधिष्ठितं भुवनानामेकमेववद्यंदिव्यमलौकिकं विचित्राणिविबुधाग्र्याणांविमानानि
तेषांशोचिर्दीप्तिर्यस्मिन् योगमायाबलेनेति अष्टांगयोगप्रभावेनोपेत्यपरमेश्वरेतुयोगमायेतिचिच्छक्तिविलासइतिद्रष्टव्यं २६ श्रीः

भा० तस्मिन्विकुंठे षट् कक्षाः प्राकारद्वाराणि असज्जमानाः भगवद्दर्शनोत्कंठतयातत्तदद्भुतदर्शन आसक्तिमकुर्वाणाः द्वारपालौ ८०
देवावपश्यन् समानं वयोयंयोः गृहीतेगदे याभ्यां पराध्यैः केयूरादिभिः विटंकः सुंदरो वेषोययोः २७ तावेव वर्णयति मत्ताद्वि
५० रेफायस्यां तया वनमालया विनीतौ कंठलं विन्यासलंकृतौ असिताः नीलाः चतुष्टये चतुः संख्याकाः बाहवस्तेषांमध्ये विन्य
स्तया वक्रं च मनाग्रभसं किंचित्तक्षुब्धं दधानौ स्फुटौ उत्फुल्लौ निर्गमौ श्वासमार्गौ नासापुटे ताभ्यां २८ एतयोर्मिषतोः पश्य
तोः तावनादृत्या दृष्ट्वैवं याः पूर्वाः षट् द्वारः पुरटालंकृत वज्रमय कपाटिका यासुताः यथा तथा सप्तमाया अपि द्वारितेवि

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायां देवा वचक्षतगृहीतगदौ पराद्‌र्ध्य केयूरकुंडलकिरी
टविटंकवेषौ २७ मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये वक्रंभ्रुवाकुटिलयास्फुटनिर्ग
माभ्यांरक्तेक्षणेन च मनाग्रभसंदधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका याः सर्वत्रतेवि
षमया मुनयः स्वदृष्ट्या विश्वंचरंत्यविहताविगताभिशंकाः २९ तान्वीक्ष्य वातरसनांश्चतुरः कुमारान् वृद्धान् दशार्द्धवयसोवि
दितात्मतत्वान् ताभ्यांमिषत्स्वनि वेत्रेणचास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ३० ताभ्यांमिषत्स्वनिमि
षेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्यां ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा तउपप्लुताक्षाः ३१

विविशुः अप्रश्नेहेतुः सर्वत्र ये अविहता अनिवारिताः संचरंति निःशंकत्वेहेतुः अविषयवाचस्वदृष्ट्येति २९ वातरसनान् नग्नान् वृद्धा
नपि पंचवर्षबालकवत् प्रतीयमानान् च कारादात्तयाच असखलयतां निवारितवंतौ नतत्तनतनमर्हंतीतितथानान् अहो अत्रा
पि धाष्टर्य्यमित्येवं तेषां तेजो विरहस्य भगवतो ब्रह्मण्यदेवस्य प्रतिकूलशीलं ययोः ३० हरेर्द्वारपालपतिभ्यां देवेषु पश्यत्सु वार्यमाणा श्रीः
स्ते मुनयः कोवा इत्यादि श्लोकत्रयीमूचुः सुहृत्तमः श्रीहरिः तस्य दिदृक्षितं दर्शने यातस्य भंगे सति कामस्थानुजः क्रोधस्तेन सहसाक ५०
स्मादेव उपप्लुतानि क्षुभितान्यक्षीणि येषां ते सुष्ठु पूज्यतमा अपीति निषिभानर्हत्वे क्रोधानर्हत्वे वा हेतुः ३१ श्रीगोपालकृ०

321/1921

उच्चैर्महत्या भगवत्परिचर्यया एत्य प्राप्य इहैव वैकुंठे निवसतां तद्धर्मिणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोरेवको
यं विषमः स्वभावः कैश्चित्प्रवेष्टव्यं कैश्चिन्नेत्येवं क्षतः स्वामिनो रक्षार्थं द्वारपालयोरेष स्वभावो गुण एवेति चेदत आहुः
तस्मिन्निति कुहकयोः कपटयोः आत्मवत् स्वदृष्टांतेन यथा अवां कपटौ तथान्योपि कश्चित्कपटः प्रवेक्ष्यतीति अयंभावः
नत्वत्र भगवद्भक्तं विना कश्चिदागच्छति न चेश्वरे प्रशांतत्वादविद्यमान विरोभय शंका अतो युवां केवलं धूर्तावेति ३३
भयशंका बीजं च भेदः स च कस्याप्यस्मिन् नास्तीत्याहुः नहीति समस्तं विश्वं कुक्षौ यस्य यत्र यदा इह भगवति धीरा विद्वां

मुनय ऊचुः को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमस्वभावः तस्मिन्प्रशांतपुरुषे गतवि
ग्रहे वां को वात्मवत्कुहकयोः परिशंकनीयः ३२ नत्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धी
राः पश्यंति यत्र युवयोः सुरलिंगिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोस्य ३३ तद्वाममुष्य परमस्य विकुंठभर्तुः
कर्तुं प्रकृष्टमिह धीमहि मंदधीभ्यां लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोस्य यत्र ३४ गोविंद

स आत्मनोंतरं भेदं न पश्यति किं तस्मिन्परमात्मन्यात्मानमंतर्भूतं पश्यंति महाकाशे घटाकाशमिव तदा यथान्यस्य राजा
देः उदरभेदि उदरभेदयुक्तं भयं भवति तथास्य श्रीहरेः तादृक् भयं यतः येन कारणेन सुरवेशधारिणोर्युवयोर्विशेषेणो
त्पादितं तत्किं न किंचिदित्यर्थः ३२ तत्तस्मादमुष्य विकुंठनायकस्य भृत्याभ्यां प्रकृष्टं भद्रमेव कर्तुं इह अस्मिन्नपराधे यत्
युक्तं तत् धीमहि चिंतयेम तदेवाहुः अंतरस्य भावः सत्तात द्दर्शनेन इतः वैकुंठलोकात् व्रजतं यत्र येषु लोकेषु अस्य पापीयसां
तरद्रष्टुः इमे कामः क्रोधस्तथा लोभ इति गीतोक्तास्त्रयो रिपवो भवंति पापीयसो लोकानिति वा ३४ श्रीमाधवकृ०

भा०
५१

इतितेषामीरितंश्रावण घोरमवधार्य तंच ब्रह्मदंडं ब्रह्मशापमवधार्य तंचास्त्रसमूहैरप्यनिवार्यमवधार्य हरेरनुचरौ अतिकातरेण त०
अतिकातर्येणभयेनतत्पादग्रहणंकुर्वंतौसंतौ दंडवदपततां कथंभूतस्यहरेः एवंभूतेभ्योमुनिभ्यः ताभ्यामपिउरु अधिकंबिभ्यतः प्र
यंभावयंतः ३५ अहो अपराधमस्माभिरत्यनुतप्यमानान् प्रत्यूचतुः अघोनि अघवति प्रउचितोदंडः सत्वभगवद्भिरकारि नात्रभव
तामपराधः कश्चित अतोसौनौ आवयोर्भूयात् यः अशेषमपिसुरहेलनं ईश्वरातातिक्रमरूपंपापंहरेत किंतुयुष्माकंयः कृपानिमि
त्तोनुतापस्तस्यलेशेननौवधोधोमूढयोनीर्व्रजतोरपि भगवत्स्मृतिप्रतिघातकोमोहोनभवेत् किंतुमोहेपिस्मृतिमेव प्रवहतादिति
प्रार्थना ३६ एवंस्वानांमहत्सु अतिक्रममपराधंतत्क्षणमेवविबुध्यतस्मिन्नत्रतेरुद्दालंदर्शयंयो आर्याणांहृद्यः मनोज्ञः चरणौ

तेषामितीरितमुभाववधार्यघोरंतंब्रह्मदंडमनिवारणमस्त्रपूगैः सद्योहरेरनुचरावुरुबिभ्यतस्तत्पादग्रहावपततामतिकात
रेण ३५ भूतिहावू० क्षमोद्घोनिभगवद्भिरकारिदंडोयोनौहरेतसुरहेलनमप्यशेषं मावोनुतापकलयाभगवत्स्मृति
घ्नोमोहोभवेदिहतुनौव्रजतोरधोधः ३६ एवंतदैवभगवानरविंदनाभस्स्वानांविबुध्यसदतिक्रममार्यहृद्यः तस्मिन्ययौ
परमहंसमहामुनीनामन्वेषणीयचरणौचलयन्सहश्रीः ३७ तंत्वागतंप्रतिहृतौपयिकंस्वपुंभिस्तेचक्षताक्षविष
यंस्वसमाधिभाग्यं हंसःश्रियोर्व्यजनयोःशिववायुलोलच्छुभ्रातपत्रशशिकेसरसीकरांबु ३८ श्रीमाधव

चलयन्निति अयंभावः मच्चरणदर्शनप्रतिघातजंक्षोभंतौदर्शयन्शामिष्यामीतित्वराव्याजेनपद्भ्यामेवययौ श्रीसाहित्यंच
निःकामानामपिविभूतिभिः पूरयित्वाक्षमापयितुं ३७ तत्रतेदृष्टंदेवमनुवर्णयंति पंचभिः तंतु आगतं ते आचक्षत अपश्य
न् आपंचमादिदमेवक्रियापदं स्वपुंभिः शीघ्रंप्रतिहृतंआनीतं औपयिकं गमनोचितं छत्रपादुकादियस्य कथंभूतंस्व
समाधिनाभाग्यंभजनीयंफलंयद्ब्रह्मतदेवाक्षविषयंहंसवत् श्रीर्थयोस्तयोरुभयतश्चलतोर्व्यजनयोः शिवोनुकूलो
वायुः तेनलोलंतश्चलंतः शुभ्रातपत्रशशिकेसराः शुभ्रंयदातपत्रंतदेवशशिसादृश्यात् शशीतस्यकेसराः मुक्ता
हारविलंबाः तेभ्योगलंतिसीकरांबूनियस्मिन् तं सीकरांबुकणाः ३८ ७ ५ ७ ७ ५ ७ ७

श्रीः
५१

323
1981

कृत्स्नस्यद्वारपालवृंदस्यप्रसादेसुमुखं स्पृहणीयानांगुणानांधामस्थानं स्नेहावलोककलयासप्रेमकटाक्षेण हृदिसं
स्पृशंतंसुखयंतं त्रैलोक्यविवक्षापक्षेसत्यलोकपर्यंतः स्वर्गस्तस्यचूडामणिवत् स्थितंस्वधिष्ण्यंवैकुंठं एवंसुभगयंतंशोभ
यंतं ३९ पृथुनितंबं आश्रयत्वेनविद्यतेयस्य तस्मिन्पीतांशुके अलिभिर्नादितयावनमालयाचयुक्तं सुभगयंतमितिपूर्णेने
ववासंबंधः वल्गुषुप्रकोष्ठेषुवलयानियस्यविन्यस्तएकोहस्तोयेन इतरेणान्येनअब्जंधुनानंभ्रामयंतं विन्यस्येतिपाठेवलि
वलयादिहस्तस्यविशेषणं ४० स्वकांत्याविद्युतःक्षिपंतीयेमकराकारकुंडलेतयोर्मंडनस्यार्हंगंडस्थलेयस्मिन् तच्चतदुन्नसंच

कृत्स्नप्रसादसुमुखंस्पृहणीयधामस्नेहावलोककलयाहृदिसंस्पृशंतं श्यामेपृथावुरसिशोभितयाश्रियास्वश्चूडाम
णिंसुभगयंतमिवात्मधिष्ण्यं ३९ पीतांशुकेपृथुनितंबिनिविस्फुरंत्याकांच्यालिभिर्विरुतयावनमालयाच वल्गुप्र
कोष्ठवलयंविनतासुतांसेविन्यस्तहस्तमितरेणधुनानमब्जं ४० विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्न
समुखंमणिमत्किरीटं दोर्दंडखंडविवरेहरतापरार्ध्यहारेणकंधरगतेनचकौस्तुभेन ४१ अत्रोपसृष्टमितिचोत्स्मि
तमिंदिरायाः स्वानांधियाविरचितंबहुसौष्ठवाढ्यं मह्यंभवस्यभवतांचभजंतमंगंनेमुर्निरीक्ष्यनवितृप्तदृशोमुदाकैः ४२

मुखंयस्य मणियुक्तंकिरीटंयस्य दोर्दंडानांशाखासमूहस्तस्यविवरेमध्येस्थितेनहरताममनोहरेणविहरतेतिवापरार्ध्यउत्कृष्टः तेन
हारेणकंधरायांस्थितेन ४१ किंबहुना इंदिरायाउत्स्मितंअहमेवसर्वसौंदर्यनिधिरित्यहंकरणंअत्रभगवत्सौंदर्येउपसृष्टंअस्तंगतमि
ति स्वानांभक्तानांधियाविरचितं भक्तैः स्वमनस्येवंवितर्कितमित्यर्थः कुतः बहुसौष्ठवेनसौंदर्येणआढ्यंयुक्तं किंचममभवस्येश्वर
स्य भवतांचहृत्तेअंगंभजंतंमूर्तिंप्रकटयंतं अचक्षत निरीक्ष्यच कैःशिरोभिर्मुदानेमुः नवितृप्ताःदृशोनेत्राणियेषांते ४२

भा० स्वरूपानंदादर्पितेषां भजनानंदाधिक्यमाह तस्यपादारविंदकिंजल्कैः केसरैर्मिश्रयातुलसीतस्यामकरंदेनयुक्तो न०
५२ वायुःस्वविवरेणनासाछिद्रेण अक्षरजुषां ब्रह्मानंदसेविनामपिसंक्षोभं चित्ततंनंतर्भागस्तपद्मेश्वेतंरक्तंवाभवतिनतु
श्याम तिहर्षतनोरोमांचं ४३ हर्षकारितंसंभ्रममाहद्वाभ्यां तेवैकिलअमुष्यवदनमेवासितपद्मस्य कोशोतंतर्भागस्तं प
द्मंश्वेतंरक्तंवाभवति ननुश्यामं असितपद्मकोशमित्यभूतोपमा सुंदरतरे अरुणे अधरोष्टे कुंदवद्धासोयस्मिन् तंउत्तु
ध्वंवीक्ष्यलब्धमनोरथाः संतः नखाएव अरुणमणयस्तेषांश्रयणं आश्रयभूतमंघ्रिद्वंद्वं पुनरवेक्ष्यअधोदृष्ट्यावीक्ष्य

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः अंतर्गतः स्वविवरेण चकारतेषांसंक्षोभमक्ष
रजुषामपिचित्ततन्वोः ४३ तेवाअमुष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहास्यं लब्धाशिषःपुनरवे
क्ष्यतदीयमंघ्रिद्वंद्वंनखारुणमणिश्रयाणंनिदध्युः ४४ पुंसांगतिंमृगयतामिहयोगमार्गेर्ध्यानास्पदंबहुमतंन
यनाभिरामं पौंस्नंवपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ४५ श्रीकुमाराऊचुः योंतर्हितोहृदि

[illegible]

पुनः पुनरेवंनिरीक्ष्य युगपत्सर्वांगलावण्यशक्तेः पश्चात्निदध्युः ध्यातवंतः ४४ योगमार्गैर्गतिंमृगयतां पुंसां ध्यानस्यविषय
भूतं बहुमतं अत्यादरास्पदं बहूनांतत्वदर्शांसमंतामिति वा पौंस्नंपौरुषंवपुर्दर्शयंतं अन्यैरसिद्धैरसाधारणैः औत्पत्तिकैर्नित्यैर
णिमाद्यष्टैश्वर्यैर्युतंसमगृणन्सम्यक्स्तुवन् ४५ नित्यंब्रह्मरूपेण प्रकाशोनतद्विचित्रं इदानींतुपरममंगलविग्रहस्वसत्वश्रीमूर्त्याप्रत्यक्षो श्री
सि अहोभाग्यमस्माकमित्याहुः हेअनंतयतस्त्वं हृतोपिदुरात्मनो मंतर्हितोनस्फुरसि सनोस्माकं अंतर्हितो नभवसि नयनमूलंत ५२
थैवराद्धःप्राप्नोसि अंतर्दानाभावेहेतुः भवतः सकाशादुद्भवोयस्यतेनामस्मत्पित्रा यर्हि यदैव अनुवर्णितरहाः उपदिष्टरहस्यः तदैवनः
कर्णमार्गेणहृदं वुद्धिंगतः प्राप्नोसि ४६

325
1981

ननुपित्रोपदिष्टंभवतामदृश्यमात्मतत्वं अहंत्वन्य एवस्यां दृश्यत्वात् नैवं अस्मत्प्रत्यभिज्ञयाभेदनिरासादित्याहुः तमिति
हेभगवन् आत्मतत्वमेवपरंतत्वंत्वाविदा महिम्नः प्रत्यभिजानीमः ननु निरुपाधेरात्मतत्वस्य कथमीदृशमैश्वर्यंस्यात् अ
तआहुः सत्वेनविशुद्धसत्वमूर्त्यायेषांभक्तानांसम्यक्प्रतिक्षणंसंप्रतिरतिः तांरचयंतं आत्मतत्वमेवाहुः तेनुतापः कृपातैर्नवि
विदितैः ज्ञातैर्दृढैर्भक्तियोगैः श्रवणादिभिर्मुनयोहृदियद्विदुः कीदृशाः उद्ग्रंथयोनिरहंमाना अतएवविगतरागाः स्वयमपिभक्ति
प्रार्थयितुंभक्तानांसुखातिशयमाहुः आत्यंतिकंमोक्षाख्यमपितवप्रसादंतेनगणयंतिनाद्रियंते किंतुकिमुतअन्यत् इंद्रादिपदं
तेभ्रुवउन्नयैरुतज्जंभैः अर्पितंनिहितंभयंयस्मिन्नतत् केअंगहेभगवन् येभवतः कथारसज्ञाः कथंभूतस्यरमणीयत्वेनयाव

तंत्वाविदामभगवन्परमात्मतत्वंसत्वेनसंप्रतिरतिंरचयंतमेषां यत्तेनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयोहृदिविदुर्मुनयो
विरागाः ४७ नात्यंतिकंविगणयंत्यपितेप्रसादं किंत्वन्यदर्पितभयंभ्रुवउन्नयैस्ते येंगत्वदंघ्रिशरणाभवतः कथायाः कीर्त
न्यतीर्थयशसः कुशलारसज्ञाः ४८ कामंभवः स्ववृजिनैर्निरयेषुनस्तात् चेतोलिवद्यदनुतेपदयोरमेत वाचश्चनस्तुलसि
वद्यदितेंघ्रिशोभाः पूर्येततेगुणगणैर्यदिकर्णरंध्रः ४९ गोविंद गोपाल माधव मुकुंद वासुदेव केशव राम

नीयत्वेनचकीर्तनार्हंतीर्थंचयशोयस्य ४८ इदानींस्वापराधंद्योतयंतोभक्तिंप्रार्थयंतेकाममिति हेभगवन् इतः पूर्वमस्माकम्वृ
जिनंनाभवत् इदानींसर्वाण्यभिजातानियतस्त्वद्भक्तोशप्तोअतस्तैः स्ववृजिनैर्निरयेषुकामंनोस्माकंभवोजन्मस्तात्स्यात् नुवि
तर्केयदितुनश्चेतस्तेपदयोरमेत अलिर्यथाकंटकैराविध्यमानोपिपुष्पेषुरमते तद्वत् विघ्नानविगणय्ययदिरमेत अंघ्रिभ्यांशो
भायासां यथाचतुलसीस्वगुणनैरपेक्ष्येणत्वदंघ्रिसंबंधेनैवशोभंते तथायदिनोवाचः शोभेरन् यदिचतेगुणगणैः प्
र्येत कर्णरंध्रइत्यल्पस्यपूरणमिवयाचकरीत्याप्रार्थयंते अयंतुगूढाभिप्रायः कर्णरंध्रस्याकाशत्वात् गुणगणानांचा
मूर्तत्वात् नकदाचित्पूरणामतोनित्यमेवश्रवणंफलपुष्पतीति ४९ श्रीः ७ श्रीः ७ श्रीः ७ श्रीः ७ राम

अघवयंकृतार्थाः स्म इत्याहुः हेपुरुहूत विपुल कीर्त्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि हशोनेत्राणि अनात्म
नामजितेंद्रियाणां उरुदयः अप्रकटोपि इत्थं यः प्रतीतोसि तस्मै तुभ्यं इदं नमोविधेम ५० इतितृतीये पंचदशः १५
हरिणात्मा त्विति विप्रैरनुनम्रैस्तु षोडशे तयोरसुर भावेपि कृतोनुग्रह ईर्यते १ इति गृणतां तेषां तद्वाक्यं प्रतिनंद्य इदंज
गाद १ एतावद्दित्येकादशभिः दशभिः यद्यस्मात् मां कदर्थीकृत्य बहुधा भवति तथा अतिक्रमं वः कृतवंतौ १ त
स्मात्स एवं दंडोंगीकृतः २ हि यस्मात् ब्रह्म ब्राह्मणा एव मे परं मं दैवतं तत् तस्माद् द्य वः प्रसादयामि तवकोपराध इतिचे

प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः तस्मा इदं भगवते नम इद्विधेम योनात्मनां दुरुदयो भग
वान्प्रतीतः ५० इतिभागवते म० तृतीयस्कंधे पंचदशोध्यायः १५ श्रीब्रह्मोवाच इति तद्गृणतां तेषां मुनीनां योग
धर्मिणां प्रतिनंद्य जगादेदं विकुंठ निलयो विभुः १ श्रीभगवानुवाच एतौ तौ पार्षदौ मह्यं जयो विजय एव च कदर्थी
कृत्य मां यद्वो बह्वक्रातामतिक्रमं २ यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः स एवानुमतोस्माभिर्मुनयो देवहेलनात्
३ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभिरसत्कृताः ३ यन्नामानि च गृह्णाति लोको भृ
त्ये कृतागसि सोसाधुवादस्तत्कीर्तिं हंति त्वचमिवामयः ४ यस्यामृतामलयशः श्रवणावगाहः सद्यः पुनाति जग
दाश्वपचाद्विकुंठः सोहं भवद्भ्य उपलब्ध सुतीर्थकीर्तिश्छिंद्यां स्वबाहुमपि वः प्रतिकूलवृत्तिं ५ श्रीगोपाल

तत्राह तद्धीति मदीयैः पुंभिरसत्कृताः निरस्कृताः इति यत् तदात्मकृतमेव मन्ये ३ किंच ममैवैताभ्यां अनिष्टं कृतमित्याह य
स्य स्वामिनो नामानि तस्य कीर्तिं आमयोत्र श्वेतकुष्टं ४ यस्य मे अमृतरूपे अमले यशसि श्रवणेनावगाह प्रवेशः श्वपचमभिव्या
प्य जगत्सद्यस्तत्क्षणमेव पुनाति सोहं विकुंठं भवद्भ्यो हेतुभूतेभ्यः उपलब्धा प्राप्ता सुशोभना तीर्थभूता कीर्तिर्येन सः स्वां बाहु
स्थानीयं लोकेश्वरमपि हन्यां कोन्यस्य कथेत्यर्थः स्वगुणानुवर्णनं तु ब्राह्मणोत्कर्षार्थमेव ५ वासुदेव माधव नारायण

327
1981

चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अतएव क्षतो निरस्तः अखिलस्य लोकस्य मलो येन यद्वा चरणपद्मालग्नः पवित्रो रेणुर्य
स्मिन्निति क्षतोखिलो मलो यस्येति च विग्रहः प्रतिलब्धं प्राप्तं शीलं येन येषां सेवया एते गुणा मम अतएव श्रीर्मां नि विजहाति
प्रेक्षालवार्थं अवलोकनलेशार्थं इतरे ब्रह्मादयः तेषां वः प्रतिकूलवृत्तिं छिंद्यामिति पूर्वेणैव संबंधः ६ किंच ब्राह्मणो मम वक्त्रं मु
खं अतो युष्मद् वक्त्रतया मन्मुखतिरस्कार एव कृत इत्याह नाहमिति वितानेयज्ञे यजमानस्य हविश्चरुपुरोडाशादि हुतभुगग्निस्तेनमु

यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलं नश्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षाल
वार्थ इतरे नियमान्विहंति ६ नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन यद्ब्राह्मणस्य मु
खतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ७ येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रि
रजः किरीटैः विप्रांस्तु को न विषहेत यदर्हणांभः सद्यः पुनाति सहचंद्रललामलोकान् ८ भगवते वासुदेवाय नमः

खेन अदन् अश्नन्नपि तथा नाद्मि नाश्नामि यद्यथा श्च्योतता क्षरता घृतेन प्लुतं विलोडितं पायसादि प्रतिग्रासं रसास्वादपूर्वकं च
रतो भुंजानस्य ज्ञानिनो ब्राह्मणस्य मुखतोश्नामि मयि समर्पितैः कर्मफलैः तुष्टस्य निष्कामस्येत्यर्थः ७ किंच येषां अमलं मांघ्रिर
जः अहं किरीटैर्बिभर्मि तान् विभर्मि तान् विप्रान् अपकुर्वतोपि कोन्यो न विषहेत कथंभूतोहं अखंडा अनवच्छिन्ना विकुंठा अप्रतिह
ता च योगमायाविलास प्रभृता विभूतिर्यस्य तथा यस्य ममार्हणांभः पादोदकं चंद्रललामेनेश्वरेण सहितान् सद्यः पुनाति एवं परमेश्वरः
परमपावनोपि सन्नहं बिभर्मीति ८

भा० किंचमेतनूः अधिष्ठानानिकास्ताः द्विजवरान्दुहतीर्दोग्ध्रीर्गा इत्यर्थः दुहितॄरितिपाठेपिगाएवविष्णुरूपात्कश्यपादुत्पन्नत्वा न०
५४ त् सूर्यस्तताश्चगावइतिचवचनात् अलब्धशरणानिरक्षकहीनानि भेदबुध्यामदधिष्ठानंनभवंतीतिद्दृष्ट्यायेद्रक्ष्यं
ति अघेनक्षतान्क्षाराः श्येषांतान् मदीयोधिकृतोदंडनेतायोयमः तस्यगृध्राकाराद्दूताः अहिवत्मन्युर्येषांते रुषाक्रोधेन
कुर्शंतिचंचुभिःछिंदंति ९ एवंभूतास्त्कमावशीकुर्वंतिइत्याहापेक्षिपतः परुषंभाषमाणानामपिब्राह्मणान्येसंबोधयंति
मयियाधीस्तयावासुदेवद्दृष्ट्याअर्चयंतः संतः तुष्यद्धृतः प्रीयमाणचित्ताः स्मितमेवसुधातयाउक्षितंपद्मतुल्यंवक्त्रंयेषां अनु

येमेतनूर्द्विजवरान्दुहतीर्मदीयाभूतान्यलब्धशरणानिचभेदबुध्या द्रक्ष्यंत्यघक्षतदृशोह्यहिमन्यवस्तान्गृध्रारु
षाममकुषंत्यधिदंडनेतुः ९ येब्राह्मणान्मयिधियाक्षिपतोर्चयंतस्तुष्यद्धृतःस्मितसुधोक्षितपद्मवक्त्राः वाण्या
नुरागकलयात्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः १० तन्मेस्वभर्तुरवसायमलक्षमाणौयुष्मद्व्यतिक्रम
गतिंप्रतिपद्यसद्यः भूयोममांतिकमितांतदनुग्रहोमेयत्कल्पतामचिरतोभृतयोर्विवासः ११ ब्रह्मोवाच अथतस्योश
तींदेवीमृषिकुल्यांसरस्वतीं नास्वाद्यमन्युदष्टानांतेषामात्माप्यतृप्यत १२ गोपाल माधव गोविंद नारायण

रागकलयाप्रेमशोभयागृणंतः स्तुवंतः यथाकुपितमात्मजंस्निग्धः पितासत्पुत्रोवापितरं अहमिवभृगुं युष्मान्सतैरहमुपा
हृतो वशीकृतः १० तत्स्मात्मेवसायमभिप्रायंअलक्षमाणौ अजानंतौयुष्मदपराधोविताङ्गतिंसद्यः प्राप्यमत्समीपं इतां
प्राप्नुवतां तदितिसः मेनुग्रहः तमेवाह यत्भृतयोविवासः अचिरतः शीघ्रंकल्पतांसंपद्यतांसमाप्यतामितिउशतींप्रियांदेवीं श्री
द्योतमानांऋषिकुल्यांऋषयोमंत्राः तद्रूपां ऋषिकुलयोग्यामितिवासरस्वतींवाचंआस्वाद्यतन्माधुर्यमनुभूयसर्पभायेषाम ५४
न्युनादष्टानामपि क्रोधविषव्याप्तानांहामनोरसानुभवाभावात्प्रियभाषणमपिनसहतेतेषांतुआत्मामनःनातृप्यत्अलमिति
नामन्यत १२

329
1981

सतींश्रेष्ठां व्यादायप्रसार्यकारणंदत्वेत्यर्थः लघ्वींमिताक्षरां गुरुभिरर्थैर्गह्वरां दुःप्रवेशांअगाधामभिप्रायतःगभीरा
मर्थतः विगात्यविचार्यापिकिमस्मानभिनंदतीतिनिंदतिवा अस्मत्कृतंदंडंवासेकोचयतीतिनविदुः १२ ततश्चाभिनंदतीतिज्ञा
त्वातेप्रहृष्टाः संतः प्रोचुः क्षुभितारोमांचितात्वग्येषां कूपितेतिपाठेसंजातरोमकूपोत्थरोमांचितत्वमेवोक्तं आरब्धः आ
विष्कृतः पारमेष्ठ्यस्यपरमैश्वर्यस्य महोदयः परमोत्कर्षोयेनतं अधिराजत्वमविष्कृत्यराजशिक्षार्थंब्राह्मणान्मानयती
तिज्ञात्वेत्यर्थः १४ अभक्षः सर्वेश्वरःसन्तद्वीत्यात्मकृतंमन्यतइति उक्तामयापराधःकृतइति तथातदनुग्रहोमेइत्यादिवच

सतींव्यादायशृण्वंतोलघ्वींगुर्वर्थगह्वरां विगात्यागाधगंभीरांनविदुस्तच्चिकीर्षितं १३ तेयोगमाययारब्धपा
रमेष्ठ्यमहोदयं प्रोचुः प्रांजलयोविप्राप्रहृष्टाःक्षुभितत्वचः १४ ऋषयऊचुः नवयंभगवन्विद्मतवदेवचिकीर्षितं
कृतोमेनुग्रहश्चेतियदध्यक्षप्रभाषसे १५ ब्रह्मण्यस्यपरंदैवंब्राह्मणाःकिलतेप्रभो विप्राणांदेवदेवानांभगवाना
त्मदैवतं १६ त्वत्तःसनातनोधर्मोरक्ष्यतेतनुभिस्तव धर्मस्यपरमोगुह्योनिर्विकल्पोभवान्मतः १७ तरंतिह्यंजसामृत्युं
निवृत्तायदनुग्रहात् योगिनःसभवान्किंस्विदनुगृह्येतयत्परैः १८ स्वितुनकिंचिदित्यर्थः १८ वासुदेव

नेनममानुग्रहश्चेतियत्प्रभाषसेतेनयच्चिकीर्षितंतन्नविद्मः १५ किलेतिलोकशिक्षार्थंसूचितंपरमार्थमाहुः विप्राणामिति
देवदेवानांदेवपूज्यानामपिभगवान्त्वंआत्माचदैवतंच १६ लोकशिक्षार्थंताप्रपंचयंतइत्यष्टभिः धर्मस्त्वत्तएवभवतिरक्ष्यतेचत
वतारैः परमः फलरूपः अतएवगुह्यःगोप्यः नचस्वर्गादिफलवद्विकारीकिंतुनिर्विकारोमतः अतएवंभूतस्यतवेदंलोकशिक्षामात्र
मितिभावः १७ विपरीतंचेदमित्याहुःतरंतीतियस्यानुग्रहादेवनिवृत्ताःविरक्तायोगिनश्चसंतोमृत्युंतरंतिसभवान् परैरनुगृह्येतेतिकिं

भा० यच्चोक्तं यत्सेवया चरणपद्मपवित्ररेणुंसद्यः क्षताखिलमलं प्रतिलब्धशीलमित्यादि तदत्यंतमसंभावितमित्याहुः द्वाभ्यां यं वै वि टी०
५५ भूतिलक्ष्मीः अनुवेलं अवसरे वसरे उपयाति सेवते धृतः पादरेणुर्यस्याः धन्यैः सुकृतिभिः रर्पितं अंघ्रौ तुलस्या नवं दाममाला नद्धाम
स्थानं यस्य तस्य मधुव्रतपतेः भ्रमरमुख्यस्य लोकं स्थानमंघ्रिं कामयमानेव १९ विविक्तचरितैः विशुद्धैः परिचरणैः अनुवर्त्तमानां मे
वमानामपियोन्मत्याद्रियत् नात्याद्रीतवान् स एवंभूतस्त्वं अयं भावः इत्थं नामातिलंपटतया लक्ष्मीस्त्वां सेवते कथं एवं हि सामेन
अयं हि सारग्राही मधुव्रतः चंचलश्च स चांघ्रिगतायां तुलस्यां सपरिवारो निश्चलः सन् रमते अतो लावण्यमत्यधिकं स्यात् ततो
हं वक्षसि स्थितापि योगिजनादिवत् सेवकमंगीकृत्यापि तुलस्यास्सहसापत्न्येनापि च चरणौ सेविष्यामीति तदेवमत्सौत्कंठ्येनानुव
र्तमानामपितां त्वं नातीवाद्रियसे यतः परमभागवतेष्वेव प्रकृष्टसंगवान् स एव परमसौभाग्यविधिस्त्वं अतो ब्राह्मणप्रसादात् मां श्रीर्न
विजहातीति अलभ्यलाभत्वेन निर्देशोनसमंजस इति किंच त्वत एव भागभाजनः भजनीयानां गुणानामाश्रयः परमशुरश्च तं त्वां

यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामया
ना १९ यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसंगः स त्वं द्विजानुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाजन
स्त्वं २० धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थं नूनं भृतं तदभिघातरजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य २१

द्विजानामनुपंथ पथि लग्नं यत् पुण्यरजः तया श्रीवत्सलक्ष्म च किं पुनीतः पवित्रीकृतः किं किमर्थं वा तेउ भेअगाः प्राप्तः भूषणत्वेन स्वीकृ
तवानसि अतो यत्सेवया चरणपद्मपवित्ररेणुमित्यादिवचनं लोकसंग्रहमात्रमित्यर्थः २० धर्ममूर्तश्च तदेतमुचितमेवेत्याहुः धर्मस्येति त्रि श्रीः
भिः त्रिधेन युगे ध्याविर्भावइति त्रियुगः यद्वा त्रीणि युगुलानि त्रियुगाः षड्गुणाः भगवच्छब्दवाच्याः सत्यस्येति त्रियुगः हे त्रियुगधर्मस्वप
स्य तव त्रिभिः पद्भिः स्वैरसाधारणैः तपः शौचदयादिभिः सत्यस्य धर्मविप्लवेपि कलावनुवर्त्तमानत्वात् त्रिभिरित्युक्तं भृतं पालितं किं कृत्वा ५५
नोस्माकं वरदया सत्त्वेन तनुवा तन्वा सत्त्वमूर्त्या तदभिघाति तेषां पादानामभिघातकं रजस्तमश्च निरस्य निराकृत्य द्विजानां
देवतानां च प्रयोजनाय नूनं धृतं यद्वा हि लोपे रूपं निरस्येति अस्माकं तन्निवर्त्तयेत्यर्थः २१ श्रीकृष्णाय नमः गोविंदाय नमः

331/1921

आत्मगोपं त्वयैव रक्षणीयं द्विजोत्तमानां कुलं यदि हस्फुटं त्वं न गोप्ता न रक्षिता तत् प्रत्ययांतत्वात् न षष्ठीप्रयोगः वृषः श्रे
ष्ठः हे देव पंथा वेदमार्गो नश्यंति नाशं यास्य ऋषभस्य श्रेष्ठस्य हि यस्मात् तत् अनेन लोकस्तदनुवर्त्तत इति २२ नश्यतीति चेत्त
त्राहुः तत् वेदमार्गनाशनं इवेति लोकोक्तिः सत्त्वनिधित्वाज्जनाय क्षेमं शं विधातुमिच्छोः अत एव निजशक्तिभिराजादिभिरुत्पा
टितधर्मप्रतिपक्षस्य अतस्तव ब्रह्मकुलेवनतिर्युक्तैव ननु महतोन्येष्ववनतिस्तेजोहानि करीतत्राहुः एतावतानु धर्मत्राणप्रयोजनेन

न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोग्रहीष्यदृ
षभस्य हि तत्प्रमाणं २२ तत्ते न भीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः नैतावता त्र्यधिपते र्वत
विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स तो विनोदः २३ यं वानयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकं अ
स्मासु वा य उचितो ध्रियतां स दंडो येनागसो वयमयुंक्ष्महि किल्बिषेण २४ श्रीभगवानुवाच एतौ सुरेतरगतिं प्रतिपद्य सद्यः
संरंभसंभृतसमाध्यनुबद्धयोगौ भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवैत विप्राः २५ श्रीगोपाल

अवनतस्य नमनं कृतवतस्तव तेजस्वभावः न क्षतं न क्षीणं यतः सः नमनादिस्ते विनोदः शापाग्रहं परित्यज्य विज्ञापयंति यं वान्यं दंडं
विधास्यसि भावान् वृत्तिं तु दधिकं जीविकां वा तत्सर्वमनुमन्यामहे येवयं निरपराधो वेनौ किल्बिषेण मापेनायुक्ष्महियोजितमंतः
२४ मत्कारित्वाच्छापस्य युष्माकं वापराध इत्याश्वासयन्नाह एतौ सद्य एवासुयोनिं प्राप्य भूयोप्याशु मत्समीपमागमिष्यतः संरंभेण क्रोधावेशे
न संभृतः संवृद्धोयः समाधिः एकाग्रता तेनानुबद्धो दृढीकृतो योगो ययोस्ते हे विप्राः यो वः शापः युष्मत्कृतः शापः तद्दिनतः मयैव निर्मितः इत्यवैत
जानीत २५

भा० नेत्रोत्सवजनकं विकुंठहरिं तं निवासं च वैकुंठलोकं स्वयंप्रकाशं प्रकाशांतरानपेक्षः सत्वपरिणामत्वात् २६ अनुमा टी०
५६ न्य अनुज्ञाप्य २७ ममैव तु मतं संमतं इदमत्र तत्वं यद्यपि सनकादीनां क्रोधो न संभवति न च भगवत्पार्षदयो ब्राह्मणप्राति
कूल्यं न च भगवतः सिसृक्षादिवत् कदाचित् युयुत्सा समजनि तदान्येषामल्पबलत्वात् स्वपार्षदानां तुल्यबलत्वेपि प्रतिप
क्षानुपपत्तेः एतावेव ब्रह्मण्यानिवारणे प्रवर्त्य तेषु च क्रोधमुद्दीपयत्स्ताथ्यव्याजेन प्रतिपक्षो निधाय युद्धकौतुकं संपादनीय

ब्रह्मोवाच अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभं २६ भगवंतं परिक्रम्य प्रणि
पत्यानुमान्य च प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियं २७ भगवाननुगावाहयातं मा भैष्टं मस्तु शं ब्रह्मतेजः सम
र्थोपि हंतुं नेच्छे मतं तु मे २८ एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा पुरापवारिता द्वारि विशंती मय्युपारते २९ मयि संरंभयो
गेन निस्तीर्य ब्रह्महेलनं प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ३० द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणं
सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ३१ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः हतश्रियौ ब्रह्मशापादभू
तां विगतस्मयौ ३२ तदा विकुंठधिषणात्तयोर्निपतमानयोः हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ३३ तावेव ह्य
धुना प्राप्तौ पार्षदप्रवरौ हरेः दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ३४ तयोरसुरयोरद्य तेजसा यमयोर्हि वः आक्षिप्तं
तेज एतर्हि भगवांस्तद्विधित्सति ३५
मिति भागवते तेव्यवसितं अतः सर्वं सहिष्यति तदिदमुक्तं शापो मयैव निमित्त इति मा भैष्टमिति अस्तु शमिति हंतुं नेच्छे मतं तु मदस्या श्रीः
दिच्च २८ प्रत्येष्यथं तं प्रत्येष्यथ निकाशं समीपं २९ ३० दुस्तरात् ब्रह्मशापात् हरिलोकतः पततां विशेषः हरिलोकत एव हतश्रिया ५६
भूतामिति वा विगतस्मयौ नष्टगर्वौ च ३१ विकुंठस्य धिषणात् स्थानात् पुत्रहे कोदेवाः ३२ काश्यपं तेजो वीर्यं प्राप्तौ संहैव गर्भं प्रविष्टौ ३३
यमौ तयो स्तेजसा वस्तेज आक्षिप्तं तिरस्कृतं न चात्र प्रतिविधिः शक्यः यत एतर्हि इदानीं भगवानेव तदेवं विधातुमिच्छति ३४

333
1931

तथाप्युपायो विचार्यतामिति चेत्तत्राह विश्वस्येति त्रयाणां गुणानामीशः स एव सत्वोत्कर्षकाले नः क्षेमं विधास्यति विमृशेन
विमर्शेन ३५ इति श्रीतृतीये टीकायां षोडशोऽध्यायः १६ ततः सप्तदशे जन्म तयोर्लोकभयंकरं हिरण्याक्षप्रभावश्च वर्ण्यते दिग्ज
येद्भुतः १ क्षेमं विधास्यतीति ब्रह्मवचनानंतरं शंकयात्यक्ताः १ भर्तुरादेशात् लोकान् सपालान् त्रीन् चंडौ भृशं ताप्यिष्यत इति
वाक्यात् स्वापत्याभ्यां परिशंकनीयदेवोपद्रवं शंकमाना २ तत्र तदा निपेतुः उद्बभूवुः ३ अचलैः सहिताः भुवः प्रदेशाः केतवश्च उद

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदी
यविमृशेन कियानिहार्थः ३५ इति श्रीभागवते महापुराणे तृतीयस्कंधे षोडशोऽध्यायः १६ मैत्रेय उवाच निशम्यात्मभुवा
गीतं कारणं शंकयोज्झिताः ततः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः १ दितिस्तु भर्तुरादेशादपत्यपरिशंकिनी पूर्णे वर्षशते साध्वी
पुत्रौ प्रसुषुवे यमौ २ उत्पाता बहवस्तत्र निपेतुर्जायमानयोः दिवि भुव्यंतरिक्षे च लोकस्योरुभयावहाः ३ सहाचला भुवश्चे
लुर्दिशः सर्वाः प्रजज्वलुः सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ४ ववौ वायुः सुदुस्पर्शः फूत्कारानीरयन्मुहुः उन्मूलयन्न
गपतीन्वात्यानीको रजोध्वजः ५ उद्धसत्तडिदंभोदघटया नष्टभागणे व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदं ६ चुक्रोश
विमना वार्धिरुदूर्मिः क्षुभितोदरः सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः ७ मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः
निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ८
यंचक्रुरिति शेषः ४ फूत्कारणनिति तीव्रवायुशब्दानुकरणं नगपतीन् महावृक्षान् वात्या एव अनीकं यस्य रज एव ध्वजो यस्य ५ उद्धै
र्हसंत्य इव तडितो येषु तेषामंबुदानां घटया समूहेन नष्टो भागणः सूर्यादिप्रभासमूहो यस्मिन् पदं स्थानं न व्यादृश्यत स्म दृष्टदपि नादृश्य
त ६ वार्धिः समुद्रः विमना इव उद्धता ऊर्मयो यस्मात् क्षुभितात् उदरस्था मकरादयो यस्मिन् उदपानैर्वापीकूपादिभिः सहिताः शुष्काणि पंकजा
नि यासु ७ परिधयः परिवेशाः सराह्वोः राहुग्रस्तयोः निर्घाताः निरभ्रगर्जिता निरथनिर्ह्राद तुल्याः ध्वनयः विवरेभ्यः गिरिगुहाभ्यः ८

भा० श्रगालानामुलूकानांचटंकारैर्ध्वनिभिःसह ९ ग्रामसिंहाःश्वानः १० कर्कशैस्तीक्ष्णैः हेस्वनःस्वाकोगर्दजातिशब्दस्तस्मिन् त०
५७ रभसःसंभ्रमोयेषांवरूथशःसंघशः ११ रासभशब्दात्त्रस्ताः १२ सर्वतःक्रोशंतःगावोत्रसन् असृग्दोहाश्चबभूवुः देवलिंगा
निच्युदन् प्रतिमानांअश्रुस्रावआसीदित्यर्थः १३ पुण्यतमान् गुरुबुधादीन् भगणान्बकुनिनक्षत्राणिच अन्येक्रूरग्रहामंगला

अंतर्ग्रामेषुमुखतोवमंत्योवह्निमुल्बणं श्रगालोलूकटंकारैः प्रणेदुरशिवाःशिवाः ९ संगीतवद्रोदनवदुन्नमय्यशिरो
धरां व्यमुचन्विविधावाचोग्रामसिंहास्ततस्ततः १० खराश्चककर्शैःक्षत्तःखुरैर्घ्नंतोधरातलं स्वाकाररभसामत्ताः
पर्यधावन्वरूथशः ११ रुदंतोरासभत्रस्तानीडादुदपतन्खगाः घोषेरण्येचपशवःशकृन्मूत्रमकुर्वत १२ गावोत्रसन्नसृ
ग्दोहास्तोयदाःपूयवर्षिणाः व्यरुदन्देवलिंगानिद्रुमाःपेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्येभगणांश्चापिदीपिताः अ
तिचेरुर्वक्रगत्यायुयुधश्चपरस्परं १४ दृष्ट्वान्यांश्चमहोत्पातानतत्तत्वविदःप्रजाः ब्रह्मपुत्रानृतेभीतामेनिरेविश्वसं
प्लवं १५ तावादिदैत्यौसहसाव्यज्यमानात्मपौरुषौ ववृधातेश्मसारेणकायेनाद्रिपतीइव १६ दिविस्पृशौहेमकिरीटको
टिभिर्निरुद्धकाष्ठौस्फुरदंगदाभुजौ गांकंपयंतौचरणैःपदेपदेकट्यासुकांच्यार्कमतीत्यतस्थतुः १७ श्रीवासुदेव

द्यः अतिचेरुः अतिक्रम्यजग्मुः वक्रगत्या मत्या इत्या इत्युयुधश्च १४ ब्रह्मपुत्रान्नृतेर्विना तेषांस्वपाशादिज्ञाना श्रीः
त् १५ व्यज्यमानंआत्मपौरुषंपूर्वसिद्धंस्वपौरुषंययोः १६ निरुद्धाव्याप्ताःकाष्ठादिशोयाभ्यां स्फुरंत्यंगदानियेषुते ५७
भुजाययोः अंगदेतिचावंतत्वमार्षंशोभनाकांचीयस्यांतयाकट्या १७ केशव नारायण माधव गोविंद विष्णु मधुसूदन

335/1981

यमयोर्मध्येयःस्वदेहात्प्रथमजायततंयथाहिरण्यकशिपुंविदुः सादितिःप्रथमंयं असूयत तं हिरण्याक्षंयथाविदुः तथानामकृ
तवानित्यर्थःअयंभावः यदाहिगर्भाधानसमयेयोनिपुष्पंविशिदीर्यद्विधाविविक्तं आदिपश्चादावेन प्रविशतिनदायंमोभवतःतयो
श्चपित्ततःप्रवेशक्रमविपर्ययेणमात्ततःप्रसूतिःयदाविशेत् द्विधाभूतंबीजंपुष्पंपरिक्षरन् इतितदाभवतोगर्भौस्तनिर्वेशविपर्ययात्क्षितिपिंड

प्रजापतिर्नामतयोरकार्षीद्यःप्राक्स्वदेहाद्यमयोरजायत तंवैहिरण्यकशिपुंविदुःप्रजाःयंतंहिरण्याक्षमसूतसाग्रतः १८
चक्रेहिरण्यकशिपुर्दोर्भ्यांब्रह्मवरेणच वशेसपालाल्लोकांस्त्रीनकुतोमृत्युरुद्धतः १९ हिरण्याक्षोनुजस्तस्यप्रियःप्रीति
कृदन्वहं गदापाणिर्दिवंयातोयुयुत्सुर्मृगयन्रणं २० तंवीक्ष्यदुःसहजवरणत्कांचननूपुरं वैजयंत्यास्रजाजुष्टमंसन्यस्तमहा
गदं २१ मनोवीर्यमदोत्सिक्तमसृण्यमकुतोभयं भीतानिलिल्यिरेदेवास्तार्क्ष्यत्रस्ताइवाहयः २२ सवैतिरोहितान्दृष्ट्वामहसा
स्वेनदैत्यराट् सेंद्रान्देवगणान्क्षीबान्अपश्यन्व्यनरद्भृशं २३ ततोनिवृत्तःक्रीडिष्यन्गंभीरंभीमनिःस्वनं विजगाहेम
हासत्वोवार्धिंमत्तइवद्विपः २४ तस्मिन्प्रविष्टेवरुणस्यसैनिकायादोगणाःसन्निधियःससाध्वसाः अहन्यमानाअपित
स्यवर्चसाप्रधर्षितादूरतरंप्रदुद्रुवुः २५

सिद्धिस्मरणात् अनःस्वदेहात्पूर्वंयोजातस्तस्यहिरण्यकशिपुरिति दितेःप्रथमंप्रसूतस्यहिरण्याक्षइतिनामकृतवान् १८ दोर्भ्या
मुद्धतःब्रह्मवरेणाकुतोमृत्युः १९ रणंयुद्धं २० मनसाशौर्येणवीर्येणबलेन वरेणचउत्सिक्तंगर्वितं असृण्यंनिरंकुशं नि
लिल्यिरेलीनाबभूवुः २१ स्वेनसहसातेजसातिरोहितवान् २२ सदृष्ट्वातात्वाक्षीबान्मत्तान् क्षीबानितिपाठेपौरुषहीनान् २३
२४ सन्नोअवसन्नाधीर्येषां वर्चसातेजसाप्रधर्षिता अभिभूताःसंतः २५ वासुदेव गोविंद नारायण माधव श्रीः

महोर्मीन् अभिजघ्ने मोर्व्यामारयतीति मूर्वं कार्ष्ठाय संतन्मय्य यद्वा मूर्वी नाम तृणविशेषस्तन्मय रज्वा दृढनिबद्धयेत्यर्थः वि २०
भावरी संज्ञां आसेदिवान् प्राप्तः २६ अस्कराणां लोकः पातालं तत्पालकं प्रलब्धुं उपहसितुं प्रणिपत्य २७ यद्यस्मात् राजसूयेन
भवानयजत २८ उपशमं युद्धादिकौतुकादुपरमं २९ युद्धमार्गनिपुणं त्वां यस्तोषयिष्यति तमिहि गच्छ गृणते स्तुवंति ३० आ

सवर्षपूगानुदधौ महाबलश्चरन्महोर्मीन्श्वसनेरितान्मुहुः मोर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः
२६ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं स्मयं प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयु
गं २७ त्वं लोकपालोधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनां विजित्य लोके खिलदैत्यदानवान्यद्राजसूयेन
पुराजयत्प्रभो २८ स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः रोषं समुत्थं शमयन्स्वया धिया व्यचो
चदंगोपशमं गता वयं २९ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं आराधयिष्यत्यसुरर्षभेहि तं
मनस्विनो यं गृणते भवादृशाः ३० तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः यस्त्वद्विधानामसतां
प्रशांतये रूपाणि धत्ते सदनुग्रहेच्छया ३१ इति श्रीभागवते म॰ तृतीयस्कंधे हिरण्याक्षदिग्विजयो नाम सप्तदशोध्यायः
मैत्रेय उवाच तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः हरेर्विदित्वा गतिमंग नारदाद्रसातलं निर्विविशे

त्वरान्वितः १ दुर्मदः १

रात् शीघ्रं विस्मयः नष्टगर्वः वीरशये रणांगणे रूपाणि वराहाद्यवतारान् ३१ इति तृतीये टीकायां सप्तदशः १७ अष्टादशे हिरण्याक्ष
धरोद्धर्तवराहयोः निर्विशेषं महायुद्धं देवक्षोभि निरूप्यते १ प्रतियोद्धारं श्रुत्वा महामनाः शयिष्यास इति यदुक्तं तद्विगणय्य अगणयित्वा यतो

337/1981

अमितो जयतीत्यभिजित् तं श्रीहरिं प्रकर्षेणोर्ध्वं नीयमाना अवनिर्येन अग्रदंष्ट्रस्य दंष्ट्राग्रेणास्वरुचः हिरण्याक्षस्तेजां
अरुणश्रिया युक्तं यत् तेनाक्ष्णा नेत्रेण मुष्णंतं तिरस्कुर्वंतं अहोचित्रं वनगोचरो मृगः वारिचरो वराहः २ एहि आगच्छ र
सौकसां पातालवासिनां नोस्माकं समर्पिता अन्यथा पातालावतरणमस्थाने घटत इति भावः हिरण्याक्षेणाधिक्षेपा
र्थं प्रयुक्तापि भारती वस्तुतो भगवंतं स्तौतीति तथाहि वनगोचरः जलशायानः श्रीनारायणः स एव योगिभिर्मृग्यते दृष्टान्वा
हंतुं मृगपत इति मृगः अज्ञ नास्ति ज्ञो यस्मात् सर्वज्ञेत्यर्थः सुराधमा यस्मात् हे सुरोत्तम ममेक्षमाणस्यापि सतः मां अ
नादृत्यापि तमनया सहवर्तमानः नः अस्मदीयं स्वस्ति समस्तं मंगलं राज्यं यास्यसि प्राप्स्यसि नात्र संदेहः तथाप्यस्मत्कृपयावि

ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया मुष्णंतमक्ष्णा स्वरुचोरुणश्रिया जहास चाहो वनगोचरो
मृगः २ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादि
तसूकराकृते ३ त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान्परोक्षजित् त्वां योगमायाबलमल्पपौरुषं संस्थाप्य
मूढ प्रमृजे सुहृच्छुचः ४ राम्

मुंचेत्यर्थः आसादिता लीलया स्वीकृता सूकराकृतिर्येन ३ अभवाय नाशाय भृतः पुष्टः वस्तुतस्तु मोक्षाय भृतो धृतः आ
श्रित इत्यर्थः यो भवान् परोक्षेण चौर्येण जयतीति तथा वस्तुतस्तु दूरत एव स्थित्वा जयतीति संस्थाप्य हत्वा वस्तुतस्तु योग
मायारूपमचिंत्यं बलं यस्य अल्पं पौरुषं यस्मात् तं त्वां सम्यक् स्थापयित्वा भक्त्या हृदि स्थिरीकृत्येत्यर्थः हे मूढ प्रमूढान् प्राति
आप्यायतीति तथा प्राप्तृ प्रीताविति धातुः सुहृदां शुचः संसारदुःखानि मृजे नाशयामि यतस्त्वं स्मर्तुर्बांधवानपि मोचयतीति भावः ४

भा० न०
५९

असमद्भुजच्युतयापिगदयाअशीर्णशीर्षयस्य तथाभूतेत्वयिसुरवंस्थितेसतियेउभयमधुनाबलिंहरंतिनवीनाभक्तायेचपूर्वभक्ताः ऋषयोदेवाश्चतेसर्वेस्वयमेवउद्यमंविनैवअमूलानभविष्यंतिकिंतुदृढमूलाश्चभविष्यंतीत्यर्थः ५ सहीः
अरेःदुरुक्तान्येवतोमराःशस्त्रविशेषास्तैस्तुद्यमानोव्यथ्यमानःदंष्ट्राग्रगतांधरित्रींभीतामालक्ष्यतोदंदुरुक्तव्यथांमृषन्
सहमानएवनिर्गतः करेणुर्हस्तिनी वस्तुतस्तुअरिदुरुक्तिःअमरैर्निमित्तभूतैस्तुद्यमानः यथाम्रवार्थ्याहिणांब्रह्मादीनां
यथांदृष्ट्वाअनुकंपयापीड्यमानइत्यर्थः तोदंमृषन् इत्यस्याप्ययमेवार्थः ६ ननुमनुनास्वस्रष्टिमित्यर्थस्थलंयाचितेनब्रह्म
णानुज्ञातोभगवान्महींमुद्धर्तुंजलंप्रविष्टइतिपूर्वमुक्तंतत्पर्यालोचनयाहिरण्याक्षहिरण्यादीनांतदानीमसत्वात्कुतस्तेनधरोद्धु

त्वयिस्थितेगदयाशीर्णशीर्षण्यस्मद्भुजच्युतयायेचतुभ्यं बलिंहरंत्यृषयोयेचदेवाः स्वयंसर्वेनभविष्यंत्यमूलाः ५
सतुद्यमानोरिदुरुक्तितोमरैर्दंष्ट्राग्रगांगामुपलक्ष्यभीतां तोदंमृषन्निरगादंबुमध्यात्ग्राहाहतःसकरेणुर्यथेभः
६ तंनिःसरंतंसलिलादनुद्रुतोहिरण्यकेशोद्विरदंयथाझषः करालदंष्ट्रोशनिनिःस्वनोब्रवीगतह्रियांकिंत्वसतांविगर्हितं

रनुद्रवणादितिचेत् सत्यं तदानींतनमिदमनुद्रवणंनोच्यतएवकिंतुनदानीमुद्धृत्यस्थापितायाभुवःपुनःकदाचिदकस्मादु
द्धृतेनजलेनप्लावितायाभुवःपुनरुद्धरणार्थंप्रवृत्तस्यवराहस्यहिरण्याक्षेनेदमनुद्रवणंतेननविरोधःसलिलान्निर्गच्छंतम
नुगतःसन् हिरण्यवत्कपिशाःकेशायस्यदैत्यस्य झषोमकरःकरालादंष्ट्रायस्य अशनिवन्निस्वनोयस्य निर्लज्जानामसतां
किंविगर्हितमस्तिनिंदाभयाभावात्पलायनंनायुक्तमित्यर्थः वस्तुतस्तुगतह्रियःनसंतोयेभ्यः तेषांकृपालुनांकिंविगर्हितं न
किंचित्अतःकृपाकुलात्दंष्ट्राश्रितक्ष्मारक्षणार्थीकिंचित्पलायनमपिनानिंदितमित्यर्थःयद्वालोकोपकारायभुवमुद्धरतोनुद्रवणम
नुचितंमन्वानोदैत्यआत्मानमेवाधिक्षिपतिगतह्रियांस्वार्थैकपराणांअसतामस्माकंकिंविगर्हितमस्तिअपितुनास्त्येवधिगस्मा
निस्यब्रवीदित्यर्थः ७

सभगवान्विश्वसृजाभिष्टुतोविबुधैश्चप्रसूनैरापूर्यमाणःपाठांतरेविश्वसृजांप्रसूनैरभिष्टुत इति सलिलस्योदस्तात्उपरिव्य
वहारगोचरेदेशे गांविन्यस्यसत्वमाधारशक्तिंनिहितवान् अरेस्तस्यपश्यतएव ८ पराक्रष्टंतेनानुषक्तंलग्नं तपनीयोकल्पंसुवर्णा
भरणं कांचनमयंचित्रंदंशःकवचंयस्य तंदैत्यंप्रचंडमन्युत्वंअधिक्षेपादिकंचानुकरणमात्रंदैत्यवाक्यभीतानांदेवानांभयनिव
र्तये वस्तुतस्तेनतथानुक्तत्वेनकोपादिहेत्वभावात् ९ ग्रामसिंहात्श्वनःप्रतिमुक्तस्यबद्धस्याविकत्थनंश्लाघां १० न्यासहरानि

सगामुदस्तात्सलिलस्यगोचरेविन्यस्यतस्यामदधात्स्वसत्वं अभिष्टुतोविश्वसृजाप्रसूनैरापूर्यमाणोविबुधैःपश्यतोरेः
८ परानुषक्तंतपनीयोपकल्पंमहागदंकांचनचित्रदंशं मर्माण्यभीक्ष्णंप्रतुदंतदुरुक्तैःप्रचंडमन्युःप्रहसंस्तंबभाषे ९
श्रीभगवानुवाच सत्यंवयंभोवनगोचरान्मृगायुष्मद्विधान्मृगयेग्रामसिंहान् नमृत्युपाशैःप्रतिमुक्तस्यवीराविकत्थनंतव
गृह्णंत्यभद्र १० एवंवयंन्यासहरारसौकसांगतह्रियोगदयाद्रावितास्ते तिष्ठामहेथापिकथंचिदाजौस्थेयंक्वयामोबलिनोत्पा
द्यवैरं ११ त्वंपद्रथानांकिलयूथपाधिपोघटस्वनोस्वस्तयआश्वनूहः संस्थाप्यचास्मान्प्रमृजाश्रुस्वकानांयःस्वांप्रतिज्ञांना
तिपिपर्त्यसभ्यः १२ मैत्रेयउवाच सोधिक्षिप्तोभगवताप्रलब्धश्चरुषाभृशं आजहारोल्बणंक्रोधंक्रीड्यमानोहिराडिव १२

क्षेपहराःद्रविताःपलायनंकारिताः अथापि असमर्था अपितिष्ठामः तत्किंयतः स्थेयंस्थातव्यमेवास्माभिः तत्किमित्याह॥
क्यामः गंतव्यदेशाभावात् ११ पद्रथानांपदातीनांयेयूथपास्तेषां अधिपः मुख्यइत्यर्थः अस्वस्तयेपराभावार्थं आशु
घटस्वयतस्व अनुहोनिर्विनर्कः योनातिपिपर्तिनपूरयतीपालयतिवा असावसभ्यः सभायामनर्हः १२ सोधिक्षिप्तःसत्यंवय
मितिश्लोकेन रुषाप्रलब्धउपहसितश्च एतेवयमितिद्वाभ्यां क्रीडांकार्यमाणोहिराडिवमहासर्पइव १३ हेगोपालकृष्ण

श्रीः
५९

339
1981

मन्युनाप्रचलितानि क्षुभितानीन्द्रियाणि यस्य १४ अंतकं मृत्युं १५ सौम्य विदुर तां गदां अप्राप्तामेव अन्तहत् १७ हर्यक्षो हि टी०
रण्याक्षः स्पर्द्धिनोः स्पर्धमानयोः तिग्माभ्यां गदाभ्यां आहतान्यंगानि ययोः क्षतानि आस्रवतीति क्षतास्रवं रुधिरं तस्य घ्राणमव
घ्राणं तेन विवृद्धो मन्युर्ययोः विचित्रान् मार्गान् गदायुद्धभ्रमणभेदान् इडा गौः तस्यां निमित्तभूतायां शुष्मिणोर्मत्तयोर्वृषभयोः प्र
क्तेपि इडा पृथ्वी तदर्थं वृषभौ हिरवलु बहूनि दिनानि संग्रामितौ तुंगशृंगसंघर्षविदीर्णगलगलद्रुधिरौ परस्परोपमर्दव्यग्रौ ग्रसंरं

स्रजन्नमर्षितः श्वासान्मन्युप्रचलितेन्द्रियः आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिं १४ भगवांस्तु तदा वैरिविसृष्टं रिपुणोर
सि अवंचयत्तिरश्चीनो योगारूढ इवांतकं १५ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः अभ्यधावद्धरिः क्रुद्धः संरंभाद्द
ष्टदच्छदं १६ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदोहनत् १७ एवं गदाभ्यां गुर्वीभ्यां ह
र्यक्षो हरिरेव च जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः १८ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्ध
मन्व्योः विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिडायामिव शुष्मिणोर्मृधः १९ दैत्यस्य यज्ञावयवस्य मायया गृहीतवा
राहतनोर्महात्मनः कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् २० आसन्नशौंडीरमपेतसाध्वसं कृतप्र
तीकारमहार्यविक्रमं विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरं २१ श्रीब्रह्मोवाच एष ते देव
देवानामंघ्रिमूलमुपेयुषां विप्राणां सौरभेयाणां भूतानामप्यनागसां २२ वासुदेव माधव गोविंद नारायण राम श्री

भौ च मत्कारितगजयूथपौ उत्यमानौ निष्ठत इति प्रसिद्धं १९ यज्ञा एवावयवा यस्य तस्य मह्यां मही निमित्तं द्विषतोः २० आगत्य च ६०
नारायणमाह किं कृत्वा दैत्यं विलक्ष्य कथंभूतं असन्नप्रायं शौंडीरं शौर्यमदो वा येन अपेतं साध्वसं यस्मात् कृतः प्रतीकारो येन
अहार्यः अप्रतिकार्यो विक्रमो यस्य सहस्रणीः सहस्राणां ऋषिसहस्राणां नेता २१ हे देव ते अंघ्रिमूलं प्राप्तानां देवादीनां एषोऽसुरः २२

3417/1981

आगस्कृत् दृष्ट्यैवापराधारोपकः तत्परिहाराय प्रवृत्तो भयकृत् भीतं ज्ञात्वा दुःकृत् अर्थप्राणादिहर्ता अस्मत्तो रा
द्धो लब्धो वरो येन अन्वेषन् प्रतिरथमवलोकयन् अप्रतिरथः प्रतिपक्षशून्यः २३ यद्यस्मात् एवंभूतोयं तस्मादेवमक्री
डय हे देव यथा उत्थितं क्षुभितं आशीविषं सर्पं बालः पुच्छाकर्षणादिना क्रीडयति तद्वत् २४ स्वी आसुरीं हे देव स्वां मायां
आश्रय आपन्नरूपं २६ वेलाब्धेवाह एषेति लोकानां छंबट्कारी विनाशकारी छंबडि इत्यव्ययं विनाशे वर्तते २६ अभिजितमध्याह्नः

आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः अन्वेषयन्नप्रतिरथो लोकानटति कंटकः २३ मैनं मायाविनं दृ
प्तं निरंकुशमसत्तमं आक्रीड बालवद्देव यथाशीविषमुत्थितं २४ न यावदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः स्वां दे
व मायामास्थाय तावज्जह्यघमच्युत २५ एषा घोरतमा संध्या लोकच्छंबट्करी प्रभो उपसर्पति सर्वात्मन्सुराणां ज
यमावह २६ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरं २७ दिष्ट्या तं
विहितं मृत्युमयमासादितः स्वयं विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि २८ इति श्रीभाग० हिरण्याक्षवधेऽष्टाद
शोऽध्यायः १८ मैत्रेय उवाच अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत् १
ततः सपत्नं मुखतश्चरंतमकुतोभयं जघानोत्पत्य गदया हनावसुरमक्षजः २

स एव मौहूर्तिको योगः सन्मुहूर्तः शुभदः कालः अगात् गतप्रायः अतो यावन्मुहूर्तशेषोस्ति तावदेव सुदुस्तरमेनं विस्तर जहि त्वं
मृत्युं त्वयैव शापानुग्रहकाले विहितं निर्मितं आसादितः प्राप्तः शर्मणि सुखे आधेहि स्थापय २८ इति टीकायामष्टादशः १८ ऊनविंशे
विंशो विरिंच्यादिप्रार्थितेन महामृधे वाराहेण हिरण्याक्षवधः श्लाघ्यानुवर्ण्यते १ निर्व्यलीकं च तदमृतं च पाठांतरे निष्कपटमभि
प्रायं च तत्कृतं च कालात्मनोपि मम मुहूर्तबलमुपदिशतीति प्रहस्य अपांगावलोकनेन स्वीकृतवान् १ मुखतः अभिमुखे हनौ
कपोलस्याधोभागे अक्षजः ब्रह्मणो घ्राणेन्द्रियादाविर्भूतः २ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

भा० टी०

६१

स्वास्वगदयातेन हतात्तोविहता विच्युतासतीविघूर्णिताभूत्वापतत्रेजेच ततभगवत्करात्पतनंयद्वातत्पदस्यावस्यारेजइ
सनेनापिसंबंधः ततदैत्यपौरुषंरेजेइति ३ लब्धतीर्थोलब्धावसरः सचनवबाधेनप्राहरत् समानयन् बभूवेतिवाक्यभे
दात्सइत्यस्यापौनरुक्त्यं ४ ५ व्यग्रससंभ्रमंचक्रंयस्यविषज्जमानंविशेषेणसंगंप्राप्नुवंतंप्रति अतद्विदांतत्प्रभावमज्ञा
नतां आसमंतादासनस्म ६ सहेत्यस्तमात्तचक्रंनिशाम्यरष्ट्वा अग्रतोव्यवस्थितंचविलोक्य अमर्षेणक्रोधेनपरिप्लुतानि

सहतातेनगदयाविहताभगवत्करात् विघूर्णितापतद्रेजेतदद्भुतमिवाभवत् ३ सतदालब्धतीर्थोपिनबबाधेनिरायुधंमा
नयन्समृधेधर्मंविष्वक्सेनंप्रकोपयन् ४ गदयामपविद्धायांहाहाकारेविनिर्गते मानयामासतद्धर्मंसुनाभंचास्मरद्वि
भुः ५ तंव्यग्रचक्रंदितिपुत्राधमेनस्वपार्षदमुख्येनविषज्जमानं चित्राषाचोतद्विदांखेचराणांतत्रास्मासन्स्वस्तितेमुंज
हीति ६ सतंनिशम्यात्तरथांगमग्रतोव्यवस्थितंपद्मपलाशलोचनं विलोक्यचामर्षपरिप्लुतेंद्रियोरुषास्वदंतच्छदमादश
च्छ्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव अभिप्लुत्यस्वगदयाहतोसीत्याहनद्धरिं ८ पदासव्येनतांसाधोभग
वान्यज्ञसूकरः लीलयामिषतःशत्रोःप्राहरद्वातरंहसं ९ आहचायुधमाधत्स्वघटस्वत्वंजिगीषसि इत्युक्तःसतयाभ्र
यस्ताडयन्व्यनदद्भृशं १० तांसआपततींवीक्ष्यभगवान्समवस्थितः जग्राहलीलयाप्राप्तांगरुत्मानिवपन्नगीं ११ स्वपौरुषे
प्रतिहतेहतमानोमहासुरः नैच्छद्गदांदीयमानांहरिणाविगतप्रभः १२ जग्राहत्रिशिखंशूलंज्वलज्ज्वलनलोलुपं यज्ञायधृतरूपा
यविप्रायाभिचरन्यथा १३

प्लुतानींद्रियाणियस्यसः आदशन् दृष्टवान् चक्षुर्भ्यांदहन्निवसंचक्षाणःपश्यन्इवेति वस्तुतःक्रोधभावमाह हतोसिहतोसीति
वास्तवोर्थः ८ वातरंहसंवायुवेगांघटस्वउद्यमंकुरुयतस्त्वंजेतुमिच्छसि १० ११ हतोमानोगर्वोयस्य १२ ज्वलन् ज्वलनः तद्वल्लोलुपंग्रसन
व्यग्रं यज्ञायविष्णुमालक्ष्य अकार्यकरत्वेदृष्टांतः विप्रमुद्दिश्याभिचारंकुर्वन्यथा १३ वासुदेव नारायण गोविंद

श्री

६१

3437
1981

3413
1981

अंतःखेंआकाशमध्येचकासत् प्राकाशमानंउदीर्णाउत्कटादीधितिर्दीप्तिर्यस्य निशाततनेमिनानिशितधारेण हरिरं
डोयथातार्क्ष्यस्यपतत्रमुज्झितंचिच्छेदेव देवान्विनिर्जित्यअमृतकलशंनयतागरुडेनेंद्रप्रयुक्तवज्रस्यामोघस्यमानंदातुंपि
च्छमेकंत्यक्तंतत्यथाइंद्रश्चिच्छेदछिन्नंचतत् यथाखेप्रकाशत् तद्वत्प्रकाशमानमित्यभिसंबंधः १४ अराःसंत्यस्येति अरि
च क्रं तेनबहुधारक्योछिन्नेसति प्रत्येत्यअभिमुखमागत्य हरेःउरः वक्षःप्रहृत्य १५ मनाक्ईषदपिक्वाप्यंशे १६ अस्यजग

तदोजसादैत्यमहाभटार्पितंचकासदंतःखउदीर्णदीधिति चक्रेणचिच्छेदनिशातनेमिनाहरिर्यथातार्क्ष्यपतत्रमुज्झितं १४
वृक्णेस्वशूलेबहुधारिणाहरेःप्रत्येत्यविस्तीर्णमुरोविभूतिमत् प्रवृद्धरोषःसकठोरमुष्टिनानदन्प्रहृत्यांतरधीयता
सुरः १५ तेनेत्थमाहतःक्षत्तर्भगवानादिसूकरः नाकंपतमनाक्क्वापिस्रजाहतइवद्विपः १६ अथोरुधासृजन्मायांयोग
मायेश्वरेहरौ यांविलोक्यप्रजास्त्रस्तामेनिरेस्योपसंयमं १७ प्रववुर्वायवश्चंडास्तमःपांसवमैरयन् दिग्भ्योनिपेतुर्ग्रावा
णःक्षेपणःप्रहिताइव १८ द्यौर्नष्टभगणाभ्रौघैःसविद्युत्स्तनयित्नुभिः वर्षद्भिःपूयकेशासृग्विण्मूत्रास्थीनिवासकृत्
१९ गिरयःप्रत्यदृश्यंतनानायुधमुचोनघ दिग्वाससोयातुधान्यःशूलिन्योमुक्तमूर्धजाः २० बहुभिर्यक्षरक्षोभिःपत्त्यश्वर
थकुंजरैः आततायिभिरुत्सृष्टाहिंस्रावाचोतिवैशसाः २१ प्रादुष्कृतानांमायानामासुरीणांविनाशनं सुदर्शनास्त्रंभगवान्प्रायुं
क्तदयितंत्रिपात् २२

तःउपसंयमंप्रलयं १७ पांसुकृतंतमश्चप्रेरितवंतः क्षेपणेर्यंत्रैः १८ नष्टभगणोनक्षत्रसमूहोयस्याअनेनदैत्यबलातिरेकात्ब्रह्मदत्त
मुहूर्तातिक्रमोगम्यतेअह्निनक्षत्राणामसंभवात् १९ नानाविधानिमुंचंतीतितथायातुधान्येप्रतिदृश्यत २० हिंस्राःछिंधिभिंधी
त्येवंभूताःअतिवैशसाअत्युग्रावाचउत्सृष्टाइत्यत्रैववाक्यसमाप्तिः २१ प्रादुष्कृतानामितिप्रकटिताःमायाःविनाशयत् विनाश
नमितिपाठेयथा श्रुतेवषष्ठी त्रीणिसवनानिपादायस्य यज्ञमूर्तिरित्यर्थः त्रयोस्यपादाइतिश्रुतेः २२ गोपालराम

भर्त्तुरादेशंत्वत्पुत्रोभगवाहनिष्यतीत्येवंभूतं २३ उपगूहमानः बाह्वोरंतर्निधायसंघट्टयन् २४ अहनत् जघान त्वाष्ट्रंवृत्रंम
रुत्पतिरिंद्रः २५ परितोभ्रमत् गात्रंशरीरंयस्य उद्धृतेबहिर्निर्गतेलोचनेयस्य विशीर्णाबाह्वादयोयस्य नगेंद्रोमहाद्रुमः लुलितउ
न्मूलितः नभस्वतावायुना २६ संस्थितिंमृत्युं २७ असतः आरोपितात् लिंगशरीरात् भोक्तुमिच्छया वराहस्यपूर्वपादयोरेवक

नदादिते: समभवत्सहसा हृदिवेपथुः स्मरंत्याभर्त्तुरादेशंस्तनाच्चासृक्प्रसुस्रुवे २३ विनष्टासुखमायासुभूयश्चात्र
ज्यकेशवं रुषोपगूहमानोमुंददृशेवस्थितंबहिः २४ तंमुष्टिभिर्विनिघ्नंतंवज्रसारैरधोक्षजः करेणकर्णमूलेहनत्यथात्वाष्ट्रंमरुत्पतिः
२५ सआहतोविश्वसृजात्ववज्ञयापरिभ्रमद्गात्रउदस्तलोचनः विकीर्णबाह्वंघ्रिशिरोरुहोपतत्यथानगेंद्रोलुलितोनभस्वता २६
क्षितौशयानंतमकुंठवर्चसंकरालदंष्ट्रंपरिदष्टदच्छदं आजग्मुरावीक्ष्यशशंसुरागताअहोइमांकोनुलभेतसंस्थितिं २७ यंयोगिनो
योगसमाधिनारहोध्यायंतिलिंगादसतोमुमुक्षया तस्यैवदैत्यर्षभःपदाहतोमुखंप्रपश्यंस्तनुमुत्ससर्जह २८ एतौतौपार्षदावस्य
शापाद्यातावसद्गतिं पुनः कतिपयैःस्थानंप्रपत्स्येतेहजन्मभिः २९ श्रीदेवाऊचुः नमोनमस्तेखिलयज्ञतंतवेस्थितौगृ
हीतामलसत्वमूर्त्तये दिष्ट्याहतोयंजगतामरुंतुदःस्त्वत्पादभक्त्यावयमीशनिर्वृताः ३० मैत्रेयउवाच एवंहिरण्याक्षमस
ह्यविक्रमंससादयित्वाहरिरादिसूकरः जगामलोकंस्वमखंडितोत्सवंसमीडितः पुष्करविष्टरादिभिः ३१ मयायथानूक्तमवा
दितेहरेः कृतावतारस्यसुमित्रचेष्टितं यथाहिरण्याक्षउदारविक्रमोमहामृधेक्रीडनवन्निराकृतः ३२ रामकृष्णवासुदेव

रत्वात् करेणाहन्निति पादाहइतिवाविरुद्धं २८ २९ अखिलयज्ञानांतंतवेविस्ताराय कारणायेतिवा अरुंतुदः मर्मभेत्ता
३० सादयित्वाहत्वेत्यर्थः पुष्करविष्टरादिभिः ब्रह्मादिभिः संस्तुतः ३१ यथानूक्तंगुरुक्तिमनतिक्रम्यमयाअवादितवकथि
तं हेसुमित्रयथायेनप्रकारेण ३२ श्रीः ७ श्रीः ७ श्रीः ७ श्रीः ७ राम ७ वासुदेव ७ श्रीः ७

यथानूक्तंहेद्विजशौनक ३३ कथांउपश्रुत्य ३४ भक्तिमात्रेणपशूनामपिसुलभः अन्यथादेवानामपिदुर्लभइतितत्कथाश्रवणेक
स्यानंदोनस्यादित्याह् यइतिद्वाभ्यां ग्राहग्रस्तो गजः क्रोशंतीनांसतीनामितिकृपाकुलत्वमुक्तं संकटादमोचयत् ३५ कारणेनघृष्टिःसूकरणा
दिसूकरत्वस्य ३६ ३७ एतद्धरेर्विक्रीडितंशृण्वतां अंतेश्रीनारायणोगतिर्भवति महापुण्यंस्वर्गादिप्रदं अलंपवित्रं अतिशयेनशो

सूतउवाच इतिकौषारवाख्यातामाश्रुत्यभगवत्कथां क्षत्तानंदंपरंलेभेमहाभागवतोद्विज ३३ अन्येषांपुण्यश्लोका
नामुद्दामयशसांसतां उपश्रुत्यभवेन्मोदः श्रीवत्सांकस्यकिंपुनः ३४ योगजेंद्रंझषग्रस्तंध्यायंतंचरणांबुजं क्रोशंतीनां
करेणूनांकृच्छ्रतोमोचयद्द्रुतं ३५ तंसुखाराध्यमृजुभिरनन्यशरणैर्नृभिः कृतज्ञः कोनसेवेतदुराराध्यमसाधुभिः ३६
योवैहिरण्याक्षवधंमहाद्भुतंविक्रीडितंकारणसूकरात्मनः शृणोतिगायत्यनुमोदतेंजसाविमुच्यतेब्रह्मवधादपिद्विजाः ३७
एतन्महापुण्यमलंपवित्रंधन्यंयशस्यंपदमायुराशिषां प्राणेंद्रियाणांयुधिशौर्यवर्धनंनारायणोंतेगतिरंगशृण्वतां ३८
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेएकोनविंशोध्यायः १९ श्रीशौनकउवाच
महींप्रतिष्ठामध्यस्यसौतेस्वायंभुवोमनुः कान्यन्वतिष्ठद्द्वाराणिमार्गायावरजन्मनां १ वासुदेव श्रीगोपालकृष्णश्रीः

धकंधन्यंधनावहं यशस्यंकीर्तिकरं आयुषश्चाशिषांचपदंस्थानं परित्राणंवा प्राणानामिंद्रियाणांचपरं अंगविदुर ३८ इतितृतीयेएको
नविंशः १९ विंशेवराहजन्मादिव्यवधानाद्यथास्थितः सर्गानुस्मार्यतेवक्तुमन्वयंप्रस्तुतंमनाः १ प्रतिष्ठांस्थानंअध्यस्यप्राप्यसौतेसूतस्यरोमहर्षण
स्यपुत्र अवरं अर्वाचीनंजन्मयेषांतेषांईश्वरेलीनानांमार्गायनिर्गमायकानिद्वाराणिकृतवान् अर्वाचीनान्प्राणिनः कैरुपायैः सृष्टवानित्यर्थः १

विदुरमैत्रेयसंवादेनैवैतत्ज्ञास्यतइतितमेवसंवादंप्रष्टुमाह क्षत्तेतिपंचभिः श्रीकृष्णसुहृदत्वेहेतुः यइति दुर्योधनादिभिरप
त्यैः सहितमग्रजंधृतराष्ट्रं अपवान्कृतापराधइतिहेतोः श्रीकृष्णोक्तमंत्रानादरात् यः तत्याज २ अनवरः अन्यूनः महित्वेमहि
म्नि ३ कुशावर्त्तेगंगाद्वारे ४ यत्किमपिपृच्छतुकिंतवेतिचेत् तत्राह तयोरिति अघघ्नीः अघघ्नः नूनंकथाः प्रवृत्ताः ५ कीर्त

क्षत्तामहाभागवतः कृष्णस्यैकांतिकः सुहृत् यस्तत्याजाग्रजंकृष्णेसापत्यमघवानिति २ द्वैपायनादनवरोमहि
त्वेतस्यदेहजः सर्वात्मनाश्रितः कृष्णंतत्परांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयंविरजस्तीर्थसेवया उपगम्यकु
शावर्त्तआसीनंतत्त्ववित्तमं ४ तयोः संवदतोः सूतप्रवृत्ताह्यमलाः कथाः आपोगांगाइवाघघ्नीः हरेः पादांबुजा
श्रयाः ५ तानः कीर्तयभद्रंतेकीर्त्तन्योदारकर्मणः रसज्ञः कोनुतृप्येतहरिलीलामृतंपिबन् ६ एवमुग्रश्रवाः पृ
ष्टऋषिभिर्नैमिषायनैः भगवत्यर्पिताध्यात्मस्तानाहश्रूयतामिति ७ सूतउवाच हरेर्धृतः क्रोडतनोः स्वमाय
यानिशम्यगोरुद्धरणंरसातलात् लीलांहिरण्याक्षमवज्ञयाहतंसंजातहर्षोमुनिमाहभारतः ८ विदुरउवाच प्रजापति
पतिः सृष्ट्वाप्रजासर्गेप्रजापतीन् किमारभतमेब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ९ येमरीच्यादयोविप्रायस्तुस्वायंभुवोमनुः
तेवैब्रह्मणआदेशात्कथमेतदभावयन् १० सद्वितीयाः किमसृजन्स्वतंत्राउतकर्मसु अहोस्वित्संहताः संहताः सर्वइदंस्मस
मकल्पयत् ११

न्यानिकीर्तनार्हाणि उदाराणिकर्माणियस्यहरेः ६ एवमितिव्यासवाक्यं उग्रश्रवाः रोमहर्षणः नैमिषमयनमाश्रयोयेषांअर्पितमध्यात्मं
मनोयेन ७ गोरुद्धरणंलीलां हिरण्याक्षंचावज्ञयाहतंनिशम्यभारतोविदुरः ८ यस्मात्त्वमव्यक्तमार्गवित्ब्रह्मणोवाविशेषणं ९ एतत्जगत्
अभावयन् उत्पादयामासुः १० सद्वितीयाः सभार्याः स्वतंत्राभार्यानपेक्षाः कर्मसुप्रजासर्गादिषु संहताः परस्परापेक्षाः इदंजगत् ११

347
1981

किमारभतेतिप्रश्नस्ययक्षादीनसृष्टवान् इत्युत्तरंवक्तुंपूर्वोक्तांसृष्टिमनुस्मारयति देवेनेतिसप्तभिः मन्वादिप्रश्ना
नांतूत्तराध्यायमारभ्योत्तरंभविष्यति दुर्वितर्क्येणदेवेनजीवादृष्टेनपरेणप्रकृत्यधिष्ठात्रामहापुरुषेणअनिमिषेनकालेन
चहेतुना भगवतोनिर्विकारात्जातक्षोभंयद्गुणत्रयंप्रधानंतस्मात् महानासीत् तदुक्तंतंत्रे विष्णोस्तु त्रीणिरूपाणिपुरु
षाख्यान्यथोविदुः प्रथमंमहतः स्रष्टृद्वितीयंत्वंडसंस्थितं तृतीयंसर्वभूतस्थं तानिज्ञात्वाविमुच्यतइति १२ महतोजा
तोभूतादिरहंकारस्त्रिलिंगः त्रिगुणः रजः प्रधानादितिस्वतः सत्वप्रधानस्यापिमहतोहंकारोत्पत्तिकालेकार्यानुरूपंरजःप्र

श्रीमैत्रेयउवाच देवेनदुर्वितर्क्येणपरेणानिमिषेणच जातक्षोभात्भगवतोमहानासीद्गुणत्रयात् १२ रजः
प्रधानान्महतः त्रिलिंगोदैवचोदितात् जातः ससर्जभूतादिर्वियदादीनिपंचशः १३ तानिचैकैकशः स्रष्टुमस
मर्थानिभौतिकं संहत्यदैवयोगेनहेममंडमवासृजन् १४ सोशयिष्टाब्धिसलिलेआंडकोशेनिरात्मकः साग्रं
वैवर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्यनाभेरभूत्पद्मंसहस्रार्कोरुदीधिति सर्वजीवनिकायौकोयत्र
स्वयमभूत्स्वराट् १६ सोनुविष्टोभगवतायः शेतेसलिलाशये लोकसंस्थांयथापूर्वंनिर्ममेसंस्थयास्वया १७

धानत्वंभवतीतिभावः पंचशः तन्मात्राणिमहाभूतानिज्ञानेंद्रियाणिकर्मेंद्रियाणितत्तद्देवताश्चेतिपंचपंचससर्जेत्यर्थः १३
भौतिकंहैममंडमेकैकशः प्रत्येकंस्रष्टुमसमर्थानिसंतिसंहत्यससृजुः १४ अन्ववात्सीत् अधिष्ठितवान् १५ सहस्रार्कायामितो
रुदीधितिर्यस्यतत् सर्वजीवनिकायानामोकः स्थानंपद्मंस्वराट्ब्रह्मा १६ यः सलिलाशयेगर्भोदकस्यांतः शेतेतेनभग
वतानुविष्टोधिष्ठितः सतु सः स्वराट् संस्थायानामरूपादिक्रमेण १७ वासुदेव श्रीः ७ गोविंद श्रीः ७ माधव

च्छायाप्रभाप्रतियोगिनी तया अबुध्येत्यर्थः यस्त्वबुद्धिः कृतप्रमोरित्यक्तत्वात् महातमइति महामोहः स्वरूपनिर्देशमात्रविव
क्षया मोहइति प्रथमाप्रयोगः १८ तदेवं प्रथमोक्तांसृष्टिमनूद्यकेनचिद्विशेषणासाधारणांसृष्टिमाह विससर्जेत्यादिनावावत्समा
प्ति तद्विसृष्टंकायंत्रैपंरात्रितत एवजातानियक्षरक्षांसिजगृहुः क्षुत्तृषासमुद्भवोयस्यांता अत्रचयास्यसातनूरासीत् तामपोह
तत्यक्तवान् साताभिस्राभगदित्यादिश्रुतिरनुसंधेया १९ उपसृष्टाः अभिद्रुताः जग्धुंअत्तुं भक्षयितुंमतोवयंक्षुत्तृड्भ्यांमर्दिताः
अतएनंपितेतिकृपयामारक्षतेत्येके अन्येतुजक्षध्वंभक्षयतेतिब्रुवंतः जक्षभक्षहसनयोरिति धातुः २० देवोब्रह्मासंविग्नोभीतःस

ससर्जछायया विद्यांपंचपर्वाणमग्रतः तामिस्रमंधतामिस्रंतमोमोहोमहातमः १८ विससर्जात्मनःकायंनाभिनंदंस्त
मोमयं जगृहुर्यक्षरक्षांसि रात्रिंक्षुत्तृट्समुद्भवां १९ क्षुत्तृड्भ्यामुपसृष्टास्तेतंजग्धुमभिदुद्रुवुः मारक्षतैनंजक्षध्वमित्यू
चुः क्षुत्तृडर्दिताः २० देवस्तानाहसंविग्नोमामांजक्षतरक्षत अहोमेयक्षरक्षांसि प्रजायूयंबभूविथ २१ देवताप्रभया
पायादिव्यन्प्रमुखतोसृजत् तेआहार्षुर्देवयंतोविसृष्टांतांप्रभामहः २२ देवोदेवान्जघनतःसृजतिस्मातिलोलुपान्
तएनंलोलुपतयामैथुनायाभिपेदिरे २३ ताम्

न्मांमाभक्षयत किंतुरक्षत अहोहेरक्षरक्षांसियूयंमेप्रजाःसुताबभूविथजातास्थ एवमुग्रस्वभावायक्षराक्षसाजाता इत्यर्थः तत्रये
भक्षध्वमित्यूचुःतेयक्षाः येतुमारक्षतेतितेराक्षसाइतिज्ञेयं एतच्चतिर्यगादितामससर्गस्याप्युपलक्षणं २१ प्रभयादिव्यन्द्योतमा
नः यायादेवताद्युतिमत्यःसात्विक्यःतास्ताः प्रमुखतःप्राधान्येनासृजत् तेदेवाःदेवताइतिस्त्रीत्वेननिर्दिष्टानामप्यर्थमात्रविवक्षया
नइतिपुंस्त्वेनप्रतिनिर्देशः एवंयक्षरक्षांसित्यत्रापिज्ञेयं तेनविसृष्टांत्यक्तांप्रभाअहःदिवसरूपांसतींदेवयंतःक्रीडयंतः आहार्षु
र्जगृहुः २२ अदेवानितिछेदःसजघनादसुरानसृजतेतिश्रुतेः अतिलोलुपान् स्त्रीलंपटान् अभिपेदिरेप्राप्ताः २३ गोविंद

परापतत्पलायत २४ भक्तेच्छानुरूपमात्मानंदर्शयतीतितथातंउपव्रज्य २५ पाहीतिद्वाभ्यांप्रार्थितवान् पभितुंमैथुनेनध
र्षयितुं २६ लोकानांजीवानांत्वअनासन्नोअनाश्रितौपादौयैःतेषां २७ विविक्तंअसंदिग्धं अध्यात्मदर्शनं परचित्तज्ञातंयस्यहरेः
हरेघोरांकामकश्मलांस्वतनुंविमुंचेतिउक्तवानितिशेषः इत्युक्तश्चब्रह्मातांतनुंविमोच सर्वत्रतनुत्यागोनामतत्तन्मनोभावत्या
गोविवक्षितःग्रहणंचतत्तद्भावात्पत्तिरितिद्रष्टव्यं २८ साहोरात्रयोःसंधिरभवदितिश्रुतेः सातेनविसृष्टातनुःसायंतनीसंध्याब

ततोहसन्सभगवान्असुरैर्निरपत्रपैः अन्वीयमानस्तरसाक्रुद्धोभीतःपरापतत् २४ सउपव्रज्यवरदंप्रपन्नार्तिहरं
हरिं अनुग्रहायभक्तानामनुरूपात्मदर्शनं २५ पाहिमांपरमात्मंस्तेप्रेषणेनासृजंप्रजाः ताइमायभितुंपापाउपाक्रामंति
मांप्रभो २६ त्वमेकःकिललोकानांक्लिष्टानांक्लेशनाशनः त्वमेकःक्लेशदस्तेषामनासन्नपदांतव २७ सोवधार्यास्यकार्पण्यं
विविक्ताध्यात्मदर्शनं विमुंचात्मतनुंघोरामित्युक्तोविमुमोचह २८ तांक्वणच्चरणांभोजांमदविह्वललोचनां कांचीकला
पविलसद्दुकूलच्छन्नरोधसां २९ अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधरां सुनासांसुद्विजांस्निग्धहासलीलावलोक
नां ३० गुहंतींलीलयात्मानंनीलालकवरूथिनीं उपलभ्यासुराधर्मसर्वेसंमुमुहुःस्त्रियं ३१ गोपाल गोविंद माधव

भूव साचकामोद्रेकवेलाअसुराश्चहसत्वात्स्त्रीलंपटाः अतस्तांसंध्यामेवस्त्रियंकल्पयित्वातेसंमोहंप्राप्ताइत्याह तामिति त्रिभिः नू
पुराभ्यांक्वणंती चरणांभोजे यस्याःमदेनविह्वलेलोचनेयस्याः कांचीकलापेनविलसद्दुकूलंतेनाच्छन्नंरोधःकटितटंयस्याःतां २९ अन्यो
न्यश्लेषयाउपमर्दनहेतुना उत्तुंगौनिरंतरौपयोधरौयस्याः सुद्विजां सुदतीं स्निग्धहासोलीलावलोकनंचयस्याः ३० गुहंतींवस्त्रा
चलेनावण्वानां नीलानामलकानांवरूथःस्तोमोविद्यतेयस्याः हेधर्मतांस्त्रियमुपलभ्यमत्वा ३१ नारायणनारायणगोविंद

भा०

६५

सम्बुद्धानांविभावनाक्रममाह अहोइति २२ अभिसंभाव्यसत्कृत्य विश्रंभात् प्रणयात् कुतुहयस्तेतां पप्रछुः २३ कासीतित्रिभिः कासिजाता कस्यवाकन्या हेभामिनि कोपने रूपमेवद्रविणं अनर्घ्यं वस्तुत देवपण्यंक्रयार्हं तेनतत्समर्पणेनबाधसे २४ किंज्ञातिकुलादिप्रश्नेन यावाकाचिद्भव दिष्ट्यातावत् इदंभद्रंजातं यत्तवदर्शनं किंतुकेवलंनोमनोउत्कनोषि विमथ्नासि २५ क्षुभितचित्तानांवाक्यंहेशालिनिश्लाघ्ये एकत्रनजयतिनस्थिरीभवति पद्मानेकत्र अनेकगतिविलासेषुज टी०

अहोरूपमहोधैर्यमहोअस्यानवंवयः मध्येकामयमानानामकामेवविसर्पति २२ वितर्कयंतोबहुधातांसंध्यांप्रमदाकृतिं अभिसंभाव्यविश्रंभात्पर्यपृछन्कुमेधसः २३ कासिकस्यासिरंभोरु कोवार्थस्तेत्रभामिनि रूपद्रविणपण्येनदुर्भगान्नोविबाधसे २४ यावाकाचित्त्वमबलेदिष्ट्यासंदर्शनंतव उत्कनोवीक्ष्यमाणानांकंदुकक्रीडयामनः २५ नैकत्रतेजयतिशालिनिपादपद्मं घ्नंत्यामुहुःकरतलेनपतत्पतंगं मध्यंविषीदतिबृहत्स्तनभारभीतंशांतेवदृष्टिरमलासुशिखासमूहः २६ इतिसायंतनींसंध्यामसुराःप्रमदायतीं प्रलोभयंतींजगृहुर्मत्वामूढधियःस्त्रियं २७ प्रहस्यभावगंभीरंजिघ्रंत्यात्मानमात्मना कांत्याससर्जभगवान्गंधर्वाप्सरसांगणान् २८ तम्

यतिसर्वोत्कर्षेणवर्त्तते पतत्पतंगंउच्चलंतंकंदुकं बृहतोस्तनयोर्भाराद्भीतंतवकृशंमध्यंविषीदतिश्राम्यति शांतामंथरेवप्रसरति सुशिखासमूहः शोभनःकेशकलापस्ते पाठांतरेसुशिखाःशोभनान् केशानवकीर्यमाणान्समूहवधानेतिअत्रच अस्तंगच्छन् सूर्यएवपतत्पतंगः मेघविछेदोमध्यविषादः तारकारूपादृष्टिः तमएवकेशाइत्याद्यूह्यं २६ प्रमदेवाचरंतींश्रीयंमत्वाजगृहुः २७ प्रहस्यात्मानमात्मनाजिघ्रंत्यासौंदर्येण प्रहसनमात्मावघ्राणंचसौंदर्यानुभावःचातुर्यविचारः २८ गोविंद श्रीः

६५

357/1981

जोत्स्नांचंद्रिकारूपां तएवगंधर्वादिगंधर्वगणाः विश्वावसुःपुरोगमोमुख्योयेषु २९ आत्मनःस्तंद्रिणाअलस्येनतांश्चमुक्तकेशान्वीक्ष्यनेत्रेनिमीलितवान् ४० इंद्रियविक्लेदःश्रावोययातांनिद्रांप्रचक्षते ४१ यैर्नेद्रियविक्लेदेनहेतुनाउछिष्टांश्वसतःधर्षयंति भ्रांतान्कुर्वंतितंभूतादिगणंउन्मादंप्रचक्षते तंद्राजंभिकानिद्रोन्मादहेतुत्वेनभूतादीनांतनूनांचचतुर्विध्यमुक्तं ४१ उर्जस्वंतंबलवंतं परोक्षेणअदृश्यरूपेण ४२ आत्मनःसर्गोयस्मात्तंयत्त्येनकायेन

विससर्जतनुंतांवैजोत्स्नांकांतिमतींप्रियां तएवचाददुःप्रीत्याविश्वावसुपुरोगमाः २९ सृष्ट्वाभूतपिशाचांश्चभगवानात्मतंद्रिणा दिग्वाससोमुक्तकेशान्वीक्ष्यचामीलयाद्दृशौ ४० जगृहुस्तद्विसृष्टांतांजृंभणाख्यांतनुंप्रभोः निद्रामिंद्रियविक्लेदोमयाभूतेषुदृश्यते ४१ येनोछिष्टांधर्षयंतितानुन्मादंप्रचक्षते ४१ उर्जस्वंतंमन्यमानआत्मानंभगवानजः साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ४२ तंत्वात्मसर्गंतंकायंपितरःप्रतिपेदिरे साध्येभ्यश्चपितृभ्यश्चकवयोयद्वितन्वते ४३ सिद्धान्विद्याधरांश्चैवतिरोधानेनसोसृजत् तेभ्योददात्तमात्मानमंतर्धानाख्यमद्भुतं ४४ सकिन्नरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः मानयन्नात्मनात्मानमात्माभासंविलोकयन् ४५ तेतुतज्जगृहूरूपंत्यक्तंयत्परमेष्ठिना मिथुनीभूयगायंतस्तमेवोषसिकर्मभिः ४६

संप्रदानत्वनिमित्तेनकवयःकर्मकोविदाःसाध्येभ्यःपितृभ्यश्चस्वपितृरूपेभ्यःवितन्वतेश्राद्धादिनाहव्यंकव्यंचददति ४३ तिरोधानेन दृश्यत्वेसत्यप्यंतर्धानशक्त्या ४४ प्रत्यात्म्येनप्रतिबिंबेनआत्माभासंप्रतिबिंबंआत्मनात्मानोभानःप्रतिबिंबदर्शिनःसुंदरस्यशिरःकंपादिचेष्टाअतएवतत्स्रष्टानांमिथःसंमानेननित्यंमिथुनीभावः ४५ तत्प्रतिबिंबरूपंकर्मभिःतत्पराक्रमानुवर्णनैः ४६

भा०
६६

भोगअभोगोविस्तारः पदादिप्रसरणंतद्वतादेहेन अनुपचितवृद्धिमप्राप्तेतत्भोगक्रोधादियुक्तं ४७ अमुतअमुष्मात्देहात्
येकेशा अहीयंतंप्रच्युतास्तेहयोजाताः प्रसर्पतः पादाधाकुंचनैः प्रचलतोमुष्मात्सर्पाः अतएवअगानभवंतीतिनागाः
अतिवेगवंतइत्यर्थः भोगवतोजातत्वात्भोगेनफणेनउरुविस्तीर्णाकंधरायेषां सर्वेचतेक्रोधयोगात्क्रूराः तेषां अवांतरजाति
भेदः सर्पसिद्धांतेप्रसिद्धः ४८ यदामन्यमानोभूत्तदामनून्ससर्ज ४९ तेभ्यः स्वीयंपुरुषंपुरुषाकारंपुरंदेहं अत्यसृजत् दृष्टोना
न्मनून् ५० तेत्वयाकृतं सुकृतत्वमाहुः यस्मिन् मनुसर्गेक्रियाअग्निहोत्राद्याः अतोस्मिन् सर्वेवयं साकंसह अन्नंहविर्भागादि

देहेनवैभोगवताशयानोबहुचिंतया सर्गेनुपचितेक्रोधादुत्ससर्जहतद्वपुः ४७ येहियंतामुतःकेशाअहयस्तेंगजज्ञि
रे सर्पाः प्रसर्पतः क्रूरानागाभोगोरुकंधराः ४८ सआत्मानंमन्यमानः कृतकृत्यमिवात्मभूः तदामनून्ससर्जांतेमनसा
लोकभावनान् ४९ तेभ्यः सोत्यसृजत्स्वीयं परंपुरुषमात्मवान् तान्दृष्ट्वायेपुरासृष्टाः प्रशशंसुः प्रजापतिं ५० अहोएतज्ज
गत्स्रष्टः सुकृतंबततेकृतंप्रतिष्ठिताः क्रियायस्मिन्साकमन्नमदामहे ५१ तपसाविद्ययायुक्तोयोगेनसुसमाधिना ऋषी
न्ऋषिहृषीकेशः ससर्जाभिमताः प्रजाः ५२ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः यत्तत्समाधियोगर्द्धितपोवि
द्याविरक्तिमत् ५३ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविंशतितमोध्यायः २० श्रीकृष्णार्पणमस्तु

अदामभक्षयाम हेब्रह्मन् ५१ कार्यसृष्टिमुक्त्वा ऋषीणांसृष्टिमाह तपसेति विद्याउपासना योगो त्रासनादिः सुसमाधिः
वैराग्यैश्वर्यादियुक्तः समाधिः तेनचयुक्तः हृषिकेशः स्ववशेंद्रियः सन् ऋषिर्ब्रह्मा ऋषीन्प्रजाः ससर्ज ५२ किंतद्देहस्य
स्यांशमदादित्यतआह यदिति समाधिश्चयोगर्द्धिश्चतपश्चविद्याचविरक्तिश्चविद्यंतेयस्मिन्तत् ५३ इतितृतीयेटीका
यांविंशः २० एकविंशेतपोविद्यातोषितेनतुविष्णुना कर्दमस्यमुनेःपुत्र्याविवाहघटनोच्यते १ श्रीगोविंदराम

तृ०

श्रीः
६६

353
1981

एधीरे एधांचक्रिरे १ धर्मंमहींचयथाजुगुपतुः ररक्षतुः तन्मेवदेतितृतीयेनान्वयः २ ३ योगलक्षणेर्यमादिभिर्युक्तायां क
निधावीर्येससर्जकतिपुत्रानुत्पादयामासेत्यर्थः ४ मनोकन्यांआकूतिंप्रसूतिंचभार्यांलब्ध्वायथाभूतानिससर्जतच्चवदेतिचका
रस्यार्थः ५ सहस्राणांसमाद्दशदशसहस्राणिसंवत्सरानित्यर्थः ६ ततस्तस्मिंस्तपसिक्रियायोगेनप्रजाप्रकारेणसंप्रपेदेशिवेवे
प्रपेदेभ्योभक्तेभ्योवरदातारं ७ शब्देकवेद्यंयद्ब्रह्मतन्मयंवपुर्दधत्तंप्रत्यात्मानंदर्शयामास ८ सकर्दमस्तंरवेवस्थितंदृष्ट्वाभूर्भा

विदुरउवाच स्वायंभुवस्यचमनोर्वंशःपरमसंमतः कथ्यतांभगवन्यत्रमैथुनेनैधिरेप्रजाः १ प्रियव्रतोत्तानपदौसुतौ
स्वायंभुवस्यवै यथाधर्मंजुगुपतुः सप्तद्वीपवतींमहीं २ तस्यैवदुहिताब्रह्मन्देवहूतीतिविश्रुता पत्नीप्रजापतेरुक्ताक
र्दमस्यत्वयानघ ३ तस्यांसवैमहायोगीयुक्तायांयोगलक्षणैः ससर्जकतिधावीर्यंतन्मेशुश्रूषवेवद ४ रुचिर्योभगवान्
ब्रह्मन्दक्षोवाब्रह्मणःसुतः यथाससर्जभूतानिलब्ध्वाभार्यांचमानवीं ५ मैत्रेयउवाच प्रजाःसृजेतिभगवान्कर्दमोब्रह्म
णोदितः सरस्वत्यांतपस्तेपेसहस्राणांसमादश ६ ततःसमाधियुक्तेनक्रियायोगेनकर्दमः संप्रपेदेहरिंभक्त्याप्रपन्नवर
दाशुषं ७ तावत्प्रसन्नोभगवान्पुष्कराक्षः कृतेयुगे दर्शयामासतंक्षत्तः शाब्दंब्रह्मदधद्वपुः ८ सतंविरजमर्काभंसितपद्मोत्प
लस्रजं स्निग्धनीलालकव्रातवक्त्राब्जंविरजांबरं ९ किरीटिनंकुंडलिनंशंखचक्रगदाधरं श्वेतोत्पलक्रीडनकंमनस्पर्श
स्मितेक्षणं १० विन्यस्तचरणांभोजमंसदेशेगरुत्मतः दृष्ट्वाखेवस्थितंवक्षःश्रियंकौस्तुभकंधरं ११ श्रीगोपालकृष्ण

क्षितावपत् गीर्भिश्चाभ्यगृणात् इतिचतुर्णामन्वयः पद्मोत्पलेदिनरात्रिविकासे सितानांपद्मानां उत्पलानांचस्रक्यस्यतं
स्निग्धनीलाश्चयेअलकाः तेषांव्रातोवक्त्राब्जेयस्य ९ श्वेतोत्पलंक्रीडनकंयस्य मनःस्पर्शी मनस्यानंदजनकंस्मितमीक्षणं
चयस्यत १० वक्षसिश्रीर्यस्य कौस्तुभः कंधरायांयस्य ११ श्रीकृष्णाय वासुदेवाय नारायणाय माधवाय गोविंदाय

भा० ६७ प्रीतिरेवस्वभावः स्वतः सिद्धोधर्मोयस्यतथाविधआत्मामनोयस्य १२ त्वाम्रतेपरमाम्रेतंनंदंधिगन्यवरकामुकं अथापि न०
कृपणंमानुग्रहाणवरदानतः वर्तेतिहर्षे हेईड्यनोस्माभिः समग्रसत्वधिनिधेस्तवदर्शनात् अद्यअक्ष्णोः सासिद्धंसांकल्यंजुष्टंसे
वितं त्वद्दर्शनमेवमहाफलमित्युपपादयति यस्यतवदर्शनं सद्भिरुत्तरोत्तरसापादितप्रकर्षैर्जन्मभिः रूढयोगायेस्तेपि १३ सका
मभक्तान् विगर्हयन्नाह यइति हेईशयेनिरयेपिस्युः तेषांकामानांलवाययेत्वन्मायया नष्टबुद्धयस्ते एवोपासतेत्वंतुतेषांतान्
कामानपिरासिददासि १४ यःसकामान्निंदामिसोहमपितादृशएवेत्याह तथेति गृहमेधोगृहाश्रमः तत्रधेनुंत्रिवर्गदोग्ध्रींभा

जातहर्षोपतन्मूर्ध्नाक्षितौलब्धमनोरथः गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्माकृतांजलिः १२ ऋषिरुवाच जुष्टंवता
थाखिलसत्वराशेः संसिध्यमक्ष्णोस्तवदर्शनान्नः यद्दर्शनंजन्मभिरीड्यसद्भिराशासते योगिनोरूढयोगाः १३ येमा
ययातेहतमेधसस्त्वत्पदारविंदंभवसिंधुपोतं उपासतेकामलवायतेषांरासीसकामान्निरयेपियेस्युः १४ तथासचाहं
परिवोढुकामः समानशीलांगृहमेधधेनुं उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य १५ प्रजापतेस्तेव
चसाधीशतंत्यालोकः किलायंकामहतोनुबद्धः अहंचलोकानुगतोवहामि बलिंचशुक्लानिमिषायतुभ्यं १६ राम

र्यांपरिवोढुकामः परिणेतुमिच्छन् कामदुघांघ्रिपस्य कल्पद्रुमस्यतवमूलमघ्रिंउपेयिवान् उपगतोस्मि ननुकामाद्यर्थमन्यत्
किमप्युपास्यतांनयतः अशेषस्यपुरुषार्थस्यमूलंतदेव १५ ननुतर्हिमुक्त्यर्थमेवकिंनभजसि अनधिकारादित्याह हेधीश य श्री:
स्त्वंप्रजापतिस्तस्यतववचसातत्यात्अयंकामहतोलोकः पशुवद्बद्धः हेशुक्ल धर्ममूर्ते अहंचकिललोकानुगतः अतस्तुभ्यं ६७
बलिंवहामिहरामि कर्ममयींत्वदाज्ञामनुवर्त्ते अनिमिषायकालात्मने तदर्थंभार्यांचेच्छामीतिचकारस्यार्थः नकेवलंलो
कानुगतोवहामि किंतु ऋणत्रयापाकरणार्थमितिकिलेत्युक्तं १६ माधव गोपाल रामकृष्ण वासुदेव नारायण श्री:

355/1981

अनिमिषायेति अनेनकालात्मकात्त्वत्तो भीतः कर्मकरोमीत्युक्तं एतत्तुभयंत्वद्भक्तानांनास्तीत्याह द्वाभ्यांलोकान्
कामाभिभूतान्ताननुसृतान् पशूंश्चविवेकेसत्यपिपुनः कर्मजडान्मादृशान्हित्वाअनादृत्ययेनवचरणरूपमातपत्रंश्रि
ताः तानेवाह त्वद्गुणानांवादः कथातदेवसीधुसंसारविस्मारकत्वात् पीयूषंरुचिरकत्वात् तेननिर्यापिताविलापितादेहध
र्माः क्षुत्पिपासादयोयैः एषामित्युत्तरेणान्वयः १७ नवयत् त्रिनाभिकालंचक्रंतत् जगदाछिद्यआकृष्य धावदपिएषांत्वद्भक्ता
नामायुराछिद्य धावन्नभवति कथंभूतंअजरं ब्रह्मतस्मिन् अक्षरूपेभ्रमिः भ्रमणंभ्रमदितिवक्तव्येअतिभ्रमणशीलत्वातउप

लोकांश्चलोकानुगतान्पशूंश्चहित्वाश्रितास्तेचरणातपत्रं परस्परंत्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः १७
नतेजराक्षभ्रमिरायुरेषांत्रयोदशारंत्रिशतंषष्टिपर्व षण्नेम्यनंतछदियत्त्रिनाभि करालस्रोतोजगदाछिद्यधावत्
१८ एकः स्वयंसन्जगतःसिसृक्षयाद्वितीययात्मन्नधियोगमायया सृजस्यदःपासिपुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवा
न्स्वशक्तिभिः १९ राम

उपचारेणभ्रमिरित्यभेदनिर्देशः अधिकमासेनसहत्रयोदशमासाआरायस्य त्रिशतंषष्टिश्चाहोरात्राः पर्वाणियस्य शतशब्देवि
भक्तेरलुगार्षः षडृतवोनेमयोयस्य अनंताः क्षणलवादयः छदाः पत्राणिपत्राकाराधाराः संतियस्यत्रीणिचातुर्मास्यानिनाभ
यः आधारभूतानिवलयानियस्य करालस्रोतः तीव्रवेगं एतैर्विशेषणैरेवसंवत्सरात्मंचक्रंउक्तमितिद्रष्टव्यं १८ ननुनिरुपा
पाधिमुदासीनंमांकिंयाचसे तथापिमायया विश्वसृष्ट्यादिकर्तृत्वात्त्वमेवयाच्य इत्याह स्वयमेकएवसन्नपिआत्मन्यधिकृ
तयायोगमाययाहेतुनायाः स्वीकृताः शक्तयः सत्वाद्याः ताभिः अदोविश्वंस्वव्यतिरिक्तसाधनानपेक्षत्वेदृष्टांतः यथेति १९

भा० यद्यपि मायिकत्वाद्भक्तेभ्यो विषयसुखं दातुं नेच्छसि तथाप्यस्मदभिप्रायानुसारेण तत्संपादयेत्याह नैतदिति हे अधी
६८ शनोस्माकं भजतां भ्रूतस्त्वन्मद्रूपंपदंशब्दादिविषसुखं माययानतुषे विस्तारसीति यत् एतत् तवयद्यपीप्सितं नभवति
तथाप्यस्मदनुग्रहायास्तु ऋणत्रयापाकरणानंतरमेवापवर्गायभवत्वित्यर्थः अर्हि यतः माययापरिछिन्नइवलसंत्यातुल
स्यायुक्तस्त्वं विलक्षितोसि एवंभूतस्य तवदर्शनं यतो भुक्तिमुक्तिप्रदत्वमित्यर्थः २० तंत्वात्वां भुक्तिमुक्तिप्रदं नमामि भुक्ति
दत्वेहेतुः अनुभूत्यात्मज्ञानेन उपरतः क्रियार्थः कर्मफलभोगोयस्मिन् भोगदत्वेहेतुः स्वमायया आवर्तितं लोकतंत्रं विश्वं येन
तृ०

नैतद्बताधीशपदं तवेप्सितं यन्माययानस्तनुषे भूतसूक्ष्मं अनुग्रहायास्त्वपि यर्हि माययालसत्तुलस्यातनु
वाविलक्षितः २० तंत्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रं नमाम्यभीक्ष्णं नमनीयपादसरोज
मल्पीयसि कामवर्षं २१ मैत्रेयउवाच इत्यव्यलीकं प्रणुतोऽब्जनाभस्तमाबभाषे वचसामृतेन सुपर्णपक्षोपरि
रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२ श्रीभगवानुवाच विदित्वा तव चैत्यं मे पुरैव समयोजि तत् यदर्थमा
त्मनियमैस्त्वयैवाहं समर्चितः २३ नवैजात्वमृषैव स्यात्प्रजाध्यक्ष मदर्हणं भवद्विधेष्वतितरां मयि संगृभितात्मनां
२४ प्रजापतिसुतः सम्राट्मनुर्विख्यातमंगलः ब्रह्मावर्तं योधिवसन् शास्ति सप्तार्णवां महीं २५

पंकरणं येन अतः सकामैश्च नमनीयं पादसरोजयुगं यस्य तं तत्र अल्पीयसि सकामे पुंसि भजने वा कामान्वर्षतीति तथा तं श्रीः
२१ अमृतेन सुखकरेण प्रेमस्मिताभ्यामीक्षणेन विभ्रमंती भ्रूर्यस्य २२ चैत्यं हार्दभावं मे मया समयोजि संघटितं मदर्थमेवहं
समर्चितः तत् २३ मयि संगृभितः संगृहीतः एकाग्रीकृतआत्मा चित्तं यैस्तेषां यन्मदर्हणं तादृशेषु अतितरां सर्वथामृषा निः ६८
फलं न स्यात् २४ विख्यातं मंगलं अभ्युदयं सदाचारादिलक्षणं यस्य २५ श्रीः ७ श्रीः ७ श्रीः ७ श्रीः श्रीमाधव

357/1981

हे विप्र महिष्यासह २६ मध्येत्रयस्यां भार्यायां समाहितं अभिसंधानि स्थितं नृपवधूराजकन्या २८ तेवीर्यं आत्मनि भृतं
धृतं तया प्रसविष्यति सा भजिष्यति वीर्येवीर्यं प्रसूता सुकन्यासु अंजसा आत्मनः पुत्राना धास्यंति २९ निदेशमाज्ञां उत्तमश्लोक
सत्वः तीर्थं प्राप्तं तेन दानं लक्ष्यते मयि समर्पित सर्वकर्मफल इत्यर्थः ३० गार्हस्थ्येदयां कृत्वा सन्यासेनाभयं दत्वा मयि आत्मानं ज
गच्च सह एकीभूतं द्रक्ष्यसि ३१ त्वद्वीर्येण सह देवहूत्यां अवतीर्येति शेषः ३२ प्रत्यक्भूतेषु क्षत्रेषु जायते आविर्भवतीति प्रत्यगक्ष
जः सरस्वत्या नद्या परिश्रितात् परिवेष्टितात् ३३ अशेषैस्तपो मंत्रादिसिद्धेश्वरैः अभिष्टुतः सिद्धमार्गः वैकुंठमार्गो यस्य यद्वा

सवेह विप्रराजर्षिर्महिष्या शतरूपया आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः २६ आत्मजामसितापांगीं वयःशील
गुणान्वितां मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो २७ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् सात्वां ब्रह्मन्नृपवधूः काममाशु भ
जिष्यति २८ यात आत्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीय ऋषय आधास्यंत्यंजसात्मनः २९ त्वं च सम्यगनुष्ठाय निदेशं
मउशत्तमः मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यते ३० कृत्वा दयां च जीवेषु दत्वा चाभयमात्मवान् मय्यात्मानं सह जगद्
द्रक्ष्यस्यात्मनि चापि मां ३१ सहाहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्वसंहितां ३२ मैत्रेय उवाच एवं
तमनुभाष्याथ भगवान्प्रत्यगक्षजः जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ३३ निरीक्षितस्तस्य यथा नशेषसिद्धेश्वराभिष्टु
तसिद्धमार्गः आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसाम ३४ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिं
दुसरसि तं कालं प्रतिपालयन् ३५

अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्गश्च स यथो पत्ररथेंद्रो गरुडस्तस्य पक्षैरुदीर्णमभिव्यक्तं समाकर्णयन् बृहद्र
थंतरे ते पक्षौ वितिष्कृतेः उच्चारितं स्तोमं च सामाधारभूतानां ऋचां समुदायं शृण्वन् स्तोम आत्मेति श्रुतेः समासपाठे उच्चारित
स्तोमः स्तोत्रीयसमुदायो यस्य साम्न इति ३४ तं कालं परमेश्वरइत्युक्तं प्रतीक्षमाणः ३५ वासुदेव नारायण गोपाल

भा०
६९

शातकौंभाः सौवर्णाः परिकरायस्मिन् तं रथमास्थाय दुहितरंचारोप्य वरान्वेषणार्थं पर्यटन् ३६ हेसुधन्वविदुरायत अहं ३७ त त्प्रवेशमात्रेण परमानंदंप्राप्त इतिदर्शयितुंआश्रमं वर्णयति यस्मिन्नित्यादिभिः श्लोकैः प्रपन्ने कर्दमे ३८ शिवमारोग्यं अमृत वत्स्वादुजलंयस्मिन् कूजंतः पुण्याम्रगाद्विजाश्चयेषुतैः पुण्यद्रमलतानांजालैः समूहैर्युक्तं ४० घुष्टं नादितं मत्तभ्रमराणां ठी०

मनुः स्यंदनमास्थाय शातकौंभपरिच्छदं आरोप्यस्वांदुहितरं सभार्यः पर्यटन्महीं ३६ तस्मिन्सुधन्वन्नहनि भगवान्यत्त माद्दिशत् उपायादाश्रमपदं मुनेः शांतव्रतस्यतत् ३७ यस्मिन्भगवतोनेत्रान्न्यपतन्नश्रुबिंदवः कृपयासंपरीतस्यप्र पन्नेर्पितयाभृशं ३८ तद्वै बिंदुसरोनामसरस्वत्यापरिप्लुतं पुण्यंशिवामृतजलंमहर्षिगणसेवितं ३९ पुण्यद्रुमलता जालैः कूजत्पुण्यमृगद्विजैः सर्वर्तुफलपुष्पाढ्यंवनराजिश्रियान्वितं ४० मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमं मत्त बर्हिनटाटोपंचाह्वयन्मत्तकोकिलं ४१ कदंबचंपकाशोककरंजबकुलासनैः कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैःप्लवैर्हंसैः कुररैर्जलकुक्कुटैः सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितं ४३ तथैवहरिणैः क्रोडैः श्वाविद्गवयकुंज रैः गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४४ प्रविश्यततीर्थवरमादिराजः सहानुजः ददर्शमुनिमासीनंतस्मिन्हु तहुताशनं ४५

विभ्रमोविनादोयस्मिन् मत्ताबर्हिणएवनटातेषांआटोपोनृत्यसंभ्रमोयस्मिन् आह्वयंतः मिथोमत्ताः कोकिलायस्मिन् ४१ कदंबादिभिर्वृक्षैरलंकृतं ४२ कारंडवादिभिः पक्षिभिः वल्गुयथातथाकूजितं ४४ हरिणादिभिर्वृतं तत्रक्रोडः सूकरः श्वाविच्छल्लकः मर्को मर्कटः तद्विशेषागोपुच्छः हरिर्वानरः सिंहोवा नाभिः कस्तूरीमृगः ४४ हुतः हुताशनो ब्रह्मचारियोग्येयेन ४५ श्रीराम श्रीः
६९

359
1981

उग्रोयुग्योगोयस्यतेनवपुषाविद्योतमानं तस्यभगवतो व्याहृतं भाषणमेवअमृतकल्पा अमृतमयस्यचंद्रस्य कला तन्म यंपीयूषंतस्यश्रवणेनचनातिक्षामं तपसाकृशंसंतमप्यकृशं ४६ प्रांशुमुन्नतंउपसंसृत्यसमीपंगत्वा मलिनं ददर्शेति पूर्वेणैवक्रिया अर्घ्यतेअनेनेत्यर्हणंमहार्हलंतत् असंस्कृतं अनिर्णिक्तं यथामलिनं दृश्यतेतद्वत् ४७ उटजं पर्णशालांप्राप्तंपुरःपा दसमीपे प्रणतंआशीर्भिरभिनंद्यसपर्ययापूजया प्रत्यगृह्णात् सत्कृतवान् ४८ ४९ नेचक्रमणंपर्यटनं हियस्मात् मनुस्त्वं विष्णुं

विद्योतमानंवपुषातपस्युग्रयुजाचिरं नातिक्षामंभगवतः स्निग्धापांगावलोकनात् ४६ तद्व्याहृतामृतकलापीयूष श्रवणेनच प्रांशुंपद्मपलाशाक्षंजटिलंचीरवाससं ४७ उपसंसृत्यमलिनंयथार्हणमसंस्कृतं अथोटजमुपायात न्देवंप्रणतंपुरः सपर्ययाप्रत्यगृह्णात्प्रतिनंद्यानुरूपया ४८ गृहीतार्हणमासीनंसंयतंप्रीणयन्मुनिः स्मर न्भगवदादेशमित्याहश्लक्ष्णयागिरा ४९ कपिल० नूनंचंक्रमणंदेवसतांसंरक्षणायते वधायचासतांयत्वं हरेःश क्तिर्हिपालिनी ५० योर्केंदुग्नींद्रवायूनां यमधर्मप्रचेतसां रूपाणिस्थानआधत्सेतस्मैशुक्लायतेनमः ५१ नयदा रथमास्थाय जैत्रंमणिगणार्पितं॥ विस्फूर्जच्चंडकोदंडोरथेनत्रासयन्नघान् ५२ स्वसैन्यचरणक्षुण्णंवेपयन्मंडलं भुवः विकर्षन्बृहतीसेनांपर्यटस्यंशुमानिव ५३ तदैवसेतवः सर्वे वर्णाश्रमनिबंधनाः भगवद्रचिताराजन्भिद्येरन्बत दस्युभिः ५४

प्रणमतियइति स्थानेतत्तत्कार्यावसरे शुक्लायविष्णवे ५१ नयदेति पंचानामयमर्थः यद्यपिधर्मरक्षार्थंसर्वतः पर्यटस्तवप्रसंगात्र त्यागमनंसंभवति तथापिविशेषकार्यंचेदस्ति तत्कथ्यतामितिजैत्रंजयप्रदं मणिगणा अर्पितायस्मिन् तंरथमारुह्यतंयदाभुवोमंड लंनपर्यटसितदासेतवोभिद्येरन्नितित्रयाणामन्वयः विस्फूर्जितनादंकुर्वत् चंडं कोदंडंधनुर्यस्य ५२ स्वसैन्यस्यचरणैः क्षुण्णंसंघट्टितं ५३ वर्णाश्रमाणांनिबंधनंयैः बतअहो ५४ श्रीः ५ ५ श्री ५ श्री ५ श्री ५ श्री ५ ५ ५

भा० निरंकुशैर्नृभिर्निमित्तभूतैः शयाने निश्चिंते ५५ निर्व्यलीकेन संहर्षेण प्रतिपद्यामहे स्वीकुर्महे ५६ इति तृतीये टी०
८० टीकायां एकविंशः २१ द्वाविंशे कर्दमाद्दाय यथादिष्टं हि विष्णुना मनुर्दुहितरं देवहूतमित्कपवर्ण्यते॥ १ एवमाविष्कृ
तअशेषाणां गुणानां कर्माणां च उदय उत्कर्षो यस्य संम्राट् मनुः सव्रीड इव स्वकीर्तिश्रवणात् प्रत्याख्यानशंकया वा
तं मुनिमुवाच उपारतं निरत्तिनिरतं १ मदीया कन्या त्वया परिणयेति विज्ञापयिष्यन् युष्मदस्मत्संबंधस्तावदीश्वरेणापूर्व

अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः शयाने त्वयि लोकोयं दस्युग्रस्तो विनंक्ष्यति ५५ अथापि पृच्छे त्वां वीर
यदर्थं त्वमिहागतः तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ५६ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकविं
शतितमोध्यायः २१ मैत्रेय उवाच एवमाविष्कृताशेषगुणकर्मोदयो मुनिं सव्रीड इव तं सम्राट् उपारतमुवाच
ह १ मनुरुवाच ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया छंदोमयांस्तपोविद्यायोगयुक्तानलंपटान् २ त
त्त्राणायासृजच्चास्मान्दोः सहस्रात्सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ३ अतो ह्यन्योन्यमात्मानं ब्रह्म क्ष
त्रं च रक्षतः रक्षति स्माव्ययो देवः स यः सदसदात्मकः ४ तव संदर्शनादेव छिन्ना मे सर्वसंशयाः यत्स्वयं भगवान्प्री
त्या धर्ममाह रिरक्षिषोः ५

मेव घटित इत्याह ब्रह्मेति सार्धाभ्यां आत्मनः परीप्सया पर्याप्तुमिच्छया छंदोमयस्यात्मनः पर्याप्तिः पालनं देवप्रवर्तनं त श्री:
स्य चायुष्मात् ब्राह्मणान् २ तत्त्राणाय ब्राह्मणपालनाय ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रजातिः एवं सदेव एव रक्षति स्म को
सौ यः सदसदात्मकः सर्वात्मकः तथापि अव्ययो निर्विकारः ४ तं विज्ञापयितुमेव तद्दर्शनादिकमभिनंदति तवेति त्रिभिः ५ ८०

361
1381

६ अनुग्रहोनुशासनरूप एव उषतीः उषत्यः ७ विज्ञापयति सभावानीति सप्तभिः दुहितुः स्नेहेन परिक्लिष्ट आत्मा यस्य श्रा
वितं विज्ञापितं ८ प्रियव्रतोत्तानपदोः स्वसेति पुत्रिकाकरणशंकानिरस्ता मम सुतेति क्षत्रकन्या तवयोग्येति दर्शितं ९ १० प्रतीच्छस्वी
कुरु ११ उद्यतस्य स्वतः प्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यानं १२ कीनाशं कृपणं अवज्ञया पराधमानेन १३ प्रस्य सावधिप्र

दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योऽकृतात्मनां दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवं ६ दिष्ट्या त्वयानुशिष्टोहं कृतश्चा
नुग्रहो महान् अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ७ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम श्रोतुमर्हसि दीन
स्य श्रावितं कृपया मुने ८ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ९ यदा तु
भवतः शीलश्रुतरूपवयोगुणान् आशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया १० तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपहृतां
मया सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ११ उद्यतस्य हि कामस्य प्रतिवादो न शस्यते अपि निर्मुक्तसंगस्य कामरक्तस्य
किं पुनः १२ य उद्यतमनादृत्य कीनाशमभियाचते क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः १३ अहं त्वाशृणवं विद्वन्
विवाहार्थं समुद्यतं अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे १४ ऋषिरुवाच बाढमुद्वोढुकामोहमप्रत्ता च तवात्मजा आ
वयोरनुरूपोसावाद्यो वैवाहिको विधिः १५ कामः स भूयान्नरदेव तेस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तनयां ना
द्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियं १६

ब्रह्मचर्यः स उपकुर्वाणः प्रत्तां मया दत्तां १४ अप्रत्ता चेति मय्येव कृतनिश्चयत्वात्कस्मैचित् प्रतिश्रुता च न भवतीत्यर्थः आद्यः प्र
थमः ततः पूर्वं विवाहाभावात् मुख्य इति वा १५ भूयात् भवेत् प्रतीतः गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या इत्यादि
मंत्रप्रसिद्धः स्वयैव कांत्या श्रियं भूषणादिशोभां १६ श्रीगोपालकृष्ण गोविंद नारायण वासुदेव माधव केशव

भा० मां विलोक्यन्यपतत् संमोहेन विमूढं व्यो चेतो यस्य क्वणड्डामं घ्रिभ्यां शोभा यस्यास्तां १७ ललनानां ललामं भूषणभूतं असे तृ०
७१ वितौ श्रियश्च रणौ ये तैर दृष्टां द्रष्टुमप्ययोग्यां उच्चपदः उत्तानपादस्य अभियातां स्वयं प्राप्ता १८ भजिष्ये स्वीकरिष्ये यावदपत्यो
त्पत्तिस्तावद्गार्हस्थं ततः परं सन्यास इति भाषाबंधसमयः तमेवाह यावत् आत्मनो मम च ते जो गर्भं बिभृयात् यद्वा मम त्मानो
देहात् च्युतं तेजो वीर्यं बिभृयादिति अतः परं पारमहंस्यं ज्ञानं तस्मिन् मुख्यान् शुक्लेन विष्णुना साक्षात्प्रकर्षेणोक्तान् अविहिंस्रा

यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीं विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः १७
तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टां वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोभियातां १८ अतो
भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे अतो धर्मान् पारमहंस्यमुख्यान् शुक्लप्रोक्तान् बहुमन्येविहिंस्रान्
१९ अतो भवद्भिश्च मिदं विचित्रं संस्थाप्यते यत्र च वावतिष्ठते प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननंतः २० स उ
ग्रधन्वन्नियदेवाबभाषे आसीच्च तूष्णीमरविंदनाभं धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः २१
सोनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटं तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः २२

न् हिंसारहितान् बहु यथा भवति एवमनुष्ठेयान्मन्ये १९ ननु तव पितुः प्रजापतेराज्ञा सृष्टावेव न संन्यासे तत्राह यत इति संस्था श्रीः
स्यते बलयं यास्यति शवेति एवार्थे ऋणत्रयापाकरणानंतरं सन्यास एव मादृशानां भगवतोक्त इत्यर्थः २० हे उग्रधन्वन् लुलु ७१
भे सुनेर्मुखेन प्रलोभ्यते स्म यद्वा मुखेन प्रतिलोभितवान् २१ स मनुः अनंतरं महिष्याश्च व्यवसितं निश्चयं ज्ञात्वा २२ श्रीः

363
1981

पारिबर्हान् विवाहकाले प्रदेयान् भूषाः भूषणानि च वासांसि च परिच्छदान् गृहोपकरणानि च २२ प्रत्तां प्रदत्तां सदृक्षाय
सदृशाय गतव्यथा चिंता यस्य औत्कंठ्येनोन्मथितः क्षुभित आशयो यस्य २४ तस्या विरहे सोढुं अंबहे वत्से इति ब्रुवन् संधिरार्षः
शिखाः केशाना सिचन् २५ २६ ऋषिकुल हिता याः उभयो सुरोधसोः शोभनतटयोः २७ अभिप्रेत्य ज्ञात्वा ब्रह्मावर्तदेशात् प्रजा
पतिं प्रत्युज्जग्मुः २८ कोसौ ब्रह्मावर्त इत्यपेक्षायामाह यत्र बर्हिष्मती नाम पुरीति सा पि कुत्र यत्र यज्ञस्य वराहस्य रोमाणि न्यपत

शतरूपा महाराज्ञी पारिबर्हान्महाधनान् दंपत्योः पर्यदात्प्रीत्या भूषावासः परिच्छदान् २२ प्रत्तां दुहितरं सम्राट् सदृक्षा
यगतव्यथः उपगुह्य च बाहुभ्यां औत्कंठ्योन्मथिताशयः २४ अशक्नुवंस्तद्विरहं मुंचन् बाष्पकलां मुहुः आसिंचन्नंब
वत्सेति नेत्रोदैर्दुहितुः शिखाः २५ अमंत्र्य तं मुनिवरमनुज्ञातः सहानुगः प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः २६
उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्य ब्रह्मा
वर्तात्प्रजापतिं गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः २८ बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता न्यपतन्यत्र रो
माणि यज्ञस्यांगं विधुन्वतः २९ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजि
रे ३० कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवं ३१ भगवते वासुदेवाय

न्निति यत्रेति सर्वत्र संबध्यते २९ बर्हिष्मती नाम निरुक्तिं ब्रुवन् प्रसंगाद्देशस्य श्रेष्ठामाह द्वाभ्यां कुशाः काशाश्चासन् शश्वत्
नित्यं हरितं वर्चो येषां यज्ञघ्नान् राक्षसादीन् पराभवनीत्वा यज्ञं विष्णुं ३० यत इति यत्रायजत भुवं स्थानं लब्धेति तत्र प्रत्ययां लब्ध
वान् सन् इत्यर्थः यतो लब्धवान् तं यज्ञपुरुषं इति वा स्वर्गादपि भूमिः श्रेष्ठा तत्रापि तत्स्थानं श्रेष्ठमित्युक्तं भवति ३१

भा० प्रस्तुतमाह यां बर्हिष्मतीं नाम पुरीं समावसत् पूर्वं यस्यामुषितः तस्यां तस्यां निर्विश्य भवनं भवनं प्रविष्टः सन् भोगान् बुभु तृ०
७२ जइत्यन्वयः अन्येषां धर्मादीनामविरोधेन २२ प्रत्यूषेउषस्सु सगीयमाना सत्कीर्तिर्यस्य तथापिस्वयंहरेरेवकथाः शृण्वन्
भोगान् बुभुजे २३ योगमायया सुरैश्छिक भोगरचनास्तु यघतअभ्रंशयितुं आईषदपिभ्रंशयितुं अभिभवितुं २४ अतः याता
यामोयस्य पक्कस्यान्नस्य तद्रूतसारं भवति अतोन्यदपिगतसारं यातयामा अगतसारा आसन् स्वांतरं तदीयमन्वंतरं यापयं

बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत् तस्यां प्रविभवनं तापत्रयविनाशनं २२ सभार्यः सप्रजः कामान् बुभुजेन्यावि
रोधतः संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः २३ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः निष्णातं योगमायासु
मुनिं स्वायंभुवं मनुं यदा भ्रंशयितुं भोगा न शेकुर्भगवत्परं २४ अयातयामास्तस्यासन् यामाः स्वांतरयापनाः शृण्वतो
ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः २५ स एवं स्वांतरं निन्ये युगानामेकसप्ततिं वासुदेवप्रसंगेन परिभूतगतित्रयः २६
शारीरा मानसा दिव्या वैयासे ये च मानुषाः भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयं २७ यः पृष्टो मुनिभिः प्राह धर्मा
न्नानाविधाञ्छुभान् नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा २८ एतत्त आदिराजस्य मनोश्चरितमद्भुतं वर्णितं वर्णनी
यस्य तदपत्योदयं शृणु २९ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वाविंशतितमोध्यायः २२ श्रीनारायण

ति नयंति ये यामाः कालावयवाः कुर्वतः स्ववाक्ये रूपनिबध्नतः २५ परिभूतं गतित्रयं जाग्रदादि सात्विकादि वा येन २६ दिव्या श्रीः
स्त्वांतरिक्षाः मनुषाः शत्रुप्रभवाः भौतिकाः शीतोष्णादिप्रभवाः वैयासे विदुर २७ तस्य ज्ञानातिशयमाह इति नृणां साधारणधर्मान् २८ तस्य यद ७२
पत्यं देवहूतिः तस्या उदयं प्रभावं २९ इति तृतीये द्वाविंशः २२ त्रयोविंशे तपोयोगनिर्मिते सर्वसंपदि विमाने कामनेचिश्वानयोरिति रुदीर्यते १

365
1981

प्रस्थिते गमने कृते सति १ २ दंभं कपटं अघं निषिद्धाचरणं तेजीयासं अतितेजस्विनं ३ देवाद्गरीयसः देवादपि गुरुतरात्
देववपि अन्यथाकर्तुं समर्थादित्यर्थः ४ व्रतचर्यया कर्शितां तनूमपि भूयसा काले नातिक्षामामित्यर्थः ५ सुहृत् प्रियः मदर्थे क्षप
यितुं नावेक्षितः न गणितः समुचितः श्लाघ्योपि मत्सेवासक्तया उपेक्षित इत्यर्थः ६ तपश्च समाधिश्च विद्या च उपासना च तासु यः
आत्मयोगः चित्तैकाग्र्यं तेन विजिता प्राप्ता भगवत्प्रसादाः दिव्या भोगाः तानेव ते अवरुद्धान् तथापि वशीकृतान् प्रपश्य नेदिव्यां

मैत्रेय उवाच पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुं १ विश्रंभेणात्मशौचे
न गौरवेण दमेन च शुश्रूषया सौहृदेन वाचा मधुरया च भो २ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं अप्रमत्तोद्यता नित्यं
तेजीयांसमतोषयत् ३ स वै देवर्षिवर्यस्तां मानवीं समनुव्रतां दैवाद्गरीयसः पत्युराशासानां महाशिषः ४ कालेन भूय
सा क्षामां कर्शितां व्रतचर्यया प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ५ कर्दम उवाच तुष्टोहमद्य तव मानवि मानदायाः
शुश्रूषया परमया परया च भक्त्या यो देहिनामयमतीव सुहृत्स देहो नावेक्षितः समुचितः क्षपितुं मदर्थे ६ ये मे स्वधर्मनि
रतस्य तपः समाधिविद्यात्मयोगविजिता भगवत्प्रसादाः तानेव ते मदनुसेवनयावरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशो
कान् ७ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दु
रधिगान्नृपविक्रियाभिः ८

दृष्टिं वितरामि यया द्रक्ष्यसि ७ अन्ये पुनर्भोगाः किं न किमपि अतितुच्छा इत्यर्थः तत्र हेतुः भगवत उरुक्रमस्य
याभ्रूः तस्या उद्विजृंभः वक्रीभावः तेन विभ्रंशिता अर्थरचना मनोरथा येषु निजधर्मेण पतिव्रत्येन उत्पन्ना इति तथा
तान् दुरधिगान् दुःप्रापान् नृपा वयमिति याविक्रियास्ताः तत् भोगविकृतयः ताभिः ८ माधवगोपालगोविंदराम्

भा० अखिलायोगमायाश्च विद्याश्च तत्तदुपासनास्तासु विचक्षणं निपुणमेवं ब्रुवाणं पतिमवेक्ष्य गताधिर्निश्चिंता जाता सं तृ०
प्रश्रयो विनयः प्रणयः प्रेमता भ्यां विह्वलाकुलातया गिरा ईषद्व्रीडासहितो यो वलोकस्तेन विलसद्धसितमाननं यस्याः सा अ
७३ हजगाद ९ वर्ततिहर्षे द्विजवृष द्विजश्रेष्ठ हे भर्तः त्वयि एतत्सर्वं राद्धं सिद्धमेव तदहमवैमि जानामि किंतु यस्त्वया समयो
भिहितः सतावद्भूयात् सकृदितिगर्भसंभवमात्रपर्यंत इत्यर्थः यस्माद्भूरीयसि श्रेष्ठे भर्तरि हेतुभूते स्त्रीणां प्रसवो गुणः महान्
लाभः समासपाठे गरीयसि पत्यौ सति सतीनां यतो गुणप्रसवः गुणविस्तारो भवति अतः पुत्रोत्पत्त्या मम गुणविस्तारे जातपश्च

एवं ब्रुवाणमबलाखिललोकमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् संप्रश्रयप्रणयविह्वलया गिरेषत् व्रीडावलो
कविलसद्धसिताननाह ९ देवहूतिरुवाच राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः यस्तेभ्यधा
यि समयः सकृदंगसंगो भूयाद्गरीयसि गुणः प्रसवः सतीनां १० तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोतिरि
रंसयात्मा सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ११ मैत्रेय उवाच प्रियायाः प्रियमन्विच्छन्क
र्दमो योगमास्थितः विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् १२ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्ध्युपचयोदर्कं म
णिस्तंभैरुपस्कृतं १३

त्वदुक्तं सर्वं भवत्विति भावः १० अंगसंगार्थं च प्रथममिति कर्तव्यतां संपादयेत्याह हे ईश तत्र अंगसंगे इतिकृत्यं साधनं यथोपदेशं का श्रीः
मशास्त्रानुसारेण उपशिक्ष संजानीहि उपकल्पयेत्यर्थः येन साधनेन नाभ्यंगभोजनपानादिना अतीव रंतुमिच्छया कर्शितो दीनश्च
ममैष आत्मा देहः सिध्येत् रति समर्थो भवेत् कथंभूतायाः तेत्वयैव कृतः क्षोभितो यो मनोभवस्तेन धर्षितायाः तत् ततो नुरूपं भवनं च वि ७२
चक्ष्वेति तर्कय विचारयेति यावत् ११ तर्हि तत्क्षणमेव अवीरचीकरत् आविर्भावयामास द १२ तदेव विशिनष्टि सर्वकामदुघमिति त्रिभिः
सर्वैश्च रत्नादिभिः समन्वितं सर्वर्द्धीनां सर्वसंपदां य उपचयस्तस्य उदर्कः उत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतं शोभितं १३

उपकरणं परिकरः पट्टिका अल्पविस्तारः पट्टवस्त्रविशेषाः पताकाः विस्तृतास्ताभिः १४ विचित्राणि माल्यानि पुष्पा
णि यासु मंजु यथा भवत्येवं सिंजतः षडंघ्रयो यासु ताभिः स्रग्भिः १५ उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतं कम
नीयं पर्यंकादिभिश्च कांतं १६ १७ द्वाः सुद्वारेषु विद्रुमनिर्मिता देहली उदुंबरस्तया भातं शोभितं वज्ररचितकपाटयुक्तं इंद्र
नीलमयेषु शिखरेषु प्रासादाग्रभागेषु १८ चक्षुष्मंत इव ये पद्मरागाग्र्यास्तैः यद्वा चक्षुष्मदिव कैः पद्मरागाग्र्यैः विचित्रैर्वे

दिव्योपस्करणोपेतं सर्वकामसुखावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिर्मंजु
सिंजत्षडंघ्रिभिः दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् क्षिप्तैः क
शिपुभिः कांतं पर्यंकव्यजनासनैः १६ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं महामरकतस्थल्या जुष्टं विद्रुमवेदि
भिः १७ द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटवत् शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितं १८ चक्षुष्मत्पद्मरागाग्र्यैर्व
ज्रभित्तिषु निर्मितैः जुष्टं विचित्रवैतानैः सहार्घैर्हेमतोरणैः १९ हंसपारावतव्रातैस्तत्र तत्र निकूजितं कृत्रिमान्मन्यमा
नैः स्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवेशप्रांगणाजिरैः यथोपजोषं रचितैर्विस्मापनमिवात्मनः २१
ईदृग्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयं २२ निमज्ज्यास्मिन् ह्रदे भीरु विमानमिदमा
रुह इदं शुक्लकृतं तीर्थं आशिषां यापकं नृणां २३

तानैर्वितानसमूहैः १९ कृत्रिमानपि हंसादीन् स्वान् स्वजातीयान् मन्यमानैस्तत्र तत्राधिरुह्याधिरुह्य निकूजितं २० विहारस्थानं
क्रीडाप्रदेशः विश्रामः शयनगृहं संवेशउपभोगस्थानं प्रांगणं गृहाद्बहिः अजिरं प्राकाराद्बहिः यथोपजोषं यथासुखं आत्मनः स्वस्य
मायाविनोपि विस्मयजनकमिव २१ नातिप्रीतेन मलिनदेहत्वात् परिचारिकाभावाच्च अस्मिन् ह्रदे बिंदुसरसि आरुह अधिरोह
शुक्लेन विष्णुना कृतं आनंदं बिंदुनिपातेन पापकं मापकं २३

367/1981

भा०
७४
समादायआदस्य सरजं मलिनं २४ शबलौविवर्णौस्तनौयस्मिन्नत् सरस्वत्याः शिवाविजलानिआशेरनेयस्मिन् शि टी०
वाजलाशयाजलचरायस्मिन्इतिवा २५ सातत्रनिमग्नासतीविस्मयंददर्श तमाह सातः सरसीतिदशभिःउत्पलगंध
यः २६ स्त्रियःप्रोचुः तदकर्मकरीः परिचारिकावयं अस्मानाज्ञापयेति २७ ततश्चस्नानेनयोग्यतैलादिना २८ पराध्र्या
नि उत्कृष्टानि वरीयांसितत्प्रियाणि दीप्तिमंतिचपानंपेयं अमृतंस्वादुआसवंमादकं २९ आदर्शेस्वमात्मानंददर्शेतिशेषः

सातद्वचः समादायवचःकुवलयेक्षणा सरजंबिभ्रतीवासोवेणूभूतांश्चमूर्धजान् २४ अंगंचमलपंकेनसंछिन्नं
शबलस्तनं अविवेशासरस्वत्याः सरःशिवजलाशयं २५ सांतःसरसिवेश्मस्थाः शतानिदशकन्यकाः सर्वाकिशोरव
यसोददर्शोत्पलगंधयः २६ तांदृष्ट्वासहसोत्थाय प्रोचुःप्रांजलयःस्त्रियः वयंकर्मकरीस्तुभ्यंशाधिनःकरवाम
किं २७ स्नानेनतांमहार्हेणस्नापयित्वामनस्विनीं दुकूलेनिर्मलेनूत्ने ददुरस्यैचमानदाः २८ भूषणानिपरार्ध्या
निवरीयांसिद्युमंतिच अन्नंसर्वगुणोपेतंपानंचैवामृतासवं २९ अथादर्शे स्वमात्मानंस्रग्विणं विरजांबरं विरजं
कृतस्वस्त्ययनं कन्याभिर्बहुमानितं ३० स्नातंकृतशिरस्नानंसर्वाभरणभूषितं निष्कग्रीवंवलयिनंकूजत्कांचननू
पुरं ३१ श्रोण्योरध्यस्तयाकांच्याकांचन्याबहुरत्नया हारेणचमहार्हेणरुचकेनचभूषितं ३२ श्री ७ श्री ०

आत्मानंविशिनष्टि चतुर्भिः कृतंस्वस्त्ययनंमंगलंयस्य पुंस्त्वमात्मशब्दसामानाधिकरण्यात् ३० विरजमित्यस्य प्रपंचः श्री
स्नातंउद्वर्त्यक्षालितं कृतंशिरःस्नानमभ्यंगोयेन भूषितत्वमेवाह निष्कंपदकंग्रीवायांयस्य ३१ बहूनिरत्नानियस्यांतयारुचके ७४
नमंगलद्रव्येणकुंकुमादिना तदुक्तंविश्वप्रकाशे रुचिकेमंगलद्रव्येग्रीवाभरणदंतयोरिति ३२ श्रीरामकृष्णवासुदेवाय

369/1981

सुदत्तासुभ्रु वाचक्षुषेतिचजातावेकवचनादि एतैर्लसत्शोभमानंमुखंयस्याः कथंभूते नचक्षुषाश्लक्ष्णोमनोहरःस्नि
ग्धोउपांगोनेत्रप्रांतोयस्य पद्मकोशेनस्पर्द्धत इतिपद्मकोशस्पृत्तेन ३३ दृष्ट्वाचयदापतिंसस्मार तदायत्रासौतत्रैवस्वयमप्या
स्ते ३४ आत्मानंनिशम्यदृष्ट्वा तांचतस्ययोगगतिंयोगप्रभावं दृष्ट्वासंशयंकिमिदमितिविस्मयं ३५ समुनिःविहातप्राकृय
दात्मानोरूपंतदेवपुनर्बिभ्रतीं संवीतौप्रावृतौरुचिरौस्तनौयस्याः पाठांतरेतुरूपविशेषणं ३६ शोभनेवाससीयस्याःजा

सुदत्तासुभ्रूकवाश्लक्ष्णास्निग्धापांगेनचक्षुषा पद्मकोशस्पृधानीलैरलकैश्चलसन्मुखं ३३ यदासस्मारऋषभमृषी
णांदयितंपतिं तत्रचास्तेसहस्त्रीभिर्यत्रास्तेसप्रजापतिः ३४ भर्तुःपुरस्तादात्मानंस्त्रीसहस्रावृतंतदा निशाम्यतद्यो
गगतिंसंशयंप्रत्यपद्यत ३५ सतांकृतमलस्नानांविभ्राजंतीमपूर्ववत् आत्मानोबिभ्रतींरूपंसंवीतरुचिरस्तनीं ३६
विद्याधरीसहस्रेण सेव्यमानांसुवाससां जातभावोविमानंतदारोहयदमित्रहन् ३७ तस्मिन्नलुप्तमहिमाप्रियया
नुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने बभ्राजउत्कचकुमुद्गणवानपीच्यस्ताराभिरावृतइवोडुपतिर्नभस्थः ३८ तेनाष्टलो
कपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु सिद्धैर्नुतोद्युधुनिपातशिवस्वनासुरेमेचिरंधनदवल्ललनावरूथी ३९

तोभावःप्रेमयस्य हेअमित्रहन् जितकाम ३७ तस्मिन्विमानेमुनिर्विभ्राजे नलुप्तोमहिमास्वातंत्र्यंयस्य उपचीर्णंशुश्रूषितं
वपुर्यस्य विकसितकुमुद्गणवान् अपीच्योतिसुंदरः पूर्णश्चंद्रवन्मुनिः नभइवविमानं ताराइवताःस्त्रियःकुमुदानीवतासांनेत्रा
णीतिज्ञेयं ३८ तेनविमानेन अष्टलोकपालानांविहारोयस्मिन्कुलाचलेंद्रेमेरौतस्यद्रोणीषुदरीषु अनंगस्यसखीयामारुतःशीतसुगं
धमंदानिलः तेनसौभगंसौभाग्यंसौदर्ययासुसिद्धैर्नुतःस्तुतःसन् द्युधुनिर्गंगातस्याःपातेनशिवःस्वनोयासुतासुरेमे ललनावरू
थीस्त्रीरत्नसमूहवान् ३९ श्रीः

वैभ्रंभकादिषु देवोद्यानेषु मानसे च सरसि रतः प्रीतः सन् ४० अत्यशेत आतक्रम्य स्थितः ४१ उद्दामचेतसां धीराणां
व्यसनं संसारः तस्मात्त्वयो यस्मात् ४२ प्रेक्षयित्वा दर्शयित्वा गोलं मंडलं स्वसंस्थया द्वीपवर्षादिरचनया यावान् तावंतं
बहून्य आश्चर्याणि यस्मिन् तं ४३ विभज्य नवधा नव भेदेनात्मानं कृत्वा ४४ ४५ शरदः संवत्सराः मनाक् ईषदिव
व्यतीयुः ४६ आत्मना स्वदेहार्धरूपेण अतिप्रीत्या भावयन् तया सति सदपत्यं भवेदिति नो धा नवधा सर्वसंकल्पविदिति

वैभ्रंभके सुरसने नंदने पुष्पभद्रके मानसे चैत्ररथ्ये च सरे मे रामया रतः ४० भ्राजिष्णुना विमानेन कामगे
न महीयसा वैमानिकानत्यशेत चरन् लोकान् यथानिलः ४१ किं दुरापादनं तेषां पुंसामुद्दामचेतसां यैरा
श्रितस्तीर्थपदश्चरणो व्यसनात्ययः ४२ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया बह्वाश्चर्यं महायोगी
स्वाश्रमाय न्यवर्तत ४३ विभज्य नवधात्मानं मानवीं सुरतोत्सुकां रामां निरमयन् रेमे वर्षपूगान् मुहूर्तवत् ४४ तस्मिं
न्विमान उत्कृष्टां शय्यां रतिकरीं श्रिता न चाबुध्यत तं कालं पत्यापीच्येन संगता ४५ एवं योगानुभावेन दंपत्यो रम
माणयोः शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ४६ तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् नोधा विधा
य रूपं स्वं सर्वसंकल्पविद्विभुः ४७ अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगं
धयः ४८ पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती सती स्मयमाना विक्लवेन हृदयेन विदूयता ४९

तस्याः बहुपत्यसंकल्पं जानन्नित्यर्थः विभुस्तया कर्तुं समर्थश्च आत्मविदिति च तस्या मनासक्तत्वात् स्त्रियो जाता इति भावः
पुमान् पुंसोधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति स्मृतेः ४७ अतः अनंतरमेव सद्यः एकस्मिन्नेवाहनि चारूणि स
र्वाण्यंगानि यासां ४८ प्रव्रजिष्यंतं अलक्ष्य वितर्क्य स्मयमाना बहिः अंतस्तु विक्लवेन व्याकुलेन विदूयता संतप्यमानेन हृदा
उवाचेत्युत्तरेणान्वयः ४९

371/1931

नखा एव मणयः तैः श्रीः शोभा यस्य तेन पदा भुवं लिखंती तिदुरंतचिंतालक्षणं ५० उपोढा संपादितवान् अभयमिति भाविनो दैन्या
त् संसाराद्भयरूपं तं निवर्तय इत्यर्थः ५१ तत्र दैन्यं निवेदयति तुभ्यं तव दुहितृभिः स्वयमेवात्मनः समा योग्याः पतयो विमृग्या इति दैन्यं
प्राप्तं संसारभयमुररीकृत्याह कश्चिदिति विशोकाय ज्ञानोपदेशेन स्त्रीभिः ऋणानपाकरणात् कंचित्कालं त्वदवस्थानेन ब्रह्म
द् विनपुत्रः कश्चित् किं स्यादित्यर्थः ५२ विषयान् भुंक्ष्व किं ब्रह्मविद्ययेति चेत्तत्राह एतावतालं भूर्यतां परित्यक्तः परआत्मा यया त

स्त्विलिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ५० सर्वं तद्भगवान्मह्यमुपो
वाह प्रतिश्रुतं यथापि प्रपन्नाया अभयं दातुमर्हसि ५१ ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः कश्चित्स्या
न्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ एतावतालं कालेन व्यतिक्रांतेन मे प्रभो इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ५३
इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ५४ संगो यः संसृतेर्हेतुरसत्सु विहि
तोधिया स एव साधुषु कृतो निःसंगत्वाय कल्पते ५५ नेह यत्कर्म धर्माय न विरागाय कल्पते न तीर्थपदसेवायै जीव
न्नपि मृतो हि सः ५६ साहं भगवतो नूनं वंचिता मायया दृढं यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ५७ इति श्रीभाग
वते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने त्रयोविंशतितमोऽध्यायः २३ वासुदेव नारायण माधव राम

स्या मम ५३ स्वकृतामनुशोचंत्याह इंद्रियार्थेष्विति चतुर्भिः मे मया परं भावं त्वं ब्रह्मविदिति ५४ प्रसंगः कथमभयाय तत्र
ह संग इति अधिया अज्ञानेन ५५ स्वभावतः प्रवृत्तस्य कर्म धर्मार्थं न कल्पते धर्माभिमुखं न भवेत् तत्रापि निष्काम धर्मद्वा
रा विरागाय न कल्पते तद्द्वारा च तीर्थपादस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः ५६ न मुमुक्षेयं मोक्तुमिष्टां न कृतवत्यस्मि ५७ तृती
ये त्रयोविंशः २३

भा० चतुर्विंशततोजन्म कपिलस्याह तन्पितुः प्रव्रज्यां तमनुज्ञाप्य ऋणत्रयविमोक्षतः शालिनीं श्लाघ्यां शुक्लेनाभिव्याहृतं सद्वा टी०
७६ हं स्वांशकलयेत्यादि १ इत्थंमाखिदः खेदंमाकर्षीः आत्मानंप्रति अहंभाग्यहीनेति अदूरात शीघ्रं २ दमेनइंद्रियसंयमेननि
यमेनस्वधर्मेण तपांसिद्रविणदानानिचतेः ३ हृदयग्रंथिचिज्जडात्मकं अहंकारलक्षणं बंधं छेत्ता छेत्स्यति औदार्यः पुत्रःसन्
ब्रह्मभावयति उपदिशतीतितथा ४ श्रद्धायविश्वस्य ५ बहुतिथेबहुतरेकालेतिक्रांते ६ घना घनाइत्येकंपदं वर्षंतो मेघाः गायंभि

मैत्रेयउवाच निर्वेदवादिनीमेवं मनोर्दुहितरंमुनिः दयालुः शालिनीमाहशुक्लाभिव्याहृतंस्मरन् १ ऋषिरुवाच मा
खिदोराजपुत्रीत्थमात्मानंप्रत्यनिंदिते भगवांस्तेक्षरो गर्भमदूरात्संप्रपत्स्यते २ धृतव्रतासि भद्रंते दमेननियमेनच
तपोद्रविणदानैश्चश्रद्धयाचेश्वरंभज ३ सत्वयाराधितःशुक्लो वितन्वंमामकंयशः छेत्ताते हृदयग्रंथिमौदर्योब्रह्म
भावनः ४ मैत्रेयउवाच देवहूत्यपिसंदेशं गौरवेण प्रजापतेः सम्यक्श्रद्धायपुरुषंकूटस्थमभजद्गुरुं ५ तस्यांबहु
तिथेकाले भगवान्मधुसूदनः कार्दमंवीर्यमापन्नोजज्ञेग्निरिवदारुणि ६ अवादयंस्तदाव्योम्नि वादित्राणिघना
घनाः गायंतितंस्मगंधर्वानृत्यंत्यप्सरसोमुदा ७ पेतुःसुमनसोदिव्याःखेचरैरपवर्जिताः प्रसेदुश्चदिशःसर्वाःअं
भांसिचमनांसिच ८ तत्कर्दमाश्रमपदंसरस्वत्यापरिश्रितं स्वयंभूःसाकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भ
गवंतंपरंब्रह्मसत्वेनांशेनशत्रुहन् तत्वसंख्यानविज्ञप्त्यैजातंविद्वानजःस्वराट् १० रामकृष्ण वासुदेव श्रीः श्रीः

त्यंतिस्म ७ अपवर्जितामुक्ताः ८ परिश्रितंवेष्टितं ९ अगत्यकिंकृतवान् तदाह भगवंतमितिद्वाभ्यां तत्वानांख्यानंयस्मि ७६
न् तस्यसांख्यस्यविज्ञप्त्यैविशेषेणज्ञापनाय भगवंतंजातंविद्वान् अजोब्रह्मास्वराट् स्वतःसिद्धज्ञानः १० वासुदेव

373/1981

तस्यचिकीर्षितंसभाजयन् पूजयन् प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षितः कर्दमंदेवहूतिंचाभ्यभाषतेतिद्वयोरन्वयः चकाराद्दे
वहूतिंच ११ तत्रत्वयेतिपंचभिः कर्दमंप्रत्याह अपचितिः पूजाकृता यद्यस्मात् निष्कपटं सम्यग्गृहीतवान् १२ अनुमन्ये
तेतियत् एतावत्येव १३ अनेकधाप्रभावैः वंशैर्बृंहयिष्यंति वर्धयिष्यंति १४ ऋषिमुख्येभ्यो मरीच्यादिभ्यः १५ पुत्रस्तस्मा
त्साक्षादीश्वरइत्याह वेदाहमिति शेवधिंनिधिंसर्वाभीष्टदं १६ देवहूतिंप्रत्याहत्रिभिः ज्ञानंशास्त्रोक्तं विज्ञानमपरोक्षंच तेएवयोग

सभाजयन्विशुद्धेनचेतसा तच्चिकीर्षितं प्रहृष्यमाणैरसुभिः कर्दमंचाभ्यभाषत ११ ब्रह्मोवाच त्वयामेपचितिस्तात
कल्पितानिर्व्यलीकतः यन्मेसंजगृहेवाक्यंभवान्मानदमानयन् १२ एतावत्येवशुश्रूषाकार्यापितरिपुत्रकैः बाढमित्य
नुमन्येतगौरवेणगुरोर्वचः १३ इमादुहितरःसभ्यतववत्ससुमध्यमाः सर्गमेतंप्रभावैःस्वैर्बृंहयिष्यंत्यनेकधा १४ अत
स्त्वमृषिमुख्येभ्योयथाशीलंयथारुचि आत्मजाःपरिदेह्यद्यविस्तृणीहियशोभुवि १५ वेदाहमाद्यंपुरुषमवतीर्णंस्वमा
यया भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने १६ ज्ञानविज्ञानयोगेनकर्मणामुद्धरन्जटाः हिरण्यकेशःपद्माक्षःपद्ममु
द्रापदांबुजः १७ एषमानवितेगर्भंप्रविष्टःकैटभार्दनः अविद्यासंशयग्रंथिंछित्वागांविचरिष्यति १८ अयंसिद्धगणाधीशःसां
ख्याचार्यैःसुसंमतः लोकेकपिलइत्याख्यांगंताते कीर्तिवर्धनः १९ श्रीमैत्रेयउवाच तावाश्वास्यजगत्स्रष्टाकुमारैःसहनार
दः हंसोहंसेनयानेनत्रिधामपरमंययौ २०

उपायस्तेनकर्मणांजटाः मूलानिवासनाउद्धरन् उत्पाटयिष्यन् पद्ममुद्रायुक्तंपदांबुजंयस्य १७ हेमानवि अविद्यास्वरूपाज्ञानं संशयाः
मिथ्याज्ञानानि तन्मयंतवहृदयग्रंथिं १८ सुसंमतः सुपूजितः सन् गंताप्राप्स्यसि १९ कुमारैःसहेतिशेषःसहनारदः नारदसहितश्च मरी
च्यादीन्विहार्थमवस्थाप्यनैष्ठिकैरेतैः पंचभिः सहितोहंसोब्रह्मायथौत्रिधाम तृतीयंधामस्वर्गः तस्यपरांकाष्ठां सत्यलोकं २०

भा० शतधृतौ ब्रह्मणि २१ २२ युक्तायोग्यां अथघत् अदात् २३ वितन्यते सम्यक् क्रियते शांतिरधिष्ठात्रीं देवतामित्यर्थः सम ८०
७८ लालयन् संतोषितवान् २४ निमंत्र्य पृष्ट्वा नंदिं हर्षं प्राप्ताः संतः २५ सच मुनिः त्रियुगो विष्णुं विविक्ते रहसि २६ पापच्यमाना
नां भृशं दह्यमानानां निरये संसारे स्वीयैरमंगलैः पापैः २७ कुतः सर्वा देवताः प्रसन्ना इति ज्ञातं अलभ्यलाभादित्याह द्वाभ्यां ब
हुषु जन्मसु विपक्केन सुसिद्धेन सम्यग्योगो भक्तियोगस्तस्मिन् समाधिरैकाग्र्यं तेन शून्यागारेषु विविक्तस्थानेषु यस्य तव पदं २८

गतो शतधृतोक्षतः कर्दमस्तेन चोदितः यथोदितं स्वदुहितः प्रादाद्विश्वसृजां ततः २१ मरीचये कलां प्रादादनसूयाम
थात्रये श्रद्धामंगिरसे यच्छत्पुलस्त्याय हविर्भुजं २२ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीं ख्यातिं च भृगवे यच्छद्वसि
ष्ठायाप्यरुंधतीं २३ अथर्वणेददाच्छांतिं यया यज्ञो वितन्यते विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् २४ ततस्त
ऋषयः क्षतः कृतदारा निमंत्र्य तं प्रातिष्ठन्नंदिमापन्नाः स्वं स्वमाश्रममंडलं २५ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभं
विविक्त उपसंगम्य प्रणम्य समभाषत २६ कर्दम उ० अहो पापच्यमानानां निरये स्वैरमंगलैः कालेन भूयसा नूनं प्रसीदंती
ह देवताः २७ बहुजन्मविपक्केन सम्यग्योगसमाधिना द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं २८ स एव भगवानद्य हेलनं न
गणयन्नः गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः २९ स्वीयं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे चिकीर्षुर्भगवान्
ज्ञानं भक्तानां मानवर्धनः ३० तान्येव तेभिरूपाणि रूपाणि भगवंस्तव यानि यानि च रोचंते स्वजनानामरूपिणः ३१

श्रीः
हेलनमवज्ञां लाघवं न गणयन् अगणयित्वा उचितमेव तवैतदित्याह यस्त्वं स्वानां स्वभक्तानां पक्षं पुष्णासीति तथासः २९ एतत्प्रपंचयति ७७
द्वाभ्यां स्वयमेवावतीर्णोसि स्ववाक्यं तव पुत्रो भविष्यामीति यत् तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं च चिकीर्षुः सन् ३० यानि तवालौकिका
नि चतुर्भुजादिरूपाणि तान्येव ते भिरूपाणि योग्यानि यानि च स्वजनानां रोचंते मनुष्यरूपाणि तान्यपि ते रोचंत इत्यर्थः अरूपिणः प्राकृतरू
परहितस्य ३१

375/1981

अभिवादार्हं पादपीठं यस्य ऐश्वर्यादिभिः पूर्तं पूर्णं ३२ ऐश्वर्यादिकं विवरणपूर्वकमाह परं परमेश्वरं तत्र हेतुः स्वच्छंदाः स्वाधीनाः शक्तयो
यस्य तत एवाह प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महांतं महत्तत्त्वरूपं कालं तेषां क्षोभकं त्रिवृतं अहंकाररूपं लोकात्मकं त
त्पालात्मकं च तदेवं मायया प्रधानादिरूपता मुक्ता चिच्छक्त्या निःप्रपंचतामाह आत्मानुभूत्या चिच्छक्त्या अनुगतः स्वस्मिन्लीनः
प्रपंचो यस्य तं कविं सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ३३ संन्यासानुज्ञां प्रार्थयते अस्माभिः पृच्छ्य किं चिदभिप्रेष्य
मित्यर्थः त्वया पुत्ररूपेणावतीर्णा निर्वृत्तानि ऋणानि देवादिरूपाणि यस्य सः आप्तकामश्चाहं परिव्रजतां संन्यासिनां पदवीं मा

तं सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रियां पूर्तमहं प्रपद्ये ३२ परं प्रधा
नं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३३ अस्माभिपृच्छ्य
पतिं प्रजानां त्वयावतीर्णर्ण उताप्तकामः परिव्रजत्पदवीमास्थितोहं चरिष्ये त्वां हृदि युंजन्विशोकः ३४ श्रीभगवानु
वाच मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके अथाजनि मया तुभ्यं यदवोचमृतं मुने ३५ एतन्मे जन्म लोकेस्मि
न्मुमुक्षूणां दुराशयात् प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ३६ वासुदेव श्रीराम कृष्ण गोविंद वासुदेव राम

गर्भाश्रितः सन् त्वां पुजन् स्मरन् विचरिष्यामि ३४ अहं तावत्तत्त्वज्ञानोपदेशाय तव गृहेवतीर्णः अतस्तव गृहे वसतोपि मुक्तिः सुल
भैवेत्यत्र यद्यवश्यं गंतव्यमेन्याग्रहः तथापि मामेवानुस्मरन् गच्छेत्याशयन्नाह मयेति षड्भिः सत्यलौकिके वैदिके लौकिके च वचस्यत्त्वो
कस्य प्रमाण्यमभिदर्शयति यद्यस्मात् तुभ्यं तव पुत्रो भविष्यामीत्यवोचं अथ अत एव तत्ऋतं यथा भवति तथा मया जनि जन्मा
भिस्वीकृतं ३५ दुराशयात् लिंगात् मुमुक्षूणां मुनीनां मात्मदर्शी संमताय तत्त्वानां प्रसंख्यानाय विद्धी स्वकृतस्यानुषंगः ३६

भा० नन्वयमात्मज्ञानमार्गः पूर्वसिद्ध एव नेदानीमपूर्ववत् प्रवर्त्तनीयः तत्राह एष इति अव्यक्तः सूक्ष्मः ३७ कामं यथेष्टं आपृष्टः टी०
६८ अनुज्ञातः यद्वा यथा त्वं गंतुं मां पृष्टवान् तथान्यथ वक्तुं मयापि त्वमापृष्ट इत्यर्थः मयि संन्यस्तैः समर्पितैः कर्मणा अविद्या
यामृत्युं तीर्त्वा विद्ययामृतमश्नुत इति श्रुतेः ततश्च मां परमं परमात्मानं आत्मनि स्वस्मिन् आत्मना मनसा अन्वीक्षमाणो भयं
मोक्षं प्राप्स्यसि ३९ मात्रे देवहूत्यै शमनीं उन्मीलनीं भयं तरिष्यति परमानंदं च प्राप्स्यतीति चकारार्थः ४० समुदितः सम्यगुक्तः सन्

एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा तं प्रवर्त्तयितुं देहमिमं विद्धि मया भृतं ३७ गच्छ कामं मयापृष्टो मयि संन्यस्त
कर्मणा जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३८ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं आत्मन्येवात्मना वी
क्ष्य विशोकोऽभयमृच्छसि ३९ मात्रे अध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां वितरिष्ये यया चासौ भयं चातितरिष्यति ४०
मैत्रेय उवाच एवं समुदितस्तेन कपिलेन प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४१ व्रतं स आस्थितो मौनं आ
त्मैकशरणो मुनिः निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ४२ मनो ब्रह्मणि युञ्जानो यत्तत्सदसतः परं गुणावभासे
विगुण एकभक्त्यानुभाविते ४३ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक् प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ४४

तं प्रादक्षिणीकृत्य ४१ मुनीनां व्रतं मौनं अहिंसालक्षणं ४२ सदसतः परं यत्तस्मिन् ब्रह्मणि गुणावभासे केवले निर्गुणे एकभक्त्या श्री:
तथा अव्यभिचारिण्या भक्त्या अनुभाविते अपरोक्षीकृते ४३ अतो देहादिष्वहंकारादिरहितः अतएव निर्द्वंद्वः शीतोष्णाद्य ७८
नाकुलः समदृक् भेदाग्राहकः किंतु स्वदृक् स्वयमेव पश्यन् प्रत्यक्प्रवणा प्रशांता विक्षेपरहिता धीर्यस्य ४४ श्रीगोपाल

344/1981

तदेवंविधकल्पितोपाधिनिवृत्तिमुक्त्वा परमेश्वरप्राप्तिमाह वासुदेव इति त्रिभिः प्रतीचो जीवस्यात्मनि लब्ध आत्मचित्तं ये
न यतः मुक्तबंधनमज्ञानं यस्य ४५ लब्धात्मतामेवाह आत्मानमिति ४६ तदेवं तेन भागवती गतिः प्राप्ता पाठांतरे स एव तां गतिं
प्राप्त इति ४७ इति टीकायां चतुर्विंशः २४ पंचविंशे जनन्यातु पृष्टो बंधविमोचनं आदावाह परं भक्तिलक्षणं कपिलः सुतः कपिले
नार्पिता मात्रे गूढभावनियंत्रिता योगमाणिक्यमंजूषास्फुटमुद्घाट्यतेऽधुना उक्तानुवादपूर्वकं कापिलं योगं पृच्छति कपिल इति त्रिभिः

वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ४५ आत्मानं सर्वभूतेषु भगवंतमव
स्थितं अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ४६ इच्छाद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तियोगेन प्राप्ता भा
गवती गतिः ४७ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेय चतुर्विंशतितमोऽध्यायः २४ शौनक उवाच कपि
लस्तत्त्वसंख्याता भगवानात्ममायया जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां १ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयो
गिनां विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मेऽसवः २ यद्यद्विधत्ते भगवान् स्वच्छंदात्मात्ममायया तानि मे श्रद्दधानस्य कीर्तन्यान्यनु
कीर्तय ३

तत्त्वानां संख्याता गणतः सांख्यप्रवर्त्तक इत्यर्थः अतएव स्वयं जातः आत्मप्रज्ञप्तये आत्मतत्त्वज्ञापनाय १ पुंसां मध्ये वर्ष्मणः
वृद्धस्य उत्तमस्येत्यर्थः सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भवितृप्रधानोऽयं निर्देशः वरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वादित्य
र्थः विश्रुतौ कीर्तौ असव इंद्रियाणि भूरि अलं न तृप्यंति श्रुतेन श्रवणेन दीव्यति द्योतत इति तथा तस्य यद्वा भूरि बहुशः श्रुतो देवो येन त
स्यापि मे असव इति संबंधः २ स्वानां छंदेन इच्छया आत्मा देहो यस्य सः यद्यत्कर्म विधत्ते तानि कर्माणि कीर्तनार्हाणि अनुकीर्तय ३

यथात्वंमांप्रचोदयसि एवंप्रचोदितः सन् तथा तत्प्रश्नानुसारेण अन्वीक्षिक्यां आत्मविद्यायां ४ बिंदुसरे बिंदुसरसि ५
तत्वमार्गस्याग्रंपारंदर्शयतीतितथा एषमानविने गर्भप्रविष्टइत्यादि धातुर्वचः ६ असताभिंद्रियाणांतर्षणात् विषयाभि
लाषात् निर्विण्णाश्रांतास्मि एनसंभाव्यमानेन पूर्यमाणेन ७ पारंगमयतीतिपारगं त्वमेवश्रेष्ठंचक्षुर्मयालब्धंत्वदनुग्रहजा

सूतउवाच द्वैपायनसरवस्त्वेवंमैत्रेयोभगवांस्तथा प्राहेदं विदुरंप्रीतआन्वीक्षीक्यांप्रचोदितः ४ मैत्रेयउवाच पितरि
प्रस्थितेरण्यंमातुःप्रियचिकीर्षया तस्मिन्बिंदुसरेवासीद्भगवान् कपिलः किल ५ तमासीनमकर्माणंतत्वमार्गाग्र
दर्शनं स्वसुतंदेवहूत्याहधातुःसंस्मतीवचः ६ देवहूति० निर्विण्णानितरांभूमन् असदिंद्रियतर्षणात् येनसंभाव्य
मानेनप्रपन्नांधंतमः प्रभो ७ तस्यत्वंतमसांधस्यदुःपारस्याद्यपारगं सच्चक्षुर्जन्मनामंतेलब्धंमेत्वदनुग्रहात् ८
यआद्योभगवान्पुंसामीश्वरोवैभवान्किल लोकस्यतमसांधस्य चक्षुः सूर्यइवोदितः ९ अथमेदेवसंमोहमपाक्रष्टुंत्व
मर्हसि योवग्रहोहंममेतीत्येतस्मिन्योजितस्त्वया १० तंत्वागताहंशरणंशरण्यंस्वभृत्यसंसारतरोःकुठारं जिज्ञासयाहंप्रकृ
तेःपूरुषस्यनमामिसद्धर्मविदांवरिष्ठं ११ मैत्रेयउवाच इतिस्वमातुर्निरवद्यमीप्सितं निशम्यपुंसामपवर्गवर्धनं धियाभि
नंद्यात्मवतांसतांगतिर्बभाषईषत्स्मितशोभिताननः १२ इत्यपामंत्रितोमात्रासंस्तुतसमहामुनिः तत्वज्ञानार्थ्यत्वशः
करुणः प्रत्यभाषत १३

त्मनामंतेभाव्येसति ८ तत्प्रपंचयति सभगवानचक्षुरूपउदितः सूर्यायथा ९ अपाक्रष्टुं अपनेतुं कोसौसंमोहः तमाह एतस्मिन्देहादौत
यै वयोजितोयो हंममेत्यवग्रहः आग्रहः द्वितीयइतिशब्दः तत्कार्यरागादिग्रहणार्थः १० प्रकृतेःपुरुषस्यचजिज्ञासयात्वा
महंशरणंगतासतीनमामीत्यन्वयः कुठारंछेत्तारं ११ अपवर्गवर्द्धनंमोक्षेरतिजनकं ईषत्स्मितेनशोभितमाननंयस्य १२ १३

379 / 1981

आध्यात्मिकआत्मनिष्ठः यत्रयस्मिन् १२ १४ तत्रसर्वांगनैपुण्यंचित्तसंयमाधीनमितिदर्शयन्नाह चेतइति अस्यात्मनो
जीवस्यगुणेषुविषयेषुपुंसिपरमेश्वरे वाशब्दस्तुशब्दार्थः १५ यथाचित्तसंयमेपुरुषार्थसिद्धिस्तद्दर्शयति अहमितित्रिभिः
मलैर्वीतंविरहितंयदाशुद्धंमनोभवति मनःशुद्धेर्ज्ञापकमाह अदुःखमिति १६ निरंतरंनिर्भेदं अणिमानंसूक्ष्मं अखंडितमप

श्रीभगवानुवाच योगआध्यात्मिकःपुंसांमतोनिःश्रेयसायमे अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्यच १३ तमिमंतेप्रवक्ष्या
मियमवोचंपुरानघे ऋषीणांश्रोतुकामानांयोगंसर्वांगनैपुणं १४ चेतः खल्वस्यबंधायमुक्तयेचात्मनोमतं गुणेषु
सक्तंबंधायरतंवापुंसिमुक्तये १५ अहंममाभिमानोत्थैःकामलोभादिभिर्मलैः वीतंयदामनःशुद्धमदुःखमसुखंसमं १६
तदापुरुषआत्मानंकेवलंप्रकृतेःपरं निरंतरंस्वयंज्योतिरणिमानमखंडितं १७ ज्ञानवैराग्ययुक्तेनभक्तियुक्तेनचात्मना
परिपश्यत्युदासीनंप्रकृतिंचहतौजसं १८ नियुज्यमानयाभक्त्याभगवत्यखिलात्मनि सदृशोस्तिशिवःपंथायोगिनांब्रह्म
सिद्धये १९ प्रसंगमजरंपाशमात्मनःकवयोविदुः सएवसाधुषुकृतोमोक्षद्वारमपावृतं तितिक्षवःकारुणिकाःसुहृदःसर्वदेहि
नां अजातशत्रवःशांताःसाधवःसाधुभूषणाः २१ मय्यनन्येनभावेनभक्तिंकुर्वंतियेदृढां मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबांधवाः
२२

स्थितं १७ हतौजसं क्षीणबलं १८ मनःशुद्धौचभक्तिरेवांतरंगसाधनमित्याहनेति १९ अस्यसर्वस्यापिसत्संगोमूलमित्याह प्र
संगमिति अपावृतं निरावरणं २० साधूनांलक्षणमाह तितिक्षवइति चतुर्भिः साधवः शास्त्रानुवर्तिनः साधुसुशीलंतदे
वभूषणंयेषां २१ २२ श्रीकृष्ण वासुदेव श्रीः ७ कृष्णायवासुदेवायहरयेपरमात्मने प्रणतःक्लेशनाशायगोविंदायनमोनमः ७

भा० एतान्उक्तलक्षणान् तापा अध्यात्मिकादयो न तपंतीति न व्यथयंति कुतः मत्कृतं चेतो येषां तान् २२ येतापैर्नाभिभूयंते ते साधव त०
इत्यर्थः २४ सत्संगस्य भक्त्यंगतामुपपादयति सतामिति वीर्यस्य सम्यक् वेदनं यासु ताः वीर्यसंविदः हृत्कर्णयोर् रसायनाः सुखदाः तासां जोष
८० णात् सेवनात् अपवर्गो विद्या निवृत्तिः वर्त्म यस्मिन् तस्मिन् तस्मिंहरौ प्रथमं श्रद्धा ततो रतिः ततो भक्तिः अनुक्रमिष्यति क्रमेण भविष्यतीत्य
र्थः २५ ततः किमत आह भक्त्येति मम रचनासृष्ट्यादिलीला तस्य अनुचिंतया या भक्तिस्तया ऐंद्रियात् सुखात् जातविरागः सन् दृष्टश्रु

मदाश्रयाः कथा मृष्टाः शृण्वंति कथयंति च तपंति विविधास्तापाः नैतान् मद्गतचेतसः २३ तएते साधवः साध्वि सर्वसंगविवर्जि
ताः संगस्तेष्वथ ते प्रार्थ्यः संगदोषहराहि ते २४ सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपव
र्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति २५ भक्त्या पुमान् जातविराग ऐंद्रियात् दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्य यत्तो ग्रहणे यो
गयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः २६ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन योगेन मय्यर्पितया च भक्त्या मां प्रत्यगा
त्मानमिहावरुंधे २७ देवहूतिरुवाच काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसान्वाश्नवा अहं २८
यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्त्वावबोधनं २९ तदेतन्मे विजानीहि यथाहं मं
दधीर्हरे सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ३० वासुदेव राम्

तात् ऐहिकामुष्मिकात् ततो यत्नउद्युक्तः सन् चित्तस्य ग्रहणे यतिष्यति ऋजुभिः भक्तिप्रधानत्वादनायासैः २६ तदेवं प्रकृतेर्गुणा श्री:
नामसेवया ज्ञानादिभिश्च अयं जीवः इहैव देहे मामेवावरुंधे प्राप्नोति २७ काचिदिति कास्विदित्यर्थः उचिता योग्या तत्रापि मम
स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं तव पदं स्वरूपं अन्वाश्नवै अनंतरमेव सर्वात्मना प्राप्स्यापि अंजसा त्विति पाठे अहं त्विति ८०
संबंधः २८ भगवद्बाणः यो भगवंतं लक्षी करोतीत्यर्थः यतः यस्मात् योगात् २९ विजानीहि विशेषेण ज्ञापय सुखं अनायासेन ३०

331/1981

इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहत्वे हेतुः यत्र यस्यां तन्वा देहेनाविर्भूतः तत्त्वान्वाम्नायंते अनुक्रम्यंते यस्मिन् किंतत् यात्सां
ख्यं प्रवदंति तत्प्रोवाच भक्तिवितानं च योगं च ३१ काचित्त्वय्युचिता भक्तिरिति पृष्टां मुख्यां भक्तिं लक्षयति गुणा विषयाः लिंग्यंते
ज्ञायंते यैस्तेषां देवानां द्योतनात्मकानामिंद्रियाणां तदधिष्ठातॄणां वा सत्वे सत्त्वमूर्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीय
सीत्युत्तरेणान्वयः कथंभूताः अनिमित्ता निष्कामा स्वाभाविकी अयत्नसिद्धा तेषामेवं विधवृत्तौ हेतुमाह उरोरुच्चारण मनुश्रूयते

श्रीमैत्रेय उवाच विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्त्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भ
क्तिवितानयोगं ३१ श्रीभगवानुवाच देवानां गुणलिंगानामानुश्रविककर्मणां सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु
या ३२ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी जरयत्याशु या कोशं निगीर्णमनलो यथा ३३ नैकात्मतां मे स्पृहयंति केचि
न्मत्पादसेवाभिरता मदीहाः येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ३४ पश्यंति ते मे रुचिराण्यंब संतः
प्रसन्नवक्त्रारुणलोचनानि रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ३५ वासुदेव नारायण गोविंद

इत्यनुश्रवो वेदः तद्विहितमानुश्रविकं तदेव कर्म येषां अतएव एकं एकरूपमविकृतं मनो यस्य पुंसः शुद्धसत्वस्येत्यर्थः ३२ मुक्तिश्च
प्रासंगिकी भवत्येवेत्याह या भक्तिः कोशं लिंगशरीरं जरयति क्षपयति स्वप्रयत्नं विनैव प्रसिद्धो दृष्टांतः निगीर्णं भुक्तमन्नं अनलो जा
ठरो यथा जरयतीति ३३ भक्तेर्गरिष्ठत्वमेवोपपादयति नैकात्मतामिति पंचभिः एकात्मतां सायुज्यं मोक्षं मदर्थमीहाः क्रिया येषां प्रसज्य आ
सक्तिं कृत्वा पौरुषाणि वीर्याणि ३४ प्रसन्नान्यरुणानि लोचनानि येषु तैर्मद्रूपैः साकं सह नित्यं परमेश्वरानुभवसुखभक्त्वावधिकमिति भावः ३५

भा० आनंदस्त्ववश्यंभावीत्याह नैरिति दर्शनीयामनोहरा अवयवा मुखनेत्रादयो येषु तैः हृतआत्मा चित्तं येषां हृता आकृष्टा प्राणा टी०
श्चेंद्रियाणि येषां तान्भजतः अनिच्छतः इच्छाहीनानपि अण्वीं गतिं मुक्तिं प्रयुंक्ते प्रापयति कैः साधनैर्हृतात्मानः उदारैर्विला
८१ सादिभिः तत्र विलासो लीला वामं मनोहरं सूक्तं मधुरं भाषणं २६ विभूत्याधिकं च तत्राधिकमित्याह अथो अविद्यानिवृत्त्यनंत
रं विभूतिं सत्यलोकादिगतां भोगसंपत्तिं अणिमाद्यष्टांगमैश्वर्यं अनुप्रवृत्तं भक्तिमनुस्वत एव प्राप्तमपि भागवतीं च श्रियं वैकुंठस्थां
संपत्तिं अस्पृहयंति तेयद्यपि नस्पृहयंतीत्यर्थः तथापि तु लोके वैकुंठे अश्नुवते प्राप्नुवंत्येव २७ नन्वेवं तर्हि लोकत्वाविशेषात्

तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते २६
अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे तेश्नुवते तु लोके २७
नकर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेनिमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं २८
इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह ये रायः पशवो गृहाः ३९ नारायण नारायण गोविंद हरे

स्वर्गादिवत् भोक्तृभोग्यानां कदाचिद्विनाशः स्यात्तत्राह हे शांतरूपे यद्वा शांतं शुद्धसत्त्वं तद्रूपे वैकुंठे सत्पराः कदाचिदपि न नंक्ष्यं
ति भोग्यहीना न भवंति अनिमिषो मे हेतिः मदीयं कालचक्रं च नो लेढि तान्नग्रसति तत्र हेतुः येषामिति सुत इव स्नेहविषयः सखे श्री:
व विश्वासस्पदं गुरुरिवोपदेष्टा सुहृदिव हितकारी इष्टं दैवमिव पूज्यः एवं सर्वभावेन मयि भजंति तान्मदीयं कालचक्रं न ग्रसतीत्यर्थः २८
एवंभूतां तु मुक्तिं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्यां उभयायिनं लोकद्वयगामिनं आत्मानं सोपाधिकं आ ८१
त्मानमनुये पुत्रकलत्रादयः ये च पश्वादयः रायः धनानि ३९ राम राम गोविंद श्री: श्री: श्री: श्री: श्री: श्री:७

383/1981

अन्यांश्च परिग्रहान् मृत्योः संसारात् अतिपारये अतितारयामि ४० अभक्तानां तु न कथंचिदपि मोक्ष इत्याह नेति मद्भगवतो
न्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं निरपेक्षत्वं हितकारित्वं चोक्तं ४१ ऐश्वर्यं स्फु
टयति मद्भयादिति श्रुतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ४२ मद्भ
नादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति ज्ञानेति ४३ उपसंहरति एतावानिति मय्यर्पितं सन्मनः स्थिरं भवतीयत् एतावानेव
४४ इति तृतीये पंचविंशः २५ षड्विंशे पुंप्रकृत्योस्तु विवेकायोपवर्ण्यते सांख्येय सर्वभावानां जन्मलक्षणभेदतः १ धात्रा

विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ४० नान्यत्र मद्भगवतः प्रधा
नपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ४१ मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतींद्रो द
हत्यग्निर्मृत्युश्चरति मद्भयात् ४२ ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं
४३ एतावानेव लोकेस्मिन्पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ४४ इति श्रीभाग० कापिलेयो
गः पंचविंशः २५ श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १
ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २

प्रार्थयत्योक्तं क्षेत्रेमित्रासुतेनयत् मात्रे सांख्यं तदध्यात्मप्राधान्येनाहतत्त्ववित् तत्त्वाम्नायं यत्प्रवदंति सांख्यं इत्यत्र सांख्यं भक्ति
योगश्चेति त्रयमुपक्षिप्तं तत्र भक्तिमुक्त्वा इदानीं सांख्यमाह अथेति १ ननु मुक्तिरात्मज्ञानादेव न तु तत्त्वलक्षणज्ञानात् तमेव विदित्वा
तिमृत्युमेतीति श्रुतेः अत आह ज्ञानमिति आत्मदर्शनरूपं ज्ञानं अत एव हृदयग्रंथिभेदनं अहंकारनिवर्तकं निःश्रेयसप्रयो
जनाय यदाहुः तत्ते वर्णयामि तत्त्वलक्षणादेव विविक्तात्मज्ञानं भवतीति भावः २ वासुदेव नारायण गोविंद माधव श्री:

भा० टी०

८२

तत्रपुरुषंलक्ष्ययति अनादिरिति आत्मैवपुरुषः कोसावात्मा प्रत्यक् प्रतिलोमं धाम स्फूर्तिर्यस्य क्षणिकपक्षंव्या वर्त्तयति अनादिरिति संसारित्वपक्षंव्यावर्त्तयति प्रकृतेः परः अन्यः असंगः ज्ञानादिगुणत्वंवारयतिनिर्गुणः मीमां सकाद्यभिमतंज्ञानविषयत्वंवारयति स्वयंज्योतिः अनेनैव प्रभाकराभिमतंज्ञानाधारत्वेनस्फुरणमपिनिरस्तं स्वयंज्यो तिष्ट्वेहेतुः विश्वंयेनसमन्वितंप्रकाशतइतिशेषः एतैरेवहेतुभिः पुरुषस्य प्रकृतेः परत्वमपिसिद्धं ३ अज्ञावरणविक्षेपशक्ति भेदेनप्रकृतिर्द्वेधा तत्रावरणशक्त्यासैवजीवोपाधिरविद्याविक्षेपशक्त्यासैवमायापारमेश्वरीपुरुषश्चजीवेश्वररूपेण

अनादिरात्मापुरुषोनिर्गुणः प्रकृतेःपरः प्रत्यक्धामास्वयंज्योतिर्विश्वंयेनसमन्वितं ३ सएषप्रकृतिंसूक्ष्मां दैवींगुणमयींविभुः यदृच्छयैवोपगतामभ्यपद्यतलीलया ४ गुणैर्विचित्राःसृजतींसरूपाःप्रकृतिंप्रजाः विलोक्यमु मुहेसद्यःसइहज्ञानगूहया ५ एवंपराभिध्यानेनकर्तृत्वंप्रकृतेःपुमान् कर्मसुक्रियमाणेषुगुणैरात्मनिमन्यते ६ तम्

द्विविधः तत्रयः प्रकृतिविवेकेनसंसरतिसजीवः यस्तुप्रकृतिंवशीकृत्यविश्वसृष्ट्यादिकरोतिसपरमेश्वरः तत्रप्रकृत्यविवेके नजीवस्यसंसारप्रकारमाह सएषइतिपंचभिः सूक्ष्मांअव्यक्तांदैवींदेवस्यविष्णोःशक्तिंलीलयाउपगतांयदृच्छयैवाभ्यप द्यतेत्यन्वयः ४ तस्यालीलयाह गुणैरिति ज्ञानंगूहतिआवृणोतीतिज्ञानगूहातया तथाचश्रुतिः अजामेकांलोहितशु क्लकृष्णांबह्वींप्रजांजनयंतींसरूपांअजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यइति मुमुहेआत्मानंविस्मृतवान् ५ पराभिध्यानंप्रकृत्यध्यासः तेनप्रकृतेस्तैर्गुणैः कर्मसुक्रियमाणेषुकर्तृत्वमात्मनिमन्यते ६ श्रीगोपालकृष्ण श्रीः

८२

385
1981

तदिति कर्तृत्वमननमेव अस्यपुरुषस्यसाक्षिमात्रस्याकर्तुरेवसतः कर्मभिबंधः ईशस्यअपरतंत्रस्यैवकर्मबंधकृतंभो गेपारतंत्र्यं निर्वृतात्मनः सुखात्मकस्यैवसंसृतिः जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वंभवतीत्यर्थः ७ ननुचैतन्यसा मानाधिकरण्येनैवकर्तृत्वादिप्रतीतेस्तस्यैवनतदंगीक्रियतांनेत्याह कार्यंशरीरंकारणमिंद्रियंकर्त्तादेवतावर्गः तद्भावापत्तौपुरुषस्य प्रकृतिंकारणंविदुः कूटस्थस्यस्वतोविकाराभावात् प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेवकर्तृत्वादिकमित्यर्थः भोक्तृत्वेतुपुरु

तदस्यसंसृतिर्बंधः पारतंत्र्यंचतत्कृतं भवत्यकर्तुरीशस्यसाक्षिणोनिर्वृतात्मनः ७ कार्यकारणकर्तृत्वेकारणंप्रकृतिं विदुः भोक्तृत्वेसुखदुःखानांपुरुषंप्रकृतेःपरं ८ देवहूतिरुवाच प्रकृतेःपुरुषस्यापिलक्षणंपुरुषोत्तम ब्रूहिकारण योरस्यसदसच्चयदात्मकं ९ श्रीभगवा० यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मकं प्रधानंप्रकृतिंप्राहुरविशेषंविशेषवत् १०

षंकारणंविदुरित्यस्यायंभावः यद्यप्यहंकारगतमेवकर्तृत्वादिभोक्तृत्वंच तथाविकारस्यजडावसानत्वादुपाधिप्राधान्यंभोगस्यचि दवसानत्वादुपहितप्राधान्यमिति ८ तदेवंसंसारिणंपुरुषंतद्धेतुंप्रकृतिंचज्ञात्वेदानींजगत्कारणमीश्वरंतत्प्रकृतिंचपृच्छति प्रकृ तेरिति अस्यविश्वस्यसदसच्चस्थूलंसूक्ष्मंचकार्यंयदात्मकंतयोःपुरुषप्रकृत्योः ९ तत्रप्रकृतितत्त्वंलक्षयति यत्प्रधानंतदेवप्र कृतिंप्राहुः किंतत्प्रधानंस्वतोविशेषंविशेषवत् विशेषाणामाश्रयः तर्हिकिंब्रह्म नत्रिगुणंकिंमहत्तत्वादि नअव्यक्तं अकार्यं किंकालादिन सदसदात्मकं कार्यकारणरूपं किं जीवप्रकृतिः ननित्यं १० श्रीरामजयरामजयजयराम श्रीः

भा० त०
८३

अन्येषांतत्वानांलक्षणंवक्तुंतानिगणयतिपंचभिरित्यादिसांख्यभेदेनएतच्चतुर्विंशतिकं एतानिचतुर्विंशतिर्यस्मिन्गणेतंगणं
प्रधानकार्यात्मकंब्रह्मविदुः ११ एतद्विवृणोतिमहाभूतानित्रिभिः तावंतिपंचैव १२ अंतरात्मकमंतःकरणं लक्षणरूपयाव्यवच्छेदकया
१३ १४ यावान्मयाप्रोक्तः एतावानेतसंख्यातः तत्वज्ञैः कालंतुमतद्वयमाह यःकालःसपंचविंशकः प्रकृतेरेवावस्थाविशेषइत्यर्थः १५
एकेतुपौरुषंपुरुषस्येश्वरस्यप्रभावंविक्रमंकालमाहुः तमेवकालंद्वेधालक्षयति यतोभयमवतिकस्यप्रकृतिंईयुषः प्राप्तस्य अतएवदेहे

पंचभिः पंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकंगणंप्राधानिकंविदुः महाभूतानिपंचैव भूरापोग्निर्मरुन्नभः
तन्मात्राणिचतावंतिगंधादीनिमतानिमे १२ इंद्रियाणिदशश्रोत्रंत्वक्दृग्रसननासिकाः वाक्करौचरणौमेढ्रं
पायुर्दशमउच्यते १३ मनोबुद्धिरहंकारश्चित्तमत्यंतरात्मकं चतुर्धालक्ष्यतेभेदोवृत्यालक्षणरूपया १४ एतावानेवसं
ख्यातोब्रह्मणःसगुणस्यह सन्निवेशोमयाप्रोक्तोयःकालःपंचविंशकः १५ प्रभावंपौरुषंप्राहुःकालमेकेयतोभयं अ
हंकारविमूढस्यकर्तुःप्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि चेष्टायतःसभगवान्कालइत्युप
लक्षितः १७ अंतपुरुषरूपेणकालरूपेणयोबहिः समन्वेत्येषसत्वानांभगवानात्ममायया १८ रामकृष्णवासुदेव

अहंकारेणविमूढस्यकर्तुर्जीवस्य अनेनसंहारकत्वेनलक्षितः १६ सृष्टिहेतुत्वेनलक्षयतिप्रकृतेरिति १७ कोसौभगवानमाह अतःसर्वप्राणि श्रीः
नांयःपुरुषरूपेणनियंतृत्वेनसमन्वेतिसम्यक्कृताहंकाररहितएवानुस्यूतोवर्तते बहिश्चकालरूपेणएषभगवान् यद्वायःपुरुषइतिप्रसि
द्धः कालःसपंचविंशः एकेतुपुरुषस्यप्रभावंकालमाहुः प्रभावस्यैवलक्षणं यतइति पुरुषस्यैवकालत्वेहेतुः प्रकृतेरिति उभयथाविवक्षायांहे ८३
तुः अंतरिति शेषंसमानं तदेवंप्रकृतेश्चचतुर्विंशतिभेदाःजीवेश्वरयोश्चैक्यविवक्षया अतःपंचविंशतितत्वानिभवंति तयोर्भेदविवक्षायांचषड्विंश
तिर्भवंति १८

387/1331

इदानींतत्वानामुत्पत्तिपूर्वकंलक्षणान्याह दैवादित्यादिना एतान्यहंसैंत्येततः प्राक्तनेनग्रंथेन तत्रचित्तस्योत्पत्तिपूर्वकंलक्ष
णमाहचतुर्भिः दैवात्जीवादृष्टात्क्षुभिताधर्मागुणायस्याः योनौअभिव्यक्तिस्थानेप्रकृतौवीर्यंचिच्छक्तिं साप्रकृतिर्महत्तत्वमसूत
महतःस्वरूपमाह हिरण्मयंप्रकाशबहुलं १९ विश्वंअहंकारादिप्रपंचंआत्मगतस्वस्मिन्सूक्ष्मरूपेणस्थितंव्यंजयन् तमोपिबत्
कूटस्थः लयविक्षेपशून्यः आत्मानंप्रस्वापयतीतितथा यत्पूर्वंप्रलयसमयेमहांतंप्रकृतौविलापयामासेत्यर्थः २० प्रसंगाच्चतुर्व्यू
होपासनमाह यत्तदिति सर्वागमप्रसिद्धत्वमाह स्वच्छंविशदं शांतंरागादिरहितं भगवतः पदमुपलब्धिस्थानं अतएववासुदेवाख्यंपदा

दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान् आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयं १९ विश्वमात्मगतंव्यंजन्कूटस्थो
जगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनंतमः २० यत्तत्सत्वगुणंस्वच्छंशांतंभगवतःपरं यदाहुर्वासुदेवाख्यंचित्तंतन्म
हदात्मकं २१ स्वच्छत्वमविकारित्वंशांतत्वमितिचेतसः वृत्तिभिर्लक्षणंप्रोक्तंयथापांप्रकृतिःपरा २२ महत्तत्वाद्विकुर्वाणात्भग
वद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत २३

त्तः अयमर्थः अधिभूतरूपेणतस्यैवमहानितिसंज्ञा अध्यात्मरूपेणचित्तमिति उपास्यरूपेणवासुदेवइति अधिष्ठातुतस्यक्षेत्रज्ञः एवमहंका
रेसंकर्षणउपास्यः चंद्रोधिष्ठाता बुद्धौप्रद्युम्नउपास्यः ब्रह्माधिष्ठातेतितात्पर्यं २० स्वच्छत्वंभगवद्बिंबग्राहित्वं अविकारित्वंलयविक्षेप
राहित्यं अपांप्रकृतिः फेनतरंगादिरहितावस्था पराभूसंसर्गात्प्राक्तनी सायथामधुरात्वच्छा शांताच तद्वदित्यर्थः २२ अहं
कारस्योत्पत्तिपूर्वकंलक्षणमाह महत्तत्वादिति चतुर्भिः क्रियासुशक्तिर्यस्यसक्रियाशक्तिः २३ श्रीगोविंदनारायणवासुदेवश्रीः

भा०
८४

त्रैविध्यमाह वैकारिकइति तस्यकार्यमाह यतः यस्मात् मनआदीनांभवउत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाहुरित्याह सहस्रशि
रसमिति २५ कर्तृत्वंदेवतारूपेण करणत्वमिंद्रियरूपेण कार्यत्वंभूतरूपेण शांतत्वादिकंतु तत्कारणगुणत्रयरूपेण २६ मनसउ
त्पत्तिपूर्वकंलक्षणमाह वैकारिकादितिद्वाभ्यां संकल्पाश्चिंतनंविकल्पोविशेषचिंतनं यस्यमनसः संकल्पविकल्पाभ्यांकामसं
भवो वर्ततइतिकामरूपाश्वनिर्लक्षणत्वेनोक्ता ननुप्रद्युम्नव्यूहोत्पत्तितस्यसंकल्पादिकार्यत्वाभावात् उपास्यव्यूहस्य चानिरु

न०

वैकारिकस्तैजसश्चतामसश्चयतोभवः मनसश्चेंद्रियाणांच भूतानांमहतामपि २४ सहस्रशिरसंसाक्षाद्यमनंतंप्रच
क्षते संकर्षणाख्यंपुरुषंभूतेंद्रियमनोमयं २५ कर्तृत्वंकरणत्वंच कार्यत्वंचेतिलक्षणं शांतघोरविमूढत्वमितिवास्यादहंकृतेः
२६ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत यत्संकल्पविकल्पाभ्यां वर्ततेकामसंभवः २७ यद्विदुर्ह्यनिरुद्धाख्यंहृषीकाणा
मधीश्वरं शारदेंदीवरश्यामंसंराध्यंयोगिभिः शनैः २८ तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रि
याणामनुग्रहः २९ संशयोथविपर्यासोनिश्चयः स्मृतिरेवच स्वापइत्युच्यतेबुद्धेर्लक्षणंवृत्तितः पृथक् ३० श्रीराम्

द्धस्योक्तेः २७ शारदंशरत्कालीनं इंदीवरं नीलोत्पलं तद्वद्विवश्यामं यत्शनैः संराध्यंवशीकर्तुंयोग्यं २८ दुर्ग्रहत्वात् २८ बुद्धे
रुत्पत्तिपूर्वकंलक्षणमाह तैजसादितिद्वाभ्यां हेसति द्रव्यस्फुरणरूपंविज्ञानमितिचितव्याद्वस्यर्थमुक्तं इंद्रियाणामनुग्रहइति श्रीः
सविकल्पज्ञाने २९ हृषीकाणामधीश्वरमितियदुक्तं तत्तुनिर्विकल्पकज्ञाने २९ द्रव्यस्फुरणस्यैवप्रपंचः संशयादिः विपर्या ८४
सोमिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापोनिद्रा प्रमाणविपर्ययविकल्पनिद्रास्मृतयइतिपातंजलेक्तेः ३० वासुदेव

389
1981

इंद्रियाणमुत्पत्तिमाह तैजसानितैजसाहंकाराज्जातानि ज्ञानेंद्रियाणांवैकारिकत्वशंकानिवृत्त्यर्थमेवकारः द्विविधान्यपींद्रिया
णितैजसान्येवेत्यन्वयः तत्रहेतुः प्राणस्येतिहियस्मात् प्राणस्य क्रियाशक्तिः बुद्धेश्वविज्ञानशक्तिता अतः प्राणस्यतैजसत्वात्तत्
क्रियाशक्तिः मतामिंद्रियाणांतैजसत्वंतथाबुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणांतैजसत्वमित्यर्थः ३१ तन्मात्रोत्पत्तिपू
र्वकमाकाशादिमहाभूतोत्पत्तिंतल्लक्षणंचाहतामसादितिपंचदशभिः श्रोत्रंतुशब्दगमित्यादिभिर्विषयोत्पत्त्यनंतरंतत्तत्संबंधमात्रेक
थ्यतेनतदुत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दंगच्छतीतिशब्दगं ३२ शब्दलक्षणमाह अर्थाश्रयत्वंअर्थवाचकत्वं द्रष्टुर्लिंगत्वंकुड्यांतरि

तैजसानींद्रियाण्येवक्रियाज्ञानविभागशः प्राणस्यहिक्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१ तामसाद्धिविकुर्वाणाद्भग
वद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रंचशब्दगं ३२ अर्थाश्रयत्वंशब्दस्यद्रष्टुर्लिंगत्वमेवच तन्मात्रत्वंचनभ
सोलक्षणंकवयोविदुः ३३ भूतानांछिद्रदातृत्वंबहिरंतरमेवच प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षणं ३४ नभसःश
ब्दतन्मात्रात्कालगत्याविकुर्वतः स्पर्शोभवत्ततोवायुः त्वक्स्पर्शस्यसंग्रहः ३५ मृदुत्वंकठिणत्वंचशैत्यमुष्णत्वमेवच एतत्स्प
र्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः ३६

तस्यवक्तृज्ञापकत्वं तदुक्तं लिंगंयद्द्रष्टृदृश्ययोरिति नभसस्तन्मात्रत्वंसूक्ष्मत्वंशब्दस्यलक्षणमित्यन्वयः ३३ छिद्रदातृत्वंअवकाश
दातृत्वंबहिरंतरव्यवहारास्पदत्वं आत्मामनः प्राणादीनांधिष्ण्यत्वंमाश्रयत्वं नाड्यादिछिद्ररूपेण वृत्तिः कार्यमेव लक्षणंवृत्तिलक्षणं एव
मुत्तरत्राप्येकश्लोकेनतन्मात्रलक्षणं तृतीयेनमहाभूतलक्षणमित्यनुसंधेयं ३४ कालात्वक्स्पर्शस्यसंग्रहः सम्यक्ग्रहणंयथापुंस्त्वंनियतलिं
गत्वात् यद्वास्पर्शस्यसंग्रहस्ततोभवतीतिशेषः ३५शब्दतन्मात्रादित्वादितन्मात्राणांमुत्तरोत्तरान्वयार्थमुक्तं स्पर्शत्वस्वरूपलक्षणमित्यर्थः न
भस्वतोवायोस्तन्मात्रत्वंच ३६

भा० चालनंवृक्षशाखादेः व्यूहनंमेलनंतृणादेः प्राप्तिसंयोगः द्रव्यस्यगंधवतोघ्राणंप्रति तथाशैत्यादिमतःस्पर्शनंप्रति शब्दस्य टी०
८५ श्रोत्रंप्रतिनेतृत्वं सर्वेंद्रियाणामात्मत्वमुपोद्बलकत्वं कर्मणाकार्येणाभिलक्षणंभावेत्युद्दकर्मेवाभिलक्षणमितिविग्रहेतुक
रणे ३७ ३८ द्रव्याकृतित्वंद्रव्यस्याकारसमर्पकत्वं गुणताद्रव्योपसर्जनप्रतीति शब्दस्यतुस्वातंत्र्येणैवप्रतीतिः अप्रत्यक्षद्रव्यस्य
शैदिरपिस्वातंत्र्येणैव प्रतीतिः रूपस्यतुनैवमितिस्यायंविशेषउक्तः व्यक्तिसंस्थात्वं द्रव्यस्ययासंस्थासन्निवेशःसैवसंस्थायस्य

चालनंव्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्षणं ३७ वायोश्चस्पर्शतन्मात्राद्रूपंदैव
ेरितादभूत् समुत्थितंततस्तेजश्चक्षूरूपोपलंभनं ३८ द्रव्याकृतित्वंगुणताव्यक्तिसंस्थात्वमेवच तेजस्त्वंतेजसःसाध्वी
रूपमात्रस्यवृत्तयः ३९ द्योतनंपचनंपानमदनंहिममर्दनं तेजसोवृत्तयस्त्वेताःशोषणंक्षुत्तृडेवच ४० रूपमात्राद्विकुर्वा
णात्तेजसोदैवचोदितात् रसमात्रमभूत्तस्मादंभोजिह्वारसग्रहः ४१ कषायोमधुरस्तिक्तःकट्वम्लइतिनैकधा भौति
कानांविकारेणरसएकोविभिद्यते ४२ क्लेदनंपिंडनंतृप्तिःप्राणनाप्यायनोदनं तापापनोदोभूयस्त्वमंभसोवृत्तयस्त्वि
माः ४३ रसमात्राद्विकुर्वाणादंभसोदैवचोदितात् गंधमात्रमभूत्तस्मात्पृथ्वीघ्राणस्तुगंधकः ४४

परिणामतयाप्रतीतिरित्यर्थः तेजस्त्वंतेजस्त्वमसाधारणत्वं ३९ द्योतनंप्रकाशनंपचनंतंडुलादेः क्षुत्तृट्अशनापिपिपासाचतद्द्वा श्रीः
रेणपानंअदनंच ४० जिह्वारसनेंद्रियं रसोगृह्यतेनयेतिरसग्रहः यद्वासंग्रहस्ततोभवतीतिशेषः ४१ कट्वम्लादिषुलवणोपिद्रष्टव्यः भौ ८५
तिकानांसंसर्गिद्रव्याणांयएकोमधुरएवसन्नेवमनेकधाभिद्यतेसरसइत्यर्थः ४२ क्लेदनंआर्द्रीकरणं पिंडीकरणंतृप्तिः तृप्तिदातृत्वं प्राणनं
जीवनंअयोमयः भूयस्त्वंकूपादावुद्धृतस्यापिपुनःपुनःउद्गमः ४३ गंधगःगंधंप्राप्नोति ४४ वासुदेव नारायण मुकुंद माधवश्रीः

391
1991

करंभोमिश्रगंधःयथाव्यंजनादीनांहिंग्वादिसंस्कारे पूतिदुर्गंधिः सौरभ्यंकर्पूरादेः शांतःशतपत्रादेः शांतःशतपत्रादेःउ
ग्रोलशुनादेः आम्लःचिंचिण्यादेः संसर्गिणांद्रव्यावयवानांवैषम्यात् सएवंविभिद्यतेसगंधइत्यर्थः ४५ ब्रह्मणोभावनं
प्रतिमादिरूपेण साकारतापादनं स्थानंजलादिविलक्षणतयातन्निरपेक्षेणस्थितिः धारणंजनाद्याधारत्वं सतामाका
शादीनांविशेषणमवच्छेदकत्वंसर्वेषांसत्वानांप्राणिनांतद्गुणानांचपुंस्त्वादीनांउद्भेदःपरिणामविशेषःप्रकटीकरणं ४६ श्रोत्रा
दीनांशब्दादिग्राहकत्वमुक्तं तेषांचलक्षणंतदेवेत्याह पंचभिःश्लोकार्धैः नभसोगुणविशेषः शब्दोयस्यार्थोविषयः ४७ ४८

करंभपूतिसौरभ्यशांतोग्राम्लादिभिः पृथक् द्रव्यावयववैषम्यात्गंधएकोविभिद्यते ४५ भावनंब्रह्मणस्थानंधारणं
सद्विशेषणं सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ४६ नभोगुणविशेषोर्थोयस्यतच्छ्रोत्रमुच्यते वायोर्गुणविशे
षोर्थोयस्यतत्स्पर्शनंविदुः ४७ तेजोगुणविशेषोर्थोयस्यतच्चक्षुरुच्यते अंभोगुणविशेषार्थोयस्यतद्रसनंविदुः ४८
भूमेर्गुणविशेषोर्थोयस्यसघ्राणउच्यते परस्यदृश्यतेधर्मोह्यपरस्मिन्समन्वयात् ४९ अतोविशेषोभावानांभूमावेवोप
लभ्यते एतान्यसंहत्ययदामहदादीनिसप्तवै कालकर्मगुणोपेतोजगदादिरुपाविशत् ५० ततस्तेनानुविद्धेभ्योयुक्तेभ्यो
उम्नचेतनं उत्थितंपुरुषोयस्मादुदतिष्ठदसौविराट् ५१
गुणविशेषशब्दयावर्त्यंदर्शयतिपरस्यकारणस्यधर्मः शब्दादिःअपरस्मिंकार्येवाय्वादौकारणान्वयाद्दृश्यते अतोभावनामाकाशा
दीनांविशेषागुणाःसर्वोपिशब्दादिधर्मभावेवोपलभ्यते चतुर्णांतत्रान्वयात्जलादिषुयथान्वयमेवनसर्वः आकाशेत्वन्यान्वया
भावादेकएवेति ४९ एवंकारणोत्पत्तिमुक्त्वाकार्योत्पत्तिमाह सार्धैःत्रिभिः एतान्यसंहत्यअमीलितायदास्थितानितदाजगदादि
दीश्वरःप्राविशत्सप्तेतिच प्राधान्याभिप्रायेणोक्तंमेवशक्तसर्वेष्वपिविवक्षितएव ५० अनुविद्धेभ्यःक्षोभितेभ्यःयस्मादंडादसौवि
राट्पुरुषउदतिष्ठत् ५१

भा० टी०

८६

५२ भगवतोरूपमिनीपुरुषाभेदाभिप्रायेण तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिःउत्था
यऔदासिन्यंविहाय तमाविश्यअधिष्ठायमहांश्चासोदेवश्चसवं छिद्रं ५३ वाण्यासहवह्निभवत् प्राविशत् नासे
निरभिद्येतांप्राणोतःप्राणेनउतःस्यूतःसन्घ्राणः एतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणादनंतरंवायुश्च भा

एतदंडं विशेषारव्यंक्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ५२ यत्रलोकवितानोयंरूपंभ
गवतोहरेः हिरण्मयादंडकोशादुत्थायसलिलेशयात् तमाविश्यमहादेवो बहुधानिर्बिभेदरवं ५२ निर्भिद्यतास्य
प्रथमंमुखंवाणिततोभवत् वाण्यावह्निरथोनासे प्राणोतो घ्राणतो प्राणएतयोः ५४ घ्राणाद्वायुरभिद्येतामक्षि
णीचक्षुरेतयोः तस्मात्सूर्योन्वभिद्येतांकर्णौश्रोत्रंततोदिशः ५५ निर्बिभेदविराजस्त्वक्रोमश्मश्र्वादयस्ततः ततः
ओषधयस्चासन् शिश्नंनिर्बिभिदेततः ५६ रेतस्तस्मादापआसन्निरभिद्यतवैगुदं गुदादपानोपानाच्चमृत्युर्लो
कभयंकरः ५७ हस्तौचनिरभिद्येतांबलंताभ्यांततःस्वराट् पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः ५८ नाड्योस्य
निरभिद्यंतताभ्योलोहितमाभृतं नद्यस्ततःसमभवन्उदरंनिरभिद्यत ५९ क्षुत्पिपासेततःस्यातांसमुद्रस्त्वेतयोर
भूत् अथास्यहृदयंभिन्नंहृदयात्मनउत्थितं ५९ मनसश्चंद्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः अहंकारस्ततोरुद्रश्चित्तंचे
त्यस्ततोभवत् ६० एतेह्यभ्युत्थितादेवानैवास्योत्थापनेशकन् पुनराविविशुःखानितमुत्थापयितुंक्रमात् ६१ श्री

प्णोतइतिविशेषणंसर्वेंद्रियेष्वपिद्रष्टव्यं चक्षुरिंद्रियादनंतरंप्राविशत्न्यभिद्येतांअन्वभिपतामितिपाठद्वयेप्येकएवार्थः ततोदि
शःप्राविशन् ५५ आदिशब्देनकेशाः ५६ ५७ स्वराडिंद्रः हरिर्विष्णुः ५८ अमृतंजातं ५९ बुध्यादिषुहृदयमेवाधि ८६
ष्ठानं गिरांपतिर्ब्रह्मा ६० चैत्यः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञंविविक्तुंसर्वेषांपुनःप्रवेशमाह ६१ तमजयंअयमन

393/1981

६९ एतद्इतिनवभिः विराड्देहस्यव्यष्टिदेहंदृष्टांतत्वेनदर्शयन्सांख्यानुकथनस्यप्रयोजनमाह यथेतिद्वाभ्यां ७० प्र
थमंपरमेश्वरेभक्तिस्ततोन्यत्रविरक्तिः ततोयोगप्रवृत्ताधीः एकाग्रंचित्तं ततोयत्ज्ञानंतेनप्रत्यगात्मानंक्षेत्रज्ञंअस्मिन्ना
त्मनिकार्यकारणसंघातेविविच्यचिंतयेत् ७१ इतितृतीयेषड्विंशोध्यायः २६ सप्तविंशेततःसम्यक्बहुसाधनयोगतः पुंप्र

वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् घ्राणेननासिकेवायुर्नोदतिष्ठत्तदाविराट् ६२ अक्षिणीचक्षुषादित्योनोदतिष्ठ
त्तदाविराट् श्रोत्रेणकर्णौचदिशोनोदतिष्ठत्तदाविराट् ६३ त्वचंरोमभिरोषध्योनोदतिष्ठत्तदाविराट् हस्ताविंद्रोबलेनैव रेतसा
शिश्नमापस्तुनोदतिष्ठत्तदाविराट् ६४ गुदंमृत्युरपानेननोदतिष्ठत्तदाविराट् हस्ताविंद्रोबलेनैवनोदतिष्ठत्तदाविराट् ६५ वि
ष्णुर्गत्यैवचरणौनोदतिष्ठत्तदाविराट् नाडीर्नद्योलोहितेननोदतिष्ठत्तदाविराट् ६६ क्षुत्तृड्भ्यामुदरंसिंधुर्नोदतिष्ठत्तदाविराट्
हृदयंमनसाचंद्रोनोदतिष्ठत्तदाविराट् ६७ बुध्याब्रह्मापिहृदयंनोदतिष्ठत्तदाविराट् रुद्रोभिमत्याहृदयंनोदतिष्ठत्तदाविराट्
६८ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा विराट्तदैवपुरुषःसलिलादुदतिष्ठत ६९ यथाप्रसुप्तंपुरुषंप्राणेंद्रियमनोधियः
प्रभवंतिविनायेननोत्थापयितुमोजसा ७० तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तया भक्त्याविरक्त्याज्ञानेनविविच्यात्मनि
चिंतयेत् ७१ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलीयेतत्वसमाम्नायेषड्विंशतितमोध्यायः २६ श्री
भगवानुवाच प्रकृतिस्थोपिपुरुषोनाज्यतेप्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाजलार्कवत् १

क्तेशाविवेकेनमोक्षरीतिर्निरूप्यते विवेकज्ञानेनमोक्षमुपपादयितुंशुद्धस्यैवपुरुषस्यपूर्वोक्तंप्रकृत्यविवेकतःसंसारमनुस्मारयति
प्रकृतिस्थोपीतित्रिभिःदेहस्थोपिनसज्यतेनलिप्यते गुणैःतत्कृतैःसुखदुःखादिभिर्निर्गुणत्वादकर्तृत्वंततोविकारित्वंतस्मात् १ श्रीराम

२ अनिर्वृतः सन् प्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यग्नरादिषु संसारपदवीं प्राप्नोति ३ ननु नर्थ एवासत्त्वात्
संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह अर्थेहीति ४ यतो विषयध्यानमनर्थहेतुः अतो मनो नियंतव्यमित्याह अत एवेति अ
सतामिंद्रियाणां पथि विषयमार्गे तीव्रेणादृढेन विरक्त्या च तीव्रया ५ भक्तिविरक्त्योस्तीव्रत्वे कारणानि वर्णयन् ज्ञानेन मोक्षप्रका
रमाह षड्भिः यस्मादिभिर्योगमार्गैश्चित्तमभ्यसन् पुनः पुनरेकाग्रीकुर्वन् आत्मानमुपलभ्य सर्वानुस्यूतमद्वयं परमात्मानं प्रति

सएष यर्हि प्रकृतेर्गुणेष्वभिविषज्यते अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते २ तेन संसारपदवीमवशोऽभ्येत्य
निर्वृतः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य
स्वप्नेनर्थागमो यथा ४ अत एव शनैश्चित्तं प्रसक्तमसतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ५ यमादिभिर्योग
पथैरभ्यसन् श्रद्धयान्वितः मयि भावेन सत्येन मत्कथाश्रवणेन च ६ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ब्रह्मचर्येण मौ
नेन स्वधर्मेण बलीयसा ७ यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ८
सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तबुध्यवस्थानो दूरीभूतान्यदर्शनः
उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् ९ ॥ चक्षुरवछिन्नेनार्केण गगनस्थमर्कमिव एवमात्मदृक् शुद्धमात्मानं पश्यन् १०

पद्यत इति षष्ठेनान्वयः सत्येन निष्कपटेन भावेन प्रेम्णा ६ अप्रसंगतः संगत्यागेन बलीयसा ईश्वरार्पितेन ७ विविक्तशरणः एकांतवा
सी ८ असदाग्रहं अहंममतां प्रकृतेः पुरुषस्य च दृष्टं तत्त्वं येन तेन ज्ञानेन ९ निवृत्तानि बुध्यवस्थानानि जाग्रदादीनि यस्य सः अत एव दूरीभू
तमन्यदर्शनं यस्य आत्मना अहंकारावछिन्नेन आत्मानं शुद्धमुपलभ्य एकस्यैवापाधेर्दानवच्छेदाभ्यां करणत्वकर्मत्वे दृष्टांतमाह चक्षुषा

395/1981

मुक्तलिंगं निरुपाधिकं असति मिथ्याभूते हंकारे सदाभासं सद्रूपेणाभासमानं ब्रह्म प्राप्नोति शुद्धजीवस्वरूपाद्विशेषमाह सतः का
रणस्य प्रधानस्य बंधुमधिष्ठानं असतः कार्यस्य च चक्षुरिव प्रकाशकं सर्वेषु कार्यकारणेष्वनुस्यूतं अद्वयं परिपूर्णं ११ अहंकारोपहिते
न शुद्धब्रह्मप्रतिपत्तौ सदृष्टांतमाह यथेति जले स्थितः आभासः सूर्यप्रतिबिंबो यदा गृहांतर्वर्तिभित्तौ स्फुरति तदा गृहकोणस्थैः पु
रुषैर्भित्यादौ स्थलेस्थितेन स्वाभासेन सूर्यप्रतिबिंबेन यथा प्रथमं पथा जलस्थ आभासो वदृश्यते लक्ष्यते गगनस्थस्य गृहमध्ये प्रति
गायो बिंबात् चार्थे तथा शब्दः यथा चेत्यर्थः यथा जलस्थेन दिविस्थितः सूर्यो लक्ष्यते १२ एवं भूतेंद्रियमनोभिरवछिन्नैः स्वाभासैः
आत्मप्रतिबिंबैः त्रिगुणोहंकारः सतो ब्रह्मण आभासो यस्मिन् तेन रूपेण लक्षितः अहंकारस्थाभासं विना विषयाभासानुत्पत्तेः अ

मुक्तलिंगं सदाभासमसति प्रतिपद्यते सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ११ यदा जलस्थ आभासः स्थलस्थेनावदृश्य
ते स्वाभासेन तथा सूर्यो जलस्थेन दिविस्थितः १२ एवं त्रिवृदहंकारो भूतेंद्रियगुणो मयैः स्वाभासैर्लक्षितोनेन सदाभासे
न सत्यदृक् १३ भूतसूक्ष्मेंद्रियमनोभूतादिष्विह निद्रया लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः १४ मन्यमानस्तदा
त्मानमनष्टो नष्टवन्मृषा नष्टेहंकरणे द्रष्टा नष्टवित्त इवातुरः १५

नेन चाहंकारेणासदाभासवता सत्यं दृश्यपरमार्थं तत्प्रतिरूप आत्मा लक्षित इत्यर्थः १३ इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्ति
मनुभवतो दर्शयति त्रिभिः भूतादिषु असंति असत्तुल्ये व्याकृते निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियः तमात्मानं प्रति
पद्यत इति तृतीयेनान्वयः १४ ननु यदि तदा विनिद्रो साक्षितर्हि जाग्रत्स्वप्नयोरिव स्फुटः किं नावभासते तत्राह पूर्वं सदृष्ट्वा तोद्र
ष्टुत्वेन सविकल्पकतया स्फुटं प्रतीतः सुषुप्तौ तु भूतादरहंकारविषयस्य लीनत्वात् तद्विषये हंकारे नष्टे सति स्वयमनष्टोपि मृषैवा
त्मानं नष्टवन्मन्यमानो यः अन्यस्य नाशे अन्यस्य नष्टतुल्यत्वे दृष्टांतः नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्यर्थः १५ राम्

ननु सुषुप्तेन किंचिदनुभूयते नैवं सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना केवलस्यात्मनः प्रतिसंधानादित्या
ह एवमिति ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह साहंकारस्य द्रव्यस्य कार्यकारणसंघातस्यानुग्रहः प्रकाश
कः अवस्थानं च द्रव्यविशेषणतयाहंकारस्यापि दृश्यत्वात् ततः द्रष्टात्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः १६ भक्तिविरक्तिभ्यां सत्य
पि विवेके प्रकृतिपुरुषयोः परस्परत्यागाभावात् कथं मुक्तिरिति पृच्छति पुरुषमिति चतुर्भिः १७ व्यतिरेकाभावमात्रे दृष्टांतः यथाप्यति
रेकतोभावः सत्ता नास्ति गंधस्य कदाचिदप्यपक्षयदर्शनात् दृष्टांतांतरं अपामिति बुद्धेः प्रकृतेः पुरुषस्य परस्य च १८ ततः किमत

एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते साहंकारस्य द्रव्यस्य योवस्थानमनुग्रहः १६ देवहूतिरुवाच पुरुषं प्रकृतिर्ब्रह्म
न् न विमुंचति कर्हिचित् अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो १७ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां
रसस्य च यथा तथा बुद्धेः परस्य च १८ अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९
क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात् पुनः प्रत्यवतिष्ठते २० श्रीभगवानुवाच अनिमि
त्तनिमित्तेन स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं २१ वासुदेव माधव गोपाल मुकुंद श्रीः

आह अकर्तुरिति ये गुणा आश्रयो यस्य सः तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं १९ अतएव क्वचिन्निवृत्तप्रायस्यापि संसार श्रीः
भयस्य पुनरुद्भवो दृश्यत इत्याह क्वचिदिति २० न प्रकृतिसंबंधमात्रं बंधहेतुः किंतु गुणबुध्या तदासक्तिः तन्निवृत्तौ सत्यां मोक्षोपप
ते क्वचिदुद्भवस्तु साधनवैकल्यादित्यभिप्रेत्य साधनातिशयं कथयन् परिहरति त्रिभिः निमित्तं फलं तन्न निमित्तं प्रवर्तकं ८८
यस्मिन् निष्कामेण धर्मेण अमलात्मना निर्मलेन मनसा श्रुतेन कथाश्रवणेन संभृतया पुष्टया २१ श्रीरामजयरामजयजय०

397
1981

२२ दह्यमाना अभिभूयमाना तिरोहिता भवति २३ एवं सति पुनरुद्भवो नास्तीत्याह भुक्तभोगा यस्याः नित्यशः सदा दृष्टो दोषो य
स्याः अतएव परित्यक्ता सती ईश्वरस्य अपरतंत्रस्य स्वे महिम्नि स्थितस्य स्वानंदं प्राप्तस्य २४ अविवेकावस्थायामनर्थहेतुरपि विवेका
नंतरं न भवतीति सदृष्टांतमाह यथेति द्वाभ्यां प्रस्वापः स्वप्नः बहूननर्थान् बिभर्ति पुष्णाति प्रतिबुद्धस्य संस्कारवशेन स्फुरन्नपि २५
२६ उपसंहरति यदैवमिति त्रिभिः बहूनि जन्मानि यस्मिन् काले प्रतिबुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यं स्वयं स्थानं देहादिव्य

ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना २२ प्रकृतिः पुरुषस्येह दह्यमाना त्वह
र्निशं तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः नेश्वरस्याशुभं धत्ते स्वे महि
म्नि स्थितस्य च २४ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते २५ एवं विदिततत्त्व
स्य प्रकृतिर्मयि मानसं युंजतो नापकुरुत आत्मारामस्य कर्हिचित् २६ यदैवमध्यात्मरतः कालेन बहुजन्मना सर्वत्र जात
वैराग्य आब्रह्मभुवनान्मुनिः २७ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं २८
प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः यद्गत्वा न निवर्तेत योगी लिंगाद्विनिर्गमे २९ यदा न योगोपचितासु चेतो मा
सुसिद्धस्य विषज्जतेंग अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ३० इति भागवते० सप्तविंशोध्यायः २७

तिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशयानंदं २८ स्वदृशात्मज्ञानेन छिन्नाः संशयाः मिथ्याज्ञानानि यस्य लिंगाद्विनिर्गमे लिंगश
रीरनाशे सतीत्यर्थः २९ तदा अणिमादिसिद्धयोंतरायरूपा भवंतीति तासु योगेनोपचितासु समृद्धासु न योगादन्या हेतुर्यासां तासु यदा सि
द्धस्य चेतो न विषज्जते अंग हे मातः अथ तदा अंग मृत्युः क्रांतो संतोषो हं तत्संबंधिनी यस्यां गतौ मृत्योर्हासो न भवति विषक्तो तु सिद्धा
म्यावशीकृत इति मृत्योर्हासो गर्वो भवतीत्यर्थः ३० इति श्रीभागवते महापुराणे तृतीयस्कंधे टीकायां सप्तविंशोध्यायः २७

भा० अष्टाविंशेतपोऽष्टांगयोगेन ध्यानशोभिना सर्वोपाधिविनिर्मुक्तस्वरूपज्ञानमीर्यते भक्तिसंक्षेपतः प्रोच्यसांख्यमा टी०
ख्यायविस्तृतं अथाष्टवेद्धर्वयोगमष्टांगकपिलोहरिः सबीजस्यमालंबनस्यप्रसन्नंसत १ तत्रयमनियमानाह
८८ त्रिभिरक्षरद्वयाधिकैः शक्त्यास्वधर्माचरणं २ ग्राम्यस्त्रैवर्गिकोधर्मः तस्मान्निवृत्तिः मितंचतन्मेध्यंशुद्धंचतस्यादनं
तत्रमितंनाम द्वौभागौपूरयेदन्नैस्तोयेनैकंप्रपूरयेत् मारुतस्यप्रचारार्थं चतुर्थमवशेषयेत् इतिस्मृतिप्रसिद्धं विविक्तं
विजनंक्षेमंनिर्बाधंतस्यस्थानस्यसेवनं ३ याचतार्थः प्रयोजनंतावन्मात्रस्यपरिग्रहः ४ आसनादीन्अंगान्याह त्रिभिःस
तआसनस्यजयेनस्थैर्यं ५ स्वधिष्ण्यानांप्राणस्थानानांमूलाधारादीनांमध्ये एकस्मिन्देशेमनसासहप्राणस्यधारणं आ

योगस्यलक्षणंवक्ष्येसबीजस्यनृपात्मजे मनोयेनैवविधिनाप्रसन्नंयातिसत्पथं १ स्वधर्माचरणंशक्त्याविधर्मा
च्चनिवर्तनं दैवाल्लब्धेनसंतोषआत्मविच्चरणार्चनं २ ग्राम्यधर्मनिवृत्तिश्चमोक्षधर्मरतिस्तथा मितमेध्यादनं
शश्वद्विविक्तक्षेमसेवनं ३ अहिंसासत्यमस्तेयंयावदर्थपरिग्रहः ब्रह्मचर्यंतपःशौचंस्वाध्यायःपुरुषार्चनं ४ मौ
नंसदासनजयःस्थैर्यंप्राणजयःशनैः प्रत्याहारश्चेंद्रियाणांविषयान्मनसाहृदि ५ स्वधिष्ण्यानामेकदेशेमनसा
प्राणधारणं वैकुंठलीलाभिध्यानंसमाधानंतथात्मनः ६ एतैरन्यैश्चपथिभिर्मनोदुष्टमसत्पथं बुद्ध्यायुंजीतशनकै
र्जितप्राणोह्यतंद्रितः ७ शुचौदेशेप्रतिष्ठाप्यविजितासनआसनं तस्मिन्स्वस्तिसमासीनऋजुकायःसमभ्यसेत् ८
प्राणस्यशोधनंमार्गंपूरकुंभकरेचकैः प्रतिकूलेनवाचित्तंयथास्थिरमचंचलं ९ श्रीः

आत्मनोमनसःसमाधानंआत्माकारतां ६ अन्यैश्चव्रतदानादिभिःपथिभिरुपायैः ७ आसनादीनिप्रपंचयति शुचाविति याव
त्समाप्ति आसनंकुशाजिनचैलोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेनयथासुखमितिवा समभ्यसेत् प्राणमितिशेषः ऊरुजंघांतरेधा ८९
यपादाग्रेजानुमध्यगे योगिनोयदवस्थानंस्वस्तिकंतद्विदुर्बुधाः ८ बाह्यवायोरंतरंतःप्रवेशनंपूरकः प्रवेशितस्यधारणंकुंभकः

399/1981

धृतस्यबहिर्निःसारणंरेचकः प्रतिकूलेनरेचकपूरककुंभकैः यद्वा इडयापूर्वपिंगलयारेचनंपिंगलयापूर्वइडयारेचनमितिएवंप्रतिकू
लेनवाशब्दाच्चार्थे स्थिरंसत् पुनरपिचंचलंयथानभवतितथाशोधयेत् ९ पूर्वपत्राचीटीका ध्मातंसंतप्तमित्यर्थः लोहंसुवर्णंयथाम
लंत्यजतितथामनोविरजंस्यात् ततश्चचंचलंनस्यादितिभावः १० प्राणायामादीनांसमाधौद्वाराकार्याण्याह प्राणायामैरिति दोषान्वातश्ले
ष्मादीन् विषयसंसर्गान् अनीश्वरान्रागादीन् वायुनासहमनसःस्थिरीकरणंधारणास्थिरस्यवृत्तिसंततिर्ध्यानंवृत्तिनिरोधःसमाधि
रितिभेदः ११ सुसमाहितंस्थिरंजातं काष्ठांकलांमूर्तिमित्यर्थः स्वनासाग्रवलोकनंयस्यएतच्चलयविक्षेपयोःपरिहाराय १२ ध्येयंह

मनोचिरात्स्याद्विरजंजितश्वासस्ययोगिनः वाय्वग्निभ्यांयथालोहंध्मातंत्यजतिवैमलं १० प्राणायामैर्दहेद्दोषान्धारणा
भिश्चकिल्बिषात् प्रत्याहारेणसंसर्गात्ध्यानेनानीश्वरान्गुणान् ११ यदामनःस्वंविरजंयोगेनसुसमाहितं काष्ठांभगव
तोध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवदनांभोजंपद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामंशंखचक्रगदाधरं १३ लसत्पंक
जकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसंभ्राजत्कौस्तुभामुक्तकंधरं १४ मत्तद्विरेफकलयापरीतंवनमालया परा
र्ध्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रोणींहृदयांभोजविष्टरं दर्शनीयतमंशांतंमनोनयननंदनं १६
अपीच्यदर्शनंशश्वत्सर्वलोकनमस्कृतं संतंवयसिकैशोरेभृत्यानुग्रहकातरं १७ नारायण वासुदेवराम्

रिमाह सप्तभिः प्रसन्नंवदनांभोजंयस्यतंध्यायेदितिषष्ठेनान्वयः पद्मगर्भवदरुणेईक्षणेनेत्रेयस्य नीलोत्पलदलवत्श्यामं १३
लसत्पंकजस्यकिंजल्कवत्पीतेकौशेयवाससीयस्य श्रीवत्सालांछनंवक्षसियस्य भ्राजत्कौस्तुभेनामुक्तासंश्लिष्टाकं
धरायस्य १४ मत्तद्विरेफाणांकलोमधुरोध्वनिर्यस्यांतयापरीतंव्याप्तं परार्ध्यानिअमूल्यानिहारादीनियस्य १५ कांचीगुणे
नोल्लसंतीश्रोणिर्यस्य भक्तानांहृदयांभोजमेवविष्टरमासनंयस्य भक्तानांमनोनयनानिवर्धयतिहर्षयतीतितथा १६
अपीच्यमतिसुंदरं भक्तविषयंदर्शनंयस्य कैशोरेतारुण्येवयसिसंतंस्थितं भृत्यानामनुग्रहेकातरंव्यग्रं १७ श्रीराम्

भा० कीर्तन्यंकीर्तनार्हं तीर्थयशोयस्य पुण्यश्लोकाबल्लिप्रमुखास्तेषांयशस्करं समग्राण्यंगानियस्मिनन्नच्यवतेनापयातिनपर्येति न०
१० १८ प्रेक्षणीयमीहितंलीलायस्य १९ तदेवंसमग्रध्यानमुक्त्वाएकैकावयवंध्यानमाह तस्मिन् लब्धंपदंस्थितिर्येनतच्चित्तंविलक्ष्य
विशेषेणलक्षी कृत्यएकत्रएकस्मिन्नंगइत्यर्थः २० तदेवपादादिक्रमेणाह त्रयोदशभिः सम्यक्चिंतयेत्पादतलेरेखात्मकानिवज्रा
दीनिलांछनानितैराढ्यंयुक्तं उत्तुंगाश्चरक्ताश्चविलसंतःनखाः तेषांचक्रवालंमंडलंतस्यज्योत्स्नाभिराहतोमहतांध्यातृणांहृदयां
धकारोयेनएतच्चसर्वमुपादेयविशेषणंध्येयत्वेनैवोच्यते २१ गृहंसमार्ष्टि इत्यत्रगृहगतंएकत्वंनविवक्षितंउद्देश्यविशेषणत्वात्

कीर्तन्यतीर्थयशसंपुण्यश्लोकयशस्करं ध्यायेद्देवंसमग्रांगंयावन्नच्यवतेमनः १८ स्थितंव्रजंतमासीनंशयानंवागुहाशयं
प्रेक्षणीयेहितंध्याये ×श्लोक× च्छुद्धभावेन चेतसा १९ तस्मिंल्लब्धपदंचित्तंसर्वावयवसंस्थितं विलक्ष्यैकत्रसंयुज्यादंगे
भगवतोमुनिः २० संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवा
लज्योत्स्नाभिराहतमहद्धृदयांधकारं २१ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेनमूर्ध्न्यधिकृतेनशिवःशिवोभूत्
ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरंभगवतश्चरणारविंदं २२ जानुद्वयंजलजलोचनयाजनन्यालक्ष्म्या
खिलस्यसुरवंदितयाविधातुः ऊर्वोर्निधायकरपल्लवरोचिषायत्संलालितंहृदिविभोरभवस्यकुर्यात् २३

पश्चनायजेतेत्यत्रतुपशुगतमेकत्वंविवक्षितं उपादेयविशेषणत्वात् तथाअत्रापिउपादेयविशेषणानिवज्रांकुशादीनिध्येय श्रीः
त्वेनविवक्षितानि किंच यस्यशौचेनक्षालनेननिःसृतायाः सरित्प्रवरायागंगायाउदकेनतीर्थेनसंसारतारकेणमूर्ध्नि अधिकृतेनधृ
तेनशिवोपिशिवोअभूत् अत्यधिकंसुखंप्रापेत्यर्थः ध्यातुर्मनसियःशमलशैलः पापपर्वतः तस्मिन्निसृष्टंक्षिप्तंवज्रमिव
यत् ॥ यद्वाशमलशैलेनिसृष्टंस्वलांछनरूपंवज्रंयेनतत् २२ विभोर्जानुद्वयंनत्यपितंजंघाद्वयंअखिलस्यविधातुर्ब्रह्मणोजन ॥१०॥
न्यालक्ष्म्यासंलालितंस्पर्शचातुर्येणसंसेवितं संसारत्वमिवप्रतीतंवारयतिअभवस्येतिहृदिकुर्यात्ध्यायेत् २३

J101
1831

सुपर्णस्यभुजयोःस्कंधयोःअधिउपरिओजस्यबलस्यनिधीआधारोअतसिकायाः कुसुमकांत्यावभासमानौ याआलंबिआगुल्फं
लंबमानंयत्पीतांबरंवासस्तस्मिन् वर्त्तमानोयःकांचीकलापः तेनपरिरंभः संश्लेषोविद्यतेयस्यतद्विभोर्नितंबबिंबंहरिकुर्यादिति
पूर्वेणान्वयः २४ अमुष्यहरेर्नाभिह्रदंध्यायेत् कथंभूतंभुवनानांकोशोस्यगुहाअधिष्ठानंयदुदरंतत्रस्थितं यत्रयन्नाभिह्रदे आत्म
योनेःब्रह्मणोधिषणंधिष्ण्यंअखिललोकात्मकंपद्मंव्यूढंउत्थितंतयाहरिन्मणिवृषोमरकतमणिश्रेष्ठाविवयौस्तनौतयोर्द्वयंध्यायेत्

ऊरूसुपर्णभुजयोरधिशोभमानावोजोनिधीअतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससिवर्तमानकांचीकला
पपरिरंभिनितंबबिंबं २४ नाभिह्रदंभुवनकोशगुहोदरस्थंयत्रात्मयोनिधिषणाखिललोकपद्मं व्यूढंहरिन्मणिवृषस्त
नयोरमुष्य ध्यायेत्द्वयंविशदहारमयूखगौरं २५ वक्षोधिवासमृषभस्यमहाविभूतेः पुंसांमनोनयननिर्वृतिमादधानं
कंठंचकौस्तुभमणेरधिभूषणार्थंकुर्यान्मनस्यखिललोकनमस्कृतस्य २६ बाहूंश्चमंदरगिरेःपरिवर्तनेननिर्णि
क्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखंचतत्करसरोरुहराजहंसं २७ वासुदेव

विशदहाराणांमयूखैर्गौरैश्वेतं २५ ऋषभस्यश्रेष्ठस्यमहाविभूतेर्महालक्ष्म्याअधिवासंस्थानं वक्षः कंठंचमनसिकुर्या
त् कथंभूतंकंठं कौस्तुभमणियोभूषार्थंधृतः तस्यअधिकंभूषणमर्थः प्रयोजनंयस्यकौस्तुभमणिमेवस्वयमलंकुर्वन्नि
त्यर्थः पुंसांस्मर्तॄणांद्रष्टॄणांचमनोनयनानांनिर्वृतिमाह्लादमादधानमित्युभयोर्विशेषणं २६ निर्णिक्तानिउज्वलीकृतानि
बाहुवलयान्यंगदानियेषुअधिश्रितालोकपालायेषु दशशतारंचक्रं नसह्यंतेजोयस्य करसरोरुहराजहंसमिव २७

भा०
९१

आरातयो येसटायोद्धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धांलिमां अस्य कंठेमालां मणिं चस्मरेत् मधुव्रतानां वरूथस्य गिरउ टी०
पघुष्टांनादितां चैत्यस्य जीवस्य तत्वं नतु कंवैस्त्रेव आत्मानमस्य जगतो निर्लेपमगुणामलं बिभर्ति कौस्तुभमणिस्वरूपं भगवान्
हरीरिति २८ भृत्येष्वनुकंपिता कृतानुकंपायाधीः तयागृहीतामूर्तिर्येनतस्य विस्फुरंती येमकरकुंडले तयोर्वल्गितेन प्रचलने
नविद्योतितौ अमलौकपोलौ यस्मिन् तत् उदाराउन्नतानासायस्मिन् २९ यच्छ्रस्वयाभृत्याशोभया अलिभिः परिसेव्यमानं मीन
द्वयाश्रयं चश्रीनिकेतनं पद्ममधिक्षिपद्वर्ततेतत् ध्यायेत् तत्र कुंतलैरलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यं अजाद्

कौमोदकीं भगवतोदयितांस्मरेतद्दिग्धामरातिभटशोणितकर्दमेन मालांमधुव्रतवरूथगिरोपघुष्टां चैत्यस्यतत्वममलं
मणिमस्यकंठे २८ भृत्यानुकंपितधियेहगृहीतमूर्तेः संचिंतयेद्भगवतोवदनारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेनवि
द्योतितामलकपोलमुदारनासं २९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्यास्वयाकुटिलकुंतलवृंदजुष्टं मीनद्वयाश्र
यमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमतंद्रितउल्लसद्भ्रु ३० तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनायनिसृष्टम
क्ष्णोः स्निग्धस्मितानुगुणितंविपुलप्रसादंध्यायेच्चिरंविपुलभावनयागुहायां ३१ हासंहरेरवनताखिललोकतीव्रशो
काश्रुसागरविशोषणमत्युदारं संमोहनायरचितंनिजमाययास्य भ्रूमंडलंमुनिकृतेमकरध्वजस्य ३२ माधवश्रीः

वनेत्रेयस्मिन् निष्कंपमीनांतरं उल्लसंत्यौभ्रुवौयस्मिन् मनोमनंमनस्यामनस्याविर्भवत् ३० कृपया अधिकमित्यर्थः अक्षिभ्यांनि श्री
सृष्टंप्रयुक्तं विपुलंप्रसादोयस्मिन् गुहायांहृदि ३१ अवनतायेखिललोकास्तेषांतीव्रशोकेनयान्यश्रूणितेषांसागरंविशोषय ९१
तीति तथातंहरेर्हासं अस्यअत्युदारं भ्रूमंडलंच ध्यायेत् कथंभूतं निजमाययामकरध्वजस्यापि संमोहनायरचितं
मुनिकृतेमुनीनामुपकाराय मुनीनां संमोहनेप्रवृत्तं काममेव मोहयतुमित्यर्थः ३२ रामकृष्णवासुदेवनारायणमाधवश्रीः

A103
1381

मंदहासध्यानमुक्त्वाम्फुटहासध्यानमाह विष्णोः प्रसहितंउच्चैर्हसितं ध्यायेत् कीदृशं ध्यानायनं अतिसुंदरतयाप्रयत्नंविने
वध्यानस्यविषयभूतं सौंदर्यमेवाह बकुलयाअधिकयाअधरोष्टस्यभासाकांत्यारुणीभूतास्तनवः सूक्ष्माद्विजाएवकुंदमुकुलानितेषां
पंक्तिः स्फुरतियस्मिन् तत् हृदयकुहरेहृदयाकाशेअवसितस्यज्ञानस्यप्रेमरसेनार्द्रया भक्त्यातस्मिन्नेवार्पितमनाः सन् पृथक्
तद्व्यतिरिक्तं द्रष्टुंनेच्छेत् नचित्तंविचालयेत् इत्यर्थः ३३ समाधिमाह एवमितिद्वाभ्यां निर्बीजः सबीजश्चेति द्विविधोयोगः तत्रनिर्बीज
योगे यतोयतो निश्चरतिमनश्चंचलमस्थिरं ततस्ततोनियम्यैतदात्मन्येववशंनयेदितियोगीताद्युक्तमार्गेणाक्रियमाणोपिदुष्करः
समाधिः सबीजेतुसुकरः तत्रापिहिपरमानंदमूर्तौहरौ ध्यायमानेयत्नतएवचित्तोपरमोभवति तदुक्तं त्वय्यात्मनो हृतप्राणांश्चप्रसक्तिरनिच्छ

ध्यानायनंप्रहसितंबकुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेवसितस्यविष्णोर्भक्त्यार्द्रयार्पितमनानं
पृथग्दिदृक्षेत् ३३ एवंहरौभगवतिप्रतिलब्धभावोभक्त्याद्रवद्धृदयउत्पुलकः प्रमोदात् औत्कंठ्यबाष्पकलयामुहुरर्द्यमानस्त
च्चापिचित्तबडिशंशनकैर्वियुंक्ते ३४ मुक्ताश्रयंयर्हिनिर्विषयंविरक्तं निर्वाणमृच्छतिमनः सहसायथार्चिः आत्मानमत्रपुरुषोव्यवधा
नमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५

तोगतिमण्वींप्रयुंक्त इतिं अतः सएवोपक्षिप्तः योगस्यलक्षणंवक्ष्येसबीजस्येति तदेवायत्नसिद्धत्वंदर्शयति एवंध्यानमार्गेणहरौप्रतिलब्धोभावः प्रे
मयेनतयाभक्त्याद्रवत्हृदयंयस्य प्रमोदादुद्गतानिपुलकानियस्य औत्कंठ्यप्रवृत्ताश्रुकलयाचमुहुरर्द्यमानः आनंदसंप्लवेनिमज्जमानः
उग्रहस्यभगवतोग्रहणेबडिशंमत्स्यबंधनमिवोपायभूतंचित्तमपिध्येयाद्वियुंक्ते तदारणेशिथिलप्रयत्नोभवतीत्यर्थः ३४ यर्हियदाएवंनि
र्विषयंभवति अतएवमुक्ताश्रयंचध्येयसंबंधंविनाध्यानपर्यवसानासंभवात् नचपूर्ववत् शब्दादिर्विषयः स्यात् यतस्तत्रविरक्तंपरमानंदा
नुभवेन अतोनिर्वाणंलयमृच्छतिवृत्तिरूपतांपरित्यज्यब्रह्माकारेणपरिणामतइत्यर्थः यथार्चिर्ज्वाला आश्रयविषयापगमेमहाभूतज्योतीरूपेण
परिणमते अत्रअस्यांदशायां अव्यवधानंध्यातृध्येयविभागशून्यं एकं अखंडं आत्मानमनुगतमीक्षते अत्रहेतुः प्रतिनिवृत्तोपगतोगुणप्रवाहोदेहाद्यु
पाधिर्यस्य ३५

भा० ८२

नचसुप्तोत्थितइवसपुनः संसरतीत्याह सोपिस्वइवपुरुषस्तस्मिन्महिम्नि ब्रह्मरूपे अवसितः अवसानंनिष्ठांप्राप्तः कयामनसोनिवृत्त्या त०
चरमयाविद्यारहितचेतिसुषुप्ताद्विशेषः तत्रत्यविद्यास्तिनत्विदानींअत्रहेतुः एतयायोगाभ्यासकृतयेत्यर्थः नन्वेवमपिसुखदुःखयोरात्म
धर्मत्वेकुतोब्रह्मत्वेक्यंतत्राह दुःखयोः सुखदुःखयोर्हेतुत्वंभोक्तृत्वंयत्पूर्वमासीत् तदपिअसतिअविद्याकृतेकर्तरिअहंकारेविधत्तेतन्निष्ठमे
वपश्यतीत्यर्थः यतः उपलब्धपरात्मकाष्ठः अपरोक्षीकृतात्मतत्वः २६ तस्यजीवन्मुक्तिमाह देहंचेतिद्वाभ्यां चरमः उक्तलक्षणः सिद्धोदेह
मपिनविपश्यतिकुतः सुखदुःखे आसनादुत्थितंउत्थायतत्रैवस्थितंतत्स्थानादपेयं ततोदैववशात्पुनरपिउपेतंवानविपश्यतियतः स्वरूपंप्रा

सोप्येतयाचरमयामनसोनिवृत्त्यातस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये हेतुत्वमप्यसतिकर्तरिदुःखयोर्यत्स्वात्मन्विधत्तउपल
ब्धपरात्मकाष्ठः २६ देहंचतंनचरमःस्थितमुत्थितंवासिद्धोविपश्यतियतोध्यगमत्स्वरूपं दैवादुपेतमथदैववशादपेतंवासो
यथापरिकृतंमदिरामदांधः २७ देहोपिदैववशगः खलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवमासुः तंसप्रपंचमधिरूढसमाधि
योगः स्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः २८ यथापुत्राच्चवित्ताच्चपृथङ्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा २९

प्तः यतोदेहात्स्वरूपमध्यगमत्तंदेहमित्तिवा सतोप्यननुसंधानेदृष्टांतः वासः परिकृतंकटिनदृढउपरिवेष्टितं स्थितंगतंवामदिरामद
नांधोयथानपश्यति ३० ननुतर्हिदेहस्यकथंप्रवृत्तिनिवृत्तिजीवनंचतत्राह देहोपीति देवंपूर्वसंस्कारस्तद्वशेनगच्छन् याव
त्स्वारंभकंकर्मास्तितावत्प्रतिसमीक्षतेजीवत्येव सासुः सेंद्रियः ननुतर्हितस्मिन्पुनः संगः स्यात् तत्राह तंदेहंस्वाप्नदेहादितुल्यंसप्रपं श्री:
चंपुत्रादिसहितंपुनर्नभजतेअहंममेतिनाभिमन्यतेआरूढःप्राप्तः समाधिपर्यंतोयोगोयेन अतएवप्रतिबुद्धंवस्तुआत्मतत्वंयेनसः ८२
२८ प्रतिबोधप्रकारमाह षड्भिः यथेति अतिस्नेहवशादात्मत्वेनाभिमतादपिपुत्रादेर्मर्त्यः पित्रादिः पुरुषोदेहादेर्द्रष्टा २९ राम

2105
1981

पृथगवस्थानाभावेपिभेदंसदृष्टांतमाह यथोल्मुकात्तइदानींज्वलतः काष्ठात्स्वयंभावात् अग्नेसंभूतात् आत्मत्वेनअग्नेः
स्वरूपत्वेनाभिमतादपि असंतविवेकिनोहिधूमेप्यस्यभिमानोस्ति उल्मुकात् पूर्वसिद्धादपिदग्धाहकः प्रकाशकश्चाग्निःपृथ
गेव ४० भूतादेर्द्रष्टातेभ्यः पृथक् तथाप्रधानादपितत्प्रवर्तकोभगवान्पृथगित्यर्थः ४१ उपाधितोविवेकमुक्त्वातस्यैक्यमा
ह स्वयोनिषुज्योतिरग्निः सर्वभूतेष्विति भूतेषुचतुर्विधेषुतदात्मतांमहाभूतात्मतां ४२ धर्मभेदस्याप्यौपाधिकतांसदृष्टांत
माह स्वयोनिषुज्योतिरग्निः गुणवैषम्यात्दीर्घह्रस्वादिभेदात् प्रकृतौदेहे ४३ स्वांशस्यजीवस्यबंधहेतुंदैवींदेवस्यश्रीविष्णोः

यथोल्मुकाद्विस्फुलिंगात्धूमाद्वापिस्वसंभवात् अग्न्यात्मत्वेनाभिमतायथाग्निः पृथगुल्मुकात् ४० भूतेंद्रियांतः
करणात्प्रधानाज्जीवसंज्ञितात् आत्मातथापृथग्द्रष्टाभगवान्ब्रह्मसंज्ञितः ४१ सर्वभूतेषुचात्मानंसर्वभूतानि
चात्मनि ईक्षेतानन्यभावेनभूतेष्विवतदात्मतां ४२ स्वयोनिषुयथाज्योतिरेकंनानाप्रतीयते योनीनांगुणवैषम्यात्
तथात्माप्रकृतौस्थितः ४३ तस्मादिमांस्वांप्रकृतिंदैवींसदसदात्मिकां दुर्विभाव्यांपराभाव्यस्वरूपेणावतिष्ठते ४४ इतिश्री
भाग० कापिलेयसाधनानुष्ठानंअष्टाविंशतिमोध्यायः २८ श्रीदेवहूतिरुवाच लक्षणंमहदादीनांप्रकृतेःपुरुषस्यच स्वरू
पंलक्ष्यतेमीषांयेनतत्पारमार्थिकं १ यथासांख्येषुकथितंयन्मूलंतत्प्रचक्षते भक्तियोगस्यमेमार्गंब्रूहिविस्तरशः प्रभो २

शक्तिंपराभाव्यतत्प्रसादेनैवजित्वास्वरूपेणब्रह्मत्वेनावतिष्ठते ४४ इतितृतीयेष्टाविंशः २८ एकोनत्रिंशकेभक्तियोगस्तद्वदुपोच्य
तेकालस्यचबलंघोरासंसृतिश्चविरक्तये उक्तानुवादपूर्वकंभक्तिमार्गभेदान्पृच्छति द्वाभ्यां लक्षणंमहदादीनांयथासांख्येषुतथाकथितं
येनलक्षणेनतत्पारमार्थिकंपरस्परविभक्तमित्यर्थः १ योभक्तियोगोमूलंप्रयोजनंयस्यतद्यन्मूलंतत्कथितंतस्यभक्तियोगस्यमार्गंप्र
कारंविस्तरतोब्रूहि २

येनसंसंसतीनां आख्यानेनविगतरागोभवेत् २ ईश्वररूपस्यमहाप्रभावस्य तेत्वदात्मकस्ययद्धेतोःयद्भयात्कुशलंपुण्यंकुर्वंति ४ अचक्षुषः अज्ञस्यअतोमिथ्याभूतेदेहादावभिमतिरहंकारोयस्य अतः कर्मस्वनुविद्धयाआसक्तयाधियाश्रांतस्य अतएवअनाश्रयेअपारेतमसिसंसारेचिरंप्रसुप्तस्यलोकस्यप्रबोधायत्वंयोगप्रकाशकोभास्करः किलाविर्भूतोसि ५ श्लक्ष्णंसुंदरं ६ मार्गैःप्रकारविशेषैः तानेवाह स्वभावभूतायेगुणास्तेषांमार्गेणवृत्तिभेदेन भावःअभिप्रायः फलसंकल्पभेदाद्भक्तिभेदइत्यर्थः ७ अभि

विरागोयेनपुरुषोभगवन्सर्वतोभवेत् आचक्ष्वजीवलोकस्यविविधालोकसंसृतीः ३ कालस्येश्वररूपस्यपरेषां चपरस्यतेस्वरूपंबतकुर्वंतियद्धेतोःकुशलंजनाः ४ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरंप्रसुप्तस्यतमस्यनाश्रये श्रांतस्यकर्मस्वनुविद्धयाधियात्वमाविराशीःकिलयोगभास्करः ५ मैत्रेयउवाच इतिमातुर्वचःश्लक्ष्णंप्रतिनंद्यमहामुनिः आबभाषेकुरुश्रेष्ठप्रीतस्तांकरुणार्दितः ६ श्रीभगवानुवाच भक्तियोगोबहुविधोमार्गैर्भामिनि भाव्यते स्वभावगुणमार्गेणपुंसांभावोविभिद्यते ७ अभिसंधाययद्धिंसांदंभंमात्सर्यमेवच संरंभीभिन्नदृग्भावंमयिकुर्यात्सतामसः ८ विषयानभिसंधाययशऐश्वर्यमेववा अर्चादावर्चयेद्योमांपृथक्भावःसराजसः ९ कर्मनिर्हारमुद्दिश्यपरस्मिन्वातदर्पणं यजेद्यष्टव्यमितिवापृथक्भावःससात्विकः १०

संधायसंकल्पसंरंभीक्रोधीभिन्नदृक्भिन्नदर्शीयोभावंभक्तिंकुर्यात्सत्रिविधोपितामसः ८ पृथक्भावःभेददर्शी ९ कर्मनिर्हारंपापक्षयं परस्मिन्परमेश्वरेतदर्पणंकर्मार्पणंभगवत्प्रीतिमुद्दिश्येत्यर्थः यष्टव्यमितिविधिसिद्धिमुद्दिश्येत्यर्थः भेददर्शिनंअर्चादावर्चनंत्रिधर्चनं तदेवंतामसादिभक्तिषुत्रयस्त्रयोभेदाः तासुयथोत्तरंश्रैष्ठ्यं एवंश्रवणकीर्तनादयोनवापिप्रत्येकनवनवभेदाः श्रवणंकीर्तनंध्यानंस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं तदेवंसगुणाभक्तिरेकाशीतिभेदा १०

१०७
१३३

निर्गुणानुभक्तिरेकविधेवतामाह मद्गुणश्रुतिमात्रेणेति द्वाभ्यां अविच्छिन्ना संतता ११ अहैतुकीफलानुसंधाशून्या अव्यवहिता भेददर्शनरहिताच मद्गुणश्रुतिमात्रेणमयिपुरुषोत्तमेमनोगतिरितियाभक्तिःसानिर्गुणस्याभक्तियोगस्यलक्षणमित्यन्वयः लक्षणंस्वरूपं १२ भक्तानांनिःकामतांकैमुत्यन्यायेनाह सालोक्यंमयासहैकस्मिंल्लोकेवासं सार्ष्टिंसमानैश्वर्यंसामीप्यंनिकटवर्तित्वं सारूप्यंसमानरूपित्वं एकत्वंसायुज्यंउतअपिदीयमानमपिनगृह्णंति कुतस्तत्का

मद्गुणश्रुतिमात्रेणमयिसर्वगुहाशये मनोगतिरविच्छिन्नायथागंगांभसोंबुधौ ११ लक्षणंभक्तियोगस्य निर्गुणस्यह्युदाहृतं अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानंनगृह्णंतिविनामत्सेवनंजनाः १३ सएवभक्तियोगाख्यआत्यंतिकउदाहृतः येनातिव्रज्यत्रिगुणंमद्भावायोपपद्यते १४ निषेवितेनानिमित्तेनस्वधर्मेणमहीयसा क्रियायोगेनशस्तेननातिहिंस्रेणनित्यशः १५ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषुमद्भावनयासत्वेनासंगमेनच १६ महतांबहुमानेनदीनानामनुकंपया मैत्र्याचैवात्मतुल्येषुयमेननियमेनच १७ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्चमे आर्जवेनार्यसंगेननिरहंक्रिययातथा १८ मद्धर्मणोगुणैरेतैःपरिसंशुद्धआशयः पुरुषस्यांजसाभ्येतिश्रुतमात्रगुणंहिमां १९

मनेत्यर्थः १३ किमितितर्हिभजंतेभक्तेरेवपरमफलत्वादित्याह सएवेति नतुत्रैगुण्यंहित्वाब्रह्मप्राप्तिःपरमफलंप्रसिद्धं सत्यं नतुभक्तावानुषंगिकमित्याह येनभक्तियोगेनमद्भावायब्रह्मत्वाय १४ एवंभूतायाभक्तेःसाधनान्याहपंचभिः निषेवितेनसम्यगनुष्ठितेन अनिमित्तेनस्वधर्मेणनित्यनैमित्तिकेन महीयसाश्रद्धादियुक्तेनक्रियायोगेनपंचरात्राद्युक्तपूजाप्रकारेणशस्तेननिःकामेन १५ मद्धिष्ण्यंमत्प्रतिमादितस्यदर्शनादिभिःसत्वेनधैर्येणअसंगमेनवैराग्येन १६ १७ १८ मद्धर्मणः

भा०
९४

प्रयत्नैर्विनैव प्राप्नोतीत्यर्थः दृष्टांतः वातेरथः प्रापकोयस्यगंधस्यआशयात् स्थानात् आदत्ते आत्मसात् करोति अविकारीस
मंयच्चेतः २० चित्तशुद्धिश्चसर्वभूतात्मदृष्ट्यैवभवतीतिवक्तुंकेवलप्रतिमादिनिष्ठांनिंदन्नाह अहमितिसप्तभिः अर्चैववि
डंबनमनुकरणं अचार्याः पूजाविडंबनमितिवा २१ अवसायेपेक्षाद्वेषनिंदाः क्रमेणचतुर्भिर्निषिध्यंते हित्वाउपेक्ष्य २२ २३
द्रव्यैरुत्पन्नयाक्रियया भूतग्रामावमानिनः तन्निरकस्य २४ तर्हिकिमर्चादावर्चनमनर्थकमेवनेत्याह अर्चादाविति
सर्वभूतेष्ववस्थितंमांस्वहृदियावन्नवेदस्वकर्मकृत् कर्माविरोधेनयथावकाशं अनेनकर्मनिष्ठाया अपिसएवावधिरि

यथावातरथो घ्राणमावृङ्क्ते गंधआशयात् एवंयोगरतंचेत आत्मानमविकारियत् २० अहंसर्वेषुभूतेषुभूता
त्मावस्थितःसदा तमवज्ञायमांमर्त्यः कुरुतेर्चाविडंबनं २१ योमांसर्वेषु भूतेषुसंतमात्मानमीश्वरं हित्वार्चांभ
जतेमौढ्यात्भस्मन्येवजुहोतिसः २२ द्विषतः परकायेमांमानिनोभिन्नदर्शिनः भूतेषुबद्धवैरस्यनमनःशांतिमृच्छ
ति २३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैवतुष्येर्चितोर्चायां भूतग्रामावमानिनः २४ अर्चादावर्चयेत्ता
वदीश्वरंमांस्वकर्मकृत् यावन्नवेदस्वहृदिसर्वभूतेष्ववस्थितं २५ आत्मनश्चपरस्यापियःकरोत्यंतरोदरं तस्यभिन्न
दृशोमृत्युर्विदधेभयमुल्बणं २६ अथमांसर्वभूतेषुभूतात्मानंकृतालयं अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७
जीवाःश्रेष्ठाह्यजीवानांततः प्राणभृतःशुभे ततः सचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २८

त्यक्तंभवति २५ अंतराअंतरं भेदंउत् अपिअरंअल्पंअल्पमपिभेदंयः पश्यतीत्यर्थः यद्वाअंतरामध्येउदरंशरीरं मृत्युरहं
तस्यभयंविदधेकरोमि २६ अथअंतः सर्वभूतेषुकृतालयंकृतावासं तत्रहेतुः भूतानामात्मानमंतर्यामिणंअभिन्नेनचक्षुषा
समदर्शनेन २७ तत्रापियथोत्तरमानाधिक्यातिशयः कर्तव्याइतिवक्तुंतारतम्यमाह जीवाइति सार्धैःषड्भिः अजीवानांअचेतनेभ्यः
ततस्तेष्वपिप्राणभृतः प्राणवृत्तिमतः सचित्ताः ज्ञानवंतः इंद्रियाणांवृत्तयोवृत्तिमंतः ज्ञानामपि सूक्ष्माः संत्येव तथाहिमहाभारते
मोक्षधर्मेषु स्मर्यतेतस्मात्पश्यंतिपादपाः तस्माज्जिघ्रंतिपादपा इत्यादिप्रसिद्धा चतुर्षुप्रभूतानुस्पर्शनेंद्रियवृत्तिरेव २८

तृ०
श्री
९४

४०१
१९८१

अतस्तेभ्यः स्पर्शवेदिभ्योरसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदोभ्रमरादयः शब्दविदः सर्पादयः २९ रूपभेदवि
दः काकादयः उभयतोदंतायेषां अपादेभ्यस्तेभ्यो बहुपादाः तेभ्यश्चतुःपादाइत्यर्थः ३० ततः तेषुवर्णाः ३१ संशय
छेत्तामीमांसकः ततोपिकेवलात्स्वधर्मकृत् मुक्तसंगस्यलक्षणंआत्मनोधर्ममदोग्धानिष्कामइत्यर्थः ३२ अ
र्पिताअशेषाः क्रियाः अर्थास्तत्फलानि आत्मदेहश्चयेन अतएवनिरंतरः अव्यवहितः अकर्तुः कर्तृत्वाभिमानशू
न्यात् जीवानांकलयापरिकलनेनअंतर्यामितयाप्रविष्टइतिदृष्ट्वेत्यर्थः ३४ उक्तंभक्तियोगंपूर्वोक्तेनाष्टांगयोगेनसहो

तत्रापिस्पर्शवेदिभ्यः प्रवरारसवेदिनः तेभ्योगंधविदः श्रेष्ठास्ततः शब्दविदोवराः २९ रूपभेदविदस्तत्रततश्चो
भयतोदतः तेषांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्मणउत्तमः ब्राह्मणेष्वपिवेदज्ञाः
ह्यर्थज्ञोभ्यधिकस्ततः ३१ अर्थज्ञात्संशयच्छेत्ताततःश्रेयान्स्वकर्मकृत् मुक्तसंगस्ततोभूयानदोग्धाधर्ममात्मनः ३२
तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरंतरः मय्यर्पितात्मनः पुंसोमयिसन्यस्तकर्मणः ३३ नपश्यामिपरंभूतम
कर्तुःसमदर्शनात् मनसैतानिभूतानिप्रणमेद्बहुमानयन् ईश्वरोजीवकलयाप्रविष्टोभगवानपि ३४ भक्तियोगश्चयोगश्च
मयामानव्युदीरितः ययोरेकतरेणैवपुरुषः पुरुषंव्रजेत् ३५ एतद्भगवतोरूपंब्रह्मणः परमात्मनः परंप्रधानपुरुषंदैवंकर्मविचेष्टितं
रूपभेदास्पदंदिव्यंकालइत्यभिधीयते ३६

पसंहरतिभक्तियोगश्चेति हेमानवि पुरुषंपरमेश्वरं ३५ यदन्यत्पृष्टंजीवस्यसंसृतीः कालस्यस्वरूपंचावेद्यितितदाह एतदितिसार्धेनए
तत्सर्वनियंतृ यद्भगवतोरूपं कीदृशंप्रधानपुरुषात्मकंपरंतद्व्यतिरिक्तंच एतदेवदैवमित्यभिधीयते कीदृशंकर्मणोविचेष्टितं नानासंसृ
तिलक्षणंयस्मात्तत् दैवप्रेरितकर्मकृताः संसृतयोविचित्राइत्यर्थः एतदेवभगवतोरूपंकालइतिचाभिधीयते कीदृशंरूपभेदस्यवस्तुना
मन्यथात्वस्यआस्पदं आश्रयः कारणंउक्तंहिकालाद्गुणव्यतिकरइतिवक्ष्यतेचगुणव्यतिकरः काकइति दिव्यंअद्भुतप्रभावं ३६

नदेवाहभूतानामिति यावत्समाप्ति महदादीनांतत्तदभिमानिनांजीवानां ३७ भयहेतुत्वमाह यइति भूतैरेवभूतान्यत्तिसं हरंति अधियज्ञः यज्ञफलदाताकलयतांवशीकुर्वतां ३८ ३९ ४० यद्भयस्माद्भीताः ४१ यतोभीताः सरितः स्रवंति इंधदीप्यते स हगिरिभिर्भूः ४२ अदः नभः यन्नियमात् यस्याज्ञया महान् महत्तत्वं अंकुरात्मकस्वदेहंलोकत्वेनतनुतेविस्तारयति ४३ गुणाभि मानिनोगुणनियंतारोदेवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषुवर्तंते अनुयुगंवारंवारमित्यर्थः ४४ जनेनपित्रादिनाजनंपुत्रा

भूतानांमहदादीनांयतोभिन्नदृशांभयं ३७ योंतः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः सविष्ण्वाख्योधियज्ञोसौकालः कलयतांप्रभुः ३८ नचास्यकश्चिद्दयितो नद्वेष्योनचबांधवः आविशत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् ३९ यद्भयाद्वातिवातो यंसूर्यस्तपतियद्भयात् यद्भयाद्वर्षतादेवोभगणोभातिमद्भयात् ४० यद्वनस्पतयोभीता नोत्सर्पत्कदधीर्यतः अग्निरिंधेल ताश्चौषधिभिः सह स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानिच ४१ स्रवंतिसरितोभीतानोत्सर्पत्युदधिर्यतः अग्निरिंधेसगि रिभिर्भूर्नमज्जतिमद्भयात् ४२ नभोददात्श्वसतांपदंयन्नियमाददः लोकंस्वदेहंतनुते महान्सप्तभिरावृतं ४३ गुणाभिमानिनो देवाः सर्गादिष्वस्ययद्भयात् वर्ततेनुयुगंयेषांवशएतच्चराचरं ४४ सोनंतोंतकरः कालोनादिरादिकृदव्ययः जनंजनेनजन यन्मारयन्मृत्युनांतकं ४५ इतिश्रीभा० एकोनत्रिंशत्तमोध्यायः २९ श्रीकपिलउवाच तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमं काल्य मानोपिबलिनावायोरिवघनावलिः १

द्विजनयन् आदिकृत् मृत्युनाअंतकमपिमारयन्नंतकरः स्वयंत्वनादिरनंतोव्ययश्च ४५ इतितृतीयेटीकायांएकोनत्रिंशः २९
त्रिंशेतुकायकांतादिलालनाकुलचेतसां कामिनांतामसीपापाद्धोगतिरुदीर्यते १ कालप्रभाववर्णनपूर्वकं वैराग्यायविचित्रकर्महतां संसृतिमध्यायत्रयेणप्रपंचयतितस्यैतस्यबलिनः कालस्य बलिनेतिवापाठः काल्यमानः विचाल्यमानोपिवायोर्विक्रमं यथामेघपंक्तिर्नवेद १

५।।
१४३

विक्रममेवाह यंयमर्थंदुःखेनप्रयासेनोपादत्ते आपादयति तंतंभगवान कालोधुनोतिविनाशयति यत्कृतेयन्निमित्तं २ शोकेहेतुः यद्यस्मात्सानुबंधस्यकलत्रादिसहितस्यदेहस्यसंबंधीनिगृहादीनिवस्तूनि अनुक्तसमुच्चयार्थश्चकारः ३ दुर्मति त्वंदर्शयन् दुःखंप्रपंचयति जंतुरितिचतुर्दशभिः ४ नारक्यांनारकाहारादिभिर्जातायां ५ निरूढमूलंप्रसृतमनोरथं हृदयंयस्य बहुमन्यते श्लाघते कृतार्थोहमिति ६ उद्वहनाधिनायोषणचिंतया ७ दुराशयत्वमाह आक्षिप्त आत्माइंद्रियाणिचयस्य कैयाभ

यंयमर्थमुपादत्तेदुःखेनसुखहेतवे तंतंधुनोतिभगवान पुमान्शोचतियत्कृते २ यदध्रुवस्यदेहस्यसानुबंधस्यदुर्मतिः ध्रुवाणिमन्यतेमोहात् गृहक्षेत्रवसूनिच ३ जंतुर्वैभवएतस्मिन्यांयांयोनिमनुव्रजेत् तस्यांतस्यांसलभतेनिर्वृतिंन विरज्यते ४ नरकस्थोपिदेहंवैनपुमांस्त्यक्तुमिच्छति नारक्यांनिर्वृतौसत्यांदेवमायाविमोहितः ५ आत्मजायासुतागार पशुद्रविणबंधुषु निरूढमूलं हृदयंआत्मानंबहुमन्यते ६ संदह्यमानसर्वांगएषामुद्वहनाधिना करोत्यविरतंमूढोदुरिता निदुराशयः ७ आक्षिप्तात्मेंद्रियः स्त्रीणांअसतीनांचमायया। रहोरचितयालापैःशिशूनांकलभाषिणां ८ गृहेषुकूटधर्मे षुदुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारंसुखवन्मन्यतेगृही ९ अर्थैरापादितैर्गुर्व्याहिंसयेतस्ततश्चतान् पुष्णातियेषांपो षणशेषभुग्यात्यधः स्वयं १० वार्तायांलुप्यमानायांआरब्धायांपुनःपुनः लोभाभिभूतोनिःसत्वः परार्थेकुरुतेस्पृहां ११ श्रीः

तीनांपुंश्चलीनामपिरहसिरचितयासंभोगादिरूपया मधुरभाषिणांशिशूनामालापैश्चसुखवन्मन्यतइत्युत्तरेणान्वयः ८ कूटाः वित्तशाठ्यादिबहुलाधर्मायेषुदुःखप्रधानेषु ९ येषांपोषणेनापोयानितान् पुष्णातिशेषभुगितिभोगोपितस्यदु र्लभइत्यर्थः १० वार्तायांजीविकायांनिःसत्वः अशक्तः परार्थेपरस्वे ११ नारायणनारायणजयगोविंदहरे श्रीगोपालकृष्ण

अकल्पः असमर्थः १२ पूर्वंयथा आद्रियंते तथाआदरंनकुर्वंति कीनाशाः कृपणाः कृषीबलागोजरं वृद्धंबलीवर्दं १३
भ्रियमाणः पुष्यमाणः १४ अवमत्यावज्ञयाउपन्यस्तंसमीपेप्रक्षिप्तंगृहपालः श्वा आहरन् भुंजानः आमयाविरोगी
१५ उत्तारोबहिर्निगतनेत्रः कफेनसंरुद्धानाड्योमार्गभूतायस्य कासाश्वासाभ्यां कृतआयासोयस्य घुरघुर इतिशब्दं करो

कुटुंबभरणाकल्पोमंदभाग्योवृथोद्यमः श्रियाविहीनः कृपणोध्यायन्श्वसितिमूढधीः १२ एवंस्वभरणाकल्पं
तत्कलत्रादयस्तदा नाद्रियंतेयथापूर्वंकीनाशाइवगोजरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः जरयो
पात्तवैरूप्योमरणाभिमुखोगृहे १४ आस्तेवमत्योपन्यस्तंगृहपालइवाहरन् आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः १५
वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः कासश्वासकृतायासः कंठेघुरघुरायते १६ शयानःपरिशोचद्भिःपरिवीतः स्वबं
धुभिः वाच्यमानोपिनब्रूतेकालपाशवशंगतः १७ एवंकुटुंबभरणेव्यापृतात्माजितेंद्रियः भ्रियतेरुदतांस्वानांउरुवेद
नयास्तधीः १८ यमदूतौतदाप्राप्तौभीमौसरभसेक्षणौ सदृष्ट्वात्रस्तहृदयः शकृन्मूत्रंविमुंचति १९ यातनादेहआवृ
त्यपाशैर्बद्ध्वागलेबलात् नयतोदीर्घमध्वानंदंड्यंराजभटायथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः पथिश्व
भिर्भक्ष्यमाणआर्तोघंस्वमनुस्मरन् २१ क्षुत्तृट्परीतोर्कदवानलानिलैः संतप्यमानःपथितप्तवालुके कृच्छ्रेणपृष्ठेकशया
चताडितश्चलत्यशक्तोपिनिराश्रमोदके २२

नि १६ परिवीतः परिवेष्टितः वाच्यमानः बंधोतातेत्याहूयमानः १७ अस्तधीर्नष्टमतिः १८ मृतस्यपुण्यपापाभ्यां द्वे गती तत्रपापगति
माह यमदूतावित्यादिनायावत्समाप्ति सरभसंसक्रोधमीक्षणंययोस्तौदृष्ट्वा १९ आवृत्यनिरुध्य २० तयोस्तर्जनैर्निर्भिन्नं हृदयंय
स्यआर्तःसन्चलतीतिद्वितीयेनान्वयः २१ क्षुत्तृड्भ्यांपरितोव्याप्तः तप्तवालुकायस्मिन्निर्गतआश्रमोविश्रामस्थानंउदकंचयस्मिन् २२

413/1981

यमसादनंनीतोभवति २३ तत्रैवंविशेषमाह अध्वनः संबंधिनांयोजनानांनवतिंनवचसहस्राणिपापाधिक्ये द्वाभ्यांनीतः सन् २४
यातनाः संक्षेपतोदर्शयतिचतुर्भिः आदीपनं प्रज्वलनंप्राप्नोति स्वेनकृतं अन्येनवाकृतंछिन्नंयत्स्वस्यमांसंतस्यभक्षणमित्यर्थः २५ आत्मनो
वेशसंपीडां २६ भिदापनंभेदप्रापणं २७ २८ नचैतदसंभावितं अत्रापिदृश्यमानत्वादित्याह अत्रैवेति २९ उभयंकुटुंबंस्वदेहंचपापा
र्जितंधनंभुंजतेबहवः कोनैवनरकंयातीत्यर्थः कइति भूतद्रोहेणयद्भृतंतत् स्थूलंकलेवरं वाइहैवाहित्वाकुशलादितरत्पापंतदेवपाथे

तत्रतत्रपतंश्रांतोमूर्छितः पुनरुत्थितः यथापापीयसानीतस्तमसायमसादनं २३ योजनानांसहस्राणिनवतिंनवचाध्वनः त्रि
भिर्मुहूर्तैर्द्वाभ्यांवानीतः प्राप्नोतियातनाः २४ आदीपनंस्वगात्राणांवेष्टयित्वोल्मुकादिभिः आत्ममांसादनंक्वापिस्वकृत्तंपरतोपि
वा २५ जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृंतनंचावयवशोगजादिभ्योभिदापनं पा
तनंगिरिशृंगेभ्योरोधनंचांबुगर्तयोः २७ यास्तामिस्रांधतामिस्रारौरवाद्याश्चयातनाः भुंक्तेनरोवानारीवामिथः संगेननिर्मिताः २८
अत्रैवनरकः स्वर्गइतिमातः प्रचक्षते यायातनावैनारक्यस्ताइहाप्युपलक्षिताः २९ एवंकुटुंबंबिभ्राणंउदरंभरएववा विसृज्येहोभयं
प्रेत्यभुंक्तेतत्फलमीदृशं ३० एकः प्रपद्यतेध्वांतंहित्वेदंस्वकलेवरं कुशलेतरपाथेयोभूतद्रोहेणयद्भृतं ३१ दैवेनासादितंतस्यशमलं
निरयेपुमान् भुंक्तेकुटुंबपोषस्यहृतवित्तइवातुरः ३२ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः यातिजीवोंधतामिस्रंचरमंतमसः
पदं ३३ अधस्तान्नरलोकस्ययावतीर्यातनादयः क्रमशः समनुक्रम्यपुनरत्राव्रजेच्छुचिः ३४ इतिश्रीभागवतेतृती० कर्मविपा
कः त्रिंशतमोध्यायः ३०

यंभोग्यंयस्य ३१ ननुपापमपिविहायगच्छतुतत्राह दैवेनेति तस्यकुटुंबपोषणस्यशमलंपापंदैवेनईश्वरेणप्रापितंभुंक्ते ३२ नात्रकुटुंबपो
षणंस्यविहितमेवतत्राह केवलेनेतितमसोनरकस्यचरमंपरंस्थानं ३३ पुनर्मनुष्यशरीरप्राप्तिप्रकारमाह नरस्यलोकस्यमनुष्यदेहस्यप्राप्ते
रधस्तात् अर्वाक्यावत्योयातनाः आदिशब्देनश्वसूकरादियोनयश्चयाः ताः सर्वाः क्रमेणसंप्राप्यभोगेनक्षीणपापः शुचिः सन्
अत्रपुनर्नरत्वंप्राप्नोतीत्यर्थः ३४ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयोपाख्यानेकर्मविपाकः टीकायांत्रिंशतमः ३०

एकत्रिंविशोविमिश्रेस्तु पुण्यपापैरिहातस्तु मनुष्ययोनिसंप्राप्तिर्वर्णितेराजसीगतिः १ पुनरत्राब्रजेदित्युक्तं तदेवविशेषतोदर्शयति
कर्मणापूर्वकृतेन दैवमीश्वरः तदेवनेत्रं बेत्र प्रवर्तकंयस्य प्रविष्टोभवति १ कललंशुक्रशोणितमिश्रितं भवतिबुद्बुदंवर्तुलाकारं क
र्कंधुर्बदरीफलंतदाकारंकठिणं पेशीमांसपिंडाकारं अंडंवायोन्यंतरे २ बाहुप्रभृति अंगानां विग्रहोविभागः लिंगंचछिद्राणिचतेषां
उद्भवः ३ जरायुणा गर्भवेष्टनेनवीतःप्रावृतः ४ मातुर्जग्धेनभक्षितेनान्नेनपानाद्यैश्चएधमाना धातवोयस्य जंतूनांसंभवोयस्मिन्

श्रीभगवानुवाच कर्मणादैवनेत्रेणजंतुर्देहोपपत्तये स्त्रियाःप्रविष्टउदरंपुंसोरेतःकणाश्रयः १ कललंत्वेकरात्रेणपंच
रात्रेणबुद्बुदं दशाहेनतुकर्कंधुःपेश्यंडंवाततःपरं २ मासेनतुशिरोद्वाभ्यांबाह्वंघ्र्याद्यंगविग्रहः नखलोमास्थिचर्माणिलिंग
छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवःसप्तपंचभिःक्षुत्तृडुद्भवः षड्भिर्जरायुणावीतःकुक्षौभ्राम्यतिदक्षिणे ४ मातुर्जग्धान्नपा
नाद्यैरेधद्धातुरसंमते शेतेविण्मूत्रयोर्गर्तेसजंतुर्जंतुसंभवे ५ कृमिभिःक्षतसर्वांगःसौकुमार्यात्प्रतिक्षणं मूर्छामाप्नोत्युरु
क्लेशस्तत्रत्यैःक्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टःसर्वांगोत्थितवेदनः ७
उल्बेनसंवृतस्तस्मिन्नंत्रैश्चबहिरावृतः आस्तेकृत्वाशिरःकुक्षौभुग्नपृष्ठशिरोधरः ८ अकल्पःस्वांगचेष्टायांश
कुंतइवपंजरे तत्रलब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवं स्मरन्दीर्घमनुच्छ्वासंशर्मकिंनामविंदते ९ माधव

तस्मिन्नसंमतेगर्तेशते तथाचमार्कंडेयपुराणेनाडीचाप्यायनीनामनाभ्यांतस्यनिबध्यते स्त्रीणांतथांत्रसुषिरेसानिबद्धोपजाय
तेक्रमंतेभुक्तपीतानिस्त्रीणांगर्भोदरेतथा तैराप्यायितदेहोसौजंतुर्वृद्धिमुपैतिवैइति ५ तत्रत्यैःकृमिभिःखादद्भिःसौकुमार्यात्कोमु
लत्वेनक्षतानिसर्वांगानियस्य ६ उल्बणैःदुःसहैःसर्वेष्वंगेषुउत्थितावेदनायस्य आस्तइत्युत्तरेणान्वयः ७ उल्बेनजरायुणाभुग्नंकुटिली
कृतंपृष्ठंशिरोधराग्रीवाचयस्य ८ दैवात्पूर्वकर्मवशात्लब्धास्मृतिर्येनसः दीर्घंदुरंतमनुच्छ्वासंयथाभवतितथातत्रस्थितःसन् ९

215
138

स्मृतिहेतुर्वानैर्वेपितःसोदरःसमानोदरजन्माविष्ठाभूःकृमिरिव १० नाथमानोयाचमानःउपतप्यमानइतिवा ऋषिभिःदेहात्मदर्शी
भीतःपुनर्गर्भवासात् सप्तवध्रयोबंधनभूताधातवोयस्यसः विक्लवोवं अकुलया ११ उपसन्नंजगदुद्दिधीर्षुं स्वेच्छयागृहीतनानाभूतनाम्न
स्तेभगवतश्चरणारविंदं अकुतोभयंसोहंशरणंव्रजामि भुविचलदितिश्रीकृष्णावताराभिप्रायेण असतोमेअनुरूपायोग्यायेनेदृशी
गर्भवासलक्षणागतिर्दर्शितातस्य १२ ननुकोसोयंव्रजसि कोवानवतस्यविशेषःयेनसेव्यसेवकत्वमित्यपेक्षायामाह अत्रमातुर्दे
हेभूतेंद्रियाशयमयींदेहाकारपरिणतांमायामवलंब्यआश्रित्यकर्मभिरावृतस्वरूपइवबद्धइववयआसेसोहं यस्तुअत्रैववासि

आरभ्यसप्तमान्मासाल्लब्धबोधोपिवेपितः नैकत्रास्तेसूतिवातैर्विष्ठाभूरिवसोदरः १० नाथमानऋषिर्भीतःसप्तवध्रिःकृ
तांजलिः स्तुवीततंविक्लवयावाचायेनोदरेर्पितः ११ जीवउवाच तस्योपसन्नमवितुंजगदिच्छयात्तनानातनोर्भुविचलच्च
रणारविंदं सोहंव्रजामिशरणंह्यकुतोभयंमे येनेदृशीगतिरदर्श्यसतोनुरूपा १२ यस्त्वत्रबद्धइवकर्मभिरावृतात्माभूतेंद्रि
याशयमयीमवलंब्यमायां आस्तेविशुद्धमविकारमखंडबोधमातप्यमानहृदयेवसितंनमामि १३ यःपंचभूतरचिते
रहितःशरीरेछन्नोयथेंद्रियगुणार्थचिदात्मकोहं तेनाविकुंठमहिमानमृषिंतमेनंवंदेपरंप्रकृतिपुरुषयोःपुमांसं १४ राम

तंनमामि कथंभूतमित्यपेक्षायां तुशब्दोक्तंविशेषंदर्शयति आतप्यमानेहृदयेवसितंप्रतीतं एवमप्यविकारंकुतःविशुद्धंनिरुपाधिं तत्कु
तःअखंडोबोधोयस्यतं १३ ननुत्वमपिवस्तुतःशुद्धएव असंगोह्ययंपुरुषइत्यादिश्रुतेः तत्कथंयुवयोरयंविशेषः तत्राहयःपंचभिःभू
तैःरचितेशरीरे अयथामिथ्यैवछिन्नःनवस्तुतः यतस्तेनशरीरेणरहितःअसंगअतोयथैवइंद्रियगुणार्थचिदात्मकः इंद्रियाणिगुणाश्च
अर्थाश्चचिदाभासश्चतदात्मकःसोहंतंवंदे कथंतं तेनशरीरेणअविकुंठोमहिमायस्यतं अवकुंठेतिपाठेअवसन्नंगुंठनमावरणंयस्यसम
हिमायस्येत्यर्थः तत्रहेतुःप्रकृतिपुरुषयोःपरंनियंतारंकुतःऋषिंसर्वज्ञंविद्याशक्तिमित्यर्थः विद्याविद्याकृतोविशेषइतिभावः १४ राम

भा०
९८

नन्वुज्ञानेनायं बंधोनिवर्त्तयिष्यते किंपरमेश्वरवंदनेनतत्राह यस्यमायया नष्टस्मृतिः सन् संसारसंबंधिनिपथितदभिश्रमेणातत्कृतेन न०
क्लेशेनचरन्नयंजीवः महतस्तस्यैवेश्वरस्यानुग्रहंविनापुनः कयायुक्त्यालोकंनिजस्वरूपंप्रपश्यतीतसंजेत अभिश्रमहेतुत्वेनपंथानंविशि
नष्टि उरुणिगुणनिमित्तानिकर्माणिनितरांबंधनानियस्मिन् ईश्वरस्यप्रसादंविनाभावात्सएवसेव्य इत्यर्थः १५ ईश्वरएवज्ञानद
इत्कपमादयन्नाह यदेतत्त्रिकालविषयंज्ञानंतत् तंविनाकतमोभय्यदधात् नकोपि किंतुसदेवईश्वरएव अन्यः प्रकृष्टाजीवो
दधातुनेत्याह जीवरूपांकर्मपदवींअनुवर्त्तमानावयमिति तद्व्यतिरेकेणनकोपिसमर्थ इत्यर्थः अन्यस्यात्रासंभवमुक्तातस्यसं

नज्ञायदेतददधात्कमतः सदेवस्त्रेकालिकंस्थिरचरेष्वनुवर्तितांशः तंजीवकर्मपदवीमनुवर्त्तमानास्तापत्रयोपशमना
यवयंभजेम १६ येनाययोरुगुणकर्मनिबंधनेस्मिन्संसारिकेपथिचरंस्तदभिश्रमेण नष्टस्मृतिः पुनरयंप्रवृणीतलोकं
युक्त्याकयामहदनुग्रहमंतरेण १६ देह्यन्यदेहविवरेजठराग्निनास्टग्विण्मूत्रकूपपतितोभृशतप्तदेहः इछन्नितोविवसितुंग
णयन्स्वमासान्निर्वास्यतेकृपणधीर्भगवन्कदानु १७ येनेदृशींगतिमसौदशमास्यईश संग्राहितः पुरुदयेनभवादृशेन
स्वेनैवतुष्यतुकृतेनसदीननाथः कोनामतत्प्रतिविनांजलिमस्यकुर्यात् १८ वासुदेव माधव गोपाल नारायण मुकुंदराम्

भवमाह स्थिरेषुचरेषुच अंतर्यामिरूपोनुवर्त्तितोंशोयेन तं भजेम १६ स्वदुःखंविज्ञापयन्नाह देहीति अन्यदेहविवरेमादुरु श्रीः
दरेकुहरेयोस्टग्विण्मूत्रकूपः तस्मिन्पतितः तत्रजठराग्निनाभृशंतप्तोदेहोयस्य अतएवकृपणधीः इतोविवरात् विवसितुंनिर्गंतुमिछ
न् समासानगणयन् असौकदानुअहोबहिर्निवास्यते १७ तत्कृतमुपकारंस्मरन्नाह येनेदृशींगतिंज्ञानंभवादृशेनेतिनिरूप ९८
ममेनेत्यर्थः स्वकृतेनैवस्वयंतुष्यतु अंजलिमात्रंविनातत्कृतोपकारे प्रत्युपकारंकः कुर्यादित्यर्थः १८ नमोभगवतेवासुदेवाय

4117
1881

दृदृशींगतिमित्यनेनजात्यंतरविलक्षणंज्ञानंप्रापितवानित्युक्तं तदेववैलक्षण्यमाह पश्यतीति अयमपरः पश्वादिः स
सप्तवध्रिर्जीवः स्वदेहशारीरकेशरीरभवेसुखदुःखेकेवलंननपश्यति अहंपुनर्यत्स्पष्टयाधिषणयायद्दत्तेनविवेकज्ञानेनदमशरीरी
दमइत्युपलक्षणं शमदमादियुक्तशरीरवान् आसंअभवं तमेवचपुराणंअनादिपुरुषंपूर्ववाह्येश्च हृदिश्चपश्येपश्यामीत्यन्वयः
रूथंअपरोक्षतयाप्रतीतंचैत्यमिवअहंकारास्पदंभोक्तारमिवेत्यर्थः १९ विवेकज्ञानकृतंसंसारोद्वेगमनुवदन्मोक्षमार्गमेवाध्यव
स्यति सोहमितिद्वाभ्यां हेविभोबहुदुःखवासंयथाभवतितथागर्भेवसन्नपि सोहंगर्भाद्बहिर्ननिर्गंतुमिच्छामि तत्रहेतुः अंधकू

पश्यत्ययंधिषणयाननुसप्तवध्रिः शारीरकेदमशरीर्यपरः स्वदेहे यत्सृष्टयासतमहंपुरुषंपुराणंपश्येबहिर्हृदिच
चैत्यमिवप्रतीतं १९ सोहंवसन्नपिविभोबहुदुःखवासंगर्भान्ननिर्जिगमिषेबहिरंधकूपे यत्रोपयातमुपसर्पतिदेवमा
यामिथ्यामतिर्यदनुसंसृतिचक्रमेतत् २० तस्मादहंविगतविक्लवउद्धरिष्यआत्मानमाशुतमसः सुहृदात्मनैव भूयोय
थाव्यसनमेतदनेकरंध्रंमामेभविष्यदुपसादितविष्णुपादः २१ श्रीकपिलउवाच एवंकृतमतिर्गर्भेदशमास्यः स्तुवन्नृ
षिः सद्यः क्षिपत्यवाचीनंप्रसूत्यैसूतिमारुतः २२

यप्राप्येयत्र बहिरुपयातंप्राणिनंदेवस्यतवमायाउपसर्पतिव्याप्नोति यदनुयांमायामनुमिथ्यामतिर्देहे अहंबुद्धिः संसृतिचक्रंच
कलत्रपुत्रादिसंबंधाउपसर्पति २० तस्मादत्रैवस्थितोपिविगतविक्लवः अव्याकुलः सन् सुहृदाआत्मनासारथिरूपयाबुध्यैवआत्मा
नंतमसः संसारादुद्धरिष्यामि अनेकरंध्रंनानागर्भवासरूपमेतत् व्यसनंदुःखंयथामेमाभविष्यत् नभविष्यतितथा कातत्र
वसाधनसामग्रीतत्राह उपसादितौहृदयंप्रापितौविष्णोः पादौयेनमयासः २१ दशमासाः परिच्छेदकायस्येति प्रसूतिश्चरे
क्षणोपलक्षणं ऋषिर्जीवः सद्यः तत्क्षणमेवअवाचीनमवाङ्मुखं सूतिहेतुर्मारुतः क्षिपतिनुदति २२ श्रीरामकृष्ण श्रीः

भा० अवसृष्टः अधः क्षिप्तः सन् २२ रोरूयति रोरूयते २४ परस्यछंदं अभिप्रायमविदुषा अनभिप्रेतंस्तन्यार्थं रोदने उदरव्यथांप्र ३०
९९ कल्प्य निंबरसपानं उदरव्यथयारोदने स्तनपानमित्यादि २५ आसनोत्थानचेष्टने चानीशः सन् रोरूयति इत्यनुषंगः २६ आ
माकौमलात्वकू यस्यतं विगतं गर्भे ज्ञातं ज्ञानं यस्य शैशवं पंचकर्माणि ततः पौगंडं यौवनार्वाक् तत्रत्राध्ययनादिदुःखं २७
यौवन दुःखमाह सार्द्धैस्त्रिभिः अलब्धाभीप्सितत्वेन शुचार्पितः व्याप्तः अज्ञानादिद्धोदीप्तोमन्युर्यस्य सः देहेनसहैववर्द्धमाने

तेनावसृष्टः सहसा कृत्वावाक्शिरआतुरः विनिःक्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः २३ पतितोभुव्यसृग्मूत्रेवि
ष्ठाविष्ठाभ्कृरिवचेष्टते रोरूयति गतेज्ञाने विपरीतां गतिं गतः २४ परछंदमविदुषा पुष्यमाणोजनेनसः अनभिप्रेतमा
पन्नः प्रत्याख्यातुमनीश्वरः २५ शायितोशुचिपर्यंके जंतुः स्वेदजदूषिते नेशः कंडूयनेगानां आसनोत्थानचेष्टने २६ तु
दंत्यामत्वचं दंशामशकामत्कुणादयः रुदंतं विगतज्ञानं कृमयः क्रिमिकं यथा २७ इत्येवं शैशवं भुक्त्वा दुःखं पौगं
डमेवच अलब्धाभीप्सितोज्ञानादिद्धमन्युः शुचार्पितः सहदेहेनमानेनवर्धमानेन मन्युना करोति विग्रहं कामी कामिष्वं
तायचात्मनः २८ भूतैः पंचभिरारब्धे देहे देह्यबुधोसकृत् अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिं २९ तदर्थं कुरुते कर्म यद्ब
द्धोयाति संसृतिं योनुयाति ददत्क्लेशमविद्याकर्मबंधनः ३० यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आस्थितोरमते
जंतुस्तमो विशति पूर्ववत् ३१ श्रीः
नाभिमानेनमन्युनाच विग्रहं विरोधं करोति आत्मनोंतायनाशाय २८ अज्ञानं प्रपंचयति भूतैरारब्धे देहे सअसदाग्रहोहंममे
तिमतिं करोति २९ तदर्थं देहार्थं यत् येन कर्मणाबद्धः योदेहः अनुयाति पुनः पुनरायाति अनुवर्ततइति वा कुतः अविपाकमभ्योबंध ९९
नइति तथा ३० यद्यसद्भिरास्थितः अधिष्ठितः सन् तेषां पथि रमते पथि सन्मार्गे आस्थितोपि यद्यसद्भिः सहरमत इति वा तर्हि यातनादेह
आवृत्त्यत्यादिपूर्वोक्तप्रकारेण नरकं प्रविशति ३१

भा.७
१३८१

असत्संगं निंदति त्रिभिः ३२ खंडितात्मस्कदेहात्मबुद्धिषु योषितांक्रीडामृगवद्धीनेषु ३३ यथाच योषित्संगिनां संगतो बं
धः तथान्यप्रसंगतो न भवेत् ३४ योषित्संगस्यानर्थहेतुतां प्रपंचयति प्रजापतिरिति सप्तभिः रोहिद्भूतां मृगीरूपां सतीं कृत्सरूपी
कारः सन् हृतत्रपो निर्जलः ३५ तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तेषु कोनु पुमान् अखंडितधीः अनाकृष्टमनाः
३६ दिशांजनयिनः शूरानपि ३७ प्रतिलब्धः आत्मरूपोलाभो येन अस्य मुमुक्षोयाः प्रमदाः निरयद्वारं वदंति योगिनः ३८ शनैः

सत्यंशौचंदयामौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा शमोदमोभगश्चेति यत्संगाद्याति संक्षयं ३२ तेष्वशांतेषु मूढेषु खंडिता
त्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३३ नतथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः योषित्संगाद्यथापुंसा
यथातत्संगिसंगतः ३४ प्रजापतिः स्वांदुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोन्वधावदृक्षरूपी हतत्रपः ३५ तत्सृष्टसृष्टसृ
ष्टेषु कोन्वखंडितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येहमायया ३६ बलं मे पश्य मायायाः स्त्रीमय्याजयिनोदिशां या
करोति पदाक्रांतान् भ्रूविजृंभेण केवलं ३७ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्म
लाभोवदंति या निरयद्वारमस्य ३८ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ३९
यामन्यते पतिंमोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४० तामात्मनो विजानीयात्पत्यपत्यगृ
हात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४१

शिश्रूषादिभिषेणोपयाति या योषिद्रूपा माया मत्कं प्रतिकूलं मेवक्षेत्ते ३९ मुमुक्षुं स्त्रियं भव्यतरं वाहयामितिद्वाभ्यां ऋषभायतीं पुरु
षावदाचरंतीं यां ममायां वित्तादिप्रदं मन्यते स्त्रीसंगतः अंतकाले स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४० तां प
त्यादिरूपं मृत्यु विजानीयात् मृग×पतिं× योलुब्धकस्य गायमानमनुकूलत्वेन प्रातीयमानमपि यथा मृगस्य मृत्युः ४१ राम

भा०
१००

तदेवंजीवस्यसंसृतिःप्रपंचिता तत्रचतस्यकर्मवशेनलोकाल्लोकांतरगमनंजन्ममरणंचोक्तं तत्रैवंशक्यते ननुव्यापकस्यकथंलोकाल्लोकांतरगमनंनित्यस्यचकथंजन्ममरणे भोगेनकर्मक्षयेचसतिजन्ममरणंचेष्यते तत्कृतःपुनरपितस्यकर्मसंभवइतितत्रलोकांतरगमनंकर्मचसंभवतीत्याह देहेनेतिजीवस्यत्नोपाधितयाभूतेनजातेनजीवेनलिंगदेहेनलोकांतरमनुव्रजन् अविरतंकर्माणिकरोतीतिकर्मणामसमाप्तिरुक्ता ४२ जन्ममरणसंभवमाह जीवोपाधिलिंगदेहः अस्यात्मनः अनुगः अनुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारः देहः भोगायतनंतयोर्निरोधः कार्यायोग्यतातदस्यजीवस्यमरणमुच्यते आविर्भावस्तुसंभवोजन्मोच्यते ४३ एतदेवदृष्टांतेनस्पष्टयति द्रव्योपलब्धिस्थानस्यनेत्रगोलकादेःद्रव्येक्षायांरूपादिदर्शनेकाचकामलादिदोषेणायोग्यताभवति तदे टी०

देहेनजीवभूतेनलोकाल्लोकमनुव्रजन् भुंजानएवकर्माणिकरोत्यविरतंपुमान् ४२ जीवोस्यानुगतोदेहोभूतेंद्रियमनोमयः तन्निरोधोस्यमरणमाविर्भावस्तुसंभवः ४३ द्रव्योपलब्धिस्थानस्यद्रव्येक्षायोग्यतायदा तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ४४ यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यतायदा तत्पंचत्वं तदेवचक्षुषोर्द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४५ तस्मान्नकार्यःसंत्रासोनकार्पण्यंनसंभ्रमः बुध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४६ सम्यग्दर्शनयाबुध्यायोगवैराग्ययुक्तया मायाविरचितेलोकेचरेन्न्यस्यकलेवरं ४७ आध्यायःसमाप्तः

वचक्षुषइंद्रियस्याप्ययोग्यता अनयोःस्थानचक्षुषोर्यदायोग्यता तदेवद्रष्टुर्जीवस्यद्रष्टृत्वायोग्यताएवंस्थूलदेहेवैकल्पेलिंगस्यचैक्यं तदेवजीवस्यमरणंनस्वतइत्यर्थः ४४ क्वचिदेकःश्लोकाधिकःपठ्यते तत्रायमर्थः द्रव्योपलब्धिस्थानस्यस्थूलशरीरस्यद्रव्येक्षायांयथायोग्यतातत्पंचत्वंमरणं अहंमानादिदमेवाहमित्यभिमानेनद्रव्यस्यस्थूलदेहस्यशरीरस्यदर्शनमुत्पत्तिःअक्ष्णोःगोलकयोर्द्रव्यावयवस्यरूपादेर्दर्शनेयोग्यताशेषंसमानं ४५ यस्मादेवंस्वतोजीवस्यजन्ममरणादितस्मान्मरणत्संत्रासोनकार्यः जीवनेनचकार्पण्यंसंभ्रमश्चजीवनप्रयत्ने ४६ ननुसर्वथामुक्तसंगत्वेनकथंजीवितं अतआह सम्यक्पश्यतिविचारयतीतिसम्यग्दर्शना तयाबुध्यामाययाविरचितेलोकेकलेवरंन्यस्यनिक्षिप्यतस्मिन्नासक्तिंत्यक्त्वा

श्रीः
१००

५२१
१३४१

द्वात्रिंशेसात्विकीधर्मैरूर्ध्वागतीरुदीर्यते तत्रज्ञानविहीनस्यततश्चपुनरागतिः तदेवंपापकर्मणोगतिमुक्त्वा इदानींकाम्यकर्मणोगतिमाह अथेतिचतुर्भिः योगृहएवावसन् स्वान्धर्मान् दोग्धि दोत्यमाह काममर्थंच तान्दुग्धान्धर्मान्भूयः पिपर्ति पूरयति अनुतिष्ठति १ सोपिभगवदाराधनरूपाद्धर्मात्पराङ्मुखःसन् श्राद्धतानपिदेवान्पितॄंश्चयजते २ ततःकिंतत्राह तेषांश्रद्धयाआक्रांतायाप्तामतिर्यस्य पित्रर्थंदेवार्थंचव्रतंनियमोयस्य सोमपाःतत्रसोमर्पायित्यर्थः ३ लोके

इतिश्रीभागवतेमहापुराणे० कापिलेयोपाख्यानेजीवगतिरेकत्रिंशत्तमोध्यायः ३१ कपिलउवाच अथयोगृहमेधीयान्धर्मानेवावसन्गृहे काममर्थंचधर्मांश्चदोग्धिभूयःपिपर्तिमान् १ सचापिभगवद्धर्मात्काममूढःपराङ्मुखः यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः २ तच्छ्रद्धयाक्रांतमतिःपितृदेवव्रतःपुमान् गत्वाचांद्रमसंलोकंसोमपाःपुनरेष्यति ३ यदाचाहींद्रशय्यायांशेतेनंतासनोहरिः तदालोकालयंयांतितएतेगृहमेधिनां ४ येस्वधर्मान्नदुह्यंतिधीराःकामार्थहेतवे निःसंगान्यस्तकर्माणःप्रशांताःशुद्धचेतसः ५ निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः स्वधर्माख्येनसत्वेनपरिशुद्धेनचेतसा ६ सूर्यद्वारेणतेयांतिपुरुषंविश्वतोमुखं परावरेशंप्रकृतिमस्योत्पत्त्यंतभावनं ७ श्रीरामजयजयराम

तिष्ठत्यथपुण्यक्षयात्पतनमुक्त्वालोकानामपिलयमाह यदाचअहरहःप्रलये ४ भगवद्धर्मनिष्ठानांतत्प्राप्तिमेवगतिमाह त्रिभिःयेतुकामार्थप्रयोजनायस्वधर्मान्नदुह्यंतिनदुहंतिनिःसंगाःअनासक्ताःन्यस्तानिईश्वरेसमर्पितानिकर्माणियैः ५।६ विश्वतोमुखंपरिपूर्णंपुरुषंयांति तथाचश्रुतिःसूर्यद्वारेणतेविरजाःप्रयांतियत्रामृतःपुरुषोह्यव्ययात्मेति प्रकृतिंउपादानकारणंउत्पत्त्यंतभावनंनिमित्तकारणं७

भा० परमेश्वरदिदृक्षाहिरण्यगर्भोपासकानामपिक्रमेण तत्प्राप्तिमाह द्विपरार्धावसाने इति त्रिभिः परस्यहिरण्यगर्भस्यपर टी०
१०१ चिंतकाः परमेश्वरदृष्ट्याहिरण्यगर्भोपासकाः ८ क्ष्मादीनिपंचमहाभूतानिमनश्च इंद्रियाणिच अर्थाश्च शब्दादयः भूतादिश्च
अहंकारः एवमादिभिः परिवृतंयुक्तं ब्रह्मांडं प्रतिसंहर्तुमिच्छुः सयोगिनः अमृतंपरमानंदरूपं प्रधानं उत्कृष्टं उत्कृष्टंब्रह्म तेनैवस
होपयांति ननुपूर्वं यतस्तदाअगताभिमानाः तथाचश्रुतिः ब्रह्मणासहतेसर्वे संप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानः प्रविशंतिपरंप

द्विपरार्द्धवसानेयः प्रलयो ब्रह्मणस्तुते तावदध्यासतेलोकं परस्यपरचिंतकाः ८ क्ष्मांभोनलानिलवियन्मनइंद्रियार्थ
भूतादिभिः परिवृतंप्रतिसंजिहीर्षुः अव्याकृतंविशतियर्हिगुणत्रयात्माकालंपराख्यमनुभूयपरः स्वयंभूः ९ एवंपरे
त्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधानमुपयांत्यग
ताभिमानाः १० अथतंसर्वभूतानांहृत्पद्मेषुकृतालयं श्रुतानुभावंशरणंव्रजभावेनभामिनि ११ आद्यः स्थिरचराणां
योवेदगर्भः सहर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः १२ भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा कर्तृत्वा
त्सगुणंब्रह्मपुरुषंपुरुषर्षभं १३ससंसृत्यपुनः कालेकालेनेश्वरमूर्तिना जातेगुणव्यतिकरेयथापूर्वंप्रजायते १४ ७

दर्शिति १० भगवदुपासकास्तुसाक्षादेवतंप्राप्नुवंति ननुक्रमेण अतस्त्वंसाक्षात्तमेवभजेत्याह अथतस्माद्भावेनप्रेम्णा ११ एवंताव श्रीः
दुक्तानांनिरंतरमेवतत्प्राप्तिः भगवदभेदेनहिरण्यगर्भोपासकानांतुक्रमेणोक्तं भेदेनोपासनेतुब्रह्मादयोप्यावर्तंते किमुता
न्यइत्याह आद्यइतिचतुर्भिः योवेदगर्भः सोपिगुणव्यतिकरेजातेपूर्ववद्यथाब्रह्मपदाधिकृतः सन्प्रजायतेनकेवलंसएवैकः किंतु १०१
ऋषिभिर्मरीच्यादिभिश्चसह १२ जन्मनिहेतुद्वयं भेददृष्ट्याभिमानेनकर्तृत्वादितिचयथापूर्वत्वेहेतुः निःसंगेननिष्कामेनकर्मणे
ति १३किंकृत्वात्रजायतेप्रथमंपारमेष्ठ्यमैश्वर्यंनिषेव्यपश्चात्प्रलयेसगुणंगुणाधिष्ठातारंप्रथमावतारंरूपंपुरुषं संसृत्यप्राप्य १४

423/1981

तेऋषिप्रमुखाः स्वकर्मनिर्मितमैश्वर्यंनिषेव्यपुरुषंचसंसृत्य यथापूर्वंस्वस्वाधिकारेणपुनरायांतीत्यन्वयः १५ यदा
ब्रह्मोपासकानामपिभेददर्शनाभिमानाभ्यामेवमावृत्तिः तदाकाम्यकर्मिणांकिंवक्तव्यमितितान्निंदन्नाह षड्भिः येत्विहकर्म
स्वासक्तमनसः संतः अप्रतिषिद्धानिकाम्यानिनित्यानिचकर्माणिकृत्वानिकुर्वंतितेअर्यम्णोदक्षिणेनयथाधूममार्गेणपितृलो
कंव्रजंतीतिपंचमेनान्वयः मध्येतन्निंदा १६ १७ हरंतिसंसारंमेधायस्य कथनीयाउरवोविक्रमायस्यतस्यमधुद्विषः कथा

ऐश्वर्यंपारमेष्ठ्यंचतेपिधर्मविनिर्मितं नसेव्यपुनरायांतिगुणव्यतिकरेसति १५ येत्विहासक्तमनसः कर्मसुश्रद्धया
न्विताः कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः १६ रजसाकुंठमनसः कामात्मानोजितेंद्रियाः पितृन्यजंत्यनुदि
नंगृहेष्वभिरताशयाः १७ त्रैवर्गिकास्तेपुरुषाविमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः १८ नूनंदैवे
नविहितायेचाच्युतकथासुधां हित्वाशृण्वंत्यसद्गाथाः पुरीषमिवविड्भुजः १९ दक्षिणेनपथार्यम्णः पितृलोकंव्रजंतिते
प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः २० ततस्तेक्षीणसुकृताः पुनर्लोकमिमंसति पतंतिविवशादेवैः सद्योवि
भ्रंशितोदयाः २१ तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनं तद्गुणाश्रययाभक्त्याभजनीयपदांबुजं २२

यांविमुखाः संतोयेत्रैवर्गिकाः १८ येचाच्युतस्यकथासुधांहित्वा असतांगाथाः शृण्वंतितेनूनंदैवेनविहिता इत्यन्वयः १९
पितृलोकात्पुनः प्रजामनुपुत्रादिषुप्रजायंते गर्भाधानादारभ्यश्मशानांताः क्रियाः कृतवंतः यथोक्तकारिणइत्यर्थः २० कथंप्र
जायंते तदाह ततस्तेपुनरिमंलोकंप्रतिपतंति विभ्रंशितउदयोभोगसाधनंयेषां २१ परमेष्ठिनंपरमेश्वरंप्रीत्यातस्यगुणानाश्रयतेयाभक्तिस्तया २२

भा०

१०२

भजनेच ज्ञानवैराग्ये स्वतएव भवत इत्याह वासुदेव इति २२ तदेवोपपादयति यदास्य भक्तस्य चित्तं भगवद्गुणानुरागेण तस्मिन्नेव निश्चलं स्यात् इंद्रियवृत्तिभिर्वैषम्यमर्थेषु नगृह्णाति २४ तदेवात्मनात्मानं स्वप्रकाशमीक्षते कथंभूतं समंच तद्दर्शनंच २५ ततकुतः निःसंगं संगाद्धि वैषम्यं भवति निःसंगत्वे हेतुः हेयोपादेयरहितं तत्कुतः परं व्यवसितमात्रं परमानंदो हमिति निश्चयं प्राप्तमित्यर्थः २५ समेषर्थेष्वित्युक्तं तदेव साम्यं दर्शयति ज्ञानमात्रमेव परब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यद्रष्टृकरणरूपेण पृथक्प्रतीयते ज्ञानमात्रत्वेन समेष्वित्यर्थः २६ ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेन तृ०

वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयात्याशु वैराग्यं ज्ञानं यत् ब्रह्मदर्शनं २२ यदास्य चित्तमर्थेषु समेष्विंद्रिय वृत्तिभिः नविगृह्णाति वैषम्यं प्रियमप्रियमित्युत २४ सदैवात्मनात्मानं निःसंगं समदर्शनं हेयोपादेयरहितमारूढं पदमीक्षते २५ ज्ञानमात्रं परंब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते २६ एतावानेव योगेन समग्रेणेह योगिनः युज्यतेभिमतोह्यर्थो यदसंगस्तु कृत्स्नशः २७ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थ रूपेण भ्रांत्या शब्दादिधर्मिणा २८ यथा महानहंरूपस्त्रिवृत् पंचविधः स्वराट् एकादशविधः स्तस्य वपुरंडं जगद्यतः २९

केसाध्यसाधनसाध्येन योगेन प्राप्यते तदाह एतावानिति युज्यते प्राप्यते प्रपंचसंगव्युदास एव योगफलमित्यर्थः २७ ननु कथं प्रत्यक्षाक्षिप्रतीतः प्रपंचो व्युदसितुं शक्यते प्रतीतेर्भ्रांतित्वादित्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिभर्मोयस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभातिनत्वर्थः पृथगस्तीत्यर्थः २८ अर्थरूपत्वमेवोपपत्त्यदर्शयति यथेति अहंरूपः अहंकारः सचत्रिवृत्त्रिगुणात्मकः पुनश्च भूतरूपेण पंचविधः इंद्रियरूपेण पंचविधः इंद्रियरूपेणैकादशविधश्च स्वराट् जीवरूपतस्य जातस्य वपुरंडं जगच्च य तोयभ्योमहदादिभ्यः तथा व भाति २९ श्रीः १०२

425
1381

ननु तर्हि जनः किमित्येवं नप्रत्येतितत्राह एतद्ब्रह्म ३० उक्तमेवार्थं सुखप्रतिपत्त्यर्थं संक्षेपेणानुवदति इतीति हेतुर्विप्रज्ञे ३१ अनेन च ज्ञानयोगेन भगवान् एव प्राप्यो यथा भक्तियोगेनेत्याह नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योयोगः तयोर्द्वयोरप्येक एवार्थः प्रयोजनं कौसौ भगवच्छब्दोपलक्षणं ज्ञापकोयस्य तदुक्तं गीतासु तेप्राप्नुवंति मामेव सर्वभूतहिते रता इति ३२ ननु ज्ञानयोगस्य आत्मलाभः फलं शास्त्रेणागेवंम्यते भक्तियोगस्यतु भजनीयेश्वरप्राप्तिः कुतस्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति यथावद्रूपरसादीनां गुणानामाश्रयो गुड क्षीरादिः एक एवार्थो मार्गभेदप्रवृत्तैरिंद्रियैः नाना प्रतीयते चक्षुषा शुक्लइति रसनेन मधुर इति स्पर्शनेन शीत इत्यादि

एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्यच ३१ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ यथेंद्रियैः पृथग्द्वारैः अर्थो बहुगुणाश्रयः एकोनानेयते तद्वत् भगवान् शास्त्रवर्त्मभिः ३३ क्रियया क्रतुभिर्दानैस्तपः स्वाध्यायमर्शनैः आत्मेंद्रियजयेनापि संन्यासेनच कर्मणां ३४ योगेन विविधांगेन भक्तियोगेनचैवहि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३५ आत्मतत्वावबोधन वैराग्येण दृढेनच ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६ प्रवोचं भक्तियोगस्य स्वरूपं तेचतुर्विधं कालस्यचाव्यक्तगतेर्योंतर्द्धावति जंतुषु ३७ वासुदेव गोपाल नारायण माधव गोविंद श्रीः

तथा भगवानेव तत्तद्रूपेणावगम्यते ३३ शास्त्रमार्गानेव प्रपंचयति क्रिययेति त्रिभिः क्रियया पूर्तरूपया क्रतुभिर्यागैः मर्शनं मीमांसा आत्मेंद्रियजयो निषिद्धवर्जनं ३४ उभयचिह्नेन सकामनिष्कामलक्षणेनांतमेवाह य इति ३५ सकामधर्मप्राप्यं स्वर्गादपिभगवत एव सगुणं स्वरूपमिति भावः एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः ३६ तदेवं ज्ञानयोगमुपसंहृत्य तत्स्यच भक्तियोगेन समानार्थत्वमुक्त्वा भक्तियोगाद्युपसंहरति प्रवोचमिति द्वाभ्यां चतुर्विधं त्रिगुण निर्गुण भेदेन अंतर्द्धावति उत्पत्तिनिधनादि करोति ३७ श्रीरामकृष्ण

भा०
१०२

टी०

अंगहेमातः ३८ उपदेशेनधिकरणोदर्शयति नैतदितिद्वाभ्यां फलायपरे इजकायभिन्नायदुराचाराय धर्मध्वजायदांभि
काय ३९ ४० अधिकारिणआह श्रद्धानायेतिद्वाभ्यां ४१ ४२ एतच्छ्रवणकीर्तनपरस्यापिमत्पदप्राप्तिफलमित्याह यद्
ति अप्यर्थेचकारः सोपिमत्पदवीमेति हिनिश्चितं ४३ इतितृतीयस्कंधेटीकायांद्वात्रिंशः ३२ अथत्रिंशेतुतस्यैवकपिलस्यो
पदेशतः ज्ञानभावेनतन्मातुर्जीवन्मुक्तिउदीर्यते १ विस्रस्तमोहरूपंपटलमावरणंयस्याःसातत्वान्येवविषयःतेनांकितासि

जीवस्यसंसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वंगप्रविशन्नात्मानवेदगतिमात्मनः ३८ नैतत्खलायोपदिशेन्नाविनीता
यकर्हिचित् नस्तब्धायनभिन्नायनैवधर्मध्वजायच ३९ नलोलुपायोपदिशेन्नगृहारूढचेतसे नाभक्तायचमेजातुनमद्
भक्तद्विषामपि ४० श्रद्दधानायभक्तायविनीतायानसूयवे भूतेषुकृतमैत्रायशुश्रूषाभिरतायच ४१ बहिर्जातविरागायशां
तचित्तायदीयते निर्मत्सरायशुचयेयस्याहंप्रेयसांप्रियः ४२ यइदंशृणुयादंबश्रद्धयापुरुषःसकृत् योवाभिधत्तेमच्चित्तः
सह्येतिपदवींचमे ४३ इतिश्रीभागवतेमहापुराणे० द्वात्रिंशत्तमोध्यायः ३२ मैत्रेयउवाच एवंनिशम्यकपिलस्यवचोजनि
त्रीसाकर्दमस्यदयितानाकिलदेवहूतिः विस्रस्तमोहपटलातमभिप्रणम्यतुष्टावतत्वविषयांकितसिद्धिभूमिं १ देवहूतिरुवाच अ
थाप्यजोंतःसलिलेशयानंभूतेंद्रियार्थात्ममयंवपुस्ते गुणप्रवाहंसदशेषबीजंदध्यौस्वयंयज्जठराब्जजातः २ वासुदेवगोपाल

श्रीः
१०२

द्धिः सांख्यज्ञानंतस्यभूमिंक्षेत्रंप्रवर्त्तकं १ अथेतिवाक्यांतरे अजोपितववपुःकेवलंदध्यौनतुदृष्टवान् सचस्वयंसाक्षात्यस्यतवजठ
राब्जजातःसभवानेवविश्वस्यसर्गादिविधत्तेनतुतवसर्गादिकर्ताकश्चिदस्तिएवंभूतस्त्वंमेमयाकथंजठरेणधृतइतित्रयाणा
मन्वयः कथंभूतंवपुः सतव्यक्तं तत्रहेतुः अंतःसलिलेशयानं कीदृशंभूतानिइंद्रियाणिचअर्थाश्चशब्दादयः आत्माचम
नः एतन्मयंएतैर्व्याप्तमित्यर्थः कुतः गुणानांप्रवाहोयस्मिन् ततकुतः अशेषस्यकार्यकारणस्यबीजंकारणं २ वासुदेव

427
1981

कथंभूतोभगवान्सर्गादिविधत्ते गुणप्रवाहरूपेणविभक्तंवीर्यंशक्तिर्येनसः शक्तिद्वारेणविनैवधनसाक्षादित्यर्थः यतःआनी
होनिःक्रियः तर्हिकथंशक्तिद्वारेणापिसर्गादिविधत्ते अवितथाभिसंधिः सत्यसंकल्पः किमर्थंविधत्ते आत्मनांजीवानामीश्व
रःजीवानांभोगार्थमित्यर्थः ननुकथंविचित्रान् भोगान्देहान्एकएवविदध्यात् अतक्याःसहस्रमपरिमिताशक्तयोयस्यसः २
किंचप्रलयेयस्योदरेएतद्विश्वमासीत् सत्वंमयाजठरेकथंधृतः ननुशिशोर्मपिकिमेनदुच्यतेतत्राह वटपत्रइति अंघ्रिंपादांगुष्ठंपिबती
त्यंघ्रिपानः इदमपिशिशुत्वंतद्वदेवमायाइतिभावः ४ अथवानत्वंमयाअयत्यांतरवज्जठरेधृतः किंतुवाराहाद्यवतारवदिच्छयैवा
विर्भूतोसीत्याह त्वंदेहतंत्रोदेहधारिकरस्वीकृतमूर्तिरसि पाप्मनांदुष्टानांनिदेशभाजांआज्ञानुवर्तिनांविभूतयेसमृध्यये आत्म

सएवविश्वस्यभवान्विधत्तेगुणप्रवाहेणविभक्तवीर्यः सर्गाद्यनीहोवितथाभिसंधिरात्मेश्वरोतर्क्यसहस्रशक्तिः ३ स
त्वंभृतोमेजठरेणनाथकथंनुयस्योदरएतदासीत् विश्वंयुगांतेवटपत्रएकःशेतेस्ममायाशिशुरंघ्रिपानः ४ त्वंदेहतंत्रःप्र
शमायपाप्मनांनिदेशभाजांचविभोविभूतये यथावतारास्तवसूकरादयस्तथायमप्यात्मपथोपलब्धये ५ यन्नामधेयश्रव
णानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपिक्वचित् श्वादोपिसद्यःसवनायकल्पतेकुतःपुनस्तेभगवन्नुदर्शनात् ६ अहोबतश्व
पचोतोगरीयान् यज्जिह्वाग्रेवर्त्ततेनामतुभ्यं तेपुस्तपस्तेजुहुवुःसस्नुरार्याः ब्रह्मानूचुर्नामगृणंतियेते ७ श्रीमाधव

पथोपलब्धयेज्ञानमार्गप्रदर्शनाय ५ अतस्तद्दर्शनादहंकृतार्थास्मीतिकैमुत्यन्यायेनाह तन्नामधेयस्यश्रवणमनुकीर्तनंचतस्मात्
क्वचित्कदाचिदपि श्वानमत्तीतिश्वादः श्वपचः सोपिसवनायसोमयागायकल्पतेयोग्योभवति अनेनपूज्यत्वंलक्ष्यते ६ तदुपपाद
यति अहोबतेत्याश्चर्ये यस्यजिह्वाग्रेतवनामवर्त्ततेसश्वपचोपि अतःअस्मादेवहेतोर्गरीयान् यद्यस्माद्वर्तते अतइतिवा कुतइत्यतआ
ह तएवतपस्तेपुःकृतवंतःजुहुवुःहोमंकृतवंतःसस्नुःतीर्थेषुस्नाताआर्याःतएवसदाचाराःब्रह्मवेदंअनूचुःअधीतवंतःतन्नामकीर्त
नेतपआद्यंतर्भूतमतस्तेपुण्यतमाइत्यर्थः महाजन्मांतरेस्तैस्तपोहोमादिसर्वंकृतमितितन्नामकीर्तनेनमहाभाग्यादस्यावगम्यत
इत्यर्थः ७

प्रत्यक्स्रोतसिप्रस्या हृते आत्मनि मनसि संभाव्यं संचिंत्यं वेदगर्भेयस्यसः ८ अविक्लवया वां भीरया वाचा ९ तेवेने
सुसेव्येनभयाउदितेन आस्थितेन अनुष्ठितेन परांकाष्ठां जीवन्मुक्तिं अवरोत्स्यसि प्राप्स्यति १० यायाः यास्यसि अत
हृदः मन्मतमविद्वांसः ११ अनुमतः अनुज्ञातः १२ सरस्वत्या आपीडे पुष्पमुकुटतुल्ये सरस्वत्येति पाठे मुकुटेनेव संवेष्टि
ते बिंदुसरसि समाहिता बभूव १३ कथंभूता सती समाहिता तदाह अभीक्ष्णं त्रिषवणमवगाहः स्नानं तेन कपिशान् पिशं

तं त्वामहं ब्रह्मपरं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भं ८ मैत्रे
य उवाच ईडितो भगवानेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ कपिल उवाच मार्गेणा
नमातस्ते सुसेव्येनोदितेन मे आस्थितेन परां काष्ठां अचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः
येन मामभवं यायाः मृत्युमिच्छंत्यतद्विदः ११ मैत्रेय उवाच इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं स्वमात्रा ब्रह्म
वादिन्या कपिलोनुमतो ययौ १२ सा चापि तनयोक्तेन योगादेशेन योगयुक् तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता १३
अभीक्ष्णावगाहकपिशान् जटिलान् कुटिलालकान् आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं १४ प्रजापतेः कर्दमस्य तपो
गर्विजृंभितं स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि १५ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः आसनानि च हैमा
नि सुस्पर्शास्तरणानि च १६ स्वच्छस्फटिककुड्येषु महामरकतेषु च रत्नप्रदीप आभांति ललनारत्नसंयुताः १७ राम्

गान् स्वत एव कुटिलान् केशान् तथा आत्मानं देहं चीरधारिणं कृशं च बिभ्रती सती १४ प्रजापतेः कर्दमस्य तपोयोगाभ्यां विजृंभित
मतिशयितं स्वगार्हस्थ्यं हित्वा पुत्रभूतेश्वरविरहातुरा सती वदनं किंचिदनिर्वाच्यं शोकव्याकुलं चकारेति षष्ठेनान्वयः १५ यत्र गार्हस्थ्ये क्षीर
फेननिभाः मृदुशुभ्राः शय्या आस्तरणानि भांति दंतघटिता मंचकाश्च स्वर्णमयाः परिकराः आसनानि पीठादीनि सुस्पर्शान्यस्तरणानि युक्तं १६ १७

429
1381

बहुभिरमरद्रुमैः रम्यं १८ यत्रोद्याने प्रविष्टमात्मानं देवहूतिमिति १९ आखंडल इंद्रः तस्य या योषितः तासामपि ईप्सिततमं प्राप्तु
मिष्टतमं तत् हित्वा तत्राभिमानं त्यक्त्वा २० सुहृद्वियोगस्य दुःसहतामाह वनमिति नष्टवत्सा वत्सलगौरिवाभूत् २१ विरहकृतध्यानफ
लमाह निस्पृहा निर्वासना वत्स विदुर २२ ततः स्वसुतः कपिलो यदाह तद्भगवतो रूपं ध्यायती तदा आत्मानं च विश्वतोमुखं सर्वगतं
ध्यायति ब्रह्मण्यवस्थितमतिर्बभूवेति पूर्वस्यैवानुषंगः केन ध्यायती विशुद्धेनात्मना मनसा २३ विशुद्धीकरणान्याह भक्तिप्रवाहरूप
योगेन वैराग्येण च युक्तानुष्ठानेन जातं यत् ज्ञानं तेन च युक्तानुष्ठानं च गीतासूक्तं युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्व

गृहोद्यानं कुसुमितैरम्यं बह्वमरद्रुमैः कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं १८ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः वा
प्यामुत्पलगंधिन्यां कर्दमेनोपलालितां १९ हित्वा तदीप्सिततममप्याखंडलयोषितां किंचिच्चकार वदनं पुत्रविश्लेषणातुरा २०
वनं प्रव्रजिते पत्यावपत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला २१ तमेव ध्यायती देवमपत्यं कपिलं हरिं बभूवाचि
रतो वत्स निस्पृहा तादृशे गृहे २२ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया २३ भक्तिप्रवाहयोगे
न वैराग्येन बलीयसा युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २४ विशुद्धेन तदात्मानमात्मना विश्वतोमुखं स्वानुभूत्या तिरोभूत
मायागुणविशेषणं २५ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये निवृत्तजीवापत्तित्वात् क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमा
धित्वात्परावृत्तगुणभ्रमा न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः २७ वासुदेव नारायण माधव मुकुंद गोपाल गोविंद

भावबोधस्य योगो भवति दुःखहेति ब्रह्महेतुना ब्रह्मतापादकेन २४ विश्वतोमुखत्वे हेतुः स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतं मायागुणैर्विशेषणं
परिच्छेदो यस्य २५ कथंभूते ब्रह्मणि आत्मनां जीवानां संश्रये सम्भवति तस्या जीवन्मुक्तिमाह सार्धैस्त्रिभिः तदा च निवृत्ता जीवापत्तिर्जीवभावो य
स्याः तस्या भावस्तत्त्वं तस्मात् विगतक्लेशा प्राप्तनिर्वृतिश्च सती आत्मानं देहं न सस्मारेत्युत्तरेणान्वयः २६ ननु तथापि गुणानां विद्यमानत्वात्कथं
अस्मरणं तत्राह नित्यारूढो लब्धप्रतिष्ठः समाधिर्यस्याः तस्या भावस्तत्त्वं तस्मात्परावृत्तः शांतो गुणनिमित्तो भ्रमो यस्याः सा २७ राम्

परतः पराभिरेव कर्दमसृष्टविद्याधरीभिः पोषणंयस्य आधिर्मनोग्लानिः तदसंभवादकृशाः मलैरवछन्नोवभौ २८ देवगुप्तंआ
रब्धकर्मपालितं २९ निर्वाणंनित्यमुक्तं ३० हेवीरविदुर उपेयुषीप्राप्ता ३१ हेसौम्य तस्यास्तत मर्त्यशरीरंसारित्प्रभूत् कथंभूतं
योगेननविधूतामिलीनामत्यादिहिका धातुमलायस्य ३२ कपिलोथयाविस्फक्तं तदेवप्रपंचयति कपिलोपीतित्रिभिः समनुज्ञाप्य

तद्देहः परतः पोषोप्यकृशः स्वाध्यसंभवात् बभौमलैरवछन्नः सधूमइवपावकः २८ स्वांगंतपोयोगमयंमुक्तकेशंगतां
बरं देवगुप्तंनबुधेवासुदेवप्रतिष्ठधीः २९ एवंसाकपिलोक्तेनमार्गेणाचिरतः परं आत्मानंब्रह्मनिर्वाणंभगवंतमवापह
३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं नाम्नासिद्धिपदंयत्रसासंसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यंमर्त्यम
भूत्सरित् स्रोतसांप्रवरासोम्यसिद्धिदासिद्धसेविता ३२ कपिलोपिमहायोगीभगवान्पितुराश्रमात् मातरंसमनुज्ञाप्य
प्रागुदीचींदिशंययौ ३३ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४ आस्तेयोगंसमा
स्थायसांख्याचार्यैरभिष्टुतः त्रयाणामपिलोकानांउपशांत्यैसमाहितः ॥ ३५ एतन्निगदितंतातयत्पृष्टोहंतवानघ कपि
लस्यचसंवादोदेवहूत्याश्चपावनः ३६ यइदमनुशृणोतियोभिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यं भगवतिकृतधीःसु
पर्णकेतावुपलभतेभगवत्पदारविंदं ३७ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयेत्रयस्त्रिंशत्तमोध्यायः ३३ राम

अनुज्ञांसंप्रार्थ्य ३३ दत्तमर्हणमर्घंनिकेतनंचयस्मै ३४ उपशांत्यर्थंसमाहितआस्ते ३५ प्रकारणार्थमुपसंहरति एतदिति तवत्वया
३६ तच्छ्रवणकीर्तनफलमाह यइति सुपर्णकेतौ गरुडध्वजे उपलभ्यप्राप्नोति ३७ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेभावार्थ
दीपिकायांश्रीधरस्वामीविरचितायांत्रयस्त्रिंशोध्याय ः ३३ श्रीकृष्णार्पणमस्तु पुस्तकलेखनखेदंवेत्ताविद्वज्जनोनान्यः
सागरलंघनखेदंहनुमानेकःपरोनान्यः १ वासुदेव श्रीः माधव श्रीः गोविंद श्रीः गोपाल श्रीः मुकुंद श्रीः जनार्दन श्रीः

431/1881

इतितृतीयस्कंदः समाप्तः

433/1381

अथचतुर्थस्कंधप्रारंभः श्रीरामचंद्रोविजयते

श्रीगणेशायनमः अथैकत्रिंशदध्यायेविसर्गस्तुर्यईर्यते विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिः कृतः १ तत्रतुप्रथमेध्या येमनुकन्यान्वयाः पृथक् वर्ण्यतेयत्रयज्ञादिमूर्तिभिः प्रभवोहरेः २ मनुकन्यान्वयंविस्तरेणवक्तुमाह मनोस्त्विति चका रात्द्वौपुत्रौच तुशब्दादन्यतोपिपुत्रलाभःसूचितः १ तद्दर्शयितुमाह पुत्रिकाधर्ममाश्रित्येति आभ्रातृकांप्रदास्यामीतु

हेरंब मैत्रेयउवाच मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे आकूतिश्चप्रसूतिश्चदेवहूतिश्चसुव्रताः १आ कूतिंरुचयेप्रादादपिभ्रातृमतींनृपः पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्रजापतिःसभगवान्रुचि स्तस्यामजीजनत् मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ३ यस्तयोःपुरुषःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् या स्त्रीसादक्षिणाभूतेरंशभूतानपायिनी ४ आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरोचिषं स्वायंभुवोमुदायुक्तोरु चिर्जग्राहदक्षिणां ५ तांकामयानांभगवानुवाहयजुषांपतिः तुष्टायांतोषमापन्नोजनयन्द्वादशा त्मजान् ६ तोषःप्रतोषःसंतोषोभद्रःशांतिरिडस्पतिः इध्मःकविर्विभुःस्वह्नःसुदेवोरोचनोद्विषट् ७

भ्रातृमतींकन्यामलंकृतां अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदिति भाषानुबंधेनकन्यादानंपुत्रिकाधर्मः सचाभ्रातृकायांक न्यायांपुत्रार्थिनएवप्रसिद्धः तथापिपुत्रबाहुल्यकामः तथाकृतवानित्याह भ्रातृमतीमपीति मिथुनंपुरुषंस्त्रियंच समाधिनाईश्वरध्यानेन ३ भूतेर्लक्ष्म्याअंशभूताअतस्तयोर्विवाहोनविरुद्धइतिभावः ४यजुषांयज्ञानांमंत्राणांवातिर्विधुः६
द्विषट्द्वादश ७

4135
1981

प्रसंगात्स्वायंभुवमन्वंतरगतंषट्कमाह तुषिताइतिद्वाभ्यां मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वरः ऋषयोंशावताराश्चहरेःषड्विधमु च्यतइतिवक्ष्यति तत्रस्वायंभुवोमनुः तुषितादेवाः मरीचिप्रमुखाःसप्तर्षयः यज्ञोहरेरवतारः सएवसुरगणेश्वरइंद्रः प्रिय व्रतोत्तानपादौमनुपुत्रौपृथ्वीपालकौ तदेवंयज्ञस्यैकरूप्येणषड्विधत्वं ८ तयोःपुत्रपौत्रनप्तृणांवंशैरनुवृत्तंव्याप्तंपालितंम न्वंतरंतत् ९ तत्श्रुतप्रायंबाहुल्येनश्रुतंतत्कन्यावंशानामश्रुतत्वात् प्रायग्रहणं १० प्रसूतिप्रसवंपुत्रपौत्रादिविस्तारं १२ ययो

तुषितानामतेदेवाआसन्स्वायंभुवेंतरे मरीचिमिश्राऋषयोयज्ञःसुरगणेश्वरः ८ प्रियव्रतोत्तानपादौमनुपुत्रौ महौजसौ तत्पुत्रपौत्रनप्तृणामनुवृत्तंतदंतरं ९ देवहूतिमदात्तत्रकर्दमायात्मजांमनुः तत्संबंधिश्रुतप्रायंभवतागदतोमम १० दक्षायब्रह्मपुत्रायप्रसूतिंभगवन्मनुः प्रायच्छद्यत्कृतःसर्गस्त्रिलोक्यांविततोमहान् ११ याःकर्दमःसुताप्रोक्तानवब्रह्मर्षिपत्नयः तासांप्रसूतिप्रसवंप्रोच्यमानंनिबोधमे १२ पत्नीमरीचेस्तुकलासुषुवेकर्दमात्मजा कश्यपंपूर्णिमानंचययोरापूरितंजगत् १३ पूर्णिमासूतविरजंविश्वगंचपरंतप देवकुल्यांहरेःपादशौचाद्याभूत्सरिद्दिवः १४ अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशसःसुतान् दत्तंदुर्वाससंसोमंआत्मेशब्रह्मसंभवान् १५ विदुरउवाच अत्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यंतहेतवः किंचिच्चिकीर्षवोजाताएतदाख्याहिमेगुरो १६ मैत्रेयउवाच ब्रह्मणाचोदितःसृष्टावत्रिर्ब्रह्मविदांवरः सहपत्न्याययावृक्षंकुलाद्रिंतपसिस्थितः १७ तस्मिन्प्रसूनस्तबकपलाशाशोककानने वार्भिःस्रवद्भिःउद्घुष्टेनिर्विंध्यायाःसमंततः १८

वंशैनापूरितं १३ कश्यपस्यवंशंषष्ठेनवक्ष्यति द्वितीयस्यवंशमाह पूर्णिमेति देवकुल्यांनामकन्यांच हरेःपादक्षालनात्जन्मांत रेचदिवःसरित्गंगाभूतयातां १४आत्मेशब्रह्मसंभवात् विष्णुरुद्रब्रह्मणामंशैःसंभवान् किंस्वित्किंचित् १६ ऋक्षंनाम कुलाद्रिं तपसिस्थितःसन् १७ तस्मिन्कुलाद्रौप्रसूतानांस्तबकायेषुपलाशाशोकेषुतेषांकाननेनिर्विंध्यानामनदीतस्याः स्रवद्भिर्वार्भिःउद्घुष्टेनादिते १८

१९ २० प्राणायाम एधः संदीपको यस्य तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना तप्यमानं समीक्ष्य तदाश्रमं ययुरित्यन्वयः २१ अप्सरः प्रमु
खैर्वितायमानं विस्तार्यमाणं यशो येषां ते २२ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः सन्निधिः तेन विद्योतितं मनो यस्य उत्कर्षे
ण तिष्ठन् २३ अर्हणं पुष्पादिकमंजलौ यस्य उपतस्ते पूजयामास वृषाद्यारूढान् स्वैः स्वैश्चिह्नैः शूलकमंडलुचक्रादिभिः २४ रू

प्राणायामेन संयम्य मनो वर्षशतं मुनिः अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः १९ शरणं तं प्रपद्येऽहं य एव जगदीश्व
रः प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना निर्गतेन मुनेर्मूर्ध्नः
समीक्ष्य प्रभवस्त्रयः २१ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः उत्तिष्ठन्नेकपादेन ददृशे विबुधर्षभान् २२
* अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्तदाश्रमपदं ययुः २२ * प्रणम्य दंडवद्भूमावुपत
स्थेऽर्हणांजलिः वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन हसद्वदनेनोपलंभितान् तद्रो
चिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः श्लक्ष्णया सूक्तया वाचा
सर्वलोकगरीयसः २६ अत्रिरुवाच विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः
ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः २७ श्रीरामजयराम जयजयराम

पावलोकाय स्मितं विहसच्च तद्वदनं च तेन उपलंभितान् प्रसन्नत्वेन ज्ञापितान् तेषां रोचिषा दीप्त्या २५ श्लक्ष्णया मधुर
या सूनृतया गंभीरार्थया २६ अनुयुगं कल्पे विभज्य गृहीता देहा यैस्ते प्रसिद्धा ब्रह्मगिरीशादयो यूयं वः युष्मान् प्रणतोऽस्मि तेभ्यः सकाशादेक
एव मे मया उपहूतः शरणं तं प्रपद्य इत्येकस्यैव निर्दिष्टत्वात् स च युष्मासु क इति युष्माभिरेव कथ्यतामित्यर्थः २७ श्रीरामजयराम

437
1931

अस्य प्रपंचः एक इति विविधैः प्रधानैरुपचारैः विबुधप्रधानादिति वा पाठः प्रजननाय पुत्रोत्पत्तये चित्तीकृतः चित्तेनैक्यतां नीतः मनसोऽपि
दूराः अगोचराः संतः कथं तु त्रयोऽप्यत्रागताः २८ २९ त्वया यथाकृतः संकल्पस्तेन तथैव भाव्यं नान्यथा यः संकल्पो यस्य ते यत्संक
ल्पः तर्हि कथमेकस्मिन् ध्यायमाने त्रयः प्रतीतास्तत्राहुः यदेकं जगदीश्वराख्यं तत्त्वं भवान् ध्यायति त एते वयं त्रयोऽपि तदेवैकं तत्त्वं

एको मयेह भगवान् विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयं अत्रागतास्तनुभृतां मनसोऽपि दूराद्ब्रूत प्रसीदत
महानिह विस्मयो मे २८ मैत्रेय उवाच इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं
प्रभो २९ देवा ऊचुः यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयं ३० यथा
भविता तेंऽग भद्रं ते विस्रप्स्यंति च ते यशः ३१ एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्व
रास्तदंशाच्युतास्ते आत्मजा लोकविश्रुताः भविता तेंऽग भद्रं ते विस्रप्स्यंति च ते यशः ३१ एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्व
राः सभाजितास्तयोः सम्यग्दंपत्योर्मिषतस्ततः ३२ सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् दुर्वासाः शंक
रस्यांशो निबोधांगिरसः प्रजाः ३३ श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः सिनीवाली कुहू राका चतुर्थ्यनुमति
स्तथा ३४ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेंऽतरे उतथ्यो भगवान् साक्षात् ब्रह्मिष्ठश्च बृहस्पतिः ३५ पुलस्त्यो
जनयत्पत्न्यामगस्त्यं च हविर्भुवि सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ३६

नास्माकं भेदोऽस्तीत्यर्थः ३० विस्रप्स्यंति विस्तारयिष्यंति अंतर्भूतणिजर्थस्य सृपुगतावित्यस्य रूपं ३१ ताभ्यां सम्यक्सभाजिताः
संतः ततः स्थानात्प्रतिजग्मुः ३२ निबोध शृणु ताः कन्या निर्दिशति सिनीवालीति ३३ ३४ ३५ पुलस्त्यश्च हविर्भुवि प
त्न्यामित्यन्वयः सोऽगस्त्यः दह्राग्निर्जाठरः विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ३६ श्री ६ ६ ६ ६ ६

भा०
४

विश्रवसः इडायांजातः सुतः कुबेरः अन्यस्यांभार्यायांकेशिन्यांरावणादयस्त्रयःसुताः ३७ ज्वलतः प्रकाशमानान् ३९ चित्रकेतु च०
प्रमुखाजज्ञिरेतेचसप्तर्षयोजाताः ४० तानेवाहचित्रकेतुरितिवसुर्घ्यानोनामएकः शक्त्यादयोपरे अन्यस्यांपत्न्यां ४१ ४२ख्या

तस्ययक्षपतिर्देवःकुबेरस्त्विडविलासुतः रावणःकुंभकर्णश्चतथान्यस्यांविभीषणः ३७ पुलहस्यगतिर्भार्यात्रीनसूत सतीसुतान् कर्मश्रेष्ठंवरीयांसंसहिष्णुंचमहामते ३८ क्रतोरपिक्रियाभार्यावालखिल्यानसूयत ऋषीन्षष्टिसहस्राणि ज्वलतोब्रह्मतेजसा ३९ ऊर्जायांजज्ञिरेपुत्रावशिष्ठस्यपरंतप चित्रकेतुप्रधानास्तेसप्तब्रह्मर्षयोमलाः ४० चित्रकेतुस्वरोचिश्चविराजामित्रएवच उल्बणोवसुर्घ्यानोद्युमान्शक्त्यादयोपरे ४१ चित्तिस्त्वथर्वणःपत्नीलेभपुत्रंधृतव्रतं दध्यंचमश्वशिरसंभृगोर्वंशंनिबोधमे ४२ भृगुःख्यात्यांमहाभागःपत्न्यांपुत्रानजीजनत् धातारंचविधातारंश्रियंचभगवत्परां ४३ आयतिंनियतिंचैवसुतेमेरुस्तयोरदात् ताभ्यांतयोरभवतांमृकंडःप्राणएवच ४४ मार्कंडेयोमृकंडस्यप्राणाद्वेदशिरामुनिः कविश्चभार्गवोयस्यभगवानुशनासुतः ४५ सर्वेतेमुनयःक्षत्तर्लोकान्सर्गैरभावयन् एषःकर्दमदौहित्रसंतानःकथितस्तव शृण्वतःश्रद्दधानस्यसद्यःपापहरःपरः ४७ प्रसूतिंमानवींदक्षउपयेमेत्वात्मजः तस्यांससर्जदुहितॄःषोडशामललोचनाः ४८ त्रयोदशादाद्धर्मायतथैकामग्नयेविभुः पितृभ्यएकांयुक्तेभ्योभवायैकांभवच्छिदे ४९ श्रद्धामैत्रीदयाशांतिस्तुष्टिःपुष्टिःक्रियोन्नतिः बुद्धिर्मेधातितिक्षाह्रीर्मूर्तिर्धर्मस्यपत्नयः ५० श्रद्धासूतशुभंमैत्रीप्रसादमभयंदया शांतिःसुखंमुदंतुष्टिःस्मयंपुष्टिरसूयत ५१ श्रीरामसुखार्वंधाम

त्यांपत्न्यांपुत्रानसुत्रौपुत्रींचतानेवाह धातारमिति ४३ तयोधातृविधात्रोः ४४ कविश्चभार्गवःभृगोःपुत्रःयस्यकवेःउशनाशुक्रः
सुतः ४५ ४६ ४७ अजात्मजःब्रह्मपुत्रः ४८ युक्तेभ्यःसंयतभ्यमीलितेभ्योवा ४९ ५० ५१ श्रीकृष्णायनमः ३

439/1881

५२ सर्वैर्गुणैरुपेतासर्वेषांगुणानांमूर्तिर्यस्यांसा ५३ ५४ ५५ उपतस्थुः सेवुः ५६ निजयामायायायस्मिन्नात्मनिस्वेगगनेरूपभेदं गंधर्वनगरमिवेदंविश्वंविरचितं तस्यात्मनःप्रतिचक्षणायप्रकाशनाय आत्मानंयोधप्रादुश्चकारप्रकटितवान् तस्मैपुरुषाय नमः केनरूपेणप्रादुश्चकार ऋषिमूर्तिराकारोयस्मिन् ५७ तेनरूपेणसोयंनोस्मान्सुरगणान् अदभ्रकरुणायुक्तेनविलोचने

योगंक्रियोन्नतिर्दर्पमर्थंबुद्धिरसूयत मेधास्मृतिंतितिक्षातुक्षेमंह्रीःप्रश्रयंसुतं ५२ मूर्तिःसर्वगुणोपेतानरनारायणावृषी ययोर्जन्मन्यदोविश्वमभ्यनंदत्सुनिर्वृतं ५३ मनांसिककुभोवाताःप्रसेदुःसरितोद्रयः दिव्यवाद्यंततूर्याणिपेतुःकुसुमवृष्टयः ५४ मुनयस्तुष्टुवुस्तुष्टाजगुर्गंधर्वकिंनराः नृत्यंतिस्मस्त्रियोदेव्यआसीत्परममंगलं ५५ देवाब्रह्मर्षयःसर्वेउपतस्थुरभिष्टवैः ५६ योमायथाविरचितंनिजमात्मनीदंखेरूपभेदमिवतत्प्रतिचक्षणाय एतेनधर्मसदनेऋषिमूर्तिनाद्यप्रादुश्चकारपुरुषायनमःपरस्मै ५७ सोयंस्थितिव्यतिकरोपशमायसृष्टान्सत्वेननःसुरगणाननुमेयतत्वः दृश्याददभ्रकरुणेनविलोचनेनयच्छ्रीनिकेतममलंक्षिपतारविंदं ५८ एवंसुरगणैस्तातभगवंतावभिष्टुतौ लब्धावलोकैर्ययतुरर्चितौगंधमादनं ५९

नविशिष्टेननेत्रेणदृश्यात्पश्यतु कथंभूतेनयच्छ्रीनिकेतममलंअरविंदंतक्षिपतातिरस्कुर्वता कथंभूतंअनुमेयंशास्त्रतोविचार्यनतस्माकमपरोक्षंतत्वंयस्य कथंभूतानस्मान्स्थितेर्जगन्मर्यादायाःव्यतिकरोन्यथात्वंतस्योपशमायसत्वेनगुणेनसृष्टान् ५८ लब्धोवलोकोयैःसुरगणैस्तैरभिष्टुतोअर्चितोचसंतोषयतुः ५९ गोविंद गोपाल कृष्ण विष्णो मुकुंद

श्रुवोभारस्यव्ययायनाशाय चकारोएकवाक्यार्थः तौचसांप्रतमिहागताविल्यर्थः तदुक्तंतंत्रे अर्जुनेतुनरावेशः कृष्णोनारायणःस्व
यमिति यदूद्वहः श्रीकृष्णः कुरूद्वहोर्जुनः उभावपिकृष्णनामानौ ६० अग्न्यमभिमानिनोदेवानस्वाहा नामतस्यां भार्यायां उत्पा
जनमितित्रयाणांविशेषणं ६१ पितरः त्रयः पितामह एकः तैः साकंसह ६२ वैतानिकेवैदिके कर्मणियेषांनामभिः अग्निदेवता
काइष्टयोनिरूप्यंतेक्रियंतेत एतेग्नयोनलौकिकाः अतोवहूनांनैवेर्थ्यमितिभावः ६३ सौम्याः सोमपाः येषामग्नौकरणम

ताविमौतौभगवतोहरेरंशाविहागतौ भारव्ययायचभुवः कृष्णौयदुकुरुद्वहौ ६० स्वाहाभिमानिनश्चाग्नेरात्मजां
स्त्रीनजीजनत् पावकंपवमानंचशुचिंचहुतभोजनं ६१ तेभ्योग्नयः समभवंश्चत्वारिंशच्चपंचच तएवैकोनपंचा
शत्साकंपितृपितामहैः ६२ वैतानिकेकर्मणियन्नामभिर्ब्रह्मवादिभिः आग्नेय्याइष्टयोयज्ञेनिरूप्यंतेग्नयस्तुते
६३ अग्निष्वात्ताबर्हिषदः सौम्याः पितरआज्यपाः साग्नयोनग्नयस्तेषांपत्नीदाक्षायणीस्वधा ६४ तयोर्देधारक
न्येद्वयुनांधारिणींस्वधा उभेतेब्रह्मवादिन्यौज्ञानविज्ञानपारगे ६५ भवस्यपत्नीतुसतीभवंदेवमनुव्रता आ
त्मनः सदृशंपुत्रंनलेभेगुणशीलतः ६६ पितर्यप्रतिरूपेस्वेभवायानागसेरुषा आप्रौढैवात्मनात्मानमजहा
द्योगसंयुता ६७ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेप्रथमोध्यायः १ नारायण वासुदेव कृष्ण

स्तितेसाग्नयः तद्रहिता अनग्नयः ६४ तयोस्तुसंततिर्नाभवत् जीवन्मुक्तत्वादित्याह एकांवयुनांनाम्नीं द्वितीयां धारिणींनाम्नीं
उभेतइति ६५ गुणशीलत आत्मनः सदृशं भवंदेवमनुव्रतापिसतीपुत्रंनलेभे ६६ तत्रहेतुः स्वपितरिदक्षे अप्रतिरूपे असदृशे
प्रतिकूलेसतीत्यर्थः आत्मनास्वयं आत्मानंदेहमजहात् त्यक्तवती योगसंयुतायोगमाश्रित्य ६७ इतिश्रीभागवतेचतुर्थेप्रथमः ४

2141
1931

द्वितीयेप्रथमाध्यायोपक्षिप्तभवदक्षयोः विरोधवर्ण्यतेहेतुर्विश्वसृकयज्ञसंभवः सतासती नाम्नी १ नचासौकस्यचितद्वेष्टाहेइ
त्याह कइति चराचरंगुरुंजगतोदैवतंचकोद्वेष्टि कथंचनिर्वैरंद्वेष्टि निर्वैरत्वेहेतुः भावक्तः शांतंशांतिरेवविग्रहोयस्य कुतः आत्म
न्येवारामोरतिर्यस्यतं यद्वाकः प्रजापतिः दक्षः कथंद्वेष्टि एवंभूतेतस्मिनद्वेषोयुक्तः अशक्यश्चेत्यर्थः २ यतोहेतोर्विद्विषः य

विदुरउवाच भवेशीलवतांश्रेष्ठेदक्षोदुहितृवत्सलः विद्वेषमकरोत्तस्मात् अनादृत्यात्मजांसतीं १ कस्तंचराचरगुरुं
निर्वैरंशांतविग्रहं आत्मारामंकथंद्वेष्टिजगतोदैवतंमहत् २ एतदाख्याहिमेब्रह्मनजामातुःश्वशुरस्यच विद्वेष
स्तुयतः प्राणांस्तत्यजेदुस्त्यजान्सती ३ मैत्रेयउवाच पुराविश्वसृजांसत्रेसमेताः परमर्षयः तथामरगणाः सर्वे
सानुगामुनयोग्नयः ४ तत्रप्रविष्टमृषयोदृष्ट्वार्कमिवरोचिषा भ्राजमानंवितिमिरंकुर्वंतंतन्महत्सदः ५ उदतिष्ट
न्सदस्यास्तेस्वधिष्ण्येभ्यः सहाग्नयः ऋतेविरिंच्यंशर्वंचतद्भासाक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षो भगवान्सा
धुसत्कृतः अजंलोकगुरुंनत्वानिषसादतदाज्ञया ७ प्राङ्निषण्णंमृडंदृष्ट्वानामृष्यत्तदनादृतः उवाचवामंच
क्षुर्भ्यामभिवीक्ष्यदहन्निव ८ दक्षउवाच श्रूयतांब्रह्मर्षयोमेसहदेवाः सहाग्नयः साधूनांब्रुवतोवृत्तंनाज्ञानान्न
चमत्सरात् ९ अयंतुलोकपालानांयशोघ्नोनिरपत्रपः सद्भिराचरितः पंथायेनस्तब्धेनदूषितः १० श्रीराम

तोद्वेषात्प्राणान्सतीत्याज्य एतदाख्याहि ३ तदेवाख्यातुमितिहासंप्रस्तौति समेतामीलिताआसन् ४ प्रविष्टंदक्षमितिशे
षः महत्सदः महतींसभां ५ स्वधिष्ण्येभ्यः स्वीयासनेभ्यः ६ ७ प्राक्स्वोपवेशनात् पूर्वमेवनिषण्णं उपविष्टं मृडंशि
वं तदनादृतः तेनाभ्युत्थादिभिरकृतादरः नामृष्यत् नासहत वामंवक्रं यथाभवतितथावीक्ष्य ८ मेवचनंश्रूयतांअज्ञा
नान्मत्सराच्चनब्रुवतः ९ स्तब्धेनउचितक्रियाशून्येन ध्वस्तेनेतिपाठेभ्रष्टेन १० श्रीरामजयरामजयजयराम

भा० तदेवाह एषइति यद्यस्माद्विप्राग्निसमक्षंसावित्रीतुल्यायामेदुहितुः पाणिमग्रहीत् ११ मृगशावस्यहरिणबालस्याक्षिणीवाक्षि चं०
५ णीयस्याः प्रत्युत्थानाभिवादार्हेमयिउचितंसन्मानंवाचापिनाकरोत् १२ अनर्हायकन्यादत्तेत्यनुतप्यमानआह लुप्तक्रियायेतिसा
र्द्धैश्चतुर्भिः उशतींवेदलक्षणांगिरं १३ प्रेतावासेषुश्मशानेषु सुप्ताविकीर्णाः केशाः यस्य १४ चिताभस्मनाकृतंस्नानंयेन प्रेतानांस्रजोमा
ल्यानियस्य नृणामस्थीनिभूषणानियस्य शिवइत्यपदेशोनाममात्रंयस्य १५ तमोमात्रात्मकः केवलतमोरूपः आत्मास्वभावोयेषां
उन्मादाप्रकृतविशेषात्तेषांनाथाय उद्दिदेउष्टचित्ताय वतेतिखेदे वास्तवस्त्वयमर्थः लुप्ताः क्रियाः यस्मिन्परब्रह्मरूपत्वात् अतएव

एषमेशिष्यतांप्राप्तोयन्मेदुहितुरग्रहीत् पाणिंविप्राग्निमुखतः सावित्र्याइवसाधुवत् ११ गृहीत्वामृगशावाक्ष्याः पाणिं
मर्कटलोचनः प्रत्युत्थानाभिवादार्हेवाचाप्यकृतनोचितं १२ लुप्तक्रियायाशुचयेमानिनेभिन्नसेतवे अनिच्छन्नप्य
दांबालांशूद्रायेवोशतींगिरं १३ प्रेतावासेषुघोरेषुप्रेतैर्भूतगणैर्वृतः अटत्युन्मत्तवन्नग्नोव्युप्तकेशोहसन्रुदन् १४
चिताभस्मकृतः स्नानः प्रेतस्रक् अस्थिभूषणः शिवापदेशोह्यशिवोमत्तोमत्तजनप्रियः १५ पतिः प्रमथभूता
नांतमोमात्रात्मकात्मकां तस्माउन्मादनाथायनष्टशौचायदुर्हृदे दत्तावतमयासाध्वीनोदितेपरमेष्ठिना १६ राम

नास्तिशुचिर्यस्मात् अमानिनेअभिन्नसेतवइतिच्छेदः तस्यपरमेश्वरस्यमदीयामानुषीकन्याकथंयोग्यास्यादितिलज्जादिना
दातुमनिच्छन्नपितत्संबंधलोभेनदत्तवान् शूद्रायेवोशतीमित्यनर्हत्वमात्रेदृष्टांतः नहीतत्ते पूर्वापरत्ववचनविरोधापत्तेः एतदु
क्तंभवति यथाकश्चिच्छूद्रायवेदमर्थलोभेनददातितद्वदिति प्रेतावासेत्यादिसर्वंविडंबनमात्रमिति स्वयमेवाह उन्मत्तवदिति अ
न्यथाउन्मत्तइत्येवावक्ष्यत् अशिवः नास्तिशिवोयस्मात् प्रमत्तः प्रमत्तजनप्रियइतिच्छेदः पतिः प्रमथभूतानामितिभक्तवात्स
ल्यतामाह तामसानपिदोषमपनीयतान्पातीति नष्टानामपिशौचंशुचियस्मात् तस्मैदुष्टचेष्ट्यैतेमयानुकंप्याइतिहृतमनाय ५
स्वसुहृत्वतस्मै वतेतिहर्षे ब्रह्मणोवाक्यात् लज्जाभयादिकंपरित्यज्यदत्तेत्यर्थः १६ राम कृष्ण नारायण वासुदेव हरे

443 / १८८१

अप्रतीपं अप्रतिकूलं यथाभवत्येवं अवस्थितमपिविनिंद्य १७ देवानांयजनसमयेदेवैः सहभागंनलभतांकिंतु तेभ्यः पूर्वमेवलभतां
अग्नभाजित्वात् यद्वा देवेषुभक्तवत्सलभतांसर्वपोषकत्वात् तत्रहेतुः देवगणः अधमोयस्मात् १८ सदस्यस्तस्माद्विनिष्क्रम्यजगाम
हेकौरव्य १९ गिरिशस्यानुगानामग्रणीर्मुख्यः रोषएवकषायस्तेनदूषितः आरक्तनेत्रइत्यर्थः तस्यगिरिशस्यअवाच्यतांवचनान
र्हतांनिंद्यतामित्यर्थः तेभ्योपिशापंविससर्ज २० दक्षंशपतिसार्द्धैस्त्रिभिः एतन्मर्त्यंदक्षशरीरंउद्दिश्यश्रेष्ठंमत्वाअप्रतिद्रुहि प्रतिद्रो
हमकुर्वति पृथक्दृष्टिभेददर्शीतितत्वतः परमार्थात् २१ अज्ञत्वमेवाह गृहेष्विति कर्मतंत्रंकर्मपरिकरं वेदेयवादाअर्थवादाः असत्यं

मैत्रेयउवाच विनिंद्यैवंसगिरिशमप्रतीपमवस्थितं दक्षोथापउपस्पृश्यक्रुद्धः शप्तुंप्रचक्रमे १७ दक्षउवाच अयंतु
देवयजनइंद्रोपेंद्रादिभिर्भवः सहभागंनलभतांदेवैर्देवगणाधमः १८ निषिध्यमानः ससदस्यमुख्यैर्दक्षोगिरित्राय
विसृज्यशापं तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगामकौरव्यनिजंनिकेतनं १९ विज्ञायशापंगिरिशानुगाग्रणीर्नंदीश्वरो
रोषकषायदूषितः दक्षायशापंविससर्जदारुणंयेचान्वमोदंस्तदवाच्यतांद्विजाः २० नंदिकेश्वरउवाच यएतन्मर्त्यमु
द्दिश्यभगवत्यप्रतिद्रुहि द्रुह्यत्यज्ञः पृथक्दृष्टिस्तत्वतोविमुखोभवेत् २१ गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छया
कर्मतंत्रंवितनुतेवेदवादविपन्नधीः २२ बुध्यापराभिध्यायिन्याविस्मृतात्मगतिः पशुः स्त्रीकामः सोस्त्वतितरांदक्षो
वस्तमुखोचिरात् २३ विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडः संसरंत्विहयेचामुंअनुशर्वावमानिनं २४ राम

हवैचातुर्मास्ययाजिनः सुकृतंभवतीत्यादयः तैर्विपन्नाविनष्टाधीर्यस्य २२ परोदेहादिस्तमेवात्मत्वेनभितोध्यातुंशीलंयस्यास्त
याबुद्ध्याविस्मृतांआत्मनोगतिस्तत्वंयेन अतः पशुतुल्यः अतितरांस्त्रीकामोस्त्वितिद्वितीयः शापः वस्तस्यमुखमिवमुखंयस्य
तितृतीयः शापः २३ अयंचशापानुरूपएवेत्याह विद्याबुद्धिरिति इयमेवतत्वंवियातिबुद्धिर्यस्य अतएवासौजडः विप्रानशप
त्संसरंत्वितिसार्द्धाभ्यां शर्वमवन्यतइतितथातं अमुंदक्षंयेन्वानुवर्ततेतेसंसरंतुजन्ममरणाद्यनुभवंत्वितिएकःशापः २४

भा०
६

श्रुतायाः वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादाः मनःक्षोभकत्वात् अर्थवादबहुलायाइत्यर्थः मधुगंधतुल्येन प्ररोचनेन मथ्नामनः क्षोभकेन उन्मथितः आत्मामनोयेषांतेसंमुह्यंतुकर्मस्वासक्ताभवंत्विति द्वितीयः २५ सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्याः देहादिपोषणाय धृतानि विद्यातपोव्रतानि यैः वित्तादिष्वेवारामोरतिर्येषांतेयाचकाः संत्विति विचरंत्विति शापचतुष्टयं प्रत्यसृजत् प्रत्यदात् २६ शापरूपं ब्रह्मदंडं २७ सच्छास्त्रपरिपंथिनः प्रतिकूलाः २८ सुरागौडीपैष्टीचमाध्वीच आसवस्तालसंभवंमद्यं दैवं स्यात्

गिरः श्रुतायाः पुष्पिण्याः मधुगंधेन भूरिणा मथ्नाचोन्मथितात्मानः संमुह्यंतुहरद्विषः २५ सर्वभक्षाद्विजा देहे धृतविद्यातपोव्रताः वित्तदेहेंद्रियारामयाचकाविचरंत्विह २६ तस्यैवंवदतः शापंश्रुत्वाद्विजकुलायतं भृगुः प्रत्यसृजच्छापंब्रह्मदंडंदुरत्ययं २७ भृगुरुवाच भवव्रतधरायेचयेचतान्समनुव्रताः पाखंडिनस्तेभवंतुसच्छास्त्रपरिपंथिनः २८ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः विशंतुशिवदीक्षायां यत्रदैवंसुरासवं २९ ब्रह्मचब्राह्मणांश्चैव यद्यूयंपरिनिंदथ सेतुंविधारणंपुंसामतः पाखंडमाश्रिताः ३० एषएवहिलोकानांशिवः पंथाः सनातनः यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः ३१ तद्ब्रह्मपरमंशुद्धंसतांधर्मंसनातनं विगर्ह्ययातपाखंडंदैवंवोयत्रभूतराट् ३२ मैत्रेयउवाच तस्यैवंवदतः शापंभृगोः सभगवान्भवः निश्चक्रामततः किंचिद्विमनाइवसानुगः ३३

पंदत्वंतद्यत्रदैवंपूज्यंदैवतावदादरणीयमितिवा २९ ब्रह्मवेदंकथंभूतंसेतुंमर्यादारूपंतदेवाह पुंसांवर्णाश्रमाचारवतांविधारणं धारकं ३० सेतुत्वंप्रपंचयति द्वाभ्यां एषवेदलक्षणएवशिवः पंथाः यंपूर्वेऋषयः अनुसंतस्थुः आश्रितवंतः यत्रयस्मिन्जनार्दनः प्रमाणंमूलं ३१ भूतराट्भूतानांतामसानांपतिः ३२ अन्योन्यशापेनानयोर्नाशात् विमनाइवेतितथापिभगवदनुगृहीतानांनाशोनस्यादितिभावः ३३ गोपाल कृष्ण नारायण वासुदेव हरे राम श्री ७ ७

च०

६

445
1981

ऋषभः सर्वश्रेष्ठोहरिर्यत्रईज्यः पूज्यः तत्सत्रं सम्यक्विधाय हेमहेष्वासविदुर ३४ यत्रप्रयागेअन्वितागंगायमुनयामीलिता तत्रावभृथस्नानंकृत्वाततः स्थानाययुः ३५ इतिचतुर्थेटीकायांद्वितीयोध्यायः २ तृतीयेतुसतीतानयज्ञोत्सवदिदृक्षयागमिष्यंतीमहेशेनवारितानीतिहेतुभिः १ ध्रियमाणयोः अवतिष्ठमानयोः धृङ् अवस्थानइत्यस्मात् भवदक्षयोर्विद्वेषंकुर्वतोः सतोः महान्कालोतिक्रांतः रुद्रहीनोयज्ञोनास्त्येवतथापिदक्षस्यरुद्रपरित्यागोद्वेषाद्भवाच्चितत्रविद्वेषहेतुरुक्तः १ यदातु प्रजापतीनामाधिपत्येभिषिक्तः तस्यस्मयोगर्वोभवत् २ गर्वादेवब्रह्मिष्ठान्सेश्वरानभिभूयतिरस्कृत्य वाजपेयेनइष्ट्वाबृहस्

नेपिविश्वसृजः सत्रंसहस्रपरिवत्सरान् संविधायमहेष्वासयत्रेज्यऋषभोहरिः ३४ आप्लुत्यावभृथंयत्रगंगायमुनयान्विता विरजेनात्मनासर्वेस्वंस्वंधामययुस्ततः ३५ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेद्वितीयोध्यायः मैत्रेयउवाच सदाविद्विषतोरेवंकालोवैध्रियमाणयोः जामातुः श्वशुरस्यापिसुमहानतिचक्रमे १ यदाभिषिक्तोदक्षस्तुब्रह्मणापरमेष्ठिना प्रजापतीनांसर्वेषामाधिपत्येस्मयोभवत् २ इष्ट्वासवाजपेयेनब्रह्मिष्ठानभिभूयच बृहस्पतिसवंनामसमारेभेक्रतूत्तमं ३ तस्मिन्ब्रह्मर्षयः सर्वेदेवर्षिपितृदेवताः आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्चसभर्तृकाः ४ तदुपश्रुत्यनभसिखेचराणांप्रजल्पतां सतीदाक्षायणीदेवीपितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतोदिग्भ्यउपदेववरस्त्रियः विमानयानाः सप्रेष्ठाः निष्ककंठ्यः सुवाससः ६ दृष्ट्वास्वनिलयाभ्याशेलोलाक्षीर्मृष्टकुंडलाः पतिंभूतपतिंदेवमौत्सुक्यादभ्यभाषत ७

तिसवेनयजेतेतिश्रुतेः वाजपेयेनइष्ट्वाबृहस्पतिसवंसमारेभइत्युक्तं ३ कृतस्वस्त्ययनाः कृतमंगलाः सभर्तृकाइतिदक्षिणादिभिः प्रथमभर्हितान्नामपिपत्न्यर्हणेपुनरर्हणमुक्तं ४ तत्तदाखेचराणांप्रजल्पतांसतीपितृयज्ञमहोत्सवंश्रुत्वा ५ तत्रव्रजंतीरुपदेवानांगंधर्वादीनांवरस्त्रियश्च ६ स्वस्यनिलयाभ्याशेसमीपेदृष्ट्वाऔत्सुक्यात्पतिमभाषतेतित्रयाणामन्वयः कथंभूतास्त्रियोदृष्ट्वाविमानानीयानानियासांताः प्रेष्ठैः सहिताः निष्कानिपदकानिकंठेयासांताः शोभनानिवासांसियासांताः लोलान्यक्षीणियासांताः मृष्टान्युज्वलानिकुंडलानियासांताः ७

भा० ७

निर्यापितः प्रवर्तितः हे वामशिवतेयद्यर्थिनाइत्यातुर्हिवयंचापिसरामगच्छामः नचाद्यापियागोनिवृत्तः यतोमीविबुधाः व्रजंति ८ च०
औत्सुक्यंप्रकटयंत्याह तस्मिन्निति षड्भिः पितृभ्यांउपनीतंदत्तंपारिबर्हमिच्छामीति ९ स्वसृः भगिनीः भर्तृभिः संमिताः सदृशीः क्लि
न्नधियंस्नेहार्द्रचित्तांचिरमुत्कंठमुत्सुकंमनोयस्याः सा अहंद्रक्ष्यामी हे मृडउन्नीयमानंप्रवर्त्यमानंअध्वरेषुध्वजमिवदृश्यंश्रेष्ठ
मध्वरं यद्वा उक्षिप्यमाणंयज्ञेध्वजंकेतुंयूपंवा १० अहोकिंतदाश्चर्ययेनतवेतदौत्सुक्यमितिचेदत आह त्वयीति हे अजएतद्विश्व
माश्चर्यरूपंत्वय्येवत्वन्माययारचितंभाति अतोयद्यपितवनाश्चर्यबुद्धिः तथाप्यहंयोषित् उत्सुकत्वभावातवतत्वंचनजानामि अ

प्रजापतेस्तेश्वशुरस्यसांप्रतंनिर्यापितोयज्ञमहोत्सवः किल वयंचतत्राभिसरामवामतेयद्यर्थितामीविबुधाः प्रयांति
हि ८ तस्मिन्भगिन्योममभर्तृभिः स्वकैर्ध्रुवंदिदृक्षंतिसुहृद्दिदृक्षवः अहंचतस्मिन्भवताचकामयेसहोपनीतंपरिब
र्हमर्हितुं ९ तत्रस्वसॄर्मेननुभर्तृसंमितामातृःस्वसृः क्लिन्नधियंचमातरं द्रक्ष्येचिरोत्कंठमनामहर्षिभिरुन्नीयमानंच
मृडाध्वरध्वजं १० त्वय्येतदाश्चर्यमजात्ममाययाविनिर्मितंभातिगुणत्रयात्मकं अथाप्यहंयोषिदतत्वविच्चतेदीनादि
दृक्षेभवमेभवक्षितिं ११ पश्यप्रयांतीरभवान्ययोषितोप्यलंकृताः कांतसखावरूथशः यासांव्रजद्भिः शितिकंठमं
डितंनभोविमानैः कलहंसपांडुभिः १२ कथंसुतायाः पितृगेहकौतुकंनिशम्यदेहः सुरवर्यनेंगते अनाहुताअप्यभि
यंतिसौहृदंभर्तुर्गुरोर्देहकृतश्चकेतनं १३

तोदीना कृपणासतीहे भवमेभवक्षितिंजन्मभूमिंदिदृक्षेद्रष्टुमिच्छामि ११ दिदृक्षामेवकौतुकमुत्पन्नायेनव्यनक्ति पश्यतिद्वाभ्यां हे अभव
तिसुहृद्वियोगदुःखंत्वयानास्वादितमितिभावः अन्यायोषितः संबंधरहिताअपिआयांतीः पश्य कांतसखाः भर्तृसहिताः वरूथशः
संघशः कथंभूताः यासांविमानैः नभोमंडितंहेशितिकंठनीलकंठेति परानुग्रहायत्वयाविषमपिभक्षितमितिसूचयति १२ तदाह हे
सुरश्रेष्ठपितृगेहोत्सवंनिशम्यसुतायादेहः कथंनेंगनद्रष्टुंनप्रचलति तथाप्यनाहूताः संतः कथंगच्छामतत्राह सौहृदंसुहृदः के
तनंगृहंतथाभर्त्रादीनांचगृहंअनाहूता अप्यभियंतियतः इत्यसमार्षं १३ श्रीरामजयरामजयजयराम हरयेश्रीकृष्णाय० ७

५५७/१९८१

तन्मेप्रसीदेदममर्त्यवांछितंकर्तुंभवान्कारुणिकोवताहति त्वयात्मनोर्द्धेहमदभ्रचक्षुषानिरूपितामानुगृहाणयाचितः १४ हे अमर्त्यतत्त
स्मात्प्रसीदइदंमेवांछितंकर्तुंभवानर्हति कारुणकत्वमेवाह अदभ्रचक्षुषा अनल्पज्ञानेनापित्वया आत्मनोदेहस्यार्द्धे अहंनिरूपिता
धृतायतोर्द्धनारीश्वरइतिख्यातोसि अतोमामांअनुग्रहाणयाचितः सन् १४ अभिभाषितोभियाचितः कः दक्षः यानाहममर्मभिदं
तियेतान्कुवागीषून्दुरुक्तिबाणान्संस्मारितः सन् १५ अनाहूतापीतित्वयायदुदितंउक्तंतच्छोभनमेव किंत्वनात्मनिदेहादवहंका
रस्तत्कृतेनमदेनमन्युनातेचबंधवोयद्यनुत्पादितदोषदृष्टयोभवंतिनर्हि नउत्पादितेनआरोपितदोषदृष्टिर्येषांते १६ ननुविद्यादि
गुणयुक्तोदक्षस्त्वादृशेषुमहत्सुकथंदोषदृष्टिर्भवेत्तत्राह विद्यादिभिरेवस्मृतोहतायांविवेकज्ञानेनष्टेसति भूयसांमहत्तमानांधा

४ ऋषिरुवाच एवंगिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्तप्रहसन्सुहृत्प्रियः संस्मारितोमर्मभिदः कुवागिषून्यान्
नाहकोविश्वसृजांसमक्षतः १५ श्रीभगवानुवाच त्वयोदितंशोभनमेवशोभनेह्यनाहूता अप्यभियंतिबंधुषु तेय
द्यनुत्पादितदोषदृष्टयोबलीयसानात्म्यमदेनमन्युना १६ विद्यातपोवित्तवपुर्वयःकुलैः सतांगुणैः षड्भिरसत्तमेतरैः
स्मृतौहतायांभृतमानदुर्दृशस्तब्धानपश्यंतिहिधामभूयसां १७ नैतादृशानांस्वजनव्यपेक्षयागृहान्प्रतीयादनव
स्थितात्मनां येभ्यागतान्वक्रधियाभिचक्षतेआरोपितभ्रूभिरमर्षणाक्षिभिः १८ तथारिभिर्नव्यथतेशिलीमुखैः
शेतेर्दितांगोहृदयेनदूयता स्वानांयथावक्रधियांदुरुक्तिभिर्दिवानिशंतप्यतिमर्मसुताडितः १९ श्रीकृष्णायनमः

मतेजोनपश्यंतिहिननुगुणैः कथंविवेकनाशः स्यात्तत्राह सतांगुणैर्विवेकहेतुभिरपि असत्तमानामितरैर्दोषभूतैः अतएवं
भूतैः अतएवतैर्भृतः धृतः पुष्टोवा अहंविद्वान्तापसइत्यादिमनोगर्वस्तेनदुष्टादृष्टिर्येषांते १७ स्वजनव्यपेक्षयाबंधुदृष्ट्यागृहान्
नप्रतीयात् नावलोकयत् अनवस्थितचित्तत्वमेवाह येवक्रधियाकुटिलयादृष्ट्यापश्यंति आरोपिताउत्क्षिताभ्रूर्येषुतान्यारो
पितभ्रूणितैः आरोपिताभिर्भ्रूभिरितिवा १८ ननुस्वजनानांगृहेसुहृद्भिर्गतव्यंतेषांदुश्चेष्टितंचसोढव्यंनतस्यदुःसहत्वादित्याह त
थेति अरिभिः शिलीमुखैर्बाणैरर्दितांगः खंडितगात्रोपितथानव्यथतेनखिद्यतियतः शेतेस्वपितिस्वानांदुरुक्तिभिर्मर्मसुताडिताय
था दूयताव्यमानेनहृदादिवानिशंतप्यतिसंतप्तोभवति १९ ७ ७ ७ ७ ७ ७ ७ ७

मयितत्रगतायांनेयंशंकेतिचेत्तत्राह व्यक्तंनिश्चितंउत्कृष्टागतिःस्थितिर्यस्यतस्यात्मजानांकन्यानांमध्येत्वंप्रियेतिमेसंमताअसि
पितुःसकाशावमानंनलप्स्यसे मदाश्रयात्मत्संबंधात् २० ननुभगवनत्वयादक्षःकिमितितिरस्कृतः यतोसौत्वांद्वेष्टयतआह पापच्यमा
नेनअलंदह्यमानेनहृदातुःखितेंद्रियःकाभिःपुरुषोजीवस्तस्यत्वंबुद्धिश्चित्तंतत्साक्षिणीनिरहंकारिणामित्यर्थः समृद्धिभिःपुण्यकी-
र्त्यादिभिः एषांपदंस्थानंऐश्वर्यंप्राप्तुमकल्पःअशक्तःसन्परंकेवलंद्वेष्टिअसुरायथाहरिंद्वेषंतितद्वत् २१ ननुत्वयाप्रत्युत्थानविन
याद्यकरणादवज्ञातएवासौतत्राह हेसुमध्यमेप्रत्युद्गमादिकंमिथोजनैर्यद्विधीयतेतत्प्राज्ञैःसाधुविधीयतेसाधुत्वमेवाह परस्मै
श्रीवासुदेवायगुहाशयायअंतर्यामिणएव तत्रचेतसैवपरिपूर्णतस्मिन्नकायिकव्यापारायोगात् अतोंतर्यामिदृष्ट्यामनसामवेंकृ

व्यक्तंत्वमुत्कृष्टगतेप्रजापतेःप्रियात्मजानामसिसुभ्रुसंमता अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः
२० पापच्यमानेनहृदातुरेंद्रियःसमृद्धिभिःपुरुषबुद्धिसाक्षिणां अकल्पएषामधिरोढुमंजसापरंपदंद्वेष्टियथासुरा
हरिं २१ प्रत्युद्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथःसुमध्यमे प्राज्ञैःपरस्मैपुरुषायचेतसागुहाशयायैवनदे
हमानिने २२ सत्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः सत्वेचतस्मिन्भगवान्वासुदेवोह्यधोक्षजोमेमनसा
विधीयते २३

नमितिभावः २२ किंचनकेवलमभ्यागतेष्वेववासुदेवदृष्ट्यानमस्क्रियतेकिंतुनित्यमेवमनसिवासुदेवश्चिंत्यतइत्याह विशुद्धंसत्वंअंतः
करणंसत्वगुणोवावसुदेवशब्दितंवसुदेवशब्देनोक्तंकुतःयद्यस्मात्तस्मिन्सत्वेपुमान्वासुदेवईयतेप्रकाशते अपगतमावृतमा
वरणंयस्मात्सः अयमर्थः वसुदेवेभगवतिप्रतीयतइतिहिवासुदेवः परमेश्वरःप्रसिद्धः सचविशुद्धेसत्वेप्रतीयतेअतःप्रत्ययार्थे
नप्रसिद्धेनप्रकृत्यर्थोनिर्धार्यते ततश्चवासयतिदेवमितिव्युत्पत्तितोवावसत्यस्मिन्नितिवासुदेवः दिव्यतिद्योततइतिवा वसुभिः
पुण्यैर्दिव्यतिप्रकाशतइतिवा वसुशब्दवाच्यंशुद्धंसत्वंततःकिमतआह सत्वेचतस्मिन्नमेमयामनसानमस्कारेणानुविधीयतेसे
व्यतइत्यर्थः मनसेतिपाठेमनसाविशेषेणधीयतेधार्यतेचिंत्यतइत्यर्थः अधोक्षतेपुप्रत्याहृतेष्वक्षेष्विंद्रियेषुजायतेप्रकाशतेइंद्रियागो
चरइत्यर्थः २३ ८

२२५ 1981

तस्मात्त्वयाननिरीक्ष्यः देहकृदपितिपोषकत्वादिभिरौपचारिकपितृत्वात्इत्यर्थः द्विट्शत्रुःनदेवाहहेवरोरुयःविश्वसृजांयज्ञगतंमा
मनागसंनिरपराधंतिरोकरोत्तिरस्कृतवान् २४ विपक्षेदोषमाह यदीति मद्वचोतिहायअतिक्रम्ययतःसंभावितस्ययदाभराभ
वोभवतितदासपराभवस्तस्यमरणायकल्पते २५ इतिश्रीभागवतेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांटीकायांचतुर्थ
स्कंधेतृतीयाध्यायः ३ चतुर्थेतुपतिंहित्वागतापित्रावमानिता रुषानिर्भर्त्स्यतद्यज्ञेजहौदेहमितीर्यते १ उभयत्रअनुज्ञान
बलान्निवारणेच सुहृद्दिदृक्षुःनिष्क्रामतीभवात्परिशंकितापुनर्विशंतीचतथासासतीद्विधाआसबभूव १ सुहृद्दिदृक्षायाःप्र

ततेनिरीक्ष्योनपितापिदेहकृद्दक्षोममद्विट्तदनुव्रताश्चये योविश्वसृग्यज्ञगतंवरोरुमामनागसंदुर्वचसाकरोत्तिरः २४
यदिव्रजिष्यस्यतिहायमद्वचोभद्रंभवत्यानततोभविष्यति संभावितस्यस्वजनात्पराभवोयदासस्सद्योमरणायकल्पते २५
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेतृतीयोध्यायः ३ मैत्रेयउवाच एतावदुक्त्वाविरराम शंकरःपत्न्यंगनाशंत्वुभ
यत्रचिंतयन् सुहृद्दिदृक्षुःपरिशंकिताभवान्निष्क्रामतीनिर्विशतीद्विधाससा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाःस्ने
हाद्रुदत्यश्रुकलातिविह्वला भवंभवान्यप्रतिपूरुषंरुषाप्रधक्ष्यतीवैक्षतजातवेपथुः २ ततोविनिश्वस्यसतीविहायतं
शोकेनरोषेणचदूयताहृदा पित्रोरगात्स्त्रैण्यविमूढधीर्गृहान्प्रेम्णात्मनोयोर्द्धमदात्सतांप्रियः ३ तामन्वगच्छन्द्रुतवि
क्रमांसतीमेकांत्रिनेत्रानुचराःसहस्रशः सपार्षदयक्षामणिमन्मदादयःपुरोवृषेंद्रास्तरसागतव्यथाः ४ श्रीरामचंद्र

तिघातेनदुर्मनाः अश्रूणांकलाभिर्लवैःअतिविह्वलाव्याकुलाअप्रतिपूरुषंस्वसमानपुरुषांतररहितंप्रधक्ष्यतीवभस्मीकरिष्य
तीव रुषाजातोवेपथुःकंपोयस्यासा २ ततस्तंविहायपित्रोर्गृहानगात् कथंभूतंयःप्रीत्यातस्यैआत्मनोदेहस्यार्द्धमदात् त्यागे
हेतुः स्त्रैण्यंस्त्रीस्वभावःतेनविमूढाधीर्यस्यासा ३ द्रुतविक्रमाशीघ्रगतिःसहपार्षदैर्यक्षैश्चवर्तमानाःमणिमानप्रदभ
आदिर्येषांतेपुरःपुरतोवृषेंद्रोयेषांतेगतव्यथाःनिर्भयाःरुद्रातिक्रमेणतस्यागमनादागतव्यथाइतिवा ४ श्रीराम

तांस्वर्षेद्रमारोप्यसारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्चमहाराजचिह्नैर्निभिः सहविटंकिताशोभितायंयुः सारिकापठन निरूपितापक्षिणी गीतायनैः गीताश्रयैः ५ आसमंतात्योवेदघोषस्तेनोर्जितंशोभमानंयज्ञसंबंधिपशुविशसनंयस्मिन्यद्वा तेनोर्जितंअतिशायितंयज्ञवैशसंपरस्परस्पर्द्धायस्मिन्तद्यजनंयज्ञस्थानंसमाविशद्देवी विबुधैश्चजुष्टंमृदादिभिर्निसृष्टानिनि र्मितानिभांडानिपात्राणियस्मिन् ६ कश्चननाद्रियत नादृतवान् यज्ञकृतोदक्षाद्भयंतस्मात् तत्रहेतुः तेनविमानितांस्वस जननीवउभेविनातास्तुसादराः परिषस्वजुः आलिंगितवत्यः प्रेमाश्रुभिः रुद्धः कंठोयासां ७ अप्रतिनंदिता अनादृतासती

तांसारिकाकंदुकदर्पणांबुजैः श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्यविटंकिताय
युः ५ अब्रह्मघोषोर्जितयज्ञवैशसंविप्रर्षिजुष्टंविबुधैश्चसर्वशः मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडंयजनंस
माविशत् ६ तामागतांतत्रनकश्चनाद्रियद्विमानितांयज्ञकृतोभयाज्जनः ऋतेस्वसृर्वैजननींचसादराः प्रेमाश्रुकं
ठ्यःपरिषस्वजुर्मुदा ७ सौदर्यसंप्रश्नसमर्थवार्तयामात्राचमातृष्वसृभिश्चसादरं दत्तांसपर्यांवरमासनंचसानाद
तपित्राप्रतिनंदितासती ८ अरुद्रभागंसमवेक्ष्यचाध्वरंपित्राचदेवेकृतहेलनंविभौ अनादृतायज्ञसदस्यधीश्वरीचु
कोपलोकानिवधक्ष्यतीरुषा ९ जगर्हसामर्षविपन्नयागिराशिवद्विषंधूमपथश्रमस्मयं स्वतेजसाभूतगणान्समुत्थि
तान्निगृह्यदेवीजगतोभिशृण्वतः १० श्रीदेव्युवाच नयस्यलोकेस्त्यतिशायनःप्रियःस्तथाप्रियोदेहभृतांप्रियात्मनः
तस्मिन्समस्तात्मनिमुक्तवैरकेऋतेभवंतंकतमःप्रतीपयेत् ११

नादृतनगृहीतवतीकथंसौदर्यत्वेनभगिनीनांयःसंप्रश्नः तत्रसमर्थायोग्यायावार्तातयासहतांचनादृतनाशृणोदित्यर्थः ८ नविद्यते रुद्रस्यभागोयस्मिन्तंदेवेकृतंहेलनं अवज्ञां आह्वानाद्यकरणात् ९ जगर्हनिंदितवती अमर्षेणकोपेनविपन्नाअव्यक्तातयाशिवंद्वेष्टि शिवद्विट्तंधूमपथः कर्ममार्गस्तत्रश्रमोभ्यासस्तेनस्मयोगर्वोयस्य दक्षवधायसमुत्थितान्स्वाज्ञयानिगृह्यनिवार्य १० निंदामेवाहन यस्येतित्रयोदशभिः मुक्तवैरकेत्यक्तविरोधेतस्मिन्शिवेभवंतंऋतेविनाकतमःप्रतीपयेत् प्रतिकूलमाचरेत् वैराभावेहेतवः यस्यलो केअतिशायनः अतिशयितोनास्तितथाप्रियश्चाप्रियश्चनास्तिसमासपाठे अतिशायनप्रियोनास्ति देहभृतांप्रियायमात्मातस्यसम ९

451
1481

स्तस्यात्मनिकारणभूतेसमस्तरूपइतिवा ११ तस्यचप्रतिकूलकरणंद्विधामहत्तमद्रोहेणसाक्षात्तद्द्रोहेणवा तत्रपुरुषाणांचातुर्विध्यंवदं तीमहत्तमद्रोहमाह दोषानिभिर्द्वाभ्यां हेअद्विजेत्यधिक्षेपः भवादृशाः त्वद्विधाः असूयकाः परेषांगुणेषुदोषानेवगृह्णाति नतुगुणान् कश्चित्तुमध्यस्थोगुणेषुदोषान्नगृह्णातिनुवदोषान्वतेतुमहत्तराउच्यंतेमहत्तमास्तुदोषान्नगृह्णंतिनतुप्रत्युतफल्गूनुतुच्छानपिगुणा ८ किंतुयथास्थितान्गुणान्दोषान्विवेकेनगृह्णंतिनतुमहांतउच्यंतेमाधवस्तुकेवलंगुणानेवगृह्णाति ८ न्बकुलीकुर्वंतिकरिष्णवाम वंति तेषुभवान् अघंअविदत्तविदितवान्कल्पितवानित्यर्थः तच्चब्रह्मिष्ठानभिभूयत्यनेनसूचितं १२ एतच्चदुर्जनेषुयुक्तमेवत्याह ने तिकुणपंजडंशरीरंतदेवात्मेतिवदंतियेतेइर्षाअक्षांतिः सर्ष्यंयथाभवत्येवंमहतांविनिंदेतियतएतदाश्चर्यंनभवतिमर्ष्योनिरस्तंतेजः प्र

दोषान्परेषांहिगुणेषुसाधवोगृह्णंतिकेचिन्नभवादृशोद्विज गुणांश्चफल्गून्बहुलीकरिष्णवोमहत्तमास्तेष्ववदद्भवानघं
१२ नाश्चर्यमेतद्यदसत्सुसर्वदामहद्विनिंदाकुणपात्मवादिषु सेर्ष्यंमहापूरुषपादपांसुभिर्निरस्ततेजःसुतदेवशोभनं १३
यद्व्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगादघमाशुहंतितत् पवित्रकीर्तिंतमलंघ्यशासनंभवानहोद्वेष्टिशिवंशिवेतरः १४ य
त्पादपद्मंमहतांमनोलिभिर्निषेवितंब्रह्मरसासवार्थिभिः लोकस्ययद्वर्षतिचाशिषोर्थिनस्तस्मैभवान्द्रुह्यतिविश्वबंधवे १५

भावोयेषामितिवा यद्यपिमहापुरुषाः स्वनिंदांसहंतेतथापितत्पादरेणवस्तदसहमानास्तेषांतेजोनिरस्यंति अतोअसत्सुमहन्निंदन मेवोचितमित्यर्थः तदेवंमहतद्रोहमुक्त्वातस्मिन्नेवकृतंद्रोहमाह यदिति द्वाभ्यां यत्यस्यद्व्यक्षरमात्रंशिवइतिप्रसिद्धंतन्नामनृणां सर्वेषांअशुअघंसर्वंहंतिकेवलंगिरेवोच्चारितंनतुमनःपूर्वकंतच्चसकृदपि प्रसंगादपितंशिवंद्वेष्टि नलंघ्यंशासनंआज्ञायस्यअहोशिवे तरः अमंगलरूपः १४ पापहरत्वमुक्त्वाभुक्तिमुक्तिप्रदत्वेनशिवंवर्णयंत्याह यस्यपादपद्मंमनांस्येवालयस्तैः ब्रह्मारसोब्रह्मानंदःस एवआसवोमकरंदः तदर्थिभिः यच्चार्थिनःसकामस्यलोकस्याशिषोवर्षति १५ श्रीकृष्णायनमः नारायणवासुदेवहरे

भा०
१०

यदुक्तंशिवापदेशोऽशिवइतियच्चोक्तंप्रेतावासेष्वित्यादिनदाक्षिपंत्याहकिंचेति योजराअवकीर्यश्मशानेअवसत्वसतिश्मतस्यश्मशा चं०
नस्यमाल्यानिभस्मानिनृकपालानिचभूषणत्वेनसंतियस्यतंत्वतोन्येनविदुःकिंनविदंतिचेत्तत्राह तथासतितेषांतद्दानुपपत्तेरित्या
हतच्चरणाद्रवसृष्टंगलितंनिर्माल्यंयेमूर्द्धभिर्धारयंति १६ इदानींदेहंत्यक्तुकामाः धर्मतत्वमाह कर्णाविच्छाद्यनिर्गच्छेत यद्यपिमर्तुंमा
रयितुंवाकल्पोनसवति कदा धर्माविनरिधर्मरक्षकेईशस्वामिनिअसृणिभिर्निरंकुशैर्नृभिः अस्यमानेआधिक्षिप्यमाणेप्रभुःशक्त
श्चेत्रुशतीमकल्यावादिनींप्रसत्यबलात्छिंद्यात ततोपिस्वयंप्राणान्विसृजेदितियत्सधर्मः १७ तवत्वत्तउत्पन्नं शितिकंठा

किंवाशिवाख्यमशिवंनविदुस्त्वदन्येब्रह्मादयस्तमवकीर्यजटाश्मशाने तन्माल्यभस्मनृकपालमवसन्पिशाचैर्येमूर्द्धभि
र्धारितत्त्वरणारविंदं १६ कर्णापिधायनिरयाद्यदकल्पईशेधर्माविनर्यसृणिभिर्नृभिरस्यमाने छिंद्यात्प्रसल्यरुष
तीमसतींप्रभुश्चेज्जिह्वामसूनपिततोविसृजेत्सधर्मः १७ अतस्तवोत्पन्नमिदंकलेवरंनधारयिष्येशितिकंठगर्हिणः
जग्धस्यमोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणंप्रचक्षते १८ नवेदवादाननुवर्ततेमतिःस्वएवलोकेरमतो
महामुनेः यथागतिर्देवमनुष्ययोःपृथक्स्वएवधर्मेनपरंक्षिपेत्स्थितः १९

नीलकंठःतन्निंदकात प्रमादापन्नस्यापवित्रस्यत्यागंविनानशुद्धिरितिदृष्टांतमाह जग्धस्यभक्षितस्यान्नस्योद्धरणंवमनमेवपुं
सःशुद्धिंप्रचक्षते १८ यदुक्तंतुभ्रक्रियायाशुचयइतितत्रत्याह नेति वेदवादान विधिनिषेधरूपान स्वएवलोकेस्वात्मन्येवर
ममाणस्यमहतोमुनेःसम्यग्विरक्तस्यमतिःनानुवर्तते निवृत्ताधिकारित्वात अधिकारभेदेनदृष्टांतःयथादेवानांगतिराकाशए
वमनुष्याणांपृथिव्यामेव अतःस्वधर्मएवप्रवृत्तिलक्षणेस्थितःमनःपरमन्यंधर्मंपुरुषंवानक्षिपेत नर्निदेत व्यवस्थिताधिका
रत्वेनउभयोःसत्यत्वात्नक्षिपेदेवेत्यन्वयः १९ श्रीराम ७ ७ ७ ७ ७ ७ ७ १०

2153
1281

एतदेवोपपादयंत्याह प्रवृत्तमग्निहोत्रादिनिवृत्तंशमदमादि कृतंसत्यमेवयतोवेदेआश्रितंविहितंतच्चविविच्यव्यवस्थमाश्रितंनत्वावि
शेषेणव्यवस्थामेवाह दोउभयंरागवैराग्यलक्षणंलिंगंचिह्नंअधिकारिविशेषणयस्मिन्तत नन्वयावज्जीवमग्निहोत्रंजुहोतिशांतो
दांतइत्यादिषुनैवंव्यवस्थाप्रतीयते सत्यं तथाप्युभयोरेकाधिकारविरोधात्तथापर्यवस्यतीत्याह युगपदोभावायोगपद्यंयोगप
द्येनएकस्मिन्कर्तरितत्कर्मद्वयंविरोधि ननुतर्हिनिवृत्तंप्रवृत्तंकर्मशिवेनापिकर्तव्यमेवनेत्याह ब्रह्मणिसदाशिवेकिंचिदपिकर्मन
ऋच्छतिनप्राप्नोति अतोयथाप्रवृत्तनिवृत्तयोःपरस्परधर्माकरणेनव्यवस्थामेवाह चिताभस्मकृतस्नानस्तथानग्नइत्यादिनाभोगा
द्यभावउक्तस्तत्राह हेपितःअस्माभिराश्रिताःआश्रिताःपदव्यःआणिमादिसमृद्धयःवोयुष्माकंमासंत्वित्यर्थः यतोवःपद

कर्मप्रवृत्तंचनिवृत्तमप्यृतंवेदेविविच्योभयलिंगमाश्रितं विरोधितद्यौगपदेनकर्तरिद्वयंतथाब्रह्मणिकर्मन
र्छति २० मावःपदव्यःपितरस्मदास्थितायायज्ञशालासुचधूमवर्त्मभिः तदन्नतृप्तैरसुभृद्भिरीडिताअव्य
क्तलिंगाअवधूतसेविताः २१ नैतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना व्रीडाममाभूत्कुज
नप्रसंगतस्तज्जन्मधिग्योमहतामवद्यकृत २२

व्योयज्ञशालास्वेवभवंतिताश्चतदन्नेनयज्ञगतेनान्नेनतृप्तैःकेवलमीडिताःधूमवर्त्मभिश्चभुज्यंते याअस्मत्पदव्यःतास्तुनैवं
भूताःकिंत्वव्यक्तलिंगाःनव्यक्तंलिंगंहेतुर्यासांइच्छामात्रप्रभवत्वात अवधूतैर्ब्रह्मविद्भिःसेविताःअतोहमाढ्याकुद्दारिद्र
इतिगर्वंमाकृथाःइतिभावः २१ किंबहुनोक्तेनइदंदेहंत्यक्ष्याम्येवेत्याह द्वाभ्यां एतेननालंनपर्याप्तेकिंअपितलमेव कथंभू
तेनकुजन्मनातदेवाह हरेईश्वरेकृतागसःकृतापराधस्यतवदेहाउद्भूतेन ननुश्लाघ्योयंदेहःकथंत्याज्यस्तत्राह कुजनस्य
तवप्रसंगतःसंबंधान्ममव्रज्जाभूत अतोयोमहतांअप्रियकर्तातस्माज्जन्माधिकृतत्संबंधादश्लाघ्यमित्यर्थः २२

किंचपरिहासादिषुविनोदेनापिदाक्षायणीतिसंबोधयन्तदीयंत्वत्संबंधवाचकंगोत्रंनामवृषध्वजआह गृह्णातितदाहंव्यपेतनर्म
स्मितंयथाभवत्येवंदुर्मनाअतिदुःखितचित्ताभवामितत्तस्मात्हिनिश्चितंएतत्कुणपप्रायंव्युत्स्रक्ष्येत्यक्ष्यामि २३ दक्षंद्रत्यनु
वादंकृत्वाहशत्रुहनक्रोधादिरिपुघातीन्उदीचींउदीच्यांदिशिपाठांतरेउदङ्मुखीशांतवाक्गृहीतमौनाजलंस्पृष्ट्वाआचम्यदृ
कृदृशां २४ योगमेवाह कृत्वेति अनिलौप्राणापानौऊर्ध्वाधोवृत्तिकौनिरोधनसमानौएकरूपौनाभिचक्रेकृत्वाततः उदानमु

गोत्रंत्वदीयंभगवान्वृषध्वजोदाक्षायणीत्याहयदासुदुर्मनाः व्यपेतनर्मस्मितमाशुतद्यहंव्युत्स्रक्ष्यएतत्कुणपं
त्वदंगजं २३ मैत्रेयउवाच इत्यध्वरेदक्षमनूद्यशत्रुहन्क्षितावुदीचींनिषसादशांतवाक् स्पृष्ट्वाजलंपीतदुकूलसंवृ
तानिमील्यदृग्योगपथंसमाविशत् २४ कृत्वासमानावनिलौजितासनासोदानमुत्थाप्यचनाभिचक्रतः शनै
र्हृदिस्थाप्यधियोरसिस्थितंकंठाद्भ्रुवोर्मध्यमनिंदितानयत् २५ एवंस्वदेहंमहतांमहीयसामुहुःसमारोपितमंकमा
दरात् हास्यन्सतीदक्षरुषामनस्विनीदधारगात्रेष्वनिलाग्निधारणां २६ ततःस्वभर्तुश्चरणांबुजासवंजगद्गुरो
श्चिंतयतीनचापरं ददर्शदेहोहतकल्मषःसतीसद्यःप्रजज्वालसमाधिजाग्निना २७ तत्पश्यतांखेभुविचाद्भुतंम
हद्धाहेतिवादःसुमहानजायत हंतप्रियादैवतमस्यदेवीजहावसून्केनसतीप्रकोपिता २८ अहोअनात्म्यंमहद
स्यपश्यतप्रजापतेर्यस्यचराचरंप्रजाः जहावसून्यद्विमतात्मजासतीमनस्विनीमानमभीक्ष्णमर्हति २९ राम

स्थाप्यधियासहहृदिस्थापित्वाकंठमार्गेणभ्रुवोर्मध्यमानयत् २५ महतांमहीयसांपूज्यतमेन २६ चरणांबुजआसवंभज
नानंदंभर्तुरपरंनददर्श देहश्चससद्यःप्रज्वलितोभूत्समाधिनाजातोग्निस्तेन २७ खेभुविचहाहेतिवादःतमेवाह हंतेति
खेदे देवतमस्यपूज्यतमस्यप्रियाकेनदक्षेणप्रकोपितासती २८ महदनात्म्यंदौर्जन्यं अस्यसर्वत्रस्नेहएवन्याय्यइत्याहुः ११
पश्यतियेनविमताअवज्ञाता २९

455
1981

दुर्मर्षंअत्यसहनंहृदयंयस्यलोकेजनमध्येचकारानरकेचअग्रतःस्वीयामंगजांसुतांअपराधतः स्वावज्ञयामृतयेमरणायाप्र
तांननिवारितवान् पुरुषद्विट्शिवद्वेषी ३० सत्याअसुत्यागंअद्भुतंदृष्ट्वा ३१ यज्ञघ्नान्हंतीतियज्ञघ्नघ्नंयजुस्तेन अपहतंरक्षइ
त्यादिना ३२ अध्वर्युणाभृगुणायेतपसासोमंप्राप्ताः ऋभवोनामदेवाउपस्थिताः ३३ ब्रह्मतेजसाउपाङ्गिदीप्यमानैः ३४ इति
टीकायांचतुर्थेचतुर्थः पंचमेतुसतीदेहत्यागमावर्ण्यशंकरः वीरभद्ररूपात्याद्यतनदक्षमघातयत् १ प्रजापतेर्हेतोर्निधनं कु

सोयंदुर्मर्षहृदयोब्रह्मध्रुक्चलोकेपकीर्तिंमहतीमवाप्स्यती यदंगजांस्वांपुरुषद्विडुद्यतांनप्रत्यषेधन्मृतयेपराध
तः ३० वदत्येवंजनेसत्याःदृष्ट्वासुत्यागमद्भुतं दक्षंतत्पार्षदाहंतुमुदतिष्ठन्नुदायुधाः ३१ तेषामापततांवेगंनिशाम्यभ
गवान्भृगुः यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ३२ तेरलानायुधैःसर्वे अध्वर्युणाहूयमानदेवारुत्पेतुरोजसा
ऋभवोनामतपसासोमंप्राप्ताःसहस्रशः ३३ तेरलातायुधैःसर्वप्रमथाःसहगुह्यकाः हन्यमानादिशोभेजुरुश
द्भिर्ब्रह्मतेजसा ३४ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेचतुर्थोध्यायः ४ मैत्रेयउवाच भवोभवान्या
निधनंप्रजापतेरसत्कृतायाअवगम्यनारदात् स्वपार्षदसैन्यंचतदध्वरर्भुभिर्विद्रावितंक्रोधमपारमादधे १
क्रुद्धःसुदष्टोष्ठपुटःसधूर्जटीर्जटांतडिद्वह्निसटोग्ररोचिषं उत्कृत्यरुद्रःसहसोत्थितःसंगंभीरनादोविससर्जतां
भुवि २ ततोतिकायःस्तनुवास्पृशन्दिवंसहस्रबाहुर्धनरुक्त्रिसूर्यदृक् करालदंष्ट्रोज्वलदग्निमूर्द्धजः कपाल
मालीविविधोद्यतायुधः ३

तःतेनासत्कृतायाःतस्याध्वरेऋभवोदेवास्तैः १ सधूर्जटिःरुद्रःघोरःसन्जटामुत्कृत्योत्पाद्यउत्थितःसन्तांभुविविससर्ज सुद
ष्टःओष्ठपुटोयेन तडितांवह्नीनांसटाज्वालास्तद्वत्उग्रंरोचिर्यस्यास्तां २ ततोजटायाःसकाशात् अतिकायोवीरभद्रोजातइ
तिशेषः तनुवातन्वादेहेनदिवंस्पृशन् अत्युच्चयइत्यर्थः घनरुक्कृष्णवर्णःत्रयःसूर्याइवदृशोयस्यकरालास्तुंगादंष्ट्रायस्य
ज्वलन्नग्निरिवमूर्द्धजायस्य कपालमालायुक्तः विविधान्युद्यतानि आयुधानियस्य ३ श्रीरामजयरामजयजयराम

हेरुद्रभट हेयुद्धकुशलमह इटानांत्वमग्रणीः सनसयज्ञंदक्षंजहिब्रह्मतेजोअजेयमितिमामंस्थाः यतस्त्वंमेअंशकः ४ मन्युनारुद्रेण
परिचक्रमेप्रदक्षिणीचकार असंगमप्रतिघातं यद्रंहोवेगस्तेन भीतानमहीयसांबलीयसामपिमहस्तेजः सहिहुंसोढुंशक्तंमे
ने ५ जगदंतकोमृत्युः तस्याप्यंतकं शूलं घोषयंतिशब्दं कुर्वंतीतिघोषणानिनूपुरादीनियस्यो स्तावं घ्रीयस्यसः ६ ककुभिदिशि
तमोनभवतिकिंतुरजइतिज्ञात्वाहुः रजः एतत्कुतोभूतदध्युश्चिंतयामासुः ७ हेत्वंतरासंभवेनौत्पातिकत्वंकल्पयंतिवाताइति
दस्यूनामभावेहेतुः प्राचीनबर्हिस्तदानींतनोराजाभवतीति नकाल्पंतेनशीघ्रंनीयंते ८ प्रसूतिर्दक्षपत्नीसामिश्राप्रमुख्यायासां

तंकिंकरोमीतिगृणंतमाह बद्धांजलिंभगवान्भूतनाथः दक्षंसयज्ञंजहिमद्भटानांत्वमग्रणीरुद्रभटांशकोमे ४ आ
ज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुं मेनेतदात्मानमसंगरंहसामहीयसांतातमहः सहिष्णुं ५ अन्वीय
मानः सतुरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवं उद्यम्यशूलंजगदंतकांतकंसप्राद्रवद्घोषणभूषणांघ्रिः ६ अथर्त्वि
जोयजमानः सदस्याः ककुभ्युदीच्यांप्रसमीक्ष्यरेणुं तमः किमेतत्कुतएतद्रजोभूदिति द्विजाद्विजपत्न्यश्चदध्युः ७
वातानवांतिनहिसंतिदस्यवः प्राचीनबर्हिर्जीवतिहोग्रदंडः गावोनकाल्पंतइदंकुतोरजोलोकोधुनाकिंप्रलया
यकल्पते ८ प्रसूतिमिश्राः स्त्रियउद्विग्नचित्ताऊचुर्विपाकोवृजिनस्यैवतस्य यत्पश्यंतीनांदुहितॄणांप्रजेशः सु
तांसतीमवदध्यावनागसं ९ यतस्त्वंतकालेव्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्यनृत्यत्युदिता
स्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १०

विपाकः फलंपश्यंतीनामिति तस्याद्रुः स्वाधिक्यहेतुः अवदध्याअवज्ञातवान् अनागसंनिरपराधां ९ नचेदंसुतावज्ञामात्रं
किंतुरुद्रावज्ञानं अतोनास्यभद्रंभविष्यतीत्याहुः यस्त्विति द्वाभ्यां व्युप्ताविकीर्णाजटाकलापोयस्य स्वशूलस्यसूच्येअग्रेअर्पि
ताः प्रोतादिग्गजेंद्रायेनसः उदितान्युत्क्षिप्तानि अस्त्राणियस्तदोषाबाहवएवध्वजास्तान्वितत्यहर्षेणनृत्यति उच्चः अट्ट
हासः कठोरोहासः सएवस्तनयित्नुगर्जितंतेनभिन्नाविदीर्णादिशोयेनसः १० श्रीराम ७ ७ ७ ७ १२

HS 4
1881

अमर्षयित्वा असहनयुक्तं कृत्वा मन्युभुतं क्रोधव्याप्तं उदस्तउत्क्षिप्तोभागणोनक्षत्रसंघोयेनपुनश्चतंकोपयतोविधातुरपिकिंस्वस्तिस्या
त् नस्यादेवकान्यस्यकथा ११ उद्विग्नाप्रचलितादृग्यस्यतेनजनेनवद्गुयथाभवत्येवमुच्यमानेसतिउत्पाततमाः महोत्पाताउत्थिताः प
र्यक् सर्वतश्चमहात्मनोपिदक्षस्यभयावहाः १२ नानाआयुधानियेषांवामनकैः ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः म
करस्यवोदमाननंयेषांतैः परितोधावद्भिः १३ यज्ञशालायाः पूर्वपश्चिमस्तंभयोरर्पितंपूर्वपश्चिमायतंकाष्ठंप्राग्वंशः तंअवरुद्धः य

अमर्षयित्वातमसह्यतेजसंमन्युप्लुतंदुर्विषहंभ्रुकुट्या करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्तिकिंकोपयतोविधातुः ११
बह्वेवमुद्विग्नदृशोच्यमानेजनेनदक्षस्यमुहुर्महात्मनः उत्पेतुरुत्पाततमाः सहस्रशोभयावहादिविभूमौचपर्यक् १२
तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैः सदायुधैः पिंगैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्य
त १३ केचिद्बभंजुः प्राग्वंशंपत्नीशालांतथापरे सदआग्नीध्रशालांचतद्विहारमहानसं १४ रुरुजुर्यज्ञपात्राणितथै
केग्नीननाशयन् कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः १५ अबाधंतमुनीनन्येएकेपत्नीरतर्जयन् अपरेज
गृहुर्देवान्प्रत्यासन्नान्पलायितान् १६ भृगुंबबंधमणिमान्वीरभद्रः प्रजापतिं चंडीशः पूषणंदेवंभगंनंदीश्वरो
ग्रहीत् १७ सर्वएवर्त्विजोदृष्ट्वासदस्याः सदिवौकसः तैरर्द्यमानाः सुभृशंग्रावभिर्नैकधाद्रवन् १८ जुह्वतः स्रुव
हस्तस्यश्मश्रूणिभगवान्भवः भृगोर्लुलुंचेसदसियोहसन्श्मश्रुदर्शयन् १९ श्रीराम ७ ७ ७ ७

ज्ञशालायाः पश्चिमतः पत्नीशालांतांयज्ञशालायाः पुरतः स्थितंसदोमंडपंसदसः पुरतोहविर्धानंतस्योत्तरतआग्नीध्रशालां
तद्विहारंयजमानगृहंमहानसंपाकभोजनशालां १४ रुरुजुः बभंजुः उत्तरवेद्याः मेखलाः सीमासूत्राणि १५ १६ १७ भ्रा
तरसिरर्द्यमानानैकधाअनेकधाद्रुद्रुवुः पलायनंचक्रुः १८ स्रुचोहस्तेयस्यभवोवीरभद्रः लुलुंचेउत्पाटितवान् १९ रामह

उज्जहारउद्धृतवान् सदस्यः सभायांस्थितः सन् शपंतंशिवनिंदांकुर्वंतंदक्षंअक्षिकोचनेनअसूसुचत् प्रेरितवान् २० कलिंगदेशरा
जस्यानिरुद्धोद्वाहे बलभद्रोयथाद्यूतेदंतः दंतान्पातितवान् गरिमणिगुरुतरेरुद्रेनिंद्यमानेदंतान्दर्शयन्योजहास पूष्णोरितिपा
ठेद्विवचनमिंद्रापौष्णश्चरुर्भवतीतितत्सहितस्यापिपूष्णोदंतप्रासर्थंसूचितवान् तथाहि पूषाप्रविष्टभागोदंतकोहितंदेवाअब्रुव
न्नितिविहितस्यपेषणस्यद्विदेवत्याभावात् तत्रतस्यदत्तानितिवक्तव्यंस्यात् नैवंतत्संगच्छतइत्याशंक्यतत्रापितस्यदंतपातानस्त्वाभे

भगस्यनेत्रेभगवान्पातितस्यरुषाभुवि उज्जहारसदस्थोक्ष्णायःशपंतमसूसुचत् २० पूष्णश्चापतयद्दंतान्कालिंग
स्ययथाबलः शप्यमानेगरिमणियोहसन्दर्शयन्दतः २१ आक्रम्योरसिदक्षस्यशितधारेणहेतिना छिंदन्नपितदुद्धर्तुंना
शक्नोत्र्यंबकस्तदा २२ अस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचंहरः विस्मयंपरमापन्नोदध्यौपशुपतिश्चिरं २३ दृष्ट्वासंज्ञ
पनंयोगंपशूनांसपतिर्मखे यजमानस्यपशोःकस्यकायात्तेनाहरच्छिरः २४ साधुवादस्तदातेषांकर्मतत्तस्यशंस
भूतप्रेतपिशाचानांअन्येषांतद्विपर्ययः २५ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः तद्देवयजनंदग्ध्वाप्रा
तिष्ठद्गुह्यकालयं २६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपंचमोध्यायःसमाप्तः ५ श्रीकृष्णायनमः

देप्रवृत्तेनद्विवचनेनज्ञाप्यते अतएवपूष्णोनुग्रहंद्देधावक्ष्यति पूषातुयजमानदद्भिर्भक्षतुपिष्टभुगितिकेवलश्चेत्पिष्टभु
क्भविष्यति अन्यसहितश्चेद्यजमानस्यदद्भिर्भक्षयिष्यतीत्यर्थः २२ छिंदन्नपीत्यत्रशिरइत्युपरित्यक्तीभविष्यतित्र्यंबको
वीरभद्रः २२ अस्त्रान्वितैःमंत्रसहितैः ननिर्भिन्नात्वगपियस्य तथाभूतंदृष्ट्वेतिशेषः २३ पशूनांपतिःमखेसंज्ञपनंयोगंकं
ठनिष्पीडनानुरूपंमारणोपायेनअहनत् २४ अन्येषांब्राह्मणादीनांतद्विपर्ययःअसाधुवादःअभूदितिशेषः २५ गुह्य
कालयंकैलासं २६ इतिटीकायांचतुर्थेपंचमः १३

459
1981

षष्ठेतुदेवसंघेनसहगत्वाभवंविधिः सांत्वयामासदक्षादिजीवितार्थमादरात् १ अथदेवगणाःस्वयंभुवेन्यवेदयन्नितिद्विती
येनान्वयः शूलादिभिःसंछिन्नानिमृदितानि भिन्नानिविदीर्णान्यंगानियेषांसहऋत्विग्भिःसभ्यैश्चवर्तमानाः २ कस्यद
क्षस्यनइयतुःनजग्मतुः ३ विभुर्ब्रह्मातेजीयसि अतितेजस्विनिपुरुषेकृतागसिसत्यपिस्वयंतत्ररुतासांबुभूषतां अपराधंक
र्तुमिच्छतांसातयाबुभूषातेषांक्षेमायनभूयात् प्रायेणेतिलोकोक्तिः नसर्वदेत्यर्थः ४ अथापिप्रसादयध्वंक्षमापयत येषां

मैत्रेयउवाच अथदेवगणाःसर्वेरुद्रानीकैःपराजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ संछिन्नभिन्नसर्वां
गाःसर्त्विक्सभ्याभयाकुलाः स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्यपुरैवैतद्भगवानब्जसंभवः
नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यविभुःप्राहतेजीयसिकृतागसि क्षेमायतत्रसाभूयात्
नप्रायेणबुभूषतां ४ अथापियूयंकृतकिल्बिषाभवंयेबर्हिषोभागभाजंपरादुः प्रसादयध्वंपरिशुद्धचेतसा
क्षिप्रप्रसादंप्रगृहीतांघ्रिपद्मं ५ आशासानाजीवितमध्वरस्यलोकःसपालःकुपितेनयस्मिन् तमाशुदेवंप्रि
ययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः ६ नाहंनयज्ञोनचयूयमन्येयेदेहभाजोमुनयश्चतत्त्वं विदुःप्रमाणं
बलवीर्ययोर्वायस्यात्मतंत्रंकउपायंविधित्सेत् ७ सइत्थमादिश्यसुराजनस्तैःसमन्वितःपितृभिःसप्रजेशैः
ययौस्वधिष्ण्यान्निलयंपुरद्विषःकैलासमद्रिप्रवरंप्रियंप्रभोः ८ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः जुष्टंकिं
न्नरगंधर्वैरप्सरोभिर्वृतंसदा ९ नानामणिमयैःशृंगैर्नानाधातुविचित्रितैः नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः १०

वंतोबर्हिषोयज्ञस्यभागभाजंपरादुःदूरादेवखंडितवंतः प्रगृहीतांघ्रिपद्मपादौप्रगृह्येत्यर्थः ५ अध्वरस्यजीवितंपुनःसंधानंप्रार्थ
यमानाःसंतःयस्मिन्कुपितेसति सपालोलोकोनभवेन्नश्येदित्यर्थः ६ वयंतत्रगंतुंविभ्रमः तमेवकंचिदुपायंविधित्सेतिचेदत
आह नेति यज्ञस्त्वदानीतनइंद्रः यस्यतत्त्वंबलवीर्ययोःप्रमाणमियत्तांचनविदुः वीर्यंपराक्रमःपापमितिपाठेअपराधं ८ कैलासंव
र्णयति जन्मौषधीत्यादिचतुर्दशभिः नरेतरैर्देवैःजुष्टं ९ शृंगैःरमणंरतिप्रदमित्युत्तरेणान्वयः कथंभूतैःनानाधातुभिर्विचित्रितैः

नानामलानिप्रस्रवणानियेषु नानाकंदराः सानवश्चयेषुरमणेः सहक्रीडंतीनां ११ मयूराणांकेकास्वनैर्नादितंमदांधैरलिभिर्विमूर्छितं
मूर्छनारागगतिविशेषः तद्यासंकृतं रक्तकंठानांकोकिलानांप्लावितैः प्लुतलंनीतैः स्वरैः अन्येषांच पतत्रिणांचकूजितैः १२ उद्धस्तै
रुन्नतशाखैर्द्रुमैः द्विजान्पक्षिणः आह्वयंतमिवलोकेहिहस्तमुत्क्षिप्योच्चैः स्वरेणाह्वानमर्थिनांकुर्वंति अद्रिश्चोत्क्षिप्तहस्तकैरेत
त्रतत्पक्षिस्वनैस्तथालक्ष्यतइत्यर्थः व्रजद्भिर्मातंगैर्व्रजंतमिवनिर्झरध्वनिभिः गृणंतमिवभाषमाणमिव १३ १४ कदंबतीपयोरवां

नानामलप्रस्रवणैर्नानाकंदरसानुभिः रमणंविरहंतीनांरमणैःसिद्धयोषितां ११ मयूरकेकाभिरुतंमदांधालिवि
मूर्छितं प्लावितैरक्तकंठानांकूजितैश्चपतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः व्रजंतमिवमातंगैर्गृणंत
मिवनिर्झरैः १३ मंदारैः पारिजातैश्चसरलैश्चोपशोभितं तमालैः शालतालैश्चकोविदारासनार्जुनैः १४ चूतैः कदं
बनीपैश्चनागपुन्नागचंपकैः पाटलाशोकबकुलैःकुंदैःकुरबकैरपि १५ स्वर्णार्णशतपत्रैश्चवरवेणुकजातिभिः
कुब्जकैर्मल्लिकाभिश्चमाधवीभिश्चमंडितं १६ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः भूर्जैरोषधिभिःपूगैरा
जपूगैश्चजंबुभिः १७ खर्जूराम्रातकाम्रैश्चप्रियालमधुकेंगुदैः द्रुमजातिभिरन्यैश्चराजितंवेणुकीचकैः १८
कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः नलिनीषुकलंकूजत्खगवृंदोपशोभितं १९ श्रीरामजयरामजयजय

तरभेदः आम्रश्चुतैकदंबश्चेतिपाठेचूताम्रयोस्वांतरजातिभेदोप्यत्र १५ वेणुकीचकयोर्निरंध्रसरंध्रत्वेनभेदः वेणुकीच
कयोर्निरंध्रसरंध्रत्वेनभेदः वेणुकजातिभिरित्यत्रवेणुकाजातिभिरित्यत्रवेणुकाएलाजातिर्मालती १६ १७ द्रुमजातिभिरित्यत्र
जातिरवांतरसामान्यं १८ कुमुदादिसमृद्धिभिर्हेतुभिर्नलिनीषुसत्सु कलंमधुरंयथाभवत्येवंकूजंतियानिपक्षिवृंदानितैरुपशो
भितं १९

451
1381

मृगादिभिर्जुष्टंनिषेवितंनाभिः कस्तूरीमृगः पूर्वंमृगगणाः शृंगविशेषत्वेनोक्तः २० इदानींस्वातंत्र्येणेत्यपौनरुक्त्यं कदलीखं
डैः संनिरुद्धानिआवृतानिनलिनीनांपुलिनानितैः श्रीशोभायस्मिन्नंदयागंगयापर्यस्तंपरिवेष्टितं सत्याः भवान्याः स्नानेन
पुण्यतरमतिपवित्रमुदकंयस्याः २१ २२ तत्रगिरौवनंचददृशुः यत्रवनेतन्नामसौगंधिकंनामपंकजंभवतिजातावेकवचनं
पुरींवर्णयंति नंदाचेतिचतुर्भिः सरितौपुराद्बाह्यतेभवतः तीर्थपादस्यहरेः पादांभोजरजसा २३ ययोर्विगाह्यप्रविश्यक्रीडंति
२४ पयोरंभोविगततृषोपिगजाः पिबंति तत्रहेतुः तासांसुरस्त्रीणांस्नानेनभ्रष्टंगलितंयत्कुचकुंकुमंतेनपिंजरंपीतवर्णंग=

मृगैःशाखामृगैः क्रोडैःमृगेंद्रैरृक्षशल्यकैः गवयैःशरभैर्व्याघ्रैर्जुष्टंमहिषादिभिः २० कदलीखंडनलिनीसंरुद्धपु
लिनश्रियं पर्यस्तंनंदयासत्याःस्नानपुण्यतरोदया २१ विलोक्यभूतेशगिरिंविबुधाविस्मयंययुः ददृशुस्तत्रते
रम्यामलकानामवैपुरीं २२ वनंसौगंधिकंचापियत्रतन्नामपंकजं नंदाचालकनंदाचसरितौबाह्यतःपुरः २३
तीर्थपादपदांभोजरजसातीवपावने २३ ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः क्रीडंतिपुंसःसिंचंत्योविगा
ह्यरतिकर्षिताः २४ ययोस्तत्स्नानविभ्रष्टकुचकुंकुमपिंजरं वितृषोपिपिबंत्यंभःपाययंतोगजीर्गजाः २५ ता
रहेममहारत्नविमानशतसंकुलं जुष्टंपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनं २६ हित्वायक्षेश्वरपुरींवनंसौगंधिकंचय
त् द्रुमैःकामदुघैर्हृद्यंचित्रमाल्यपरिच्छदैः २७ कलहंसकुलप्रेष्ठंखरदंडजलाशयं वनकुंजरसंघृष्टहरिचंदनवायुना
अधिपुण्यजनस्त्रीणांमुहुरुन्मथयन्मनः २८ वैडूर्यकृतसोपानावाप्यउत्पलमालिनीं प्राप्तंकिंपुरुषैर्दृष्ट्वातत्राराद्ददृशुर्वटं २९

जीः करिणीः २५ तारंरूप्यंताराद्गिमयविमानानांशतैःसंकुलं तडिद्भिः स्त्रीणांघनैर्विमानानांखेनपुण्याः सादृश्यं २६ यक्षेश्वरपु
रीहित्वा अतिक्राम्यतद्वनंचदृष्ट्वा तदेवारात् दूरात्वटंददृशुरिति चतुर्थेनान्वयः कथंभूतंवनंचित्राणिमाल्यानिस्तबकाश्चयेषु
तैर्द्रुमैर्हृद्यंसुखकरंरक्तकंठखगानांमनीकस्यस्वरैर्मंडिताः षट्पदाः भ्रमरायस्मिन् २७ कलहंसानांकुलस्यप्रेष्ठं खरदंडानिप
द्मानितैर्युक्ताजलाशयायस्मिन् वनकुंजरैः संघृष्टायेहरिचंदनद्रुमास्तत्संबंधिनावायुना पुण्यजनस्त्रीणांमनः अधिअधिकं
उन्मथयन् २८ यत्रचोत्पलमालिन्योवाप्यः तत्रकिंपुरुषैःप्राप्तंवनंदृष्ट्वापाठांतरे किंपुरुषैः प्राप्तावापीश्चदृष्ट्वेत्यर्थः २९

भा० १५ योजनशतमुत्से धउच्छ्रायोयस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतोविस्तृतः पर्यक्सर्वतः कृताअच च०
लाछायायेन निर्गतंनीडंयस्मात् ३० मुमुक्षूणांशरयोआश्रये त्यक्तामर्षोतकस्तत्तुल्यं ३१ तंविशिनष्टिसनंदनाद्यैरितिपंचभिः
ख्यासंचकुबेरेणउपास्यमानं ३२ विद्याउपासना तपश्चित्तैकाग्र्यं योगः समाधिःस्तेषांपंथानंप्रवर्तनद्वारा लोकस्यमंगलंहितं
तपोवात्सल्यादाचरंतं ३३ संध्याभ्ररुचारक्तवर्णेनांगेनभस्मादिलिंगचंद्रलेखांचबिभ्रतं ३४ व्रतिनामासनंदर्भमयीतस्यां ब्रह्मप्र

सयोजनशतोत्सेधः पादोनविटपायतः पर्यक्कृताचलछायानिनीडस्तापवर्जितः ३० तस्मिन्महायोगमयेमुमुक्षु
शरणेसुराः ददृशुः शिवमासीनंत्यक्तामर्षमिवांतकं ३१ सनंदनादिभिः सिद्धैः शांतैः संशांतविग्रहं उपास्यमानं
सख्याचभर्त्रागुह्यकरक्षसां ३२ विद्यातपोयोगपथमास्थितंनमधीश्वरं चरंतंविश्वसुहृदंवात्सल्याल्लोकमंगलं ३३
लिंगंचतापसाभीष्टंभस्मदंडजटाजिनं अंगेनसंध्याभ्ररुचाचंद्ररेखांचबिभ्रतं ३४ उपविष्टंदर्भमय्यांबृष्यां
ब्रह्मसनातनं नारदायप्रवोचंतंपृच्छतेशृण्वतांसतां ३५ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि बाहुंप्र
कोष्ठेक्षमालामासीनंतर्कमुद्रया ३६

वाचंतं ३५ सव्यंपादपद्मंदक्षिणेऊरौकृत्वाविन्यस्यजानुनिचसव्येबाहुंकृत्वादक्षिणबाहुप्रकोष्ठेमणिबंधस्थानेअक्षमालां
कृत्वादक्षिणहस्तकृतयातर्कमुद्रयाउपलक्षितंआसीनमित्यर्थः तदुक्तंयोगशास्त्रे एकंपादमथैकस्मिन्विन्यसेदूरुसंस्थि
तं इतरस्मिंस्तथाबाहुंवीरासनमितिस्मृतं तर्कमुद्राचोक्तातर्जन्यंगुष्ठयोरग्रेमिथः संयोज्यचांगुलीः प्रसार्यबंधनंबाहुस्तर्क १५
मुद्रेतिमांत्रिकाइति ३६

413/1981

ब्रह्मनिर्वाणंब्रह्मानंदस्तत्रसमाधिमेकाग्र्यमाश्रितंयोगकक्षंयोगपट्टंवामजानुनीदृढीकरणार्थविशेषेणाश्रितवंतं मननशीलासु
नयस्तेषामाद्यंमुख्यं ३७ अर्हत्तमोविष्णुर्वामनस्तुतेः कश्यपश्चयस्य ३८ महर्षिभिः सहिताः येनीललोहितंअनुवर्तंतेतेपितस्मैवं
दनंचक्रुः एवंसर्वैर्नमस्कृतः प्राह कृतः प्रणामोदेवैर्यस्मैतं ३९ यद्यपिनीचवन्मांत्वंनमस्कारोषितथापितेवेश्वर्यमर्हवेत्थीत्याह जा
नइति विश्वस्यईशंजानेतत्रहेतुः जगतोयोनिर्याशक्तिः प्रकृतिः बीजंचयः शिवः पुरुषः तयोः प्रकृतिपुरुषयोः परंकारणंतथा
पिनिर्भेदंब्रह्मनिर्विकारंतदेवत्वमितिजाने ४० ननुविरुद्धमेतत्तत्राह त्वमेवसरूपयोरविभक्तयोः क्रीडन्विश्वसृष्ट्यादिकरोषिऊ

तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगकक्षं सलोकपालमुनयोमुनीनां आद्यंमुनिं प्रांजलयः प्रणेमुः
३७ सतूपलभ्यागतमात्मयोनिंसुरासुरेरभिवंदितांघ्रिं उत्थायचक्रेशिरसाभिवादनं अर्हत्तमः कस्यथैवविष्णुः ३८
तथापरेसिद्धगणामहर्षिभिर्येवैसमंतादनुनीललोहितं नमस्कृतः प्राहशशांकशेखरंकृतप्रणामंप्रहसन्निवात्मभूः
३९ जानेत्वामस्यविश्वस्यजगतोयोनिबीजयोः शक्तेःशिवस्यचपरंयत्तद्ब्रह्मनिरंतरं ४० त्वमेवभगवन्नेतच्छिवशक्त्योः
सरूपयोः विश्वंसृजसिपास्यत्सिक्रीडन्नूर्णपटोयथा ४१ त्वमेवधर्मार्थदुघाभिपत्तयेदक्षेणसूत्रेणससर्जिथाध्व
रं त्वयैवलोकेवसिताश्चसेतवोयान्ब्राह्मणाः श्रद्दधतेधृतव्रताः ४२ त्वंकर्मणांमंगलमंगलानांकर्तुः स्वलोकंतनुषे
स्वः परंवा अमंगलानांचतमिस्रमुल्बणंविपर्ययः केनतदेवकस्यचित् ४३

र्णपटउर्णनाभिरिव स्वरूपयोरितिपाठेस्वांशयोः अतोनविरोधः ४१ धर्ममर्थंचदोग्धीयात्त्रयीतस्याअभिपत्तयेरक्षणायाध्वरं
कृतवानसि यद्वा हेधर्मार्थदुघअभिपत्तयेतत्प्राप्तयेदक्षेणसूत्रेणनिमित्तेन सेतवोवर्णाश्रममर्यादा अवसितानिबद्धानिनि
र्णीताइतिवा श्रद्दधतश्रद्धयानुतिष्ठंतीति ४२ सर्वकर्मफलदातापित्वमेवेत्याह हेमंगलमंगलानांकर्मणांकर्तुः स्वः स्वर्गंपरंमो
क्षंवातनुषेअमंगलानामशुभानांकर्मणांकर्तुश्चतमिस्रंनरकंतनुषेतत्रकेनहेतुनातदेवतस्मिन्एवकस्यचिद्विपर्ययोभवति
४३

भा०
१६

तत्कोपोत्रहेतुरित्यसंभावितमितिकैमुतिकन्यायेनाह नवैसतांसतः रोषोभिभवेत् तवत्वांद्वितीयार्थेषष्ठी पशुंअज्ञंयथाभिभवति
तद्वत् ४४ अतोयेपृथकधियः भेददृशः अतः कर्मण्येवदृष्टिर्येषांते दुष्टआशयोयेषां परेषामुदयेन संपदा अर्पितात्हृदिरुक्
येषां अरुंतुदामर्मभेत्तारः दैवेनैववधोयेषांतान् भवद्विधः निरुपमः साधुः मावधीत्नहन्यात् ४५ प्रस्तुतसाधूनांत्वन्मा
लोक्यानुग्रहमेवकर्तुमर्हसीत्याहद्वाभ्यां यस्मिंदेशेयदाकालेस्पष्टधियोमोहितचित्ताः पृथग्दृशोभवंति तत्रापराधेसाध

नवैसतांत्वच्चरणार्पितात्मनांभूतेषुसर्वेष्वभिपश्यतांतव भूतानिचात्मन्यपृथग्दिदृक्षतांप्रायेणरोषोभिभवेद्यथा
पशुं ४४ पृथग्धियः कर्मदृशोदुराशयाः परोदयेनार्पितहृद्रुजोनिशं परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्माव्वधीद्दै
ववधात्भवद्विधः ४५ यस्मिन्यदापुष्करनाभमाययादुरंत्ययास्पृष्टधियः पृथग्दृशः कुर्वंतितत्रह्यनुकंपया
कृपांनसाधवोदैवबलात्कृतेक्रमं ४६ भवांस्तुपुंसः परमस्यमाययादुरंत्ययास्पृष्टमतिः समस्तदृक् तया
हतात्मस्वनुकर्मचेतसः स्वनुग्रहंकर्तुमिहार्हसिप्रभो ४७ कुर्वध्वरस्योद्धरणंहतस्यभोत्वयासमाप्तस्यमनोः प्रजा
पतेः नयत्रभागंतवभागिनोददुः कुयज्वनोयेनमखोनिनीयते ४८ श्रीरामकृष्णाभ्यांनमः

वोहिअनुकंपयाअनंतरमेवपरदुःखासहिष्णुतयाचित्तप्रकंपेनकृपांकुर्वंतिनतु क्रमंपराक्रमं कुतः दैवबलात् कृतेममैवदैव
मेवंभूतंकोत्रापराधस्तेषामितिमत्वाहमननंकुर्वंतइत्यर्थः ४६ भवांस्तु अस्पृष्टमतिः अतः समस्तदृक्सर्वज्ञतयामाययाहत
आत्मायेषांतेषुअतएवकर्मानुगचित्तेषु इहापराधेअनुग्रहंकर्तुमर्हसि ४७ एवंसामान्येनोक्त्वाप्रस्तुतमाहकुर्विति त्रि
भिः त्वयाहतस्यातएवासमाप्तस्यप्रजापतेरध्वरस्यहेमनोः यत्राध्वरेकुयाजिकाः भागिनोपितवभागंनददुः भागार्हत्व
मेवाह येनत्वयामखोविनीयतेफलंप्राप्यते ४८ श्रीराम १६

465
1981

हेमन्योअनातुरमारोग्यमस्तु ५० भागस्तुतवास्त्वित्याह एषइति हेरुद्रयावदित्यर्थेपदित्यव्ययं यज्ञेकृतेयावानुच्छिष्टः अवशिष्टो
र्थतावानेषतवभागोस्तुहेरुद्रतेभागेनाद्ययज्ञः कल्पतांसमृद्ध्यतां ५१ इतिश्रीभागवतेचतुर्थस्कंधेटीकायांषष्ठोध्यायः ६
सप्तमेविष्णुरुद्भूतः स्तुतोदक्षभवादिभिः यज्ञंप्रवर्तयामासदक्षेणेतिनिरूप्यते १ अजेनयानुनीतः प्रार्थितः तेनाभिहितंहेमहा
बाहोविदुर १ अघमपराधं २ स्वापराधंपरिहत्यानुगृह्णाति दग्धंशीर्षंयस्यप्रजापतेः अजस्यमुखंयस्मिन्ततत्तथाभूतंशिरो

जीवतायजमानोयंप्रपद्येताक्षिणीभगः भृगोःश्मश्रूणिरोहंतुपूष्णोदंताश्चपूर्ववत् ४९ देवानांभग्नगात्राणांऋ
त्विजांचायुधाश्मभिः भवतानुगृहीतानामाशुमन्योस्त्वनातुरं ५० एषतेरुद्रभागोस्तुयदुच्छिष्टोध्वरस्यवै यज्ञ
स्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५१ इतिश्रीभागवतेचतुर्थेषष्ठोध्यायः ६ मैत्रेयउवाच इत्यजेनानुनीते
नभवेनपरितुष्यता अभ्यधायिमहाबाहोप्रहस्यश्रूयतामिति १ श्रीमहादेवउवाच नाघंप्रजेशबालानांवर्णये
नानुचिंतये देवमायाभिभूतानांदंडस्तत्रधृतोमया २ प्रजापतेर्दग्धशीर्ष्णोभवत्वजमुखंशिरः मित्रस्यचक्षु
षेक्षेतभागंस्वंबर्हिषोभगः ३ पूषातुयजमानस्यदद्भिर्जक्षतुपिष्टभुक् देवाः प्रकृतसर्वांगायेमउच्छेषणंददुः ४
बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत् ५ मैत्रेयउवाच त
दासर्वाणिभूतानिश्रुत्वामीढुष्टमोदितं परितुष्टात्मभिस्तातसाधुसाध्वित्यथाब्रुवन् ६ ततोमीढ्वांसमामं
त्र्यशुनासीरामहर्षिभिः भूयस्तद्देवयजनंसमीढ्वद्वेधसोययुः ७

स्तुबर्हिषः संबंधिनोभागंमित्रनाम्नोदेवस्य ३ प्रकर्षेणकृतानिभग्नानिअंगानियेषांतेभवंतुउच्छेषणंयज्ञावशिष्टं ४ येषांतं
गानिविनष्टानितेतुअश्विनोर्बाहुभ्यांकृतबाहवः पूष्णोहस्ताभ्यां १ कृतहस्ताश्चभवंतुअध्वर्यवः अन्येचऋत्विजः बस्तस्येव
श्मश्रूण्येवश्मश्रूणियस्य ५ मीढुष्टमः शिवस्तेनोक्तं परितुष्टैश्चित्तैः ६ मीढ्वांसंशिवंत्वयागत्यसर्वंकार्यमित्यामंत्र्यसंप्रा
र्थ्यसुनासीरादेवाः सहमीढुषाशिवेनवेधसाब्रह्मणाचवर्तमानाः समीढ्वद्वेधसः ७ श्रीकृष्णवासुदेवनारायणहः

कार्त्स्न्येन वक्रहस्तबाक्कारिसाधारण्यं विधाय ८ पूर्वं वृषध्वजेन कलिलः कलुषीकृतः आत्मायस्य सः तदा शरत्कालः इ
इवामलोभवत् १० ११ १२ यद्यपि यद्यपि प्रलब्धः पराहृतो मया भवान् तथापि त्वया दंडो धृतः शिक्षाकृतानत्वपेक्षितोस्मि यु
क्तमेवेत्याह ब्रह्मबंधुषु च ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्चेति वां युवयोः अवज्ञा उपेक्षा नास्ति १३ तत्र हेतुमाह विद्येति ब्रह्मा

विदीयकार्त्स्न्येन च तद्यदाह भगवान्भवः संदधुः कस्य कायेन सवनीयपशोः शिरः ८ संधीयमाने शिरसि दक्षो
रुद्राभिवीक्षितः सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं ९ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः शिवावलो
कादभवच्छरद्ध्रद इवामलः १० भवस्तवाय कृतधीर्नाशक्नोदनुरागतः औत्कंठ्यं बाष्पकलया संपरेतां सुतां
स्मरन् ११ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः १२ दक्षउवा
च भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि धृतो यदपि प्रलब्धः न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं
हरेश्च कुत एव धृतव्रतेषु १३ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक्
तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः १४ योसौ मयाविदिततत्त्वदृशा सभा
यां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृतेन तु
ष्येत् १५ मैत्रेयउवाच क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमंत्रितः कर्म संतानयामास सोपाध्यायर्त्विगग्निभिः १६

भूत्वा त्वमस्राक् असाक्षीः किमर्थं आत्मतत्त्वमवितुं यद्वा ब्रह्म वेदं आत्मतत्त्वमवितुं संप्रदायवर्तनेन ज्ञापयितुमित्यर्थः
तत्तस्मात् हे परम उत्कृष्ट १४ अत्र च प्रत्युपकारो नास्तीत्याह योसाविति अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन तद्विगण
य्य विस्मृत्य अर्हत्तमस्य निंदया अर्वागधः पतंतं मां अपात् रक्षितवान् स्वकृतेनैव परानुग्रहेणैव तुष्येत् न मया तत्प्रतिक
र्तुं शक्यमित्यर्थः १५ अनुमंत्रितः अनुज्ञातः उपाध्यायसहितैः ऋत्विगादिभिश्चानुवर्तयामास १६ श्रीरामवासुदे

2167
1981

वीराणां प्रमथानां संगकृतदोषस्य शुद्धये निवृत्तये १७ उपात्तहविषा अध्वर्युणा सह विशुद्ध्या बुध्या दध्यौ हे विशांपते विदु
र १८ स्वया प्रभया तेषां तेजो मुष्णन् तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रे बृहद्रथंतरे वाजौ पक्षौ तद्द्वता बृहद्रथंतरे प
क्षाविति श्रुतेः १९ तमेवानुवर्णयति श्याम इति द्वाभ्यां हिरण्यवद्रसना यस्येति वस्त्रं लक्ष्यते अर्कतुल्येन किरीटेन जुष्टः नीला
लका एव भ्रमरास्तैर्मंडितं कुंडलयुक्तमास्यं यस्य कंबुआदिभिरायुधैः भक्तरक्षार्थं व्यग्रैः सबैरैः हिरण्मयैः भुजैः पुष्पितः कर्णि

वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः पुरोडाशं निरवपन्वीरसंसर्गशुद्धये १७ अध्वर्युणात्तहविषा यजमानो
विशांपते यथा विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः १८ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश मुष्णंस्तेज उपानी
तस्तार्क्ष्येण स्तोत्रवाजिना १९ श्यामो हिरण्यरसनोर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः कंबुब्ज च
क्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः २० वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोकक
लया रमयंश्च विश्वं पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः २१ तमुपागतमालक्ष्य
सर्वे सुरगणादयः प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः मू
र्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं २३ अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः यथामति गृणंति स्म कृतानुग्रहविग्रहं २४

कार इव शोभमानः भुजानां हिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैः २० वक्षसि अधिश्रिता वधूर्लक्ष्मीर्यस्य सः उदारो हासो
वलोकनं च तयोः कलया लेशेन पार्श्वे उभयतो भ्रमती व्यजनचामरे एव राजहंसौ यस्मिन् सः रज्यमानः शोभातिशयं नियमानः
२१ ब्रह्मेंद्रत्र्यक्षा नायका मुख्या येषां ते २२ हतरुचः तिरस्कृतप्रभाः सन्नजिह्वाः गद्गदवाचः ससाध्वसाः तन्महिम्ना क्षुभित
चित्ताः उपतस्थुः तुष्टुवुः २३ यस्य महिमानं प्रति तु अर्वागेव वृत्तिर्येषां तेपि यथामति गृणंति स्म अस्तुवन् कृतः प्रकटीकृतः
अनुग्रहार्थं विग्रहो येन तं यद्वा तेषां अर्वाक्वृत्तित्वे हेतुः ते तु तस्य महिमा विभूतिमात्ररूपा इत्यर्थः २४ श्रीकृष्णायनमः

तत्रतावत्तद्दक्षस्तुतिप्रकारमाह दक्षइति गृहीतमर्हणमादनोत्तमंयेनतं उत्तमेपात्रेआगतेअसाद्यार्हणेषुसमर्पितेषुप्रीत्या अर्हण
पात्रमेवयेनगृहीमीत्यर्थः यद्वा कथंप्रपेदेगृहीतसादनोत्तमंयथाभवतितथातद्गृहीत्वाप्रपेदइत्यर्थः गृहीत्वेतिपाठेस्तुसुगमः ग
णनस्तुवन्प्रपेदेशरणंजगाम २५ दक्षऋत्विक्सदस्येशाभगुब्रह्मेंद्रयोगिनः ऋषयश्चतथासिद्धायजमानीचलोकपाः १ योगिन्ब्र
ह्माग्निदेवाश्चस्तुवंतिजगदीश्वरं तथागंधर्वविद्याधरब्राह्मणाश्चपृथक्क्रमतः २ ननुसाक्षात्परमेश्वरएवरुद्रः तस्यतुब्रह्मपुत्रत्वे
नजीवत्वमनुकरणमात्रंहंतकिमितित्वयाभेददृष्ट्यासोवज्ञातइतिमांभगवानाक्षेप्स्यतीशक्यअप्रच्युतस्वरूपस्यजीवधर्मेनाद्यंत

दक्षोगृहीतार्हणसादनोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुं सुनंदनंदाद्यनुगैर्वृतंमुदागृणान्प्रपेदेप्रयतःकृतांजलिः २५
दक्षउवाच शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायां तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामा
स्तेभवानपरिशुद्धइवात्मतंत्रः २६

वैवसंगच्छतेनान्यस्येत्याह शुद्धमिति स्वधाम्निस्वरूपेतिष्ठन्भवान्शुद्धंचिन्मात्रंचैतन्यघनः शुद्धत्वेहेतुः उपरतानित्यनिवृत्ता
अखिलाबुध्यवस्थायस्मात् अतः एकंभेदशून्यं अतएवाभयं द्वितीयाद्वैभयंभवतीतिश्रुतेः जीवस्यापिवस्तुतएवंभूतत्वाद्विलक्ष
ण्यार्थमुक्तं मायांप्रतिषिध्यअभिभूयस्वतंत्रएवःसन्तयामाययापुरुषत्वंमनुष्यनाट्यमुपेत्यतस्यांमायायांतिष्ठन् अपरिशुद्ध
इवरागादिमानिवास्ते रामकृष्णाद्यवतारेषुतथाप्रतीयतेभवानित्यर्थः अन्येत्वविद्योपाधयोमाययाभिभूताः संसरंतिअतस्त्वमे
वेश्वरोनतुरुद्रादयइतिभावः अतएवइमांभेददृष्टिंभगवान्वारयिष्यति अहंब्रह्माचशर्वश्चजगतःकारणंपरमित्यादिना २६ १८

2169
1981

ऋत्विजोपित्वस्यापराधंपरिहरंतः स्तुवंति भो अनंजनउपाधिमूलशून्ययद्यपित्वमेवरुद्रादिरूपः तथापिनंदीश्वरशापात् कर्मण्ये
वदुराग्रहधियः संतस्तवतत्वंनविद्मः किंतुधर्मस्यापूर्वस्योपलक्षणभूतंत्रिवृतत्रयीप्रतिपाद्यं अध्वराख्यंतवरूपमस्माभिर्ज्ञातं कीदृ
शंयदर्थंयस्यसिद्धये अधिदेवंदेवताधिःकारेण अदोव्यवस्था अमूर्त्यवस्थाः अत्रइयमेवदेवतानान्याइत्येवंभूतानियमाइत्यर्थः
यद्वाव्यवस्थाइत्याख्यातं अडागमाभावआर्षः यदर्थं अदइदंइंद्राद्यधिदेवतंरूपंविशेषेण अवस्थितवानसीत्यर्थः २७ सदस्यास्तु
निरीश्वरंपिदक्षाध्वरंधनलोभेनस्वप्रवृत्तिमनुचिंत्यानुतप्ताविरक्तिमाशासानाः स्तुवंतिहेशरणदआश्रयप्रदउत्पत्त्यध्वनिसंसारमा

ऋत्विजऊचुः तत्वंनतेवयमनंजनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदामः धर्मोपलक्षणमिदंत्रिवृदध्व
राख्यंज्ञातंयदर्थमधिदैवमदोव्यवस्थाः २७ सदस्याऊचुः उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे
विषयमृगतृष्ण्यात्मगेहोरुभारः द्वंद्वःश्वभ्रेखलमृगभयेशोकदावज्ञसार्थः पादौकस्तेशरणदकदायातिकामोपसृष्टः २८

र्गेवर्तमानः अज्ञानांसार्थःसमूहः तेपादौकः त्वत्पादरूपंनिवासंकदायास्यति अशरणेविश्रामस्थानशून्ये उरुक्लेशाएवदु
र्गमस्थानानियस्मिन् अंतकएवउग्रोयोव्यालस्तेनान्विष्टेलक्षीकृते विषयरूपामृगतृष्णिका यस्मिन् आत्माहंकारास्प
दंशरीरंममतास्पदंगेहंचसएवउरुर्भारोयस्यसः द्वंद्वानिसुखदुःखादीन्येवश्वभ्राणिगर्तायस्मिन्खलाएवमृगाव्याघ्रा
दयस्तेभ्योभयंयस्मिन्शोकएवदावाग्निर्यस्मिन् कामेनोपसृष्टः पीडितः २८ श्रीरामजयरामजयजयराम

तत्रतावत्तरक्षस्तुतिप्रकारमाह दक्षइति गृहीतमर्हणमादनोत्तमंयेनतं उत्तमेपात्रेआगतेअसाद्यार्हणेषुसमर्पितेषुप्रीत्या अर्हण
पात्रमेवयेनगृहीमीत्यर्थः यद्वा कथंप्रपेदेगृहीतसादनोत्तमंयथाभवतितथातद्गृहीत्वाप्रपेदइत्यर्थः गृहीत्वेतिपाठेस्तुसुगमः ग्र
णानस्तुवन्प्रपेदेशरणंजगाम २५ दक्षऋत्विक्सदस्येशानगुब्रह्मेंद्रयोगिनः ऋषयश्चतथासिद्धायजमानीचलोकपाः १ योगिब्र
ह्माग्निदेवाश्चस्तुवंतिजगदीश्वरं तथागंधर्वविद्याध्रब्राह्मणाश्चपृथक्मतैः २ ननुसाक्षात्परमेश्वरएवरुद्रः तस्यतुब्रह्मपुत्रत्वे
नजीवत्वमनुकरणमात्रंहंतकिमितित्वयाभेददृष्ट्यासोवज्ञातइतिमांभगवानाक्षेप्स्यतीशंक्यअप्रच्युतस्वरूपस्यजीवधर्मेनाद्यंत

दक्षोगृहीतार्हणसादनोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुं सुनंदनंदाद्यनुगैर्वृतंमुदागृणान्प्रपेदेप्रयतःकृतांजलिः २५
दक्षउवाच शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायां तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामा
स्तेभवानपरिशुद्धइवात्मतंत्रः २६

वैवसंगच्छतेनान्यस्येत्याह शुद्धमिति स्वधाम्निस्वस्वरूपेतिष्ठन्भवान्शुद्धंचिन्मात्रंचैतन्यघनः शुद्धत्वेहेतुः उपरतानित्यनिवृत्ता
अखिलाबुध्यवस्थायस्मात् अतः एकंभेदशून्यं अतएवाभयंद्वितीयाद्वैभयंभवतीतिश्रुतेः जीवस्यापिवस्तुतएवंभूतत्वाद्वैलक्ष
ण्यार्थमुक्तंमायांप्रतिषिध्य अभिभूयस्वतंत्रएवःसन्तयामाययापुरुषत्वंमनुष्यनाट्यमुपेत्यतस्यांमायायांतिष्ठन् अपरिशुद्ध
इवरागादिमानिवास्ते रामकृष्णाद्यवतारेषुतथाप्रतीयतेभवानित्यर्थः अन्येत्वविद्योपाधयोमाययाभिभूताः संसरंति अतस्त्वमे
वेश्वरोनतुरुद्रादयइतिभावः अतएवइमांभेददृष्टिंभगवान्वारयिष्यति अहंब्रह्माचशर्वश्चजगतःकारणंपरमित्यादिना २६ १८

469/1981

ऋत्विजोपिस्वस्यापराधंपरिहरंतःस्तुवंति भोअनंजनउपाधिमूलशून्ययद्यपित्वमेवरुद्रादिरूपःतथापिनंदीश्वरशापात् कर्मण्य
वग्रहधियः संतस्तवतत्वंनविद्मः किंतु धर्मस्यापूर्वस्योपलक्षणभूतंत्रिवृतत्रयीप्रतिपाद्यं अध्वराख्यंतवरूपमस्माभिर्ज्ञातं कीदृ
शंयदर्थंयस्यसिद्धये अधिदेवंदेवताधिःकारणअदोव्यवस्थाःअमूर्व्यवस्थाः अत्रइयमेवदेवतानान्याइत्येवंभूतानियमाइत्यर्थः
यद्वाव्यवस्थाइत्याख्यातं अडापगमाभावआर्षः यदर्थंअदइदंइंद्राद्यधिदेवतरूपविशेषेण अवस्थितवानसीत्यर्थः २७ सदस्यास्तु
निरीश्वरेपिदक्षाध्वरेधनलोभेनस्वप्रवृत्तिमनुचिंत्यानुतप्ताविरक्तिमाशासानाःस्तुवंतिहेशरणद आश्रयप्रद उत्पत्तध्वनिसंसारमा

ऋत्विजऊचुः तत्वंनतेवयमनंजनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदामः धर्मोपलक्षणमिदंत्रिवृदध्व
राख्यंज्ञातंयदर्थमधिदेवमदोव्यवस्थाः २७ सदस्याऊचुः उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे
विषयमृगतृष्णात्मगेहोरुभारः द्वंद्वःश्वभ्रेखलमृगभयेशोकदावज्ञसार्थः पादौकस्तेशरणदकदायातिकामोपसृष्टः २८

र्गेवर्तमानः अज्ञानांसार्थःसमूहः तेपादौकः त्वत्पादरूपंनिवासंकदायास्यति अशरणेविश्रामस्थानशून्ये उरुक्लेशाएवदु
र्गमस्थानानियस्मिन् अंतकएवउग्रोयोव्यालस्तेनान्विष्टेलक्षीकृते विषयरूपामृगतृष्णिकायस्मिन् आत्माहंकारास्प
दंशरीरंममत्वास्पदंगेहंचसएवउरुर्भारोयस्यसः द्वंद्वानिसुखदुःखादीन्येवश्वभ्राणिगर्तायस्मिन्खलाएवमृगाव्याघ्रा
दयस्तेभ्योभयंयस्मिन्शोकएवदावाग्निर्यस्मिन् कामेनोपसृष्टःपीडितः २८ श्रीरामजयरामजयजयराम

भा०
१९

श्रीरुद्रस्तु पूर्वं मम निंदादुःसहासीत् इदानीं तु तां न गणयामीत्याह नवेति आशिषाकामेन असक्तेर्निष्कामैः रचितधियं अभि निवेशितचित्तं मामां अविद्या विद्याहीनो लोकः यदि अपविद्धं जपति आचारभ्रष्टं जल्पति तत् जल्पनं तवयः परानुग्रहस्तत्परा णावायोनुग्रहस्तेन २९ भृगुस्तु स्वभावतस्त्वज्ञानहीनाः जीवाः अतो अज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह यन्माययेति च०
आत्मन आत्मनिश्रितं अनुगतं तव तत्वं न विंदंति प्रणतानामात्माबंधुश्च ३० ब्रह्मादयो न विंदंतीति भृगुणोक्ते तदसहमा

श्रीरुद्रउवाच तववरदवरांघ्रावाशिषेहाखिलार्थेह्यपि मुनिभिरसक्तैरादरेणार्हणीये यदि रचितधियं माविलोद्य कोपविद्धं जपति न गणयेतत् त्वत्परानुग्रहेण २९ भृगुरुवाच यन्मायया गहनयापहतात्मबोधा ब्रह्मादयस्तनु भृतस्तमसि स्वपंतः नात्मन् श्रितं तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान् प्रणतात्मबंधुः ३० ब्रह्मोवाच नैतत्स्वरूपं भवतोसौ पदार्थभेदग्राहैः पुरुषो यावदीक्षेत ज्ञानस्य चार्थस्य गुणस्य वाश्रयो मायामयाद्व्यतिरिक्तो सतस्त्वं ३१ इंद्रउवाच इदमच्युत विश्वभावनं वपुरानंदकरं मनोदृशां सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्न मष्टभिः ३२

नो ब्रह्मा तत्वज्ञानमाविष्कुर्वन्निवाह नैतदिति पदार्थभेदग्राहकैरिंद्रियैः गुणस्य इंद्रियस्य यद्वा ज्ञानार्थयोः कारणस्य स त्वादेः ३१ इंद्रस्तु इंद्रविषयः सर्वोपि मिथ्येति ब्रह्मोक्तमसहमान आह इदं तव वपुरपि उपपन्नमेव तनु प्रपंचवदनिर्वच नीयतयानुपपन्नं सुराणां विद्विषो क्षपयंतीति तथा तैः भुजदंडैरुपलक्षितं ३२ गोविंद ७ ७ ७ १९

भा॥
1981

ऋत्विजां पत्न्यस्तु वंति यज्ञोयं तव यजमानाय त्वांयष्टुं केन ब्रह्मणा पूर्वं सृष्टः हे यज्ञात्मन् तन्नोयज्ञं नलिनकांत्या दृशा नेत्रेण पुनीहि पवित्रं कुरु कथंभूतं यज्ञं शबाः शेरते यस्मिन्निति शबशयनं श्मशानं तद्वदाप्रतीतिर्यस्य स चासौ शांततमेधः उपरतो त्सवः मेधशब्देन पशुहिंसाद्युत्सवो लक्ष्यते यद्वा शबमुदकं तत्र शेत इति तथा पद्मं तन्नाम्नेति संबोधनं वा ३३ ऋषियस्तु कर्माण्यनुतिष्ठंतस्तत्पुण्येन तत्फलेन युज्यंते भगवति तु तदभावमालक्ष्य विस्मितास्तु वंति अनन्वितं अघटमानं यस्मात् आत्मा स्वयं कर्माचरसि अनुतिष्ठसि न तु अज्यसे लिप्यसे यत श्चान्ये विभूतये संपदे ईश्वरीं लक्ष्मीमुपसेदुः सेजुः यद्वाय

पत्न्यऊचुः यज्ञोयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् तं नस्त्वं शबशयनाभशांतमेधं यज्ञात्म न्नलिनरुचा दृशा पुनीहि ३३ ऋषयऊचुः अनन्वितं ते भगवन् विचेष्टितं यदात्मना चरसि कर्मनाज्यसे विभूतये यत उपसेदुरी श्वरीं न मन्यते स्वयमनुवर्तीं भवान् ३४ सिद्धाऊचुः अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः तृषार्तोवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ३५ यजमान्युवाच स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः त्वामृते धीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पुरुषः ३६ श्रीरामचं

तद्इति सार्वविभक्तिकस्तसिः यतयामित्यर्थः भवांस्तु स्वयमेवानुवर्तमानां तां न मन्यते नाद्रियते ३४ सिद्धास्तु त्वत्कथासुख मभिनंदंतस्तु वंति अयं नो मनोगजः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यामवगाढः प्रविष्टो दावाग्नितुल्यं संसारता पं न स्मरति न वा ततो निर्गच्छति ब्रह्मसंपन्नवत् ब्रह्मैक्यं प्राप्त इव ३५ यजमानी दक्षपत्नी स्तौति स्वागतं भद्रमागमनं जातं हे अधीश यथा शिरसा हीनः कबंधमात्रपुरुषः अंगैः करचरणावयवैः शोभनैरपि न शोभते तथा त्वां विना केवलं प्रयाजाद्यं गैर्मखो न शोभते अतो नः श्रिया सह त्रायस्व त्वद्भक्तान् कुर्वित्यर्थः ३६ श्रीराम ७ ७ ७ ७ ७

लोकपालास्त्वीश्वरत्वाभिमानरूढा भगवतस्तत्वमपश्यंतऊचुः दृष्टः किंनष्टैर्दृइत्यर्थः कुतः असद्ग्रहैः पुंस्त्वमाविष्टलिंगत्वात्
असत्प्रकाशरूपाभिर्दृग्भिरिंद्रियैः अयंभावः शुद्धचित्तानांशुद्धसत्वमूर्तिर्भासि अस्माकंतु बहिर्मुखेंद्रियाणांपंचभूतोप
लक्षितोजीवविशेषइवभासि अतस्त्वनस्मदीद्रियगोचरोनभवसिधिगस्मज्जीवितमिति ३७ योगेश्वरास्त्वभेदेनभजता
मनुग्रहंभात्कं मन्यमानाः स्वामिभृत्यभावेनभजतामप्यनुग्रहंप्रार्थयमानाः स्तुवंतिद्वाभ्यां प्रेयानिति विश्वात्मनिपरब्रह्म
णित्वयियः आत्मनः पृथक्त्वेननईक्षेत अमुतः अमुष्मात् अन्यस्तेप्रेष्ठोनास्ति आत्मनोजीवान्पृथक्त्वेनेक्षेतेतिवा हेवत्सल

लोकपालाऊचुः दृष्टः किंनोदृग्भिरसद्ग्रहैस्त्वंप्रत्यक्द्रष्टादृश्यतेयेनविश्वं मायात्येषाभवदीयाहिभूमन्यस्त्वंषष्ठः
पंचभिर्भासिभूमेः ३७ योगेश्वराऊचुः प्रेयान्नतेन्योस्त्यमुतस्त्वयिप्रभोविश्वात्मनीक्षेन्नपृथग्यआत्मनः
अथापिभक्त्येशतयोपधावतामनन्यवृत्त्यानुगृहाणवत्सल‍ः ३८ जगदुद्भवस्थितिलयेषुदैवतोबहुभिद्यमानगु
णयात्ममायया रचितात्मभेदमतयेस्वसंस्थयाविनिवर्तितभ्रमगुणात्मनेनमः ३९ शब्दब्रह्मउवाच नमस्तेश्रि
तसत्वायधर्मादीनांचसूतये निर्गुणायचयत्काष्ठांनाहंवेदापरेपिच ४०

भक्तप्रिय अनन्यवृत्त्या भक्त्या अव्यभिचारिण्याभक्त्याभजतोनुग्रहाणेत्यर्थः ३८ अव्यभिचारिणीभक्तिः कथंस्यात् भजनी
यानांबहुत्वादित्याशंक्याहुः जगतउद्भवादिषुनिमित्तेषुदैवतोजीवादृष्टात् बहुधाभिद्यमानागुणाः यस्यास्तयास्वमायया
आत्मनिस्वस्वरूपेरचिता ब्रह्मादिभेदमतिर्येनतस्मै स्वसंस्थयाकेवलस्वरूपावस्थानेनचविनिवर्तितोभ्रमोगुणाश्चतदेतव
आत्मनियेनतस्मै ३९ शब्दब्रह्मस्तौति नमस्तेश्रितंस्वीकृतंसत्वंयेन अतोभक्तादिफलप्रसवित्रेसत्वगुणत्वंचकथमित्या
शंक्याह यस्यकाष्ठांतत्वंनाहंवेद्मि अपरेब्रह्मादयश्चनविदुः तस्मै ४० ५ राम ५ ५ श्री ५ राम

473
1981

अग्निस्तुयज्ञमूर्तिंप्रणमतियस्यतेजसासुसमिद्धंप्रदीप्तंतेजोयस्यसोहंप्रशस्तेअध्वरेहविर्वहामितंयज्ञियंयज्ञायहितंपालकं यज्ञंय
ज्ञमूर्तिंपंचविधत्वंमंत्रैरुक्तं सएषयज्ञः पंचविधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमइति पंचयजुर्मंत्रैःस्विष्टंसुपूजि
तं तथाचश्रुतिः ओश्रावयेतिचतुरक्षरमस्तुश्रौषडितिचतुरक्षरंयजेतिद्व्यक्षरंयेयजामहइतिपंचाक्षरंद्व्यक्षरोवषट्कारइति स्मृति
श्च चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतुइति ४१ देवास्तुसत्वंवयमपिदेवास्तथापिजगदा
द्यंतयोस्त्वमेवनान्यःकश्चिदित्याहुः पुरेति कल्पापायेप्रलयेविकृतंकार्यजातंउदरीकृत्यसंहृत्यत्वमेवाद्यःपुमान् उरगेंद्रएवाधि
कंशयनंशय्यातस्मिन्शेषेशयनंकरोषिसिद्धैर्जनलोकादिनिवासिभिः विमृशिनाभिर्विचिंतिताअध्यात्मपदवीज्ञानमार्गोयस्यस

अग्निरुवाच यत्तेजसाहंसुसमिद्धतेजाहव्यंवहेस्वध्वरआज्यसिक्तं तंयज्ञियंपंचविधंचपंचभिःस्विष्टंयजुर्भिःप्रणतोस्मिय
ज्ञं ४१ देवाऊचुः पुराकल्पापायेस्वकृतमुदरीकृत्यविकृतंत्वमेवाद्यस्तस्मिन्सलिलउरगेंद्राधिशयने पुमान्शेषेसिद्धैर्हृ
दिविमृशिताध्यात्मपदविः सएवाद्याक्ष्णोर्यःपथिचरसिभृत्यानवसिनः ४२ गंधर्वाऊचुः अंशांशास्तेदेवमरीच्यादय
एतेब्रह्मेंद्राद्यादेवगणारुद्रपुरोगाः क्रीडाभांडंविश्वमिदंयस्यविभूमन्तस्मैनित्यंनाथनमस्तेकरवाम ४३ विद्याधरा
ऊचुः त्वन्माययार्थमभिपद्यकलेवरेस्मिन्कृत्वाममाहमितिदुर्मतिरुत्पथैःस्वैः क्षिप्तोप्यसद्विषयलालसआत्ममोहंयु
ष्मत्कथामृतनिषेवकउद्व्युदस्येत् ४४

एव अद्यइदानींअक्ष्णोः पथिचरसिप्रत्यक्षोसि अवसिरक्षसि ४२ गंधर्वाप्सरसस्तुवयंभियाकेवलंसर्वानपिपरमेश्वरत्वेनापश्ये
कयामः त्वमेवतुपरमेश्वरः अन्येतुत्वदंशाएवेत्याहुः अंशांशाइति हेविभूमन्महत्तम क्रीडाभांडंक्रीडोपकरणंविश्वंभूमांडं
यस्यतस्मैतेनमः कुर्मः ४३ विद्याधरास्तुकेवलंविद्याभिःसंपरः प्राप्यतेअहंकारादिव्यामोहनिरसनस्तुत्वत्कथाश्रवणंविनानास्ती
त्याहुः अर्थंपुरुषार्थसाधनंकलेवरं अभिपद्यप्राप्यत्वन्माययास्मिन्मयेत्यहमितिचाभिमानंकृत्वाइममात्मनोमोहंयुष्मत्कथा
मृतनिषेवकःउतउच्चैर्व्युदस्येत नान्यः नतुस्वैः पुत्रादिभिःक्षिप्तोउत्क्षिप्तः सन्परित्यजेदेवनेत्याहुः असत्सुविषयेषुवलालसा
तृष्णायस्यसः ४४

ब्राह्मणास्तुवंतित्वमितित्रिभिः सदस्याश्च ऋत्विजश्च ४५ गांदृष्ट्वांरसायाः पातालात् दंष्ट्रयाव्युज्जहर्थविशेषेणोद्धृतवानसि योगिभिः
स्तूयमानः हेत्रयीगात्रत्रयीमूर्ते यज्ञोयागः सयूपः क्रतुस्तद्विशेषः तद्रूपी यज्ञसंकल्परूपइतिवा यज्ञः क्रतुः कर्मयस्येतिवा ४६ त्वम
स्माकंत्वद्दर्शनमाकांक्षतांप्रसीद अस्ययज्ञमप्युद्धरेत्यर्थः नचाशक्यंतवैतत्यतस्तवनाम्निकीर्त्यमानएवयज्ञविघ्नाः क्षयंयांतिएवं
प्रभावोयः तस्मैनमः ४७ इत्यनेनप्रकारेणसर्वैः कीर्त्यमानेहेभद्रविदुरसंनिन्येप्रवर्तयामास ४८ सर्वात्मतयासर्वभागभोक्तापि

ब्राह्मणाऊचुः त्वंक्रतुस्त्वंहविस्त्वंहुताशः स्वयंत्वंहिमंत्रः समिद्दर्भपात्राणिच सदस्यर्त्विजोदंपतीदेवता अग्निहोत्रंस्व
धासोमआज्यंपशुः ४५ त्वंपुरागांरसायामहासूकरोदंष्ट्रयापद्मिनींवारणेंद्रोयथा स्तूयमानोनदल्लीलयायोगिभि
र्व्युज्जहर्थत्रयीगात्रयज्ञक्रतुः ४६ सप्रसीदत्वमस्माकमाकांक्षतांदर्शनंपरिभ्रष्टसत्कर्मणां कीर्त्यमानेनृभिर्नाम्नि
यज्ञेशतेयज्ञविघ्नाः क्षयंयांतितस्मैनमः ४७ मैत्रेयउवाच इतिदक्षकविर्यज्ञंभद्ररुद्रावमर्षितं कीर्त्यमानेहृषी
केशेसंनिन्येयज्ञभाविते ४८ भगवान्स्वेनभागेनसर्वात्मासर्वभागभुक् दक्षंबभाषआभाष्यप्रीयमाणइवा
नघ ४९ श्रीभगवानुवाच अहंब्रह्माचशर्वश्चजगतःकारणंपरं आत्मेश्वरउपद्रष्टास्वयंदृगविशेषणः ५० आ
त्ममायांसमाविश्यसोहंगुणमयींद्विजाः सृजन्रक्षन्हरन्विश्वंदध्रेसंज्ञांक्रियोचितां ५१ श्रीकृष्णायनमः

भगवान्निजानंदत्वमोपिस्वेनभागेनत्रिकपालपुरोडाशेनप्रियमाणइवदक्षमाभाष्यसंवाध्यबभाषे ४९ योहंजगतःकार श्रीः
णंआत्माचईश्वरश्चउपद्रष्टासाक्षीचस्वप्रकाशश्चनिरुपाधिश्चसएवब्रह्माचशर्वश्चेत्यन्वयः ५० कुतइत्यतआह अहम
वात्ममायामधिष्ठायजगत्सृष्ट्यादिकुर्वन्अवन्सक्रियोचितांसंज्ञांधास्यामीत्यर्थः ५१ श्रीरामजयरामजयजय २१

4175 / 1981

तस्मिन्केवलेअद्वितीयेसमानासमानभेदरहितेब्रह्मणिमयिब्रह्मरुद्रौभूतानिचभेदेनअज्ञःपश्यतीत्यर्थः ५२ विद्वांस्तुभेदंनपश्य
तीतिसदृष्टांतमाह यथेति ५३ तस्मादेकमेवपश्यन्कृतार्थोभवतीत्याह त्रयाणामेकोभावःस्वरूपंयेषां ५४ स्वेनक्रतुनात्रिकपा
लेष्ट्या उभयतः अंगैःप्रधानेनच ५५ स्वेनभागेनयज्ञावशिष्टेन उदवस्यतेसमाप्यतेनेनेतिउदवसानंतेनकर्मणासोमपान्
इतरानपिउपाधावदित्यनुषंगःअपूपुजत् ५६ ततश्चवुदवस्यकर्मसमाप्य अवभृतरूपंयथाभवतितथास्नातवान्स्वेनैवा

तस्मिन्ब्रह्मण्यद्वितीयेकेवलेपरमात्मनि ब्रह्मरुद्रौचभूतानिभेदेनाज्ञोनुपश्यति ५२ यथापुमान्स्वांगेषुशिरःपा
ण्यादिषुक्वचित पारक्यबुद्धिंकुरुतेएवंभूतेषुमत्परः ५३ त्रयाणामेकभावानांयेनपश्यतिवैभिदं सर्वभूतात्म
नांब्रह्मन्सशांतिमधिगच्छति ५४ मैत्रेयउवाच एवंभगवतादिष्टःप्रजापतिपतिर्हरिं अर्चित्वाक्रतुनास्वेनदेवा
नुभयतोयजन् ५५ रुद्रंचस्वेनभागेनह्युपाधावत्समाहितः कर्मणोदवसानेनसोमपानितरानपि ५६ उदवस्य
सहर्त्विग्भिःसस्नाववभृथंततः तस्मा अप्यनुभावेनस्वेनैवावाप्तराधसे ५७ धर्मएवमतिंदत्वात्रिदशास्तेदिवंय
युः एवंदाक्षायणीहित्वासतीपूर्वकलेवरं ५८ जज्ञेहिमवतःक्षेत्रेमेनायामितिशुश्रुम तमेवदयितंभूयआवृं
क्तेपतिमंबिका ५९ अनन्यभावैकगतिंशक्तिःसुप्तेवपूरुषं ६० एतद्भगवतःशंभोःकर्मदक्षाध्वरद्रुहः श्रुतंभाग
वताच्छिष्यादुद्धवान्मेबृहस्पतेः ६१ इदंपवित्रंपरमीशचेष्टितंयशस्यमायुष्यमघौघमर्षणं योनित्यदाकर्ण्यनरोनु
कीर्तयेद्धुनोत्यघंकौरवभक्तिभावितः ६२ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तमोध्यायः ७

नुभावेनावाप्तराधसेप्राप्तसिद्धयेतस्माअपि ५७ ५८ आवृंक्तेधजतेयःअनन्यभानामेकैवगतिर्यस्तं प्रलयकालेसुप्ताशक्तिरी
श्वरमेवेति ५९ बृहस्पतेःशिष्यान्मयाश्रुतं ६० परमंपवित्रंयःआकर्ण्यतथानुकीर्तयेत्सआत्मनःपरस्यापिअघंसंसारव्यस
नंसर्वदाधुनोति ६२ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांचतुर्थस्कंधटीकायांसप्तमोध्यायः ७ श्रीराम

दक्षकन्यान्वयप्रसंगाद्ध्रुवचर्यार्थपंचभिः अध्यायैः गुरुदारोक्तिरोषमत्सरतः पुरात् निर्गतेन ध्रुवेणाहतपसा तोषणं हरेः १
एवंतावन्मनुकन्यान्वयोक्तोचमरीच्यादीनां ब्रह्मपुत्राणांवंशाः वर्णिताः तत्रावशिष्टं किंचिदाह सनकाद्या इति नावसन्
नाश्रिताः ऊर्ध्वरेतसो नैष्ठिकास्तेषांवंशो नास्ति १ अधर्मोपि ब्रह्मपुत्रस्तस्य वंशमाह मृषेतिचतुर्भिः दंभः परप्रतारणंमाया
तदुचिताचेष्टातयोः सोदरयोरपिदांपत्यमधर्मांशतया एवमुपर्यापि अप्रजः अपुत्रः २ निकृतिः शठता यतयाभ्यांकलिश्चतस्य

मैत्रेयउवाच सनकाद्यानारदश्चऋभुर्हंसोरुणिर्यतिः नैतेगृहान्ब्रह्मसुताह्यवसन्नूर्ध्वरेतसः १ मृषाधर्मस्यभा
र्यासीद्दंभंमायांचशत्रुहन् असूतमिथुनंतत्तुनिर्ऋतिर्जगृहेऽप्रजः २ तयोः समभवल्लोभोनिकृतिश्चमहामते ता
भ्यांक्रोधश्चहिंसाचयद्दुरुक्तिःस्वसाकलेः ३ दुरुक्तौकलिराधत्तभयंमृत्युंचसत्तमाः तयोश्चमिथुनंजज्ञेयातना
निरयस्तथा ४ संग्रहेणमयाख्यातःप्रतिसर्गस्तवानघ त्रिःश्रुत्वैतत्पुमान्पुण्यंविधुनोत्यात्मनोमलं ५ अ
थातःकीर्तयेवंशंपुण्यकीर्तेःकुरूद्वह स्वायंभुवस्यापिमनोर्हरेरंशांशजन्मनः ६ प्रियव्रतोत्तानपादौशतरूपाप
तेःसुतौ वासुदेवस्यकलयारक्षायांजगतःस्थितौ ७ जायेउत्तानपादस्यसुनीतिःसुरुचिस्तयोः सुरुचिःप्रेयसी
पत्युर्नेतरायत्सुतोध्रुवः ८ एकदासुरुचेःपुत्रमंकमारोप्यलालयन् उत्तमंनारुरुक्षंतंध्रुवंराजाभ्यनंदत ९

तस्वसादुरुक्तिश्चेत्यर्थः ३ यातनातीव्रवेदना ४ प्रतिसर्गोनुसर्गोनुसर्गएव यद्वाप्रतिसर्गः प्रलयः अधर्मस्यप्रलयहे
तुत्वात् ५ मनोःपुत्रवंशंहरेरंशोब्रह्मातस्यांशात्देहात्द्वाजन्मयस्य ६ जगतोरक्षायांस्थितौ ७ सुनीतिःसुरुचिश्च
जायेतयोर्मध्ये ८ तयोःप्रियाप्रियत्वेप्रपंचयन् ध्रुवचरितमाहपंचभिरध्यायैः सुरुचेःपुत्रमुत्तमंसंज्ञंलालयन्तम
भ्यंकारोहणंचिकीर्षमाणं ९ श्रीराम ७ ७ ७ ७ ७ ७ ७ ७ ७ राम २२

477
1981

गवोक्तमेवाह त्रिभिः नेति नृपतेर्धिष्ण्यं आसनं नृपात्मजोपि भवानारोढुमर्हति ११ १२ पुरुषमीश्वरं १३ भिशांतं पश्यंतं सन्नवाचं कुं
ठितवाचं १४ उद्धृत्य आरोप्य १५ अंतःपुरजनमुखात् श्रुताशोकएवदावाग्निस्तद्दग्धा लतेवल्लिना सा बाला विललाप विलापंचकार १६ दृजि
नस्य दुःखस्य अमंगलमपराधं परेषु मामंस्थाः यत्यतः परेभ्यो दुःखं ददातिय सः स्वदत्तमेव दुःखं भुंक्ते १७ दुर्भगाया मयाउदरे गृही

तथाचिकीर्षमाणंतंसपत्न्यास्तनयंध्रुवं सुरुचिःशृण्वतोराज्ञःसेर्ष्यमाहातिगर्विता १० नवत्सनृपतेर्धिष्ण्यंभवानारोढुमर्ह
ति नगृहीतोमयायत्त्वंकुक्षावपिनृपात्मज ११ बालोसिबततनात्मानमन्यस्त्रीगर्भसंभवं नूनंवेदभवान्यस्यदुर्लभेर्थेम
नोरथः १२ तपसाराध्यपुरुषंतस्यैवानुग्रहेणमे गर्भेत्वंसाधयात्मानंयदीच्छसिनृपासनं १३ मैत्रेयउवाच मातुःसप
त्न्याःसुदुरुक्तिविद्धःश्वसन्रुषादंडहतोयथाहिः हित्वामिषंतंपितरंसन्नवाचंजगाममातुःप्ररुदन्सकाशं १४ तंनिःश्व
संतंस्फुरिताधरोष्ठंसुनीतिरुत्संगमुदूह्यबालं निशम्यतत्पौरमुखान्नितांतंसाविव्यथेयद्गदितंसपत्न्याः १५ सोत्सृज्यधै
र्यंविललापशोकदावाग्निनादावलतेवबाला वाक्यंसपत्न्याःस्मरतीसरोजश्रियादृशाबाष्पकलामुवाह १६ दीर्घं
श्वसंतीवृजिनस्यपारमपश्यतीबालकमाहबाला मामंगलंतातपरेषुमंस्थाभुंक्तेजनोयत्परदुःखदस्तत् १७ सत्यं
सुरुच्याभिहितंभवान्मेयद्दुर्भगायाउदरेगृहीतः स्तन्येनवृद्धश्चविलज्जतेयांभार्येतिवावोढुमिडस्पतिर्मां १८ आ
तिष्ठतत्तातविमत्सरस्त्वमुक्तंसमात्रापियदव्यलीकं आराधयाधोक्षजपादपद्मंयदीच्छसेध्यासनमुत्तमोयथा
१९ यस्यांघ्रिपद्मंपरिचर्यविश्वविभावनायात्तगुणाभिपत्तेः अजोध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्मश्वसनाभिवंद्यं
२०

तः तस्याएवस्तन्येनवृद्धश्च दुर्भगत्वमेवाह यामामिडस्पतिर्भूपतिः भार्येतिवोढुंस्वीकर्तुंविलज्जतेवाशब्दाद्दासीत्यपि १८ पित्
भार्यात्वेनसमामात्रामातुःसपत्नीतयापित्दुक्तंतपसाराध्यपुरुषमित्यादितत् आतिष्ठकुरु अध्यासनंयदीच्छसि १९ परिचर्या
निषेव्यविश्वस्यविभावनायपालनायआत्तास्वीकृतागुणाभिपतिःसत्वगुणाधिष्ठानंयेनतस्यजितःआत्मामनःश्वसनःप्राण
श्चयैस्तैरभिवंद्यं २०

भा० एकमत्यासर्वांतर्यामिदृष्ट्या २१ मृग्यापादाब्जयोः पद्धतिर्मार्गोयस्यतमेवाश्रयशरणंव्रजततोभजस्व नान्यस्मिन्भावोयस्यतस्मिन्नुनि च०
२३ जधर्मेणभाविनशोधिते २२ तमेवत्यनेनसूचितंसर्वोत्तमत्वंप्रपंचयतिनान्यमिति २३ हस्तेनगृहीतंदीपवत पद्मंययाइतरैर्ब्रह्मा
दिभिः २३ संजल्पितंविलाविलापंततः अर्थस्यागमोयस्मात्तथा २४ तथाभूतंवचः आकर्ण्यविस्मितइत्युक्तं २५ तदेवाह अहोते

तथामनुर्वोभगवान्पितामहोयमेकमत्यापुरुदक्षिणैर्मखैः इष्ट्वाभिपेदे दुरवापमन्यतोभौमंसुखंदिव्यमथापवर्ग्यं २१
तमेववत्साश्रयभृत्यवत्सलंमुमुक्षुभिर्मृग्यपदाब्जपद्धतिं अनन्यभावेनिजधर्मभावितेमनस्यवस्थाप्यभजस्वपूरुषं २२
नान्यंततःपद्मपलाशलोचनाद्दुःखच्छिदंतेमृगयामिकिंचन योमृग्यतेहस्तगृहीतपद्मयाश्रियेतरैरंगविमृग्यमाण
या २३ मैत्रेयउवाच एवंसंजल्पितंमातुराकर्ण्यार्थागमंवचः संनियम्यात्मनात्मानंनिश्चक्रामपितुःपुरात २४
नारदस्तदुपाकर्ण्यज्ञात्वाचास्यचिकीर्षितं स्पृष्ट्वामूर्द्धन्यघघ्नेनपाणिनाप्राहविस्मितः २५ अहोतेजःक्षत्रियाणांमा
नभंगममृष्यतां बालोप्ययंहृदाधत्तेयत्समातुरसद्वचः २६ नारदउवाच नाधुनाप्यवमानंतेसन्मानंवापुत्र
क लक्षयामःकुमारस्यसक्तस्यक्रीडनादिषु २७ विकल्पेविद्यमानेपिनह्यसंतोषहेतवः पुंसोमोहमृतेभिन्नायल्लो
केनिजकर्मभिः २८ परितुष्येत्ततस्तातनावन्मात्रेणपूरुषः दैवोपसादितंयावद्वीक्ष्येश्वरगतिंबुधः २९ अथमा
त्रोपदिष्टेनयोगेनावरुरुत्ससि यत्प्रसादंसवैपुंसांदुराराध्योमतोमम ३० श्रीकृष्णायनमः श्रीरामचंद्र

जःप्रभावः २६ २७ विकल्पमानापमानविवेकेसत्यपिभिंनानसंति किंतुमोहविकल्पिताएवतइत्यर्थः कुतःयत्सुखंदुःखं
वातन्निजकर्मभिरेवभवतियतः २८ उपशमोपदेशेननिवर्तयतिपरितुष्येदितिषड्भिः ईश्वरगतिंवीक्ष्यईश्वरानुकूल्यंविनानो
द्यमाःफलहेतवइतिज्ञात्वा २९ दुष्करश्चतवायमुद्यमइत्याह अथेतिद्वाभ्यांयस्यप्रसादमवरोद्धुंप्राप्तुमिच्छसि ३०राम २३

2193
1981

निःसंगेनतीव्रयोगयुक्तेनसमाधिनामृगयंतोपियस्यपदवींमार्गंनविदुःसदेवादुराराध्यः ३१ श्रेयसांकालेदृढत्वं ३२ सुखदुः
खयोर्मध्येसुखमतिपुण्येक्षीयतइतिदुःखेसतिपापंक्षीयतइति आत्मानंतोषयन्तमसःपारंमोक्षंप्राप्नोति ३३ किंचगुणैरधिका
न्पुंसइतिल्यपलोपेपंचमीतंदृष्ट्वाप्रीतिंकुर्यात नतसूयामित्यर्थः अनुक्रोशंकृपांलिप्सेदेवनतुतिरस्कारंसमानान्मैत्रीनतुस्पर्द्धां

मुनयःपदवींयस्यनिःसंगेनोरुकर्मभिः नविदुर्मृगयंतोपितीव्रयोगसमाधिना ३१ अतोनिवर्ततामेवनिर्बंधस्तवनि
ष्फलः यतिष्यतिभवान्कालेश्रेयसांसमुपस्थिते ३२ यस्ययद्दैवविहितंसतेनसुखदुःखयोः आत्मानंतोषयन्देही
तमसःपारमृच्छति ३३ गुणाधिकान्मुदंलिप्सेदनुक्रोशंगुणाधमात् मैत्रींसमानादन्विच्छेन्नतापैरभिभूयते ३४
ध्रुवउवाच सोयंशमोभगवतासुखदुःखहतात्मनां दर्शितःकृपयापुंसांदुर्दर्शोस्मद्विधैस्तुयः ३५ अथापिमे
विनीतस्यक्षात्रंघोरमुपेयुषः सुरुच्यादुर्वचोबाणैर्नभिन्नेश्रयतेहृदि ३६ पदंत्रिभुवनोत्कृष्टंजिगीषोःसाधुव
र्त्ममे ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितं ३७ नूनंभवान्भगवतोयोंगजःपरमेष्ठिनः वितुदन्नटतेवीणां
हितायजगतोर्कवत् ३८ इत्युदाहृतमाकर्ण्यभगवान्नारदस्तथा प्रीतःप्रत्याहतंबालंसद्वाक्यमनुकंपया ३९
नारदउवाच जनन्याभिहितःपंथाःसवैनिश्रेयसस्यते भगवान्वासुदेवस्तंभजतत्प्रवणात्मना ४० श्रीरामचंद्र

३४ ३५ क्षात्रंस्वभावमुपेयुषःप्राप्तवतःअतएवाविनीतस्यदुर्वाक्यबाणैर्भिन्नेहृदिनाश्रयतेनतिष्ठति ३६ अन्यैरनधिष्ठितं
त्रिभुवनेउत्कृष्टंपदंगंतुमिच्छोःमेसाधुवर्त्ममार्गंब्रूहि ३७ अंकजइतिपाठेउत्संगाज्जातोयोनारदःसभवान्वीणांवितुदन्
वादयन्हितायअटति ३८ ३९ निश्रेयसस्यअभिप्रेतार्थस्यपंथाःकोसावित्यत आह भगवान्वासुदेवएवअतस्तंभजस्व

४१ मधुवनाख्यंतंगच्छयत्रमधुवने ४२ अध्ययनाद्यभावे आत्मनउचितानियोग्यानिदेवतानमस्कारादीनिकृत्वानियमनियमाउक्ताः
आसनकल्पनांकुशादिभिःस्वस्तिकादिभिश्च ४३ प्राणेंद्रियमनसांमलंचांचल्यंमुदस्येतिप्राणायामप्रत्याहारौ धारणामाह
अभिध्यायेदितिषड्भिः गुरुणाधीरेणमनसागुरुंश्रीहरिं ४४ ४५ रमणीयान्यंगानियस्य अर्द्धईक्षणंच अरुणेवोधेक्षणधार

धर्मार्थकाममोक्षाख्यंयइच्छेश्रेयआत्मनः एकमेवहरेस्तत्रकारणंपादसेवनं ४१ तत्तातगच्छभद्रंतेयमुनायास्तटं
शुचि पुण्यंमधुवनंयत्रसांनिध्यंनित्यदाहरेः ४२ स्नात्वानुसवनंतस्मिंकालिंद्याःसलिलेशिवे कृत्वोचितानिनिविधिव
दात्मनःकल्पितासनः ४३ प्राणायामेनत्रिवृत्ताप्राणेंद्रियमनोमलं शनैर्व्युदस्याभिध्यायेन्मनसागुरुणागुरुं ४४
प्रसादाभिमुखंशश्वत्प्रसन्नवदनेक्षणं सुनासंसुभ्रुवंचारुकपोलंसुरसुंदरं ४५ तरुणंरमणीयांगमरुणोष्ठेक्षणा
धरं प्रणताश्रयणंनृम्णंशरण्यंकरुणार्णवं ४६ श्रीवत्सांकंघनश्यामंपुरुषंवनमालिनं शंखचक्रगदापद्मैरभि
व्यक्तचतुर्भुजं ४७ किरीटिनंकुंडलिनंकेयूरवलयान्वितं कौस्तुभाभरणग्रीवंपीतकौशेयवाससं ४८ कांची
कलापपर्यस्तंलसत्कांचननूपुरं दर्शनीयतमंशांतंमनोनयनवर्द्धनं ४९ पद्भ्यांनखमणिश्रेण्याविलसद्भ्यांस
मर्चतां हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ५० श्रीराम जयराम जयजयराम श्रीराम

यतीतितथातंअरुणंवोष्ठमीक्षणंचधारयतीतिवा नृम्णंसुखकरंयद्वानृम्णंधनंसर्वपुरुषार्थनिधिमित्यर्थः ४६ पुरुषंपुरुष
लक्षणयुक्तं ४७ कौस्तुभस्याभरणंग्रीवायस्य ४८ कांचीकलापेनपर्यस्तंपरिवेष्टितं मनोनयनयोर्वर्द्धनंहर्षकरं
४९ हृत्पद्मकर्णिकायांधिष्ण्यस्थानंतदाक्रम्यसमर्चतामात्मनिमनसिस्थितं ५० श्रीराम [illegible]

1481
1381

ध्यानमाह स्मयमानमिति नियतेनप्रागुक्तयाधारणयासुस्थिरेणअतएवक्षुतेनएकाग्रेण धारणोक्तानिविशेषणानिध्यानेपि
द्रष्टव्यानि यद्वायथोक्तमात्रमेव तदुक्तमेकादशस्कंधे नान्यानिचिंतयेत्भूयःसुस्मितंभावयेन्मुखंइति ५१ समाधिमाह एव
मिति तूर्णंशीघ्रंसंपन्नंसत् ५२ जप्योमंत्रः ५३ द्रव्याण्येवाहसलिलैरिति शस्तैर्दूर्वांकुरैः अन्यैर्वांशुकैः भूर्जत्वचादिभिः ५५

स्मयमानमभिध्यायेत्सानुरागावलोकनं नियतेनैकभूतेनमनसावरदर्षभं ५१ एवंभगवतोरूपंसुभद्रंध्यायतोम
नः निर्वृत्यापरयातूर्णंसंपन्नंननिवर्तते ५२ जप्यश्चपरमोगुह्यःश्रूयतांमेनृपात्मज यंसप्तरात्रंप्रपठन्पुमा
न्पश्यतिखेचरान् ५३ ॐनमोभगवतेवासुदेवाय मंत्रेणानेनदेवस्यकुर्याद्द्रव्यमयीं बुधः सपर्यांविविधैर्द्र
व्यैर्देशकालविभागवित् ५४ सलिलैःशुचिभिर्माल्यैःवन्यैर्मूलफलादिभिः शस्तांकुरांशुकैश्चार्चेत्तुलस्याप्रियया
प्रभुं ५५ लब्ध्वाद्रव्यमयीमर्चांक्षित्यंब्वादिषुवार्चयेत् आभृतात्मामुनिःशांतोजितवाक्मितवन्यभुक् ५६ स्वेच्छा
वतारचरितैरचिंत्यनिजमायया यत्करिष्यत्युमेत्तश्लोकस्तध्यायेत्हृदयंगमं ५७ परिचर्याभगवतोयावत्यःपूर्व
सेविताः तामंत्रहृदयेनैवप्रयुज्यान्मंत्रमूर्तये ५८ एवंकायेनमनसावचसाचमनोगतं परिचर्यमाणोभगवान्
भक्तिमत्परिचर्यया ५९ पुंसाममायिनांसम्यक्भजताभाववर्द्धनः श्रेयोदिशत्यभिमतंयद्धर्मादिषुदेहिनां ६०

अधिष्ठानमाह लब्ध्वासंपाद्यद्रव्यमयींशिलादिभिर्निर्मितां ५५ पूजासाद्गुण्यहेतुनाहसाद्भ्यां आभृतात्माधृतचित्तः मि
तवन्यभुगिति ५६ यथायत्करिष्यतीतितदानीमवतारप्राचुर्याभावात् ५७ पूर्वसेविताःसेवनंकारिताः कार्यत्वेनविहिता
इत्यर्थः मंत्रहृदयेन द्वादशाक्षरेण ५८ एवमुक्तरीत्यामनोगतंयथाभवतितथाकायादिभिर्भक्तिमत्परिचर्ययापरिचर्यमाणः
५९ धर्मार्थकामेषुयदभिमतंतत्श्रेयोदिशतीति द्वयोरन्वयः ६० श्रीराम [illegible]

विरक्तोभजेत्वविमुक्तये ६१ हरेश्चरणाभ्यांचर्चितंमंडितं ६२ अर्हितंमत्कृत्यसमर्पितमर्हणमर्चादियस्मै ६३ किंच नरिष्येतननश्यती
तिमवितर्कःप्रश्नः ६४ मात्रासहनिर्वासितइतितस्याअप्यनादृतत्वात ६५ मास्मादंतिकिंस्विनखादंतीत्यर्थः ६६ ६७ यस्ययशोजग
त

विरक्तश्चेंद्रियगतोभक्तियोगेनत्स्वयमा तंनिरंतरभावेनभजेताद्धाविमुक्तये ६१ इत्युक्तस्तंपरिक्रम्यप्रणम्यचनृपार्भकः
ययौमधुवनंपुण्यंहरेश्चरणचर्चितं ६२ तपोवनंगतेतस्मिन्प्रविष्टोंतःपुरंमुनिः अर्हणनार्हितोराज्ञासुखासीनउवा
चह ६३ नारदउवाच राजन्किंध्यायसेदीर्घंमुखेनपरिशुष्यता किंवानरिष्यतेकामोधर्मोवार्थेनसंयुतः ६४ रा
जोवाच सुतोमेबालकोब्रह्मन्स्त्रैणेनाकरुणात्मना निर्वासितःपंचवर्षःसहमात्रामहान्कविः ६५ अप्यनाथंवनेब्र
ह्मन्मास्मादंत्यर्भकंवृकाः श्रांतंशयानंक्षुधितंपरिम्लानमुखांबुजं ६६ अहोमेबतदौरात्म्यंस्त्रीजितस्योपधारय
योंकंप्रेम्णारुरुक्षंतंनाभ्यनंदमसत्तमः ६७ नारदउवाच मामाशुचःस्वतनयंदेवगुप्तंविशांपते तत्प्रभावमविज्ञा
यप्रावृंक्तेयद्यशोजगत ६८ सुदुष्करंकर्मकृत्वालोकपालैरपिप्रभुः एष्यत्यचिरतोराजन्यशोविपुलयंस्तव ६९
मैत्रेयउवाच इतिदेवर्षिणाप्रोक्तंनिशम्यजगतीपतिः राज्यलक्ष्मीमनादृत्यपुत्रमेवान्वचिंतयन ७० तत्राभिषि
क्तःप्रयतःस्तामुपोष्यविभावरीं समाहितःपर्यचरदृष्ट्यादेशेनपूरुषं ७१ त्रिरात्रांतेत्रिरात्रांतेकपित्थबदराशनः
आत्मवृत्त्यनुसारेणमासंनिन्येर्चयन्हरिं ७२ द्वितीयंचतथामासंषष्ठेषष्ठेर्भकोदिने तृणपर्णादिभिःशीर्णैःकृतान्नोभ्य
र्चयन्हरिं ७३

तत्प्रावृंक्तेव्याप्नोति ६८ विपुलयन्विस्तारयन ६९ ७० ध्रुवोमधुवनेकिमकरोदित्यपेक्षायांतत्रेत्यादिना अभिषिक्तःस्नातःय
स्यांप्रयतस्तां ७१ कपित्थानिचबदराणिचअशनंयस्य आत्मवृत्तिर्देहवृत्तिस्तदनुसारेण ७२ ७३ श्रीरामचंद्रप्रस० २५

483
1981

तृतीयंच आनयन ईषन्नमन उपधावदित्यन्वयः प्रतिमाससमाहारादिसंकोचंतपोतिरेकंचकृतवानित्यर्थः ७४ ७५ ७६ भूतानिशब्दा
दीनिइंद्रियाणिच आशेरतेयस्मिन्तन्मन आकृष्य ७७ ब्रह्मध्यायन्धारयमाणस्यमतःतस्यतेजःसोढुं अशक्नुवंतःकंपिताः ७८
तस्यांगुष्ठेननिपीडिता आक्रांतासतीमहीतत्रतदा अर्द्धंननाम समंशकेअर्द्धशब्दस्यनपुंसकत्वादंशांशिनोरभेदाच्चैवंसामानाधिक
रण्यं इभेंद्राधिष्ठितातरीवनौर्यथापदेपदेसव्यतोदक्षिणतश्चनमतितद्वत ७९ अन्यदप्याश्चर्यमाह तस्मिन्ध्रुवेविश्वंविश्वात्मकं

तृतीयंचानयन्मासंनवमेनवमेहनि अब्भक्षउत्तमश्लोकमुपाधावत्समाधिना ७४ चतुर्थमपिवैमासंद्वादशेद्वाद
शेहनि वायुभक्षोजितश्वासोध्यायन्देवमधारयत ७५ पंचमेमास्यनुप्राप्तेजितश्वासोनृपात्मजः ध्यायन्ब्रह्मप
देकेनतस्थौस्थाणुरिवाचलः ७६ सर्वतोमनआकृष्यहृदिभूतेंद्रियाशयं ध्यायन्भगवतोरूपंनाद्राक्षीत्किंचनापरं ७७
आधारंमहदादीनांप्रधानपुरुषेश्वरं ब्रह्मधारयमाणस्यत्रयोलोकाश्चकंपिरे ७८ यदैकपादेनसपार्थिवार्भकस्तस्थौ
तदंगुष्ठनिपीडितामही ननामतत्रार्द्धमिभेंद्रधिष्ठितातरीवसव्येतरतःपदेपदे ७९ तस्मिन्नभिध्यायतिविश्वमात्मनोद्वा
रंनिरुध्यासुमनन्ययाधिया लोकानिरुच्छ्वासनिपीडिताभृशंसलोकपालाःशरणंययुर्हरिं ८० देवाऊचुः नैवंविदामो
भगवन्प्राणरोधंचराचरस्याखिलसत्वधाम्नः विधेहितन्नोवृजिनाद्विमोक्षंप्राप्तावयंत्वांशरणंशरण्यं ८१ श्रीभगवानु
वाच माभैष्टबालंतपसोदुरत्ययात्निवर्तयिष्येप्रतियातस्वधाम यतोहिवःप्राणनिरोधआसीदौत्तानपादिर्मयिसं
गतात्मा ८२ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेअष्टमोध्यायःसमाप्तः ८

विष्णुमात्मनःसकाशात अनन्ययाधिया आत्माभेददृष्ट्या अभिध्यायतिसतिकिंकृत्वा असूंतद्वारंचनिरुध्यविश्वात्मन्येकीकृत्यस्व
प्राणनिरोधेकृतेविश्वस्यप्राणनिरोधोजातइतिभावः ८० एवंप्राणनिरोधंकराचिदपिनविद्मः अखिलसत्वधाम्नःसर्वप्राणिशरी
रस्यतत्तस्माद्वृजिनात्क्लेशात यतोबालात कोसौबालकथंचतस्मात्प्राणनिरोधएतदाह उत्तानपादस्यपुत्रोमयिविश्वरूपेसंग
तात्माऐक्यंप्राप्तोवर्ततइति ८२ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांटीकायांचतुर्थेअष्टमः

नवमेतुहरिंस्तुत्वालब्ध्वातस्माद्वरान् ध्रुवः प्रत्यागत्याकरोद्राज्यंपित्रादत्तमितीर्यते १ एवंभवावहवाक्येनगतभया: १ सवैध्रुव: योगस्य
विपाकेनदार्ढ्येननिश्चलयागरुडादिरूढंपुरतः स्थितमपियदातंनदृष्टवान् असौनापश्यत्तदाभगवतैवांत: स्वरूपमाकृष्टं अतस्ति
रोहितमुपलक्ष्यव्युत्थित: सन् तदवरुद्धंयाद्दगंत: स्फुरितंताद्दशं २ आगतसाध्वस: जातसंभ्रमः विनमय्य आनतंकृत्वासंभ्रममेवा
ह दृग्भ्यांप्रपिबन्निवपश्यन्नवं आस्येनदंतचुंबन्निवावंदंतभुजाभ्यामाश्लिषन्निवावंदतेत्यर्थ: ३ विवक्ष्यंतंतद्गुणानवक्तुमिच्छं
तंअतद्विदंस्तुतिमजानंतं अस्यध्रुवस्यसर्वस्यचहृद्यवस्थितत्वात्ज्ञात्वाब्रह्ममयेनवेदात्मकेनशंखेन ४ भगवताप्रतिपादितांगि

मैत्रेयउवाच तएवमुत्सिन्नभया उरुक्रमेकृतावनामाः प्रययुस्त्रिविष्टपं सहस्रशीर्षापितनोगरुत्मतामधोर्वनंभृत्य
दिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पकोशेस्फुरितंतडित्प्रभं तिरोहितंसहसैवोपलक्ष्यबहि: स्थि
तंतदवस्थंददर्श २ तद्दर्शनेनागतसाध्वसः क्षितावंदतांगंविनमय्यदंडवत् दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भक
श्चुंबन्निवास्येनभुजैरिवाश्लिषन् ३ सतंविवक्ष्यंतमतद्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थित: कृतांजलिंब्रह्ममयेन
कंबुनापस्पर्शबालंकृपयाकपोले ४ सवैतदैवप्रतिपादितांगिरंदैवींपरिज्ञातपरात्मनिर्णयः तंभक्तिभावोभ्य
गृणादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः ५ ध्रुवउवाच योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलश
क्तिधरःस्वधाम्ना अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यं ६ श्रीरामकृष्णवासुदे

वंप्रतिपद्येतिशेषः प्रतिपद्यतामितिपाठेतांवेदात्मिकांपरिज्ञातः परमात्मनोरीश्वरजीवयोर्निर्णयोयेनस: अतएवभक्त्याभावः
प्रेमयस्य असत्वरंस्थैर्येणपरिश्रुतंविख्यातंउरुश्रव: कीर्तिर्यस्यतं ध्रुवानिश्चलाक्षिति: स्थानंयस्येतिभावनिर्देश: ५ ईशानुग्र
हसंप्राप्तवागाद्युद्भुतशक्तिभिः द्वादशादित्यसंकाशै: श्लोकैस्तोद्धरिं ध्रुवः योमेप्रसुप्तांलीनांवाचं अन्यांश्चप्राणानिंद्रियाणि
स्वधाम्नाचिच्छक्त्यासंजीवयति यतोखिलाश्चक्षुरादिज्ञानक्रियाशक्तिधारयतीतितथापुरुषायांतर्यामिणे ६ श्रीरामचंद्र

485
1981

ननुवागादिंद्रियशक्तिधराब्रह्मादयः प्रसिद्धानाहमित्यतआह एकइति अनुविश्यपुरुषांतर्यामीत्वमेकएवतस्याःमायया: असत्सु
गुणेष्विंद्रियादिषुस्थित:सन्नतत्तद्रूपोनानेवभासि ननुतद्व्यतिरेकेणज्ञानक्रियाशक्तिधर: कश्चिदस्तीत्यर्थ: ७ अपिचकिंवक्तव्यं
ब्रह्मादयोज्ञानशक्तिधरानभवंतीति यस्मात्ब्रह्मणोपिज्ञानंतदधीनमेवेत्याह त्वद्दत्तयावयुनयाज्ञानेनभवंतंशरणंप्राप्तोब्रह्मा
इदंविश्वंअचष्टअपश्यत् कथं सुप्तःपुरुषः प्रबुद्धःसन्यथापश्यतितद्वत् अत: अपवर्ग्या: मुक्तास्तेषामपिशरणंकृतविदासर्वें
द्रियजीवनेनत्वत्कृतमुपकारंजानताकथंविस्मर्यते एवंभूतंत्वामभजंत: कृतघ्नाइत्यर्थ: ८ येचमाद्दशा:कामाद्यर्थंभजंतितेमू
ढाइत्याहुः नूनमिति भवाप्ययोजन्ममरणेतद्विमोक्षहेतुंत्वामन्यहेतोःकामाद्यर्थंभजंतितेनूनंविमुष्टमतयःवंचितचित्ताःयतस्ते

एकस्त्वमेवभगवन्निदमात्मशक्त्यामायाख्ययोरुगुणयामहदाद्यशेषं सृष्ट्वानुविश्यपुरुषस्तदसद्गुणेषुनानेवदारुषुविभा
वसुवद्विभासि ७ त्वद्दत्तयावयुनयेदमचष्टविश्वंसुप्तःप्रबुद्धइवनाथभवत्प्रपन्नः तस्यापवर्ग्यशरणंतवपादमूलंवि
स्मर्यतेकृतविदाकथमार्तबंधो ८ नूनंविमुष्टमतयस्तवमाययातेयेत्वांभवाप्ययविमोक्षणमन्यहेतो: अर्चंतिकल्प
कतरुंकुणपोपभोग्यमिच्छंतियत्स्पर्शजंनरकेपिनृणां ९ यानिर्वृतिस्तनुभृतांतवपादपद्मध्यानाद्भवज्जनकथाश्रवणेन
वास्यात् साब्रह्मणिस्वमहिमन्यपिनाथमाभूत्किम्वंतकासिलुलितात्पततांविमानात् १० भक्तिंमुहुः प्रवहतांत्वयिमे
प्रसंगोभूयादनंतमहतामलाशयानां येनांजसोल्बणमुरुव्यसनंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः ११

कल्पतरुंत्वामर्चंत: संतःकुणपतुल्येनदेहेनोपभोग्यंसुखमिच्छंति नचेच्छायोग्यंतदित्याह यत्स्पर्शजंविषयसंबंधजन्यंसुखंतन्नरके
पिभवति ९ ननुस्वर्गादिसुखंसकामै: प्राप्यतेनिष्कामभजनेतन्नस्यादित्यतआह यानिर्वृतिः स्वमहिमनिनिजानंदरूपमाभूत्तनभ
वतीत्यर्थ: अंतकस्यासिनाकालेनलुलितात्खंडितात्विमानात्पततांसानास्तीतिकिमुवक्तव्यं १० अत:कथाश्रवणायसत्संगतिंदे
हीत्याह भक्तिंत्वयिप्रवहतांसांतत्येनकुर्वतां ननुमोक्षंकिंनयाचसे अतआह येनमहत्प्रसंगेन अंजसा अयत्नतएवउरुणिव्य
सनानियस्मिन् नेष्येपारंगमिष्यामि भगवद्गुणकथैवामृतंतस्यापानेनमननमत्त:सन् ११ श्रीरामजयरामजयजयराम

कथामृतपानस्यमाहकत्वमाह ते अतितरांप्रियमपिमर्त्यंदेहंनस्मरंतिनानुसंदधतेयेचसुतादयः अदःमर्त्यमनुसंबद्धास्तानपि केन
स्मरंति येकृतप्रसंगाः केषुभवदीयपदारसौगंध्यलुब्धंहृदयंयेषांतेषु तुशब्देनान्येषांकेवलयोगादिनिष्ठानांदेहाभिमानिनांनानि
वृत्तिंदर्शयति १२ नन्वेवंविद्वानपित्वमित्यभिमानंवहसि अतआहतिर्यगिति तिर्यगादिभिःपरिचितंव्याप्तं संतो असंतश्चविशेषाय
स्य महदादीन्यन्यकानिकारणानियस्य हेपरम अजइदंस्त्वविश्वंविराट्रूपं केवलंवेद्मि अतः परंईश्वरस्वरूपंनवेद्मि यत्रवादःशब्द
व्यापारोनास्तित द्ब्रह्मस्वरूपंनवेद्मि अतोभिमानोननिवर्ततइतिभावः १३ तदेवंभगवदनुकंपयातद्रूपद्वयंज्ञात्वाईश्वरस्वरूपंव
र्णयन्नमस्करोति कल्पांतइति एतत्त्रैलोक्यंपुमानशेते स्वस्मिन्नेवहकृनबहिर्योगादितिभावः निद्रानिरूढत्वात अनंतस्वरवःशेष

तेनस्मरंत्यतितरांप्रियमीशमर्त्यंयेचान्वदःसुतसुहृद्गृहवित्तदाराः येत्वब्जनाभभवदीयपदारविंदसौगंध्यलुब्धहृदयेषु
कृतप्रसंगाः १२ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिःपरिचितंसदसद्विशेषं रूपंस्थविष्ठमजतेमहदाद्यनेकंनातः
परंपरमवेद्मिनयत्रवादः १३ कल्पांतएतदखिलंजठरेणगृह्णन्शेतेपुमान्स्वदृगनंतसखस्तदंके यन्नाभिसिंधुरुह
कांचनलोकगर्भद्युमानभगवतेप्रणतोस्मितस्मै १४ त्वंनित्यमुक्तपरिशुद्धविबुद्धआत्माकूटस्थआदिपुरुषोभगवांस्त्र्य
धीशः यद्बुध्यवस्थितिमखंडितयास्वदृष्ट्याद्रष्टास्थितावधिमखोव्यतिरिक्तआस्से १५ श्रीरामजयरामजयजय

महयः तदंकेशेषोत्संगे यस्यनाभिरेवसिंधुःसमुद्रस्तस्मिन्नरोहतीतितथातस्मिन्नकांचनलोकपद्मस्यगर्भेकर्णिकायांद्युमान्तेज
स्वीब्रह्माभवतितंप्रणतास्मीत्यर्थः १४ ननुममापिस्वापाद्यवस्थावत्त्वकाजीवाद्विशेषइत्यत आहत्वंतुव्यतिरिक्तःजीवविलक्षणआ
स्सेतिष्ठसि वैलक्षण्यमेवाहत्वंनित्यमुक्तोजीवस्तुत्वत्प्रसादान्मुच्यते त्वंपरिशुद्धःसतुमलिनः त्वंविबुद्धःसतुअज्ञः त्वंआत्मासतुजडः
त्वंकूटस्थःसतुविकारी त्वमादिपुरुषःसत्वादिमान त्वंतुभगवान्सभगहीनः त्वंत्रयाणांगुणानामधीशःसतुपरतंत्रकुतएतद्वैल
क्षण्यंयद्यतःबुद्ध्यवस्थितिंबुद्धेस्तांतामवस्थाअखंडितयास्वदृष्ट्याचिच्छक्त्याद्रष्टापश्यसि द्रष्टेतिपाठेतृच्प्रत्ययांतः अतोबु
द्ध्यवस्थितिमित्यत्रषष्ठ्यभावः तथाभूतएवत्वंस्थितौपालनेअधिमखोयज्ञाधिष्ठाताश्रीविष्णुः १५ श्रीरामकृष्णाभ्यांनमः

1481
1981

तमेवब्रह्मरूपेणजानन्नमस्करोति यस्मिन्निति पतंति अकस्मादुद्भवंति विश्वस्यभावोयस्मात् एकमखंडमाद्यमनादि १६ सकाम
भजनादपिमोक्षमाशासानआह हेभगवन्पुरुषार्थः परमानंदःसएवमूर्तिर्यस्यतवपादपद्मं आशिषोराज्यादेःसकाशात्सत्याअ
शीःपरमार्थफलंहिनिश्चितं कस्यतथानेनप्रकारेणत्वमेवपुरुषार्थइत्येवंनिष्कामतया अन्वनुभजतः यद्यप्येवंतथापिहेआर्यस्वा
मिन्दीनान्सकामान्अप्यस्मान्पातिसंसारभयाद्रक्षत्येवयतः अनुग्रहेहितावरणेकातरःपरवशः यथावास्त्रावेनप्रसूताधे

यस्मिन्विरुद्धगतयोह्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्यात् तद्ब्रह्मविश्वभवमेकमनंतमाद्यमानं
दमात्रमविकारमहंप्रपद्ये १६ सत्याशिषोहिभगवंस्तवपादपद्ममाशीस्तथानुभजतःपुरुषार्थमूर्तेः अप्येवमा
र्यभगवान्परिपातिदीनान्वाश्रेववत्सकमनुग्रहकातरोस्मान् १७ मैत्रेयउवाच अथाभिष्टुतएवंवैसत्संक
ल्पेनधीमता भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत् १८ श्रीभगवानुवाच वेदाहंतेव्यवसितंहृदिराजन्य
बालक तत्प्रयच्छामिभद्रंतेदुरापमपिसुव्रत १९ नान्यैरधिष्ठितंभद्रयद्भ्राजिष्णुध्रुवक्षिति यत्रग्रहर्क्षताराणांज्यो
तिषांचक्रमास्थितं २० मेढ्यांगोचक्रवत्स्थास्नुपरस्तात्कल्पवासिनां धर्मोग्निःकश्यपःशुक्रोमुनयोयेवनौ
कसः चरंतिदक्षिणीकृत्यभ्रमंतोयत्सतारकाः २१

नुवत्संक्षीरंपाययति वृकादिभ्योरक्षतिचतद्वत् १७ १८ व्यवसितंसंकल्पितं १९ तत्प्रयच्छामीत्युक्तंकिंतदित्यपेक्षायामाहना
न्यैरितिसार्द्धाभ्यां हेभद्र ध्रुवक्षितिनिवासोयत्र अंहितमर्पितंधान्याक्रमणाय २० भ्राम्यमाणानांपशूनांबंधनस्तंभोमेढीतस्यां
बलीवर्दसमूहवत् अवांतरकल्पवासिनांपुरस्तादपिस्थास्नुलोकत्रयनाशेप्यनश्वरं धर्माग्न्यादयोनक्षत्ररूपाः वनौकसःसमर्प
तत्रदक्षिणीकृत्यभ्रमंतश्चरंति २२ राम

एतच्चराज्यानंतरंभविष्यतीत्याह प्रस्थितइतितुभ्यंपृथिवींदत्वावनंप्रस्थितंत्वांवक्तः वनंप्रतिदीर्घगमनेकृतेसतिरक्षितारक्षिष्यति २२
त्वयाअसंकल्पितमपिमद्भक्तस्यतवह्रोहादेवभविष्यतीत्याह त्वद्भ्रातरीति मासुरुचिःप्रवेक्ष्यति २३ किंचइष्ट्वामां यज्ञोहृदयंप्रियामू
र्तिर्यस्यतं २४ यतःस्थानात २५ अतिदिश्यदत्वा २६ संकल्पजंमनोरथंपादयोःसेवयाप्रापितं संकल्पस्यनिर्वाणंसमाप्तिर्यस्मा

प्रस्थितेतुवनंपित्रादत्वागांधर्मसंश्रयः षट्त्रिंशद्वर्षसाहस्रंरक्षिताव्याहतेंद्रियः २२ त्वद्भ्रातर्युत्तमेनष्टेमृगयायां
यांतुतन्मनाः अन्वेषंतीवनंमातादावाग्निंसाप्रवेक्ष्यति २३ इष्ट्वामांयज्ञहृदयंयज्ञैःपुष्कलदक्षिणैः भुक्त्वाचेवाशि
षःसत्याअंतेमांसंस्मरिष्यसि २४ ततोगंतासिमत्स्थानंसर्वलोकनमस्कृतं उपरिष्टादृषिभ्यस्त्वंयतोनावर्ततेयतिः २५
मैत्रेयउवाच इत्यर्चितःसभगवानतिदिश्यात्मनःपदं बालस्यपश्यतोधामस्वमायान्गरुडध्वजः २६ सोपिसंक
ल्पजंविष्णोःपादसेवोपसादितं प्राप्यसंकल्पनिर्वाणंनातिप्रीतोभ्यगात्पुरं २७ विदुरउवाच सुदुर्लभंयत्परमं
पदंहरेर्मायाविनस्तच्चरणार्चनार्चितं लब्ध्वाप्यसिद्धार्थमिवैकजन्मनाकथंस्वमात्मानममन्यतार्थवित् २८
मैत्रेयउवाच मातुःसपत्न्यावाग्बाणैर्हृदिविद्धस्तुतान्स्मरन् नैच्छन्मुक्तिपतेर्मुक्तिंतस्मात्तापमुपेयिवान् २९ ध्रु
वउवाच समाधिनानेकभवेनयत्पदंविदुःसनंदादयऊर्ध्वरेतसः मासैरहंषड्भिरमुष्यपादयोःछायामुपेत्यापगतःपृथ

ग् २७ मायाविनःसकामस्यसुदुर्लभंहरेःपदंतदेकेनैवजन्मनालब्ध्वापिस्वमात्मानं असिद्धार्थं अप्राप्तमनोरथमिवकथममन्यत
पुरुषार्थविदपि २८ २९ तापमेवाह समाधिनेतिसार्द्धैःषड्भिः नैकेअनेकेभवायस्मिनबहुजन्मभिःस्तेनेत्यर्थः प्रणामंस्तुत्यादिम
मयगरुडस्थस्यहरेःपादछायायांस्थितमात्मानंस्मरन्नाह छायामुपेत्येतिपृथक्मतिःभेददृष्टिःसन्नहोकष्टमितिभावः ३०

1133
1931

अनात्म्यं आत्मशून्यत्वंअज्ञत्वं भवछेतुःयंदंतवत तदयाचेयाचितवानस्मि ३१ अज्ञत्वेकारणंसंभावयतिमतिरिति पतद्भिःमदपे
क्षया अधःप्राप्नुवद्भिः अतएवासहनशीलैः नाधुनाप्यवमानंतेइत्यादिसत्यपिनारदस्यवचोयोनगृहीतवानस्मि तस्यमेमतिर्वि
दूषिता ३२ किंचदेवीमिति प्रसुप्तःस्वप्नानिवपश्यनद्वितीयेअसत्यपिभ्रातिवभ्रातृव्यःशत्रुरितिदृष्ट्याहृद्रुजाहृदयशोकेनतप्ये
तापमनुभवामि ३३ किंचमयाप्रसाद्ययत्प्रार्थितंतद्व्यर्थंप्रार्थितमित्याह भवछिदमिति ३४ एतदेवसदृष्टांतमाह स्वाराज्यंनि

अहोबतममानात्म्यंमंदभाग्यस्यपश्यत भवछिदःपादमूलंगत्वायाचेयदंतवत ३१ मतिर्विदूषितादेवैःपतद्भि
रसहिष्णुभिः योनारदवचस्तथ्यंनाग्राहीषमसत्तमः ३२ देवींमायामुपाश्रित्यप्रसुप्तइवभिन्नदृक् तप्येद्वितीये
प्यसतिभ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितंव्यर्थंचिकित्सेवगतायुषि प्रसाद्यजगदात्मानंतपसादुःप्रसाद
नं ३४ भवछिदमयाचेहंभवभाग्यविवर्जितः स्वाराज्यंयछतोमौढ्यात्मनोमेभिक्षितोबत ईश्वरात्क्षीणपुण्ये
नफलीकारानिवाधनः ३५ मैत्रेयउवाच नैवंमुकुंदस्यपादारविंदयोरजोजुषस्तातभवादृशाजनाः वांछंतियद्दा
स्यमृतेर्थमात्मनोयदृछयालब्धमनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतंसंपरेत्ययथागतं राजानश्रद्दधेभद्रम
भद्रस्यकुतोमम ३७ श्रद्धायवाक्यंदेवर्षेर्हर्षवेगेनधर्षितः वार्ताहर्तुरतिप्रीतोहारंप्रादान्महाधनं ३८ श्रीरामवं

जानंदंप्रयछतःसकाशात अतिमानक्षीणपुण्येनमयाभिक्षितःयाचितःक्षीणेनपुण्येनेतिवासदृष्टांतएवसंबंधः यथाधनः
ईश्वरात्चक्रवर्तिनःफलीकारानसतुषतंडुलकणानयाचतेतद्वत ३५ एवंनिस्पृहस्त्वंतस्ययुक्तमित्याह नेति तस्यदास्यंविना
अन्यमर्थमात्मनोनैववांछंयदृछयैवलब्धेनमनसःसमृद्धिर्येषांते ३६ प्रस्तुतमाह आकर्ण्येति संपरेत्यमत्वाआगतमाक
र्ण्ययथानश्रद्दधेविश्वासंनचकार अभद्रस्यममइदंकुतइतिमत्वा ३७ एष्यत्यचिरतइतिदेवर्षेर्वाक्यंश्रद्धाय ३८ श्रीराम

ब्राह्मणादिभिः पर्यस्तः परिवृतः ३९ अस्यराज्ञोमहिष्योमध्येउत्तमंनिधायएकामेवशिबिकां नरविमानमारुह्य ४० उपवनस्याभ्या
शेसमीपे ४१ विष्वक्सेनांघ्रिसंस्पर्शेनहतमशेषमघंबंधनंचयस्य ४२ जातउद्दामोमहामनोरथोयस्य ४३ अभिमंत्रितः पितुरा

सदश्वंरथमारुह्यकार्तस्वरपरिछदं ब्राह्मणैः कुलवृद्धैश्चपर्यस्तोमात्यबंधुभिः ३९ शंखदुंदुभिनादेनब्रह्मघोषेण
वेणुभिः निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४० सुनीतिः सुरुचिश्चास्यमहिष्यौरुक्मभूषिते आरुह्यशि
बिकांसार्द्धमुत्तमेनाभिजग्मतुः ४१ तंदृष्ट्वोपवनाभ्याश आयांतंतरसारथात् अवरुह्यनृपस्तूर्णमासाद्यप्रेमवि
ह्वलः ४२ परिरेभेंगजंदोर्भ्यांदीर्घोत्कंठमनाश्वसन् विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं ४३ अथाजिघ्र
न्मुहुर्मूर्ध्निशीतैर्नयनवारिभिः स्नापयामासतनयंजातोद्दाममनोरथः ४४ अभिवंद्यपितुःपादावाशीर्भि
श्चाभिमंत्रितः ननाममातरौशीर्ष्णासत्कृतः सज्जनाग्रणीः ४५ सुरुचिस्तंसमुत्थाप्यपादावनतमर्भकं परि
ष्वज्याहजीवेतिबाष्पगद्गदयागिरा ४६ यस्यप्रसन्नोभगवान्गुणैर्मैत्र्यादिभिर्हरिः तस्मैनमंतिभूतानिनिम्न
मापइवस्वयं ४७ उत्तमश्चध्रुवश्चोभावन्योन्यप्रेमविह्वलौ अंगसंगादुत्पुलकावस्रौघंमुहुरूहतुः ४८ सु
नीतिरस्यजननीप्राणेभ्योपिप्रियंसुतं उपगुह्यजहावाधिंतदंगस्पर्शनिर्वृता ४९ पयःस्तनाभ्यांसुस्राववनेत्रजैः
सलिलैः शिवैः तदाभिषिच्यमानाभ्यांवीरवीरसुवोमुहुः ५० तांशशंसुर्जनाराज्ञीदिष्ट्यातेपुत्र आर्तिहा प्रतिल
ब्धश्चिरंनष्टोरक्षितामंडलंभुवः ५१ अभ्यर्चितस्त्वयानूनंभगवान्प्रणतार्तिहा यदनुध्यायिनोधीराम्रृत्युंजिग्युःसु
दुर्जयं ५२

शीर्भिः सहतेनकृतसंभाषणः ४५ ४६ सुरुच्याः प्रीतिर्नार्मसाविनेत्याह यस्येतिनमंति अनुसरंति अपोययास्वयमेवनिम्नंदेश
मवतरंति ४७ ऊहतुः दधतुः ४८ ४९ हेवीरविदुरवीरसुवः ध्रुवमातुः अभिषिच्यमानाभ्यांस्तनाभ्यांपयस्तदासुस्राव ५० चिरंनष्टोदर्श
नमप्राप्तः रक्षितारक्षिष्यति ५१ ५२

491
1981

एवमिति व्यवहितंपित्राद्युपलालनंपरामृश्यते ५३ पुरंवर्णयति तत्रतत्रेति चतुर्भिः सवृंदैः फलमंजरीयुक्तैः पूगानांपोतैः बालवृक्षैः
एवमिति व्यवहितंपित्राद्युपलालनंपरामृश्यते ५३ पुरंवर्णयति तत्रतत्रेति चतुर्भिः सवृंदैः फलमंजरीयुक्तैः पूगानांपोतैः बालवृक्षैः
तद्विधैः सवृंदैरुपसंस्कृतंप्रतिद्वारमित्युत्तरेणान्वयः ५४ चूतपल्लवाश्चवासांसिचस्रजश्चमुक्तादामानिचतेषांविशिष्टंलंबनमस्ति
येषुकुंभेषु ५५ गोपुरैः पुरद्वारैश्चशातकुंभाः परिछदाः परिकरायेषुविमानानामिवशिखरैर्द्युतिर्येषां ५६ चत्वरमंगणंरथ्याम

लाल्यमानंजनैरेवंध्रुवंसभ्रातरंनृपः आरोप्यकारिणींहृष्टः स्तूयमानोविशत्पुरं ५३ तत्रतत्रोपसंक्लृप्तैर्लसन्मक
रतोरणैः सवृंदैः कदलीस्तंभैःपूगपोतैश्चतद्विधैः ५४ चूतपल्लववासःस्रङ्मुक्तादामविलंबिभिः उपस्कृतंप्रतिद्वार
मपांकुंभैः सदीपकैः ५५ प्राकारैर्गोपुरद्वारैः शातकौंभपरिछदैः सर्वतोलंकृतंश्रीमद्विमानशिखरद्युभिः ५६ मृ
ष्टचत्वररथ्याट्टमार्गचंदनचर्चितं लाजाक्षतैः पुष्पफलैस्तंडुलैर्बलिभिर्युतं ५७ ध्रुवायपथिदृष्टायतत्रतत्रपुरस्त्रि
यः सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानिच ५८ उपजह्रुः प्रयुंजानावात्सल्यादाशिषः सतीः शृण्वंस्तद्वल्गुगी
तानिप्राविशद्भवनंपितुः ५९ महामणिव्रातमयेसतस्मिन्भवनोत्तमे लालितोनितरांपित्रान्यवसद्दिविदेववत् ६०
पयःफेननिभाः शय्यादांतरुक्मपरिछदाः आसनानिमहार्हाणियत्ररौक्माउपस्कराः ६१ यत्रस्फटिककुड्येषुम
हामारकतेषुच मणिप्रदीपाआभांतिललनारत्नसंयुताः ६२ उद्यानानिचरम्याणिविचित्रैरमरद्रुमैः कूजद्विहंगमि
थुनैर्गायन्मत्तमधुव्रतैः ६३ वाप्योवैडूर्यसोपानाःपद्मोत्पलकुमुद्वतीः हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ६४

हामार्गः अट्टउच्चस्सोपरिनिर्मिताभूमिका मार्गो अवांतरः मृष्टाः संमार्जिताः चत्वरादयोयस्मिन् ५७ सिद्धार्थश्वेतसर्षपः अ
क्षतायवाः ५८ उपजह्रुः व्यकिरन् सतीः सत्याः ५९ यत्रभवनोत्तमे ६० ६१ ६२ ६३ कुमुद्वत्कुमुदंपद्मादिमत्योवाप्यः ६४

भा०

६५ उढवयसंप्राप्तयौवनं अनुरक्ताः प्रजायस्मिन् ६६ प्रवयसंवृद्धं ६७ इतिश्रीभागवतेभावार्थदीपिकायां श्रीधरस्वामिविरचिता
३० यां चतुर्थस्कंधटीकायांनवमोध्यायः ९ दशमेभ्रातृहंतॄणां यक्षाणामकरोद्वधं एकएवालकांगत्वातस्यविक्रमउच्यते १ योषि
तांरत्नमिवाविमनोहरंकन्यारत्नंचेतिवा २ यक्षेणाद्रौहिमवतिहतः आजाविति पाठेयुद्धे अस्यगतिंगतामृतेत्यर्थः ३ कोपामर्षंदुं

उत्तानपादोराजर्षिः प्रभावंतनयस्यतं श्रुत्वादृष्ट्वाद्भुततमंप्रपेदेविस्मयंपरं ६५ वीक्ष्योढवयसंपुत्रंप्रकृतीनांचसंमतं
अनुरक्तप्रजंराजाध्रुवंचक्रेभुवःपतिं ६६ आत्मानंचप्रवयसमाकलय्यविशांपतिः वनंविरक्तः प्रातिष्ठद्विमृशन्नात्म
नोगतिं ६७ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेनवमोध्यायः ९ मैत्रेयउवाच प्रजापतेर्दुहितरंशिशुमार
स्यवैध्रुवः उपयेमेभ्रमिंनामतत्सुतौकल्पवत्सरौ १ इलायामपिभार्यायांवायोः पुत्र्यांमहाबलः पुत्रमुत्कलनामा
नंयोषिद्रत्नमजीजनत् २ उत्तमस्त्वकृतोद्वाहोमृगयायांबलीयसा हतः पुण्यजनेनाद्रौतन्मातास्यगतिंगता ३
ध्रुवोभ्रातृवधंश्रुत्वाकोपामर्षशुचार्पितः जैत्रंस्यंदनमास्थायगतः पुण्यजनालयं ४ गत्वोदीचींदिशंराजारुद्रानु
चरसेवितां ददर्शहिमवद्द्रोण्यांपुरींगुह्यकसंकुलां ५ दध्मौशंखंबृहद्बाहुः खंदिशश्चानुनादयन् येनोद्विग्नदृशः
क्षत्तरुपदेव्योत्रसन्भृशं ६ ततोनिष्क्रम्यबलिनउपदेवमहाभटाः असहंतास्तन्निनादंमभिपेतुरुदायुधाः ७ सता
नापततोवीरउग्रधन्वामहारथः एकैकंयुगपत्सर्वान्हनन्बाणैस्त्रिभिस्त्रिभिः ८ तेवैललाटलग्नैस्तैरिषुभिः सर्वएव
हि मत्वानिरस्तमात्मानमाशंसन्कर्मतस्यतत् ९ तेपिचामुममृष्यंतः पादस्पर्शमिवोरगाः शरैरविध्यन्युगपद्दि
गुणंप्रचिकीर्षवः १०

द्वैस्यंतेनार्पितोव्याप्तः जैत्रंजयहेतुं पुण्यजनालयंअलकां ४ रुद्रानुचरापूतादयः ५ दध्मौवादितवान् येनशंखवादनेन हेक्षत्तः
उपदेव्यायक्षस्त्रियः ६ ७ एकैकंत्रिभिस्त्रिभिरित्येवंसर्वान्त्रयोदशायुतानियक्षान्युगपत्अहनत्जघान ८ ९ तेपितत्क
र्मअसहमानाअमुंअविध्यत् द्विगुणंयथाभवतिषड्भिःषड्भिः प्रतिकर्तुमिच्छवः १० ७ ७ ७ ७ ७ ३०

493
1381

चित्रवाजैः विचित्रपक्षैः ११ १२ धारासंपातेन छन्नोगिरिरिवनैवादृश्यत १३ सूर्यतुल्यः १४ यातुधानेषुराक्षसेषुजयकाशिषुजितोस्मि
तमितिजयप्रकाशकेषुसत्सु १५ शस्त्रौघंव्यधमत्संचूर्णयामास १६ वर्माणिवचनानि १७ शिरः प्रमुखैः आस्तृताः प्रकीर्णा
रेजुरिति द्वयोरन्वयः १८ १९ प्रायोबाहुल्येनविवृक्णाः संछिन्ना अवयवायेषां २० आततायिनं शस्त्रपाणिमिति ब्रुवन्निसत्रापि आ

ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः शतघ्नीऋष्टिभिश्चैव चित्रवाजैः शरैरपि ११ अभ्यवर्षन्प्रकुपिताः सरथंसहसा
रथिं इच्छंतस्तत्प्रतीकर्तुमयुतानांत्रयोदश १२ औत्तानपादिः सतदाशस्त्रवर्षेणभूरिणा नैवादृश्यतसंछन्नआसारे
णयथागिरिः १३ हाहाकारस्तदैवासीत्सिद्धानांदिविपश्यतां हतोयंमानवः सूर्योमग्नः पुण्यजनार्णवे १४ नदत्सुया
तुधानेषुजयकाशिष्वथोमृधे उदतिष्ठद्रथस्तस्यनीहारादिवभास्करः १५ धनुर्विस्फूर्जयन्दिव्यंद्विषतांखेदमुद्वहन्
अस्त्रौघंव्यधमद्बाणैर्घनानीकमिवानिलः १६ तस्यतेचापनिर्मुक्ताभित्वावर्माणिरक्षसां कायानाविविशुस्तिग्मागि
रीनशनयोयथा १७ भल्लैः संछिद्यमानानांशिरोभिश्चारुकुंडलैः ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः १८ हा
रकेयूरमुकुटैरुष्णीषैश्चमहाधनैः आस्तृतास्तारणभुवोरेजुर्वीरमनोरमाः १९ हतावशिष्टाइतरेरणाजिराद्रक्षोग
णाः क्षत्रियवर्यसायकैः प्रायोविवृक्णावयवाविदुद्रुवुर्मृगेंद्रविक्रीडितयूथपाइव २० अपश्यमाणः सतदाततता
यिनंमहामृधेकंचनमानवोत्तमः पुरींदिदृक्षन्नपिनाविशद्द्विषांनमायिनांवेदचिकीर्षितंजनः २१ इतिब्रुवंश्चित्ररथः
थःस्वसारथिंयत्तःपरेषांप्रतियोगशंकितः शुश्रावशब्दंजलधेरिवेरितंनभस्वतोदिक्षुरजोन्वदृश्यत २२ क्षणेना
च्छादितंव्योमघनानीकेनसर्वतः विस्फुरत्तडितादिक्षुत्रासयत्स्तनयित्नुना २३ ७ ७ ७ श्रीराम ७

ततायिनामित्यनुषंगः पुरींदिदृक्षन्नित्यत्रापिनमायिनामित्यादेरनुषंगः २१ चित्ररथोध्रुवः यत्तः यत्नवान् प्रतियोगः पुनरुद्यो
गस्तस्मात्शंकितः नभस्वतोवायोर्हेतोः २२ विस्फुरंत्यस्तडितोयस्मिन् तेनत्रासयन्स्तनयित्नुनाशनयोयस्मिन् २३ गम

वहन्निपेतुरित्यर्थः नसृजतिशरीरमित्यसृक्श्लेष्मादिमेदसः पुंस्त्वमार्षमेवांसिअस्याग्रतोनिपेतुः साश्मवर्षिणः अश्मसहितंयद्द
र्षतद्वत २४ अशनिवन्निश्वासोयेषां २५ त्रासनानिभयंकराणि तिग्मात्क्रूरागतिवृत्तिर्येषां असुराभ्रभ्मादिशब्देर्दूरांतरतेनय
क्षाएवोच्यंते २७ २८ तस्यसम्यक्शंकल्याणंआशंसन्प्रार्थितवंतः २९ तवविपक्षान्शत्रूननाशयतुभद्रासाक्षात् अंजसा
सुखेनैवमृत्युंतरति ३० इतिचतुर्थस्कंधेटीकायांदशमोध्यायः १० एकादशेतुयक्षाणांक्षयंदृष्ट्वामनुःस्वयं आगत्यवारया

ववृषूरुधिरौघासृक्पूयविण्मूत्रमेदसः निपेतुर्गगनादस्यकबंधान्यग्रतोनघ २४ ततःखेदृश्यतगिरिर्निपेतुः
सर्वतोदिशं गदापरिघनिस्त्रिंशमुसलाःसाश्मवर्षिणः २५ अहयोशनिनिश्वासावमंतोग्निंरुषाक्षिभिः अभ्य
धावन्गजामत्ताःसिंहाव्याघ्राश्चयूथशः २६ समुद्रऊर्मिभिर्भीमःप्लावयन्सर्वतोभुवं आससादमहाह्रादःक
ल्पांतइवभीषणः २७ एवंविधान्यनेकानित्रासनान्यमनस्विनां ससृजुस्तिग्मगतयआसुर्यामाययासुराः २८
ध्रुवप्रयुक्तामसुरैस्तांमायामतिदुस्तरां निशम्यतस्यमुनयःशमाशंसन्समागताः २९ मुनयऊचुः औत्तानपा
दभगवांस्तवशार्ङ्गधन्वादेवःक्षिणोत्ववनतार्तिहरोविपक्षान् ३० यन्नामधेयमभिधायनिशम्यचाद्धालोकोंजसात
रतिदुस्तरमंगमृत्युं ३० इतिश्रीभागवतेमहापुराणेचतुर्थेदशमः १० मैत्रेयउवाच निशम्यगदतामेवमृषीणांधनु
षिध्रुवः संदधेस्त्रमुपस्पृश्ययन्नारायणनिर्मितं १ संधीयमानएतस्मिन्मायागुह्यकनिर्मिताः क्षिप्रंविनेशुर्वि
दुरक्लेशाज्ञानादयोयथा २ तस्यार्षमस्त्रंधनुषिप्रयुंजतःसुवर्णपुंखाःकलहंसवाससः विनिसृतानिर्विविशुर्द्विषद्ब
लंयथावनंभीमरवाःशिखंडिनः ३ तैस्तिग्मधारैःप्रधनेशिलीमुखैरितस्ततःपुण्यजनाउपद्रुताः तमभ्यधावन्कुपि
ताउदायुधाःसुपर्णमुन्नद्धफणाइवाहयः ४

मासध्रुवंतत्रोपदेशतः १ एवंगदतांवचनमुपदेशमिवनिशम्य उपस्पृश्य आचम्य यन्नारायणनिर्मितंनारायणास्त्रंतत्संदधे
१ क्लेशारागादयोयथा २ किंचतस्यार्षमस्त्रंऋषेर्नारायणादुद्धृतं अस्त्रंप्रयुंजतःसंदधतःसुवर्णमयाःपुंखाःमूलप्रांतायेषांक
लहंसानांवासांसिपक्षायेषांतेशराविनिसृताइतिद्रष्टव्यं ३ उपरिष्टाच्छिलीमुखग्रहणात् प्रधनेयुद्धेउन्नद्धाःउच्छ्रिताःफणायेषां ३१
ते ४

दृषत्कैर्बाणैर्निकृत्ताबाह्वादयोयेषांतान्परलोकंनिनायकथंभूतंऊर्ध्वरेतसःसन्यासिनःअर्कमंडलंनिर्भिद्यव्रजंतितं ५ अनागसोः
निरपराधान् ६ तममानरकस्यद्वारेणयेनरोषेण ७ ८ ननुमद्भ्रातृहंतारःकथनकृतेनमः अतआहनन्विति ९ सत्यप्यपराधेत
वैवनदुचितंनभवतीत्याहनायमितिपराभूतंपराभूतंदेहमात्मानंगृहीत्वापशवोयथादेहाभिमानादन्योन्यंघ्नंतितथाभूतानांवै

सतानदृषत्कैरभिधावतोमृधेनिकृत्तबाहूरुशिरोधरोदरान् निनायलोकंपरमार्कमंडलंव्रजंतिनिर्भिद्ययमूर्ध्वरेत
सः ५ तान्हन्यमानानभिवीक्ष्यगुह्यकाननागसश्चित्ररथेनभूयसः औत्तानपादिंकृपयापितामहोमनुर्जगा
दोपगतःसहर्षिभिः ६ मनुरुवाच अलंवत्सातिरोषेणतमोद्वारेणपाप्मना येनपुण्यजनानेतानवधीस्त्वमनाग
सः ७ नास्मत्कुलोचितंतातकर्मैतत्सद्विगर्हितं वधोयदुपदेवानामारब्धस्तेकृतैनसां ८ नन्वेकस्यापराधेनत
त्प्रसंगाद्बहवोहताः भ्रातुर्वधाभितप्तेनत्वयांगभ्रातृवत्सल ९ नायंमार्गोहिसाधूनांहृषीकेशानुवर्तिनां यदात्मा
नंपरागृह्यपशुवद्भूतवैशसं १० सर्वभूतात्मभावेनभूतावासंहरिंभवान् आराध्याप्यदुराराध्यंविष्णोस्तत्परमं
पदं ११ सत्वंहरेरनुध्यातस्तत्पुंसामपिसंमतः कथंत्ववद्यंकृतवाननुशिक्षन्सतांव्रतं १२ तितिक्षयाकरुणया
मैत्र्याचाखिलजंतुषु समत्वेनचसर्वात्माभगवान्संप्रसीदति १३ सुप्रसन्नेभगवतिपुरुषःप्राकृतैर्गुणैः वि
मुक्तोजीवनिर्मुक्तोब्रह्मनिर्वाणमृच्छति १४ श्रीराम ७ राम ७ ७ ७

शंसंहिंसेतियत् १० त्वंचबाल्यसाधुःसन्इदानींकथमन्यथाकृतवानित्याह सर्वभूतात्मभावेनेतिद्वाभ्यां ११ अनुध्यातः
हरेर्विज्ञातः यद्वाहरिस्थितः तत्पुंसांहरिदासानामपिसाधुत्वेनसंमतः १२ सतांव्रतमेवाह महत्सुतितिक्षानीचेषुकरुणा
समेषुमैत्री अखिलेषुसमत्वेनच १३ ततःकृतार्थोभवतीत्याह सुप्रसन्नेसति गुणैर्विमुक्तः अतएवनकार्येणजीवनलिं
गशरीरेणनिर्मुक्तःसन्निर्वाणसुखात्मकंब्रह्मप्राप्नोति १४

भा०
३२

भ्रातृहंतृत्वंअंगीकृत्योक्तं इदानींतुनात्मनोभ्रातपुत्रादिसंबंधः नचअन्योन्यहंतत्वादिकमपीत्याह दशभिः भूतेःपंचभिरारब्धे
देहाद्याकारेणपरिणतेः योषितपुरुषश्चेतिप्रसिद्धः तयोर्व्यवायात्मैथुनातसंभूतिः अनयोर्योषितपुरुषयोरिहसंसारोभवति
१५ एवंतावतसर्गःप्रवर्तते एवंपालकाकारेणपरिणतेभूतैरेवस्थितिः हंतदेहाकारेणपरिणतेःसंयमःसचपरमात्मनोमाया
गुणानांव्यतिकरात नतुस्वतः १६ ननुजडानांदेहानांवाकथं सर्गादिहेतुत्वंतत्राह निमित्तमात्रंपुरुषर्षभईश्वर यत्रयस्मिन्नि
मित्तसतिकार्यकारणात्मकंविश्वंभ्रमतिपरिवर्तते यथा अयस्कांतेनिमित्तसतिलोहंप्रवर्ततेतद्वत १७ ननुसचेन्निमित्तंतर्हितस्य

भूतेःपंचभिरारब्धैर्योषित्पुरुषएवहि तयोर्व्यवायात्संभूतियोषित्पुरुषयोरिह १५ एवंप्रवर्ततेसर्गःस्थितिःसं
यमएवच गुणव्यतिकराद्राजन्माययापरमात्मनः १६ निमित्तमात्रंतत्रासीन्निर्गुणःपुरुषर्षभः व्यक्ताव्य
क्तमिदंविश्वंयत्रभ्रमतिलोहवत १७ सखल्विदंभगवान्कालशक्त्यागुणप्रवाहेणविभक्तवीर्यः करोत्यकर्तैव
निहंत्यहंताचेष्टाहिभूम्नःखलुदुर्विभाव्या १८ सोनंतोंतकरःकालोनादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्
मृत्युनांतकं १९

विशेषायुगपदेवसर्गादित्रयंभवेदतआह सखल्विति कालशक्त्याक्रमेणगुणानांप्रवाहःक्षोभः तेनविभक्तंसृष्ट्यादिविष
यंवीर्यंशक्तिर्यस्य ननुकालोगुणान्युगपदेवक्षोभयतुतत्राह चेष्टाकालशक्तिः दुर्विभाव्या अचिंत्या १८ ननुपित्रादिस्सृज
तिराजादिःपालयति निहंतिचोरादिर्नत्वीश्वरस्तत्राह सइति जनेनपित्रादिनाजनंपुत्रादिजनयन आदिकृत अंतकंचोरादि
कंतन्मृत्युहेतुनयामारयन अंतकरःस्वयंतुअनंतोनादिश्च अव्ययः अक्षीणशक्तिः अयंभावः पित्रादयोन्यनउत्पत्त्या
दिमंतोनस्वातंत्र्येणकारणंकिंत्वीश्वरएवंनियंतासर्वकारणमिति १९ गोपाल कृष्ण वासुदेव हरेराम ३२

२०९७
१३८१

नचैवंकुर्वतोपिवैशम्यप्रसक्तिःपक्षपाताभावादित्याह नैवेतिद्वाभ्यां मृत्युरूपस्यसमंयथाभवतितथाप्रजाःकर्मभृताःविशतःतस्यसा
म्यपिभूतेषुफलवैषम्यं तत्कर्मतयास्यादितिदृष्टांतमाह तंधावमानमनुअनीशाःकर्माधीनाःभूतसंघाधावंति अनीलंधावंतम
नुरजांसीवतत्रयथारजसांतमःप्रकाशजलग्न्यादिप्रवेशोपिनानिलस्यवैषम्यमेवमीश्वरस्यापीतिभावः २० अपचयमकालमृत्युं उप
चयंकालमृत्योरपिरक्षां यद्वा अपचयंमशकादौउपचयंदेवादौ स्वस्थत्वादुपचयापचयाभ्यांरहितोसौविष्णुःदुःखस्यकर्माधीनस्यवि
दधाति २१ एवंभूतश्चेश्वरःसर्ववादिसमंतः विवादस्तुनाममात्रइत्याह कश्चिदिति पुंसःकामंवात्स्यायमनादयः श्रुतिश्च कामाकाम्यं
तकामःकर्ताकामःकामयितेत्यादि २२ ननुकर्मादीनांजडत्वादीनांस्वरूपतोपिभिन्नत्वात्कथमेकमन्यंतत्राह अव्यक्तस्यतथापिभि

नैवास्यपक्षोस्यविपक्षएववापरस्यमृत्योर्विशतःसमंप्रजाः तंधावमानमनुधावंत्यनीशायथारजांस्यनिलंभूतसंघाः२०
आयुषोपचयंजंतोस्तथैवापचयंविभुः उभाभ्यांरहितःस्वस्थोदुःखस्यविदधात्यसौ २१ केचित्कर्मवदंत्यन्येस्वभाव
मपरेनृप एकेकालंपरेदैवंपुंसःकाममुतापरे २२ अव्यक्तस्याप्रमेयस्यनानाशक्त्युदयस्यच नवैचिकीर्षितंतातकोवे
दाथस्वसंभवं २३ नचैतेपुत्रकभ्रातुर्हंतारोधनदानुगाः विसर्गादानयोस्तातपुंसोदैवंहिकारणं २४ सएवविश्वंसृ
जतिसएवावतिहंतिच अथापिह्यनहंकारान्नाज्यतेगुणकर्मभिः २५ एषभूतानिभूतात्माभूतेशोभूतभावनः स्वशक्त्या
मायायायुक्तःसृजत्यवतिहंतिच २६

त्वेहेतुः नानाशक्तीनामुदयोयस्मात्तदितिचिकीर्षितमेवतावतकोपिनवेद अथस्वस्यसंभवोयस्मात्तमीश्वरंकोवेदनकोपिवेद अद्
तिपाठेसाक्षात अतस्तत्वज्ञानाभावाद्विशेषांशेविवादइत्यर्थः तथाचश्रुतिः कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृ
ष्टिः अर्वाग्देवाअस्यविसर्जनेनाथाकोवेदयतआबभूवइत्यादि २३ ईश्वरवादस्यप्रकृतोपयोगमाह नचैतइति भ्रातृहंतारोनैव
ते हेपुत्रक उक्तमेवहेतुमनुवदति विसर्गादानयोर्मृत्युजन्मनोः यद्वाविसर्गःसृष्टिः आदानंसंहारः दैवमीश्वरएवकारणं २४ त
थापिनिर्लेपतामाह सएवइति २५ अनहंकारत्वेहेतुमाह एषइति २६ श्रीरामजयरामजयजयराम वासुदेवायनमः

सत्यंईश्वरएवकर्तातथाप्यहंकारादिमयात्यक्तुंनशक्यमितिचेत्तत्राह तमेवेतिचतुर्भिः मृत्युमभक्तानांभक्तानाममृतमेव उपहिशर
णंगच्छ तमेवत्स्वधारणेहेतुः यस्मिन्नसिनामिकायांदाम्नभिर्बद्धागावइवविश्वसृजोपिनामभिर्यंत्रिताः प्रतिबद्धाः संताबलिंहरंतितत्का
रितंकर्मकुर्वंतीत्यर्थः २७ तदाराधनंचतवसुकरमेवेत्याह यःपंचवर्षःसन्त्वंयमाराध्यत्रिलोकस्यमूर्ध्निपदंस्थानंलेभेप्रत्यंचिअ
क्षाणियस्मिन्नक्रियाविशेषणंवा लेभेअभिलिषितवानसि इदानींतमेवान्विष्य अवलोकयेत्युत्तरेणान्वयः २८ हरिंध्यायंतंप्रत्या

तमेवमृत्युममृतंतदेवंसर्वात्मनापेहिजगत्परायणं यस्मैबलिंविश्वसृजोहरंतिगावोयथावैनसिदाममयंत्रिताः २७ यः
पंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नमर्मा वनंगतस्तपसाप्रत्यगक्षमाराध्यलेभेमूर्ध्निपदंत्रिलोक्याः २८
तमेवमंगात्मनिमुक्तविग्रहेव्यपाश्रितंनिर्गुणमेकमक्षरं आत्मानमन्विच्छविमुक्तमात्मदृक्यस्मिन्निदंभेदमसत्प्रतीय
ते २९ त्वंप्रत्यगात्मनितदाभगवत्यनंत आनंदमात्रउपपन्नसमस्तशक्तौ भक्तिंविधायपरमांशनकैरविद्याग्रंथिंवि
भेत्स्यसिममाहमितिप्ररूढं ३० संयच्छरोषंभद्रंतेप्रतीपंश्रेयसांपरं श्रुतेनभूयसाराजन्अगदेनयथामयं ३१ ये
नोपसृष्टात्पुरुषाल्लोकउद्विजतेभृशं नबुधस्तद्वशंगच्छेदिच्छन्नभयमात्मनः ३२ हेलनंगिरिशभ्रातुर्धनदस्यत्वयाकृतं
यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ३३ तंप्रसादयवत्साशुसंनत्याप्रश्रयोक्तिभिः नयावन्महतांते
जःकुलंनोभिभविष्यति ३४ एवंस्वायंभुवःपौत्रमनुशास्यमनुर्ध्रुवं तेनाभिवंदितःसाकमृषिभिःस्वपुरंययौ ३५
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेएकादशोध्यायः ११ राम श्री राम ७ ७ ७ ७

हे अंगध्रुव मुक्तविग्रहे आत्मनिमनसिव्यपाश्रितं अवस्थितं आत्मदृक्प्रत्यग्दृष्टिःसन् अयंभेदोयस्मिन्नतदिदंभेदमसदेवविश्वं
यस्मिन् २९ तदन्वेषणफलमाह त्वंतदाअन्वेषणाकालएव ३० उपदेशसारमाह संयच्छेतिद्वाभ्यां प्रतीपंप्रतिकूलं अगदेन
औषधेनयथारोगंनियच्छति ३१ येनरोगेणोपसृष्टाद्व्याप्तात्पुरुषात् ३२ अन्यच्चत्वयाकार्यमित्याह हेलनमितिद्वाभ्यां य
यतः जघ्निवान्घातितवान् ३३ ३४ ३५ इतिश्रीभागवतेमहापुराणेभाषार्थदीपिकायांचतुर्थस्कंधटीकायांएकादशः ११

499
1381

ध्रुवस्य धनदनाभिनंदितः पुरमागतः यज्ञैरिष्ट्वाहरेःस्थानमारुरोहेतिकीर्त्यते ३ वैशसाद्धाभिन्निवृत्तंज्ञात्वा १ क्षत्रियदायादक्षत्रियपुत्र भ
त्यजः युक्तवानसि २ नचवैरस्यकारणमस्तीत्याह नभवानिति अप्ययभावयोः मृत्युजन्मनोः ३ कथंतर्हि अहंहंतेत्यादिबुद्धिस्तत्राह अहं
त्वमिति आभातिप्रकाशतेजायतइत्यर्थः अतद्ध्यानातदेहानुसंधानात् ययाधियाबंधः विपर्ययोदुःखादिः ४ तत्तस्मात्गच्छत्वाच

मैत्रेयउवाच ध्रुवंनिवृत्तंप्रतिबुध्यवैशसादपेतमन्युंभगवान्धनेश्वरः तत्रागतश्चारणयक्षकिन्नरैःसंस्तूयमानोभ्यव
दत्कृतांजलिं १ धनदउवाच भोभोक्षत्रियदायादपरितुष्टोस्मितेनघ यत्त्वंपितामहादेशाद्वैरंदुस्त्यजमत्यजः २ नभवान
वधीद्यक्षान्नयक्षाभ्रातरंतव कालएवहिभूतानांप्रभुरप्ययभावयोः ३ अहंत्वमित्यपार्थाधीरज्ञानात्पुरुषस्यहि स्वा
प्नीवाभात्यतद्ध्यानाद्ययाबंधविपर्ययौ ४ तद्गच्छध्रुवभद्रंतेभगवंतमधोक्षजं सर्वभूतात्मभावेनसर्वभूतात्मविग्र
हं ५ भजस्वभजनीयांघ्रिमभवायभवच्छिदं युक्तंविरहितंशक्त्यागुणमय्यात्ममायया ६ वृणीहिकामंनृपयन्मनोग
तंमत्तस्त्वमौत्तानपदेविशंकितः वरार्होस्यंबुजनाभपादयोरनंतरंत्वांवयमंगशुश्रुम: ७ मैत्रेयउवाच सराजराज
नवरायचोदितो ध्रुवोमहाभागवतोमहामतिः हरौसवव्रेचलितांस्मृतिंययातरत्ययत्नेनदुरत्ययंतमः ८ तेनप्रीतेन
मनसातांदत्त्वैलविलस्ततः पश्यतोंतर्दधेसोपिस्वपुरंप्रत्यपद्यत ९ अथायजतयज्ञेशंक्रतुभिर्भूरिदक्षिणैः द्रव्यक्रि
यादेवतानांकर्मकर्मफलप्रदं १० सर्वात्मन्यच्युतेसर्वेतीव्रौघांभक्तिमुद्वहन् ददर्शात्मनिभूतेषुतमेवावस्थितंविभुं ११

भगवंतंभजस्वेत्युत्तरेणान्वयः सर्वभूतात्मकोविग्रहोयस्य ५ ६ काममसंकोचेन अविशंकितः शंकाशून्यः अनंतरंअतिनि
कटं ७ सवरायचोदितयत्यनुवादेनृपंपृथक्कवाक्यं अतःसवव्रइत्यपौनरुक्त्यं ८ ९ द्रव्यक्रियादेवतानांकर्मसाध्यंफ
लरूपंकर्मफलप्रदश्चेत्यर्थः १० सर्वस्यात्मनि असर्वेसर्वोपाधिवर्जिते ११ श्रीकृष्णायनमः ७ ७ ७

१२ अभागैर्यज्ञाद्यनुष्ठाने: १३ बहव:सवायागा:संवत्सरावायस्मिन्तंकालंत्रिवर्गसाधनंनीत्वा अविचलानिसंयतानींद्रियाणिय
स्य अविकलेंद्रियइतिपाठेवा १४ इदंदेहादिभगवन्मायया आत्मनिस्वस्मिन्रचितंमन्यमान अत्राविद्यासृष्टिंदृष्टांतयति अधार
चितेति १५ आत्मादेह: आत्मादिमायिकमपिपुन:कालेनोपसृष्टमनित्यमाकलय्यविचिंत्य विशालांबदरीकाश्रमं १६ तत्रतत्कृत
मष्टांगयोगमाह तस्यांशिववा: उदकंविगाह्यप्रविश्येतिस्नानादिनियमाउक्ता:विशुद्धकरणइतिशमादयोयमा: आसनादीनि

तंमेवंशीलसंपन्नंब्रह्मण्यंदीनवत्सलं गोप्तारंधर्मसेतूनांमेनिरेपितरंप्रजा: १२ षट्त्रिंशद्वर्षसाहस्रंशशासक्षितिमंडलं
भोगै:पुण्यक्षयंकुर्वन्नभोगैरशुभक्षये १३ एवंबहुसवंकालंमहात्माविचलेंद्रिय: त्रिवर्गौपयिकंनीत्वापुत्रायादान्नृपा
सनं १४ मन्यमानइदंविश्वंमायारचितमात्मनि अविद्यारचितंस्वप्नगंधर्वनगरोपमं १५ आत्मस्त्र्यपत्यसुहृदोबल
मृद्धकोशमंत:पुरंपरिविहारभुवश्चरम्या: भूमंडलंजलधिमेखलमाकलय्यकालोपसृष्टमितिसप्रययौविशालां १६
तस्यांविशुद्धकरण: शिववार्विगाह्यबद्धासनंजितमरुन्मनसाहृताक्ष: स्थूलेदधारभगवत्प्रतिरूपएतद्ध्यायंस्तद
प्यव्यवहितोव्यसृजत्समाधौ १७ भक्तिंहरौभगवतिप्रवहन्नजस्रमानंदबाष्पकलयामुहुरर्द्यमान: विक्लिद्यमान
हृदय: पुलकाचितांगोनात्मानमस्मरदसाविति मुक्तलिंग: १८ सददर्शविमानाग्र्यंनभसोवतरध्रुव: विभ्राजय
द्दशदिशोराकापतिमिवोदितं १९

स्फुटमेवोक्तानि जितामरुत्प्राणायेन आहृतान्यक्षाणियेन भगवत: प्रतिनिधिभूतेस्थूलेविराड्रूपेएतन्मनोदधार ध्या
यन अव्यवहितोध्यातध्येयभेदशून्य:सन्समाधौस्थित: तत:स्थूलेव्यसृजत १७ एवमजस्रंनित्यंहरौभक्तिंप्रकर्षेण असौ
ध्रुवोहमित्यात्मानंनसस्मार यतोमुक्तलिंग:शरीराभिमान: तत्रहेतव: आनंदबाष्पकलयाबिंदुप्रवाहेणार्द्यमान:वि
क्लिद्यमानमिवहृदयंयस्यपुलकेर्व्याप्तांग: १८ १९ कृष्ण राम राम ७ ७ ७

च० ३४

501
1381

ननुअनंतरंदेवप्रवरोददर्शेत्यनुषंग: गदामवष्टभ्यस्थितौ किरीटादिभि:सहितंचारुणिकुंडलेययो: २० उत्तमगाय: पुण्यश्लोक:
तस्यकिंकरौतौविज्ञाय मधुद्विष: पार्षदप्रधानाविति हेतो:साध्वसेनसंभ्रमेणविस्मृतपूजाक्रम: केवलंतस्यनामानिगृणन्ननाम
२१ २२ सुभद्रंतइतिसशरीरस्यैवविष्णुपदारोहाभिप्रायं अतीतपततर्पितवान २३ अवांतस्यपार्षदौ २४ सुदुर्जयत्वेहेतु:सूरय:स

तत्रानुदेवप्रवरौचतुर्भुजौश्यामौकिशोरावरुणांबुजेक्षणौ स्थिताववष्टभ्यगदांसुवाससौकिरीटहारांगदचारुकुंडलौ
२० विज्ञायतावुत्तमगायकिंकरावभ्युत्थित:साध्वसविस्मृतक्रम: ननामनामानिगृणन्मधुद्विष:पार्षदप्रधानाविति
संहतांजलि: २१ तंकृष्णपादाभिनिविष्टचेतसंबद्धांजलिंप्रश्रयनम्रकंधरं सुनंदनंदावुपसृत्यसस्मितंप्रत्यूचतु:पुष्कर
नाभसंमतौ २२ देवावूचतु: भोभोराजन्सुभद्रंतेवाचंनोवहित:शृणु यपंचवर्षस्तपसाभवान्देवमतीतृपत् २३ तस्या
खिलजगद्धातुरावांदेवस्यशार्ङ्गिण: पार्षदाविहसंप्राप्तौनेतुंत्वांभगवत्पदं २४ सुदुर्जयंविष्णुपदंजितंत्वयायत्सुर
योप्राप्यविचक्षतपरं आतिष्ठतच्चंद्रदिवाकरादयोग्रहर्क्षतारा:परियंतिदक्षिणं २५ अनास्थितंतेपितृभिरन्यैरप्यंग
कर्हिचित आतिष्ठजगतांवंद्यंतद्विष्णो:परमंपदं २६ एतद्विमानप्रवरमुत्तमश्लोकमौलिना उपस्थापितमायुष्म
न अधिरोढुंत्वमर्हसि २७ मैत्रेयउवाच निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतांवाचमुरुक्रमप्रिय: कृताभिषे
क:कृतनित्यमंगलोमुनीन्प्रणम्याशिषमभ्यवादयत २८ परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच इयेषतद

सर्वयोपियदप्राप्यकेवलमध:स्थिता:पश्यंतियच्चंद्रादय:प्रदक्षिणंयथाभवत्येवंपरिक्रामंतितत्आतिष्ठअधितिष्ठ २५ २६
आयुष्मन्नित्यपिसशरीरस्यानाभिप्रायमेव २७ मधुच्यवतेस्रवतीतिमधुच्युत पाठांतरेमधुश्च्युतंयस्यास्तांनामामृतस्राबि
णीमित्यर्थ: कृतंनित्यंकर्ममंगलंवालंकरणंयेन अभ्यवादयामास २८ तदेवंरूपंहिरण्मयंबिभ्रतइयेषएछत २९

भा०
३५

दीनांहित्वा अगं दुर्गमं त्रिविष्टपं यास्यामीति अन्वस्मरत ३१ व्यवसितं अभिप्रायं व्यवसायज्ञात्वा ३२ ३३ देवयानेन देवमार्गेण विमा चं०
ने नतिवा मुनीन सप्तर्षीनपि ततःपरस्माद्यद्विष्णोःपदं तदभ्यगात ध्रुवागतिर्यस्य सः ३४ यत भ्राजमानमनुयस्य रुचालोका वि
भ्राजंते ये अननुग्रहाः निःकृपाः तेयत्नाव्रजन्त गतवंतः ३५ अच्युतप्रियाः बांधवायेषां ३६ ३७ अनिमिषं अनलसंज्योतिषां

तदादुंदुभयोनेदुर्मृदंगपणवादयः गंधर्वमुख्याः प्रजगुःपेतुःकुसुमवृष्टयः ३० सचस्वर्लोकमारोक्षन सुनीतिंजननीं
ध्रुवः अन्वस्मरदगंहित्वादीनांयास्यत्रिविष्टपं ३१ इतिव्यवसितंतस्यव्यवसायसुरोत्तमौ दर्शयामासतुर्देवींपुरोयाने
नगच्छतीं ३२ तत्रतत्रप्रशंसद्भिःपथिवैमानिकैःसुरैः अवकीर्यमाणांददृशेकुसुमैःक्रमशोग्रहान ३३ त्रिलोकानदे
वयानेनसोतिव्रज्यमुनीनपि परस्माद्यध्रुवगतिर्विष्णोःपदमथाभ्यगात ३४ यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्र
यायद्यनुविभ्राजंत एते नततवलाजंतुषुयेननुग्रहाव्रजंत्यभद्राणि चरंतियेनिशं ३५ शांताःसमदृशाःशुद्धाःसर्व
भूतानुरंजनाः यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ३६ इत्युत्तानपदःपुत्रोध्रुवःकृष्णपरायणः अभूत्त्रत्र
याणांलोकानांचूडामणिरिवामलः ३७ गंभीरवेगानिमिषंज्योतिषांचक्रमाहितं यस्मिन्भ्रमतिकौरव्यमेढ्यामि
वगवांगणः ३८ महिमानंविलोक्यास्यनारदोभगवानृषिः आतोद्यंवितुदन्श्लोकान्सत्रेगायत्प्रचेतसां ३९
नारदउ० नूनंसुनीतेःपतिदेवतायास्तपःप्रभावस्यसुतस्यतांगतिं दृष्ट्वाभ्युपायानपिवेदवादिनोनैवाधिगंतुंप्रभवंतिकिं
नृपाः ४०

चक्रंयस्मिन आहितं अर्पितं सत भ्रमति मेढ्यामाहितागंभीरवेगागवांगणइव ३८ आतोद्यंवीणांवितुदन वादयन प्रचेत
सांब्रह्मसत्रेभगवन्महात्म्यप्रसंगेन ध्रुवमहिमाप्रतिपादनपरान त्रीनलोकान अगायत ३९ तांश्चाह नूनमिति पतिदेव
तायस्याःसुतस्ययस्तपःप्रभावस्तस्यतांगतिंफलमधिगंतुंवेदवादनशीलाब्रह्मर्षयोपिनैवप्रभवंति अभ्युपायानभ
गवद्ध्यानं दृष्ट्वापिकिंपुनर्नृपाः ४० राम ३५

503
1381

तपःप्रभावंतांचगतिंविशिनष्टिद्वाभ्यां गुरुदाराःपितृपत्नीसुरुचिस्तस्यावाक्शरैर्भिन्नेनहृदयेनवनंयातःसन अजितमपियोजि
गायवशीकृतवान ४१ तस्याधिरूढंतेनप्राप्तंपदंयोभुविक्षत्रबंधुःक्षत्रियोभवत्सःतमनुवर्षपूगैःसमूहैरपि आरोढमिच्छेद
पिकिंतस्यसंकल्पोप्यशक्यः दूरत आरोहणमित्यर्थः कथंभूतंपदं षट्पंचवर्षाणियस्यसः अल्पैरेव अहोभिर्वैकुंठंप्रसाद्ययत्त

यःपंचवर्षोगुरुदारवाक्शरैर्भिन्नेनयातोहृदयेनदूयता वनंमदादेशकरोजितंप्रभुंजिगायतद्भक्तगुणैःपराजितं
४१ कःक्षत्रबंधुर्भुवितस्याधिरूढमन्वारुरुक्षेदपिवर्षपूगैः षट्पंचवर्षोयदहोभिरल्पैःप्रसाद्यवैकुंठमवाप्यतत्प
दं ४२ मैत्रेयउवाच एतत्तेभिहितंसर्वंयत्पृष्टोहमिहत्वया ध्रुवस्योद्दामयशसश्चरितंसंमतंसतां ४३ धन्यंयशस्य
मायुष्यंपुण्यंस्वस्त्ययनंमहत स्वर्ग्यंध्रौव्यंसौमनस्यंप्रशस्यमघमर्षणं ४४ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रिय
चेष्टितं भवेद्भक्तिर्भगवतियया स्यात्क्लेशसंक्षयः ४५ महत्वमिच्छतांतीर्थंश्रोतुःशीलादयोगुणाः यत्रतेजस्तदिच्छू नां
मानोयत्रमनस्विनां ४६ प्रयतःकीर्तयेत्प्रातःसमवायेद्विजन्मनां सायंचपुण्यश्लोकस्यध्रुवस्यचरितंमहत ४७
पौर्णमास्यांसिनीवाल्यांद्वादश्यांश्रवणेतथा दिनक्षयेव्यतीपातेसंक्रमेर्कदिनेपिवा ४८ श्रावयेच्छ्रद्दधानानांतीर्थ
पादपदाश्रयः नेच्छंस्तत्रात्मनात्मानंसंतुष्टइतिसिध्यति ४९ ज्ञानमज्ञाततत्वाययोदद्यात्सत्पथेमृतं कृपालो
दीननाथस्यदेवास्तस्यानुगृह्णते ५० इदंमयातेभिहितंकुरूद्वह ध्रुवस्यविख्यातविशुद्धकर्मणः हित्वार्भकःक्रीडनकानि
मातुर्गृहंचविष्णुंशरणंयोजगाम ५१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे ध्रुवपदारोहणंनामद्वादशोध्यायः १२

स्यपदमवापतत ४२ उद्दामउत्कृष्टंयशोयस्य ४३ धनादेर्निमित्तं ध्रौव्यं ध्रुवस्थानप्रापकं प्रशस्यंप्रशंसार्हं अघमर्षणंपापना
शकं ४४ अच्युतप्रियस्य ध्रुवस्यचेष्टितंश्रुत्वायावर्तंततस्यभक्तिर्भवेत ४५ तीर्थंमहत्वप्राप्तिस्थानं यत्रंचगुणाभवंति ४६ स
मवायेसभायां ४७ ४८ नेच्छन निष्कामः तत्रश्रवणे आत्मनेवात्मानंप्रतिसंतुष्टोभवतीतिहेतोःसिद्धिंप्राप्नोति ४९ किंच स
त्पथेभगवन्मार्गे अमृतरूपंज्ञानंयोददात ५० ध्रुवस्यचरितमभिहितं मातुर्गृहंचहित्वा ५१ इतिश्रीभा०चतुर्थटीकायांद्वादशः

एवंपंचभिरध्यायैध्रुवचर्यानुवर्णिता अथैकादशभिश्चित्रंपृथुचारित्रमुच्यते १ तत्रत्रयोदशेवक्तुंपृथोर्जन्म ध्रुवान्वयं अंगोवेनापि
तापुत्रकीर्त्याद्भुतइतीर्यते २ अन्ववायेवंशे १ नारदेनप्रचेतसांवर्णिताःकथाःप्रष्टुंतन्महिमानमाहमन्यइति देवस्यदर्शनंयस्य ह
रेःपरिचर्याप्रकारःक्रियायोगःपंचरात्रोयेनप्रोक्तः २ स्वधर्मशीलैःप्रचेताभिः ३ ४ ध्रुवस्यवंशेजातइतिवक्तुंध्रुवस्यवंशमनु
क्रातिध्रुवस्येत्यादिना पितुःसार्वभौमश्रियंनैच्छत अधिराजासनंच ५ अनिच्छायांहेतुमाहसइतिचतुर्भिः ६ आत्मानंस्वरूपभू

सूतउवाच निशम्यकौषारविणोपवर्णितंध्रुवस्यवैकुंठपदाधिरोहणं प्ररूढभावोभगवत्यधोक्षजेप्रष्टुंपुनस्तंविदुरःप्र
चक्रमे १ विदुरउवाच केतेप्रचेतसोनामकस्यापत्यानिसुव्रत कस्यान्ववायेप्रख्याताःकुत्रवासत्रमासत २ मन्येमहा
भागवतंनारदंदेवदर्शनं येनप्रोक्तःक्रियायोगःपरिचर्याविधिर्हरेः २ स्वधर्मशीलैःपुरुषैर्भगवान्यज्ञपूरुषः इज्यमा
नोभक्तिमतानारदेनेडितःकिल ३ यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः मह्यंशुश्रूषवेब्रह्मन्कार्त्स्न्येनाचष्टुमर्ह
सि ४ मैत्रेयउवाच ध्रुवस्यचोत्कलःपुत्रःपितरिप्रस्थितेवनं सार्वभौमश्रियंनैच्छदधिराजासनंपितुः ५ सजन्मनो
पशांतात्मानिःसंगःसमदर्शनः ददर्शलोकेविततमात्मानंलोकमात्मनि ६ आत्मानंब्रह्मनिर्वाणंप्रत्यस्तमितविग्र
हं अवबोधरसैकात्म्यमानंदमनुसंगतं ७ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः स्वरूपमवरुंधानोनात्म
नोन्यतदैक्षत ८ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः लक्षितःपथिबालानांप्रशांतार्चिरिवानलः ९ मत्वातं
जडमुन्मत्तंकुलवृद्धाःसमंत्रिणः वत्सरंभूपतिंचक्रुर्यवीयांसंभ्रमेःसुतं १० श्रीरामजयजयराम नारायण

तंब्रह्मावरुंधानःआप्नुवनजानन आत्मनोनान्यत्तदैक्षतस्वयंतुसर्वस्मादन्यःसन कथंभूतंब्रह्मनिर्वाणंशांतंअवबोधरसेन
ऐकात्म्यंयस्य ७ कथंभूतःअव्यवच्छिन्नोयोयोगसएवाग्निस्तेनदग्धःकर्ममलआशयोयस्य ८ जडानामिवाकृतिर्यस्यत
थाभूतोलक्षितःअतन्मतिःनतेषामिवमतिर्यस्यसर्वज्ञत्वात प्रशांतानि अर्चींषिज्वालायस्य अनलस्यतद्वत्स्थितः ९ य ३६
वीयांसंउत्कलात्कनिष्ठं १०

505
1981

इष्टाप्रियाभार्या ११ १२ १३ सनिशीथःसर्वतेजसंचक्षुःसंज्ञंमनुंसुतमवापमनोर्महिषीनड्वलान्विरजान शुद्धान पुरुप्रमुखान्
द्वादशसुतानसूत १४ १५ १६ १७ अंगहेविदुर वागेववज्रंयेषां १८ मंथनेहेतुःअराजकइतिआद्यःपुरग्रामादीनांतेनरक्षि

स्वर्वीथीवत्सरस्येष्टाभार्यासूतषडात्मजान पुष्पार्णंतिग्मकेतुंचइषमूर्जंवसुंजयं ११ पुष्पार्णस्यप्रभाभार्यादोषा
द्वेचबभूवतुः प्रातर्मध्यंदिनंसायमितिह्यासन्प्रभासुताः १२ प्रदोषोनिशिथोव्युष्टइतिदोषासुताःस्त्रयः व्युष्टःसुतं
पुष्करिण्यांसर्वतेजसमादधे १३ सचक्षुःसुतमाकूत्यांपत्न्यांमनुमवापह मनोरसूतमहिषीविरजान्नड्वलासुतान १४
पुरुंकुत्संत्रितंद्युम्नंसत्यवंतमृतंव्रतं अग्निष्टोममतीरात्रंप्रद्युम्नंशिवमुल्मुकं १५ उल्मुकोजनयत्पुत्रान्पुष्करिण्यां
षडुत्तमान अंगंसुमनसंख्यातिंक्रतुमंगिरसंगयं १६ सुनीथांगस्ययापत्नीसुषुवेवेणमुल्वणं यद्दौःशील्यात्सराज
र्षिर्निर्विण्णोनिरगात्पुरात १७ यमंगशापुःकुपितावाग्वज्रामुनयःकिल गतासोस्तस्यभूयस्तेममंथुर्दक्षिणंकरं १८
अराजकेतदालोकेदस्युभिःपीडिताःप्रजाः जातोनारायणांशेनपृथुराद्यःक्षितीश्वरः १९ विदुरउवाच तस्यशील
निधेःसाधोर्ब्रह्मण्यस्यमहात्मनः राज्ञःकथमभूद्दुष्टाप्रजायद्विमनाययौ २० किंवांहोवेणमुद्दिश्यब्रह्मदंड
मयूयुजत दंडव्रतधरेराज्ञिमुनयोधर्मकोविदाः २१ नावध्येयःप्रजापालःप्रजाभिरघवानपि यदसौलोक
पालानांबिभर्त्योजःस्वतेजसा २२ एतदाख्याहिमेब्रह्मन्सुनीथात्मजचेष्टितं श्रद्दधानायभक्तायत्वंपरापर
विदांवरः २३ मैत्रे० अंगोश्वमेधंराजर्षिराजहारमहाक्रतुं नाजग्मुर्देवतास्तस्मिन आहूताब्रह्मवादिभिः २३

तत्वात १९ यतयस्याःप्रजाआहेतोःविमनाःसनययौ २० किंवअंहःअपराधंवेनमुद्दिश्य आलक्ष्य २१ यतोयमधर्मइत्या
ह नावध्येयःअवज्ञेयोपिनभवति २२ परापरविदांमध्येअतिश्रेष्ठः २३ नारायण वासुदेव हरे कृष्ण राम

अभावीपुत्रः काम्यकर्मणोबलाद्दापादितोनसुखायभवेदितिद्योतयन् अंगस्यपुत्रोत्पत्तिक्रममाह अंगइत्यादिना २४ २५ अ
यातयामानिअगतवीर्याणि २६ यज्ञेगृहीतमौनापिवार्बव्यसृजत प्रायुंक्त २८ आहूताः ग्रहान्सोमपात्राणिइहयज्ञेनगृह्णंति
२९ इहजन्मनितावतमनाकुइषदपिअवद्यंनष्ठितं कथंविज्ञातस्यमद्यएवप्रायश्चित्तेः क्षलनात किंतुप्राक्तनंएकमघमस्तिय

तमूचुर्विस्मितास्तातयजमानमथर्त्विजः हवींषिहूयमानानिनतेगृह्णंतिदेवताः २५ राजन्हवींष्यदुष्टानिश्रद्धया
सादितानिते छंदांस्ययातयामानियोजितानिधृतव्रतैः २६ नविदामेहदेवानांहेलनंवयमण्वपि यन्नगृह्णंति
भागान्स्वान्येदेवाः कर्मसाक्षिणः २७ मैत्रेयउवाच अंगोद्विजवचःश्रुत्वायजमानःसुदुर्मनाः तत्प्रष्टुंव्यसृज
द्वाचंसदस्यान्तदनुज्ञया २८ नागच्छंत्याहुतादेवानगृह्णंतिग्रहानिह सदसस्पतयाब्रूतकिमवद्यंकृतंमया २९
सदस्याऊचुः नरदेवेहभवतोनाघंतावन्मनाकृस्थितं अस्त्येकंप्राक्तनमघंयदिहेदृकत्वमप्रजः ३० तथासाधय
भद्रंते आत्मानंसुप्रजंनृप इष्टस्तेपुत्रकामायपुत्रंदास्यतियज्ञभुक् ३१ तथास्वभागधेयानिग्रहीष्यंतिदिवौ
कसः यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्वृतः ३२ तांस्तान्कामान्हरिर्दद्यातयान्यान्कामयतेजनः आराधि
तोयथैवैषतथापुंसांफलोदयः ३३ इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजायते पुरोडाशंनिरवपन्शिपिविष्टायविष्णवे ३४

यस्मातइदृग्गुणान्वितोपित्वंप्रजारहितः ३० अतोयथाथ्देवाहविर्गृह्णंतितथात्मानंसुप्रजंसाधय कथंसधनीयंतदाहुः
इष्टइति ३१ तथासतिस्वभागान्गृह्णिष्यंतियद्यतोहरिःसाक्षाद्धृतःस्यात् अतस्तेनसहसर्वेदेवाआगमिष्यंतीत्यर्थः ३२ न
न्वनितुच्छान्हरिःकथंदद्यात्तत्राहुः तांस्तानिति ३३ प्रजातयपुत्रोत्पत्तये शिपिषुपशुषुयज्ञरूपेणप्रविष्टाय तथाचश्रुतिः ३१
यज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतितिष्ठतीति ३४

507
1981

तस्मादितियोग्यतयाग्नेः ३५ पत्न्यैप्रादात ३६ पुमांसंसूतेअनेनेतितथातत्याश्यपत्युःसकाशात् गर्भमाधत्तेअप्रजासती ३७
माहामहंमृत्युंमृत्योर्हिपुत्रीसुनीथा ३८ मृगयुःलुब्धकःमन्ततंदृष्ट्वावनोसौआगच्छतीतिजनःसर्वोपिअरोदनुक्रोश ३९ आक्री
डेक्रीडास्थानेबालान्पशूनिवअमारयत ४० विवस्यदृष्ट्वा ४१ दुर्मनमस्तस्यकुपुत्रनिंदावाक्यान्याह प्रायेणतित्रिभिः अप्रजाःय

तस्मात्पुरुषउत्तस्थौहेममाल्यमलांबरः हिरण्मयेनपात्रेणसिद्धमादायपायसं ३५ सविप्रानुमतोराजागृहीत्वांज
लिनौदनं अवघ्रायमुदायुक्तःप्रादात्पत्न्यउदारधीः ३६ सातत्पुंसवनंराज्ञीप्राश्यवैपत्युरादधे गर्भंकालउपाव
त्तेकुमारंसुषुवेप्रजा ३७ सबालएवपुरुषोमातामहमनुव्रतः अधर्मांशोद्भवंमृत्युंतेनाभवदधार्मिकः ३८ सशरास
नमुद्यम्यमृगयुर्वनगोचरः हंत्यसाधुर्मृगान्दीनान्वेनोसावित्यरौज्जनः ३९ आक्रीडेक्रीडतोबालान्वयस्यानति
दारुणान् प्रसह्यनिरनुक्रोशः पशुमारममारयत ४० तंविचक्ष्यखलंपुत्रंशासनैर्विविधैर्नृपः यदानशासितुंकल्पो
भृशमासीत्सुदुर्मनाः ४१ प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिनः कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरं ४२ यत
पापीयसीकीर्तिरधर्मश्चमहान्नृणां यतोविरोधःसर्वेषांयतआधिरनंतकः ४३ कस्तंप्रजापदेशंवैमोहबंधन
मात्मनः पंडितोबहुमन्येतयदर्थाःक्लेशदागृहाः ४४ कदपत्यंवरंमन्येसदपत्याच्छुचांपदात् निर्विद्येतगृहान्म
र्त्योयत्क्लेशनिवहागृहाः ४५

तेरभ्यर्चितः तत्रहेतुःकुत्सितेरपत्यैःसंभृतंधारयितुमशक्यंदुःखंयेनविंदति ४२ सर्वेषांसर्वैःसह आधिर्मानसिव्यथा ४३
तंप्रजापदेशंपुत्रनाममात्रमपि आत्मनोमोहनबंधनं यदर्थाःयन्निमित्ताःक्लेशदागृहाःभवंति ४४ इदानींनिर्वेदहेतुत्वेन
कुत्सितमेवापत्यमभिनंदति कदपत्यमितिशुचांपदात्शोकानांस्थानात वरत्वेहेतुः निर्विद्येततितकुतःयद्यतःकदपत्यात्गृ
हाःक्लेशनिवहाःभवंति ४५

महतासुदयानांविष्हतीनांउदयोयस्मात्तस्मात्गृहात्गतः यावेनंसतेस्मतां ४६ प्रजाः पुरोहितादयश्चविचिक्युः अन्वेषितवंतः तं
तत्रैवसंतमपिनापश्यन्नितिदृष्टांतेनाह यथेति ४७ साश्रवोरुदंतः भर्तुर्विप्लुवंनाशंअदर्शनमित्यर्थः ४८ इतिश्रीभागवतेमहापु
राणेचतुर्थस्कंधेटीकायांत्रयोदशोध्यायः १३ चतुर्दशेतुदुःपुत्रभयादंगेगतेद्विजैः अभिषिक्तस्यवेनस्यदोषान्निर्वधउच्यते १

एवंसनिर्विण्णमनानृपोगृहान्निशीथउत्थायमहोदयोदयात् अलब्धनिद्रोनुपलक्षितोनृभिर्हित्वागतोवेनसुवंप्र
सूम्‌ ४६ विज्ञायनिर्विद्यगतंपतिंप्रजाः पुरोहितामात्यसुहृद्गणादयः विचिक्युरुर्व्यामतिशोककातरायथानिगूढं
पुरुषंकुयोगिनः ४७ अलक्षयंतः पदवींप्रजापतेर्हतोद्यमाः प्रत्युपसृत्यतेपुरीं ऋषीन्समेतानभिवंद्यसाश्रवोन्य
वेदयन्पौरवभर्तृविप्लवं ४८ इतिश्रीभागवतमहापुराणेचतुर्थस्कंधेत्रयोदशोध्यायः १३ मैत्रेयउवाच भृग्वा
दयस्तेमुनयोलोकानांक्षेमदर्शिनः गोप्तर्यसतिवैनृणांपश्यंतः पशुसाम्यतां १ वीरमातरमाहूयसुनीथांब्रह्मवा
दिनः प्रकृत्यसंमतंवेनमभ्यषिंचन्पतिंभुवः २ श्रुत्वानृपासनगतंवेनमत्युग्रशासनं निलिल्युर्दस्यवःसद्यःसर्प
त्रस्ताइवाखवः ३ स आरूढनृपस्थानउन्नद्धोष्टविभूतिभिः अवमेनेमहाभागान्स्तब्धःसंभावितःस्वतः ४ ए
वंमदांधउत्सिक्तोनिरंकुशइवद्विपः पर्यटन्रथमास्थायकंपयन्निवरोदसी ५ नयष्टव्यंनदातव्यंनहोतव्यंद्वि
जाःक्वचित् एवंन्यवारयन्धर्मंभेरीघोषेणसर्वतः ६

क्षेमदर्शिनःक्षेमचिंतकाः पशुसमानरूपतांपश्यंतः १ आमात्यादीनांप्रकृतीनांअसंमतमपिपाठांतरेप्रकृत्यास्वभावेनासं
मतं २ चोरालीनाबभूवुः ३ आरूढंनृपस्थानंराजासनंयेन अष्टविभूतिभिः लोकपालैश्वर्यैः ४ ५ ६ गोविंद ३८

509/1381

समंत्रिणःमीलिताःसंतः ७ मूलतश्चाग्रतश्चदीप्तप्रज्वलितेदारुणिकाष्टेतन्मध्यवर्तिनांपिपीलिकादीनांयथाउभयतोव्यसनं
एवंतस्करेभ्यःपालकाच्चइःखंप्राप्तमित्यर्थः ८ तदेवाहुः अराजकभयादिति अतदर्हणःराज्यानर्हः अस्माकमप्यनिष्टंजातमित्या
हुः अहेर्यथापयसाक्षीरेणपोषकंपोषकस्याप्यनर्थोविसर्तिपुष्यति ९ तदेवाहुः वेनइति निरूपितःनियुक्तोस्माभिः १० सांत्वयेम

वेनस्यावेस्यमुनयोदुर्वृत्तस्यविचेष्टितं विमृश्यलोकव्यसनंकृपयोचुःसमंत्रिणः ७ अहोउभयतःप्राप्तंलोकस्यव्य
सनंमहत् दारुण्युभयतोदीप्तइवतस्करपालयोः ८ अराजकभयादेषकृतोराजातदर्हणः ततोप्यासीद्भयंत्वद्यक
थंस्यात्स्वस्तिदेहिनां ९ अहेरिवपयःपोषःपोषकस्यानेप्यनर्थभृत् ९ वेनःप्रकृत्यैवखलःसुनीथागर्भसंभवः निरू
पितःप्रजापालःसजिघांसतिवैप्रजाः १० तथापिसांत्वयेमामुंनास्मांस्तत्पातकंस्पृशेत् तद्विद्वद्भिरसद्वृत्तोवेनोस्मा
भिःकृतोनृपः ११ सांत्वितोयदिनोवाक्यंनग्रहीष्यत्यधर्मकृत् लोकधिःकारसंदग्धंदहिष्यामःस्वतेजसा १२ एव
मध्यवसायैनंमुनयोगूढमन्यवः उपव्रज्याब्रुवन्वेनंसांत्वयित्वाचसामभिः १३ मुनयऊचुः नृपवर्यनिबोधैतद्यत्ते
विज्ञापयामभोः आयुःश्रीबलकीर्तीनांतवतातविवर्द्धनं १४ धर्मआचरितःपुंसांवाङ्मनःकायबुद्धिभिः लोका
न्विशोकान्वितरत्यथानंत्यमसंगिनां १५ सतेमाविनशेद्वीरप्रजानांक्षेमलक्षणः यस्मिन्विनष्टेनृपतिरैश्वर्या
दवरोहति १६ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यःप्रजानृपः रक्षन्यथाबलिंगृह्णन्निहप्रेत्यचमोदते १७ राम

उपपत्तिभिः प्रार्थयिष्यामः तस्यपातकं स्वस्यतत्पातकस्पर्शेहेतुः तत्पातकितंविद्वद्भिः ११ १२ गूढामन्युर्येषांसामभिःप्रियो
क्तिभिः १३ १४ निष्कामतामानंत्यंमोक्षमपि १५ माविनशेत्नविनश्यतु १६ असाधवोयेआमात्यास्तेभ्यः यथायथाशास्त्रं १७

भा० १८ १९ २० सर्वान्लोकानतत्पतीनमरांश्चतत्पापकानयज्ञांश्चसंगृह्णातीतियथातं विचित्रैर्द्रव्ययज्ञादिभिः भवायसमृद्धयेस्व च०
३९ देशानतद्वासिनोजनान अनुरोद्धुं अनुवर्तितुं २१ युष्मद्विषयेबद्दशोहरेः कला अंशाः सुरास्तेषांसुराणांहेलनमवज्ञां २२ बालिशाः

यस्यराष्ट्रेपुरेचैवभगवान्यज्ञपुरुषः इज्यतेस्वेन धर्मेणजनैर्वर्णाश्रमात्मकैः १८ तस्यराज्ञोमहाराजभगवान्भूतभा
वनः परितुष्यतिविश्वात्मातिष्ठतोनिजशासने १९ तस्मिंस्तुष्टेकिमप्राप्यंजगतामीश्वरेश्वरे लोकाःसपालाह्येत
स्मैहरंतिबलिमादृताः २० तंसर्वलोकामरयज्ञसंग्रहंत्रयीमयंद्रव्यमयंतपोमयं यज्ञैर्विचित्रैर्यजतोभवायतेराज
न्स्वदेशाननुरोद्धुमर्हसि २१ यज्ञेनयुष्मद्विषयेद्विजातिभिर्वितायमानेनसुराःकलाहरेः स्विष्टाःसतुष्टाःप्रदिशं
तिवांछितंयद्धेलनंनार्हसिवीरचेष्टितुं २२ वेनउवाच बालिशाबतयूयंवैअधर्मेधर्ममानिनः येवृत्तिदंपतिंहित्वा
जारंपतिमुपासते २३ अवजानंतियेमूढानृपरूपिणमीश्वरं नानुविंदंतितेभद्रमिहलोकेपरत्रच २४ कोयज्ञपु
रुषोनामयत्रवोभक्तिरीदृशी भर्तृस्नेहविदूराणांयथाकुयोषितां २५ विष्णुर्विरिंचोगिरिशइंद्रोवायुर्यमोरविः
पर्जन्योधनदःसोमःक्षितिरग्निरपांपतिः २६ एतेचान्येचविबुधाःप्रभवोवरशापयोः देहेभवंतिनृपतेःसर्वदे
वमयोनृपः २७ तस्मान्मांकर्मभिर्विप्रायजध्वंगतमत्सराः बलिंचमह्यंहरतमत्तोन्यःकोग्रभुक्पुमान् २८
इत्थंविपर्ययमतिःपापीयानुत्पथंगतः अनुनीयमानस्तद्याच्ञांनचक्रेभ्रष्टमंगलं २९ गं श्रीराम कृष्ण

अज्ञाः वृत्तिदंअनादिप्रदंमांहित्वा २३ भर्तृस्नेहोविदूरोयेषां २४ २५ २६ देहेभवंतिनृपतेः अतोनृपतिरेवेश्वरः इतरेत
दंशाइतिभावः २७ बलिंचकारादिकं अग्रभुक् आराध्यः २८ २९ श्रीकृष्ण गोपाल गोपीरमण गोकुलाधी० ३९

511
1951

तेनासत्कृताः भव्यायांयाच्ञायां ३० ३१ ३२ परिचक्षीतविनिंदते अशुभंवेनंविनाकृतघ्नतामाहुः यदनुग्रहविषयःसनईदृ
शमैश्वर्ययःप्राप्तः ३३ पूर्वंगूढमन्यवः इदानींतुरूढमन्यवः हुंकृतैः हुंकारः ३४ स्वाश्रमरपंप्रतिऋषिभिर्गतेगमनेकृतेसतिवि
द्यायोगेनमंत्रसहितयायुक्त्या ३५ पुंवद्भावः आर्षः सरस्वत्याः सलिले आप्लुताइत्यर्थः ३६ तदाउत्पातानवीक्ष्यप्रजाभद्रंनभवेत किमि

इतितसत्कृतास्तेनद्विजाःपंडितमानिनः भग्नायांभव्ययाच्ञायांतस्मैविदुरचुक्रुधुः ३० हन्यतांहन्यतामेषपापःप्रकृति
दारुणः जीवन्जगदसावाशुकुरुतेभस्मसात्ध्रुवं ३१ नायमर्हत्यसद्वृत्तोनरदेववरासनं योधियज्ञपतिंविष्णुंविनिंद
तिगतत्रपः ३२ कोवैनंपरिचक्षीतवेनमेकमृतेशुभं प्राप्तईदृशमैश्वर्यंयदनुग्रहभाजनः ३३ इत्थंव्यवसिताहंतु
मृषयोरूढमन्यवः निजघ्नुर्हुंकृतैर्वेनंहतमच्युतनिंदया ३४ ऋषिभिःस्वाश्रमपदंगतेपुत्रकलेवरं सुनीथापाल
यामासविद्यायोगेनशोचती ३५ एकदामुनयस्तेतुसरस्वत्सलिलाप्लुताः हुत्वाग्निंसत्कथाश्चक्रुरुपविष्टाःस
रित्तटे ३६ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् अप्यभद्रमनाथायादस्युभ्योनभवेद्भुवः ३७
एवंमृशत्सुऋषिषुधावतांसर्वतोदिशं पांसुःसमुत्थितोभूरिचोराणामभिलुंपतां ३८ तदुपद्रवमाज्ञायलोकस्य
वसुलुंपतां भर्तर्युपरतेतस्मिन्नन्योन्यंचजिघांसतां ३९ चोरप्रायंजनपदंहीनसत्वमराजकं लोकान्नावारयन्
शक्ताअपितद्दोषदर्शिनः ४० ब्राह्मणःसमदृक्शांतोदीनानांसमुपेक्षकः स्रवतेब्रह्मतस्यापिभिन्नभांडात्पयोयथा
४१

त्याहुश्च ३७ एवंविमृशंतःऋषयःस्थिताः तदाधावतांचोराणांभूरिपांसुःसमुत्थितः ३८ ततस्तदातेषांलोकस्यधनंलुंपतांजि
घांसतां ३९ तथाचोरप्रायंअराजकंहीनसत्वंचजनपदंअत्रायशक्ताअपिअवारणदोषदर्शिनोपिजनानांलुंपतोपिलोकान्ना
वारयन्नित्यन्वयः ४० शक्तानांक्षत्रियाणांअवारणेदोषइतिकिंवक्तव्यं समदृगपिशांतोपिब्राह्मणोपियदिदीनानांसमुपे
क्षाकोभवेत तर्हितस्यापिब्रह्मतपःस्रवति ४१

अतः उपेक्षादोषपरिहारायनांगस्येत्यादिविनिश्चित्यमहीपतेरूरुंतपसामममंथुरित्यन्वयः संस्थातुंनाशंगंतुं यद्वा ऋषयएवकुपतो
लोकाआवरयन कथंस्थिताः हुंकारेवचोराञ्निवारयितुंशक्ता अपितस्मिन्निवारणेतन्मरणादिदोषदर्शिनः नचोराम चौरोप
द्रुतदीनोपेक्षायांतपोहानिप्रसंगात नचान्यंतंनिवारकंराजनमकुर्वन् अंगवंशोच्छेदस्यानर्हत्वात अतोवेनस्यैवदेहंममंथुरिति
योज्यंबाहुकोवामनः ४२ ४३ तमेवाह काकवत्कृष्णःमहांतौहनूकपोलप्रांतौयस्यह्रस्वोहस्तपादोयस्य ४४ ४५ गिरिकान

नांगस्यवंशोराजर्षेरेषसंस्थातुमर्हसि अमोघवीर्याहिनृपावंशेस्मिन्केशवाश्रयाः ४२ विनिश्चित्यैवमृषयोविपन्न
स्यमहीपतेः ममंथुरूरुंतपसातत्रासीद्बाहुकोनरः ४३ काककृष्णोतिह्रस्वांगोह्रस्वबाहुर्महाहनुः ह्रस्वपान्निम्न
नासाग्रोरक्ताक्षस्ताम्रमूर्द्धजः ४४ तंतुतेवनतंदीनंकिंकरोमीतिवादिनं निषीदेत्यब्रुवंस्तातसनिषादस्ततोभ
वत ४५ तस्यवंशास्तुनैषादागिरिकाननगोचराः येनाहरज्जायमानोवेनकल्मषमुल्बणं ४६ इतिश्रीभाग
वतेमहापुराणेचतुर्थस्कंधेचतुर्दशोध्यायः १४ मैत्रेयउवाच अथतस्यपुनर्विप्रैरपुत्रस्यमहीपते बाहुभ्यां
मथ्यमानाभ्यांमिथुनंसमपद्यत १ तंदृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः ऊचुःपरस्परंतुष्टाविदित्वाभगव
त्कलां २ ऋषयऊचुः एषविष्णोर्भगवतःकलाभुवनपावनी इयंचलक्ष्म्याःसंभूतिःपुरुषस्यानुपायिनी ३
अयंतुप्रथमोराज्ञांपुमान्प्रथयितायशः पृथुर्नाममहाराजोभविष्यतिपृथुश्रवाः ४ इयंचदेवीसुदतीगु
णभूषणभूषणी अर्चिर्नामवरारोहापृथुमेवावरुंधती ५

नंचगोचरःआश्रयःनतुपुरप्रवेशायेषां तत्रहेतुः येनकारणेनासावहरेत्ततस्तस्यवंशास्तथाभूताः ४६ इतिश्रीभाग
वतेमहापुराणेटीकायांचतुर्थस्कंधेचतुर्दशोध्यायः ततःपंचदशेविप्रैर्मथनाद्वेनबाहुतः जातस्यतुपृथोरुक्तमभिषेका
र्हणादिकं १ २ किमुचुरित्यत आह एषइतिचतुर्भिः लक्ष्म्याःसंभूतिःकला ३ अन्वयःपुमानसतुमहाराजोभविष्यति ४
सुदतीशोभनदंतवतीगुणानांभूषणानांचभूषणी अवरुंधतीभर्तृत्वेनभजंतीभविष्यति ५ श्रीरामजयरामजयजयराम

513
1931

तत्रहेतुः एषइति लोकस्यरिरक्षयारिरक्षिषया ६ स्वःस्त्रियः अप्सरसोनृत्यंतीस्म ७ ८ देवःमहास्त्यआगत्यवेन्यस्यपृथोःचि
ह्नरेखात्मकंचक्रं ९ अप्रतिहतंरेखांतरेणभिन्नंचक्रंयस्यसःपरमेश्वरस्यांशः १० अभिषेचनिकानिअभिषेकसाधनानि ११ १२ १३
हेवीरवरासनं सलिलस्यस्रावोयस्मात १४ वालव्यजनेचामरे १५ ब्रह्ममयंवेदमयंवर्मकवचं तस्यपत्नीरूपाश्रीःश्रियंसंपदं १६

एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया इयंचतत्पराहिश्रीरनुजज्ञेनपायिनी ६ प्रशंसंतिस्मतांविप्रागंधर्वप्रवरा
जगुः मुमुचुःसुमनाधीराःसिद्धानृत्यंतिस्वःस्त्रियः ७ शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि तत्रसर्वउपाजग्मुर्दे
वर्षिपितृणांगणाः ८ ब्रह्माजगद्गुरुर्देवैःसहासृत्यसुरेश्वरैः वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ९ पादयोररविं
दंचतंवमनहरेःकलां यस्याप्रतिहतंचक्रंअंशःसपरमेष्ठिनः १० तस्याभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः आ
भिषेचनिकान्यस्मैआजह्रुःसर्वतोजनाः ११ सरित्समुद्रागिरयोनागागावःखगामृगाः द्यौःक्षितिःसर्वभूतानि
समाजह्रुरुपायनं १२ सोभिषिक्तोमहाराजसुवासाःसाध्वलंकृतः साध्वलंकृतपत्न्याचविरजाग्निरिवापरः १३
तस्मैजहारधनदोहैमंवीरवरासनं वरुणःसलिलस्रावमातपत्रंशशिप्रभं १४ वायुश्चवालव्यजनेधर्मःकीर्तिमयीं
स्रजं इंद्रःकीरीटमुकुटंदंडंसंयमनंयमः १५ ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमं हरिःसुदर्शनंचक्रंतत्पत्न्यव्याह
तांश्रियं १६ दशचंद्रमसिंरुद्रःशतचंद्रंतथांबिका सोमामृतमयानश्वानत्वष्टारूपाश्रयंरथं १७ अग्निराजगवंचा
पंसूर्योरश्मिमयानिषून् भूःपादुकेयोगमय्यौद्यौःपुष्पावलिमन्वहं १८ नाट्यंसुगीतंवादित्रमंतर्धानंचखेचराः
ऋषयश्चाशिषःसत्याःसमुद्रःशंखमात्मजं १९ सिंधवःपर्वतानद्योरथवीथीर्महात्मनः सूतोथमागधोवंदीतंस्तोतुमुप
तस्थिरे २०

दशचंद्राकाराणिबिंबानिकोशेयस्यतमसिंखड्गं शतचंद्रंचर्मरूपाश्रयंअतिसुंदरं १७ अजस्यगोश्चशृंगाभ्यांनिर्मितंचापंधनुःयो
गमय्यौपादस्पर्शमात्रेणाभिष्टदेशप्रापिके १८ वाद्यादिकौशलंखेचराः आत्मजंस्वप्रसवं १९ रथवीथीःरथमार्गान्तंस्तोतुमुपस्थिताः
२०

भा० ४१ स्तावकान्स्तोतुमुद्यतानभिप्रेत्यज्ञात्वा २१ लोकेस्पष्टगुणस्यसतोमेस्तवःस्यात् अधुनातुकिमाश्रयोमेस्तवोयोज्यतांअलोगि च०
रोधुनामयिवितथामाभूवन् यद्वा लोके अधुनाअस्पष्टगुणस्यमेकिमाश्रयःस्तवस्यात् अतएवक्रियमाणस्तवःमेमदन्वयस्य
योज्यतां नतुमे वितथाभिमानापत्तेरित्यर्थः २२ तस्मात्परोक्षेकालांतरेस्पष्टगुणेषुमत्सु अस्माकमुपश्रुतानियशांसिप्रतिस्तो
त्रं अलंअत्यर्थंकरिष्यथ हेअपीच्यवाचःमधुरगिरः सभ्यैःप्रेरितावयंत्वामेवस्तुमइतिचेत्तत्राह उत्तमश्लोकस्यगुणानुवादेका
र्येसतिजुगुप्सितमर्वाचीनंनस्तावयंति २३ ननुसंभावितैरेवगुणैरात्मानंजनस्तावयतीतिचेत्तत्राह महतांगुणानात्मनिसं

स्तावकांस्तानभिप्रेत्यपृथुर्वैन्यःप्रतापवान् मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत् २१ पृथुरुवाच भोःसूतहे
मागधसौम्यबंदिन्लोकेधुनास्पष्टगुणस्यमेयत् किमाश्रयोमेस्तवएषयोज्यतांमामय्यभूवन्वितथागिरोवः २२
तस्मात्परोक्षेस्मदुपाश्रितान्यलंकरिष्यथस्तोत्रमपीच्यवाचः सउत्तमश्लोकगुणानुवादेजुगुप्सितंनस्तवयंतिस
भ्याः २३ महद्गुणानात्मनिकर्तुमीशःकःस्तावकैःस्तावयतेसतोपि तेस्याभविष्यन्नितिविप्रलब्धोजनावहासंकुम
तिर्नवेद २४ प्रभवोह्यात्मनःस्तोत्रंजुगुप्संत्यपिविश्रुताः ह्रीमंतःपरमोदाराःपौरुषंवाविगर्हितं २५

पादयितुंशक्तोपि असतोगुणानसंभावनामात्रेणकःस्तावतेयद्वा आदावेवसतोपिवाकःस्तावयतेस्वतएवप्रख्यातिसिद्धेः अ
न्यस्तुमिथ्यागुणस्तुतिश्लाघीमंदइत्याह तइतियद्ययंशास्त्राभ्यासादिकं अकरिष्यत् तर्ह्यस्यतेविद्यादयोगुणाअभविष्य
न्इतिक्रियापत्याविप्रलब्धोजनानामवहासंनवेद २४ किंच प्रभवोविश्रुताअपिह्रीमंतोजुगुप्संतिवेतिदृष्टांतः यथा
अतिस्तुतौक्रियमाणायांविगर्हितंब्राह्मणवधादिपौरुषंनिंदंतितथाउचिताउचितामपिस्तुतिंनसहंतइत्यर्थः २५ गोविंद ४१

515
1381

वरीमभिरितिदीर्घआर्षभवित् प्रधानश्चायंनिर्देशःवरिष्ठःकर्मभिरविदितोस्मीत्यर्थः २६ इतिचतुर्थटीकायांपंचदशोध्यायः १५
षोडशेसर्वलोकेशैःसत्कृतंभावयत्युतं मुनिप्रयुक्ताःसूताद्याःस्तुवंतिस्मेतिवर्ण्यते १ गायकाःसूतादयः १ नालंनसमर्थाः
योभवान अवतारेषुयस्याधिक्यमाहुः वेनस्यांगाज्जातस्यतपौरुषाणिप्रति अवितर्कितयाब्रह्मादीनामपिधियाव्रमः कुतः
पुनर्वयंतद्वर्णनेसमर्थाभवेम २ अथापियथावद्वर्णयितुमशक्ताअपिकथामृतादृताःकथामृतमादराःमुनिभिरुपदेशोयोगव
लेनहृदिप्रकाशनंतदनतिक्रम्यवितन्महेविस्तारयामः ३ ४ तनोत्वदेहलोकपालानांतनूर्मूर्तिःकालकालेविभर्तियथाभागंपालनपा

वयंत्वविदितालोकसुतायाविवरीमभिः कर्मभिःकथमात्मानंगापयिष्यामिबालवत् २६ इतिश्रीभागवतेमहापुराणे
चतुर्थस्कंधेपंचदशोध्यायः १५ मैत्रेयउवाच इतिब्रुवाणंनृपतिंगायकामुनिचोदिताः तुष्टुवुस्तुष्टमनसास्तद्वा
गमृतसेवया १ स्तावकाऊचुः नालंवयंतेमहिमानुवर्णनेयोदेववर्योववतारमायया वेनांगजातस्यचपौरुषाणि
तेवाचस्पतीनामपिवभ्रमुर्धियः २ अथाप्युदारश्रवसःपृथोर्हरेःकलावतारस्यकथामृतादृताः यथोपदेशंमुनि
भिःप्रचोदिताःश्लाघ्यानिकर्माणिवयंवितन्महि ३ एषधर्मभृतांश्रेष्ठोलोकंधर्मेनुवर्तयन् गोप्तावधर्मसेवनांशा
स्तातत्परिपंथिनां ४ एषवैलोकपालानांबिभर्त्येकस्तनौतनूः काले कालेयथाभागंलोकयोरुभयोर्हितं ५ वसुका
लउपादत्तेकालेचायंविमुंचति समःसर्वेषुभूतेषुप्रतपन्सूर्यवद्विभुः ६ तितिक्षत्यक्रमंवैन्यउपर्याक्रमतामपि भू
तानांकरुणःशश्वदार्तानांक्षितिवृत्तिमान् ७ देववर्षत्यसौदेवोनरदेववपुर्हरिः कृच्छ्रप्राणाःप्रजाह्येपरक्षिष्यत्यंजसेंद्रवत्

षणानुरंजनादिकार्यानुसारेण यज्ञादिप्रवर्तनेनस्वर्गस्यहितं वृष्ट्यादिनाचभूर्लोकस्यहितंयथाभवतितथा ५ सूर्यादिवत्तधा
रणमेवाहाष्टाभिःवसुधनंकरादीनकालेआदत्ते दुर्भिक्षादिकालेमुंचतिच अष्टौमासानम्भःयोयथावसुजलंआदत्तेविमुंचति
चवर्षासुतद्वत् ६ मस्तकेपादेनाक्रमतामप्यार्तानांभूतानामतिक्रमंसहिष्यतेक्षितेर्वृत्तिःसर्वसहनंसाहजिर्यस्यास्तिसः ७ त
थादेव अवर्षत्येषःकृच्छ्रगताःप्राणायासांताःप्रजाःस्वयंवर्षित्वारक्षिष्यति अत्रहेतुःनरदेववपुर्हरिरिति ८ श्रीराम

भा० चं०
४२

वदनमेवामृतमूर्तिश्चंद्रस्तेनसानुरागोवलोकोयस्मिन् विशदस्मितंतेन चारुणा अत्रक्वचिद्वर्तमानसामीप्येवर्तमानवद्भविष्यत्प्रत्ययनिर्देशश्चाशंसायां भूतवच्चेतिद्रष्टव्यः ९ नव्यक्तंप्रवेशनिर्गमयोर्वर्त्ममार्गोयस्यनिगूढंनिष्पन्नः पूर्वमविज्ञातंकार्यंयस्यतच्चकार्यंगंभीरंकिमर्थमेतत्कृतमित्यन्यैरज्ञातोस्तिप्रायोविधत्त इतितथा उपगुप्तंसुरक्षितंवित्तंयस्य अनंतमाहात्म्यश्चासौगुणानामेकंधाम सविष्णुर्यस्मिन् अनंतमाहात्म्योपेतागुणाएकंधामस्थानंयस्येतिवा संवृत्तात्मासंयतमतिः समुद्रचरितेनेववरुणस्याप्येतेगुणाद्रष्टव्याः १० दुरासदः शत्रोर्मनसापिप्राप्तुं अशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः विदूरवान् पौरुषेणाभिभवितुमशक्यः वेन

आप्याययत्यसौलोकंवदनामृतमूर्तिना सानुरागावलोकेनविशदस्मितचारुणा ९ अव्यक्तवर्त्मैषनिगूढकार्योगंभीरवेगाउपगुप्तवित्तः अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेताइवसंवृतात्मा १० दुरासदोदुर्विषहआसन्नोपिविदूरवान् नैवाभिभवितुंशक्योवेनारण्युत्थितोनलः ११ अंतर्बहिश्चभूतानांपश्यन्कर्माणिचारणैः उदासीनइवाध्यक्षोवायुरात्मेवदेहिनां १२ नादंड्यंदंडयत्येषसुतमात्मद्विषामपि दंडयत्यात्मजमपिदंड्यंधर्मपथेस्थितः १३ अस्याप्रतिहतंचक्रंपृथोरामानसाचलात् वर्ततेभगवानर्कोयावत्तपतिगोगणैः १४ रंजयिष्यतियल्लोकमयमात्मविचेष्टितैः अथामुमाहूराजानंमनोरंजनकैःप्रजाः १५ गोपाल कृष्ण वासुदेव श्रीरामजयराम

एवारणिस्तस्याउत्थितः ११ चारणैर्गुप्तभृत्यैः पश्यन्नपिस्वस्तुतिनिंदादीन् उदासीनएववर्तिष्यते यथादेहिनामध्यक्षोधिकृतआत्मभूतोवायुस्तत्रात्मातद्वत् १२ आत्मद्विषसुतमितिपुनर्ग्रहणंस्वात्मजसाम्यार्थं धर्मपथेयमस्यवृत्तोस्थितः १३ चक्रंसेनाआज्ञावा रथस्यवाचक्रंमानसाचलमभिव्याप्यवर्ततेकिंपर्यंतमित्यतआह अर्कोरश्मिगणैर्यावत्तपतितावत् १४ यद्यस्माद्रंजयिष्यतिअथतस्मात्मनोरंजनहेतुभिर्गुराजानमाहुः मनोरंजकैरितिचेष्टितविशेषणंवा १५ राधाकृष्ण ४२

विश्रुताविक्रमायस्य गाथाः प्रबंधान् २७ उपगीयमानोमहाननुभावोयस्यसः २८ इतिचतुर्थस्कंधटीकायांषोडशोध्यायः ततः

भा० चं०
४३

ममप्रदेशलोकस्यदुःखंप्रशमयनप्रभुः ग्रस्तबीजांमहींहंतुंयत्नोभीत्यानयाक्रुतः १ छंदयामासतोषितवान् १ सत्यानमात्यान् पुरोधसः पुरोहितांश्चश्रेणीः तैलिकतांबूलिकादीन्पौरविशेषान् प्रकृतीः नियोगिनः २ दोहनंपात्रं ३ मध्यंयज्ञार्हं ४ सवि

नत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः श्राव्यस्यात्माश्रितागाथाः पृथुः पृथुपराक्रमः २७ दिशोविजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः सुरासुरेंद्रैरुपगीयमानमहानुभावोभवितापतिर्भुवः २८ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेषोडशोध्यायः १६ मैत्रेयउवाच एवंसभगवान्वैन्यः ख्यापितोगुणकर्मभिः छंदयामासतान्कामैः प्रतिपूज्याभिनंद्यच १ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः पौरान्जानपदान्श्रेणीःप्रकृतीःसमपूजयत् २ विदुरउवाच कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिं ३ प्रकृत्याविषमादेवीकृतातेनसमाकथं तस्यमेध्यंहयंदेवः कस्यहेतोरपाहरत् ४ सनत्कुमाराद्भगवतोब्रह्मन्ब्रह्मविदुत्तमात् लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपिकृष्णस्यभवान्भगवतः प्रभोः श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयं ६ भक्तायमेनुरक्तायतववाधोक्षजस्यच वक्तुमर्हसियोदुह्यद्वैन्यरूपेणगामिमां ७ सूतउवाच चोदितोविदुरेणैवंवासुदेवकथांप्रति प्रशस्यतंप्रीतमनाः मैत्रेयः प्रत्यभाषत ८ मैत्रेयउवाच यदाभिषिक्तःपृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाःपतिमभ्यवोचन् ९ श्रीरामचंद्रहरे

ज्ञानं अपरोक्षज्ञानसहितं ५ पूर्वदेहः पृथ्ववतारः तत्कथाश्रयं शोभनंश्रवोयस्य ६ अदुह्यत उदधवान् ८ जनतायास्त्वंपालइत्यामंत्रितोनियुक्तः तदानिरन्नेक्षितितलेसति क्षुधाक्षामाः क्षीणादेहायासांताः प्रजाएत्यपतिंपृथुं अब्रुवन् ९ राम ४३

भा० वदनमेवामृतमूर्तिश्चंद्रस्तेनसानुरागोवलोकोयस्मिन् विशदस्मितंतेनचारुणा अत्रक्वचिद्वर्तमानसामीप्येवर्तमानवदितिभूतनिर्दे च०
४२ शश्चाशंसायांभूतवच्चेतिद्रष्टव्यः ९ नव्यक्तंप्रवेशनिर्गमयोर्वर्त्ममार्गोयस्यानिगूढंनिष्पन्नः पूर्वमविज्ञातंकार्यंयस्यतच्चकार्यंगंभी
रंकिमर्थमेतत्कृतमित्यन्यैरज्ञातामितिप्रायंविधत्तइतितथा उपगुप्तंसुरक्षितंवित्तंयस्य अनंतमाहात्म्यश्चासौगुणानामेकंधाम
सविष्णुर्यस्मिन् अनंतमाहात्म्योपेतागुणाएकंधामस्थानंयस्येतिवा संवृतात्मासंयतमूर्तिः समुद्रचरितेनवरुणस्याप्येतेगु
णाद्रष्टव्याः १० दुरासदः शत्रोर्मनसापिप्राप्तुंअशक्यः दुर्विषहः शत्रुभिःसोढुमशक्यः विदूरवान्पौरुषेणाभिभवितुमशक्यः वन

आप्याययत्यसौलोकंवदनामृतमूर्तिना सानुरागावलोकेनविशदस्मितचारुणा ९ अव्यक्तवर्त्मैषनिगूढकार्योगंभी
रवेगाउपगुप्तवित्तः अनंतमाहात्म्यगुणैकधामा पृथुःप्रचेताइवसंवृतात्मा १० दुरासदोदुर्विषह आसन्नोपिविदूर
वान् नेवाभिभवितुंशक्योवेनारण्युत्थितोनलः ११ अंतर्बहिश्चभूतानांपश्यन्कर्माणिचारणैः उदासीनइवाध्य
क्षोवायुरात्मेवदेहिनां १२ नादंड्यंदंडयत्येषसुतमात्मद्विषामपि दंडयत्यात्मजमपिदंड्यंधर्मपथेस्थितः १३ अ
स्याप्रतिहतंचक्रंपृथोरामानसाचलात् वर्ततेभगवानर्कोयावत्तपतिगोगणैः १४ रंजयिष्यतियल्लोकमयमा
त्मविचेष्टितैः अथामुमाहूराजानंमनोरंजनकैःप्रजाः १५ गोपाल कृष्ण वासुदेव श्रीरामजयराम

एवारणिस्तस्याउत्थितः ११ चारणैर्गुप्तभृत्यैः पश्यन्नपिस्वस्तुतिनिंदादौन उदासीनएववर्तिष्यते यथादेहिनामध्यक्षोधिकृ
तआत्मभूतोवायुस्तत्रात्मातद्वत् १२ आत्मद्विषसुतमितिपुनर्ग्रहणंस्वात्मजसाम्यार्थं धर्मपथेयमस्यद्वतोस्थितः १३ च
क्रंसेनाआज्ञावा रथस्यवाचक्रंमानसाचलमभिव्याप्यवर्ततेकिंपर्यंतमित्यत आह अर्कोरश्मिगणैर्यावत्तपतितावत् १४ य
धस्माद्रंजयिष्यति अथतस्मात्मनोरंजनहेतुभिरमुंराजानमाहुः मनोरंजकैरिति चेष्टितविशेषणंवा १५ राधाकृष्ण ४२

511/1981

१६ मातरीवभक्तिर्जननंयस्यआत्मनोदेहस्याद्ध्वपत्न्यांप्रीतिमान् १७ नंदिसुखंवर्द्धयतीतितथा मुक्तसंगेषुप्रकृष्टःसंगोय
स्यदंडपाणिरित्यपराधानुपेक्षणमुच्यते नादंड्यमित्यत्रतुपक्षपाताभावउक्तः १८ १९ अयंत्वितितुशब्देननिरूपमत्वंदर्शयति
कोसावात्मातमाह यस्मिन्प्रतीतमपिनानात्वमर्थशून्यंपश्यंति २० आउदयाद्रेः तत्पर्यंतंगोप्तागोपायिष्यति तदर्थपर्यवस्यतेप

दृढव्रतःसत्यसंधोब्रह्मण्योवृद्धसेवकः शरण्यःसर्वभूतानामानंदादीनवत्सलः १६ मातृभक्तिःपरस्त्रीषुपत्न्यामर्द्धइ
वात्मनः प्रजासुपितृवत्स्निग्धःकिंकरोब्रह्मवादिनां १७ देहिनामात्मवत्प्रेष्ठःसुहृदानंदिवर्द्धनः मुक्तसंगप्रसंगो
यंदंडपाणिरसाधुषु १८ एषरोगधामर्हावीरागांसतीमाजसोषधीः समीकरिष्यतेचमांधतुकारत्याममंततः १९
अयंतुसाक्षाद्भगवांस्त्र्यधीशःकूटस्थआत्माकलयावतीर्णः यस्मिन्नविद्यारचितंनिरर्थकंपश्यंतिनानात्वमपिप्रती
तं २० अयंभुवोमंडलमोदयाद्रेर्गोप्तैकवीरोनरदेवनाथः आस्थायजैत्रंरथमात्तचापःपर्यष्यतेदक्षिणतोयथार्कः
२१ अस्मैनृपालाःकिलतत्रतत्रबलिंहरिष्यंतिसलोकपालाः मंस्यंतएतांस्त्रियआदिराजंचक्रायुधंतद्यशउद्धरंत्यः
२२ अयंमहींगांदुदुहेधिराजःप्रजापतिर्वृत्तिकरःप्रजानां योलीलयाद्रीन्स्वशरासकोट्याभिंदन्समांगामकरोद्यथे
द्रः २३ विस्फूर्जयन्नाजगवंधनुःस्वयंयदाचरत्क्ष्मामविषह्यमाजौ तदानिलिल्युर्दिशिदिश्यसंतोलांगूलमुद्यम्यय
थामृगेंद्रः २४ एषोश्वमेधाञ्छतमाजहारसरस्वतीप्रादुरभावियत्र आहार्षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्त
माने २५ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकं आराध्यभक्त्यालभतामलंतज्ज्ञानंयतोब्रह्मपरंविदंति २६

यरिष्यतिप्रदक्षिणीकरिष्यतीत्यर्थः २१ अस्मैतथाप्रदक्षिणंकुर्वतेमंस्यंतेज्ञास्यंति तस्ययशउद्धरंत्यःकीर्तयंत्यः २२ इंद्र
इवाद्रीनभिंदन् २३ लांगूलमुन्नमय्ययथामृगेंद्रश्चरतितथाधनुर्विस्फूर्जयन्यदाक्ष्मामचरत् २४ यत्रप्रादुरभाविप्रा
दुरभूत्कर्मकर्तरिचिण् २५ तत्रआहार्षीत्चकार २६ गोविंद नारायण वासुदेव मुकुंद कृष्णाच्युत

विश्रुताविक्रमायस्य गाथाः प्रबंधान् २७ उपगीयमानोमहाननुभावोयस्यसः २८ इतिचतुर्थस्कंधटीकायांषोडशोध्यायः ततः
समस्तलोकक्षुधंप्रशमयन्प्रभुः ग्रस्तबीजांमहींहंतुंयत्तोभीत्यातयास्तुतः १ छंदयामासतोषितवान् १ सत्यानमात्यान्
पुरोधसः पुरोहितांश्चश्रेणीः तैलिकतांबूलिकादीन्पौरविशेषान् प्रकृतीःनियोगिनः २ दोहनंपात्रं ३ मेध्यंयज्ञार्हं ४ सवि=

तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः श्राव्यस्तात्माश्रितागाथाःपृथुःपृथुपराक्रमः २७ दिशोविजित्याप्रतिरुद्ध
चक्रः स्वतेजसोत्पाटितलोकशल्यः सुरासुरेंद्रैरुपगीयमानमहानुभावोभवितापतिर्भुवः २८ इतिश्रीभागवतेम
हापुराणेचतुर्थस्कंधेषोडशोध्यायः १६ मैत्रेयउवाच एवंसभगवान्वैन्यःख्यापितोगुणकर्मभिः छंदयामास=
तान्कामैःप्रतिपूज्याभिनंद्यच १ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः पौरान्जानपदान्श्रेणीःप्रकृतीःस
मपूजयन् २ विदुरउवाच कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिं ३ प्रकृत्या
विषमादेवीकृतातेनसमाकथं तस्यमेध्यंहयंदेवःकस्यहेतोरपाहरत् ४ सनत्कुमाराद्भगवतोब्रह्मन्ब्रह्मविदुत्तमा
त् लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपिकृष्णस्यभवान्भगवतःप्रभोः श्रवःसुश्रवसःपुण्यं
पूर्वदेहकथाश्रयं ६ भक्तायमेनुरक्तायतवचाधोक्षजस्यच वक्तुमर्हसियोदुह्यद्वैन्यरूपेणगामिमां ७ सूतउवाच
चोदितोविदुरेणैवंवासुदेवकथांप्रति प्रशस्यतंप्रीतमनाःमैत्रेयःप्रत्यभाषत ८ मैत्रेयउवाच यदाभिषिक्तःपृथु
रंगविप्रैरामंत्रितोजनतायाश्चपालः प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाःपतिमित्यवोचन् ९ श्रीरामचंद्रहरे

ज्ञानंअपरोक्षज्ञानसहितं ५ पूर्वदेहःपृथ्ववतारःतत्कथाश्रयं शोभनंश्रवोयस्य ६ अदुह्यतदुग्धवान् ८ जनतायास्त्वंपा
लइत्यामंत्रितोनियुक्तः तदानिरन्नेक्षितितलेसति क्षुधाक्षामाःक्षीणादेहायासांताः प्रजाएत्यपतिंपृथुंअब्रुवन् ९ राम

519
1381

जाठरेणाग्निनाभितप्ताःयःसाधितःविप्रैर्मथनेनसंपादितः तंत्वंशरण्यंशरणंयाताः १० नतस्मान्नोस्माकंअन्नंरातवेदातुंईहतु
ईहतांयत्नंकरोतु उज्झितोर्जाःत्यक्तान्नाःसत्यःवार्तायाजीविकायाःपतिः ११ परिदेवितंविलापंनिमित्तंहेतुंअन्वपद्यतज्ञातवा
न् १२ पृथिव्याओषधिबीजानिग्रस्तानीतिव्यवसितोनिश्चितवान् १३ मृगयुनाद्रुताअनुगतामृगीवभीतासतीअपाद्रवत १४

प्रजाऊचुः वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः त्वामद्ययाताःशरणंशरण्यंयःसाधितोवृत्तिक
रःपतिर्नः १० तन्नोभवानीहतुरातवेन्नंक्षुधार्दितानांनरदेवदेव यावन्ननंक्षामहउज्झितोर्जावार्तापतिस्त्वंकिललो
कनाथः ११ मैत्रेयउवाच पृथुःप्रजानांकरुणंनिशम्यपरिदेवितं दीर्घंदध्यौकुरुश्रेष्ठनिमित्तंसोन्वपद्यत १२ इति
व्यवसितोबुध्याप्रगृहीतशरासनः संदधेविशिखंभूमेःक्रुद्धस्त्रिपुरहायथा १३ प्रवेपमानाधरणीनिशम्योदा
युधंपृथुं गौःसत्यपाद्रवद्भीतामृगीवमृगयुद्रुता १४ तामन्वधावत्तद्वैन्यःकुपितोत्यरुणेक्षणः शरंधनुषिसं
धायययत्रयत्रपलायते १५ सादिशोविदिशोदेवीरोदसीचांतरंतयोः धावंतीतत्रतत्रैनंददर्शानूद्यतायुधं १६ लो
कानाविंदतत्राणंवैन्यान्मृत्योरिवप्रजाः त्रस्तातदानिववृतेहृदयेनविदूयता १७ उवाचचमहाभागंधर्मज्ञापन्न
वत्सल त्राहिमांसर्वभूतानांपालनेवस्थितोभवान् १८ सत्वंजिघांससेकस्माद्दीनामकृतकिल्बिषां अहनिष्य
त्कथंयोषांधर्मज्ञइतियोमतः १९ प्रहरंतिनवैस्त्रीषुकृतागस्स्वपिजंतवः किंपुनस्त्वद्विधाराजन्करुणादीनवत्स
लाः २० मांविपाट्याजरान्नावंयत्रविश्वंप्रतिष्ठितं आत्मानंचप्रजाश्चेमाःकथमंभसिधास्यसि २१ पृथुरुवा
च वसुधेत्वांवधिष्यामिमच्छासनपराङ्मुखीं भागंबर्हिषियावृंक्तेनतनोषिचनोवसु २२ श्रीरामजयरामजय

पालयतेस्म रोदसीद्यावापृथिव्योतयोरंतरमंतरिक्षंअनुपृष्ठतउद्यतमायुधंयेनतं १६-१७ १८ योधर्मज्ञइतिमतःसभवान्
योषांमांकथमहनिष्यत्हनिष्यति १९ २० अजरांदृढां धास्यतिधारयिष्यसिबर्हिषियज्ञेयाभवतीदेवतारूपेणभागंवृंक्तेवसुधा
न्यादिरूपं २२

गोरूपेणतुयवसंतृणंजग्धिअनिपयस्तुनैवदोग्धिदुग्धंनस्रवति अत्राम्भिन्नपराधे २३ आत्मनिरेहरुद्धानि २४ मद्धेसर्वथान्नं
नस्यादितिचेदत आह अमूषांप्रजानां मेदसामांसेन २५ यदुक्तंयोषांकथंहनिष्यसीतितत्राह पुमानिति तस्यवधोवधएव
२६ यच्चोक्तंकथमंभामिधास्यसीतितत्राह तामिति तिलशः तिलप्रमाणान् खंडानीत्येवंभूतानामवरुध्नीता २७ मन्युमयी
मूर्तिंबिभ्रतंकृतांततुल्यत्वमुच्यतेनतुकृतांतस्यमन्युमयीमूर्तिमिति २८ शुद्धसत्वतनुंरेवमकस्मादतिदारुणां वीक्ष्यमाणाष्ट

यवसंदग्ध्यनुदिनंनैतद्दोग्ध्यौधसंपयः तस्यामेवंहिदुष्टायांदंडोनोत्रनस्येशते २३ त्वंखल्वोषधिबीजानिप्रा
कृसृष्टानिस्वयंभुवा नमुंचस्यात्मरुद्धानिमामवज्ञायमंदधीः २४ अमूषांक्षुत्परीतानामार्तानांपरिदेवितं
शमयिष्यामिमद्बाणैर्भिन्नायास्तवमेदसा २५ पुमान्योषिदुतक्लीबआत्मसंभावनोधमः भूतेषुनिरनु
क्रोशोनृपाणांतद्वधोवधः २६ त्वांस्तब्धांदुर्मदांनीत्वामायागांतिलशःशरैः आत्मयोगबलेनमा धारयि
ष्याम्यहंप्रजाः २७ एवंमन्युमयींमूर्तिंकृतांतमिवबिभ्रतं प्रणताप्रांजलिःप्राहमहीसंजातवेपथुः २८
धरोवाच नमःपरस्मैपुरुषायमाययाविन्यस्तनानातनवेगुणात्मने नमःस्वरूपानुभवेननिर्धूतद्रव्यक्रिया
कारकविभ्रमोर्मये २९ येनाहमात्मायतनंविनिर्मिताधात्रायतोयंगुणसर्गसंग्रहः सएवमांहंतुमुदायु
धःस्वराट्उपस्थितोन्यंशरणंकिमाश्रये ३०

ध्वीतुष्टावकरुणोक्तिभिः माययाविन्यस्तारचिताधानानाघोरादितनवोयेन गुणात्मनेगुणमयत्वेनप्रतीयमानायवस्तु
तस्तुनिर्धूतानिरस्ताःद्रव्यक्रियाकारकेषुअधिभूताध्यात्माधिदैवेषुविभ्रमोहंकारस्तंनिमित्ताऊर्मयोरागद्वेषादयश्चय
स्मिन्तस्मै २९ अहोसर्वजीवाश्रयत्वेनसृष्टांमांकथंहंतुंप्रवर्तसइत्याह येनधात्राआत्मनांजीवानांआयतनंअहंनिर्मिता
यतःयस्यांमयिगुणसर्गस्यचतुर्विधभूतग्रामस्यसंग्रहः धारण स्वराट्स्वतंत्रः ३० श्रीरामजयराम जयजयरामहरे

521/1881

सृष्टिसंहारकर्ताएकोहमेवेतिचेत्तथापिप्रजापालनेप्रवृत्तस्यमद्वधोनुचितमेवेत्याह एतदिति आत्माश्रययाजीवविषयिण्या
३१ अतोदुर्ज्ञेयमीश्वरचेष्टितमित्याह नूनमिति आकृतात्मभिः विक्षिप्तचित्तैः यईश्वरः स्वतंत्रः अकरोत्ब्रह्माणं परतइतिते
नब्रह्मणाचराचरमकारयत् यश्चस्वतएकः परतोमाययाअनेकः ३२ तस्मादचिंत्यशक्तयेकेवलंनमइत्याह सर्गादिजन्मस्थि
तिसंगंअस्यजगतः अनुरुणद्धि अनुवर्ततेकरोति द्रव्याणिमहाभूतानि क्रियाइंद्रियाणिकारकादेवाः चेतनाबुद्धिः आत्माहं
कारस्तैःस्वशक्तिरूपैःसमुन्नद्धाःसमुत्कटाःविरुद्धाःशक्तयोयस्य ३३ प्राणिनांधारणार्थंमांरसातलादुद्धृत्यदानीप्रजारक्ष
णप्रवृत्तस्यमद्वधोनयुक्तइतिसकरुणमाहद्वाभ्यां हेअजयःसृष्टवान् सएवभगवान्स्वनिर्मितचराचरंजगतसम्यक्स्थापयि

यएतदादावसृजच्चराचरंस्वमाययात्माश्रययाविितर्कया तयैवसोयंकिलगोप्तुमुद्यतःकथंनुमांधर्मपरोजिघांसति ३१
नूनंबतेशस्यसमीहितंजनैस्तन्मायया दुर्जययाकृतात्मभिः नलक्ष्यतेयस्त्वकरोदकारयद्योनेकएकःपरतश्चईश्वरः
३२ सर्गादियोस्यानुरुणद्धिशक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः तस्मैसमुन्नद्धविरुद्धशक्तयेनमःपरस्मैपुरुषायवेधसे
३३ अपामुपस्थेमयिनान्यवस्थिताःप्रजाभवानद्यरिरक्षिषुःकिल सवीरमूर्तिःसमभूद्धराधरोयोमांपयस्युग्रशरोजिघां
ससि ३४ सवैभवानात्मविनिर्मितंजगत्भूतेंद्रियांतःकरणात्मकंविभो संस्थापयिष्यन्नजमांरसातलादभ्युज्जहारांभ
सआदिसूकरः ३५ नूनंजनैरीहितमीश्वराणांअस्मद्विधैस्तद्गुणसर्गमायया नज्ञायतेमोहितचित्तवर्त्मभिस्तेभ्यो
नमोवीरयशस्करेभ्यः ३६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तदशोध्यायः १७ गोविंदनारायणवासुदे

तुंआदिसूकरःसन्मामभ्युज्जहार ३४ सएवधराधरोवराहः अद्यत्वयः अपामुपस्थेउपरिमयिनाविआधारभूतायां अवस्थिताः
प्रजाःरक्षितुमिच्छुःवीरमूर्तिःपृथुरूपःसमभूत्तयएवंभूतःसन्पयसिनिमित्तेमांजिघांसतीतिचित्रमित्यर्थः ३५ तस्मादीश्वर
चेष्टितंदुर्ज्ञेयमितिकेमुत्यन्यायेनोपसंहरति नूनमिति तस्येश्वरस्यैवगुणसर्गरूपयामाययामोहितंचित्तमेववर्त्मयेषांमोहि
तानिचित्तवर्त्मानियेषामितिवा तैर्जनैः ईश्वराणांहरिभक्तानामेवतावदीहितंनज्ञायतेकिंपुनस्तस्यपरमेश्वरस्य अतःपर
मेश्वरवतेभ्योपिनमएवकेवलं वीराणांजितेंद्रियाणांयशःकुर्वंतियेतेभ्यः यथावीराणांयशोवर्द्धततथाचेष्टतेनतुयथेष्टमि
तिभावः ३६ इतिचतुर्थेसप्तदशोध्यायः १७

भा० ४५ अष्टादशेमहीवाक्याद्दत्सपात्रादिभेदतः पृथ्व्यादिभिस्तुसादुग्धास्वंस्वंदुग्धमितीर्यते १ हेअभिभोप्रभोयद्वाभादेव अभिअभयं च०
यथाभवत्येवंमन्युंसंनियच्छ आवितंविज्ञापितंनमद्वाक्ये अनादरःकर्तव्यइत्याह बुधोहिसर्वतःसारमादत्ते २ मयिजीर्णाओष
धिरूपायेनगृहाणेतिवक्तुमुपायेनसर्वसिद्ध्यतिनान्यथेत्याह अस्मिन्निति त्रिभिः पुंसांश्रेयसःपुरुषार्थस्यप्रसिद्धयेअस्मिन्
लोकेकृष्यादयः अमुष्मिन्लोकेअग्निहोत्रादयःयोगाःउपायाःदृष्टाःप्रयुक्ताःअनुष्ठिताश्च ३ पूर्वैर्दर्शितान् अवरोअर्वा

इत्थंपृथुमभिष्टुत्यरुषाप्रस्फुरिताधरं पुनराहावनिर्भिताससंस्तभ्यात्मानमात्मना १ धरोवाच संनियच्छाभिभोम
न्युंनिबोधश्रावितंचमे सर्वतःसारमादत्तेयथामधुकरोबुधः २ अस्मिन्लोकेथवामुष्मिन्मुनिभिस्तत्वदर्शिभिः
दृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ३ तानातिष्ठतियःसम्यकउपायान्पूर्वदर्शितान् अवरःश्रद्धयोपे
तउपायानविंदतेंजसा ४ ताननादृत्ययोविद्वानर्थानारभतेस्वयं तस्यव्यभिचरंत्यर्थाआरब्धाश्चपुनःपुनः ५
पुरासृष्टाह्योषधयोब्रह्मणायाविशांपते भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ६ अपालितानादृताचभ
वद्भिर्लोकपालकैः चोरीभूतेथलोकेहंयज्ञार्थेग्रसमोषधीः ७ नूनंतावीरुधःक्षीणामयिकालेनभूयसा त
त्रयोगेनदृष्टेनभवानादातुमर्हति ८ वत्संकल्पयमेवीरयेनाहंवत्सलातव धोक्ष्येक्षीरमयान्कामाननुरूपंचदोहनं ९

चीनः ४ अविद्वानविद्वानपीतिवा व्यभिचरंतिनसिद्ध्यंति ५ सहेतुकमुपायमाह पुरेतिषड्भिः ६ भवद्भिरितिराजसामा
न्याभिप्रायेण अपालिताचोराद्यनिवारणात् अनादृताचयज्ञादिप्रवर्तनाभावात् यज्ञार्थेअग्रसंगिलितवती अन्यथा
धृतव्रतैर्भुक्ताःनप्रसोष्यंतेततश्चयज्ञास्यानसिद्ध्येरन्नितिभावः ७ क्षीणाःजीर्णाः ८ वत्संदोहनंपात्रंदोग्धारंचोपकल्प ४५
य धोक्ष्यप्रपूरयिष्यामि ९

523
1981

भूतानामीप्सितमन्नं ऊर्जस्वद्बलप्रदं १० अपगतोपिवर्षतौयथामेसर्वतोवर्तेत ११ १२ प्रसंगादर्थांतरमाह तथेति यथापृथुः
एवंसर्वत्रवाक्ये अपरेपिसारमादत्ते पृथुनाभाविताविशीकृता १३ प्रस्तुतमनुवर्णयति ततोन्यच ऋष्यादयः पंचदशडुडुहुः
देवीपृथ्वीवाङ्मनश्रवणेवेदग्रहणादिंद्रियाणांपात्रत्वं १४ सोममममृतं वीर्यंमनःशक्तिं ओजःइंद्रियशक्तिंबलंदेहशक्तिंच

दोग्धारंचमहाबाहोभूतानांभूतभावन अन्नमीप्सितमूर्जस्वद्भगवान्वांछतेयदि १० समांचकुरुमांराज
न्देववृष्टंयथापयः अपर्तावपिभद्रंतेउपावर्तेतमेविभो ११ इतिप्रियंहितंवाक्यंभुवआदायभूपतिः तथाच
कारसर्वत्रसारमाददतेबुधाः १२ वत्संकृत्वामनुंपाणावदुहत्सकलौषधीः तथापरेयथाकामांदुदुहुःपृथु
भाविताम् १३ ऋषयोदुदुहुर्देवीमिंद्रियेष्वथसत्तम वत्संबृहस्पतिंकृत्वापयश्छंदोमयंशुचि १४ कृत्वावत्संसुरग
णाइंद्रंसोमममदूदुहन् हिरण्मयेनपात्रेणवीर्यमोजोबलंपयः १५ दैतेयादानवावत्संप्रह्लादमसुरर्षभं विधाय
दुदुहुःक्षीरमयःपात्रेसुरासवं १६ गंधर्वाप्सरसोधुक्षन्पात्रेपद्ममयेपयः वत्संविश्वावसुंकृत्वागांधर्वंमधुसौ
भगं १७ वत्सेनपितरोर्यम्णाकव्यंक्षीरमधुक्षत आमपात्रेमहाभागश्रद्धयाश्राद्धदेवताः १८ प्रकल्प्यवत्संकपि
लंसिद्धाःसंकल्पनामयीं सिद्धिंनभसिविद्यांचयेचविद्याधरादयः १९ अन्येचमायिनोमायामंतर्धानाद्भुतात्म
नां मयंप्रकल्प्यवत्संतेदुदुहुर्धारणामयीं २० यक्षरक्षांसिभूतानिपिशाचाःपिशिताशनाः भूतेशवत्सादुदु
हुःकपालेक्षतजासवं २१

तदेवपयः १५ सुरांचासवंचतालादिमद्यं १६ मधुवाङ्माधुर्यंसौभगंसौंदर्यंतत्सहितं १७ कव्यंपितृणामन्नं आमपात्रेअ
पक्वेमृन्मयेअधुक्षतदुदुहुः १८ संकल्पनामयीं अणिमादिसिद्धिंयेनविद्याधरादयः तेचतमेववत्संसंकल्पनभस्येवपात्रेखे
चरत्वादिरूपांविद्यांदुदुहुः १९ अन्येचकिंपुरुषादयःअंतर्धानेनाद्भुतात्मनांसंबंधिनीमायांधारणामयींसंकल्पमात्रप्रभ
वां २० भूतेशोरुद्रःसएववत्सोयेषांते क्षतजंरुधिरंतदेवासवं २१ श्रीराम ७ ७ ७ ७ ७

अहयोनिःफणाःदंदशूकावृश्चिकादयः सर्पासफणाः तएवकद्रुसंततीयानागाःबिलपात्रेमुखे २२ यवसंतृणंगोवृषंरुद्रवाहनंवृ
षभंमृगेंद्रेणेत्युत्तरेणान्वयः २३ क्रव्यंमांसं चरंकीटादिअचरंफलादि २४ २५ अनुक्तसंग्रहार्थमाह सर्वेस्वजातीयोमुख्यस्तेनवत्से
न २६ उपसंहरति एवमिति स्वन्नं अभीष्टमन्नंतमेवक्षीरभेदंदुदुहुः दोहपात्रं २७ २८ धनुषोग्रेणगिरिशृंगाणिचूर्णयतराज

तथाहयोदंदशूकाःसर्पानागाश्चतक्षकं विधायवत्संदुदुहुर्बिलपात्रेविषंपयः २२ पशवोयवसंक्षीरंवत्संकृत्वाच
गोवृषं अरण्यपात्रेचाधुक्षन्मृगेंद्रेणचदंष्ट्रिणः २३ क्रव्यादाःप्राणिनःक्रव्यंदुदुहुःस्वकलेवरे सुपर्णवत्साविह
गाश्चरंचाचरमेवच २४ वटवत्सावनस्पत्यःपृथग्रसमयंपयः गिरयोहिमवद्वत्सानानाधातून्स्वसानुषु २५ स
र्वेस्वमुख्यवत्सेनस्वेस्वेपात्रेपृथक्पयः सर्वकामदुघांपृथ्वींदुदुहुःपृथुभाविताम् २६ एवंपृथ्वादयःपृथ्वीमन्ना
दाःस्वन्नमात्मनः दोहवत्सादिभेदेनक्षीरभेदंकुरूद्वह २७ ततोमहीपतिःप्रीतःसर्वकामदुघांपृथुः दुहितृत्वेच
कारेमांप्रेम्णादुहितृवत्सलः २८ चूर्णयन्स्वधनुःकोट्यागिरिकूटानिराजराट् भूमंडलमिदंवैन्यप्रायश्चक्रेसमं
विभुः २९ अथास्मिन्भगवान्वैन्यःप्रजानांवृत्तिदःपिता निवासान्कल्पयांचक्रेतत्रतत्रयथार्हतः ३० ग्रामा
न्पुरःपत्तनानिदुर्गाणिविविधानिच घोषान्व्रजांश्चशिबिरानाकरान्खेटखर्वटान् ३१ प्राक्पृथोरिहनै
वैषापुरग्रामादिकल्पना यथासुखंवसंतिस्मतत्रातत्राकुतोभयाः ३२ इतिभागवतेचतुर्थेअष्टादशोध्यायः

राट्राज्ञांराजा २९ ३० ग्रामाहाट्टादिशून्याःपुरोहट्टादिमत्यः ताएवमहत्यःपत्तनानिदुर्गाणिविविधानि यथोवाचबृहस्पति
औदकंपार्वतंवार्क्षमैरिणंधान्वनंतथेति घोषान् आभीराणांनिवासान् व्रजान्गवांनिवासान् शिबिरंसेनानिवेशस्थानंतत्
संहितान् आकरःस्वर्णादिस्थानानि खेटाःकर्षकग्रामाःखर्वटाःपर्वतप्रांतग्रामाःतांश्च ३१ ३२ इतिश्रीभागवतेमहापु
राणेचतुर्थस्कंधेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांटीकायांअष्टादशोध्यायः १८ श्रीरामजयरामजयजयराम

525
1981

क्रतुनविंशेश्वमेधांगहयापहरणात्स्पर्धाः इंद्रंहंतुंप्रवृत्तस्यधात्रावारणमुच्यते १ हयमेधशतेननिमित्तेन अदीक्षतदीक्षितोभूत श
ताश्वमेधसंकल्पमकरोदित्यर्थः ब्रह्मावर्तसरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते १ आत्मनःस्वस्यक
र्मअतिशेतइत्यतिशयं अभिप्रेत्यज्ञात्वा तदितितंपृथोर्यज्ञमहोत्सवंनममृषेनसेहे २ अतिशयमेवदर्शयतियत्रेतिसप्तभिःसाक्षा
दनुभूयतत्रलक्षणादृश्यत ३ ४ ५ सिद्धादयश्चतंहरिमन्वीयुरित्युत्तरेणान्वयः ६ धर्मदुघाहविर्दोग्ध्रीधेनुःसती ७ दुदुहुः

मैत्रेयउवाच अथादीक्षितराजासौहयमेधशतेनसः ब्रह्मावर्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती १ तदभिप्रेत्यभगवा
न्कर्मातिशयमात्मनः शतक्रतुर्नममृषेपृथोर्यज्ञमहोत्सवं २ यत्रयज्ञपतिःसाक्षाद्भगवान्हरिरीश्वरः अन्वभू
यतसर्वात्मासर्वलोकगुरुःप्रभो ३ अन्वितोब्रह्मशर्वाभ्यांलोकपालैःसहानुगैः उपगीयमानोगंधर्वैर्मुनिभिश्चा
प्सरोगणैः ४ सिद्धाविद्याधरादैत्यादानवागुह्यकादयः सुनंदनंदप्रमुखाःपार्षदप्रवराहरेः ५ कपिलोनारदो
दत्तोयोगेशाःसनकादयः तमन्वयुर्भागवतायेचतत्सेवनोत्सुकाः ६ यत्रधर्मदुघाभूमिःसर्वकामदुघासती
दोग्धिस्माभीप्सितानर्थान्यजमानस्यभारत ७ ऊहुःसर्वरसान्नद्यःक्षीरदध्यन्नगोरसं तरवोभूरिवर्ष्माणः
प्रासूयंतमधुच्युतः ८ सिंधवोरत्ननिकरान्गिरयोन्नंचतुर्विधं उपायनमुपाजह्रुःसर्वलोकाःसपालकाः
९ इतिचाधोक्षजेशस्यपृथोस्तुपरमोदयं असूयन्भगवानिंद्रःप्रतिघातमचीकरत १० श्रीरामायनमः

वहंतीस्मसर्वरसान्इक्षुद्राक्षादिरसान्क्षीरंदधिचअन्नंचपाकादिगोरसोघृतंतक्रंचतांश्च भूरिणिविस्तृतानिवर्ष्माणि
शरीराणियेषांतेफलानिप्रासूयंत मधुच्युतोमधुस्राविणःसंतः ८ चतुर्विधमन्नंभक्ष्यंभोज्यंचोष्यंलेह्यंच ९ अधोक्ष
जोईशोनाथोयस्य परमउदयोभिवृद्धिर्यस्मिन्तत्कर्म असूयन्असहमानःप्रतिघातंविघ्नंचकारेत्यर्थः १० श्रीराम

वैन्येयजुः पतिंविक्षुंयजमानेसतिस्पर्द्धमानइंद्रः तिरोहितःसन्अपहृतवान् ११ त्वरमाणंधावंतं आमुक्तः प्रतिमुक्तश्चपिनद्धश्चापि
नद्धवत् सन्नद्धोवर्मितः सज्जोइत्यमरः पाखंडवेषंकवचमिवगृहीतवंतमित्यर्थः अधर्मेधर्मविभ्रमः धर्मोयमिति भ्रांतिकरो
यस्तं १२ १३ नमुंचतिस्म १४ हंतवेहंतुं यज्ञहनंयज्ञंहतवंतं १५ १६ तस्मैहित्वातदृथमुत्सृज्य १७ विचक्ष्यदृष्ट्वा १८ उपसृज्यस

चरमेणाश्वमेधेनयजमानेयजुःपतिं वैन्येयज्ञपशुंस्पर्द्धन्अपोवाहतिरोहितः ११ तमत्रिर्भगवानैक्षत्त्वरमाणंविहा
यसा आमुक्तमिवपाखंडंयोधर्मेधर्मविभ्रमः १२ अत्रिणाचोदितोहंतुंपृथुपुत्रोमहारथः अन्वधावतसंक्रुद्धस्ति
ष्ठतिष्ठेतिचाब्रवीत् १३ तंतादृशाकृतिंवीक्ष्यमेनधर्मंशरीरिणं जटिलंभस्मनाछन्नंतस्मैबाणंनमुंचति १४ वधा
न्निवृत्तंतंभूयोहंतवेत्रिरचोदयत् विद्धियज्ञहनंतातमहेंद्रंविबुधाधमं १५ एवंवैन्यसुतःप्रोक्तस्त्वरमाणंविहा
यसा अन्वद्रवदभिक्रुद्धोरावणंगृध्रराडिव १६ तंसोश्वंरूपंचतद्धित्वातस्मादंतर्हितःस्वराट् वीरःस्वपशुमादा
यपितुर्यज्ञमुपेयिवान् १७ तत्तस्यचाद्भुतंकर्मविचक्ष्यपरमर्षयः नामधेयंददुस्तस्मैविजिताश्वइतिप्रभो १८
उपसृज्यतमस्तीव्रंजहाराश्वंपुनर्हरिः चषालयूपतश्छन्नोहिरण्यरशनंविभुः १९ अत्रिःसंदर्शयामासत्वरमाणं
विहायसा कपालखट्वांगधरंवीरोनैनमबाधत। २० अत्रिणाचोदितस्तस्मैविशिखंसंदधेरुषा सोश्वंरूपंच
हित्वातस्थावंतर्हितःस्वराट् २१ वीरश्चाश्वमुपादायपितृयज्ञमथाव्रजत् तदवद्यंहरेरूपंजगृहुर्ज्ञानदुर्ब
लाः २२ यानिरूपाणिजगृहेइंद्रोहयजिहीर्षया तानिपापस्यखंडानिलिंगंखंडमिहोच्यते २३ श्रीरामायनमः

च्छन्नेनछन्नःसन्चषालेयूपाग्रेनिक्षिप्तःकाष्ठकंटकः तद्युक्ताद्यूपात् हिरण्यनिर्मितारसनायस्यतं रसनायादृढत्वेनछेदा
शक्त्यारसनासहितमेवाद्धत्यमूपाग्रान्नीतवानविभुःसमर्थः १९ २० २१ अवद्यंनिंदितन्नूपंमंदप्रज्ञाजगृहुः २२ तदेवपाखं
डानामनिरुक्त्यादर्शयति यानीति पाखंडानिपापचिह्नानिखंडंचिह्नमितियतःबहुवचनेनान्यान्यपिगृहीतानिइत्युक्तं २३

524/1981

तत्प्रभृतिपाखंडमार्गाः प्रवृत्ताइत्याह एवमिति तेनगृहीतेषुविसृष्टेषु २४ नग्नाजैनाः रक्तपटाबौद्धाः आदिशब्देनकापालिका
दयः तेषुउपधर्मेषुधर्मोपमेषुधर्मएवायमिति सज्जतइतिद्वयोरन्वयः पेशलेषुआपाततोरमणीयेषुवाग्मिषुहेतुकिंचतुरेषु २५
२६ शक्रवधेअभिसंधितंकृताभिप्रायंप्रचोदितात्पशोर्विधादन्यस्यवधस्तवनयुज्यते २७ तद्वधंतुवयंकरिष्यामइत्याहुः वयंमि
हयज्ञनाशकं त्वत्कीर्त्यैवहंतप्रभंइंद्रंह्वयामहे कैः अयातयामैरगतवीर्यैः आह्वानमंत्रैःअनंतरंचतमहितंजुहुवामहोष्यामः

एवमिंद्रेहरत्यश्वंवैन्ययज्ञजिघांसया तद्गृहीतविसृष्टेषुपाखंडेषुमतिर्नृणां २४ धर्मइत्युपधर्मेषुनग्नरक्तपटादिषु
प्रायेणसज्जतेभ्रांत्यापेशलेषुचवाग्मिषु २५ तदभिज्ञायभगवान्पृथुःपृथुपराक्रमः इंद्रायकुपितोबाणमाद
त्तोद्यतकार्मुकः २६ तमृत्विजःशक्रवधायसंधितंविचक्ष्यदुःप्रेक्ष्यमसह्यरंहसा निवारयामासुरहोमहामतेन
युज्यतेचान्यवधःप्रचोदितात् २७ वयंमरुत्वंतमिहार्थनाशनंह्वयामहेत्वच्छ्रवसाहतत्विषं अयातयामोपग
तैरमंत्रयेप्रसह्यराजन्जुहवामतेहितं २८ इत्यामंत्र्यक्रतुपतिंविदुरास्यर्त्विजोरुषा स्रुग्घस्तान्जुह्वतोभ्ये
त्यस्वयंभूःप्रत्यषेधत २९ नवध्योभवतामिंद्रोयद्यज्ञोभगवत्तनुः यंजिघांसथयज्ञेनयस्येष्टाःस्तनवःसुराः
३० तदिदंपश्यतमहद्धर्मव्यतिकरंद्विजाः इंद्रेणानुष्ठितंराज्ञःकर्मैतद्विजिघांसता ३१ श्रीरामजयरामजय·

२८ अस्यपृथोःस्रुक्हस्तेयेषांतान् २९ यमिंद्रंयज्ञेनजिघांसथयज्ञेनेष्टाःसर्वेसुरास्तेस्यैनवः सइंद्रोभवतांवधार्होनभव
तियद्यस्मात्यज्ञोनामायमिंद्रोभगवत्तनुःअवतारः ततःसप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत सयामाद्यैःसुरगणैरपा
त्स्वायंभुवांतरमितिउक्तत्वात् ३० अतोबालियसातेनसख्यमेवकर्तव्यं अन्यथाभूयःपाखंडमेवस्रक्ष्यतिइत्याशयेना
ह तदिदमिंद्रेणानुष्ठितंमहद्दन्यायंपश्यतकिमित्यपेक्षायामाह धर्मस्यव्यतिकरंविपर्ययंपाखंडपंथं ३१ श्रीकृष्णाय·

भा०
४८

तर्हिकिमत्रयुक्तमित्यतआह पृथुकीर्तेरिति एकेनऊनंशतंयस्मिनताद्दशःक्रतुःक्रतुप्रयोगःपृथुर्भूयात पृथुरितिएकोनंश २०
तं क्रतवोयस्यतादृशोपिमहेंद्रात्पृथुकीर्तिर्भूयादित्यर्थः तदेवमृत्विजःप्रत्युक्त्वापृथुंप्रत्येवाह अलमिति ३२ आत्मनेवात्मने
महेंद्रायरोषंकर्तुंनार्हसि तत्रहेतुः उभावपीति ३३ तथापिक्रतुसमाप्तिमेव ध्यायंतंप्रत्याह अस्मिन्यज्ञविघ्नचिंतामास्मक्र
थाःयद्यस्मात्देवहृतंकार्यंध्यायतोमनःतुनिश्चितं अतिरुष्टंसत् अंधंतमोमोहंविशतिनतुशांतिंलभते ३४ अतएवक्रतु

पृथुकीर्तेःपृथुर्भूया तव्येकोनशतक्रतुः अलंतेक्रतुभिःस्विष्टैर्यद्भवान्मोक्षधर्मवित् ३२ नचात्मनेमहेंद्रायरोष
माहर्तुमर्हसि उभावपिहिभद्रंतउत्तमश्लोकविग्रहौ ३३ मास्मिन्महाराजकृथाःस्मचिंतांनिशामयास्मद्वच
आदृतात्मा यद्ध्यायतोदैवहतंनुकर्तुंमनोतिरुष्टंविशतेतमोंधं ३४ क्रतुर्विरमतामेषदेवेषुदुरवग्रहः धर्म
व्यतिकरोयत्रपाखंडैरिंद्रनिर्मितैः ३५ एभिरिंद्रोपसंसृष्टैःपाखंडैर्हारिभिर्जनं ह्रियमाणंविचक्ष्वैनंयस्तेयज्ञध्रुगश्वमुट् ३६
भवान्परित्रातुमिहावतीर्णोधर्मंजनानांसमयानुरूपं वेनापचारादवलुप्तमद्यतद्देहतोविष्णुकलासिवैन्य ३७राम

विरमतु नन्विंद्रःकिंननिवार्यते अतआह यतोदेवेषुदुराग्रहोभवतियत्रक्रतौ ३५ इंद्रदुराग्रहंकृतमनर्थंपश्येत्याह
एभिःइंद्रेणोपसृष्टैः अधिष्ठितैःहारिभिश्चित्ताकर्षकैः यइंद्रस्ते अश्वंमुष्णातीति अश्वमुट् तथायज्ञायद्रुह्यतीतितया
तेनसृष्टैः ३६ ततोममकिमितिचेत्तत्राह भवानितिद्वाभ्यां सांख्ययोगादिनानासिद्धांतानुरूपंधर्मंवेनस्यान्यायला
तलुप्तंपरित्रातुंतद्देहाद्विष्णोःकलेवरमवतीर्णोसि ३७ ॥ ॥ श्रीराम ॥ ॥ ॥ ४८

529
1981

अस्यविश्वस्योद्भवंविचार्ययैरुत्पादितोसितेषांविश्वसृजांसंकल्पनांसंकल्पंपिपीष्टहिआर्षःप्रयोगःपूरयेत्यर्थःप्रचंडोयःपाखंडमा
र्गःसचैंद्रींमायांउपधर्मजननींतांजहि ३८ तथाकृत्वायज्ञाग्रहंहित्वावात्सल्यंस्नेहंचकृत्वाइंद्रेणसंधानंचकृतवान् ३९ कृतम
वभृथस्नानंयेनतस्मैतुष्टानांवाक्यंत्वयति ४० ४१ ४२ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधटीकायामेकोनविंशः

सत्वंविमृश्यास्यभवंप्रजापतेःसंकल्पनांविश्वसृजांपिपीपृहि ऐंद्रीचमायामुपधर्ममातरंप्रचंडपाखंडपथंप्रभो
जहि ३८ मैत्रेयउवाच इत्थंसलोकगुरुणासमादिष्टोविशांपति तथाचकृतवान्सख्यंमघोनापिचसंदधे ३९ कृता
वभृथस्नानायपृथवेभूरिकर्मणे वरान्ददुस्तेवरदायेतद्बर्हिषितर्पिताः ४० विप्राःसत्याशिषस्तुष्टाःश्रद्धयालब्धदक्षि
णाःआशिषोयुयुजुःक्षत्तरादिराजायचादृताः ४१ त्वयाहूतामहाबाहोसर्वएवसमागताः पूजितादानमानाभ्यां
पितृदेवर्षिमानवाः ४२ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेएकोनविंशोध्यायः १९ मैत्रेयउवाच भगवा
नपिवैकुंठःसाकंमघवताविभुः यज्ञैर्यज्ञपतिःस्तुष्टोयज्ञभुक्तमभाषत १ श्रीभगवानुवाच एषतेकारषीद्भं
गंहयमेधशतस्यह क्षमापयतआत्मानममुष्यक्षंतुमर्हसि २ सुधियःसाधवोलोकेनरदेवनरोत्तमाः नाभिद्रुह्यं
तिभूतेभ्योयर्हिनात्माकलेवरं ३ पुरुषायदिमुह्यंतित्वादृशादेवमायया श्रमएवपरंजातोदीर्घयावृद्धसेवया
४ अतःकायमिमंविद्वानविद्याकामकर्मभिः आरब्धमितिनैवास्मिन्प्रतिबुद्धोनुषज्जते ५ श्रीरामायन॰

विंशेतुविष्णुनासाक्षात्पृथोर्यज्ञेनुशासनं वरदानप्रसंगेनप्रीतिरन्योन्यमीर्यते १मघवतासाकंइंद्रेणसहवर्तमानः १आ
त्मानंत्वांक्षमांकारयतामुष्य २ तर्हियस्मात्कलेवरमात्मानंभवति अतस्तदभिमानेनभूतानिनाभिद्रुह्यंति ३ ४अ
विद्यास्वरूपाजानंततःकामःततःकर्मतैरारब्धमितिविद्वान् अतएवप्रतिबुद्धःआत्मज्ञःअस्मिन्नेवानुषज्जते ५

तथापिपुत्रादिममत्वेनक्षतद्गोहोभवेत्तत्राह असंसक्तइति ६ प्रतिबोधकमंविवृण्वन्देहेनुषंगाभावमाह एकइतिद्वाभ्यां अ
सावात्मा आत्मनोदेहात्परोभिन्नः तत्रनवधावैलक्षण्येनभेदंसाधयति एकइतिनवभिःपदैः देहोहिबालयुवादिभेदादनेकोमलि
नश्वजडश्वसगुणश्वस्वकारणभूतगुणाश्रितश्वपरिछिन्नश्वगृहादिभिरावृतश्वदृश्यश्वसात्माच आत्मातुनैवं अतोभिन्नः ७ आत्मस्थं
देहस्थंसदेहस्थोपितद्विकारैर्नलिप्यतेयतःयःमयिस्थितः ८ इयमवस्थाकस्योत्पद्यतइत्यपेक्षायामाह यःस्वधर्मेणेतिचतुर्भिः ९ यर्हि

असंसक्तःशरीरेस्मिन्नमुनोत्पादितेगृहे अपत्येद्रविणेवापिकःकुर्यान्ममतांबुधः ६ एकःशुद्धःस्वयंज्योतिर्निर्गुणोसौगुणा
श्रयः सर्वगोनावृतःसाक्षीनिरात्माचात्मनःपरः ७ यएवंसंतमात्मानमात्मस्थंवेदपूरुषः नाज्यतेप्राकृतस्थोपितद्गुणैः
समयिस्थितः ८ यःस्वधर्मेणमांनित्यंनिराशीःश्रद्धयान्वितः भजतेशनकैस्तस्यमनोराजन्प्रसीदति ९ परित्यक्तगु
णाःसम्यक्दर्शनोविशदाशयः शांतिमेसमवस्थानंब्रह्मकैवल्यमश्नुते १० उदासीनमिवाध्यक्षंद्रव्यज्ञानक्रियात्मनां
कूटस्थमिममात्मानंयोवेदाप्नोतिसोभवं ११ भिन्नस्यलिंगस्यगुणप्रवाहोद्रव्यक्रियाकारकचेतनात्मकः
दृष्टासुसंपत्सुविपत्सुसूरयोनविक्रियंतेमयिबद्धसौहृदाः १२ श्रीराम ७ ७ ७ ७ राम

विशदाशयःप्रसन्नमनाः तदापरित्यक्तगुणःसन्सम्यक्दर्शनोभूत्वाशांतिंअश्नुते शांतिमेवाह ममसम्यक औदासिन्येन
समवस्थानमेवब्रह्मतदेवकैवल्यमश्नुते १० सम्यक्दर्शनमेवाह उदासीनमिवात्मानंद्रव्यज्ञानक्रियात्मनांदेहज्ञानकर्मेंद्रि
यमनसां अध्यक्षमिवस्थितमात्मानंयोवेद ११ संसारिणःकथंकूटस्थत्वंअतआह भिंनस्यलिंगस्यदेहस्यगुणप्रवाहःसंसारः
भिन्नत्वेहेतुः द्रव्याद्यात्मकस्य तत्रचेतनाचिदाभासः अतोदृष्टासुप्राप्तासुहर्षशोकादिभिर्नविक्रियंते १२ श्रीकृष्णाभ्यांनमः

521
1981

त्वंचसूरिःअतःसुखेदुःखेचसमःसन् समानाउत्तममध्यमाधमायस्य जितानींद्रियाणिआशयश्वयेनसत्वं अखिललोकरक्षणंविधत्स्व
ननुकथमेकेनमयातत्कर्तुंशक्यंतत्राह मयाश्वरेणउपक्लृप्ताःसंपादिताः येखिललोकाअमात्यादयस्तैःसंयुतः १३ ननुरक्षणंदंडादि
सापेक्ष्यं अतस्तयोन्यद्वापुण्यंकरिष्यामीतिचेदत आह श्रेयइति यद्यस्मात्सांपरायेपरलोकप्रजाभिःकृतात्सुकृतात्षष्ठमंशंहर्ता
हरिष्यतीति अरक्षणेदोषमाह अन्यथाप्रजाभिःहृतंपुण्यंयस्यसःप्रजानामघंअत्तिपापंभुंक्ते अन्यथेत्यस्यविवरणंकरहारःसन्
अरक्षिताचेत् १४ एवंचमोक्षोप्यनायासेनभविष्यतीत्याह द्विजाग्र्याणामनुमतश्वासौअनुवृत्तश्वपरंपराप्राप्तोयोधर्मःसए

समःसमानोत्तममध्यमाधमःसुखेचदुःखेचजितेंद्रियाशयः मयोपक्लृप्ताखिललोकसंयुतोविधत्स्ववीराखिल
लोकरक्षणं १३ श्रेयःप्रजापालनमेवराज्ञोयत्सांपरायेसुकृतात्षष्ठमंशं हर्तान्यथाहृतपुण्यःप्रजानामरक्षिता
करहारोघमत्ति १४ एवंद्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोन्यतमोवितास्याः ह्रस्वेनकालेनगृहोपयातान्द्रष्टासि
सिद्धाननुरक्तलोकः १५ वरंचमत्कंचनमानवेंद्रवृणीष्वतेहंगुणशीलयंत्रितः नाहंमखैर्वैसुलभस्तपोभिर्योगेनवा
यत्समचित्तवर्ती १६ मैत्रेयउवाच सइत्थंलोकगुरुणाविष्वक्सेनेनविश्वजित् अनुशासितआदेशंशिरसाजगृहेहरेः
१७

वप्रधानं अर्थकामौतुप्रासंगिकौयस्य अन्यतमःअतिशयेनान्यःधर्मादिष्वनासक्तइत्यर्थः एकपद्यपाठेधर्मप्रधानोअन्य
तमोअर्थकामौयस्येत्यर्थः अस्याःपृथिव्याः अवितासन्अल्पेनकालेनगृहागतान्सनकादिकान्द्रक्ष्यसि अनुरक्तालोका
यस्मिन्सः १५ मत्मत्तःसकाशात्कंचिद्वरंवृणीष्व गुणाःशमादयःशीलंमत्सरत्वादिस्वभावःतैरहंयंत्रितोवशीकृतःत
दृहितेस्तुपश्वादिभिर्नाहंसुलभःयतःसमचित्तंयेषांतेषुवर्तितुंशीलंयस्यसोहं १६ १७ श्रीरामजयरामजयजयराम

भा० ५० समापयितुंपादयोः स्पर्शनंस्वेनकर्मणा। अश्वापहरेणव्रीडितंप्रेम्णापरिष्वज्य १८ भगवान्प्रस्थापनाभिमुखोप्यनुग्रहेणविलंबितः सन् च०
नप्रतस्थेप्रयाणंनकृतवानितिद्वयोरन्वयः कथंभूतः उपहृतं अर्पितं अर्हणं यस्मै समुज्झिहानया समुद्गच्छंत्या वर्द्धमानयाभक्त्यागृ
हीतेचरणांबुजेयस्य १९ पद्मपलाशवदक्षीणियस्यतथाभूतः सन् २० एवंपृथुंपश्यन्भगवतस्तत्कृपातिरेकमुक्त्वातस्यभक्त्युद्रेक
माह सइतिद्वाभ्यां बाष्पविक्लवत्वेनतूष्णीमवस्थितः सन् अमुंहरिंहृदोपगूह्य अधात धृतवान् २१ अतद्भयोर्दृशोर्गोचरंविषय

स्पर्शतंपादयोःप्रेम्णाव्रीडितंस्वेनकर्मणा शतक्रतुंपरिष्वज्यविद्वेषंविससर्जह १८ भगवानपिविश्वात्माप्पृथुनोपाहृता
र्हणः समुज्झिहानयाभक्त्यागृहीतचरणांबुजः १९ प्रस्थानाभिमुखोप्येनमनुग्रहविलंबितः पश्यन्पद्मपलाशा
क्षोनप्रतस्थेसुहृत्सतां २० स आदिराजोरचितांजलिर्हरिंविलोकितुंनाशकदश्रुलोचनः नकिंचनोवाचसबाष्पवि
क्लवोहृदोपगुह्यामुमधादवस्थितः २१ अथावमृज्याश्रुकलाविलोकयन्नतृप्तदृग्गोचरमाहपूरुषं पदास्पृशंतंक्षि
तिमंसउन्नतेविन्यस्तहस्ताग्रमुरंगविद्विषः २२ पृथुरुवाच वरान्विभोत्वद्वरदेश्वराद्बुधः कथंवृणीतेगुणविक्रि
यात्मनां येनारकाणामपिसंतिदेहिनांतानीशकैवल्यपतेवृणेनच २३ श्रीरामजयरामजयजयरामकृष्ण

भूतं पदाक्षितिंस्पृशंतमित्यस्यायंभावः नखलुदेवाः पदाभुवंस्पृशंति अतः कृपापारवश्यात् नूनंहरिरात्मानंविस्मृतवान् अ
तएवस्खलनपरिहारायेवगरुडस्योन्नतेस्कंधेविन्यस्तहस्ताग्रंयेनतं २२ वरंवृणीष्वेतियदुक्तंतदसहमान आह हेविभोवर
दादीनांब्रह्मादीनामीश्वरात्वरप्रदात्तव त्वत्तः सकाशात्बुधः कथंवरान्वृणीतेकीदृशान् गुणैर्विक्रियतइतिगुणविक्रि
यतोहंकारः सएवात्मायेषांब्रह्मादीनांसंबंधिनः देहाभिमानिनांभोग्यानितिवातथाचेद्बुधएवनभवतीत्यर्थः जुगुप्सित
त्वादपीत्याह यइति बुधइवाहमपिनवृणइतिसमुच्चयायचकारः २३ श्रीरामजयरामजयजयरामकृष्णरामाभ्यांनमः ५०

533/1981

कैवल्यपतइतिसंबोधनात्तर्हिकैवल्यंवरिष्यामीतिमाशंकीत्याह नेति महत्तमानामंतर्हृदयात्मुखद्वारेणनिर्गतो भगवत्पदांभोजमकरंद
यशःश्रवणादिसुखंयस्मिन्नास्तितादृशंचेत्कैवल्यंतर्हितत्क्वचित्कदाचिदपिनकामये तर्हिकिंकाममतआह यशःश्रवणायकर्णाना
मयुतंविधत्स्व ननुकोप्येवंनवृतवान्किमन्यत्चिंतयेत्याह ममएषवरइति २४ ननुतर्हिकैवल्याभावेरागद्वेषाद्याकुलानांभक्तिसुख
मपिनस्यादित्याशंक्याह सइति पदांभोजसुधायाःकणालेशःतत्संबंधीयोनिलः सएवदूरादपिकिंचिद्यशःश्रवणमात्रमित्यर्थः वि
स्मृतंतत्त्ववर्त्म यैः कुयोगिभिस्तेषामपिपुनःस्मृतिंआत्मज्ञानंवितरति अतोनखलुभक्तानांरागादिसंभवः अतोनोस्माकंमाराया

नकामयेनाथतदप्यहंक्वचिन्नयत्रयुष्मच्चरणांबुजासवः महत्तमांतर्हृदयान्मुखच्युतोविधत्स्वकर्णायुतमेषमेवरः २४
सउत्तमश्लोकमहन्मुखच्युतोभवत्पदांभोजसुधाकणानिलः स्मृतिंपुनर्विस्मिततत्त्ववर्त्मनांकुयोगिनांनोवितरत्यलं
वरैः २५ यशःशिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेसकृत् कथंगुणज्ञोविरमेद्विनापशुंश्रीर्यत्प्रवव्रेगुण
संग्रहेच्छया २६ अथाभजेत्वाखिलपूरुषोत्तमंगुणालयंपद्मकरेवलालसः अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतत्व
च्चरणैकतानयोः २७

हिणामन्यैर्वरैरलं भक्तावेवमोक्षादिसर्वसुखांतर्भावादित्यर्थः २५ ननुभक्तिर्मुक्तिमुक्तिफलैवअतः फलंविहायसाधनेभवतः कोय
माग्रहइत्याशंक्याह हेसुश्रवः मंगलकीर्तेतेशिवंयशः सतांसंगमेयःसकृदपियदृच्छयापिश्रुतिगुणज्ञश्चेत्सपशुंविनान्यःकथं
विरमेत् गुणातिशयंसूचयति श्रीर्यद्यशएवप्रकर्षेणवृतवती गुणानांसर्वपुरुषार्थानांसंग्रहः स्वस्मिन्समाहारस्तदिच्छया २६
अतोलक्ष्मीरिवान्यवरत्यागेनत्वामेवाहंभजइत्याह अथेति लालसउत्सुकः सन् कर्मणिक्रियमाणेयथेंद्रियेः सहकलिः एवंभ
क्तानामपिकिंलक्ष्म्यासहकलिस्यादिति वितर्कयति एकस्मिन्पत्यौस्पर्द्धमानयोरावयोरपिकिंकलिर्नस्यादितिकाकावितर्कः
ननुपर्यायेणसेवायांनस्यात् नेवंकृतस्त्वच्चरणयोरेवएकस्तातःमनोविस्तारः ययोस्तयोः २७ श्रीरामजयरामजयजयराम

भवतुवाकलिस्तथापिभजेयमेवेत्याह जगज्जनन्यांवेशसंविरोधःस्यादेव तत्रहेतुः यस्याःकर्मणिनःसमीहितं इच्छाभवतितथापिइदं
विरोधमत्पक्षपातवदत्रापितवमत्पक्षपातएवस्यादित्याह फल्गुतुच्छमपिउरुवद्बहुकरोषियतोदीनेषुवत्सलः स्वस्वरूपएवाभिरत
स्यतवतयालक्ष्म्याकिंप्रयोजनंतांनाद्रियसइत्यर्थः यतस्त्वंदीनवत्सलः २८ अतएवसाधवोनिष्कामाः अभ्रज्ञानानंतरमपित्वांभ
जंति कथंभूतंमायागुणानांविभ्रमोविलासस्तस्योदयःकार्यंसवर्युरस्तोयस्मिन्तं तेकिमर्थंभजंतितत्राह भवत्पदानुस्मरणादृतेवि

जगज्जनन्याजगदीशवैशसंस्यादेवयत्कर्मणिनःसमीहितं करोषिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्येभिरतस्यकिंतया २८
भजंत्यथत्वामतएवसाधवोव्युदस्तमायागुणविभ्रमोदयं भवत्पदानुस्मरणादृतेसतांनिमित्तमन्यद्भगवंनविद्महे २९ त्वन्मा
ययाद्धाजनईशखंडितोयदन्यदाशास्तऋतात्मनोबुधः यथाचरेद्बालहितंपितास्वयंतथात्वमेवार्हसिनःसमीहितुं ३० म
न्येगिरंतेजगतांविमोहिनींवरंवृणीष्वेतिभजंतमात्थयत् वाचानुतंत्यायदितेजनोसितःकथंपुनःकर्मकरोतिमोहितः ३१
इत्यादिराजेननुतःसविश्वदृकतमाहराजन्मयिभक्तिरस्तुते दिष्ट्येदृशीधीर्मयितेकृतायया मायांमदीयांतरतिस्मदुस्त्य
जां ३२ तत्त्वंकुरुमयादिष्टमप्रमत्तःप्रजापते मदादेशकरोलोकःसर्वत्राप्नोतिशोभनं ३३ मैत्रेयउवाच इतिवैन्यस्य
स्यराजर्षेप्रतिनंद्यार्थवद्वचः पूजितोनुगृहीत्वेनंगंतुंचक्रेच्युतोमतिं ३४ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः किन्न
राप्सरसोमर्त्याःखगाभूतान्यनेकशः ३५

नाअन्यत्तेषांनिमित्तंफलंनविद्मः २९ वरैःप्रलोभनंचकृपालोस्तुवानुचितमित्याशयेनाहमन्यइति नुअहोतेवाचातंत्यायदिते
जनोयंअसितःअबद्धःस्यात्तर्हिपुनःपुनःफलेर्मोहितःसन्कथंकर्मकरोति त्वन्माययाहतात्मनःत्वत्तःखंडितःपृथक्
कृतः यद्यतोन्यत्पुत्रादिकमाशास्ते अतःस्वयंअविज्ञापितएवहितंचेष्टितुमर्हसी ३० ३१ ३२ ३३ ३४ राम

535/1981

वाग्विन्नांजलिभिःभक्तितःपूजिताःसंतःवैकुंठानुगताःपार्षदाश्च ३५ अदृष्टायलोचनपथमतिक्रांतायसंदर्शितआत्मायेनतस्मै ३७
इतिश्रीभागवतेमहापुराणटीकायांविंशोध्यायः २० एकविंशेतुपृथुनाप्रजानामनुशासनं महासत्रसुरादीनांमहासदसिवर्ण्यते
१ पुरंययावित्युक्तंतत्पुरमनुवर्णयति मौक्तिकैरितित्रिभिः चंदनागरुयुक्तेनतोयेनगंधार्द्रारथ्यादयस्तद्युक्तं तोक्मःहरितयवैःअंकुरै

यज्ञेश्वरधियाराजावाग्वित्तांजलिभक्तितः सभाजितायुःसर्वेवैकुंठानुगतास्ततः ३६ भगवानपिराजर्षेःसोपाध्याय
स्यचाच्युतः हरन्निवमनोमुष्यस्वधामप्रत्यगात्प्रभुः ३६ अदृष्टायनमस्कृत्यनृपःसंदर्शितात्मने वासुदेवायदेवानांदे
वायस्वपुरंययौ ३७ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेविंशतितमोध्यायः २० मैत्रेयउवाच मौक्तिकैःकुसुमस्रग्भि
र्दुकूलैःस्वर्णतोरणैः महासुरभिभिर्धूपैर्मंडितंतत्रतत्रवै १ चंदनागरुतोयार्द्ररथ्याचत्वरमार्गवत् पुष्पाक्षतफलैस्तो
क्मैर्लाजैरर्चिभिरर्चितं २ सवृंदैःकदलीस्तंभैःपूगपोतैःपरिष्कृतं तरुपल्लवमालाभिःसर्वतःसमलंकृतं ३ प्रजास्तंदी
पबलिभिःसंभृताशेषमंगलैः अभीतोमृष्टकन्याश्चमृष्टकुंडलमंडिताः ४ शंखदुंदुभिघोषेणब्रह्मघोषेणचर्त्वि
जां विवेशभवनंवीरःस्तूयमानोगतस्मयः ५ पूजितःपूजयामासतत्रतत्रमहायशाः पौरांजानपदांस्तांस्तान्प्रीतः
प्रियवरप्रदः ६ सएवमादीन्यनवद्यचेष्टितःकर्माणिभूयांसिमहान्महत्तमः कुर्वन्शशासावनिमंडलंयशःस्फीतंनि
धायारुरुहेपरंपदं ७ सूतउवाच तदादिराजस्ययशोविजृंभितंगुणैरशेषैर्गुणवत्सभाजितं क्षत्तामहाभागवतःस
दस्पतेकौषारविंप्राहगृणंतमर्चयन् ८ विदुरउवाच सोभिषिक्तःपृथुर्विप्रैर्लब्धाशेषसुरार्हणः बिभ्रत्सवैष्णवंतेजोबा
ह्वोर्याभ्यांदुदोहगां ९

शितिवा अर्चिभिःदीपैः २ ३ संभृतान्यशेषाणिमंगलानिदध्यादीनितैःसहअभिजग्मुः मृष्टाउज्वलाःकन्याश्च ४ गतस्मयोनि
रहंकारः ५ प्रियान्वरान्प्रददातीतितथा ६ गुणैर्महान्अतएवमहत्तमःपूज्यतमः ७ गुणैर्विजृंभितंउर्जितंगुणवद्भिःसभा
जितंसत्कृतंयशोगृणंतमर्चयनइत्याह सदस्पतेहेशौनक ८ लब्ध्वान्यशेषसुराणामर्हणानियेनसःकिमकरोदितिशेषः ९

श्रवणोत्सुक्यमाविष्कुर्वन्प्रार्थयते कोन्विति यस्य विक्रमं पृथिवीदोहनं तस्योच्छिष्टतुल्यं कामं तत्तस्यकर्मवद १० प्राचीनकर्मभिरारब्धा
नेवबुभुजेन तु भोगांतरार्थं कर्माणि करोतिस्म तदपि भोगेन पुण्यक्षयेच्छया न तु सुखासक्त्येत्यर्थः ११ अस्खलित अप्रतिहत आदेश
आज्ञा यस्य सप्तद्वीपेषु एक एव दंडं धारयतीति तथा किं सर्वत्र नेत्याह ब्राह्मण कुल व्यतिरेकेणाच्युत गोत्रं प्रवर्तक तुल्यायं पांवष्णवा
नांतद्व्यतिरेकेण च १२ एकदा तस्य महासत्र दीक्षासीत् तत्र सत्रे देवानां समाजश्चासीदित्यर्थः १३ तस्मिन्पूज्येषु स्वर्चितेषु सत्सु सदसो

कोन्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं १०
मैत्रेय उवाच गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ११ सर्वत्रास्खलितादेशः
सप्तद्वीपैकदंडधृक् अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः १२ एकदासीन्महासत्रदीक्षा तत्र दिवौकसां समाजो
ब्रह्मर्षीणां तु राजर्षीणां च सत्तम १३ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः उत्थितः सदसो मध्ये ताराणामुडुराडि
व १४ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः १५ व्यूढवक्षा बृ
हच्छ्रोणिर्वलिवल्गुदलोदरः आवर्तनाभिरोजस्वी कांचनोरुरुदग्रपात् १६ सूक्ष्मवक्रासितस्निग्धमूर्द्धजः कंबु
कंधरः महाधने दुकूलाग्र्ये परिधायोपवीय च १७

मध्ये उत्थितः सन् समंततः समैक्षतेति षष्ठश्लोकेनान्वयः १४ प्रांशुः उन्नतः पीनौ चायतौ च भुजौ यस्य कंजवदरुणे ईक्षणे यस्य
शोभनाः द्विजाः स्मितं च यस्य १५ व्यूढं विस्तीर्णं वक्षो यस्य बलिभिस्त्रिभिर्वल्गु सुंदरं अश्वत्थपत्रमिवापरि विस्तृतमध
स्तात्संकुचितमुदरं यस्य आवर्तवन्निम्ना नाभिर्यस्य कांचनवदुज्ज्वला ऊरू यस्य उदग्रा उन्नताग्रा पादौ यस्य सः १६ सू
क्ष्माश्च ते वक्राश्च असिताश्च मूर्द्धजा यस्य कंबुवत्त्रिरेखांकिता कंधरा यस्य परिधाय वसित्वा उपवीय उत्तरीयं कृत्वा १७

531/1381

नियमेन निमित्तेन न्यस्तानि त्यक्तानि भूषणानि येन अत एवानादृतत्वात् तैर्व्यंजिता प्रकटिता अशेषेषु गात्रेषु श्रीः स्वाभाविकी शोभा
येन कृतान्युचितानि कर्माणि येन १८ शिशिरं संतापहरं स्निग्धं चतारं ययोस्ते अक्षिणी यस्य इदं वक्ष्यमाणं वाक्यं सूक्तं वा अस्य चारु
श्राव्यं प्रियं चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रसन्नं मृष्टं शुद्धं गूढं गंभीरार्थं अविक्लवं अव्याकुलं १९ भाषणहेतुः धर्मं जिज्ञासुभिः
पुंभिः सत्सु स्वमनीषितं मावेद्यं वक्तव्यं अतः प्रजानुशासन मिषेण जिज्ञासेव क्रियते न युष्मान्प्रति धर्म प्रवचनमिति भावः २०

व्यंजिताशेषगात्रश्रीर्नियमेन्यस्तभूषणः कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतोचितः १८ शिशिरस्निग्धता
राक्षाभ्यां समैक्षत समंततः ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव १९ चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवं १९ रा
राजोवाच सभ्याः शृणुत भद्रं वः साधवो य इहागताः सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितं २० अहं दंडधरो
धात्रा प्रजानामिह योजितः रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् २१ तस्य मे तदनुष्ठानाद्यदाहुर्ब्रह्मवादिनः
लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक् २२ य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् प्रजानां शमलं भुंक्ते भ
गं च स्वं जहाति सः २३ तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः कुरुताधोक्षजधियस्तर्हि मेनुग्रहः कृतः २४

इदानीं प्रजाः शिक्षयिष्यन् प्रजाशिक्षणादिकं कर्म ममावश्यकमित्याह अहमिति त्रिभिः पृथक्सेतुषु स्थापिताः २१ दिष्टदृक्
प्राक्कर्मसाक्षी ईश्वरो यस्य तुष्यति तस्यैव देववादिनो यान्लोकानाहुः प्रजारक्षणाद्यनुष्ठानात् ते लोका मे स्युः कथंभूताः
कामानां सम्यक्दोहः प्रपूरणं येषु ते २२ अन्यथानिष्टं स्यादित्याह य इति शमलं पापं भगं ऐश्वर्यं २३ तत्तस्मात् हे प्रजाः भर्तु
र्मम पिंडार्थं पिंडदानवत्परलोकहितार्थं स्वकार्यमेव कुरुत धर्ममेवानुतिष्ठत अधोक्षजे धीर्येषां तादृशाः संतः वासुदे
वार्पणदृष्ट्येत्यर्थः अनुग्रहः कृतो भवेदिति शेषः २४ श्रीरामजयरामजयजयराम नमो भगवते वासुदेवाय राम

शास्तुशिक्षयितुः अनुज्ञातुः अनुमोदितुश्च प्रेत्यपरलोकेयत्फलंतत्तुल्यं २५ कर्मकर्तव्यमित्यनुमोदामहेनतुवासुदेवअर्पणीयमि
तिवेणादिभिस्तरनंगीकारादित्येवंवादिनः शनैर्बोधयन्नाह हेअर्हत्तमाः यज्ञपतिनामपरमेश्वरः केषांचिन्मतेनावादस्तिनभापि
विप्रतिपत्तेर्नतत्वसिद्धिरित्याशंक्यजगद्वैचित्र्यान्यथानुपपत्तिंप्रमाणयति इहामुत्रचज्योत्स्नावत्यः कांतिमत्यो भुवोभोगभूमयः
शरीराणिवा २६ नन्विदंकर्मवैचित्र्यादेवसेत्स्यतितथापिविद्वदनुभवेनेश्वरसिद्धरित्याहमनोरितित्रिभिः अस्मत्पितामहस्यांग

इदंतदनुमोदध्वंपितर्देवर्षयोमलाः कर्तुः शास्तुरनुज्ञातुस्तुल्यंयत्प्रेत्यतत्फलं २५ अस्तियज्ञपतिर्नामकेषांचि
दिहसत्तमाः इहामुत्रचलक्ष्यंतेज्योत्स्नावत्यः क्वचिद्भुवः २६ मनोरुत्तानपादस्य ध्रुवस्यापिमहीपतेः प्रिय
व्रतस्यराजर्षेरंगस्यास्मत्पितुःपितुः २७ ईदृशानामथान्येषामजस्यचभवस्यच प्रह्लादस्यबलेश्चापिकृत्य
मस्तिगदाभृता २८ दौहित्रादीनृतेमृत्योः शोच्यान्धर्मविमोहितान् वर्गःस्वर्गापवर्गाणांप्रायेणैकात्म्यहेतुना २९

स्य २७ कृत्यमस्ति अवश्यंकर्मफलदात्राभाव्यमितितेषांमतमित्यर्थः २८ मृत्योर्दौहित्रादीन्वेनादीन्विना धर्मविमोहितान्
अतः शोच्यान् ननुकर्मैवफलंदास्यतिविध्युद्देशत्यागगतावादेवताः किंपरमेश्वरेणतत्राह वर्गेति वर्गोत्रिवर्गः स्वर्गोधर्म
स्यफलं अपवर्गोमोक्षः तेषामैकात्म्येनएकरूपेणसर्वानुगतेनहेतुनतत्रापिप्रायेणहेतुना अयंभावः नतावज्जडस्यकर्म
णः फलदातृत्वंघटतेनचार्वाक्देवतानांस्वातंत्र्यं अंतर्यामिश्रुतेः नचतदकर्मसाम्येफलतारतम्यंक्वचितदसिद्धिश्चसंभव
तिअतः स्वातंत्र्येणकर्तुमन्यथावाकर्तुंसमर्थेनपरमेश्वरेणभाव्यमिति २९ हेगोपाल श्रीकृष्ण वासुदेव ७ ७

च० ५३

539/1381

किंचजीवानांमोक्षदःपरमेश्वरएवनार्वाग्देवताः तासामपिजीवत्वाविशेषादित्याशयेनाह यदीतित्रिभिः यस्यादयोःसेवायामभि
रुचिः तपस्विनांसंसारतप्तानांअशेषैर्जन्मभिः संवृद्धंधियोमलंसद्यः क्षपयति तमेवभजतेतितृतीयेनान्वयः कथंभूता अहन्यह
निवर्द्धमानासतीभालिकी ३० तत्पादसंबंधस्यवैषमहिमेतिदृष्टांतेनाह यथेति विनिर्धूता अशेषामनोमलायस्य असंगोवैरा
ग्यंतेनविज्ञानस्यविशेषः साक्षात्कारस्तदेववीर्यंयस्य यस्यांघ्रिमूलेकृताश्रयः मन ३१ आत्मवृत्तिभिरध्ययनादिभिः मनोवचः
कायानांगुणैः ध्यानस्तुतिपरिचर्याभिः अमायिनः निःकपटाःसंतः ननुब्रह्मादिभिः सत्यंकिमस्मद्भक्त्याभविष्यतीतितत्राह

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितंमलंधियः सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदांगुष्ठविनिस्
तासरित ३० विनिर्धुताशेषमनोमलःपुमान् असंगविज्ञानविशेषवीर्यवान् यदंघ्रिमूलेकृतकेतनःपुनर्नसंस
तिंक्लेशवतींप्रपद्यते ३१ तमेवयूयंभजतात्मवृत्तिभिर्मनोवचःकायगुणैःस्वकर्मभिः अमायिनःकामदुघांघ्रिपं
कजंयथाधिकारावसितार्थसिद्धयः ३२ असाविहानेकगुणोगुणोध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः संपद्य
तेर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनःस्वरूपतः ३३

यथाधिकारमेवावसितानिश्चितासमाम्नातार्थसिद्धिर्येषां ३२ स्वकर्मयागादिभिर्भजंतेत्युक्तंतत्रब्रह्मार्पणंब्रह्महविरितिन्यायेन
सर्वेषुयागतदंगतत्फलेषुभगवद्दृष्ट्याकर्मकर्तव्यंनभिन्नदृष्ट्येतिवक्तुंतेषांभगवद्रूपतामाहद्वाभ्यां असौभगवानेवस्वरूपतो
विशुद्धविज्ञानघनोपि अगुणोपिनिर्विशेषगुणोपिसन्निहकर्ममार्गेनेकगुणः नानाविशेषगुणवान् अध्वरोयज्ञःसंपद्यते
यज्ञोवैविष्णुरितिश्रुतेः अनेकगुणत्वमेवाह पृथग्विधानियानिद्रव्यादीनितैः तत्रद्रव्याणिव्रीह्यादीनि गुणाः शुक्लादयः क्रि
याअवघातादयः उक्तयोमंत्रः अर्थोगसाध्यउपकारः आशयःसंकल्पः लिंगपदार्थानांशक्तिः नामज्योतिष्टोमादि तैश्चाध्वरःसं
पद्यते ३३

याग्स्या फलपिस्योभगवद्रूपंतामाह प्रधानेति एषविभुःपरमानंदोपिशरीरेचेतनांविषयाकारांबुद्धिंप्रतिपद्यतदभिव्यंग्यानंद
रूपःसन्क्रियाफलत्वेनप्रतीयते एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः यथानलोदारुष्ववस्थितस्तद्गुणात्मकः
दारुधर्मदैर्घ्यवक्रत्वादिमान् कथंभूतेशरीरेप्रधानंअव्यक्तं कालस्तत्क्षोभकः आशयोवासना धर्मोअदृष्टं तैःसंगृह्यतेजन्यत
इतितथातस्मिन् ३४ तदेवमप्रवृत्तान्भगवद्भजनेप्रवर्त्यस्वतःप्रवृत्तानांप्रवृत्तिमभिनंदनेनदृढयति अहोइति वितरंतिकुर्वंति
३५ इदानींहरिभक्तिदार्ढ्यायब्राह्मणभक्तिंविधत्तेमाजातुत्रिभिः महत्यश्चतारुद्धयःतामिर्यद्राजकुलस्यतेजःततस्मात्स
काशात्द्विजानांकुलेअजितोदेवतायेषांवैष्णवानांतेषांकुलेमाजातुनप्रसवेत कदाचिदपिप्रभावंनकरोतु कथंभूतेसमृद्धि
प्रधानकालाशयधर्मसंग्रहेशरीरएषप्रतिपद्यचेतनां क्रियाफलत्वेनविभुर्विभात्यतेयथानलोदारुषुतद्गुणात्मकः
३४ अहोममामीवितरंत्यनुग्रहंहरिंगुरुंयज्ञभुजामपीश्वरं स्वधर्मयोगेनयजंतिमामकानिरंतरंक्षोणितलेदृढव्रताः
३५ माजातुतेजःप्रभवेन्महर्द्धिभिस्तितिक्षयातपसाविद्ययाच देदीप्यमानेजितदेवतानांकुलेस्वयंराजकुलाद्द्विजानां
३६ ब्रह्मण्यदेवःपुरुषःपुरातनोनित्यंहरिर्यच्चरणाभिवंदनात् अवापलक्ष्मीमनपायिनींयशोजगत्पवित्रंचमहत्तमाग्र
णीः ३७ यत्सेवयाशेषगुहाशयःस्वराड्विप्रप्रियस्तुष्यतिकाममीश्वरः तदेवतद्धर्मपरैर्विनीतैः सर्वात्मनाब्रह्मकुलंनिषेव्यतां
पुमान्लभेतानतिवेलमात्मनःप्रसीदतोत्यंतशमंस्वतःस्वयं यन्नित्यसंबंधनिषेवयाततःपरंकिमत्रास्तिमुखंहविर्भुजां ३९
भिर्विनापिस्वयमेवतितिक्षादिभिर्देदीप्यमाने ३६ ३७ ब्राह्मणान्स्तुवन्नाह यच्चरणाभिवंदनात्हरिर्लक्ष्मीयशश्चाप ३७ यत्सेव
याचेश्वरस्तुष्यतितदेवब्रह्मकुलंनिषेव्यतामितिद्वयोरन्वयः हरेर्लोकसंग्रहरूपोधर्मस्तत्परैः ३८ ननुब्रह्मकुलएवनित्यंसेव्यमाने
सर्वदेवतासुखाभूतेग्नौयज्ञाद्यनुष्ठानंनस्यात् नचतेनविनाचित्तशुद्धिः नचतयाविनामोक्षःस्यादित्याशंक्यनेत्याह पुमानितिद्वा
भ्यां यस्यब्रह्मकुलस्यनित्यसंबंधेननिषेवयापुमान्स्वयमेवज्ञानाभ्यासादिकंविनापिअत्यंतशमंमोक्षंलभतेकुतःयत्सेवया
स्वतएवानतिवेलंशीघ्रंप्रसीदतःशुद्धतःआत्मनश्चित्तात्ततःपरंश्रेष्ठंदेवतानांकिंसुखमस्ति ब्राह्मणसेवयैवयज्ञादिफलंभ
वतीत्यर्थः ३९

SHI
1981

हरेरपितदेवपरंमुखमित्याह अश्नातीति ईज्यानांपूज्यानांइंद्रादीनांनामभिर्यस्यमुखेश्रद्धयाहुतंहविरनंतोयथाश्नातितथाचेतनया
रहितेहुताशनेहुतंनाश्नाति केहुतमश्नातितत्त्वकोविदैः सर्वदेवमयश्चेतनामूर्तिरनंतइतितत्त्वविद्भिः कुतएवंभूतोसीतत्राह पा
रमहंस्यंज्ञानंतत्परानर्हंतिअधिकुर्वंतिइतिपारमहंस्यपर्याःताःगावोवाचोयस्मिन् उपनिषद्भिर्ज्ञानघनत्वेनोक्तइत्यर्थः यद्वापर
महंसानांज्ञाननिष्ठानांगम्यःपारमहंस्यः परितोनगच्छंतिगावोयस्मात्सपर्यगुः इंद्रियनियंतासचासौसचेपारमहंस्यपर्यगुः
ज्ञानरूपःसर्वांतर्यामीचेत्यर्थः ४० नकेवलंचेतनत्वेनहुताशनाद्विशेषः किंतुवेदज्ञानादपीत्याह यद्ब्रह्मेति यदित्यव्ययं येब्रह्म
अश्नात्यनंतःखलुतत्त्वकोविदैःश्रद्धाहुतंयन्मुखइज्यनामभिः नवैतथाचेतनयाबहिष्कृतेहुताशनेपारमहंस्यपर्यगुः
४० यद्ब्रह्मनित्यंविरजंसनातनंश्रद्धातपोमंगलमौनसंयमैः समाधिनाबिभ्रतिहार्थदृष्टयेयत्रेदमादर्शइवावभासते ४१
तेषामहंपादसरोजरेणुमार्यावहेयाधिकिरीटमायुः यन्नित्यदाबिभ्रतआशुपापंनश्यत्यमुंसर्वगुणाभजंति ४२ गु
णायनंशीलधनंकृतज्ञंवृद्धाश्रयंसंवृणतेनुसंपदः प्रसीदतांब्रह्मकुलंगवांचजनार्दनःसानुचरश्चमह्यं ४३ मै
त्रेयउवाच इतिब्रुवाणंनृपतिंपितृदेवद्विजातयः तुष्टुवुर्हृष्टमनसःसाधुवादेनसाधवः ४५ पुत्रेणजियतेलोका
नितिसत्यवतीश्रुतिः ब्रह्मदंडहतःपापोयद्वेनोप्यत्तरत्तमः ४९ श्रीराम
वेदंनित्यंबिभ्रतितेषामित्युत्तरेणान्वयः मंगलंनामप्रशस्ताचरणंनित्यंअप्रशस्तस्यवर्जनं एतद्धिमंगलंप्रोक्तमृषिभिस्तत्त्वदर्शि
भिः मौनमध्ययनविरोधिवार्तात्यागः समाधिनाचित्तस्थैर्येण अर्थदृष्टयेवेदार्थमपिविचारयतीत्यर्थः यत्रवेदेइदंविश्वं ४१
हेआर्याःआयुर्यावज्जीवंअधिकिरीटंमुकुटस्योपरिवहेयेतिप्रार्थनायांलिङ् यंरेणुं गुणभजनस्यफलमाह गुणायन
मिति अन्वनुसंपदःसंवृण्वतेसम्यक्भजते तस्मात्प्रसीदतांप्रसीदतु गवांचकुलं ४३ ४४ साधुवादमाह पुत्रेण
तिषद्भिः यद्यतःवेणोपितमोनरकमप्यतरत् अतितताार ४५ ४६ ४७ श्रीराम ७ ७ ७ ७

तन्नाथत्वमेवमुकुंदनाथत्वेपर्यवसितमित्यर्थः तत्रहेतुः यइति ४८ आजीविनांसेवकानांअनुशासनं प्रजास्वनुरागः प्रकृतिः स्वभावः
उपसादितः प्रापितः कर्मभिर्भाम्यतां ४९ ५० ईश्वरदृष्ट्याविप्रादयोविप्रणमंति नमइति ब्रह्माविश्यब्राह्मणजातिमधिष्ठायसत्रंक्ष
त्रियंबिभर्ति क्षत्रंचाविश्यब्रह्मबिभर्तितदुभयंचाविश्यइदंबिभर्ति ५१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेटीकायांएकविंशो
ध्यायः २१ द्वाविंशेतुपरंज्ञानंपृथवेहरिशासनात सनत्कुमारोभगवानुपादिशादितीर्यते १ अर्चिषालक्षितान्सनकादयइति

हिरण्यकशिपुश्चापिभगवन्निंदयातमः विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ४६ वीरवर्यपितः पृथ्व्याः समाः सं
जीवशाश्वती यस्येदृश्यच्युतेभक्तिः सर्वलोकैकभर्तरि ४७ अहोवयंह्यद्यपवित्रकीर्तेत्वयैवनाथेनमुकुंदनाथाः
यउत्तमश्लोकतमस्यविष्णोब्रह्मण्यदेवस्यकथांव्यनक्ति ४८ नात्यद्भुतमिदंनाथतवाजीव्यानुशासनं प्रजानुरा
गोमहतांप्रकृतिःकरुणात्मनां ४९ अद्यनस्तमसःपारस्त्वयोपासादितःप्रभो भ्राम्यतांनष्टदृष्टीनांकर्मभिर्दैवसं
ज्ञितैः ५० नमोविवृद्धसत्वायपुरुषायमहीयसे योब्रह्मक्षत्रमाविश्यबिभर्तीदंस्वतेजसा ५१ इतिश्रीभागवतेम
हापुराणेचतुर्थस्कंधेएकविंशोध्यायः २१ मैत्रेयउवाच जनेषुप्रगृणत्स्वेवंपृथुंपृथुलविक्रमं तत्रोपजग्मुर्मु
नयश्चत्वारःसूर्यवर्चसः १ तांस्तुसिद्धेश्वरान्राजाव्योम्नोवतरतोर्चिषा लोकानपापान्कुर्वत्यासानुगोचष्ट
लक्षितान् २ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः ससदस्यानुगोवैन्यइंद्रियेशोगुणानिव ३ राम

ज्ञापितान्अचष्टअपश्यत २ तेषांदर्शनेनोद्गतान्प्राणान्प्राप्तुमिच्छुरिव अयंभावः उर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति
प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यतइतिस्मृतेः प्राणास्तावत्तेजसाक्षिप्तास्तान्प्रत्युद्गच्छंति अतःस्वयमननुगच्छतःप्राण
हानिःस्यादितिभयादिवससंभ्रमःप्रत्युद्गमंचकारेति सहसदस्यैरनुगैश्चवर्तमानः इंद्रियेशोजीवःगुणान्गंधादीन्प्रतिपद्योद्गच्छ
तीति औत्सुक्येदृष्टांतः ३

SM3
1981

यंत्रितोवशीकृतः गृहीतमध्यर्हणंअर्घ्यंआसनंचयेस्तान् ४ मार्जितंक्षालितंअलकबंधनंकेशबंधनंयेनमानयन्निवस्वयंचचार
५ भवस्याग्रजत्वेनमान्यान् ६ प्रीतः प्राहेत्युक्तंतदेवप्रीतिपूर्वकंवचनमाह अहोइतिदशभिः हेमंगलायनाःमंगलमयनंएषांमया
किंमंगलंआचरितं यस्यमेयोगिभिरपिदुर्दर्शानांदर्शनमासीत ७ ८ दुर्दर्शत्वमवाहनैवेति सर्वदृशमात्मानंयथासर्वेदृश्यानल
क्षयेयुः येस्यविश्वस्यहेतवोमहदादयोमन्वादयोवा यद्वाकथंभूतान् येस्यसर्वदृश आत्मदर्शनस्यहेतवस्तान् ९ येषांसाधूनां

गौरवाद्यंत्रितःसभ्यःप्रश्रयानतकंधरः विधिवत्पूजयांचक्रेगृहीताध्यर्हणासनान् ४ तत्पादशौचसलिलैर्मार्जिताल
कबंधनः तत्रशीलवतांवृत्तमाचरन्मानयन्निव ५ हाटकासनआसीनान्स्वधिष्ण्येष्विवपावकान् श्रद्धासंयमसंयु
क्तःप्रीतःप्राहभवाग्रजान् ६ पृथुरुवाच अहोआचरितंकिंमेमंगलंमंगलायनाः यस्यवोदर्शनंह्यासीद्दुर्दर्शानांच
योगिभिः ७ किंतस्यदुर्लभतरमिहलोकेपरत्रच यस्यविप्राःप्रसीदंतिशिवोविष्णुश्चसानुगः ८ नैवलक्षयतेलोकेलो
कान्पर्यटतोपियत यथासर्वदृशंसर्वआत्मानंयेस्यहेतवः ९ अधुनाअपितधन्याःसाधवोगृहमेधिनः यद्गृहाह्य
र्हवर्याम्बुतृणभूमीश्वरावराः १० व्यालालयद्रुमाश्चैतेप्यरिक्ताखिलसंपदः यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ११
स्वागतंवोद्विजश्रेष्ठायद्व्रतानिमुमुक्षवः चरंतिश्रद्धयाधीराबालाएवबृहंतिये १२ कच्चिन्नःकुशलंनाथाइंद्रियार्था
र्थवादिनां व्यसनावापएतस्मिन्पतितानांस्वकर्मभिः १३

हाः अर्हणापूज्यानांचर्याश्चरणीयाः स्वीकारार्हाअम्बादयोयेषुंतादृशाः अंबुचतृणंचभूमिश्चईश्वरोगृहस्वामीचअवरेसेवका
दयश्च १० व्यालानामालयाद्रुमाएवतेअरिक्ताःसंपूर्णाः अखिलाः संपदोयेषुतादृशाअपियत्गृहाःयग्गृहास्तीर्थपादीया
वैष्णवास्तेषांपादतीर्थेनवर्जिताः ११ स्वागतंभद्रमागमनंजातंयद्यस्माद्बलाएवभुवंतोबृहंतिव्रतानिचरंति यद्वा येषांवोव्रता
निअन्येबालाश्चरंति १२ इंद्रियार्थमेवअर्थंपुरुषार्थंयेवदंतितेषांनःव्यसनान्युप्तंतेयस्मिन्तस्मिन्संसारे १३ श्रीरामायनमः

भा० नन्वभ्यागतानांकुशलंपृछ्छतेलोकेनत्वात्मनस्तत्राहभवत्स्विति १४ तत्तस्मात्कृतविश्वासःसन्तपस्विनांसंतप्तानांसुहृदोयुष्मान्पृछामि च०
५६ १५ नखल्वन्ययोगितुल्यायूयंकिंतुसाक्षाद्भगवानेवेत्याह व्यक्तंनिश्चितं आत्मवतांधीराणां आत्मा तेष्वात्मत्वेनप्रकाशमानः आत्मा
नंभावयतिप्रकाशयतीतितथाइमांपृथ्वीचरति १६ सूक्तंशोभनवचनं सारंन्याय्यं सुष्टुगंभीरार्थं मितमल्पाक्षरं मधुश्रोत्रप्रियं
मुखप्रसत्यास्मयमानइवप्रतीयमानः १७ १८ स्वयमपिपृथोसंगमभिनंदतिसंगमइति उभयेषांवक्तृणांश्रोतृणांचयेषांसंभा

भवत्सुकुशलप्रश्नआत्मारामेषुनेष्यते कुशलाकुशलायत्रनसंतिमतिवृत्तयः १४ तदहंकृतविश्रंभःसुहृदोत्रतप
स्विनां संपृच्छेभवएतस्मिन्क्षेमःकेनांजसाभवेत् १५ व्यक्तमात्मवतामात्माभगवानात्मभावः स्वानामनुग्रहाय
मांसिद्धरूपीचरत्यजः १६ मैत्रेयउवाच पृथोस्तत्सूक्तमाकर्ण्यसारंसुष्टुमितंमधुः स्मयमानइवप्रीत्याकुमारःप्र
त्युवाचह १७ सनत्कुमारउवाच साधुपृष्टंमहाराजसर्वभूतहितात्मना भवताविदुषाचापिसाधूनांमतिरीदृशी १८
संगमःखलुसाधूनांउभयेषांचसंमतः यत्संभाषणसंप्रश्नःसर्वेषांवितनोतिशं १९ अस्त्येवराजन्भवतोमधुद्वि
षःपादारविंदस्यगुणानुवादने रतिर्दुरापाविधुनोतिनैष्ठिकीकामंकषायंमलमंतरात्मनः २० शास्त्रेष्वियानेव
सुनिश्चितोनृणांक्षेमस्यसध्र्यङ्विमृशेषुहेतुः असंगआत्मव्यतिरिक्तआत्मनिदृढारतिर्ब्रह्मणिनिर्गुणेचया २१

षणसहितःसंप्रश्नःसर्वेषांशंसुखंविस्तारयति १९ तदेवंसंगमंप्रश्नंचाभिनंद्य अनुवादमुखेनैवमोक्षसाधनमुपदिशति अ
स्त्येवेति गुणानामनुवादनेप्रश्नद्वारेणानुवादप्रवर्तनेश्रवणइत्यर्थः आत्मानोमनसोंतस्थंकामात्मकंमलंविधुनोति कषायंधा
तुरागादिवदनिवर्त्यं चित्तशुद्धेर्नवहिर्वैराग्यमात्मनिरतिश्चभवति २० नततोधिकंसाधनमस्तिशास्त्रेषुतयोरेवमोक्षहेतुत्वनिश्च
यादित्याह शास्त्रेष्विति सध्र्यग्विमृशेषुसम्यग्विचारवत्सु क्षेमस्यहेतुरेतावानेवसुनिश्चितः कोसौ आत्मव्यतिरिक्ते असंगोवैरा
ग्यंआत्मनिचरतिः आत्मनोविशेषणं निर्गुणेब्रह्मणीति २१ श्रीरामजयरामजयजयराम नमोभगवतेवासुदेवायराम ५६

515
1981

ननुएतावदेवातिदुर्लभमित्याशंक्योत्तमाधिकारिणःश्रवणमात्रेणभवति अन्यस्यतुचित्तशुद्ध्यनुसारेणसाधनतारतम्यतोवर्द्धमानया
भक्त्येत्यभिप्रेत्याह सेतिचतुर्भिः साब्रह्मणिरतिरसंगश्चश्रद्धादिभिःस्यादिति चतुर्थेनान्वयः जिज्ञासयातत्तद्विशेषबुभुत्सया पुण्यं
श्रवोयशोयस्यतस्यहरेःपुण्ययाकथयाच २२ अर्थारामाअर्थनिष्ठास्तामसाइंद्रियारामाःकामिनःकामनिष्ठाःराजसाःतेसहयोगो
स्तीतस्यामतछयातेषांयेसमंताअर्थाःकामाश्चतेषामपरिग्रहेण विविक्तविजनेयारुचिस्तया आत्मन्येवपरितोषेचसतियास्यात

साश्रद्धयाभगवद्धर्मचर्यया जिज्ञासयाध्यात्मिकयोगनिष्ठया योगेश्वरोपासनयाचनित्यंपुण्यश्रवःकथयानित्यया
अर्थेंद्रियारामसगोष्ठ्यतृष्णयातत्संमतानामपरिग्रहेणच विविक्तरुच्यापरितोषआत्मनिविनाहरेर्गुणपी
यूषपानात् २३ अहिंसयापारमहंस्यचर्ययास्मृत्यामुकुंदाचरिताग्र्यसीधुना यमैरकामैर्नियमैरनिंदयानिरीहया
द्वंद्वतितिक्षयाच २४ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेनविजृंभमाणया भक्त्याह्यसंगःसदसत्यनात्मनिस्या
न्निर्गुणेब्रह्मणिचांजसारतिः २५

किंतुहरेर्गुणपीयूषपानादिनातस्मिन्सतिविविक्तेरुचिर्नकार्या नचात्मनिपरितोषःकार्यइत्यर्थः २३ पारमहंस्यचर्ययाउपशमा
दिप्रधानयावृत्त्या स्मृत्यास्वहितानुसंधानेनमुकुंदाचरितमेवाग्र्यंसीधुश्रेष्ठममृतंतच्चरितस्मृतिसुखेनेत्यर्थः मार्गांतरस्यानिंद
या निरीहयायोगक्षेमार्थक्रियाराहित्येन शीतोष्णादिद्वंद्वसहनेन २४ कथयेत्यत्रोक्तमपिकथनंभक्त्यंतरंगत्वेनपुनरुच्यते तत्प
राहरिभक्तास्तेषांकर्णपूराःकर्णालंकारभूतायेहरेर्गुणास्तेषामभिधानेनसदसतिकार्यकारणरूपेभगवति अन्यत्रासंगःआत्मनि
रतिश्च २५

भा०
५७

ततः किमत आह यदानिश्चांप्रासगरतिर्भवतितदाआचार्यवान्ज्ञानविरागयोर्वेगेन अवीर्यंनिबासर्नसत्‌ जीवस्यकोशमावरकंह्न ४०
दयंपुमान्दहति कथंभूतं पंचभूतप्रधधानं यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः पंचतदात्मिकं उत्थितोग्निः प्रज्वलितोग्नि
र्योनिमरणिमिव यद्वा रतिराचार्यानुग्रहश्चतदाज्ञानविरागवेगेनोत्थितः साक्षात्कारः अवीर्यंपुनः प्ररोहक्षमंयथानभवति एवंह्न
दयंदहति शेषंसमानं २६ ततः किमत आह दग्धः आशयोहृदयमुपाधिर्यस्य अत एवमुक्तः समस्तास्तद्गुणाकर्तृत्वादयोये
न आत्मनःसकाशद्बहिर्घटादि अंतःसुखादिच नैवविचष्टेनपश्यत्येव कुतइत्यपेक्षायांद्रष्टृदृश्यप्रतीतोंतःकरणहेतुकत्वादित्याह परेति

यदारतिर्ब्रह्मणिनैष्ठिकीपुमान् आचार्यवान्ज्ञानविरागरंहसा दहत्यवीर्यंहृदयंजीवकोशंपंचात्मकंयोनिमिवो
त्थितोग्निः २६ दग्धाशयोमुक्तसमस्ततद्गुणोनैवात्मनोबहिरंतर्विचष्टे परात्मनोयद्व्यवधानंपुरस्तात्स्व
प्नेयथापुरुषस्तद्विनाशे २७ आत्मानमिंद्रियार्थंचपरंतदुभयोरपि सत्याशयउपाधौवैपुमान्पश्यतिनान्य
दा २८ निमित्तेसतिसर्वत्रजलादावपिपूरुषः आत्मनश्चपरस्यापिभिदांपश्यतिनान्यदा २९

श्यः आत्माद्रष्टा तयोर्यद्व्यधानंसंधकंपूर्वमासीत तस्यविनाशेसतियथास्वप्ने अहंराजाइत्यारोपितंमन्यादिद्रष्टारं दृश्यंसैन्यंचस्व
प्नावस्थानाशेनपश्यतितद्वत २७ द्रष्टृदृश्ययोरप्रतीतेरंतःकरणहेतुकत्वमन्वयव्यतिरेकाभ्यांउपपादयति आत्मानंद्रष्टारं इंद्रि
यार्थंदृश्यंउभयोस्तयोःपरंसंबंधहेतुमहंकारंच आशये अंतःकरणे सत्येवजाग्रत्स्वप्नयोः पश्यतिनान्यदासुषुप्तौ तदुक्तं दृश्यानु
रंजितंद्रष्टृदृश्यंद्रष्टुरंजितं अहंवृत्त्याभयंरक्तंतन्नाशेद्वितनात्मनः इति २८ एकस्मिन्नात्मनिदृश्यादिभेदप्रतीतिरौपाधिकीतिदृष्टां
तेनस्पष्टयति लोकेपिचसर्वत्रजलदर्पणादौभेदनिमित्तेसत्येव आत्मनोबिंबभूतस्य प्रतिबिंबस्यचभेदंपश्यतिनतु जलाद्यभावे २९ ५७

5417
1981

तदेवं चतुर्भिरसंगात्मरत्योर्मोक्षहेतुत्वमुक्तं इदानीमनात्मरतेःसंसारहेतुत्वमाह इंद्रियैरितिचतुर्भिः ध्यायतांगुणारोपेणस्मरतांपुंसांइं
द्रियाणिस्मृतैर्विषयैराकृष्यंतेतैश्चमनआक्षिप्यतेविषयाभिमुखं प्राप्यते तच्चबुद्धेःसकाशात् चेतनांविचारसामर्थ्यंहरति एतच्चाविवे
किनानलक्ष्यतइतिदृष्टांतेनाह निरजःकुशादिस्तंबोयथामूलैस्तोयंह्रदादपहरतितद्वत ३० चित्तंचेतनामनुतस्यामपहृतायांस्मृतिःपू
र्वापरानुसंधानंनभ्रश्यतिएवंतद्रोधंज्ञानभ्रंशंआत्मनएवहेतोरात्मनोपह्नवंनाशंप्राहुः ३१ यमाधिकृत्यान्यस्यविषयस्यप्रियतमत्वं

इंद्रियैर्विषयाकृष्टैराक्षिप्तंध्यायतांमनः चेतनांहरतेबुद्धेःस्तंबस्तोयमिवह्रदात् ३० भ्रश्यत्यनुस्मृतिश्चित्तंज्ञानभ्रंशः
स्मृतिक्षये तद्रोधंकवयःप्राहुरात्मापह्नवमात्मनः ३१ नातःपरतरोलोकेपुंसःस्वार्थव्यतिक्रमः यदध्यन्यस्यप्रेयस्त्व
मात्मनःस्वव्यतिक्रमात ३२ अर्थेंद्रियार्थाभिध्यानंसर्वार्थापह्नवोनृणां भ्रंशितोज्ञानविज्ञानाद्येनाविशतिमुख्यतां ३३
नकुर्यात्कर्हिचित्संगंतमस्तीव्रंतितीर्षुकः धर्मार्थकाममोक्षाणांयदत्यंतविघातकं ३४ तत्रापिमोक्षएवार्थ आत्यंतिकत
येष्यते त्रैवर्ग्योर्थोयतोनित्यंकृतांतभयसंयुतः ३५ परेवरेचयेभावागुणव्यतिकरादनु नतेषांविद्यतेक्षेमईशविध्वंसिताशिषां
३६

आत्मनस्तुकामायसर्वंप्रियंभवतीतिश्रुतेः तस्यात्मनःस्वेनैवयोव्यतिक्रमोपह्नवः तस्माद्यःस्वार्थनाशः अतःपरतरःस्वार्थनाशोना
स्ति ३२ कुतइत्यत आह अर्थस्याभिध्यानंइंद्रियार्थकामस्तस्यचाभिध्यानंसर्वार्थनाशः ज्ञानंविज्ञानंपरोक्षं येनध्यानेनमुख्यतां
स्थावरतां ३३ अनात्मरतेरनर्थहेतुत्वमुक्तं संगस्याप्याह नेति यद्दस्तु धर्मादीनांविघातकंतस्मिन्संगंनकुर्यात् तमःसंसारतुल्यत्व
न्निर्देशात ३४ पुरुषार्थसाम्यभ्रांतिंवारयति तत्रापीति कृतांतःकालः ३५ भयसंयुतत्वमेवाह परेब्रह्मादयः अवरे अस्मदा
दयःगुणक्षोभादनुपश्चाद्भवति ईशःकालस्तेनविध्वंसिता आशिषोयेषां ३६ श्रीरामजयरामजयजयराम कृष्णायनमः

तस्मादनात्मरतिरनर्थहेतुः त तस्माज्जगतां जंगमानां तस्थुषां स्थावराणां वा देहादिभिरात्मना अहंकारेण चावृतानां हृदय अवकाशिप्रका
शं तेनमवेहि कथं सोस्मीति सोस्तीति पाठे स एव कोसि तं तान्यद सदित्यर्थः ननु जीवो हृदि चकास्ति नान्यस्तत्राह क्षेत्रमिदं जीवं तत्पति
नियमयतीति क्षेत्रवित्तपः तस्य भावस्तता तया अंतर्यामिरूपेण यद्वा क्षेत्रविन्न अहंममास्पदे पातीति क्षेत्रवित् तेन रूपेण जीवस्त
पारतंत्र्यात् न पाति ननु कर्म जीवं नियच्छति न आधिः प्रत्यक्षः तर्हि बुद्धिः न प्रत्यक्प्रतिलोमं चकास्ति बुद्धिस्तु पराग्विषयाकारेण न
त्वहंकारः न विषकव्याप्तत्वेन सतु परिछिन्नः एवं सतो यो भगवान् तमेवावेहीति ३७ स्थावरजंगमानां हृदि चकास्तीत्युक्ते तेषां
सत्वं तत्संबंधादितरस्यापि मालिन्यं च प्रसक्तं निराकुर्वन् उद्रिक्ततत्त्वात् प्रणमति यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टापकृ

तत्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिषणात्मभिरावृतानां यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक् चका
स्ति भगवांस्तमवेहि सोस्मि ३७ यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुति स्रजि वाहिबुद्धिः तं नित्य
मुक्तपरिशुद्धविशुद्धतत्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ३८ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथि
तमुद्ग्रथयंति संतः तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं ३९ कृच्छ्रो महानिह भवार्णवम
प्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णवं ४०

ष्टभावेन कार्यकारणभावेन वा माययैव विभाति तं प्रपद्ये मायात्वे हेतुः विवेकेन विधुतिर्निराकृतिर्यस्य तत्र स्रजि वा तिवा शब्दो दृष्टांते नित्य
मुक्तं यतः परिशुद्धं तत्वं सत्वं अत एव प्रत्यूढा अभिभूता कर्मभिः कलिला प्रकृतिर्येन तं ३८ तमवेहीति ज्ञानमुपदिष्टं तस्य दुष्करत्वेन भक्तिमु
पदिशति द्वाभ्यां पादपंकजयोः पलाशानि अंगुलयस्तेषां विलासः कांतिः तस्याः भक्त्या स्मृत्या कर्माशयं अहंकाररूपं हृदयग्रंथिं कर्म
भिरेव ग्रथितं रिक्ता निर्विषया मतिर्येषां रुद्धः प्रत्याहृतः स्रोतोगण इंद्रियवर्गो यैः अरणं शरणं ३९ ननु ब्रह्मविदाप्नोतीति श्रुतेः कथं
यतयो नोद्ग्रथयंतीत्युक्तं तत्राह कृच्छ्र इति अप्लवेशां न प्लवः स्मरणहेतुः ईदृशो येषां महानिह मरणे क्लेशः न हि असुखेन योगादिना इंद्रि
यषड्वर्गग्राहं भवार्णं तितीर्षति तत्तस्मात् उडुपं प्लवं भवार्णवमित्यर्थः यद्वा अर्णवशब्दे वकाराभावः आर्षः दुस्तरोदकरूपं व्यसनमि
त्यर्थः ४०

5413
1981

आत्ममेधसा ब्रह्मविदा दर्शिता आत्मनो गतिस्तत्वं यस्मै सः ४१ ब्रह्मन्निति संबोधनं प्राधान्यादेकस्यापि यूयमित्युक्तिः सर्वान्प्रति ४२
आत्मना देहेन सह सर्वं राज्यादिकं मदीयं साधु छिष्टं साधुभिः स्वीयं सन्मह्यं प्रसादरूपेण दत्तं अतस्तत्र ममत्वाभावात् गुरुदक्षिणा
र्थे किं ददे ४३ न हि पित्रा दत्तं मोदकादि तस्मै दानरूपेण प्रत्यर्प्यते निवेदनं तु तदीयस्यैव समर्पणं यथा भृत्यो राज्ञ एव बारूपेण तांबूलादि
कमर्पयति तथा मयापि सर्वं निवेदितं स्वीकुरुतेत्याह प्राणेति ४४ आत्मनः स्वत्वाभावं प्रपंचयति सेनापत्यं चेति द्वाभ्यां ४५ वस्तेपरि

मैत्रेय उवाच स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा दर्शितात्मगतिः सम्यक् प्रशंस्योवाच तं नृपः ४१ राजोवाच कृ
तो मेनुग्रहः पूर्वं हरिणार्तानुकंपिना तामापादयितुं ब्रह्मन् भगवन् यूयमागताः ४२ निष्पादितश्च कार्त्स्न्येन भग
वतानुग्रहो यथा साधूच्छिष्टं हि मे सर्वं आत्मना सह किं ददे ४३ प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिच्छदाः राज्यं
महीबलं कोश इति सर्वं निवेदितं ४४ सैनापत्यं च राज्यं च दंडनेतृत्वमेव च सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ४५
स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ४६ यैरीदृशी भगवतो गतिरात्मवाद ए
कांततो निगमिभिः प्रतिपादिता नः तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रं ४७ त आत्म
योगपतय आदिराजेन पूजिताः शीलं तदीयं शंसंतः खेभून्मिषतां नृणां ४८

धत्ते अन्नमात्रं केवलं भुंजते तद्दानेस्वतंत्राः ४६ सत्यपि सत्वे सर्वस्वेनापि न गुरोः प्रत्युपकर्तुं शक्यमित्याह यैरिति आत्मवादे अ
ध्यात्मविचारे एकांततः निश्चयेन निगमिभिः वेदविद्भिः ते नित्यमनल्पकरुणाः स्वकृतेन दीनोद्धरणकर्मणा तुष्यंतु को नाम तत्कृ
तमुपकारं प्रति स्वयमुपकरोति उदकपात्रमंजलिं विना मपांजलिं रचतेभ्यो बद्ध इत्यर्थः यद्वा विनोद उपहासास्पदं प्रत्युपकारे प्रवृ
त्तो जनानामुपहासास्पदं भवेदित्यर्थः ४७ खेभूवन् आकाशमार्गेण गताः ४८ ॥ श्रीराम ॥ ॥ ॥

धुर्योभुरम्य: अध्यात्मशिक्षयायासंस्थितिरेकाग्रतानया आत्मन्यवस्थित: मन्मेने ४९ ब्रह्मसात्कृतंब्रह्मण्यर्पितंयथाभवति ५० नि
र्विषंग: कर्मण्यनासक्त: कर्माध्यक्षंकर्मसाक्षिणंउदासीनमन्वान: ५१ नासज्जतइत्युत्तरेणान्वय: ५२ अर्चिषिभार्यायां ५३ ५४

वैन्यस्तुधुर्योमहतांसंस्थित्याध्यात्मशिक्षया आप्तकाममिवात्मानंमेने आत्मन्यवस्थित: ४९ कर्माणिचयथाकालं
यथादेशंयथाबलं यथोचितंयथावित्तं अकरोद्ब्रह्मसात्कृतं ५० फलंब्रह्मणिविन्यस्यनिर्विषंग:समाहित: कर्माध्य
क्षंचमन्वान: आत्मानंप्रकृते:परं ५१ गृहेषुवर्तमानेपिससाम्राज्यश्रियान्वित: नासज्जतेंद्रियार्थेषुनिरहंमतिरर्क
वत् ५२ एवमध्यात्मयोगेनकर्मण्यनुसमाचरन् पुत्रानुत्पादयामासपंचार्चिष्यात्मसंमतान् ५३ विजिताश्वंधू
म्रकेशंहर्यक्षंद्रविणंवृकं सर्वेषांलोकपालानांदधारैक:पृथग्गुणान् ५४ गोपीथायजगत्सृष्टे:काले स्वेस्वेच्युतात्म
क: मनोवाग्वृत्तिभि:सौम्यैर्गुणै:संरंजयन्प्रजा: ५५ राजेत्यधान्नामधेयंसोमराजइवापर: सूर्यवद्विसृजन्गृह्णन्
प्रतपंश्चभुवोवसु दुर्धर्षस्तेजसेवाग्निर्महेंद्रइवदुर्जय: तितिक्षयाधरित्रीवद्योरिवाभीष्टदोनृणां ५७ वर्षतिस्मय
थाकामै:पर्जन्यइवतर्पयन् समुद्रइवदुर्बोध:सत्वेनाचलराडिव ५८ धर्मराडिवशिक्षायामाश्चर्येहिमवानिव
कुबेरइवगुप्तार्थोकोशाढ्योवरुणोयथा ५९ मातरिश्वेवसर्वात्माबलेनसहओजसा अविषह्यतमोदेवोभग
वान्भूतराडिव ६० कंदर्पइवसौंदर्येमनस्वीमृगराडिव वात्सल्येमनुवन्नृणांप्रभुत्वेभगवानज: ६१

५५ सोमश्चासौराजाचसइवभुवोवसुधनंगृह्णन्विसृजंश्चासौ सूर्यवत्प्रतपनमाज्ञाकरणं ५६ अग्निरिवदुर्धर्ष: द्यौ:स्व
र्गइव ५७ समुद्रोयथागांभीर्येणतावानितिनबुध्यतेतथासावपि:प्रायतोदुर्बोध: अचलराट्मेरुरिव ५८ ५९ सर्वात्मासर्व
त्रसंचारसक्त: बलादिमातरिश्ववभूतराट्श्रीरुद्र: ६० अज: ब्रह्मेव ६१ श्रीरामजयरामजयजयराम कृष्णाभ्यांनम: ५९

551
1981

आत्मवत्वजितेंद्रियत्वेसत्यादिभि: परार्थोद्यमेचात्मनेवतुल्य:निरुपम: ६२ सत्पुरुषै: राम: सीतापति: यथासतांकर्णरंध्रेषुप्रविष्ट: ६३
इतिचतुर्थेटीकायांद्वाविंशोध्याय: २२ त्रयोविंशेसभार्यस्यवनेनित्यसमाधित: विमानमधिरुह्याथवैकुंठगतिरीर्यते १ प्रवयसं
वृद्धंदृष्ट्वातपोवन:मागादितितृतीयेनान्वय: स्वकृतोनुसर्ग अन्नादिसर्ग:पुरग्रामादिसर्गश्चवर्द्धित: अशेष:स्वानुसर्गोयेन १ निष्पा
दितइश्वरादेश:प्रजापालनादिर्येनजजिवानजज्ञे २ आत्मजांपृथ्वीविमन:सुचिंतातुरासुसदार:सभार्य: ३ अदांत्मविघ्नविनाशयि

ब्रह्मस्पतिर्ब्रह्मवादे आत्मवत्वेस्वयंहरि: भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु ह्रियाप्रश्रयशीलाभ्यामात्मतुल्य:परो
द्यमे ६२ कीर्त्योर्द्धगीतयापुंभिस्त्रैलोक्येतत्रतत्रहि प्रविष्ट:कर्णरंध्रेषुस्त्रीणांराम:सतामिव ६३ इतिश्रीभागवतेमहा
पुराणेचतुर्थस्कंधेद्वाविंशोध्याय: २२ मैत्रेयउवाच दृष्ट्वात्मानंप्रवयसमेकदावैन्यआत्मवान् आत्मनावर्द्धिताशेष
स्वानुसर्ग:प्रजापति: १ जगतस्तस्थुषश्चापिवृत्तिदोधर्मविभ्रतां निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान् २ आत्म
जेष्वात्मजांन्यस्यविरहाद्रुदतीमिव प्रजासुविमन:स्वक:सदारोगात्तपोवनं ३ तत्राप्यदाभ्यनियमोवैखानससुसंमते
आरब्धउग्रतपसियथास्वविजयेपुरा ४ कंदमूलफलाहार:शुष्कपर्णाशन:क्वचित् अपभक्ष:कतिचिन्मासानवायुभक्ष:
तत:परं ५ ग्रीष्मेपंचतपावीरोवर्षास्वासारषाड्मुनि: अकंठमग्नशिशिरउदकेस्थंडिलेशय: ६ तितिक्षुर्यतवाग्दांतऊ
र्ध्वरेताजितानिल: आरराधयिषु:कृष्णमचरत्तपउत्तमं ७ तेनक्रमानुरुद्धेनध्वस्तकर्मामलाशय: प्राणायामै:स
न्निरुद्ध:षड्वर्ग:छिन्नबंधन: ८

तुमशक्यानियमायस्य वानप्रस्थानांसुसंमते उग्रेतपसिआरब्ध:प्रवृत्त:कर्तरिक्त: स्वस्वधरामंडलस्यविजयपर्वययामहतायत्ने
नप्रवृत्त: ४ उग्रंतपोदर्शयति कंदमूलेतित्रिभि:५ क्वचितकदाचितचतुर्दिक्षुचत्वारोग्नय: उपरिसूर्यइतिपंचानांतप: संतापोय
स्यपंचतपा: आसारंसहनइतिआसारषाट्शिशिरेऋतौस्थंडिलशय:भूमिशय:सदा ६ ७ तेनतपसाक्रमानुरुद्धेनशनै:
प्राप्तेनध्वस्तानिकर्माणियस्य अत: अमल: आशयोयस्यछिन्नानिबंधनानिवासनायस्य ८ नमोभगवतेवासुदेवाय

९ १० परिकर्मणापरिचर्ययाशुद्धः सत्वआत्मामनोयस्यतस्यज्ञानमभवत् कीदृशं येनभिजउपाधिंजीवकोशंहृदयग्रंथिं संशया
नांअसंभावनादीनांपरमाश्रयंविछेद कीदृशेन अनयाभक्त्यानिशितेन कथंभूतया तस्यभगवतःसंस्मरणेन अनुपूर्तिःसंपूर्ति
यस्याः तयानिशितेन ११ किंचछिन्नान्यधीःदेहात्मबुद्धिर्यस्ययतोधिगतात्मगतिः अतएवनिरीहः प्राप्तासुसिद्धिषुनिस्पृहः ये
नवयुनेनज्ञानेनइदंविछेद ततंतत्यजत्यक्तवानतत्प्रयत्नादप्युपरराममित्यर्थः तस्ययोग्यसिद्धिष्वपिनिस्पृहत्वंयुक्तमेवेत्याह तावन्ना
प्रमत्तः किंतुप्रमत्तोभवति तस्यश्रीकृष्णकथारतत्वात् तासुलोभोनजातइत्यर्थः १२ १३ देहत्यागप्रकारमाह संपीडयेतिपंचभिः

सनत्कुमारोभगवान्यदाहाध्यात्मिकंपरं योगंतेनैवपुरुषमभजत्पुरुषर्षभः ९ भगवद्धर्मिणःसाधोश्रद्धयायत
तःसदा भक्तिर्भगवतिब्रह्मण्यनन्यविषयाभवत् १० तस्यानयाभगवतःपरिकर्मशुद्धसत्वात्मनस्तदनुस्मरणा
नुपूर्त्या ज्ञानंविरक्तिमदभून्निशितेनयेनचिछेदसंशयपदंनिजजीवकोशं ११ छिन्नान्यधीरधिगतात्मगतिर्निरी
हस्तत्तत्यजेछिनदिदंवयुनेनयेन तावन्नयोगगतिभिर्यतिरप्रमत्तोयावद्गदाग्रजकथासुरतिंनकुर्यात् १२ एवंसर्वा
त्मप्रवरःसंयोज्यात्मानमात्मनि ब्रह्मभूतोदृढंकालेतत्याजस्वंकलेवरं १३ संपीड्यपायुंपार्ष्णिभ्यांवायुमुत्सारयञ्छनैः
नाभ्यांकोष्ठेष्ववस्थाप्यहृदुरःकंठशीर्षणि १४ उत्सर्पयंस्तन्मूर्ध्नि क्रमेणावेश्यनिस्पृहः वायुंवायौक्षितौकायंतेजस्तेजस्य
ययुजत १५

वायुंगुदंसंपीड्यतिमुक्तासनंसूचितं संपीड्यसीवनींसव्यगुल्फेनैवतुमध्यतः सव्येदक्षिणगुल्फेनमुक्तासनमितीरितं मूलाधा
राद्वायुमुत्सारयन्नूर्ध्वंनयन्नाभ्यामवस्थाप्यततः कोष्ठेष्ववस्थाप्यअयुयुजदित्युत्तरेणान्वयः कोष्ठान्येवाह हृदादीनांद्वंद्व
क्यं शीर्षंब्रह्मध्यतस्मिन्नंवायुं पाठांतरएवं १४ एवंअसून्प्राणानउत्सर्पयन्क्रमेणमूर्ध्निब्रह्मरंध्रेआविश्यततोदेहारंभकपंच
भूतानिसमष्टिभूतेषुविलापितवान् तदाह वायुंबाह्यवायौ अयुयुजतएकीकृतवान कायंदेहगतकठिनांशंक्षितौ १५ राम

553
1981

स्थानिइंद्रियछिद्राणि आकाशेवकाशइवांशंतोये तदेवंदेहंप्रविलाप्याद्वितीयात्मप्रतिपत्त्यर्थंमहाभूतादीनामपिलयमाह क्षितिमंभ
स्येकीकृतवान् तदंभस्तेजसि अदस्तेजःवायौ अमुवायुंनभसि १६ तदेवंतामसाहंकारकार्याणामाकाशापर्यंतंलयमुक्त्वासात्विकरा
जसाहंकारकार्याणांलयमाह इंद्रियेषुमनइतिदेवानामप्युपलक्षणंसविकल्पज्ञानेनमनसइंद्रियेराकर्षणात्तेषुलयाभिधानंन
तुतत्तत्कार्यत्वात्ततदुक्तंगीतासु इंद्रियाणांहिचरतांयन्मनोनुविधीयतइति अत्रचइंद्रियविषयाकृष्टराक्षिप्तं ध्यायतांमनइति इंद्रि
येषुनभइतिपाठेप्ययमर्थः भट्टानांमतेनभश्वासुषु केषांचिन्मानसं अनुमानिकमतेपीद्रियव्यापारोस्त्येव अतोनभोगुणश्वश
ब्दःश्रोत्रग्राह्यः अतइंद्रियग्राह्यत्वादिंद्रियेषुनभोविलापितवानिति तानींद्रियाणियथोद्भवंउद्भवोत्रप्रवृत्तिलाभः सविवेचया

स्तान्याकाशइवंतोयेयथास्थानंविभागशः क्षितिमंभसितत्तेजस्यदोवायुंनभस्यमुं १६ इंद्रियेषुमनस्तानितन्मात्रे
षुयथोद्भवं भूतादिनान्यमूत्थ्यमहत्यात्मनिसंदधे १७ तंसर्वगुणविन्यासंजीवेमायामयेन्यधात् तंचानुश
यमात्मस्थमसावनुशयीपुमान् १८ ज्ञानवैराग्यवीर्येणस्वरूपस्थोजहात्प्रभुः १८ अर्चिर्नाममहाराज्ञीतत्पत्न्यनु
गतावनं सुकुमार्यतदर्हाचपद्भ्यांयत्स्पर्शनंभुवः १९

धीनइतिश्रोत्रादीनांविशेषणंशब्दादिषुलयः यद्वा तन्मात्रकार्याण्येवेंद्रियाणि मनोप्यपंचीकृतपंचतन्मात्रकार्यं अहंकारिक
चाभिधानंतुतदाधीनत्वविवक्षयेत्यविरोधः भूतादिनाहंकारेणप्रागवशिष्टेनभूः सहितानींद्रियाणिउक्षिप्यपरतानीत्वाभूतादि
क्षिप्त्वातेनसहमहत्तत्वेनसंदधइत्यर्थः १७ सर्वेषांगुणानांकार्याणांविन्यासःस्थितिर्यस्मिन्तंमहांतंमायामयेमायोपाधिप्रधान
जीवे तंचानुशयमुपाधिंयःपूर्वमनुशयीपुमानजीवःअसौप्रभुःब्रह्मणिस्थितःसन्अजहादित्यर्थः १८ वनप्रवेशराज्ञाःकथा
माह अर्चिर्नामेतितुचतुर्भिः अनुगताअनुजगाम अतदर्हातदपिनार्हतिया किंपद्भ्यांभुवःस्पर्शनमितियत् १९ राम

भ तुर्व्रतंयद्भूमिशयनादितस्मिन् धर्मेयानिष्ठातया ऋषीणामीयमाणदेहयात्राकंदमूलादिवृत्तिः तथाच आर्तिदुःखंनप्रापतत्रहे
तुः श्रेयसः कारणस्पर्शनंमानश्वताभ्यांनिवृत्तिर्यस्याः २० पृथिव्याः पतिः दुहितत्वंतस्याः देवतारूपेणविपन्नंनष्टं अखिलंचेतनादिकं
यस्मिन्तथाभूतंदेहमालक्ष्यतद्देहंचितामारोपयन् २१ कृत्यंतत्तत्कालोचितंविधाय कृदिन्याजले आप्लुतास्नातासती भर्तृरुदकंदत्वा

अतीवभर्तुर्व्रतधर्मनिष्ठया शुश्रूषयाचार्षदेहयात्रया नाविंदतार्तिंपरिकर्षितापिप्रेयस्करस्पर्शनमाननिर्वृत्तिः २० देहं
विपन्नाखिलचेतनादिकंपत्युःपृथिव्यादयितस्यचात्मनः आलक्ष्यकिंचिच्चविलक्ष्यसासती चितामथारोपयदद्रिसानुनि
२१ विधायकृत्यंह्रदिनीजलाप्लुतादत्वोदकंभर्तुरुदारकर्मणः नत्वादिविस्थान्त्रिदशान्त्रिःपरीत्यविवेशवह्निं ध्यायतिभ
र्तृपादं २२ विलोक्यानुगतिंसाध्वीपृथुंवीरवतीपतिं तुष्टुवुर्वरदादेवैर्देवपत्न्यःसहस्रशः २३ कुर्वंत्यःकुसुमासारंतस्मिन्
मंदरसानुनि नदत्स्वमरतूर्येषुगृणंतिस्मपरस्परं २४ देवाऊचुः अहोइयंवधूर्धन्यायावैन्यंप्रभुजांपतिं सर्वात्मनापतिं
भेजेयज्ञेशंश्रीवधूरिव २५ सैषानूनंब्रजत्यूर्द्ध्वमनुवैण्यंपतिंसती पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येनकर्मणा २६ते
षांदुरापंकिंत्वन्यन्मर्त्यानांभगवत्पदं भुविलोलायुषोयेवैनैष्कर्म्यंसाधयंत्यत २८ सवंचितोबतात्मध्रुक्कृच्छ्रेण
महताभुवि लब्ध्वापवर्ग्यंमानुष्यंविषयेषुविषज्जते २९ मैत्रेयउवाच स्तुवंतीष्वमरस्त्रीषुपतिलोकंगतावधूः
योवा आत्मविदांधुर्योवैन्यःप्रापाच्युताश्रयः ३०

दिवि अंतरिक्षस्थितान्नत्वाचवह्निंत्रिःपरीत्यप्रदक्षिणीकृत्यदेवैःसहिताः २३ गृणंतोस्मअभाषंत २५ २६ २७ भगवानप
घतेगम्यते अनेनेतितथा तन्नैष्कर्म्यंज्ञानं एवंचलायुषोपिसाधयंतितेषामन्यद्देवादिपदंकिंदुर्लभंनकिंचिदित्यर्थः २८ अभक्त
शोचंतिसर्वंचितइति यतआत्मनेद्रुह्यंतयेअपवर्गसाधनंमानुष्यंलब्ध्वापिविषयेषासक्तिंयाति ३० श्रीरामजयरामजय

555
1981

३१ ३२ विशांवैश्यादीनांपश्वादीनांवापतिःस्यात ३३ ३४ ३५ ३६ ३७ यद्यपिबहूनिफलानिभवंतितथापिमुक्तान्यसंगएवश्रवणादिकुर्या
त ३८ हवैचित्रवीर्यविदुरमहतोभगवतोमहात्म्यसूचकं पार्थिवींपृथुसंबंधिनीं पृथिवीमितिपाठेवा ३९ प्रथयन्कीर्तयन्भववसिंधोः

इत्थंभूतानुभावोसौपृथुःसभगवत्तमः कीर्तितंतस्यचरितंउद्दामचरितस्यते ३१ यइदंसुमहत्पुण्यंश्रद्धयावहितःपठेत
श्रावयेच्छृणुयाद्वापिसपृथोःपदवीमियात ३२ ब्राह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः वैश्यःपठन्विट्पतिःस्यात
शूद्रउत्तमतामियात ३३ त्रिःकृत्वइदमाकर्ण्यनरोनार्यथवादृता अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः ३४ अस्पष्ट
कीर्तिःसुयशामूर्खोभवतिपंडितः इदंस्वस्त्ययनंपुंसाममंगल्यनिवारणं ३५ धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलाप
हं धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः ३६ श्रद्धयैतदनुश्राव्यंचतुर्णांकारणंपरं ३६ विजयाभिमुखोरा
जाश्रुत्वैतदभियातियान् बलिंतस्मैहरंत्यग्रेराजानःपृथवेयथा ३७ मुक्तान्यसंगोभगवत्यमलांभक्तिमुद्वहन् वैन्य
स्यचरितंपुण्यंशृणुयातश्रावयेत्पठन् ३८ वैचित्रवीर्याभिहितंमहन्माहात्म्यसूचकं अस्मिन्कृतमतिमर्त्यः पार्थवींगति
माप्नुयात ३९ अनुदिनमिदमादरेणशृण्वन्पृथुचरितंप्रथयन्विमुक्तसंगः भगवतिभवसिंधुपोतपादेसचनिपुणां
लभतेगतिंमनुष्यः ४० इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रयोविंशोध्यायः २३ मैत्रेयउवाच विजिताश्वोधि
राजासीत पृथुपुत्रःपृथुश्रवाः यवीयोभ्योददात्काष्ठाःभ्रातृभ्योभ्रातृवत्सलः १ हर्यक्षायादिशत्प्राचींधूम्रकेशायदक्षि
णां प्रतीचींवृकसंज्ञायतुर्यांद्रविणसेविभुः २

पोतपादोयस्य ४० इतिचतुर्थेटीकायांत्रयोविंशोध्यायः २३ एकादशभिरध्यायैःपृथोश्चरितमीरितं प्रचेतसामथाष्टाभि
र्जन्मध्यपंचभिःपितुः १ चतुर्विंशेप्रथोत्रातुःपृथोःप्राचीनबर्हिषः प्रचेतसांजनिस्तेभ्योरुद्रगीतंचवर्ण्यते १ अधिराजाअ
सीत इत्यर्थः यवीयोभ्यः कनिष्ठेभ्यः काष्ठादिशः १ तुर्यांचतुर्थीं २ श्रीराम ७ ७ ७ ७

भा० ६२ शक्रुध्वाद्दथोरश्वमेधे अश्वविजयावसरे ३ अपत्यत्रयमाह पावकइति पुराय: शाप: तस्मान्मनुष्येषुउत्पन्ना: संत: योगगतिंअ च०
ग्नित्वंप्राप्ता: ४ नभस्वत्यामन्यस्यांभार्यायां अंतर्द्धानस्यविशेषणंयइति एतेनशक्रादंतर्द्धानगतिलाभेकारणमुक्तं ५ सचांतर्द्धा
नोराज्ञांवृत्तिंकरादानादिभि: दारुणांपरपीडात्मिकांमन्यमानोविससर्ज ६ हंतिस्वानांक्लेशंइतिहंस: तंपुरुषंपूर्णं कुशलंपुण्यंतद्रू
पेणसमाधिना ७ हविर्द्धानि: हविर्द्धानस्यपुत्र: ८ योगेषुप्राणायामादिषु ९ क्रियाकांडनिष्णातत्वमाहयस्येति इदंवसुधातलंद

अंतर्द्धानगतिंशक्राल्लब्ध्वांतर्द्धानसंज्ञित: अपत्यत्रयमाधत्तशिखंडिन्यांसंगतिं ३ पावक: पवमानश्चशुचिरित्यग्न
य: पुरा वशिष्ठशापादुद्भूता: पुनर्योगगतिंगता: ४ अंतर्द्धानोनभस्वत्यांहविर्द्धानमविंदत यइंद्रमश्वहर्तारंविद्वान
जघ्निवान् ५ राज्ञांवृत्तिंकरादानदंडशुल्कादिदारुणां मन्यमानोदीर्घसत्रव्याजेनविससर्जह ६ तत्रापिहंसंपुरुषं
परमात्मानमात्मदृक् यजंस्तल्लोकतामापकुशलेनसमाधिना ७ हविर्द्धानाद्धविर्द्धानीविदुरासूतषट्सुतान् ब
र्हिषदंगयंशुक्लं कृष्णंसत्यंजितव्रतं ८ बर्हिषत्सुमहाभागोहविर्द्धानि: प्रजापति: क्रियाकांडेषुनिष्णातोयोगेषुकु
रुद्वह ९ यस्येदंदेवयजनमनुयज्ञंवितन्वत: प्राचीनाग्रै: कुशैरासीत् आस्तृतंवसुधातलं १० सामुद्रींदेवदेवोक्ता
मुपयेमेशतद्युतिं यांवीक्ष्यचारुसर्वांगींकिशोरींसुष्ठ्वलंकृतां ११ परिक्रमंतीमुद्वाहेचकमेग्नि: शुकीमिव १२

वयजनंयज्ञवाटंवितन्वत: यत्रैकोयज्ञ: कृत: तत्समीपएवयज्ञांतरंकुर्वंत: संत: अतएवप्राचीनबर्हिरित्युच्यते १० समुद्रस्यक
न्यांदेवदेवेनब्रह्मणोपदिष्टांशतद्युतिंनामकीशोरींबालांपरिक्रमंतींप्रदक्षिणंगच्छंतींशुकीमिवेति एवंव्याख्यायते सप्तर्षीणांस
त्रेतत्रभार्यादर्शनेनाग्नि: कामसंतप्तोभूत् तंचतद्भार्यास्वाहासप्तर्षिभार्यारूपधारिणीसतीरमयामासरमयित्वाचतदेत: शु
कीरूपेणशरस्तंबेनिधायागच्छत् तायथासप्तर्षिभार्याभ्रांत्याग्नि: कामितवान्तद्वदिति शुकीमितिपाठेस्तोकघृतधारामिवेति ६२
११

554/1981

सूर्ययानवाटयेवविबुधादयोर्विजिता: आक्रांता: तच्चनसुरै: पादोक्वणयंस्येवध्वनिमात्रेणस्यर्थ: १२ तुल्यंनामव्रतमाचरश्चयेषां
धर्मस्नाता: धर्मपरायणा: १३ तपसातपसांपतिंहरिमर्चयन्अर्चयामासु: १४ १५ गिरित्रेणरुद्रेण १६ मुनयोपिसंगत्यांगनाप्तुमि
ष्टं यंदध्युरेवकेवलंनतुप्रापु: तेनाशिवेनसह १७ ननुमुनीनांकिंतद्ध्यानेनघोरत्वादित्याशंक्याह आत्मारामोपि लोकरचनाया: पाल

विबुधा: सुरगंधर्वामुनिसिद्धनरोरगा: विजिता: सूर्ययादिक्षुक्वणयंत्येवनूपुरै: १२ प्राचीनबर्हिष: पुत्रा: शतद्युत्यां
दशाभवन् तुल्यनामव्रता: सर्वेधर्मस्नाता: प्रचेतस: १३ पित्रादिष्टा: प्रजा: सर्गेतपसेर्णवमाविशन् दशवर्षस
हस्राणितपसार्चंस्तप: पतिं १४ यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता तद्ध्यायंतोयजंतश्चपूजयंतश्चसंयता: १५
विदुरउवाच प्रचेतसांगिरित्रेणयथासीत्पथिसंगम: यद्वाप्याहहर: प्रीत: सन्नोब्रह्मन्वदार्थवत् १६ संगम: ख
लुविप्रर्षेशिवेनहिशरीरिणां दुर्लभोमुनयोदध्युरसंगाद्यमभीप्सितं १७ आत्मारामोपियस्त्वस्यलोककल्पस्यरा
धसे शक्त्यायुक्तोविचरतिघोरयाभगवान्भव: १८ मैत्रेयउवाच प्रचेतस: पितुर्वाक्यंशिरसाधायसाधव: दि
शंप्रतीचींप्रययुस्तपस्यादृतचेतस: १९ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सर: महन्मनइवस्वच्छंप्रसन्नसलि
लाशयं २० नीलरक्तोत्पलांभोजकल्हारेंदीवराकरं हंससारसचक्राह्वकारंडवनिकूजितं २१

नाय १८ गुर्वाज्ञाकारिणांशिवदर्शनंस्वतएवभवतीत्याशयेनाह प्रचेतसइति १९ समुद्रमुपसमुद्रात्किंचिन्न्यूनंउपाधिकंचेतिक
र्मप्रवचनीय: प्रसन्ना: सलिलाशयामत्स्यादयोयस्मिन् २० नीलोत्पलादीनामाकरंजन्मस्थानं उत्पलांभोजकल्हाराणिरात्रिदि
नसंध्याविकासीनि इंदीवरंनीलोत्पलंतस्यपुनरुक्ति: प्राचुर्यज्ञापनार्थंहंसादिभिर्निकूजितं २१ श्रीरामजयरामजयजयराम

मत्तानांभ्रमराणांसौस्वर्येणहृष्टरोमाणोलतांघ्रिपायस्मिन् पद्मकोशरजोदिक्षुक्षिपतापवनेनोत्सवोयस्मिन् २२ तत्रमृदंगपणवादि
वाद्यमनुपश्चात् दिव्यैर्मार्गभेदैर्मनोहरंगांधर्वगानमाकर्ण्य विस्मयंप्राप्ताः पाठांतरंमृदंगपणवादि अववरक्षतत्तेषांध्वनिमतिरस्कुर्व
दित्यर्थः २३ तेचत्रिलोचनंवीक्ष्यजाताश्चर्याः प्राणेमुरित्युत्तरेणान्वयः तप्तहेमराशिसदृशकांतिंशितिनीलः कंठोयस्य २५ २६ वेदिष
दः बर्हिषदः चिकीर्षितंकर्तुमिष्टंभगवदाराधनंविदितंज्ञातं २७ अनुग्रहकारणमाह यःसाक्षाद्वासुदेवंप्रपन्नः सहिमेप्रियः कथंप्र

मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपं पद्मकोशरजोदिक्षुविक्षिपन्पवनोत्सवं २२ तत्रगांधर्वमाकर्ण्यदिव्यमार्गमनोहरं
विसिस्म्यूराजपुत्रास्तेमृदंगपणवाद्यनु २३ तर्ह्येवसरसस्तस्मान्निः क्रामंतंसहानुगं उपगीयमानममरप्रवरंविबुधा
नुगैः २४ तप्तहेमनिकायाभंशितिकंठंत्रिलोचनं प्रसादसंमुखंवीक्ष्यप्रणेमुर्जातकौतुकाः २५ सतान्प्रपन्नार्तिहरो
भगवान्धर्मवत्सलः धर्मज्ञान्शीलसंपन्नान्प्रीतान्प्रीतउवाचह २६ श्रीरुद्रउवाच यूयंवेदिषदःपुत्राःविदितं
वश्चिकीर्षितं अनुग्रहायभद्रंवएवंमेदर्शनंकृतं २७ यःपरंरहसःसाक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतंवासु
देवंप्रपन्नःसप्रियोहिमे २८ स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंच्यतामेतिततःपरंहिमां अव्याकृतंभगवतोथ
वैष्णवंपदंयथाहंविबुधाःकलात्यये २९

तंरहसः सूक्ष्मात्त्रिगुणात्प्रधानात्जीवसंज्ञितात् पुरुषाच्चपरंप्रकृतिपुरुषयोर्नियंतारमित्यर्थः २८ ततः किंतस्यमहत्त्वमत्ता
दित्याह स्वधर्मनिष्ठःपुमान्बहुभिर्जन्मभिर्विरिंच्यतांप्राप्नोतिततोपिपुण्यातिशयेनमामेतिभागवतस्तु अथदेहांतरंअव्या
कृतप्रपंचातीतंवैष्णवंपदमेति यथाअहंरुद्रोप्यत्र अधिकारिकवर्तमानः विबुधादेवाश्च अधिकारिकाः कलात्ययेअधि
कारांतेलिंगभंगसतिएष्यंति २९ श्रीरामजयरामजयजयराम श्रीराम

559
1921

अथभागवतत्वात्यूयंमेप्रियास्तभवद्भिरपिमयिप्रीतिःकार्याइत्याशयेनाह मदन्योभागवतानांचप्रेयान्नास्ति ३० अथइदंजप्तव्यंश्रूयं
तामितिविविक्तमंकीर्णंयथाभवति ३१ ३२ सृष्ट्यादौब्रह्मणादृष्ट्वापुत्रेभ्यःप्रोक्तमिष्टदं स्तोत्रंप्राहप्रचेतोभ्यःकृपयाभगवान्शिवः ते
जितंतवोत्कर्षः आत्मविद्वर्याणांस्वस्तयेशोभनसत्तायैस्वानंदलाभायेत्यर्थः ३२ अतोमेस्वस्तिः स्वानंदसत्तास्तु ननुममोत्कर्षेमद
र्थएवकिंनस्यात्तत्राह भवताराधसास्वानंदरूपेणराद्धंसिद्धंत्वंपरमानंदरूपेणैवनित्यंस्थितइत्यर्थः अतएवंभूताय आत्मनेतुभ्यं
नमः सर्वस्मैसर्वरूपाय सर्वरूपत्वंप्रपंचयन्प्रणमति सार्द्धैर्दशभिः पंकजंलोकात्मकंनाभौयस्यतस्मैकारणायात्मनेनमःकारण

अथभगवतायूयंप्रियास्थभगवान्यथा नमद्भागवतानांचप्रेयानन्योस्तिकर्हिचित् ३० इदंविविक्तंजप्तव्यंपवित्रंमं
गलंपरं निश्रेयसकरंचापिश्रूयतांतद्वदामिवः ३१ इत्यनुक्रोशहृदयोभगवानाहतान्शिवः बद्धांजलीन्राजपुत्रा
न्नारायणपरोवचः ३२ श्रीमहादेवउवाच सृष्ट्यादौब्रह्मणासृष्ट्वापुत्रेभ्यःप्रोक्तमिष्टदं पुत्रःप्राहप्रचेतोभ्यःकृप
याभगवान्शिवः ३२ जितंत आत्मविद्वर्यस्वस्तयस्वस्तिरस्तुमे भवताराधसाराद्धंसर्वस्मा आत्मनेनमः ३३ नमःपंकज
नाभायभूतसूक्ष्मेंद्रियात्मने ३३ वासुदेवायशांतायकूटस्थायस्वरोचिषे संकर्षणायसूक्ष्मायदुरंतायांतकायच ३४
नमोविश्वप्रबोधायप्रद्युम्नायांतरात्मने नमोनमोनिरुद्धायहृषीकेशेंद्रियात्मने ३५ नमःपरमहंसायपूर्णायनि
भृतात्मने स्वर्गापवर्गद्वारायनित्यंशुचिषदेनमः ३६

तादेवसृज्यानांप्राणिनांयउपाधयभूतानिसूक्ष्माणितन्मात्राणिइंद्रियाणिचतेषामात्मनेनियंत्रे ३३ अंतःकरणचतुष्टयाधिष्ठात
त्वेनप्रणमतिचतुर्भिःश्लोकार्द्धैः वासुदेवायचित्ताधिष्ठात्रे कूटस्थायनिर्विकारायचित्तस्यैकरूपत्वात् संकर्षणायअहंकाराधिष्ठा
त्रेसूक्ष्माय अव्यक्तायदुरंताय अनंताय अंतकायमुखाग्निनालोकदाहकाय ३४ विश्वस्यप्रकृष्टोबोधोयस्मात् अंतरात्मनोबुध्या
धिष्ठात्रेहृषीकाणामीशायदींद्रियंमनः तदात्मने ३५ सूर्यरूपेणप्रणमति परमहंसायसूर्यायपूर्णायतेजसाविश्वव्यापिने निभृता
त्मनेस्वयवृद्धिह्रस्वशून्याय स्वर्गापवर्गद्वारायच शुचिर्नि अंतःकरणनिषीदतीतिशुचिषत्तस्मै हंसःशुचिषदितिश्रुतः ३६

हिरण्यंवीर्यंयस्यतस्मैअग्निरूपायचातुर्होत्रंकर्मतस्मैतत्साधनायेत्यर्थः कुतः तंतवेयज्ञविस्ताराय सोमत्वमाह ऊर्जोपितृणामन्ना
यईषेदेवानामन्नाय यज्ञरेतसेसोमाय सहपितृणांदेवानांचान्नंएवंरूपायात्रय्याःपतयहरयेनमः ३७ सूर्याग्निसोमत्वेनेवतेजस्त्व
मुक्तं जलत्वमाह सर्वरसात्मनेजलरूपायविशेषायपृथिवीरूपाय सर्वेषांमतानांप्राणिनांआत्मानःतेषांदेहायस्थवीयसेविराड्देहा
यच ३८ त्रैलोक्यपालायवायवे सहआदिरूपायसहिप्राणरूपेणत्रैलोक्यंपालयतिसह आदिधर्मोचनभसे आकाशाय अर्थानां
लिंगायज्ञापकायशब्दगुणत्वात अंतर्बहिर्व्यवहारालंबनायएवमहाभूतरूपत्वमुक्तं ३९ अमुष्मैस्वर्गायमह्यरिवर्चसे एकंवेज्योतिष्मंतंपु

नमोहिरण्यवीर्यायचातुर्होत्रायतंतवे नमऊर्जइषेत्रय्याःपतयेयज्ञरेतसे ३७ तृप्तिदायचजीवानांनमःसर्वसात्मने
सर्वसत्वात्मदेहायविशेषायस्थवीयसे नमस्त्रैलोक्यपालायसहओजोबलायच अर्थलिंगायनभसेनमोंतर्बहिरात्मने
३९ नमःपुण्यायलोकायअमुष्मैभूरिवर्चसे प्रवृत्तायनिवृत्तायपितृदेवायकर्मणे ४० नमोधर्मविपाकायमृत्यवेदुःख
दायच नमस्तआशिषामीशमनवेकारणात्मने ४१ नमोधर्मायबृहतेकृष्णायाकुंठमेधसे पुरुषायपुराणायसांख्य
योगेश्वरायच ४२ शक्तित्रयसमेतायमीढुषेहंकृतात्मने चेतआकूतिरूपायनमोवाचविभूतये ४३

ण्यंलोकंयातीतिश्रुतेः प्रवृत्तायनिवृत्तायचकर्मणेपितृदेवाययथाक्रमंपितृदेवप्राप्तिफलाय ४० अधर्मफलरूपायचमृत्य
वे ईशःआशिषांकारणात्मने सर्वकर्मफलदात्रे मनवेसर्वज्ञायमंत्रात्मकायेतिवा ४१ विष्णुत्वेनप्रणमति बृहतेधर्मायपरमध
र्मात्मनेकृष्णाय ४२ रुद्ररूपेणप्रणमति मीढुषेरुद्राय अहंकृतमहंकारस्तदात्मनेसचकर्तृकारणकर्मशक्तित्रयसमेतस्तस्मै ब्रह्म
त्वेनप्रणमति चेतोज्ञानं आकूतिःक्रियातद्रूपाय वाचाविविधाप्रवृत्तिःसृष्टिर्यस्मात्तस्मै ४३

६४

561
1981

एवंनमस्कृत्यदर्शनंप्रार्थयतेदर्शनमितिनवभिः भागवतेसत्कृतंदर्शनंदेहीत्यस्यविवरणंरूपमित्यादिप्रदर्शयिस्यंतं स्वानांभक्तानांप्रिय
तमंरूपंदर्शयेतिनवमोनान्वयः सर्वेषामिंद्रियाणांयेगुणाविषयास्तेषामंजनंव्यंजकंसर्वेंद्रियविषयरूपमित्यर्थः सर्वेंद्रियाणिस्वगु
णेरनक्तिरंजयतीतिवा ४४ स्निग्धप्रावृषिघनस्तद्वत् श्यामं सर्वेषांसौंदर्याणांसंग्रहोयस्मिन् चारवःआयताश्चत्वारोबाहवोयस्मि
न् सुजातंयथोचितंसर्वावयवंरुचिरं आननंयस्मिन् ४५ पद्मस्यकोशमध्ययानिपलाशानितद्वदक्षीणियस्य सुकपोलमास्यंयस्मि
न् समौकर्णौविभूषणंयस्यकुंडलयोरग्रेवक्ष्यमाणत्वात् ४६ प्रीत्याप्रहसिताविवापांगोयस्मिन् ४७ स्फुरंतिकिरीटादीनियस्मिन्

दर्शनंवोदिदृक्षूणांदेहिभागवतार्चितं रूपंप्रियतमंस्वानांसर्वप्रियगुणांजनं ४४ स्निग्धप्रावृड्घनश्यामंसर्वसौंदर्यसं
ग्रहं चार्वायतचतुर्बाहुंसुजातरुचिराननं ४५ पद्मकोशपलाशाक्षंसुंदरभ्रुसुनासिकं सुद्विजंसुकपोलास्यंसमकर्ण
विभूषणं ४६ प्रीतिप्रहसितापांगमलकैरुपशोभितं लसत्पंकजकिंजल्कदुकूलंमृष्टकुंडलं ४७ स्फुरत्किरीटवलय
हारनूपुरमेखलं शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ४८ सिंहस्कंधत्विषोबिभ्रत्सौभगग्रीवकौस्तुभं श्रिया
नपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ४९ पूररेचकसंविग्नवलिवल्गुदलोदरं प्रतिसंक्रामयद्विश्वंनाभ्यावर्तगभीरया ५०

शंखादिमत् उत्तमर्द्धिर्लक्ष्मीः यद्वा एतैरुत्तमाऋद्धिरुत्कर्षोयस्मास्तीतितत् ४८ सौभगयुक्ताग्रीवायेनसिंहस्यस्कंधपरितःप्रस
रंतःकेसराएवत्विषःतादृशीःसर्वतःत्विषोबिभ्रत्चासौसौभगग्रीवःकौस्तुभोयस्मिन् यद्वासिंहस्येवयोस्कंधौतयोस्त्विषःकुंड
लहारादिदीप्तिंबिभ्रती पृथग्विशेषणं सौभगयुक्ताग्रीवायेनसंकौस्तुभोयस्मिन् श्रियाहेतुभूतयाक्षिप्तःतिरस्कृतःनिकषाश्मा
स्वर्णरेखांकितनिकषपाषाणोयेनतादृशोरसाउल्लसच्छोभमानं ४९ श्वासोच्छ्वासाभ्यांसंविग्नाश्चंचलावलयस्ताभिर्वल्गुदल
वत् अश्वत्थदलसदृशमुदरंयस्मिन् प्रतिसंक्रामयन् यतोनिर्गतंतेनवद्वारेणपुनःप्रवेशयदतिवा ५० श्रीरामकृष्णाभ्यां

भा० ६५ श्यामश्रोण्योरधिकंरोचिष्णुयत्पीतंदुकूलंतत्रस्वर्णमयीमेखलायस्मिन् अंघ्रीचजंघेचनिम्नेउन्नतेजानुनीचसमेश्चारुभिरेतैःशोभनंद च०
र्शनंयस्यसमाश्चारवःअंघ्र्यादयोयस्मिन्निम्नजानुनीयस्मिन् शोभनंदर्शनंयस्येतिपदत्रयंच ५१ पदादीपरुज्ञानीयेन यद्वा एवंभूतेनप
रोपलक्षितंरूपंप्रदर्शयेत्यर्थः शारदियत्पद्मंतस्यपलाशंतद्वद्रोचिर्यस्यतेननखदीधितिभिरंतर्भवमघमज्ञानंविधुन्वतास्वीयंरूपंपरंशरणं
प्रदर्शन अपास्तंप्रह्लादादीनांसाध्वसंयेनतत् हेगुरोयतस्त्वमेवतमोजुषामज्ञानांमार्गप्रदर्शकोगुरुः ५२ अतिदुर्लभंमयाप्रार्थितमिति
सोत्सेवाह एतद्रूपमनुध्येयंध्यानार्हंनतुप्रत्यक्षतःप्राप्यमित्यर्थः ५३ तर्हिकिंकेनापिनप्राप्यते अतआहभवानिति तद्दुर्लभत्वमेवाह स्व

श्यामश्रोण्योधिरोचिष्णुदुकूलस्वर्णमेखलं समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं ५१ पदाशरत्पद्मपलाशरोचिषानख
द्युभिर्ध्यांतरघंविधुन्वता प्रदर्शयस्वीयमपास्तसाध्वसंपदंगुरोमार्गगुरुस्तमोजुषां ५२ एतद्रूपमनुध्येयमात्मबुद्धि
मभीप्सता यद्भक्तियोगोभयदःस्वधर्ममनुतिष्ठतां ५४ भवानभक्तिमतालभ्योदुर्लभःसर्वदेहिनां स्वाराज्यस्याप्यभि
मतएकांतेनात्मविद्गतिः ५५ तंदुराराध्यमाराध्यसतामपिदुरापया एकांतभक्त्याकोवांछेतपादमूलंविनाबहिः ५६
यत्रनिर्विष्टमरणंकृतांतोनाभिमन्यते विश्वंविध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ५६ क्षणार्द्धेनापितुलयेनस्वर्गंना
पुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ५७

र्गराज्यंयस्यतस्यापिअभिमतःस्पृहणीयः किंच एकांतेनयभात्मवित्तस्यापिगतिर्गम्यः ५४ अतस्त्वद्व्यतिरेकेणनकिंचिद्वांछामीत्याह तं
त्वांएकांतभक्त्या आराध्यबहिःस्वर्गादिसुखं ५५ तत्रहेतुःयत्रपादमूले अरणंशरणं प्रविष्टंकृतांतःकालोममायंवश्यइतिनाभिमानंकरो
तिकिंकुर्वन् वीर्यंप्रभावःशौर्यमुत्साहःताभ्यांविस्फूर्जितयाक्षुभितयाभ्रुवाविश्वंविध्वंसयन्नपितत्पादमूलेप्रविष्टस्यकृतांतभयाभावः
५६ कियानयंलाभःयतत्वद्भक्तसंगएवसकलपुरुषार्थश्रेणिशिरसिमनीनतीत्याह भगवतस्तवसंगिनांसंगस्यक्षणार्द्धेनापिनस्वर्गं
तुलयेसमंनगणयामिनचअपुनर्भवंमोक्षंमर्त्यानामाशिषःराज्यादयःकिमुत ५७ श्रीरामजयरामजयजयरामरांकृष्णाभ्यां ६५

563
1981

अथअतोहेनोःअनघोअघहरावंघ्रीयस्यतस्यतवकीर्तिर्यशःतीर्थंगंगातयोःक्रमेणांतर्बहिःस्नानाभ्यांविधूतःपाप्मायेषां अतएवंभूते
ष्वनुक्रोशःकृपासुसत्वंरागादिरहितंचित्तंशीलमार्जवादिविद्यतेयेषांतेषांसंगोयोस्माकंस्यातएषएवंनस्तवानुग्रहः ५८ तत्वज्ञानंच
त्वद्भक्तसंगादेवभवतीत्याहनयस्येतियेषांसत्वांभक्तियोगेनानुगृहीतंशुद्धंसतयस्यचित्तंबाह्यार्थविक्षिप्तंनभवति तमोरूपायांगुहायां
चनाविशततल्लयंनप्रापयंस्तत्रतदासमुनिस्तवगतिंतत्वंपश्यति ५९ कीदृशंतत्वंतदाह यत्रेति जगतउपादानत्वेनतत्वंलक्षितं ६० नि

अथानघांघ्रेस्तवकीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनां भूतेष्वनुक्रोशसुसत्वशीलिनांस्यात्संगमोनुग्रहएषनस्त
व ५८ नयस्यचित्तंबहिरर्थविभ्रमंतमोगुहायांचविशुद्धमाविशत् यद्भक्तियोगानुगृहीतमंजसामुनिर्विचष्टेननुतत्रते
गतिं ५९ यत्रेदंव्यज्यतेविश्वंविश्वस्मिन्नवभातियत् तत्वंब्रह्मपरंज्योतिराकाशमिवविस्तृतं ६० योमाययेदंपुरुरूप
यासृजतबिभर्तिभूयःक्षिपयत्यविक्रियः यद्भेदबुद्धिःसदिवात्मदुःस्थयातमात्मतंत्रंभगवन्प्रतीमहि ६१ क्रियाकला
पैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंतिसिद्धये भूतेंद्रियांतःकरणोपलक्षणंवेदेचतंत्रेचतएवकोविदाः

त्वेनापितद्देवलक्षयन्नाह यइति यइदंविश्वंसदिवपरमार्थमिवासृजत कथंभूतया यतययाभेदबुद्धिःअन्येषांभवतितयाआत्म
नित्वयिदुःस्थयास्वकार्यंकर्तुमसमर्थया तंत्वांनिर्भेदंप्रतीमहिजानीमः ६१ यद्यपित्वमेवनिर्भेदंब्रह्मतथापिप्रागुक्तसाकारंतवरू
पंयेयजंतितएववेदागमतत्वज्ञाइत्याह क्रियाकलापैर्यैकर्मयोगिनःपूजयंतितएवकोविदाःनत्वेनदनादस्यकेवलज्ञानेप्रवृत्ताः
तंत्रेआगमेकथंभूतमिदंभूतेंद्रियांतःकरणैरस्वतंत्रैर्यदुपलक्ष्यतेनियंतृरूपंतत् ६२ श्रीराम

नन्वभिन्नेमर्यिभेदंकुर्वतःकथंतेकोविदाः नहितैर्भेदःक्रियतेकिंतुलयैवक्रीडार्थंचेतनाचेतनात्मकोभेदःकृतइत्याह त्वमिति आद्यस्त्वमेक
एवसुप्तामायाख्याशक्तिर्यस्य पश्चात्तयाशक्त्यारजःसत्वतमसांद्वंद्वैक्यं यतोरजआदेः महानहंकारः खंचमरुच्च अग्निःवार्दरा श्चवाः
उदकंधरापृथ्वीसुराश्चऋषयश्चभूतगणाश्च एवमिदंजगतयतोभवति तद्विभिद्यतइत्यर्थः ६३ एतदुपपादयतिसृष्टमिति जरायुजांडजस्वे
दजोद्भिज्जरूपेणचतुर्विधंस्वांशेनप्रविष्टः अथाइतिहेताःपुरस्यांतःसंतंअंशंसंचिराभामंपुरिशयनात्पुरुषंविदुः तर्हिकिमीश्वरमेवसं
सारिणंविदुः नेत्याह सरघामधुमक्षिकास्ताभिःसृष्टंमध्विवक्षुल्लकंविषयसुखमभिधावतःसन्यो भुंक्तेनंजीवंविदुः तथाचश्रुतिः
तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नंनन्यो अभिचाकशीतीतिइतिनिर्णीतंचगुहांप्रविष्टावात्मानौहितदर्शनादित्यत्र ६४ तवतुसर्वनियंतुःकुतः

त्वमेवआद्यःपुरुषःसुप्तशक्तिस्तयारजःसत्वतमोविभिद्यते महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणाइदंयतः ६३
सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन अथाविदुस्तंपुरुषंसंतमंतर्भुंक्तेहृषीकैर्मधुसारघंयः ६४ यएव
लोकाननुचंडवेगोविकर्षसित्वंखलुकालयानः भूतानिभूतैरनुमेयतत्वोघनावलीर्वायुरिवाविषह्यः ६५ प्रमत्तमुच्चै
रितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसं त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकः ६६ कस्त्व
त्पदाब्जंविजहातिपंडितोयस्तेवमानव्ययमानकेतनः विशंकयास्मद्गुरुरर्चतिस्मयद्विनोपपत्तिंमनवश्चतुर्दश ६७

संसारइत्याह यःस्वशक्त्येदंसृष्टवान्सएवत्वंखलुभूतैरेवभूतानि मेघपंक्तीर्वायुरिवकालयानःविचालयन् विकर्षसिसंहरसि अ
नुमेयतत्वः अलक्ष्यस्वरूपः ६५ विकर्षणप्रकारमाह प्रमत्तमिति इतिकृत्यंएवंएवमिदंकर्तव्यमितिचिंतयाच्चैःप्रमत्तं तत्रहेतुः वि
षयेषुलालसंअतिकामुकंप्राप्तेपिविषयेप्रवृद्धलोभं अंतकस्त्वमभिपद्यसे आक्रमसि क्षुधालेलिहानःजिह्वयाओष्ठप्रांतौस्पृश
नसर्पोमूषकमिव ६६ अतःकस्त्वत्पदाब्जंत्यजेत पंडितश्चेत्कथंभूतःयस्तेवावमानोनादरस्तेनव्ययमानंकेतनंशरीरंयस्य यद
स्माकंगुरुब्रह्मापिनिस्मातिसर्वेषांभ्रातॄणांवाक्यविशंकयानानाशंकयाविनोपपत्तिमितिदृढविश्वासेनमनवश्चार्चंतिस्म ६७

565
1981

उपसंहरति अथेतिरुद्रभयेनस्तध्वं अतःनकुतश्चिद्भयंयस्मात्तादृशीगतिःअसि ६९ ७० योगादेशंनामेतस्तोत्रंउपासाद्यपाठतः
प्राप्यमनसाधारयतः अभ्यस्यतजपत ७१ विश्वसृजांपतिर्ब्रह्मा सिसृक्षुःसृष्टवंतः ७२ ज्ञानमवनौर्यस्य ७३ युक्तएकाग्रचित्तःयो
धियानोभवति असौ ७४ असुष्मादरःअसत्वरःस्थिरःसन्मद्गीतंस्तोत्रंतेनगीतानस्तुतान एकएववल्लभःप्रियआश्रयस्तस्मात ७५

अथत्वमसिनोब्रह्मन्परात्मन्विपश्चितां विश्वंरुद्रभयध्वस्तमकुतश्चिद्भयागतिः ६८ इदंजपतभद्रंवोविशुद्धानृपनंद
नाः स्वधर्ममनुतिष्ठंतोभगवत्यर्पिताशयाः ६९ तमेवात्मानमात्मस्थंसर्वभूतेष्ववस्थितं पूजयध्वंगृणंतश्च ध्यायंत
श्चासकृद्धरिं ७० योगादेशमुपासाद्यधारयंतोमुनिव्रताः समाहितधियःसर्वएतदभ्यस्यतादृताः ७१ इदमाहपुरा
स्माकंभगवान्विश्वसृक्पतिः भृग्वादीनामात्मजानांसिसृक्षुःसंसिसृक्षतां ७२ तेवयंचोदितास्सर्वेप्रजासर्गेप्रजेश्व
राः अनेनध्वस्ततमसोसिसृक्ष्मविविधाप्रजाः ७३ अथेदंनित्यदायुक्तोजपन्नवहितःपुमान् अचिरात्श्रेयआप्नोति
वासुदेवपरायणः श्रेयसामिहसर्वेषांज्ञानंनिःश्रेयसंपरं ७३ सुखंतरतिडःपारंज्ञाननौर्व्यसनार्णवं यइमंश्रद्धया
युक्तोमद्गीतंभगवत्स्तवं ७४ अधीयानोदुराराध्यंहरिमाराधयत्यसौ विंदतेपुरुषोमुष्मात्यद्यदिच्छत्यसत्वरः ७५
मद्गीतगीतात्सुप्रीतात्श्रेयसामेकवल्लभात यइदंकल्यउत्थायप्रांजलिःश्रुद्धयान्वितः ७६ शृणुयात्श्रावयन्मर्त्योमुच्य
तेकर्मबंधनैः ७६ गीतंमयेदंनरदेवनंदनाःपरस्यपुंसःपरमात्मनःस्तवं जपंतएकाग्रधियस्तपोमहच्चरध्वमंतेतत
आप्स्यतेप्सितं ७७ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेचतुर्विंशोध्यायः २४

कल्येउषसि यःश्रावयेत ७८ तपश्चरततनस्तपसोंतईप्सितंप्राप्स्यथ ७७ इतिटीकायांचतुर्विंशः प्रचेतस्सुतपस्यत्सुतस्मिन्
नारदोघृणी प्राचीनबर्हिषेध्यात्मंपरोक्षेणाहपंचभिः ११ पुरंजनकथाव्याजात्पंचविंशेतुनारदः आत्मनोबुद्धिसंगेनविविधामा
हसंसृतिं २ प्रचेतस्सुतपस्तीव्रंतप्यमानेषुनारदः पुरंजनकथाकूटंप्राहप्राचीनबर्हिषे ३ श्रीरामजयरामजयजयराम श्री

 १ २ प्रचेतःसुतपश्चात्तु नारदः प्राचीनबर्हिषं बोधितवान् अतः प्रचेतसां कथामसमाप्यैव तत्पितुर्वृत्तमाह प्राचीनबर्हिषमिति ३
श्रेयः फलमीहसे इच्छसि इहकर्मणि तदुभयं नष्यते विचारके: ४ परं श्रेयः मोक्षं कर्मभिरपविद्धा विक्षिप्ता धीर्यस्य ५ किंच गृहेषु स्थितः पु
त्रादिष्वेवार्थधीः पुरुषार्थधीर्यस्य कूटं कपटं ६ दयालुः कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगानुभावेन यज्ञपशून प्रत्यक्षं

मैत्रेय उवाच इति संदिश्य भगवान्बार्हिषदैरभिपूजितः पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः १ रुद्रगीतं भगवतः स्तोत्रं
सर्वे प्रचेतसः जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले २ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसं नारदोध्यात्मतत्त्वज्ञः कृ
पालुः प्रत्यबोधयत् ३ श्रेयस्त्वं कतमद्राजन्कर्मणात्मन ईहसे दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ४ राजो
वाच न जानामि महाभाग परं कर्मापविद्धधीः ब्रूहि मे विमलं ज्ञानं येन मुच्येहकर्मभिः ५ गृहेषु कूटधर्मेषु पुत्रदारध
नार्थधीः न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ६ नारद उवाच भो भो प्रजापते राजन्पशून्पश्य त्वयाध्वरे संज्ञा
पितान्जीवसंघान्निर्घृणेन सहस्रशः ७ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव संपरेतमयःकूटैश्छिंदंत्युत्थित
मन्यवः ८ अत्र ते कथयिष्येमुमितिहासं पुरातनं पुरंजनस्य चरितं निबोध गदतो मम ९ नमो वासुदेवाय नमः

प्रदर्श्याह भो भो इति संज्ञापितान् हतान् ७ एते त्वां संपरेतं मृतं प्रतीक्षंते वैशसं त्वया कृतां पीडां स्मरंतः ततः श्चायः कूटैर्लोह
यंत्रमयैः शृंगैः छिंदंति छेत्स्यंति मांसभक्षयिता मुत्र यस्य मांसमिहाद्म्यहं एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति ८ अ
त्रास्मिन्संकटे निस्तारकममुमितिहासं कथयिष्यामि ९ श्रीराम ७ ७ ७ ७ ७ ७ ६७

567
1981

तत्र जीवस्य विषयासक्त्या संसारः स चेश्वरानुग्रहेण निवर्तत इति वक्तुं विपर्ययगृहीतस्य साक्षाद्बोधयितुमशक्यो राजवृत्तांतमिवाह आसी
दिति पुरंजनादीन्स्वयमेवतः पंचमेध्याये व्याख्यास्यति तथापि सुखग्रहणाय यथा पयागमेव किंचिद्व्याख्यास्यामः तत्र स्वकर्मभिः पु
रं जनयतीति जनो जीवः न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य स ईश्वरस्तस्य सखा यद्वाविज्ञातं चेष्टितं जीवप्रेरणादिलक्षणं यस्य
जीवपारतंत्र्यस्यानुभवसिद्धत्वात् १० शरणं भोगायतनं देहं ११ यावत्यः पुरः ताः गवादिशरीराणि तस्य तस्य कामस्य उपपत्तये प्राप्त्य
साधुनमेने गवादिदेहानामैहिकपारलौकिकभोगायोग्यत्वात् तथाच श्रुतिः ताभ्यो गामानयत्ता अब्रुवन्न वै वायमलमिति १२

आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १० सोन्वेषमाणः शरणं
बभ्राम पृथिवीं प्रभुः नानुरूपं यदाविंदद्भूत्स विमना इव ११ न साधु मेने ताः सर्वा भूतले यावतीः पुरः कामान्
कामयमानोसौ तस्य तस्योपपत्तये १२ स एकदा हिमवतो दक्षिणेष्वथ सानुषु ददर्श नवभिर्द्वार्भिः पुरीं लक्षितलक्ष
णां १३ प्रकारोपवनाट्टालपरिखैरक्षतोरणैः स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः १४

हिमवतो दक्षिणेषु दक्षिणमार्गप्राप्तिफलेषु अत्र हिमवान् जाड्यानुरूपं पापं दक्षिणे जाड्यमाहत्य भवति येन सह पापपुण्येन मानुष्यं
भवति सानुषु कर्मक्षेत्रे भारतवर्षे पुरं मनुष्यशरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्यां अंधपंगुत्वादिदोषरहितामित्यर्थः
१३ तामनुवर्णयति त्रिभिः अत्र किंचित्सादृश्यमवलंब्य कथासौंदर्याय प्राकारादिनि वर्ण्यंते परिखैरिति पुंस्त्वमार्षं अक्षाणि गवा
क्षाः तगादयः शरीरावयवाः प्राकारादिपुरावयवत्वेन निरूप्यंते स्वर्णादिशृंगैः शिखरैर्युक्ता ये गृहास्तैः संकुलामिति आधारादिच
क्राणि गृहाः शृंगाराणि राजसत्वादिस्वभावा विवक्षिताः १४ श्रीरामजयरामजयजयराम ७ ७ ७ ७

भा० ६८

नीलादिभिः कृप्ताहर्म्यस्थलीयस्यां अरुणमाणिक्यस्थलीहृदयं नाड्योनीलादिभावेननिरूप्यंतेतत्तद्विषयवासनावाभोगवतीनागानां ह०
पुरीमिव १५ सभासमाजस्थानं चत्वरंचतुष्पथः रथ्याराजमार्गः आक्रीडायतनं द्यूतादिस्थानं अपणोहट्टः तैश्चैत्यध्वजेनांविश्रामस्थानं
तेषुपताकाभिश्चयुक्तां १६ अत्रचविषयंनिष्ठबुद्धियोगेनजीवस्यदेहसंबंधइतिविवक्षया विषयवर्गबाह्योपवनवननिरूपयतितद्विशे
षः स्रक्चंदनादिनिदिव्यद्रुमलतादिभावेन शेषः कथालंकारः बाह्योपवनेप्रमदांददर्शेतिचतुर्थेनान्वयः नदंतांविहंगालिकुलानांको
लाहलोयेषुतेजलाशयायस्मिन १७ हिमनिर्झराणांविप्रुषाबिंदवस्ताद्दाताकुसुमाकरसंबंधिनावायुनाचलतः प्रवालाविटपाः शा

नीलस्फटिकवैडूर्यमुक्तामरकतारुणैः कॢप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव १५ सभाचत्वररथ्याभिराक्रीडायत
नापणैः चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः १६ पुर्यास्तुबाह्योपवनेदिव्यद्रुमलताकुले नदद्विहंगालिकुल
कोलाहलजलाशये १७ हिमनिर्झरविप्रुषत्कुसुमाकरवायुना चलत्प्रवालविटपनलिनीतटसंपदि १८ नानार
ण्यमृगव्रातैरनाबाधेमुनिव्रतैः आहूतंमन्यतेपांथायत्रकोकिलकूजितैः १९ यदृच्छयागतांतत्रददर्शप्रमदोत्तमां
भृत्यैर्दशभिरायांतीमेकैकशतनायकैः २० पंचशीर्षाहिनागुप्तांप्रतीहारेणसर्वतः अन्वेषमाणामृषभमप्रौढांका
मरूपिणीं २१ सुनासांसुदतींबालांसुकपोलांवराननां समविन्यस्तकर्णाभ्यांबिभ्रतींकुंडलश्रियं २२

खाश्रयेषांतैर्वृक्षैः नलिनीनांसरसीनांतटेषुसंपत्समृद्धिर्यस्मिन १८ अनाबाधेतत्कृतबाधारहितमुनिव्रतैरहिंस्त्रैः आत्मानमा
हूतंमन्यतेयत्र १९ तत्रप्रमदोत्तमांविवेकवर्तीबुद्धिंददर्श यदृच्छयागतमितितयाः संबंधस्यदुर्निरूपत्वंदर्शयति तामनुवर्णयति
सार्द्धैश्चतुर्भिः दशभिर्ज्ञानकर्मेंद्रियैः एकैकंप्रत्येकंशतं अनंतावृत्तयस्तासांनायकः पतिभिः सहपाठांतेनायिकाभिर्योषितां
२० पंचशीर्षाणिवृत्तयोयस्यतेन अहिनाप्राणेनप्रतिहरणपालकेनगुप्तां ऋषभंभर्तारं २१ गंधज्ञानादिभिर्बुध्यत्त्वयेवः सुना
सत्वादिरूप्यते समविन्यस्ताभ्यांरचिताकर्णाताभ्यांकुंडलाशोभांदधतीं २२ श्रीराम ७ ७ ७ ७ ६८

569/1981

अन्नमयंहिसोम्यमनइतिकर्छतदन्नमयमित्यादिश्रुत्यनुसारेणश्यामामित्युक्तंनूपुरैः कणद्भ्यांनूपुरेणपादांगुलीयकानामप्युपलक्षणा
द्बहुवचनं २३ व्यंजितंकैशोरंयौवनोपक्रमोयाभ्यांसमौचवृत्तौच २४ तामाहेतितयोः संवादोक्तिः संबंधदार्ढ्याय अपांगएवपुंखो
मूलप्रांतोयस्यकटाक्षबाणस्यतेनस्पृष्टोविद्धः प्रेम्णाउद्भ्रमंतीभ्रूर्द्वन्द्वस्थानीयायस्मिनतेन २५ कुतः स्थानादिहागतासिहेसतिपु
र्याः समीपस्थाउपरिभूः तामालक्ष्यकिंकर्तुमिच्छसीत्यर्थः २६ तवयअनुपथाअनुवर्तिनः एतेकएकादशामहानभगेवृहद्बलेनवस्य
माणायेषुदशसुते बुद्धेर्मनसः पृथगुपादानत्वंबुद्धिपरिचारिकेंद्रियसहायतयापरिचारकत्वविवक्षया २७ त्वंद्वीः किंपतिंधर्मंविचिन्व

पिशंगनीवींसुश्रोणींश्यामांकनकमेखलां पद्भ्यांकणद्भ्यांचलतींनूपुरैर्देवतामिव २३ स्तनौव्यंजितकैशोरौसमवृत्तौ
निरंतरौ वस्त्रांतेननिगूहंतींव्रीडयागजगामिनीं २४ तामाहललितांवीरः सव्रीडःस्मितशोभनां स्निग्धेनापांगपुंखे
नस्पृष्टः प्रेमोद्भ्रमद्भ्रुवा २५ कात्वंकंजपलाशाक्षिकस्यासीहकुतः सती इमामुपपुरींभीरुकिंचिकीर्षसिशंसमे २६
कएतेनुपथायेतेएकादशमहाभटाः एतावाललनाः सुभ्रुकोयंतेहिपुरःसरः २७ त्वंह्रीर्भवान्यस्यथवाक्रमापतिंवि
चिन्वतीकिंमुनिरिवरहोवने त्वदंघ्रिकामाप्तसमस्तकामंक्वपद्मकोशः पतितः कराग्रात २८ नासांवरोर्वन्यतमाभुवि
स्पृक्पुरीमिमांवीरवरेणसाकं अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरंश्रीरिवयज्ञपुंसा २९ यदेषमापांगविखंडितेंद्रि
यंसव्रीडभावस्मितविभ्रमद्भ्रुवा त्वयोपसृष्टोभगवान्मनोभवः प्रबाधतेमानुगृहाणशोभने ३०

ती अथवाभवानीपतिंशिवंविचिन्वतीकिंचवाक्सरस्वतीब्रह्माणंरमावापतिंविष्णुं मुनिरिवमैयतासती कथंपतितंपतिं त्वदंघ्रिकामे
नैवत्वत्कृतयात्वदंघ्रिकामनयैवप्राप्ताः समस्ताः कामायेन २८ हेवरोरु अमीमध्येत्वं अन्यतमापिनभवसि यतोभुविस्पृक्त्वन
हिदेवताभुवंस्पृशंति वीरवरेणमया परेवैकुंठे २९ यद्यस्मात्तवापांगेनविखंडितमिंद्रियंमनोयस्यतंमांमनोभवोबाधते
अथतस्मादनुगृहाणसव्रीडयद्भावेनप्रेम्णास्मितंतेनविभ्रमंतीयाभ्रूस्तयाउपसृष्टः प्रेरितः ३० श्रीरामजयरामहरे

भा० यद्भ्रीडयासन्मुखंनभवतितदाननंउन्नीयमेदर्शयशोभनेसुभ्रूवौयस्मिन् सुतारेशोभनकनीनिकेलोचनेयस्मिन् व्यालंबिनोदी चं०
६९ र्घायेनीलालकास्तेषांवृंदेनसंवृतं वल्गूनिवाचकानिवाक्यानियस्मिन् ३१ हेवीरमापितंदृष्ट्वामोहितासतीतमाह ३२ यत्पृष्टं
कस्यामीत्यनेनकस्यपुत्रीगोत्रज वेतिकात्वमितिचकिंनामासीतितत्राह आत्मनोममपरस्यतवापिकर्तारंसम्यकृनविद्मः गोत्रंना
मयत्कृतंभवतितंचनविद्मः ३३ आत्मामम्शरणंइयंपुरीयेननिर्मितातंचनविद्मः ३४ मत्पृष्टंकएतेनुपथाइतितत्राह एतइति ३५आ

मदाननंसुभ्रुसुतारलोचनंव्यालंबिनीलालकवृंदसंवृतं उन्नीयमेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ३१
इत्थंपुरंजनंनारीयाचमानमधीरवत् अभ्यनंदतंवीरंहसतीविरमोहिता ३२ नविदामवयंसम्यक्कर्तारंपुरुषर्षभ
आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतं ३३ इहाद्यसंतमात्मानंविदामनततः परं येनेयंनिर्मितावीरपुरीशरणमा
त्मनः ३४ एतेसखायःसख्योमेनरानार्यश्चमानद सुप्तायांमयिजागर्तिप्राणोयंपालयन्पुरीं ३५ दिष्ट्यागतोसि
भद्रंतेग्राम्यान्कामानभीप्ससे उद्वहिष्यामितांस्तेहंस्वबंधुभिररिंदम ३६ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो म
योपनीतान्गृह्णानःकामभोगान्शतंसमाः ३७ कंतुत्वदन्यंरमयेत्यरतिज्ञमकोविदं असांपरायाभिमुखमश्वस्तनविदं
पशुं ३८

मांनामगोत्रंआगतोसि एतद्दिष्ट्याभद्रं तावत्ग्राम्यान्इंद्रियग्रामार्हान्उद्वहिष्यामिसंपादयिष्यामि स्वबंधुभिःसखिभिः ३६
सखिभिश्चसमाःसंवत्सरान्मनुष्यदेहप्रवेशात्शतमित्युक्तं ३७ प्रवृत्तिस्वभावत्वात्निवृत्तिनिंदापूर्वकंतत्संगमभिनंदतिपंच
भिः त्वत्तोन्यंकंतुरमय अरतिज्ञंनैष्ठिकंविषयसुखंधनासक्तमित्यर्थः अकोविदंअनिषिद्धसुखत्यागिनं संपरायोमृत्युस्तदन
भिमुखंपरलोकचिंताशून्यं अश्वस्तनावदंश्वःइतिकर्तव्यमितिइहलोकचिंताशून्यंपशुतुल्यं ३८ श्रीरामजयरामजय· ६९

अत्रगार्हस्थ्ये प्रजानंदपुत्रसुखं अमृतंमोक्षंकेवलिनायतयः ३९ गृहाश्रमइतियत्एतत्मोक्षोहंशरणमाश्रयंवदंति ४० ४१ भोगिभो
गयोःसर्पदेहाकारयोःस्तवभुजयोःयन्नसज्जेतएवंभूतंकस्याःस्त्रियामनःस्यात्नकस्याः अपितुयोभवान्अनाथवर्गादीनत्वोमात्तपा
माधिंअलमत्यर्थंअपोहितुंसर्वत्रचरतिकेनापोहितुंघृणयाइतः अतिशयितेनायःस्मितपूर्वावलोकस्तेन ४२ समुद्यसमुदायंसमाः
संवत्सरान् ४३ तत्रजाग्रदवस्थांसंक्षेपणाह उपगीयमानइति सुषुप्तावस्थामाह क्रीडन्निद्यदयाकाशंस्वापस्थानं शुचोनिधान ४४

धर्मोह्यत्रार्थकामौचप्रजानंदोमृतंशयः लोकाविशोकाविरजायान्नकेवलिनोविदुः ३९ पितृदेवर्षिमर्त्यानांभूतानामा
त्मनश्चह क्षेमंविदंतिशरणंभवस्मिन्यद्गृहाश्रमं ४० कानामवीरविख्यातंवदान्यंप्रियदर्शनं नवृणीतपतिंप्राप्तमी
दृशीत्वादृशंस्वयं ४१ कस्यामनस्तेभुजगेंद्रभोगयोःस्त्रियानसज्जेतभुजयोर्महाभुज योनाथवर्गाधिमलंघृणोद्ध
तःस्मितावलोकेनचरत्यपोहितुं ४२ नारदउवाच इतितौदंपतीतत्रसमुद्यसमयंमिथः तांप्रविश्यपुरींराजन्मुमुदाते
शतंसमाः ४३ उपगीयमानोललितंतत्रतत्रचगायकैः क्रीडन्परिवृतःस्त्रीभिर्ह्रदिनीमाविशच्छुचौ ४४ सप्तोपरि
कृताद्वारःपुरस्तस्यास्तुद्वेअधः पृथग्विषयगत्यर्थंतस्यांयःकश्चनेश्वरः ४५ पंचद्वारस्तुपौरस्त्यादक्षिणैकातथो
त्तरा पश्चिमेद्वअमूषांतनामानिनृपवर्णये ४६ श्रीरामजयरामजयजयराम ५२ ५२ ५२

इदानींनवद्वारप्रदर्शनपूर्वकंजाग्रदवस्थांप्रपंचयति सप्तेतियावदध्यायसमाप्ति तस्याः उपरिकृताःद्वाः सप्तद्वनाइतिपाठे
संवृतानेत्रनासिकेश्रोत्रेमुखंचेति अधोद्वेद्वारौगुदलिंगयः कश्चनेति आत्मनःसम्यग्विज्ञानाद्नियततावचरतासुसप्तसु ४५
पंचद्वारःपौरस्त्याःपूर्वदिग्भवाः ४६ श्रीरामजयरामजयजयराम नमोभगवतेवासुदेवाय श्रीराम ५२ ५२

5711
1981

खद्योतवदल्पप्रकाशावामनेत्ररूपा आविःप्रकटंमुख्यंयस्याः साबाहुप्रकाशाद्दक्षिणनेत्रलक्षणा तस्माद्दक्षिणार्द्ध आत्मवीर्यवत्तरइतिश्रु २०
तेः स्वानुभवाच्चतत्रप्रकाशाधिक्यं एकत्रमंलग्नेविभ्राजितंरूपंद्युमत्सखः चक्षुःसहितः ४७ नलनीलशब्दौलिंगव्यत्ययेनातद्वतीनलि
नीनालिनीचवामदक्षिणनासिके अत्रापिसंज्ञाभेदादेवकार्येन्यूनाधिक्यंपूर्ववत्तज्ञेयं अवधूतोवायुधिष्ठिताघ्राणःसोरभंगंधं
४८ मुख्यंप्रधानमास्यं आपणो भाषणः बहूदनश्चित्रमन्नंबह्वादनइत्यनुक्तिः परोक्षवादत्वात् रसज्ञरसनेंद्रियंविपणोवागिंद्रियं
ताभ्यामन्वितः ४९ दक्षिणेनोत्तरनतृतीयाकिंतुदक्षिणस्यांदिशिइत्यस्मिन्नर्थेनाद्वितीयएनप्प्रत्ययोव्ययसंज्ञिकः ५० एवमुत्तरेणोति
अयमर्थः पंचानांविषयाणामन्यतानवगतानांप्रकाशनायालमितिपांचालंशास्त्रं श्रवणकालेचबलाधिक्याद्दक्षिणः कर्णःप्रथमंप्र

खद्योताविर्मुखीचप्राक्द्वारावेकत्रनिर्मिते विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः ४७ नलिनीनालिनीचप्राक्द्वारा
वेकत्रसंभृते अवधूतसखस्ताभ्यांविषयंयातिसौरभं ४८ मुख्यानामपुरस्ताद्द्वास्तयापणबहूदनौ विपण्यायातिपुरराट्
रसज्ञविपणान्वितः ४९ पितृहूर्नृपपुर्याद्वारदक्षिणपुरंजनः राष्ट्रंदक्षिणपांचालंयातिश्रुतधरान्वितः ५० देवहूर्नामपुर्या
द्वाउत्तरेणपुरंजनः राष्ट्रमुत्तरपांचालंयातिश्रुतधरान्वितः ५१ आसुरीनामपश्चाद्द्वात्तयायातिपुरंजनः वेशसंनामविष
यंलुब्धकेनसमन्वितः ५३ अंधावमीषांपौरणांनिर्वाक्पेशस्कृतावुभौ अक्षण्वतामधिपतिस्ताभ्यांयातिकरोतिच ५४

वर्तते शास्त्रंचप्रथमंश्रोतव्यंकर्मकांडमित्येतावतामास्यनप्रवृत्तसंज्ञस्यकर्मकांडस्यदक्षिणकर्णेन श्रवणमिष्यंततत्तदर्थमनुष्ठा
यपितृभिराहूतःपितृलोकंप्रापकंपितृयानंप्रपद्यते तदनेनप्रकारेणपितृणामाह्वानमनेनभवतीतिपितृहूर्दक्षिणकर्णः ५० एतद्धूपरी
त्येनोत्तरःकर्णोदेवहूः तथाचव्याख्यास्यति पितृहूर्दक्षिणःकर्णउत्तरोदेवहूःस्मृतः प्रवृत्तंचनिवृत्तंचशास्त्रंपांचालसंज्ञकं पितृदेवया
नंश्रुतधरात्व्रजेत ५१ असुराइंद्रियारामास्तेषामियमासुरीशिश्नद्वाः ग्रामकंग्राम्यजनानांकंसुखंव्यवायं दुर्मदेनगत्यंद्रियेण ५२ नि
र्ऋतिनामगुदःमृत्युद्वारत्वात् वैशसंमलविसर्गंलुब्धकेनपायुनातेनाक्रांतस्यदुःखप्रतीतेर्लुब्धसाम्यं ५३ अमीषांमध्येनिर्वाक्पा
दःपेशस्कृतहस्तःतावुभावंधोलिंगाभावात् स्वतोज्ञानक्रियाशक्त्यभावाच्च अक्षण्वतांइंद्रियवतांदेहानामधिपतिःपुरंजनवागिंद्रि १७०
यस्यानुक्तिःसंबंधताभावात ५४

573
1981

अतःपुरंहृदयंगतःविषूचीनंसर्वतोमुखंमनः मोहःप्रसादोहर्षःतमःसत्वरजःकार्याणि जाया बुद्धिःआत्मजाइंद्रियपरिणामाः तद्गुत्त
तान् ५५ ५६ यक्षंत्यात्तक्षंत्यां ५७ ५८ आसतीमासीनां ५९ ६० ६१ मर्वाअसंगत्वादिलक्षणाप्रकृतिःस्वभावःवंचितायस्यसर्वथाप्रकृ
त्यावंचितइतिवा नेच्छन्ननिच्छन्नपिक्लैब्यात्पारवश्यात् ६२ इतिचतुर्थेपंचविंशोध्यायः२५ षड्विंशेमृगयाव्याजात्स्वप्नजागरणो
क्तिः सबुद्धित्यागयोगाभ्यांसंसृतिःसाप्रपंच्यते १ तदेवमात्मनउपाधिकृतांसुषुप्तावस्थांजाग्रदवस्थांचोक्त्वाइदानींस्वप्नावस्थामा

मयर्त्यंतःपुरगतोविषूचीनसमन्वितः मोहंप्रसादंहर्षंचयातिजायात्मजोद्भवं ५ एवंकर्मसुसंसक्तकामात्मावंचितोबुधः
महिषीयद्यदीहेततत्तदेवान्ववर्तत ६ क्वचित्पिबंत्यांपिबतिमदिरामदविह्वलः अश्नंत्यांक्वचिदश्नातियक्षत्यांसहयक्षति ७
क्वचित्गायतिगायंत्यांरुदंत्यांरोदतिक्वचित् क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति ८ क्वचिद्धावतिधावंत्यांतिष्ठंत्या
मनुतिष्ठति अनुशेतेशयानायामन्वास्तेक्वचिदासतीं ५९ क्वचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्यति क्वचिज्जिघ्रतिजि
घ्रंत्यांस्पृशंत्यांस्पृशतिक्वचित ६० क्वचिच्चशोचतींजायामनुशोचतिदीनवत् अनुहृष्यतिहृष्यंत्यांमुदितामनुमोदते ६१
विप्रलब्धोमहिष्यैवंसर्वप्रकृतिवंचितः नेच्छन्ननुकरोत्यज्ञःक्लैब्यात्क्रीडामृगोयथा ६२ इतिश्रीभागवतेमहापुराणे
चतुर्थस्कंधेपंचविंशोध्यायः२५ नारदउवाच सएकदामहेष्वासोरथंपंचाश्वमाशुगं द्वीषंद्विचक्रमेकाक्षंत्रिवेणुंपंचबंधुरं
१

हसएकदेतिदशभिः महानिश्वासोधनुःकर्तलभोक्तृत्वाद्यभिनिवेशोयस्यसरथमारुह्यपंचप्रस्थंवनमगादितितृतीयेनान्वयः
रथंतदानीव्यवनिवृत्तस्वप्नदेहंजाग्रद्देहस्यशतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् पंचज्ञानेंद्रियाण्यश्वाअश्वयस्य आशुगंशीघ्रग
तिं द्वेअहंताममताईषेदंडेयस्य द्वेपुण्यपापेचक्रेयस्य एकंप्रधानमक्षोयस्य त्रयोगुणावेणवोध्वजायस्य पंचप्राणाबंधुराणि
बंधनानियस्य १

भा०
७१

एकंमनःप्रग्रहोयस्य एकाबुद्धिर्दमनःसूतोयस्यतंचतंच एकंहृदयंनीडंस्थिनउपवेशस्थानंयस्मिन द्वौशोकमोहौकूबरौयुगबंधनस्थानंय २१
स्य पंचशब्दादयोविषयाःप्रह्रीयंतेप्रक्षिप्यंतेयस्मिन अस्यव्याख्यानंभविष्यति पंचेंद्रियार्थप्रक्षेपइति सप्तधातवोवरूथारक्षार्थंचर्मा
द्यावरणानियस्य पंचकर्मेंद्रियाणिविक्रमागतिप्रकारायस्य २ हेमापस्करंसौवर्णाभरणंस्वर्णमयंचर्मकवचंयस्य रजोगुणात्मनः अक्षय
इषुधिःइषुधिर्निषंगःअनंतवासनाहंकारोपाधिःएकादशामनोरूपश्चमूनाथःसेनापतिर्यस्य वामनामयस्यमनसःप्रगृहत्वंसंकल्पा
त्मकस्यवृहद्बलत्वेनवक्ष्यमाणस्यचमूनाथत्वमितिविभागः पंचशब्दादयोविषयाःप्रस्थानवायस्मिन तद्वनंभजनीयदेशमगात ३
आत्मागृहीताइषवोरागद्वेषादिरूपाःकार्मुकंचभोगाद्यभिनिवेशरूपंयेन जायांविवेकवतींबुद्धिंविवेकतांविहाय अतदर्हांत्यागानर्हां

एकरश्मेकदमनमेकनीडंद्विकूबरं पंचप्रहरणंसप्तवरूथंपंचविक्रमं २ हेमोपस्करमारुह्यस्वर्णवर्माक्षयेषुधीः एकाद
शचमूनाथःपंचप्रस्थमगाद्वनं ३ चचारमृगयांतत्रदृप्त आत्तेषुकार्मुकः विहायजायामतदर्हांमृगव्यसनलालसः ४
आसुरींवृत्तिमाश्रित्यघोरात्मानिरनुग्रहः न्यहनन्निशितैर्बाणैर्वनेषुवनगोचरान ५ तीर्थेषुप्रतिदृष्टेषुराजामेध्यपशू
नवने यावदर्थमलंलुब्धोहन्यादितिनियम्यते ६

त्यागहेतुःमृग्यंतइतिमृगाविषयास्तेषुव्यसनंभोगासक्तिस्तेनलालसातिस्पृहायस्य ४ बाणैरागादिभिःवनेषुभजनीयदेशेषुव
नगोचरानभजनीयविषयानन्यहनत आत्मसात्कृतवान कथापक्षेतुस्पष्टमेव ५ नन्वासुरींवृत्तिमाश्रित्यनिःकिमितिमृगयाविधी
यते कथापक्षेतावद्राज्ञोविहितेवसा अध्यात्मपक्षेपिजीवस्यभोगोपिविहितएवेत्याशंक्याह तीर्थेष्वितित्रिभिः अयंभावः नहिमृ
गयाविधीयते रागप्राप्तत्वात किंतुनियम्यतेप्रकृतिःसंकोच्यते नियममेवपादुभ्यंदर्शयति यद्यलमत्यर्थंलुब्धःरागीमेनइन्यात
तर्हितीर्थेषुश्राद्धादिष्वेवतत्रापिप्रतिदृष्टेषुप्रख्यातेष्वेव ननित्यश्राद्धादिषु तत्रापिराजैवमेध्यानेववनएव यावदुपयोगमेव
ति एवंजीवस्यापिविषयसेवापियावदुपयोगंनयथेष्टमितिनियमएवेत्यर्थः ६ श्रीराम ७ ७ ७ ७ ७

७१

545
1981

अतोनावश्यकत्वमित्याह एवंनियतंकर्मविद्वान तेनेत्युपलक्षणंतेनान्येनवाकर्मणा एवमनुष्ठितेनैवज्ञानंभवतितेनज्ञानेनहेतुना
मअनुष्ठातानलिप्यते ७ अन्यथानियमोल्लंघनेनअंतःकरणशुद्ध्यभावात कर्तृत्वाभिमानमारूढःकर्मभिरनुबध्यते ततश्च
गुणप्रवाहपतितोधोव्रजति ८ प्रासंगिकंपरिसमाप्यपुनर्मृगयामेवानुवर्तयति तत्रेति चित्रवाजाःपक्षायेषांतैर्विभूवानाशः
करुणात्मनांकृपाकुनांदुःसहः ९ १० तदेवंस्वप्नवस्थादर्शिता इदानीपुनरपिविवेकबुध्यारममाणस्यपुत्रादिसंततिप्रपंचयिष्य

मएवंकर्मनियतंविद्वानकुर्वीतमानवः कर्मणातेनराजेंद्र ज्ञानेनचनलिप्यते ७ अन्यथाकर्मकुर्वाणामानरूढानालि
प्यते गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः ८ तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमुखैः विप्लवोभूद्दुःखितानां
दुःसहःकरुणात्मनां ९ शशानवराहानमहिषानगवयानरुशल्लकान मेध्यानन्यानमेध्यांश्चव्रजनिघ्नञ्श्रमम
ध्यगात १० ततःक्षुत्तृट्परिश्रांतोनिवृत्तोगृहमेयिवान कृतस्नानोचिताहारःसंविवेशगतक्लमः ११ आत्मानमर्हयां
चक्रेधूपलेपस्रगादिभिः साध्वलंकृतसर्वांगोमहिष्यामादधेमनः १२ तृप्तोहृष्टःसुदृप्तश्चकंदर्पाकृष्टमानसः
नव्यचष्टवरारोहांगृहिणींगृहमेधिनी १३ अंतःपुरस्त्रियोपृच्छद्विमनाइववेदिषत आपवःकुशलंरामाःसेश्व
रीणांयथापुरा १४ नतथैतर्हिरोचंतेगृहेषुगृहसंपदः यदिनस्याद्गृहेमातापत्नीवापतिदेवता १५ व्यंगेरथइव
प्राज्ञःकोनामासीतदीनवत १५ क्ववर्ततेमाललनामज्जंतंव्यसनार्णवे यामामुद्धरतेप्रज्ञांदीपयंतीपदेपदे १६

नकथांसौंदर्यायतस्याःप्रणयकुपितायाःअनुनयंप्रस्तावसहितमाह ततइत्यारभ्ययावदध्यायसमाप्तिःएईयिवानआग
तःकृतंस्नानमुचितमाहारश्चयेनसंविवेशशय्यामाश्रितः ११ १२ गृहमेधिनींसात्विकींबुद्धिंराजस्यांबुध्यावर्तमानानापश्यत १३
वेदिषतहेप्राचीनबर्हिःअंतःपुरःस्त्रियःतत्सखीःसेश्वरीणांस्वामिनीसहितानांयथापुरेत्यादिश्यग्वाक्यं १४ व्यंगेचक्रादिहीन
१५ १६

निरवस्तारे आभरणरहिते १७ अवधूतांयस्क्त देहादरां तत्संगेनोन्मथितंव्याकुलं ज्ञानंयस्य १८ प्रेमसंरंभः प्रणयकोपः तस्यलिंगंकुटि
लदृष्ट्यादिस्वस्मिन्नलब्धवान् १९ उत्संगमारोप्यलालिता २० कृतमागोपराधोयेस्तेषु आत्मसात्कृत्वा अस्मदधीनोयमितिमत्वा
शिक्षार्थंदंडंनकुर्वंति तेभत्यामंदभाग्याः २१ परमोनुग्रहोदमोदंडः यस्तुदंडितोविषीदतिस अज्ञइत्याह बालोबंधुकृत्यंशिक्षाकरणं
अमर्षणः क्रोधी २२ हेसुदति हेसुभ्रु हेमनस्विनि सात्वमस्माकंस्वामिनी अतः स्वानांमुखंप्रदर्शय कीदृशं अनुरागेणव्रीडयाच

गमार्उचुः नरनाथनजानीमस्त्वत्प्रियायद्व्यवस्यति भूतलेनिरवस्तारेशयानांपश्यशत्रुहन् १७ पुरंजनः स्वमहिषींनि
रीक्ष्यावधुतांभुवि तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ १८ सांत्वयन्श्लक्ष्णयावाचाहृदयेनविदूयता येप्रेयस्याः
प्रेमसंरंभलिंगमात्मनिनाभ्यगात् १९ अनुनिन्येथशनकैर्वीरोनुनयकोविदः पस्पर्शपादयुगलमाहाचोत्संगलालितां
२० नूनंत्वकृतपुण्यास्तेभृत्यायेषांश्वराःशुभे कृतागस्स्वात्मसात्कृत्वाशिक्षादंडंनयुज्यते २१ परमोनुग्रहोदंडोभृत्येषु
प्रभुणार्पितः बालोनवेदतत्तन्वंबंधुकृत्यममर्षणः २२ सात्वंमुखंसुदतिसुभ्र्वनुरागभारव्रीडाविलंबविलसद्धसिता
वलोकं नीलालकालिभिरुपस्कृतमुन्नसंनः स्वानांप्रदर्शयमनस्विनिवल्गुवाक्यं २३ तस्मिन्दधेदममहंतववीरपत्नीयो
न्यत्रभूसुरकुलात्कृतकिल्बिषःस्यात् पश्येनवीतभयमुन्मुदितंत्रिलोक्या अन्यत्रवैमुररिपोरितरत्रदासात् २४

योविलंबः मंथरतातेनविलसत् हसितावलोकोयस्मिन् नीलाअलका एवालयस्तैरुपस्कृतंभूषितं उन्नसमुन्नतनासिकं वल्गुवाक्यंयस्मि
न् २३ हेवीरपत्नीवीरस्यममभार्ययस्तेकृतापराधस्तस्मिन् अहंब्राह्मणकुलादन्यत्र अन्यस्मिन् मुरारिपोर्दासात्इतरत्र दमंदध
दंडंकरोमिकिंतुतंविगतभयं उन्मुदितंच त्रिलोक्या अन्यत्रलोकत्रयाद्बहिरपिनपश्यामि मद्भयादेनासौमरिष्यतीत्यर्थः २४ ७२

5?/1981

तवनक्रमिति पूर्वंनकदाचिदपिवितिलकंपश्यामिसंरंभेणकोपावेशेनभीमंभयंकरं अविमृष्टं अनुज्वलं अपेतरागं स्नेहशून्यं तथाच
सुजातौशोभनौस्तनावपिशोकाश्रुभिरुपहतौनपश्यामि तथाबिंबफलाकारमधरंच विगतकुंकुमपंकतुल्यताम्बूलरागोयस्मात्तादृशं
नपश्यामि इदानींकुतएवंजातमितिशेषः पाठांतरे एवंस्तमुखंस्तनौचपश्यन्सन्नविदामीत्यन्वयः विगतः कुंकुमरागोयाभ्यामिति
स्तनयोर्विशेषणं २५ तत्तस्मात्कृतंकिल्बिषमपराधोयेनतस्यकिल्बिषमेवाह स्वैरंस्वातंत्र्येणत्वामपृष्ट्वामृगयांगतस्य देवोदेवनंक्रीडा
दृहारतीतितांदेवरः कांतः तंकामवेगेनविस्रस्तंपौंस्नंपौरुषंधैर्यंयस्यतं उशतिकामयमानाकृत्यकर्तुंयोग्यंयैस्तैकानभजत् २६ इतिचतु
र्थेषड्विंशः सप्तविंशेप्रियापुत्राद्यासक्त्याविस्मृतात्मनः कालकन्याद्युपाख्यानेजरारोगाद्युदीर्यते १ तदेवंजीवस्यानुनयादिकथा

र्थेषड्विंशः सप्तविंशेप्रियापुत्राद्यासक्त्याविस्मृतात्मनः कालकन्याद्युपाख्यानेजरारोगाद्युदीर्यते १ तदेवंजीवस्यानुनयादिकथा

वक्त्रंनतेवितिलकंमलिनंविहर्षंसंरंभभीममविमृष्टमपेतरागं पश्येस्तनावपिशुचोपहतौसुजातौबिंबाधरंविगतकुंकुमपंकरा
गं २५ तन्मेप्रसीदसुहृदःकृतकिल्बिषस्यस्वैरंगतस्यमृगयांव्यसनातुरस्य कादेवरंवशगतंकुसुमास्त्रवेगविस्रस्तपौंस्नमुशती
नभजेतकृत्ये २६ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेषड्विंशोध्यायः २६ नारदउवाच इत्थंपुरंजनंसम्यग्वशमा
नीयविभ्रमैः पुरंजनीमहाराजरेमेरमयतीपतिं १ सराजामहिषींराजन्सुस्नातांरुचिराननां कृतस्वस्त्ययनांतृप्तामभ्यनंददुपागतां २

सौंदर्येणात्यंतमुपाधिवश्यत्वमुक्त्वातन्निमित्तांसंसारपरंपरामाह इत्थमिति अत्रचप्रतिपदंकथंचिदध्यात्मपक्षेपियोजयितुंशक्यमे
वश्रीनारदेनतुजीवस्यस्त्रीपुरुषवासनादार्ढ्येनविचित्रासंसृतिर्भवति इत्येतावदेवकथातात्पर्यंदर्शितं क्वचित्तुपुमान्क्वचित्स्त्रीक
चिन्नोभयमंदधीः देवामनुष्यातिर्यङ्गायथाकर्मगुणंभवइतिवदतातत्रादौपुंस्त्वेनसंसृतिरध्यायत्रयेणोक्ता ततश्चैकेनाध्यायेनस्त्री
त्वेनसंसृतिंप्रदर्श्येश्वरप्रसादाल्लब्धज्ञानेनमोक्षइत्युक्तं ततस्तदेवयथोपयोगंव्याख्यातमितिपंचाध्यायार्थः प्रतीयतेप्रतिपदम
ध्यात्मयोजनात्तुदुर्घटानिः प्रयोजनाचेतिस्वप्रौढिप्रख्यापनमनादृत्ययथोपयोगमेवव्याख्यास्यामः सभ्यकसम्यकविभ्र
मैः विलासैः १ कृतंस्वस्त्ययनंमंगलं परंकुंकुमसिंदूरादिदीप्तिर्यस्याः २ श्रीराम

उपगूढः परिरब्धः परिरब्धाकं धरायस्य येनरहएकांते अनुमंत्रेरनकूलेर्गस्थभाषणेरपकृष्टचेतनाविवेकोयस्य कालरंहः आयुर्व्ययं प्र
मेदेवपरिग्रहोनज्ञानसाधनंयस्य ३ महार्हतल्पेउत्कृष्टशयायांशयानः महिष्यासुजउपधिरूपधानंउपशीर्षकंयस्य अविसर्गपाठशय
नक्रियाविशेषणं तांमहिषीमेवपरंपुरुषार्थममन्यतनतुयन्निजंरूपंब्रह्मतत् तमसा अज्ञानेनाभिभूत ४ यतः पुत्रानिंद्रियपरिणामा

तयोपगूढः परिरब्धकंधरोरहोनुमंत्रैरपकृष्टचेतनः नकालरंहोबुबुधेदुरत्ययंदिवानिशेतिप्रमदापरिग्रहः ३ शयानउन्न
द्धमदोमहामनामहार्हतल्पेमहिषीभुजोपधिः तामेववीरोमनुतेपरंयतस्तमोभिभूतोननिजंपरंचयत् ४ तयेवंरममा
णस्यकामकश्मलचेतसः क्षणार्धमिवराजेंद्रव्यतिक्रांतंनवंवयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यांपुरंजनः शतान्ये
कादशविराडायुषोर्धमथात्यगात् ६ दुहितॄर्दशोत्तरशतंपितृमातृयशस्करीः शीलौदार्यगुणोपेताः पौरंजन्यःप्रजा
पते ७ सपांचालपतिः पुत्रान्पितृवंशविवर्धनान् दारैःसंयोजयामासदुहितॄःसदृशैर्वरैः ८ पुत्राणांचाभवन्पु
त्राएकैकस्यशतंशतं यैर्वैपौरंजनोवंशःपंचालेषुसमेधितः ९

नदुहितॄःतदनंतरबुद्धिवृत्तीः पुत्रसंख्याचबाहुल्यमात्रविवक्षया दुहितृसंख्यातुपुत्रेभ्योन्यूनतेनगार्हस्थ्यसौंदर्यार्थाविराट्
सम्राट् आयुष्योर्धमित्याद्यपिकथासौंदर्यार्थमेव ६ पुरंजनकन्यात्वात्पौरंजन्यः हेप्रजापते ७ दारैः परिणामानंतरंहि
ताहितचिंताभिः वरैः उचितविषयभोगैः ८ पुत्राणांपुत्राः कर्माणिपांचालेषुशब्दादिविषयेषु ९ श्रीरामजयराम जयजयराम ७३

549
1981

तेषुपुत्रादिषुतेषामपियेरिक्थहराःपुत्रास्तेषुच १० ११ युक्तेषु आत्माहितेषुकर्मस्वनाहितस्यसर्वेकालःजरासमयः १२ चंडवेगः
संवत्सरेणावर्तमानेनोपलक्षितः गंधर्वादिवसाः १३ गंधर्व्योरात्रयःतादृशीः तादृश्यःमैथुन्यः दिवसैःमिथुनीभूयस्थिताःसि
ताश्चासिताश्चशुक्लकृष्णपक्षीयाः परिभ्रमणसर्वैः कामैःमहाविनिर्मितांपुरिमितीमपहरंति १४ प्रजागरः प्राणः १५ समाःसंवत्स

तेषुतद्रिक्थहारेषुगृहकोशानुजीविषु निरूढेनममत्वेनविषयेष्वन्वबुध्यत १० ईजेचक्रतुभिर्घोरैर्दीक्षितःपशुमा
रकैः देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः आससादसवैका
लोयोप्रियःप्रिययोषितां १२ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप गंधर्वास्तस्यबलिनःषष्ट्युत्तरशतत्रयं १३
गंधर्व्यस्तादृशीरस्यमैथुन्यश्चसितासिताः परिवृत्त्याविलुंपंतिसर्वकामविनिर्मितां १४ तेचंडवेगानुचराःपुरंजन
पुरंयदा हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्तभिःशतैरेकविंशत्याचशतंसमाः पुरंजनपुराध्यक्षोगंध
र्वैर्युयुधेबली १६ क्षीयमाणेस्वसंबंधएकस्मिन्बहुभिर्युधा चिंतांपरांजगामाथसराष्ट्रपुरबांधवः १७ सएव
पुर्यांमधुभुक्पांचालेषुस्वपार्षदैः उपनीतान्बलीन्गृह्णन्स्त्रीजितोनाविदद्भयं १८ कालस्यदुहिताकाचि
त्त्रिलोकींवरमिच्छती पर्यटंतीनबर्हिष्मन्प्रत्यनंदतकश्चन १९ दौर्भाग्येनात्मनोलोकेविश्रुतादुर्भगेतिसा या
तुष्टाराजऋषयेवृत्तादात्पुरवेवरं २०

रान्विंशत्यासह १६ स्वसंबंधस्वसंबंधनिप्राणे १७ सएवमधुभुक्क्षुद्रसुखभोक्तास्वपार्षदैरिंद्रियैः नाविदत्नालोचितवान् १८
कालस्यदुहिताजराक्लितांनप्रत्यनंदतनैच्छत् हेबर्हिष्मन्प्राचीनबर्हिः १९ पुरवेययातिपुत्रायतेनवृतासतीवरमदात् ययातिशु
क्रशापात्जरांप्राप्यपुत्रानुवाच इमांगृहीतेतितांज्येष्ठाश्चत्वारोनजगृहुः पुरुस्तुजगृहेतनोययातितस्मैराज्यंददावितिजरैवाद
दित्युक्तं २०

२१ प्रत्याख्यातव्रतिमथिसंरब्धक्रोधंकृत्वानैकत्रस्थातुमर्हसीतिशापमदात् २२ अथयोथ्याधयश्वयवनास्तेषामीश्वरंभयनामानं
२३ हवीरस्वामीप्सितंपतिंवृणु नरिष्यतिननश्यति २४ लोकतोवेदतश्वयद्देयत्वेनचउपनतंप्राप्तंतत्याच्यमानंयोनराति नददाति
यश्वदीयमानंनेछतिनगृह्णातिइमौद्वौकर्मभ्रंतौअनुशोचंतिसंतः २५ पुरुषेणकर्तव्योधर्मःपौरुषः २६ देवगुह्यंमरणंतद्धिप्राणि
नांवैराग्यानुदयायदेवैर्गोप्यते २७ तुभ्यंतव आत्मसमाधिनाज्ञानदृष्ट्यापतिःपुरंजनः याच्यमानोयंलोकःत्वांनेछति २८ अतःअ

कदाचिदटमानासाब्रह्मलोकान्महींगता वव्रेबृहद्व्रतंमांतुजानतीकाममोहिता २१ मयिसंरभ्यविपुलमदाच्छापंसुदुःस
हं स्थातुमर्हसिनैकत्रमद्याच्याविमुखामुने २२ ततोविहितसंकल्पाकन्यकायवनेश्वरं मयोपदिष्टमासाद्यव्रतेनाम्ना
भयंपतिं २३ ऋषभंयवनानांत्वांवृणेवीरेप्सितंपतिं संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति २४ द्वाविमावनुशोचंति
बालावसदवग्रहेः यल्लोकशास्त्रोपनतंनरातिनतदिछति २५ अथोभजस्वमांभद्रभजंतींमेदयांकुरु एतावान्पुरुषो
धर्मोयदार्ताननुकंपते २६ कालकन्योदितवचोनिशम्ययवनेश्वरः चिकीर्षुर्देवगुह्यंसस्मितंतामभाषत २७ मया
निरूपितस्तुभ्यंपतिरात्मसमाधिना नाभिनंदतिलोकोयंत्वामभद्रामसंमतां २८ त्वमव्यक्तगतिर्भुंक्ष्वलोकंकर्मविनि
र्मितं याहिमेपृतनायुक्ताप्रजानाशंप्रणेष्यती २९ प्रज्वरोयंममभ्राताऽत्वंचमेभगिनीभव चराम्युभाभ्यांलोकेस्मि
न्नव्यक्तोभीमसैनिकः ३० इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तविंशोध्यायः २७ श्रीरामकृष्णाभ्यांनः

व्यक्तगतिःकुतःप्राप्तेत्यलक्षितगतिःसतिलोकमाक्रम्यभुंक्ष्व एवंसर्वोपिलोकस्तेपतिःस्यादित्यर्थः नचैषंत्वयाशंकनीयं मांप्रति
कूलांलोकोहनिष्यतीति यस्मात्त्वमेवप्रजानांनाशंकरिष्यतीत्याह याहीति यामादिर्यायवनस्तेनातथायुक्ता २९ किंचप्रज्वरइति मा
रकोविष्णुज्वरः माहेश्वरस्यव्याध्यंतःपातित्वात् भीमाःघोराःसैनिकायस्य ३० इतिश्रीभागवतभावार्थदीपिकायांचतुःसप्तविं
शः २७

581
1381

अष्टाविंशतुवैदर्भ्याख्यानेनस्त्रीविचिंतया स्त्रीत्वंप्राप्तस्यदैवेनकदाचिन्मुक्तिरीर्यते १ इदानींपुरंजनस्यपुरेहत्यागप्रकारपूर्वकंस्त्रीत्वप्रका
रमाह सैनिकाइत्यादि राजसिंहस्यवेश्मनीत्यंतेनाद्दिष्टंरवंकुर्वंति आविष्कुर्वंतितथामृत्योरादेशकारिणइतिवा १ जरत्पन्नगेनजीर्णप्रा
णेनपालितां २ द्वार्भिश्वक्षुरादिभिःरोगरूपेणप्रविश्य ३ ४ ५ कन्ययाजरयापगूढःसन्नतत्प्रतिक्रियांनलेभइतितृतीयेनान्वयः हृतैश्व

नारदउवाच सैनिकाभयनाम्नोयेबर्हिष्मन्दिष्टकारिणः प्रज्वारकालकन्याभ्यांविचेरुरवनीमिमां १ तएकदातुरभसापु
रंजनपुरींनृप रुरुधुर्भौमभोगाढ्यांजरत्पन्नगपालितां २ कालकन्यापिबुभुजेपुरंजनपुरंबलात् ययाभिभूतःपुरुषःस
द्योनिःसारतामियात् ३ तयोपभुज्यमानांवैयवनाःसर्वतोदिशं द्वार्भिःप्रविश्यसुभृशंप्रार्दयन्सकलांपुरीं ४ तस्यां
प्रपीड्यमानायामभिमानीपुरंजनः अवापोरुविधांस्तापान्कुटुंबीममताकुलः ५ कन्यपगूढोनष्टश्रीःकृपणोविषया
त्मकः नष्टप्रज्ञोहृतैश्वर्योगंधर्वयवनैर्बलात् ६ विशीर्णांस्वपुरींवीक्ष्यप्रतिकूलाननादरान् पुत्रान्पौत्रानुगामात्यान्जा
यांचगतसौहृदां ७ आत्मानंकन्ययाग्रस्तंपांचालानरिदूषितान् दुरंतचिंतामापन्नोनलेभेतत्प्रतिक्रियां ८ कामान
भिलषन्दीनोयातयामांश्चकन्यया विगतात्मगतिःस्नेहःपुत्रदारांश्चलालयन् ९

र्यः उत्थानाद्यशक्तेः ६ प्रतिकूलान् अनपेक्षितविषयप्रापणान् अनादृतान् आदरमकुर्वाणान्स्वाधीनत्वाभावात् अनुगान्इंद्रि
याणि अमात्याइंद्रियदेवाः गतसौहृदांजायांबुद्धिं अध्यवसायाभावात् ७ अरिभिर्विघ्नादिभिर्दूषितान् कालकन्ययाहेतुभूत
या ८ यातयामान्निःसारानपिकामान् अभिलषन् विगताआत्मनोगतिःपारलौकिकीऐहिकःपुत्रादिस्नेहश्वयस्य स्नेहादितिवापा
ठः ९

सराजापुरंजनोहर्तुंप्रचक्रमे उपक्रांतवानितिद्वयोरन्वयः अनिकामतः अनिच्छयापि १० ११ सपरिच्छदः भृत्यवर्गसहितः कुटुंबेनदयिनीति
कौटुंबकः कुटुंबिन्यासहसंधिर्नात्रविवक्षितः सान्वयः पुत्रादिसहितः १२ यवनैरुपरुद्धान्यायतनानियस्यपुरपालः १३ पुरुवद्रूरुच्छ्रंते
नउरुर्वपथुर्यस्य वृक्षकोटरादिवसर्पः १४ कंठउपरुद्धोरुरोधघुरुघुरुध्वनिंचकार १५ दुहित्रादीनरध्यात्रिस्तुत्तरेणान्वयः जामयोत्रस्नु

गंधर्वयवनाक्रांतांकालकन्योपमर्दितां हर्तुंप्रचक्रमेराजातांपुरीमनिकामतः १० भयनाम्नोग्रजोभ्राताप्रज्वारःप्रत्युस्थितः
ददाहतांपुरींकृत्स्नांभ्रातुःप्रियचिकीर्षया ११ तस्यांसंदह्यमानायांसपौरःसपरिच्छदः कौटुंबकःकुटुंबिन्याउपातप्यत
सान्वयः १२ यवनोपरुद्धायतनोग्रस्तायांकालकन्यया पुर्यांप्रज्वारसंस्पृष्टःपुरपालोन्वतप्यत १३ नशेकुःशोचितुंतत्र
पुरुकृच्छ्रोरुवेपथुः गंतुमैच्छत्ततोवृक्षकोटरादिवसानलात् १४ शिथिलावयवोयर्हिगंधर्वैर्हृतपौरुषः यवनैररिभीराज
न्नुपरुद्धोरुरोदह १५ दुहितॄःपुत्रपौत्रांश्चजामिजामातृपार्षदान् स्वत्वावशिष्टंयत्किंचितगृहकोशपरिच्छदं १६ अ
हंममेतिस्वीकृत्यगृहेषुकुमतिर्गृही दध्यौप्रमदयाहीनोविप्रयोगउपस्थिते १७ लोकांतरंगतवतिमय्यनाथाकुटुंबिनी
वर्तिष्यतेकथंत्वेकाबालकाननुशोचति १८ नमय्यनाशितेभुंक्तेनास्नातेस्नातिमत्परा मयिरुष्टेसुसंतुष्टाभर्त्सितेयत
वाक्भयात् १९ प्रबोधयतिमामज्ञंव्युषितेशोककर्षिता वर्त्मैतद्गृहमेधीयंवीरसूरपिनेष्यति २०

षाः स्वत्वमात्रेणावशिष्टंभोगस्तुप्रागेवक्षीणः १६ १७ १८ ध्यानमेवाह अनाशितेभोजिते भर्त्सितेभर्त्सनेकृतेयतवाक् भव
ति १९ अविज्ञं अविवेकिनंमांव्युषितेदेशांतरगतेगृहमेधीयंवर्त्मगृहस्थधर्मौपिकिंनेष्यति अनुवर्तयिष्यति युक्त्मेनत्र यता
वीरसूः पुत्रवती किंवामद्विरहमसहमानामरिष्यत्येवेत्यर्थः २० श्रीरामजयरामजयजयराम ७ ७ ७ ७५

583/1981

नविद्यतेपरमयनमाश्रयोयेषां अपरायणाः पुत्राः कन्याश्च यद्वा पराश्रयाः कन्याश्च भिन्नानौर्येषां २१ अतदर्हणंवस्तुतस्तस्याब्रह्मता
त् एषयदास्वयंस्थानंनीयमानस्तदाअनुपथाः प्राणाः इंद्रियाणिच तथाश्रुतिः तमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्रा
णाअनूत्क्रामंति २३ प्रकृतिंमहाप्रतात्मनां २४ नाविंदत्नसस्मार पुरः पूर्वंसखायंसंतमीश्वरं २५ अदयालुनाकाम्यकर्मसुयमंज्ञ साहताः
अमीवंपापंक्रौर्यं २६ शाश्वतीः समा आर्तिमनुभूय २७ अंतकालभार्यामेवमनसागृह्णन्स्मरन् अनंतरंविदर्भस्यवश्मनिप्रमदोत्तमाबभू

कथंनुदारकादीनादारिकावापरायणाः वर्तिष्यंतेमयिगतेभिन्ननावइवोदधौ २१ एवंकृपणयाबुद्ध्याशोचंतमतदर्हणं गृ
हीतुंकृतधीरेतंभयनामाभ्यपद्यत २२ पशुवद्यवनैरेषनीयमानःस्वकंक्षयं अन्वद्रवन्ननुपथाःशोचंतोभृशमातुराः २३
पुरींविहायोपगतउपरुद्धोभुजंगमः यदातमेवानुपुरीविशीर्णाप्रकृतिंगता २४ विकृष्यमाणःप्रसभंयवनेनबलीयसा ना
विंदत्तमसाविष्टःसखायंसुहृदंपुरः २५ तंयज्ञपशवोयेनसंज्ञप्तायेदयालुना कुठारैश्चिच्छिदुःक्रुद्धाःस्मरंतोमीवमस्यत
त् २६ अनंतपारेतमसिमग्नोनष्टस्मृतिःसमाः शाश्वतीरनुभूयार्तिंप्रमदासंगदूषितः २७ तामेवमनसागृह्णन्बभूव
प्रमदोत्तमा अनंतरंविदर्भस्यराजसिंहस्यवेश्मनि २८

व अतःपरस्मिन्प्रकरणएतावदेवप्रकृतोपयोगिविवक्षितं स्त्रीध्यानेनस्त्रीत्वंप्राप्तावपिपतिव्रताध्यानेनपूर्वादृष्टेनच धार्मिकाद्वर
र्भाज्जन्माभूत् धार्मिकसंगेनचविशुद्धस्यभागवतेनमलयध्वजेनसंगोभूत्ततोविष्णुभक्तिः ततोवैराग्यंततस्तमेवभर्तृरूपंगुरुंपाति
व्रत्यधर्मेणभजतोभगवत्प्रसादाल्लब्धज्ञानेनमोक्षइति अन्यत्तुकथालंकारमात्रं तथापिकिंचित्श्रुतिसामान्येनहयोजयिष्यामः
विदर्भस्यविशिष्टदर्भोपलक्षितस्यकर्मज्ञस्यराजसिंहस्य धर्मेणहिप्रजापालनेनयज्ञादिनाचक्षत्रियाराजंतेतेषुश्रेष्ठस्यवेश्मनि २८

मलयोपलक्षितेदक्षिणदेशेध्वजइवदर्शनीयः महिविष्णुभक्तिप्रधानोदेशःतत्रमुख्यःमहाभागवतइत्यर्थः पंडानिश्रयवतीबुद्धिःतांमह
तीतिपांड्यः सउपयमेपुरंजनोभागवतप्रसंगंप्राप्तइत्यर्थः २९ आत्मजांश्रीकृष्णसेवारुचिंतत्संगेनचभगवद्धर्मरुचिरत्यर्थः अ
सितस्मरकृष्णस्येक्षणंययातां यवीयसःसप्तसुतान् श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यमितिसप्तभक्तिप्रकारान्सख्या
त्मनिवेदनयोस्तुपदार्थज्ञानोत्तरकालत्वात्तस्यचभगवतैवोत्तरत्रोपदेक्ष्यमाणत्वात इदानीमनुत्पन्नेःसप्तसुक्तं भगवद्धर्मरुच्यातावत श्र
वणकीर्तनादिकंजातमित्यर्थः द्रविडक्ष्मापालकान्द्रविडभूमिर्हि श्रवणादिभक्तिभिरेवसुरक्षितास्तीतिप्रसिद्धं ३० अर्बुदमितिश्रवणा

उपयमेवीर्यपणांवैदर्भीमलयध्वजः युधिनिर्जित्यराजन्यानपांड्यःपरपुरंजयः २९ तस्यांसंजनयांचक्रेआत्मजा
मसितेक्षणां यवीयसःसप्तसुतानसप्तद्रविडभूभुजः ३० एकैकस्याभवंस्तेषांराजन्नर्बुदमर्बुदं भोक्ष्यतेयद्वंशध
रैर्महीमन्वंतरंपरं ३० अगस्त्यःप्राग्दुहितरमुपयमेधृतव्रतां तस्यांदृढच्युतोजातइध्मवाहात्मजोमुनिः ३२

दीनांप्रत्येकमनेकप्रकाराअभवन्नित्यर्थः तदुक्तं भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यतइतियेषांवंशधरैःयतःप्रवृत्तःसंप्रदायस्त
दैःकृत्वामहीमन्वंतरांततःपरंचभोक्षत अविद्याकामकर्मभ्यारक्षिष्यते ३१ अगस्त्य अंगानिनि:क्रियाणिगात्राणिस्त्यायतिसंघातय
तीत्यगस्त्यः मनःसप्राक्प्रथमंजातांदुहितरंकृष्णसेवारुचिमुपयमेतस्यमनःकृष्णेदृढांरतिंबबंधेत्यर्थः धृतानिरमशमादीनिव्रतानि
ययातांरतिंदृढस्य सत्यलोकादिभोगेभ्योपिच्युतस्तद्रहितः कृष्णरतेरिहमुत्रभोगविरागोजातइत्यर्थः सवोपशमत्वान्मुनिः कथंभ
तः इध्मवाहआत्मजोयस्यसः तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमित्यादिश्रुतिप्रसिद्धासमिद्वहनोप
लक्षितागुरूपसत्तिर्वैराग्यादर्भादित्यर्थः नत्वविरक्तस्यगुरूपसत्तिःसंभवति ३२ श्रीराम

585
1981

कथापक्षेयथाश्रुतमेव क्ष्मांविभज्यतत्रश्रवणादिभक्तिभेदंव्यवस्थाप्य ३३ इदानींपुरंजनस्यस्त्रीभावंप्राप्तस्यसर्वतोविरक्तस्यपतिरेवगुरुः
स्त्रीणामितिवचनात्पतिसेवयागुरुशुश्रूषाप्रकारंदर्शयितुमाह हित्वेत्यादिनामनोरथइत्यतेनग्रंथेन मदस्यतीतिमदिरमीक्षणयस्याः
३४ तत्रचंद्रवंशाद्यानद्यःप्रसिद्धास्तासांपुण्यःसलिलैःउभयत्रअंतर्बहिरात्मनोमलंक्षालयन्तप आस्थितइत्युत्तरेणान्वयः ३५ अ
स्यतेषमोक्षिप्यतइत्यष्टिर्बीजं ३६ ३७ विद्ययाउपासनयापक्वकषायःदग्धकामादिवासनः युयुजे आत्मनोब्रह्मतांभावयामास
अक्षाणिइंद्रियाणि अनिलःप्राणः आशयश्चित्तं विजिताअक्षादयायेन आस्तेसमवर्षशतमितिज्ञानस्यदुःसाधनतांदर्शयति

विभज्यतनयेभ्यःक्ष्मांराजर्षिर्मलयध्वजः आरिराधयिषुःकृष्णंसजगामकुलाचलं ३३ हित्वागृहानसुतान्भोगान्वैद
र्भीमदिरेक्षणा अन्वधावच्चपांड्येशंज्योत्स्नेवरजनीकरं ३४ तत्रचंद्रवशानामताम्रपर्णीवटोदका तत्पुण्यसलिलैर्नि
त्यमुभयत्रात्मनोमृजं ३५ कंदाष्टिभिर्मूलफलैःपुष्पपर्णैस्तृणोदकैः वर्तमानःशनैर्गात्रकर्षणंतपआस्थितः ३६ शी
तोष्णवातवर्षाणिक्षुत्पिपासेप्रियाप्रिये सुखदुःखेइतिद्वंद्वान्यजयत्समदर्शनः ३७ तपसाविद्ययापक्वकषायोनिय
मैर्यमैः युयुजेब्रह्मण्यात्मानंविजिताक्षानिलाशयः ३८ आस्तेस्थाणुरिवैकत्रदिव्यंवर्षशतंस्थिरः वासुदेवेभगवतिनान्य
द्वेदोद्वहन्रतिं ३९ सव्यापकतयात्मानंव्यतिरिक्तनयात्मनि विद्वान्स्वप्नइवामर्षसाक्षिणंविरराममह ४० श्रीसीताराम

अतएवभक्तिंकृतवानित्याह वासुदेवेतिमुद्वहन् अन्यत्देहादिकंनवेद ३९ सएवंवर्तमानः आत्मन्यात्मानंविद्वानअन्यस्माउप
रराम कथंविद्वान्व्यतिरिक्तत्वेनकुतःव्यापकतयादेहादिप्रकाशकत्वेन ननुदेहाद्याकारोविमर्षएवतत्प्रकाशयतिनतुनिराकारआ
त्मातत्राह अमर्षस्यापिसाक्षिणं अयंभावः विमर्षोनामांतःकरणवृत्तिःसचजडत्वात् आत्मप्रकाश्यएवेति यथास्वप्नेममेदं
शिरःछिन्नमित्यादिप्रतीतौतद्व्यतिरिक्तआत्मानंचेतितद्वत ४० श्रीराम

भा०
७७

केनविद्वान्तत्राह साक्षाद्धरिरेवयोगुरुस्तेनउक्तेन सर्वतोमुखंयथातथास्फुरता अनवछिन्नेनज्ञानेन ४१ तदेवाह परइति ब्रह्मैवाहंनममा
गीति ब्रह्मण्यात्मनईक्षणे शोकादिनिवृत्तिः अहमेवब्रह्मेत्यात्मनिब्रह्मणीक्षणेब्रह्मपरोक्षनिवृत्तिः अतोव्यतिहारेणेक्षमाणः अस्मात्संसा ४०
राडुपराम नन्वेवमपिजीवस्यकुतोब्रह्मतापत्तिः इत्थंलक्षणस्यैवव्यवधायकत्वादित्याशंक्याह इक्षांविहायदग्धेंधनानलवत्तस्याःस्वय
मेवोपशांतेरितिभावः ४२ ४३उपपतिंपत्युःसमीपे यद्वा पत्युःकिंचिन्मात्रंन्यूनातत्समानामतीवभावित्यर्थः उपाधिकचेतिकर्मक

साक्षाद्भगवतोक्तेनगुरुणाहरिणानृप विशुद्धज्ञानरूपेणस्फुरताविश्वतोमुखं ४१ परेब्रह्मणिचात्मानंपरंब्रह्मतथात्मनि
विक्षमाणोविहायक्षामस्मादुपरराम ह ४२ पतिंपरमधर्मज्ञंवैदर्भीमलयध्वजं प्रेम्णापर्यचरद्धित्वाभोगान्सापति
देवता ४३ चीरवासाव्रतक्षामावेणीभूतशिरोरुहा बभावुपपतिंशांताशिखाशांतमिवोनलं ४४ अजानतीप्रियतमं
यदोपरतमंगना सुस्थिरासनमासाद्ययथापूर्वमुपाचरत ४५ यदानोपलभतांघ्रावूष्माणंपत्युरर्चती आसीत्सं
विग्नहृदयायूथभ्रष्टामृगीयथा ४६ आत्मानंशोचतीदीनमबंधुंविक्लवाश्रुभिः स्तनावासिच्यविपिनेसुस्वरंप्ररुरो
दसा ४७ उत्तिष्ठोत्तिष्ठराजर्षइमामुदधिमेखलां दस्युभ्यःक्षत्रबंधुभ्योबिभ्यतींपातुमर्हसि ४८ एवंविलपतीबा
लाविपिनेनुगतापतिं पतितापादयोर्भर्तूरुदत्यश्रुण्यवर्तयत ४९ चितिंदारुमयींकृत्वातस्यांपत्युःकलेवरं आ
दीप्यचानुमरणेविलपंतीमनोदधे ५०

र्मप्रवचनीयः उपयोगेचद्वितीया शांतमंगारवरुद्धं अनलंउपशांताशुद्धाज्वालायया भाति ४४ तदानीमपिसुस्थिरमासनंय
स्य एवनजानंतीयदातदायथापूर्वमसेवत ४५ पत्युरंघ्रिमर्चयतियदातस्मिन्नंघ्रौउष्माणंनापश्यत ४६ अबंधुंपतिरहितं
अश्रुभिरासिंचत ४७ क्षत्रबंधुभ्यःअधार्मिकक्षत्रियेभ्योपि ४८ अवर्तयतप्रवर्तयामास ४९ तस्यांनिधायअग्निदानेनादीप्यच
५०
७७

584/1381

पूर्वतरःअनादिरीश्वरःसखा द्वासुपर्णेतिश्रुतिः साम्नाप्रियवाक्येनसंबोधयन ५१ शोचसि अग्नेस्तु ते पूर्वोवैचचर्थमयिस्थितेन
सख्यंसुखमनुभूतवानसि ५२ यद्यपिमांनजानासितथाप्यात्मानंत्वामविज्ञातमवे अविज्ञातः कश्चिन्मसखाआसीदित्येवंकिंस्मर
सि सख्येइतिपुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणायसख्यंस्मारयन् वियोगकृतमनर्थमाह हित्वेतिसार्द्धैःषड्भिःपदंस्थानं ५३ हंसौशु
द्धौ मानसंहृदयं अनंयंययोः कथापक्षमानसंसरमिस्थितौ अक्षिणौअभूतांजातौ ओकोगृहं अंतराधिनेवाशब्दएवार्थःस

तत्रपूर्वतरःकश्चित्सखाब्राह्मणआत्मवान सांत्वयन्वल्गुनासाम्नातामाहरुदतींप्रभो ५१ कात्वंकस्यासिकोवायं
शयानोयस्यशोचसि जानासिकिंसखायंमांयेनाग्रेविचचर्थह ५२ अपिस्मरसिचात्मानमविज्ञातसखंसखे हित्वा
मांपदमन्विछन्भौमभोगरतोगतः ५३ हंसावहंचत्वंचार्यसखायोमानसायनौ अभूतामंतरावौकःसहस्रपरिवत्स
रान् ५४ सत्वंविहायमांबंधोगतोग्राम्यमतिर्महीं विचरन्पदमद्राक्षीःकयाचिन्निर्मितंस्त्रिया ५५ पंचारामंनवद्वार
मेकपालंत्रिकोष्टकं षट्कुलंपंचविपणंपंचप्रकृतिस्त्रीधवं ५६ पंचेंद्रियार्थाआरामाद्वारःप्राणानवप्रभो तेजोबन्ना
निकोष्ठानिकुलमिंद्रियसंग्रहः ५७

हस्रपरिवत्सरान्महाप्रलयोयावत ५४ हेबंधो ग्राम्यसुखेमतिर्यस्य स्त्रियामायया ५५ पंचआरामाउपवनानियस्मिन नव
द्वाराणिप्राणाछिद्राणियस्मिन एकःप्राणःपालोयस्मिन त्रीणिपृथिव्यप्तेजांसिकोष्ठानिप्राकारायस्मिन षडभीष्टविषयम
र्पकानिज्ञानेंद्रियमनांसियस्मिन पंचविपणाःहट्टाःकर्मेंद्रियाणियस्मिन पंचभूतानिप्रकृतिरुपादानकारणंयस्मिन स्त्री
बुद्धिरेवधवःपतिःस्वामिनियस्मि ५६ येस्वेमनर्मश्लेषकंव्यचष्टे पंचेंद्रियार्थाइति षट्कुलमिति एकपालानितिवम्पष्टत्वान्नव्या
ख्यातं ५७

भा०
७८

स्ततान्येवप्रकृतिरुपादानंतस्यव्याख्यातंतस्यमन्त्री धवमित्यस्यव्याख्यानंशक्तिरधीशायस्यतद्वशःमन्त्रित्यर्थः ५८ स्पष्टः अभिप्लुतः अ च०
तोनविद्यतेश्रुतंश्रवणंतत्स्मृतिर्यस्य ५९ तत्वमुपदिशति तत्वमिति चतुर्भिः सुहृत्पतिः नवद्वारेपुरेययारुद्धोसितस्याःपुमांसंपूर्वजन्मनिपर
मन्यथा ६० इदानींचमतीश्चत्वांस्त्रियंयन्मन्यसे एषामायायतउभयमपिवस्तुतोनास्तियस्मादावांहंसौ शुद्धौनौ आवयोर्वक्ष्यमाणांगतिं
स्वरूपंपश्य ६१ तत्वंपदार्थयोश्चिदंशेनैक्यमाह अहमेव भवान् उपचारंवारयतिनान्यइतिव्यतिहारोपदेशउक्ताभिप्रायः छिद्रमंतरं ६२

विपन्नस्मृक्रियाशक्तिप्रसृतप्रकृतिरव्यया शक्त्यर्धीरः पुमानत्रप्रविष्टोनावबुध्यते ५८ तस्मिंस्त्वंरामयास्पृष्टोरममाणोश्रु
तस्मृतिः तत्संगादीदृशींप्राप्तोदशांपापीयसीविभो ५९ तत्वंविदर्भदुहितानायंवीरसुहृत्तव नपतिस्त्वंपुरंजन्यारुद्धोनवमुखेयया
६० मायाह्येषामयासृष्टायत्पुमांसंस्त्रियंसतीं मन्यसेनोभयंयद्वैहंसौपश्यावयोर्गतिं ६१ अहंभवान्नचान्यस्त्वंत्वमेवाहं
विचक्ष्वभो ननौपश्यंतिकवयःछिद्रंजातुमनागपि ६२ यथापुरुषआत्मानमेकमादर्शचक्षुषोः द्विधाभूतमवेक्षेततथैवां
तरमावयोः ६३ एवंसमानसोहंसोहंसेनप्रतिबोधितः स्वस्थस्तद्व्यभिचारेणनष्टामापपुनःस्मृतिं ६४ बर्हिष्मन्नेतद
ध्यात्मंपारोक्ष्येणप्रदर्शितं यत्परोक्षप्रियोदेवोभगवान्विश्वभावनः ६५ इतिश्रीभागवतेमहापुराणेचतुर्थेअष्टाविंशोध्यायः

तर्हिंकथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदः तत्राह यथेति आत्मानंदेहंआदर्शेनिर्मलंमहांतंस्थिरंचावेक्षेतपरस्यचक्षुषित्वतद्वि
परीतंविद्याविद्योपाधिकृतोधर्मभेदइत्यर्थः ६३ तद्व्यभिचारेणईश्वरवियोगेन ६४ कथामात्रमितिबुद्धिंवारयति बर्हिष्मन्नि
ति परोक्षेणराजकथामिषेण तत्रहेतुः यद्यस्मात ६५ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांचतुर्थस्कंधटीकायांअष्टा
विंशोध्यायः २८ ऊनत्रिंशेपरोक्षार्थव्याख्यानेनोपमंस्कृतं स्त्रीसंगतोभवस्त्वीशसंगान्मुक्तिरितिस्फुटं १ श्रीरामकृष्णाभ्यांनमः ७८

583
1981

कवयःआत्मविदः १ व्यनक्तिलिंपतिचेतनीकरोतीत्यर्थः यद्वाव्यनक्तिप्रकटयति ततश्चस्वकर्मणापुरंजनपदंव्याख्यातंभवति एकद्वार
यःपादायस्य २ अविज्ञातशब्देनआहृतः व्याहृतउक्तोयःसईश्वरः अविज्ञातंनामनिरुक्तिःयद्यस्मात्पुंभिर्नामादियोगेननविज्ञायते
३ तत्रतेषुमध्ये ४ अक्षिभिरिंद्रियैः ५ पंचवृत्तित्वात्पंचशिराःसर्पइवप्राणाः ६ एकादशामहाभटाइत्यनेनएकादशीमहाभटानाय
कउक्तः तंदर्शयति महद्बलंयस्यतन्मनःनवखानिद्वाराणियस्य ७ द्युमत्सखइत्यादेरर्थंसंक्षेपेणाह यस्तदिंद्रियसंयुतःसआत्मा

प्राचीनबर्हिरुवाच भगवंस्तेवचोस्माभिर्नसम्यगवगम्यते कवयस्तद्विजानंतिनवयंकर्ममोहिताः १ नारदउवाच पु
रुषंपुरंजनंविद्याद्योव्यनक्त्यात्मनःपुरं एकद्वित्रिचतुष्पादंबहुपादमपादकं २ योविज्ञातात्हृतस्तस्यपुरुषस्यसखेश्व
रः यंनविज्ञायतेपुंभिर्नामभिर्वाक्रियागुणैः ३ यदाजिघृक्षन्पुरुषःकार्त्स्न्येनप्रकृतेर्गुणान् नवद्वारंद्विहस्तांघ्रितत्रा
मनुतसाध्विति ४ बुद्धिंतुप्रमदांविद्यात्ममाहमितियत्कृतं यामधिष्ठायदेहेस्मिन्पुमान्भुंक्तेक्षिभिर्गुणान् ५
सखायइंद्रियगणाज्ञानंकर्मचयत्कृतं पंचालाःपंचविषयायन्मध्येनवखंपुरं ७ सेरव्यस्तद्वनयःप्राणःपंचवृत्तिर्यथो
रगः ६ बृहद्बलंमनोविद्यादुभयेंद्रियनायकं ७ अक्षिणीनासिकेकर्णौमुखंशिश्नगुदाविति द्वेद्वेद्वारौबहिर्यातियस्तदिंद्रिय
संयुतः ८ अक्षिणीनासिकेचास्यमितिपंचपुरःकृताः दक्षिणादक्षिणःकर्णःउत्तराउत्तरःस्मृतः ९ पश्चिमइत्यधोद्वारौगुदं
शिश्नमिहोच्यते खद्योताविर्मुखीचात्रनेत्रेएकत्रनिर्मिते १० रूपंविभ्राजितंताभ्यांविचष्टेचक्षुषेश्वरः नलिनीनालिनी
नासेगंधःसौरभउच्यते घ्राणोवधूतोमुख्यास्यंविपणोवाग्रसविद्रसः ११

ताभिर्द्वाभिर्बहिर्यातीति ८ पुरःपूर्वभागकृताः ९ नेत्रइति रूपमितिचक्षुषेतिखद्योतादीनांव्याख्यानं शेषोनुवादः ईश्वरः पुरंजनः १०
नासिकेतिव्याख्या अवधुनोतिस्यवधूतोवायुस्तदात्मकनउच्छ्वासेनमहैकस्थानत्वात् घ्राणोवधूतः आस्यमितिव्याख्यारसज्ञविपणा
न्वितइत्यत्ररसज्ञशब्दनिर्दिष्टस्यरसविदित्यनुवादः रसइतिव्याख्यारसनेंद्रियमित्यर्थः विपणोवाग्रसविद्रसइत्येवपाठः आर्षत्वान्नदोषः
११

अंधः अन्नं १२ १३ ग्रामकमित्यस्यानुवादः ग्रामिणीरतिरिति तस्यव्याख्याव्यवायइति १४ १५ विषूचीनपदार्थानुवादोविषूचिरितितद्गुणे
र्मनोगुणैः तमः सत्वरजोभिः १६ महिषीयदीहितेत्यादेरर्थसंग्रहमाह यथायथाबुद्धिः स्वप्नेविक्रियतेजाग्रतिविकरोतिवाइंद्रियाणिपरि
णमयतितस्यागुणैः रक्तोलिप्त आत्मातथातस्यावृत्तिर्दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैवमनबलादनुकार्यते १७ आशुगमित्यतद्व्याचष्टे
संवत्सरस्यैवाप्रतिहतोस्यावेगः प्रतीतोयस्यसंवत्सररयः वस्तुतस्तु अगतिः स्वप्नशरीरादेर्बद्धावेवतिवृत्तत्वेन देशांतरगत्यभावात् पा

आपणोव्यवहारोत्रचित्रमंधोबहूदनं पितृहूर्दक्षिणः कर्णउत्तरोदेवहूः स्मृतः १२ प्रवृत्तंचनिवृत्तंचशास्त्रंपंचालसंज्ञि
तं पितृयानंदेवयानंश्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरीमेंढ्रमर्वाग्द्वाव्यवायोग्रामिणांरतिः उपस्थोदुर्मदः प्रोक्तोनिर्ऋ
तिर्गुदउच्यते १४ वैशसंनरकंपायुर्लुब्धकोंधौतुमेशृणु हस्तपादौपुमांस्ताभ्यांयुक्तोयातिकरोतिच १५ अंतःपुरंचहृद
यंविषूचिर्मनउच्यते तत्रमोहंप्रसादंवाहर्षंप्राप्नोतितद्गुणैः १६ यथायथाविक्रियतेबुद्धिर्गुणान्साविकरोतिवा तथातथो
पद्रष्टात्माततद्वृत्तीरनुकार्यते १७ देहोरथस्त्विंद्रियाश्वाः संवत्सररयोगतिः १८ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः
मनोरश्मिर्बुद्धिसूतोहन्नीडोद्वंद्वकूबरः १९ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः आकूतिर्विक्रमोबाह्योमृगतृष्णांप्र
धावति २० एकादशेंद्रियचमूः पंचसूनाविनोदकृत् संवत्सरश्चंडवेगः कालोयेनोपलक्षितः २१ तस्याहानीहगंधर्वागं
धर्व्योरात्रयः स्मृताः हरंत्यायुः परिक्रांत्याषष्ट्युत्तरशतत्रयं २२ कालकन्याजरासाक्षाल्लोकस्तांनाभिनंदति स्व
सारंजगृहेमृत्युः क्षयाययवनेश्वरः २३

गंतरेसंवत्सरश्चतत्कृतंवयश्चताभ्यांगतिर्यस्येति १८ द्वीषमित्यस्यव्याख्यात्रिगुणध्वजइतित्रिवेणुपदव्याख्या १९ पंचप्रहरमित्यत
द्व्याचष्टेपंचेंद्रियार्थप्रक्षेपइति २० पंचेंद्रियैः सूनाविनोदमिवान्यान्मनर्विषयमेवविकरोतीतिपंचसूनाविनोदकृत् अनेनचारण्य
गयांतत्रेतिव्याख्यातं २१ परिक्रांत्यापरिभ्रमणेन २२ भगिनीत्वेनउग्रहलोकानांजयाय २३ श्रीरामजयरामजयजयराम

591
1291

चाराः संचारिणः भूतानामुपसर्गेपीडायांआशुः शीघ्रोमृत्युहेतुः रयोवेगोयस्य प्रज्वारस्येतिप्रशब्दव्याख्या पाठांतरेभूतकृताउपसर्गा
अरयः अनेनचअरिभिरुपरुद्धइत्यरिपदंव्याख्यातं द्विविधः शीतोष्णरूपणप्रवशामद्रात २४ एवंपुरंजनोपाख्यानमर्थव्याख्यायसर्वकथा
तात्पर्यमाह एवमित्यादिचिरसक्रमणत्यंतेन २५ आधिदैवादिभिर्दुःखैः क्लिश्यमानोममाहमितिदेहेशतंवर्षाणिशतइतिद्वयोरन्वयः
२५ अशनापिपासादीन्प्राणधर्मानअंधत्वादीनिंद्रियधर्मान् कामानात्मनाधर्मान्निर्गुणस्यात्मन्यध्यस्यकामलवान्विषयसुख

आधयोव्याधयस्तस्यसैनिकायवनाश्चराः भूतोपसर्गाशुरयः प्रज्वारोद्विविधोज्वरः २४ एवंबहुविधैर्दुःखैर्दैवभूता
त्मसंभवैः क्लिश्यमानः शतंवर्षंदेहेदेहीतमोवृतः २५ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्यनिर्गुणः शेतेकामलवान्ध्या
यन्ममाहमितिकर्मकृत् २६ यदात्मानमविज्ञायभगवंतंपरंगुरुं पुरुषस्तुविषज्जेतगुणेषुप्रकृतेःस्वदृक् २७ गुणा
भिमानीसतदाकर्माणिकुरुतेवशः शुक्लंकृष्णंलोहितंवायथाकर्माभिजायते २८ शुक्लात्प्रकाशभूयिष्ठाँल्लोकान
प्राप्नोतिकर्हिचित् दुःखोदर्कान्क्रियायासांस्तमः शोकोत्कटान्क्वचित् २९ क्वचित्पुमान्क्वचिच्चस्त्रीक्वचिन्नोभ
यमंदधीः देवोमनुष्यस्तिर्यग्वायथाकर्मगुणंभवः ३०

लेशान्ध्यायन्कर्मकृत् २६ ततः किमत आह यदेतिद्वाभ्यां स्वदृक्स्वप्रकाशस्वभावोपि २७ शुक्लंसात्विकंकृष्णंतामसंलो
हितंराजसं यथाकर्मतथाजायते २८ तदेवाह शुक्लादितिद्वाभ्यां प्रकाशोभूयिष्ठोयेषुदुःखमुदर्कउत्तरफलंयेषुक्रियया आ
यासोयेषुतान्लोहितान् तमः शोकाबुत्कटोयेषुतान् कृष्णादितिज्ञेयं २९ नोभयंनपुंसकंयथाकर्मगुणंकर्मगुणावनतिक
म्यतेपु ३०

देववशेनसुखदुःखंप्राप्नोतीतिसदृष्टांतमाह द्वाभ्यां क्षुधापरितोव्याघ्रःसारमेयःश्वादंडंदंडेनताडनं ३१कामव्याप्त आशयोयस्य ३२
ननुतर्हिसुखस्यसंभावात्दुःखस्यचप्रतीकारसंभवान्नेकांततोहेयत्वंतत्राह दुःखेष्विति दुःखस्यप्रतीकारस्तावन्नास्तिस्याच्चेत्तस्य
तस्यप्रतिक्रियाणामपिदुःखरूपत्वादितिसदृष्टांतमाह यथाहीति ३४दुःखस्यमूलभूतानितुकर्माणिप्रतिक्रियादिकर्मभिर्नैवनिवर्तंत
इत्याह नेकांततः अत्यंतमवासनंकेवलंज्ञानरहितंअविद्ययाउपसृतंप्राप्तं अतोविरोधोननिवर्तकत्वमितिभावः अत्रदृष्टांतःस्वप्नेदृ

क्षुत्परितोयथादीनःसारमेयोगृहंगृहं चरन्विंदतियद्दिष्टंदंडमोदनमेववा ३१ तथाकामाशयोजीवउच्चावचपथान्
भ्रमन् उपर्यधोवामध्येवायातिदिष्टंप्रियाप्रियं ३२ दुःखेष्वेकतरेणापिदैवभूतात्महेतुषु जीवस्यनव्यवच्छेदःस्याच्चे
त्तत्प्रतिक्रिया ३३ यथाहिपुरुषोभारंशिरसागुरुमुद्वहन् तंस्कंधेनसआधत्तेतथासर्वाःप्रतिक्रियाः ३४ नैकां
ततःप्रतीकारःकर्मणांकर्मकेवलं द्वयंह्यविद्योपसृतंस्वप्नेस्वप्नइवानघ ३५ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त
ते मनसालिंगरूपेणस्वप्नेविचरतोयथा ३६ अथात्मनोर्थभूतस्ययतोनर्थपरंपरा संसृतिस्तद्व्यवच्छेदोभक्त्यापरमया
गुरौ ३७

ष्टःस्वप्नःप्रबोधंविनायथातंस्वप्नमन्यंतेनप्रतिकरोतीत्यर्थः ३५ ननुतर्ह्यज्ञानविलसितत्वेनसंसृतिहेतोर्देहादेरप्यसत्वात्किं
तन्निवर्तनप्रयासेनतत्राह अर्थेहीति लिंगरूपेणउपाधिभूतेन ३६ तदेवंसंसृतिप्रकारमुक्त्वातन्निवृत्तिप्रकारमाह अथत
स्मात्पुरुषार्थभूतस्यैवात्मनः यतोज्ञानान्मनसोवा अनर्थपरंपराकरूपासंसृतिर्भवति तस्यव्यवच्छेदोगुरुरूपेवासुदेवेभक्त्यैव
३७ ८०

593
1981

ननुसंसृतिनिवृत्तिर्वैराग्यपूर्वकात्ज्ञानादेवनतुभक्त्या तरतिशोकमात्मविदित्यादिश्रुतेस्तत्राह वासुदेवइति सध्रीचीनेनसमीचीनप्रका
रेण ३८ नन्वसौमहाफलोभक्तियोगःकथंस्यादत आह सतु अच्युतकथामाश्रित्यवर्तमानोविचारातस्यात्कस्यस्यात्तदाहशृण्वतः३०
अधीयानस्यचकुत्रस्यात्तदाह। यत्रेति भगवतोगुणानुकथनेश्रवणेचव्यग्रंसत्वरंचेतोयेषांते ४० ननुसाधुसंगंविनाप्यस्यमवहरिकथाचिं
तनादिनाभक्तिःसंभवेदेवेत्याशंक्याह द्वाभ्यां तस्मिन्स्थानेमहद्भिर्मुखरिताःकीर्तिताः मधुभिच्चरित्रमेवपीयूषंतदेवशिष्यन्तइतिशेषायामु

वासुदेवेभगवतिभक्तियोगःप्रयोजितः सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति ३८ सोचिरादेवराजर्षेस्यादच्युतकथा
श्रयः शृण्वतःश्रद्दधानस्यनित्यदास्यादधीयतः ३९ यत्रभागवताराजन्साधवोविशदाशयाः भगवद्गुणानुकथन
श्रवणव्यग्रचेतसः ४० तस्मिन्महन्मुखरितामधुभिच्चरित्रपीयूषशेषसरितःपरितःस्रवंति तायेपिबंत्यवितृषोनृप
गाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः ४१ एतैरुपद्रुतोनित्यंजीवलोकःस्वभावजैः नकरोतिहरेर्नूनंकथा
मृतनिधौरतिं ४२ प्रजापतिपतिःसाक्षात्भगवान्गिरिशोमनुः दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः ४३
मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः ४४

असाररसरहितशुद्धामृतवाहिन्यइत्यर्थः अवितृपः अलंबुद्धिशून्याःसंतःगाढैःसावधानैःकर्णैर्यैतासरितःपिबंतिसवंत अ
शनशब्देनक्षुल्लक्ष्यते अन्नादयःस्तान्नस्पृशंतिभक्तिरसिकान्नबाधंतइत्यर्थः ४१ ४२ सत्संगमंतरेणास्वयमेवकथाचिंतनादावा
लस्यादिनारसावेशाभावाच्चक्षुत्पिपासाद्यभिभूतस्यभक्तिर्नसंभवतीत्याह एतैरिति भगवदनुग्रहमंतरेणनकस्यापिज्ञानसंभव
इतिकैमुत्यन्यायेनाह चतुर्भिःप्रजापतिपतिर्ब्रह्मा ४३ मदंताःअहंनारदअंतेयेषांते ४४ श्रीवासुदेवायनमः श्रीराम

वाचांपतयोविद्यामसमाधिभिरुपायैः पश्यंतोविचिन्वंतोपिपश्यंतंसर्वसाक्षिणंनपश्यंति ४५ कुतइत्यत आह शब्दब्रह्मणिवेदेऊरुवि
स्तारोयस्य अर्थतोपिपारशून्येतस्मिन्वर्तमानाः मंत्राणांलिंगैर्वज्रहस्तत्वादियुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिछिन्नमेवं
इंद्रादिरूपंतत्तत्कर्मोग्रहेणभजंतः परमेश्वरंनविदुः ४६ तर्ह्यन्यःकोनामकर्मोग्रहंहित्वापरमेवभजेदत आह यदायमनुगृह्णाति अनु
ग्रहहेतुः आत्मनिभावितः सतसतदालोकेलोकव्यवहारेवेदेचकर्ममार्गेपरिनिष्ठितांमतिंत्यजति ४७ अर्थकाशिषुपरमार्थत्वेनप्र

अद्यापिवाचस्पतयस्तपोविद्यासमाधिभिः पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरं ४५ शब्दब्रह्मणिदुःपारेचरंतउरुवि
स्तरे मंत्रलिंगैर्व्यवछिन्नंभजंतोनविदुःपरं ४६ यदायस्यानुगृह्णातिभगवानात्मभावितः सजहातिमतिंलोकेवे
देचपरिनिष्ठितां ४७ यस्मात्कर्मसुबर्हिष्मन्नज्ञानादर्थकाशिषु मार्थदृष्टिंकृथाःश्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४८
स्वलोकंनविदुस्तेवैयत्रदेवोजनार्दनः आहुर्धूम्रधियोवेदंसकर्मकमतद्विदः ४९ आस्तीर्यदर्भैःप्रागग्रैःकार्त्स्न्ये
नक्षितिमंडलं स्तब्धोबृहद्वधान्मानीकर्मनावैषियत्परं ५०

काशमानेषुपुरुषार्थबुद्धिंमाकृथाः प्ररोचनायकेवलंश्रोत्रप्रियेषु नस्पृष्टंवस्तुयैः ४८ ननुवेदेनस्वर्गादिसाधनत्वेनोक्तानिक
र्माणीतिवेदवादिनोवदंतिकथमस्पृष्टवस्त्वित्युच्यतेतत्राह येधूम्रधियःमलिनबुद्धयःसकर्मकंकर्मपरंवेदमाहुः तेअतद्विदःअ
वेदज्ञाःयतस्तत्स्वरूपभूतंलोकंआत्मतत्त्वंवेदतात्पर्यगोचरंनविदुःयत्रदेवोस्ति ४९ त्वंतुमहामूर्खइत्याह आस्तीर्येति दृहद्
धातबहुपशुवधात्मानोमहायज्वाहमित्यहंकारोतीस्तब्धः अविनीतःसन्कर्मणावैपियत्परंविद्यास्वरूपंतत्त्वनवेत्सि ५०

593
1981

नारदःस्वयंकृपयातद्वयंनिरूपयति हरिंतोषयतीतिहरितोषंतत्तदेवकर्म ययातस्मिन्हरौमतिर्भवतिसैवविद्यामहाफलत्वात् कुतइत्य
पेक्षायांहरेःपरमफलत्वंदर्शयन्नाह द्वाभ्यां हरिर्देहभृतामात्माईश्वरश्च तत्रहेतुः स्वयंस्वातंत्र्येणप्रकृतिःकारणं अतस्तस्यतत्पादमू
लमेवशरणमाश्रयः यतोयस्मिन् नचतस्यभजनेनस्यभजनइववुःखमयंचेत्याह सइति यावेदसएवविद्वानसगुरुर्वहरिश्च ५२
उक्तमुपसंहरति एवंभवतःप्रश्नःसंछिन्नःपरिहृतः तदेवमात्मनाबंधप्रकारेकथारूपेणकथितेपिनातिनिर्विण्णचित्तंपुत्रागमनंप्रती

तत्कर्महरितोषंयत्सविद्यातन्मतिर्यया हरिर्देहभृतामात्मास्वयंप्रकृतिरीश्वरः तत्पादमूलंशरणंयतःक्षेमोनृणामिह
५१ सवैप्रेष्ठतमश्चात्मायतोनभयमण्वपि इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः ५२ नारदउवाच प्रश्नएवंहिसं
छिन्नोभवतःपुरुषर्षभ अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं ५३ क्षुद्रंचरंसुमनसांशरणेमिथित्वारक्तंषडंघ्रिगण
सामसुलुब्धकर्णं अग्रेवृकानसुतृपोविगणय्ययांतंपृष्ठेमृगंमृगयलुब्धकबाणभिन्नं ५४

क्षमाणंतक्षणमेवमहाभयकंपितसकलगात्रंगृहान्निर्वासयितुंहरिणरूपकमाह यत्रेति वदतोमेवचःशृणु क्षुद्रमल्पंचरतीतितथा
तंअलुकसुमनसांपुष्पाणांशरणे आश्रयेवाटिकायांमिथित्वामिथः परस्परंस्त्रियासहमीलित्वामिथुनीभूयतत्रैवरक्तं आसक्तं ष
डंघ्रयोभ्रमरास्तेषांगणासामसुगीतेषुलुब्धःकर्णोयस्यतं परेषामसुभिर्घातितैः स्वानसून तर्पयंतीति असुतृपस्तान् अविगण
य्य अगणयित्वालुब्धकस्यबाणेनभिन्नंमृगंमृगय अन्वेषय ५४ श्रीराम जयराम जयजयराम नमोभगवतेवासुदेवाय

पूर्वश्लोकस्यव्याख्या सुमनसांसुधर्माणांस्त्रीणांशरणे आश्रमेपुष्पमधुगंधवत्क्षुद्रतमंकाम्यकर्मविपाकजंकामसुखलवंजिह्वोपस्था
नादिनिमित्तंमिथुनीभूयतदभिनिवेशितमानसंषडंघ्रिगणसामगीतवदतिमनोहरवनिताजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे
वृकयूथवदात्मनआयुर्हरतोहोरात्रान्कालविशेषानगणय्यगृहेषुविहरंतंपृष्ठतःपरोक्षमनुप्रवृत्तोलुब्धकःकृतांतःशरेणयमिहपरा
विध्यतितमिममात्मानंमहाराजभिन्नहृदयंद्रष्टुमर्हसीति ५५ श्लोकंप्रकृतेयोजयन्व्याचष्टेसुमनोभिःसमानोधर्मःपरिणामविर
सत्वंयासांस्त्रीणांमिथ्यत्वस्यव्याख्यामिथुनीभूयस्त्रीभिःसहेतिशेषःरक्तमित्यस्यव्याख्यातास्वभिनिवेशितंमनोयेन असुतृपइत्य

सत्वंविचक्ष्यमृगचेष्टितमात्मनोंतश्चित्तंनियच्छहृदिकर्णधुनींचचित्ते जह्यंगनाश्रममसत्तमयूथगाथंप्रीणीहिजी
वशरणंविरमक्रमेण ५५ राजोवाच श्रुतमन्वीक्षितंब्रह्मन्भगवान्यदभाषत नैतज्जानंत्युपाध्यायाःकिंनब्रूयुर्वि
दुर्यदि ५६ संशयात्रतुमेविप्रसंछिन्नस्तत्कृतामहान् ऋषयोपिहिमुह्यंतियत्रनेंद्रियवृत्तयः ५७ श्रीगोपालकृष्ण

स्यव्याख्या आयुर्हरतइति यांतमित्यस्यव्याख्याविहरंतमिति अंतर्नलिकायांगूढेनशरेणपराविध्यतिदूरादेवताडयति ५५ उपदेश
सारमाह सइति विचक्ष्यविचार्य अंतर्हृदिचित्तंकर्णयोर्धुनींनदीमिव बहिर्वृत्तिंचित्तेनियच्छ एतच्चसर्वेंद्रियोपलक्षणार्थं गृहाश्रमं
चजहिकीदृशं असत्तमानामतिकामुकानांयानियूथानितेषांगाथावार्तायस्मिन् जीवानांशरणमीश्वरं एवंक्रमेणसर्वतोविरम
५५ अर्थांतरंप्रष्टुंपूर्वोक्तमनुवदति श्रुतंअन्वीक्षितंचविचारितं ब्रह्मन्नारदएतत्त्वदुक्तं आत्मतत्वं उपाध्यायायेममकर्मोप
देष्टारःआचार्यास्तेनजानंति ५६ अतस्तत्कृतःउपाध्यायकृतःतद्वाक्यविरोधनात्मतत्वअसंभावनारूपोमहान्संशयःछिन्न
स्त्वयाअत्रतुकश्चित्संशयोवर्तते यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति ५७ नारायण ७ ७ ७ ७

597
1981

संशयमाहद्वाभ्यां कर्माणियेनदेहेनकरोतितमत्रैवविहाय अमुत्रलोकांतरकर्मोपस्थापितेनान्येनदेहेनजुष्टानिउपभुक्तानिजीवाश्रु
तेप्राप्नोति इतिवादःश्रूयते पापपुण्यकृतांल्लोकानितिशरीरजःकर्मदोषैर्यातिस्थावरतांनरः तथा चोक्तं शाश्वतीरनुसंयातिमिति
एतच्चकर्तुर्भोक्तुर्देहभेदेनकृतनाशाकृताभ्यागमप्रसंगान्नसंगच्छतइतिभावः ५८ संशयांतरमाह प्राक्तंवदोक्तंकर्मक्रियतेजनैः
तच्चनिरंतरक्षणएवपरोक्षंअदृश्यंसत्तनप्रकाशतेअतःकर्मणोनष्टत्वात्भोगोपिदुर्घटइतिभावः ५० प्रथमस्योत्तरंयेनैवेति अथव
धानेनकर्तुर्भोक्तुर्देहविच्छेदंविनास्थूलदेहनाशेपिमनःप्रधानस्यदेहस्यानाशान्नोक्तदोषप्रसंगःइत्यर्थः ६० लिंगदेहविशिष्टस्य

इतिवेदविदांवादःश्रूयतेतत्रतत्रह ५८
कर्माण्यारभतेयेनपुमानिहविहायतं अमुत्रान्येनदेहेनजुष्टान्यसकृदश्नुते ५० श्रीनारदउवाच येनैवारभतेकर्मतेनैवामुत्रतत्पुमान् भुंक्तेह्यव्यवधा
कर्मयत्क्रियतेप्राक्तंपरोक्षंतत्प्रकाशते ५० नेनलिंगेनमनसास्वयं ६० शयानमिदमुत्सृज्यश्वसंतंपुरुषोयथा कर्मात्मन्याहितंभुंक्तेतादृशेनेतरेणवा ६१
ममेतिमनसायद्यदसावहमितिब्रुवन् गृह्णीयात्तत्पुमानराद्धंकर्मयेनपुनर्भवः ६२

भोक्तृत्वंस्वप्नदृष्टांतेनस्पष्टयति शयानमिमंजाग्रद्देहंश्वसंतंजीवंतमुत्सृज्यतदभिमानंत्यक्त्वा आत्मनिमनसिसंस्काररूपेण हि
तंकर्मयथाभुंक्तेतादृशेनशयानदेहसदृशेनकर्मोपस्थापितदेहेन अन्येनवापश्वादिदेहेनतथालोकांतरेपीतिभावः ६१ ननुभवतु
नामलिंगविशिष्टस्यानेनदृष्टंतेनभोक्तृत्वंकर्तृत्वंतुदानप्रतिग्रहादिषुस्थूलदेहविशिष्टस्यैवदृश्यतेतत्राह ममेतिपुत्रादयःममअहं
ब्राह्मणइतिब्रुवन्मनसायद्यद्देहंगृह्णीयात्ततत्ततोदेहांतरगतराद्धंसिद्धंकर्मपुमान्गृह्णीयात्येनकर्मणाएवमहंकारगृहीतेन
पुनर्भवोभवति अन्यथाजन्मानुपपत्तेः अनेनाभिमंतुर्मनोविशिष्टस्यैवकर्तृत्वं अभिमानविषयस्यतुदेहस्यपुत्रादिदेहवत्द्वार
मात्रमितिभावः ६२

 यदुक्तं कर्मणोनष्टत्वान्नामुत्रभोग इतितत्राह यथेति उभयेज्ञानकर्मेंद्रियेज्ञानकर्मरूपेरिंद्रियाणामीहितैः कदाचित्कप्रवृत्तिभिश्चि
त्तमनुमीयते सत्यपिसर्वेंद्रियसंबंधे युगपत् ज्ञानानुपपत्तेः तदुक्तमक्षपादेन युगपत्ज्ञानानुत्पत्तिर्मनसोलिंगमिति एवंचित्तवृत्ति
भिरपिपूर्वदेहजंकर्मलक्ष्यते तासामपियुगपदनुत्पत्तेः ६३ इतोपिकर्मलक्ष्यतइत्याह नानुभूतमितिद्वाभ्यां अनेनवर्तमानेनदेहेनक
चकुत्रचितअपियन्नानुभूतं अनुपभुक्तं अदृष्टंचाश्रुतंचयद्रूपंयदात्मकंयादृकयत्प्रकारंच तत्कदाचित्स्वप्नमनोरथादिषु आत्म
निमनसिउपलभ्यते ६४ तेनहेतुना अस्यलिंगिनोवामनाश्रयस्यजीवस्यतादृशंतदनुभवादित्युक्तं पूर्वदेहसंभवंश्रद्धत्स्वनिश्चय
ममन्यस्व नह्यननुभूतोर्थोमनःस्प्रष्टुंमनसिस्फुरितुमर्हति ६५ किंचमनोहृत्स्वेवपूर्वपराणिशुभाशुभनिमित्तानिशरीराणिजा

यथानुमीयतेचित्तमुभयैरिंद्रियेहितैः एवंप्राग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः ६३ नानुभूतंक्वचाननदेहेनादृष्टम
श्रुतं कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ६४ तेनास्यतादृशंराजंल्लिंगिनोदेहसंभवं श्रद्धत्स्वाननुभूतोर्थोनम
नःस्प्रष्टुमर्हति ६५ मनएवमनुष्यस्यपूर्वरूपाणिशंसति भविष्यतश्चभद्रंतेतथैवनभविष्यतः ६६ अदृष्टमश्रु
मश्रुतंचात्रक्वचिन्मनसिदृश्यते यथातथानुमंतव्यंदेशकालक्रियाश्रयं ६७

यंतइत्याह मनएवेति भद्रंतइतिसम्यगवधानार्थमाशिषाभिनंदति भविष्यतः उद्भवंप्राप्स्यतः नभविष्यतः नीचत्वंप्राप्स्यतोपि
भाविनीरूपाणिशंसति मनएव औदार्यकार्पण्यादिवृत्तिभिः पूर्वमप्येवमेवासीत पश्चादप्येवमेवभविष्यतीतिज्ञापयतीत्यर्थः ६६
ननुकदाचिद्दर्शनानर्हमपिस्वप्नप्रतीयते यथासमुद्रःपर्वताग्रेदिवानक्षत्राणिस्वशिरःछेदइत्यादितत्राह अदृष्टमिति अन्यदेशा
श्रयंसमुद्रंपर्वताग्रनिशाश्रयंनक्षत्रादिकंदिवा अन्यांगादिक्रियाश्रयंशिरःछेदनाश्रयंनिद्रादिदोषेणप्रतीयतइत्यनुमंत ८३
व्यं परस्यापितदनुपपन्नस्तुल्यत्वादितिभावः ६७ श्रीराम श्रीकृष्ण ७ ७ ७

599
1381

ननुकदाचित दरिद्रःआत्मानंराजानंपश्यतिराजाचरंकमात्मानंपश्यतितत्कथमसंभावितंसंगच्छततत्राह सर्वइति आयांतिभाग्य
वशात्प्राप्नुवंतियांतिचभोगानंतरं यदिकश्चिदमनाभवेत्तर्ह्येवंनस्यात्तत्त्वेनदस्तीत्याह सर्वसमनसइति अतःसर्वेषांसमनस्कत्वात्म
नस्विसर्वार्थानांक्रमेणप्रवेशात्यंतादृष्टचरःकस्यापिकश्चिदर्थोनास्तीत्यर्थः ६८ तदेवंसर्वेपिसर्वथाःक्रमेणदृश्यंतइत्युक्तं इदानीयु
गपदपिसर्वदर्शनंकदाचिद्भवतीत्याह सत्वैकनिष्ठेभगवत्पार्श्ववर्तिनिभगवद्ध्यानपरेमनसिइदंविश्वमुपरज्यसंयोगमिवप्राप्यावभास
ते प्रतीत्यनर्हस्यापिकदाचित्प्रतीतौदृष्टांतः चंद्रमसिउपरज्यतमःराहुरिव तदिदंशुद्धमनसिसर्वविषयस्फुरणंयोगिप्रत्यक्षमितिप्रसि

सर्वक्रमानुरोधेनमनसींद्रियगोचराः आयांतिवर्गशोयांतिसर्वेसमनसोजनाः ६८ सत्वैकनिष्ठेमनसिभगवत्पार्श्व
र्तिनि तमश्चंद्रमसीवेदमुपरज्यावभासते ६९ नाहंममेतिभावोयंपुरुषेव्यवधीयते यावद्बुद्धिमनोक्षार्थगुणव्यूहो
ह्यनादिमान ७० सुप्तिमूर्छोपतापेषुप्राणायनविघाततः नेहतेहमितिज्ञानंमृत्युप्रज्वारयोरपि ७१ श्रीराम

द्धं तदेवंस्थूलदेहनाशेपिलिंगदेहस्यानाशादन्यःकर्ता अन्योभोक्तेतिनास्तीत्युक्तं ६९ तत्रैवंशंक्यते ननुलिंगदेहस्यस्थूलदेहद्वारेण
वकर्तृत्वभोक्तृत्वनतुकेवलस्य तत्रकदाचितस्थूलदेहाभावेजीवस्यकर्तृत्वभोक्तृत्वाभावात्मुक्तिःप्रसज्येततत्राह अहंममेतिभावः
स्थूलदेहसंबंधःपुरुषेजीवेनव्यवधीयतेविच्छिन्नोनभवति किंपर्यंतंबुद्ध्यादीनांव्यूहःपरिणामोलिंगंयावदस्ति नआदिमान अ
नादिःसन ७० स्वापादवहंकाराद्यभावाततद्विच्छेदमाशंक्याह द्वाभ्यां सुप्त्यादिषुउपतापेषुइष्टवियोगादिदुःखेतेषु अहमितिज्ञा
नंअहंकारःनेहतेनप्रकाशते प्राणायनानामिंद्रियाणांविघातात इंद्रियैरहंकारास्पदवस्तुग्रहणेह्यहंकारःस्फुरतिनान्यथेत्यर्थः
७१

अपोच्कल्यात असंपूर्णत्वात प्राणायनानामिति शेषः यूनस्तरुणस्यचत एकादशविधं एकादशेंद्रियैः स्फुटं लिंगमहंकरणं तत्र दृश्यते म
तोपिअनभिव्यक्तो दृष्टांतः कुह्वाममावास्यायां चंद्रमसा लिंगं रूपमिव ७२ तस्मादहंकारास्पदस्य स्थूलदेहस्याविच्छेदाद्दसत्यतार्थाभाव
पि संसृतिर्निवृत्तिर्नास्तीत्याह अर्थेहीति यावत लिंगदेह स्थूलदेहाविच्छेदात्संसारानिवृत्तिरिति ७३ एतत प्रपंचयति एवमितिमार्द्धे त्रि
भिः पंचविधं पंचतन्मात्रकं त्रिवृत त्रिगुणं षोडशविकारात्मनाविस्तृतः ७४ ७५ नन्वेकं देहं विसृज्यान्यदेहप्रवेशात पूर्वं विदेहतास्या

गर्भबाल्येष्वपोच्कल्यादेकादशविधं तदा लिंगं न दृश्यते यूनः कुह्वां चंद्रमसा यथा ७२ अर्थेह्यविद्यमानेपि संसृतिर्न निवर्तते
ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ७३ एवं पंचविधं लिंगं त्रिवृत षोडशविस्तृतं एष चेतनया युक्तो जीव इत्यभिधीय
ते ७४ अनेन पुरुषो देहानुपादत्ते विमुंचति हर्षं शोकं भयं दुःखं सुखं चानेन विंदति ७५ यथा तृणजलोकेयं नापयात्यप
तानां भवभावनं यदा स्मरति तां ध्यायन्कर्माण्याचनुते सकृत सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः ७७ अतस्त
दपवादार्थं भज सर्वात्मना हरिं पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ७८ मैत्रेय उवाच भागवतमुख्यो भगवान्ना
रदो हंसयोर्गतिं प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततो गमत ७९ प्राचीनबर्हिराजर्षिः प्रजासर्गाभिरक्षणे आदिश्य पुत्रानगम
त्तपसे कपिलाश्रमं ८० तत्रैकाग्रमना धीरो गोविंदचरणांबुजं विमुक्तसंगोनुभजन भक्त्या तत्साम्यतामियात ८१ एतदध्या
त्मपारोक्ष्यं गीतं देवर्षिणानघ यः श्रावयेद्यः शृणुयात स लिंगेन विमुच्यते ८२
देवत्यत आह यथेति नापयाति पूर्वं तृणम्यात्यागात अपयाति तृणांतरस्य धारणात तथान्त्यजेत अहंदेहं कर्मणां प्राग्देहारंभकाणां
व्यवधानेन व्यवच्छेदन समाप्त्या ७६ प्रकरणार्थमुपसंहरति मन एवेति भवभावनं संसारहेतुः कथं मतितदाह यदेति चरितान उपयुक्ता
न यतः कर्मणिः मति नन्वसंगस्य कुतः कर्म तत्राह अविद्यायां सत्यां अनात्मनो देहादेः कर्मणि बंधो भवति विश्वस्थित्यादयो यतो
हरेर्भवंति ७८ हंसयोर्जीवेश्वरयोः ७९ पुत्रानादिश्यातिपुत्राणामादेशं मंत्रिणामग्रे कथयित्वा ८० ८१ ८२ श्रीराम

601
1281

आत्मशौचं मनः शोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलप्रदं ८३ स्त्रीबुद्धिस्तत्सहितस्या समाहंकारः छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति
संशयः छिन्नः ८४ इति चतुर्थे एकोनत्रिंशः प्रसंगात्पंचभिः प्रोक्तं वृत्तं प्राचीनबर्हिषः वर्ण्यते च पुनर्द्वाभ्यां प्रस्तुतं तत्प्रचेतसां १ तत्र त्रिंशत
पस्तुष्टाद्दशाल्लब्धवरा ततः आगत्य वार्क्षी मुद्वाह्य राज्यं चक्रुरितीर्यते ० हरिं प्रतोष्य कां सिद्धिमापुः हे बार्हस्पत्य कस्यां विद्यायां बृहस्पते
मैत्रेयः शिष्य इति ज्ञातव्यं तेयदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिभिः तदनुगृहीताः मंतान्नूनं परं मोक्षं

एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन भवे भ्रमति मुक्त
समस्तसंगः ८३ आत्माध्यापारोक्ष्यमिदं मयाधिगतमद्भुतं एवं स्त्रिया श्रमः पुंसः छिन्नो मुत्र च संशयः ८४ इति श्रीभागवते म
हापुराणे चतुर्थस्कंधे एकोनत्रिंशतितमोध्यायः २९ विदुर उवाच ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ते रुद्रगीतेन
हरिं सिद्धिमापुः प्रतोष्य कां १ किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं
नूनमथ प्रचेतसः २ मैत्रेय उवाच प्रचेतसोंतरुदधौ पितुरादेशकारिणः पंजयज्ञेन तपसा पुरंजनमतोषयन ३ दशवर्ष
सहस्रांते पुरुषस्तु सनातनः तेषामाविरभूत्कृच्छ्रं शांतेन शमयन रुचा ४ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः पीत
वासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ५ भ्राजिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः अ
ष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिन्नरगीतकीर्तिः ६ श्रीराम श्रीकृष्ण ७ ७ ७ श्री

प्रापुरेव ततः पूर्वं तु इहाथवा परत्र किं प्रापुः २ रुद्रगीत जपरूपेण यज्ञेन तपसा च पुरंजनं हरिं ३ तेषां क्लेशं तपःकृच्छ्रं रुच्या कीर्त्या शम
यन शांतेन सत्वेन वपुषा आविर्भूतः ४ सुपर्णस्कंधमारूढ इत्यादीनां बर्हिष्मंतः सुतानाहेति तृतीयेनान्वयः ५ कनकमयेन वर्णव
ता विभूषणेन भ्राजमानं कपोलं वदनं यस्य अष्टभिरायुधैः गरुड एव किन्नरस्तेन पक्षस्वनेन गीता कीर्तिर्यस्य ६ श्रीरामचंद्रायन

पीनाश्चते आयता अष्टभुजास्तेषां मंडलं समूहस्तन्मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्य तया वनमालया परिवृत्तः आद्यः पुरुष
आह पर्जन्यस्य नाद इव रुतं नादो यस्य तया वाचा सघृणावलोको यस्य ७ यूयं मम तोषणी ध्वंसो हार्देन हेतुना अपृथग्धर्मा येषां संबोध
नं वः परस्परं सौहृदेन तुष्टोहं ८ भवत्सु सौहृदं च भविष्यति ९ तेषां दास्ये किं पुनर्युष्माकमिति शेषः १० अग्रहीष्ट गृहीतवंतः अथो इति हेतोः
लोकाननु लोकं पुरुर्भविष्यति यद्वा लोकानणु भविष्यति उरुस्थली तिव्याप्स्यतीत्यर्थः ११ आत्मनो वीर्येण संतानेन १२ पुत्रार्थमादो भार्यासंपाद

पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धश्रिया परिवृतो वनमालयाद्यः बर्हिभ्रतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुत
यासघृणावलोकः ७ श्रीभगवानुवाच वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः सौहार्देनापृथग्धर्मास्तुष्टोहं सौहृदेन वः ८ यो
नुस्मरति शय्यायां युष्माननुदिनं नरः तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ९ ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः
स्तुवंत्यहं कामवरान्दास्ये प्रज्ञां च शोभनां १० यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः अथो व उशती कीर्तिर्लोकाननु भविष्य
ति ११ भविता विश्रुतः पुत्रोनवमो ब्रह्मणो गुणैः य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति १२ कंडोः प्रम्लोचया लब्धा कन्या
कमललोचना तां चापविद्धां जगृहुर्भूरुहा नृपनंदनाः १३ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीं देशिनीं रोदमानाया
निदधे स दयान्वितः १४ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता तत्र कन्यां वरारोहां तामुद्वहत माचिरं १५ श्रीरामकृष्णाभ्यां

यतीकंडोरिति त्रिभिः तपोनाशार्थमिंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषिर्कोलं बंडुरमे सा च ततः स्वर्गं गच्छंती कंडोर्जातं गर्भं वृक्षेषु त्यक्त्वा
जगाम तदुक्तं अपविद्धां त्यक्तां १३ सप्रसिद्धो वनस्पतीनां राजा सोमः अमृतः स्राविणीं तर्जनीं रुदंत्यास्तस्याः मुखे विनिदधे अनेनाप्सरसो
गर्भसंभवेनामृताहारेण च तस्या लावण्यं क्षुत्क्षुधा वैवर्ण्यं दौर्गंध्यादिराहित्यं चोक्तं १४ मामनुवर्तमानेन पित्रा नियुक्ताः संतस्तत्र प्रजासर्ग
निमित्ते तामुद्वहत १५ श्रीराम ७ ७ ७ ७ ७ ७ ७ ७ ७

603
1981

ननु बहूनां कथमेका भार्या तत्राह अपृथक् धर्मः शीलं च येषां तेषां वपत्नी भूयात् अर्पितो भवत्सु आशयो यया धर्मशीलयोरैक्यात् मद्वाक्या
च न दृष्टादृष्टविरोध इति भावः १६ अहतौजसः अप्रतिहतबलाः संतः १७ पक्कगुणो दग्धकामादिमल आशयो येषां अंतालोकद्वयभोगान्नि
रयप्रायान्निर्विद्य मत्स्थानं प्राप्स्यथ १८ ननु गृहेषु प्रविष्टानामस्माकं तदा मत्स्थानं धृतं वस्यात् कुतस्तत्र द्वकि निर्वेदो वा तत्राह गृहेष्विति कुश
लं मयि समर्पितं कर्म येषां मम वार्तया यतायामः कालो येषां १९ दुर्लभतां श्रोतॄणां गृहेन बंधइति कुतस्तत्राह इतियत यस्मात् कथाश्रवणा

अपृथक् धर्मशीलानां सर्वेषां वः सुमध्यमा अपृथक् धर्मशीलेयं भूयात्पत्न्यर्पिताशया १६ दिव्यवर्षसहस्राणां सहस्रमह
तौजसः भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम १७ अथ मय्यनपायिन्या भक्त्या पक्कगुणाशयाः उपयास्यथ म
द्धाम निर्विद्य निरयादतः १८ गृहेष्वाविशतां चापि पुंसां कुशलकर्मणां मद्वार्तायातयामानां न बंधाय गृहा मताः १९ न
व्यवद्धृदयेयज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः न मुह्यंति न शोचंति न हृष्यंति यतो गताः २० मैत्रेय उवाच एवं ब्रुवाणं पुरुषार्थ
भाजनं जनार्दनं प्रांजलयः प्रचेतसः तद्दर्शनध्वस्ततमोरजोमला गिरागृणन्गद्गदया सुहृत्तमं २१ प्रचेतस ऊचुः न
मो नमः क्लेशविनाशनायेनो निरूपितोदारगुणाह्वयाय मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः २२

वज्ञः सर्वज्ञः अहमीश्वरः ब्रह्मवादिभिः प्रवृत्तभिर्निर्मित्त भवेतः श्रोतॄणां हृत्तद्धृदयं नव्यवत् प्रतिपदं नूतनवत् अय प्राप्नोमि ब्रह्मसमाक्षात्का
रो भवतीत्यर्थः ननु त्वत्कथाश्रवणे कथं साक्षात्कारस्तत्राह योहं एतदेव ब्रह्म तत्र हेतुः यतोगताः यं मां प्राप्ताः संतो मोहशोकहर्षान्न प्रा
प्नुवंति अतो मत्कथाश्रवणे नव्यवत् मम हृदयाविर्भावादस्य च ब्रह्मसाक्षात्कारत्वात् गृहेषु वसतामपि न बंध इत्यर्थः २० पुरुषार्थं भा
जयति प्रापयतीति तथा तं २१ वेदः सकलश्रेयः साधनत्वेन निरूपिता उदारगुणा आह्वया नामानि यस्य मनोवचसोर्वेगादपि पुरोगतो
अग्रगतो जवो वेगो यस्य मनोवचसोरगोचरायेत्यर्थः अतएव सर्वेषामक्षाणां मार्गैरगतः अनवगतोध्वा यस्य तस्मै नमः २२

स्वरूपनिष्ठयास्वरूपस्थित्याशुद्धाय अतः शांतायमनसानिर्निमित्तमति अपार्थत्वभ्रमेवविलसनंविस्फुरितंहृदयंयस्मिन् गृहीतामायायागुणे
र्विग्रहाब्रह्मादिमूर्तयोयेन स्वतस्तुविशुद्धसर्वरूपाय २३ संसारंहरतीतिमेधसाज्ञानंयस्य २४ २५ अयुंक्ष्महिकृतवंतोवयं २६ यदुक्तंवरंवृणीध्व
मितितन्मनसिनिधायाहुः रूपमिति समस्तानांक्लेशानांसंक्षयोयस्मात नः अविष्कृतंप्रकटितंअतान्यत्किमनुकंपितं अनुकंपाइयमेवा
स्माकंपरमानुकंपेत्यर्थः २७ कुतस्तदाहुः हेअभद्रांधन अमंगलनाशनत्वत्र्यल्पयोत्रनविवक्षितः एतावदेववरीनेषुवत्सलैः प्रभुभि

शुद्धायशांतायमनःस्वनिष्ठयामनस्सपार्थविलसद्धृयाय नमोजगत्स्थानलयोदयेषुगृहीतमायागुणविग्रहाय २३ न
मोविशुद्धसत्वायहरयेहरिमेधसे वासुदेवायकृष्णायप्रभवेसर्वसात्वतां २४ नमःकमलनाभायनमःकमलमालिने न
मःकमलपादायनमस्तेकमलाक्षिणे २५ नमःकमलकिंजल्कपिशंगामलवाससे सर्वभूतनिवासायनमोयुंक्ष्महिसाक्षि
णे २६ रूपंभगवतात्वेतदशेषक्लेशसंक्षयं आविःकृतंनःक्लिष्टानांकिमन्यदनुकंपितं २७ एतावत्त्वंहिविभुभिर्भाव्यंदी
नेषुवत्सलैः यदनुस्मर्यतेकालेस्वबुध्याभद्ररंधन २८ येनोपशांतिर्भूतानांक्षुल्लकानामपीहतां अंतर्हितोंतर्हृदयेकस्मा
न्नोवदनाशिषः २९ असावेववरोस्माकंईप्सिताजगतःपते प्रसन्नोभगवान्येषामपवर्गगुरुर्गतिः ३०

भाव्यं कार्यंकिंततदाह अस्मदीयाएवइतिबुध्याउचितेकाले अनुस्मर्यतइतित्वयानुरूपमपिदर्शितमितिभावः २८ येनानुस्मरणेन
भूतानांतेषामुपशांतिः सुखंभवति किंचक्षुल्लकानामपिभूतानामंतर्हृदये अंतर्हितः अंतर्यामित्वेनस्थितोभवान् ईहतांइच्छतांत्वदुपा
सकानांनोस्माकं आशिषःकामान्कस्माद्दतान्नवदजानात्येवेत्यर्थः २९ तथापिवक्तव्यंचेत्तर्हियेषामस्माकंभवान्प्रसन्नः असा
वेववरः भवत्प्रसादएवमस्माकमभीप्सितोवरइत्यर्थः अपवर्गगुरुर्मोक्षमार्गप्रदर्शकः गतिश्चसर्वतश्चपुरुषार्थभूतः ३० राम

605
1981

यद्यप्येवं अथापिहेनाथत्वत्तः वरमेकंवृणीमहे कथंभूतात्परतःकारणादपिपरात् अक्षरात्परतःपरइतिश्रुतेः अतोयद्यपित्वंदा
तुंसमर्थः नचवेयानांवहिभूतीनामंतोस्तियतानंतविभूतित्वादनंतइतिगीयसे ३१ तथापियथासारंगोभ्रमरः पारिजातंसुरवनलब्धे
सुलभमप्यन्यंवृक्षंनसेवतेतथावयमपिसाक्षात्वदंघ्रिमूलंप्राप्यकिंकिंवृणीमहिनकिंचिदित्यर्थः यद्वाकिमन्यत्तुच्छंकिमर्थंवृणीमहि
यद्वावृणीमहि अनंतत्वेनमनोरथानामनवस्थानादित्यर्थः ३२ अतएतावदेवप्रार्थयामहइत्याहुः यावदिति स्पृष्टाः व्याप्ताःसंतःभग

वरंवृणीमहेथापिनाथत्वत्परतःपरात् नह्यंतोयद्विभूतीनांसोनंतइतिगीयसे ३१ पारिजातंजमालब्ध्यसारंगोन्यंनसे
वते त्वदंघ्रिमूलमासाद्यसाक्षात्किंकिंवृणीमहि ३२ यावत्तेमाययास्पृष्टाभ्रमामइहकर्मभिः तावद्भवत्प्रसंगानांसंगः
स्यान्नोभवेभवे ३३ तुलयामलवेनापिनस्वर्गंनापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ३४ यत्रेड्यंतेक
थामृष्टाःतृष्णायाःप्रशमोयतः निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन ३५ यत्रनारायणःसाक्षात्भगवान्न्यासिनांगतिः
प्रस्तूयतेसत्कथासुमुक्तसंगैःपुनःपुनः ३६ तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया भीतस्यकिंनरोचेततावकानां
समागमः ३७ वयंतुसाक्षात्भगवान्भवस्यप्रियस्यसख्युःक्षणसंगमेन सुदुश्चिकित्स्यस्यभवस्यमृत्योर्भिषक्तमं
त्वाद्यगतिंगताःस्म ३८ यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्चवृद्धाश्चसदानुवृत्त्या आर्यानताःसुहृदोभ्रातरश्चस
र्वाणिभूतान्यनसूययैव ३९

वतिप्रकृष्टःसंगोयेषांतेषांसंगोस्माकंस्यात् ३३ ननुराज्यभोगान्स्वर्गापवर्गौचविहायकिमिदंप्रार्थ्यतेतत्राहुः तुलयामेति भग
वत्संगिनांसंगस्यलवेनापि ३४ तत्संगस्यश्रैष्ठ्यंप्रपंचयतियत्रेतित्रिभिः यत्रयेषुयत्तःयाभ्यःकथाभ्यः निर्वैरंवैराभावः ३५ ३६
पद्भ्यांपावनेच्छयासंसाराद्भीतस्य ३७ सत्संगमफलमस्माभिरेवानुभूयमित्याहुः वयंत्विति तवयःप्रियःसखातस्य अत्यंतम
चिकित्स्यस्यभवस्यजन्मनोमृत्योश्चभिषक्तमंसतत्वैद्यंत्वांगतिंगताःप्राप्ताः ३८ वरांतरंवृणुतेयन्नइतिद्वाभ्यां नताःनमस्कृताः
३९

निरंधमांनिरंधनानां अदृभ्रंबहुकालंतेपरितोषणायत्वितिवृणीमहे ४० अज्ञानामप्यस्माकंवक्तृतिर्नायुक्तेत्याहुः मनुरिति यस्यतवम
हिम्नोनदृष्टंपारंयैस्तेपित्वांआत्मसमंस्वमत्यनुरूपंयथातथास्तुवंति अथोअतोवयमपिगृणीमः ४१ सत्वमूर्तयेवासुदेवाय ४२ यानंस्व
प्रयाणमनिछतामपिमतांस्वधामययोअनपवर्गवीर्यः अकुंठितप्रभावः ४३ उदन्वतः सिंधोः सलिलात्निर्यायनिर्गत्यगांस्वर्गरोद्धुमिव

यन्तसुतप्तंतपएतदीशनिरंधसांकालमदभ्रमप्सु सर्वंतदेतत्पुरुषस्यभूम्नोवृणीमहेतेपरितोषणाय ४० मनुःस्वयंभूर्भग
वान्भवश्चयेन्येतपोज्ञानविशुद्धसत्वाः अदृष्टपारा अपियन्महिम्नःस्तुवन्त्यथोत्वात्मसमंगृणीमः ४१ नमःसमायशुद्धा
यपुरुषायपरायच वासुदेवायसत्वायतुभ्यंभगवतेनमः ४२ मैत्रेयउवाच इतिप्रचेतोभिरभिष्टुतोहरिः प्रीतस्तथे
त्याहशरण्यवत्सलः अनिछतांयानमतृप्तचक्षुषांययौस्वधामानपवर्गवीर्यः ४३ अथनिर्यायसलिलात्प्रचेतस
उदन्वतः वीक्ष्याकुप्यद्द्रुमैश्छिन्नांगांरोद्धुमिवोछ्रितैः ४४ ततोग्निमारुतौराजंनमुंचन्मुखतोरुषा महींनिवृक्षांकर्तुं
संवर्तकइवात्यये ४५ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्यपितामहः आगतःशमयामासपुत्रान्बर्हिष्मतो
यैः ४६ तत्रावशिष्टायेवृक्षाभीतादुहितरंतदा उज्जह्रुस्तेप्रचेतोभ्यउपदिष्टाःस्वयंभुवा ४७ तेब्रह्मणआदेशान्मा
रिषामुपयेमिरे यस्यांमहदवज्ञानादजन्यजनयोनिजः ४८

उछ्रितैः द्रुमैः गांमहींछिन्नांवीक्ष्यद्रुमेभ्यअकुप्यत तदाप्राचीनबर्हिषः प्रव्रजितत्वात् अराजकेकर्षणाद्यभावात् द्रुमैर्भूमिराछि
न्नाअभूत ४४ निरस्ताविरोधोपियस्यांतथाभूतांकर्तुंसंवर्तकः कालाग्निरुद्रः ४५ नंयेर्युक्तिभिः ४६ उज्जह्रुः समर्पयामासुः ४७
मारिषांवार्क्षीं आजनयोनिर्ब्रह्मातस्माज्जातोदक्षः महतः श्रीमहादेवस्यावज्ञानात् पूर्वमजनयोनिजः ब्रह्मपुत्रोपिसनक्षत्रि
यजातीयस्यामजनिजातः ४

607
1321

प्रागसर्गेपूर्वदेहेकालेनविद्रुतेगतेदैवेनश्वरेणचोदितः सन्इष्टाः प्रजाः ससर्जसदक्षइतिप्रसिद्धः ४९ स्वयारुच्याप्रभयातेजउपादन्नआ
छादितवान् येचकर्मदाक्ष्यातदक्षमब्रुवन् ५० तमभिषिच्य अनादिब्रह्माप्रजासर्गरक्षायांयुयोज सचदक्षः अन्यान्मरीच्यादीनत
त्द्व्यापारेषुनियुक्तवान् ५१ इतिटीकायांत्रिंशोध्यायः एकत्रिंशसुतदक्षेधुरन्यस्यवनेमतो नारदोक्तेनमार्गेणमुक्तिरुक्ताप्रचेतसां १
ततोदिव्यवर्षसहस्राणांसहस्रांस्यांतउत्पन्नविवेकज्ञानास्ते उपयास्यथसङ्गामनिर्विद्यनिरयादतइत्यधोक्षजभाषितंस्मरंतः आशुप्राब्र

चाक्षुषेत्वंतरेप्राप्तेप्राक्सर्गकालविद्रुते यःससर्जप्रजाइष्टाःसदक्षोदैवचोदितः ४९ योजायमानःसर्वेषांतेजस्तेजस्विनां
रुचा स्वयोपादत्तदाक्ष्याच्चकर्मणांदक्षमब्रुवन् ५० तंप्रजासर्गरक्षायामनादिरभिषिच्यच युयोजयुयुजेन्यांश्चसर्वःसर्व
प्रजापतीन् ५१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रिंशोध्यायः ३० मैत्रेयउवाच ततउत्पन्नविज्ञानाआश्वधोक्ष
जभाषितं स्मरंतआत्मजेभार्यांविसृज्यप्राव्रजन्गृहात् १ दीक्षिताब्रह्मसत्रेणसर्वभूतात्ममेधसा प्रतीच्यांदिशिवेला
यांसिद्धोभूद्यत्रजाजलिः २ तान्निर्जितप्राणमनोवचोदृशोजितासनान्शांतसमानविग्रहान् परेमलेब्रह्मणियो
जितात्मनःसुरासुरेड्योददृशेस्मनारदः ३ तमागतंतउत्थायप्रणिपत्याभिनंद्यच पूजयित्वायथादेशंसुखासीनमथा
ब्रुवन् ४ श्रीराम ७ ७ श्रीराम ७ श्रीगोपालकृष्णायनमः ७ श्रीराधारमणायनमः

जन् १ ब्रह्मसत्रेण आत्मविमर्शेनदीक्षिताः कृतसंकल्पाः बभूवुः सर्वभूतेष्वात्मेतिमेधाज्ञानंयस्मिन्तेन केवलायांसमुद्रतटेजाज
लिर्नाममुनिः २ निर्जिताः प्राणमनोवचोदृशोयैस्तान् शांताउपरताः सामानामलादारभ्यऋजवोविग्रहायेषां ब्रह्मणियोजिता
त्माये: सुरासुरैरीडितोदृष्टवान् उत्थायतंप्रणिपत्ययथाविधिपूजयित्वा ४ श्रीराम हेराधारमण हेगोपीवल्लभ ७ श्री

आदिष्टंयदात्मतत्वं सपितंविस्मृतं ६ ७ इतिप्रचेतोभिःपृष्टः ८ अतोगृहप्रसक्त्याहरिसेवांविनासर्वंजन्मकर्मादिकंव्यर्थंइत्युक्तमि
तितान्शोचयन्नाह तज्जन्मेतिचतुर्भिः यतोजन्मादेर्हरिसेवैवफलंअतस्तद्विहीनंसर्वंव्यर्थमित्यर्थः ९ शौक्रं शुक्लसंबंधिजन्मविशु
द्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकंदीक्षाया विबुधानामिवदीर्घायुषापि १० वचोभिर्वाग्विलासैः चित्तवृत्तिभिः

प्रचेतसऊचुः स्वागतंतेसुरर्षेऽद्यदिष्ट्यानोदर्शनंगतः तवचंक्रमणंब्रह्मन्नभवाययथारवेः ५ यदादिष्टंभगवताशि
वेनाधोक्षजेनच तद्गृहेषुप्रसक्तानांप्रायशःक्षपितंप्रभो ६ यन्नःप्रद्योतयाध्यात्मज्ञानंतत्त्वावमर्शनं येनांजसा
तरिष्यामोदुस्तरंभवसागरं ७ मैत्रेयउवाच इतिप्रचेतसांपृष्टोभगवान्नारदोमुनिः भगवत्युत्तमश्लोकआविष्टा
त्माब्रवीन्नृपान् ८ नारदउवाच तज्जन्मतानिकर्माणितदायुस्तन्मनोवचः नृणांयेनहविश्वात्मासेव्यतेहरिरीश्व
रः ९ किंजन्मभिस्त्रिभिर्वेहशौक्रसावित्रयाज्ञिकैः कर्मभिर्वात्रयीप्रोक्तैःपुंसोपिविबुधायुषा १० श्रुतेनतपसावा
किंवचोभिश्चित्तवृत्तिभिः बुध्यावाकिंनिपुणयाबलेनेंद्रियराधसा ११ किंवायोगेनसांख्येनन्यासस्वाध्याययोरपि
किंवाश्रेयोभिरन्यैश्चनयत्रात्मप्रदोहरिः १२ श्रीराम ७ ७ ७ ७

नानावधानसामर्थ्यैःइंद्रियाणांराधसापाटवेन ११ योगेनप्राणायामादिना सांख्येनदेहादिव्यतिरिक्तात्मज्ञानमात्रेण सन्या
सवेदाध्ययनाभ्यामपि अन्यैरपिव्रतवैराग्यादिभिः श्रेयःसाधनैः १२ श्रीरामजयरामजयजयराम नारायणवासुदेवहरे

604
1321

नन्वेषांनानाफलसाधनानांहरिसेवाभावमात्रेणकुतोवैयर्थ्यंतत्राह श्रेयसांफलमात्मैव अवधिःपराकाष्ठा अर्थतःपरमार्थतःआत्मा
र्थत्वेनैवान्येषांप्रियत्वादित्यर्थः भवत्वात्मा अवधिर्हरिःकिमायातंतत्राह आत्मदश्च अविद्यानिरसनस्वरूपाभिव्यंजकः एवंवरेणापिरूप
पवलिप्रभृतिभ्यइवात्मप्रदः प्रियश्चपरमानंदरूपत्वात् १३ किंचनानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपिफलानिहरिप्रीत्याभवंतिके
वलंतत्तद्देवताराधनेतुनकिंचिदितिसदृष्टांतमाह यथेति मूलात्प्रथमविभागाःतद्विभागाःभुजास्तेषामपिविभागाउपलक्षणंपुष्पादयो
पियत्तृप्यंतिनतुमूलसेकंविनास्वस्वनिषेचनेन प्राणस्यापहारोभोजनंतस्मादेवेंद्रियाणांतृप्तिः नतुतत्तदिंद्रियेषुपृथक्पृथक्अन्न

श्रेयसामपिसर्वेषामात्मात्यवधिरर्थतः सर्वेषामपिभूतानांहरिरात्मात्मदःप्रियः १३ यथातरोर्मूलनिषेचनेनतृप्यं
तितत्स्कंधभुजोपशाखाः प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्वार्हणमच्युतेज्या १४ यथैवसूर्यात्प्रभवंतिवारःपुन
श्चतस्मिन्प्रविशंतिकाले भूतानिभूमौस्थिरजंगमानितथाहरावेवगुणप्रवाहः १५ यथानभस्यभ्रतमःप्रकाशा
भवंत्यभीभान्नभवंत्यनुक्रमात् एवंपरेब्रह्मणिशक्तयस्त्वमूरजस्तमःसत्वमितिप्रवाहः १६ तेनैकमात्मानमशेषदे
हिनांकालंप्रधानंपुरुषंपरेशं स्वतेजसाध्वस्तगुणप्रवाहमात्मैकभावेनभजध्वमद्धा १७ श्रीराधाकृष्णाभ्यांनमः

लेपात् तथाच्युताराधनमेवसकलदेवताराधनंनपृथगित्यर्थः १४ कुतःसर्वमूलत्वादितिदृष्टांतरमाह यथैववारःजलानिवर्षाका
लेसूर्यादुद्भवंति ग्रीष्मेतस्मिन्नेवप्रविशंति अस्यार्थस्यइत्वेनदृष्टांतरमाह यथाभूतानिभूमाविति गुणप्रवाहःचेतनाचेतनात्मकः
प्रपंचः १५ नन्वसंगेहरौकथंप्रपंचोत्पत्तिलयौतत्राह यथेति अभ्रतमःप्रकाशाआगमापायिनोरजस्तमःसत्वस्थानीयाः हेप्रचेत
सः अमूःशक्तयःनभवंतिलीयंतइति एवमयंजगत्प्रवाहः १६ तेनसर्वकारणहेतुना कालोनिमित्तं प्रधानमुपादानं पुरुषःक
र्ता एततन्नितयात्मकत्वात्सर्वकारणंपरेशं अद्धासाक्षात्भजध्वं कथं आत्मनएवभावेनअभिन्नत्वेन १७ श्रीरामचंद्राय

भा० साधनमाह इत्यादिभिः शीघ्रंतुष्यति १८ ततोनकदाचित्यजतीत्याह अपहृतानिरस्ताः सकलाएषणाःकामायस्मात् सचासौ अमल आ च०
८९ त्मामनःतस्मिन्सतांमनसिनिरंतरमेधितयाभावनयोपहूतसन्निधापितःसन अक्षरोहरिः छिद्रवतत्रत्याकाशवत्ततोनसरतिविना
पयातिहिकिंकुर्वन् आत्मनोनिजजनवशगत्वंस्वभक्ताधीनत्वंयन् अवगच्छन् १९ सतामेवंवश्योसौ असतांतुपूजामपिनगृह्णातीत्याह न
तिकुमनीषाणांकुत्सितमतीनां अधनाश्चते आत्मधनाश्चभगवद्भक्ताःतेप्रियायस्य रसज्ञःभक्तिसुखज्ञः केकुमनीषिणस्तानाह

इययासर्वभूतेषुसंतुष्यायेनकेनवा सर्वेंद्रियोपशांत्याचतुष्यत्याशुजनार्दनः १८ अपहृतसकलैषणामलात्मन्यवि
रतमेधितभावनोपहूतः निजजनवशगत्वमात्मनोयन्नसरतिछिद्रवदक्षरःसतांहि १९ नभजतिकुमनीषिणांसई
ज्यांहरिरधनात्मधनप्रियोरसज्ञः श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २० श्रियमनुचरतींत
दर्थिनश्चद्विपदपतीन्विबुधांश्चयःस्वपूर्णः नभजतिनिजभृत्यवर्गतंत्रःकथममुमुद्विसृजेत्पुमानकृतज्ञः २१ मैत्रेय
उवाच इतिप्रचेतसोराजन्नन्याश्चभगवत्कथाः श्रावयित्वाब्रह्मलोकंययौस्वायंभुवोमुनिः २२ तेपितन्मुखनिर्यातं
यशोलोकमलापहं हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २३ एतत्तेभिहितंक्षत्तर्यन्मांत्वंपरिपृष्टवान् प्रचेतसां
न्नारदस्यसंवादंहरिकीर्तनं २४

श्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति २० भक्ताधीनत्वंप्रपंचयन्नाह अनुवर्तमानामपिश्रियंतदर्थिनःसकामान्द्विप
दपतीन्नरेंद्रादीन्विबुधान्देवानपियोनानुवर्तते यतःस्वेनपूर्णः अतःस्वभृत्यवर्गानुरक्तएवएवंउतईश्वरंपिकथंपरित्यजेत्
प्रचेतसः कर्मभृतान् अल्पाश्च नूनंसुनीतिरित्यादिधृवचरितायाःसत्र गायन्प्रचेतसामित्युक्तत्वात् २२ २३ प्रचेतसांना
रदस्यसंवादरूपमेतदाख्यानंतेअभिहितंहरेःकीर्तनंयस्मिन्तत् २४ श्रीराम ७ ७ श्रीकृष्ण ८९

611/1981

भा० य एषवंशःसोनुवर्णितः २५ यःप्रियव्रतः आत्मविद्यांअध्यात्मविद्यांज्ञानं २६ २७ २८ स्वानांज्ञातीन्दिदृक्षुःराजांचरितमितिशे च०
९० षः २९ इतिश्रीभागवतमहापुराणेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांचतुर्थस्कंधटीकायांएकत्रिंशोध्यायः ३१

श्रीशुकउवाच यएषउत्तानपदोमानवस्यानुवर्णितः वंशंप्रियव्रतस्यापिनिबोधनृपसत्तम २५ योनारदादात्मविद्या
मधिगम्यपुनर्महीं भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं २६ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्
कथां प्रवृद्धभावाश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २७ विदुरउवाच सोयंतात महायोगिन्भवताक
रुणात्मना दर्शितस्तमसःपारोयत्राकिंचनगोहरिः २८ इत्यानम्यतमामंत्र्यविदुरोगजसाह्वयं स्वानांदिदृक्षुःप्रययौ
ज्ञातीनांनिर्वृताश्रयः २९ एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मना आयुर्धनंयशःस्वस्तिगतिमैश्वर्यमाप्नुयात् ३०
इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपारमहंस्यांसंहितायांवैयासिक्यांएकत्रिंशत्तमोध्यायः ३१ श्रीराम
शके१७४७ पार्थिवनामाब्देकार्तिकशुक्लनवम्यांमंदे अयंस्कंधःसमाप्तः श्रीराधाकृष्णार्पणमस्तु

चतुर्थस्कंधःसमाप्तः हेराधारमण श्रीराम कृष्ण जानकीजीवनदाशरथेरावणांतक करुणानिधेकृपां
कुरुमांअस्माद्भवसागरात्परतीरंनीत्वात्वच्चरणारविंदेमांनिवासायस्थानंदेहीत्यनःकारणात्तस्मैनमः श्रीराम ९०

615/1981

अथपंचमस्कंधप्रारंभः ग्रंथसंख्या

श्रीगणेशायनमः ॐ नमोभगवतेवासुदेवाय ॐ नमोपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरा
माय ७ अथातः पंचमस्कंदव्याख्यानकविशेषवान् प्रियव्रतान्वयायत्रसप्रपंचः प्रपंच्यते १ षड्विंशत्याध्यायैः अधुनापंच
मेस्थानमीर्यते लोकद्वीपादिमर्यादापालनाख्यमनेकधा २ पृथव्युपर्यधोलोकमर्यादापालना त्रिविधामता पुनश्चैककशास्मे
षुमर्यादाबहुधामता ३ भुविद्वीपादिमर्यादाः पाल्यंतेराजभिः पृथक् हेमरूपरिदेवाद्यैस्तत्स्थाधासुरादिभिः ४ तत्राध्याय
मैविंशत्या प्रियव्रतपुरःसरैः भुवोद्वीपादिमर्यादाः पालिताइतिवर्ण्यते ५ त्रिभिःमर्यादिभिर्ज्योतिश्चक्रादिष्विति कीर्यते अ
तलादिषुदस्याद्यैः पालनंच ततःस्त्रिभिः ६ तत्रतुप्रथमेध्यायेज्ञानिनोराज्यनिर्वृत्तिः पुनश्चज्ञाननिष्ठेतिप्रियव्रतकथाद्भुता ७

श्रीगणेशायनमः परिक्षिदुवाच प्रियव्रतोभागवत आत्मारामः कथंमुने गृहेरमतयन्मूलः कर्मबंधः पराभवः १
ननूनंमुक्तसंगानां तादृशानांद्विजर्षभ गृहेष्वभिनिवेशोयंपुंसांभवितुमर्हति २ महतांखलुविप्रर्षेउत्त
मश्लोकपादयोः छायानिर्वृत्तचित्तानांनकुटुंबेस्पृहामतिः ३ श्री ७ ७ श्रीराम

वंशंप्रियव्रतस्यापिनिबोधनृपसत्तम योनारदादात्मविद्यामधिगम्यपुनर्महीं भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदमिति
पूर्वस्कंधातप्रियव्रतस्यप्रथमंआत्मविद्याततोगृहाश्रमः ततः सर्वसंपत्परित्यागेनमोक्षइत्युक्तं तत्रविस्मितःपृच्छति
प्रियव्रतोभागवतः अतएवात्मारामः गृहेकथंरमत रमतांकोदोषइतिचेदत आह कर्मणाबंधः पराभवश्चस्वरूपतिर
स्कारायन्मूलोवतियद्गृहंमूलंयस्य १ गृहेषुरतिश्चतत्राभिनिवेशात्तिस्यात्सचभागवतानांनसंभवतीत्याह ननूनमि
ति २ गृहासक्तिर्हिकुटुंबादिस्पृहयाभवतिसाचतेषांनास्तीत्याह महतामिति उत्तमश्लोकपादयोः छायाकामादि
संतापहारिणीतयानिर्वृत्तंचित्तंयेषांतेषांस्पृहायुक्तामतिर्नास्ति ३ ७ ७ ७ ७

614
1981

दाराद्यासक्तस्यतुमोहः श्रीकृष्णेस्खलितामतिश्चाभूदितियत् अयंचमहासंशयइत्याह संशयइति ४ अंगीकृत्यपरिह
रति सत्यमिति अभिनिवेशादिकंनास्तीतिसत्यमेव तथापिविघ्नवशात्तेषांप्रवृत्तिः पूर्वाभ्यासबलेनपुनर्निवृत्तिश्च
तइत्याह भगवतःश्रीमच्चरणारविंदरूपोयोरसस्तस्मिन्नावेशितंचेतोयस्तेपिकेनचिदंतरायेणविघ्नेनविहता अपिस्वांप
दवींमार्गंनहित्वंतिनत्यजंतिकोभागवताख्यपरमहंसास्तेषांदयितस्यप्रियस्यहरेः कथां १ प्रियव्रतस्यबलाद्गेहवासगाय
रूपाबभूवेतिसप्रसंगमाह यर्हीत्यादिनाविमुक्तसंगः प्रकृतिभजस्वेत्यंतेन यर्हिवावद्विवाचेतिप्रसिद्ध्याद्योहइतिच स्वस्व

संशयोयंमहान्ब्रह्मन्दारागारसुतादिषु सक्तस्ययत्सिद्धिरभूत्कृष्णेचमतिरच्युता ४ श्रीशुकउवाच
सत्यमुक्तंभगवतउत्तमश्लोकस्यश्रीमच्चरणारविंदमकरंदरस आवेशितचेतसोभागवतपरमहंसदयितक
थांकिंचिदंतरायविहतांस्वांशिवतमांपदवींनप्रायेणहिन्वंति १ यर्हिवावमहाराजनसराजपुत्रःप्रियव्रतः
परमभागवतोनारदस्यचरणोपसेवया जसावगतपरमार्थसतत्वोब्रह्मसत्रेणदीक्षिष्यमाणोवनितलपरिपा
लनायाम्नातप्रवरगुणगणैकांतभाजनतयास्वपित्रोपामंत्रितोभगवतिवासुदेवएवाव्यवधानसमाधि
योगेनसमावेशितसकलकारकक्रियाकलापोनैवाभ्यनंदद्यद्यपितदप्रत्याम्नातव्यंतदधिकरणआत्मनोन्य
स्मादसतोपिपराभवमन्वीक्षमाणः २ ७ ७ ७ ७ ७

पित्रामनुना अवनितलपरिपालनायोपामंत्रितोनियुक्तोनैवाभ्यनंदत्तनेच्छत् अथहतदेवभगवानादिदेवोब्रह्मास्वभवनाद्वजना
त्स्यन्वयः उपामंत्रणेहेतुः आम्नाताः शास्त्रेण्णकाप्रवराः श्रेष्ठागुणास्तेषांगणस्यैकांतभाजनतयानिमित्ताश्रयत्वेन
अनिच्छायांहेतुः परमार्थसतत्वं आत्मयाथात्म्यं भगवतेनघनसतथा अतः प्रसत्रेणात्मध्यानेनकार्येणदीक्षिष्यमाणः
नियमंग्रहिष्यन्प्रागपिवासुदेवएवनिरंतरसमाधियोगेनचित्तैकाग्र्येणसमावेशितः समर्पितः सकलकारकाणांया क्रियास्तासांक
लापोयेनसः यद्यपितत् पित्रोक्तंनप्रत्याख्येयंतथापितदधिकरणराज्याधिकारेअसतोपिमिथ्याभूतादपिराज्यप्रपंचादात्मनः पराभवमालो
चयन्नाभ्यनंदत २

भा० गुणविसर्गस्यगुणस्रष्टुः परिबृंहणंसम्यक्छिन्नदनुचिंतायाव्यवसितःसकलजगदभिप्रायोयेनतथाराज्ञाचारेमंडलेश्वराणामभिप्रायोनिश्चियतेतद्वत् अखिलैर्निगममूर्त्तिवद्भिर्वेदैर्निजगणैश्चमरीच्यादिभिः परिवृत्तः सत्यलोकादवततार ३ सअस्मात्तत्रतत्रोडुपतिश्चंद्रइवप्रकाशमानोगंधमादनस्यद्रोणीरश्मिवभासयन् उपससर्पेत्यन्वयः अमरपरिवृढैर्देवेंद्रादिभिः ४ हंसयानोपलक्षणेनएवंपितरमुपलभ्यमानः मत्पितायमितिलक्षयन् पितापुत्राभ्यां मनुप्रियव्रताभ्यां सहकृतांजलिः सन्सहसैवअभ्युत्थायार्हणेनपूजयासह उपतस्थेतुष्टाव प्रियव्रतंतदामंदरद्रोण्यां नारदः उपदिश पं०

२

अथभगवानादिदेवएतस्यगुणविसर्गस्यपरिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ३ सतत्रतत्रगगनतलउडुपतिरिवविमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथिपथिवरूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानोगंधमादनद्रोणीमवभासयन्नुपससर्प ४ तत्रहवाएनंदेवर्षिः हंसयानेनपितरंभगवंतं हिरण्यगर्भमुपलभ्यमानः सहैवाछायार्हणेनसहपितापुत्राभ्यामवहितांजलिरुपतस्थे ५ भगवानपिभारततदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयःप्रियव्रतमादिपुरुषस्तंसदयहासावलोकइतिहोवाच ६ श्रीभ० निबोधतातेदमृतंब्रवीमिमासूयितुंदेवमर्हस्यमेयं वयंभवस्तेततएषमहर्षिर्वहामसर्वेविवशायस्यदिष्टं ७

तिमनुश्चेतंनेतुमागतोस्मीतिज्ञातव्यं ५ हेभारतभगवानादिपुरुषोब्रह्मापितंप्रियव्रतमितिहोवाचेत्यन्वयः तेननारदेनउपनीतमर्हणंयस्यसः सूक्तवाक्येनयथोचितवाक्येनातितरामतिशयेनउदिताः वर्णिताः गुणगणा अवताराः सुजयाः सर्वोत्कर्षाश्चयस्यसः ६ प्रवृत्तिनिष्ठंमद्वाक्यंप्रतिकूलत्वामस्यसूसांकरिष्यतीतिशंकमानोनाहमेवंवदामिकिंतुहरिरेवमभ्युत्थानत्वामाज्ञापयतीतिवदन्प्रवृत्तिनिवृत्तिरहस्यमाह निबोधतेतिनवभिः ऋतंसत्यंअप्रमेयंदेवंअसूयितुंदोषारोपणेनद्रष्टुनार्हसि तेततस्तातः एषः त्वद्गुरुश्चमहर्षिः दिष्टं आदिष्टं आज्ञाविवशाः अस्वतंत्राः ७ श्रीगोपालकृष्णः ७ २

619/1881

विवशत्वमेवाहचतुर्भिः नेति तस्यकृतंनेननिर्मितंतनुभृतजीवः तप आदिभिः विहंतुं अन्यथाकर्तुंनभयात् प्रभुर्नभवेत्न मनीषयामामादिबुद्धिबलेनपरतश्चबलवद्राश्रयात् ८ तत्रदेहयोगेनतावत्सारतत्र्यंप्रसिद्धमित्याशयेनाह भवायेति भवाजन्मभवाद्यर्थंअव्यक्तेनेश्वरेणादिष्टंदत्तंदेहयोगं जानताजीवसमूहः संधत्तेतत्त्वन्यथाकर्तुंनशक्नोति हे अंगप्रियव्रत ९ कर्मकरणेपिपारतंत्र्यमाह यस्यवाचिवेदलक्षणायांतंत्यांदामन्यांगुणाः सत्वादयस्तत्कृतकाणिचयानिकर्माणितान्निबंधनर्नामभिः ब्राह्मणादिशब्दैःसुदुस्तरैःसुदृढैः हेवत्सवयंसर्वेसंयोजिताः निबद्धाःसंतः तस्मैईश्वरायबलिंवहामः तदिच्छयाकर्मकुर्मः नसिनासिकायां प्रोताः बद्धाः संतः चतुष्पदोबलिवर्दाः यथा द्विपदेपुरुषाय ८ भोगेपिपारतंत्र्यमाह ईशोनईश्वरेणाभीसृष्टंदत्त

ततस्यकश्चित्तपसाविद्ययावानयोगवीर्येणमनीषयावा नैवार्थधर्मैः परतः स्वतोवाकृतंविहंतुंतनुभृद्विभूयात् ८ भवायनाशायचकर्मकर्तुंशोकायमोहायसदाभयाय सुखायदुःखाय चदेहयोगमव्यक्तदिष्टंजनतांगचत्र ९ यद्वाचितंत्यांगुणकर्मनामभिः सुदुस्तरैर्वत्सवयंसुयोजिताः सर्वेवहामो बलिमीश्वराय प्रोतानसीवद्विपदेचतुष्पदः ८ ईशाभिसृष्टंह्यवरुध्महेंगदुःखंसुखंवागुणकर्मसंगात् आस्थायतत्तद्यदयुक्तनाथश्चक्षुष्मतांधाइवनीयमानाः ९ मुक्तोपितावद्विभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः यथानुभूतंप्रतियातनिद्रः किंत्वन्यदेहायगुणान्नवृंक्ते १०

मेवअंगप्रियव्रतअवरुध्महेस्वीकुर्मः यथास्वामिनादत्तमेवकणिशादिबलिवर्दाःभक्षयंतिनस्वेच्छयानद्वत् नचवयंवेशम्यमीश्वरस्ययतोगुणकर्मसंघात् वियुक्तः अतोनाथायद्यद्देवतिर्यगादिलक्षणंदेहंअयुंक्तयोजितवान् ततदास्थायस्वीकृत्ययथांधाः चक्षुष्मताछायामानीयमानाःसंतः ९ नन्वेतत्सर्वमविदुषएवनत्वात्मविदइत्याशंक्याह मुक्तोपीति यावत्प्रारब्धकर्मतावत्यथास्वप्नमनुभूतंप्रतियातनिद्रः अभिमानशून्यएवानुस्मरति तर्हिभोगवासनयापुनर्जन्मभवेतत् तत्राह किंतुदेहांतरारंभकान्गुणान्कर्माणिवासनाश्चनवृंक्तेनसंभजते १० ७ श्रीः ७

भा·पं·

गृहेवर्त्तमानस्यभोगान्भुंजानस्यकुतोभिमानाभावोमोक्षोवा अतस्तत्यागेनवनवासएवयुक्तः तत्राह भयंसंसारःस्यादेव
प्रमत्तस्यअजितेंद्रियस्यवनेष्वपिसंगभियावताद्गृहान्तरंगच्छतोपीत्यर्थः सदैवषट्सपत्नाः शत्रवोमनोबुद्धींद्रियाणिच
३ यस्यसतथाभूतएववनेष्वपियतअस्ते बुधत्वेनजितेंद्रियत्वादात्मारामस्य अवद्यंरागादिदोषं ११ ननुगृहेरागादयःसंभव
तिनतुवनइत्याशंक्याह यइति योविजिगीषमाणःसपूर्वंगृहेषुस्थित्वातेषामत्यंतंनिरोधमकुर्वन् जेतुंयतेत क्षीणेष्वरिषु

भयंप्रमत्तस्यवनेष्वपिस्याद्यतःसआस्तेसहषट्सपत्नः जितेंद्रियात्मस्यारतेर्बुधस्यगृहाश्रमःकिंनुकरोत्य
वद्यं ११ यःषट्सपत्नान्विजिगीषमाणोगृहेषुनिर्विश्ययतेतपूर्वं अत्येतिदुर्गाश्रितऊर्जितारीन्क्षीणेषुका
मंविचरेद्विपश्चित् १२ त्वंत्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितोनिर्जितषट्सपत्नः भुंक्ष्वेहभोगान्पुरुषातिदि
ष्टान्विमुक्तसंगःप्रकृतिंभजस्व १३ श्रीशुकउवाच इतिसमाहितोमहाभागवतो भगवतस्त्रिभुवनगु
रोरनुशासनमात्मनोलघुतयावनतशिरोधरोवाढमितिसबहुमानमुवाह १४ श्रीः ७ ७

कामंगृहे अन्यत्रवाविचरेत यतोलोकेऊर्जितानरीन्दुर्गाश्रितएवात्येतिजयति पश्चात्दुर्गवान्यत्रवावनेते युधेहितिपा
ठेप्रहरेदित्यर्थः १२ इदंचगृहदुर्गाश्रयणंचाकृतात्मनांत्वंतु अब्जनाभस्यांघ्रिसरोजकोशएवदुर्गंतदाश्रितः अतएवनि
र्जितषट्सपत्नश्चतथापिपुरुषेणईश्वरेणातिदिष्टान्दत्तान्भोगान्तावत्भुंक्ष्वपश्चाद्विमुक्तसंगःसन्प्रकृतिंस्वरूपं
भजस्व आत्मनिष्ठोभवेत्यर्थः १३ आत्मनस्तोलघुतया अल्पतया यद्वाआत्मनोयदनुशासनंतत् अलघु
तयागौरवेणबाढंतत्करिष्यामीति अवनतकंधरःसन्जग्राह १४ श्रीः ७ ७ ७ ३

621
1281

मनुनास्वायंभुवेनउपकल्पितापूजायस्य प्रियव्रतस्ययोगभ्रंशात्नारदस्यचशिष्यनाशात्कुटिलमीक्षणंभवति तत्तु
नास्तीत्याह अविषमयथा तथानयोरभिसमीक्ष्यमाणयोःसतोःआत्मनःसम्यगवस्थानं अवाङ्मनसयोर्विषयं अतःअ
व्यवहृतं क्षयंनिवासंपाठांतरेअवाकृतावाङ्गोचरं कथंचिन्मनसःक्षयंविषयं अतःअव्यवहृतंव्यवहारशून्यंब्रह्मनिह
तंप्रवर्त्तयन्व्यवहाराद्विपस्तःसन्व्यवहारातीतंस्वरूपंचिंतयन्नंतर्हितइत्यर्थः ८ पुत्रंराज्यंप्रापिप्यवनंयास्यामी

५ भगवानपिमनुनायथावदुपकल्पितापचितिःप्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्था
नमवाङ्मनसंक्षयमव्यवहृतंप्रवर्त्तयन्नगमत् ८ मनुरपिपरेणैवंप्रतिसंधितमनोरथःसुरर्षिवरानुम
तेनात्मजमखिलधरामंडलस्थितिगुप्तय आस्थाप्यस्वयमपिविषमविषयविषजलाशयाशायाउपरराम ९
इतिहवावसजगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोखिलजगद्बंधध्वंसनपरानुभावस्यभगवत
आदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेनपरिरंधितकषायाशयोवदातोपिमानवर्धनोमहतांमहीतलमनु
शशास १०

सैवयोमनोरथःसपरेणब्रह्मणैवप्रतिसंधितःसंपादितोयस्यसःनारदस्यानुमतेनस्थापयित्वा अतिविषमादुस्तराया
विषयविषजलाशयागृहंतस्य आशादिकप्रवृत्तिर्वासनाभोगेऽवातस्याउपरतोभवत् ९ यत्प्रष्टंगृहेकथमस्मतोति
तत्रोक्तमुत्तरमुपसंहरति इतिहवावइत्थमेवहि अधिनिवेशितःप्रापितःकर्माधिकारोयस्य अखिलस्यजग
तोबंधध्वंसनेपरानुभावोयस्यतस्ययदंघ्रियुगलंतस्यानवरतंध्यानंतदनुभावेनपरिरंधितकषायाराग्यागादि
मलआशयोयस्य अतःअवदातःशुद्धोपिमहतांब्रह्मादीनामाज्ञापालनेनमानवर्धनः १० श्रीगमक्त्रःः

इइतिविस्मयेहइतिप्रसिद्धौहवावेतिनिश्चये अत्मनासमानैः शीलादिभिरुदारान्महतोदशपुत्रानजनयामास नानाह ११
अग्नीध्रः इध्मजिह्वः यज्ञबाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः कविश्चेति अग्नीनांना

अथहदुहितरंप्रजापतेर्विश्वकर्मणउपयेमेबर्हिष्मतीनामतस्यामुहवाव आत्मजानात्मसमानशीलगुणक
र्मरूपवीर्योदारान्दशभावयांबभूवकन्यांचयवीयसीमूर्जस्वतींनाम ११ अग्नीध्रेध्मजिह्वयज्ञबाहुमहावी
रहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवयइति सर्वएवाग्निनामानः १२ एतेषांकविर्महावीरः
सवनइतित्रयआसनूर्ध्वरेतसः १३ तआत्मविद्यायामर्भभावादारभ्यकृतपरिचयाः पारमहंस्यमेवा
श्रममभजन् १४ तस्मिन्नुहवाउपशमशीलाः परमर्षयः सकलजीवनिकायावासस्यभगवतोवासुदेवस्यभी
तानांशरणभूतस्यश्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेनपरिभावितांतर्हृद
याधिगतेभगवतिसर्वेषांभूतानामात्मभूतेप्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेणसमीयुः १५ अ
न्यस्यामपिजायायांत्रयःपुत्राआसनुत्तमस्तामसोरैवतइतिमन्वंतराधिपतयः १६ श्रीः ७

मानियेषांते १२ १३ १४ अर्भभावात् बाल्यादारभ्य तस्मिन्पारमहंस्याश्रमेश्रीमच्चरणारविंदयोरविरतस्मरणेनावि
गलित अखंडतोयः परमभक्तियोगतस्यानुभावेनविशोधितांतःकरणेप्रतीतोयोभगवान् तस्मिन्नात्मनस्त्वंपदार्थस्य
तादात्म्यमविशेषणविशोधादेहाद्युपाधिस्तदपोयनप्रापुः १६ ७ ७ ७ ७ ६

623
1981

उपशमाश्रयेषुसत्सु दशकोटिभिरेकमर्बुदं एतादृशानिवर्षाणिमेकादशार्बुदानिजगतींबुभुजइत्यन्वयः राज्ञोधर्मपाल
नविषयभोगप्रभावेर्भोग्यं तत्रानायासेनैवधर्मपालनमाह अव्याहता अखिलाः पुरुषकाराः पौरुषाणियस्मात् तेनसा
रेणबलेनसंभृतापूर्णादोर्दंडातयोर्युगुलंतेनापीडिताआकृष्टमौर्वीगुणास्तस्यस्तनितटंकारः तेनैवयुद्धंविनाविरमि
तानिरस्ताः धर्मप्रतिपक्षायेन भोगातिशयमाह बर्हिष्मत्याः स्वभार्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूय
मानविवेकइव अतएवविषयासक्त्या आत्मानमनवबुध्यमानइवबुभुजे तत्रप्रमोदः प्रतिदृष्ट्वादर्पः ततःप्रसरणम

एवमुपशमाश्रयेषुस्वतनयेष्वथजगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुष
कारसारसंभृतदोर्दंडयुगुलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षोबर्हिष्मत्याश्चानुदिनमेधमान
प्रमोदप्रसरणयौषण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेकइवानवबुध्यमा
नइवमहामनाबुभुजे १६ यावदवभासयतिसुरगिरिमनुपरिक्रामन्भगवानादित्योवसुधातलमर्धेनैवप्र
तपत्यर्धेनावच्छादयति तदाहिभगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन्समाजवेनरथेनज्योतिर्मये
नरजनीमपिदिनंकरिष्यामीतिसप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीयइवपतंगः १७ श्रीरामकृष्णगोविंद

भ्युत्थानादिलीलाततोयौषण्यंयोषित्स्वभावकृतशृंगारानुभावप्रकाशनंततोव्रीडयाप्रमुषिताःसंकोचिताः हासावलोकाः
ततोरुचिराःक्ष्वेल्यादयःपरिहासवाक्यादीनितैः १६ प्रभावातिशयमाह यावद्वसुधातलंलोकालोकपर्यंतं अवभासति
मेरुंप्रदक्षिणीकुर्वन्नादित्यः तस्मिन्नर्द्धएवोपलक्षितंप्रतिप्रकाशयति आर्द्धेनवावच्छादयतितमसा आवृणोतितदाहिप्रसि
द्धःपतंगः सूर्यइवपरिक्रामत् नचेदमसंभावितंयतोभगवदुपासनेनोपचितः अतिपुरुषः पुरुषानतिक्रांतःप्रभावोयस्य १७

एवंउह आइति प्रसिद्धास्तस्यरथचक्रक्षाग्रकृताः परिखा नागर्ताः यत्र येरेवकृताः तेषांपरिमाणंभण्यइति शेषः पूर्वस्यपूर्वस्य द्वि
स्तारमानं उत्तरस्तनोद्विगुणोनविस्तारमानिस्येवं सिंधुभ्योबहिः समंततउपक्लृप्तारचिता यथासिंधुभ्योबहिरेकैकशोद्वीपाः
एवंद्वीपानामपिबहिः सिंधवइत्याह क्षीरोदेतिदधिमंडोमथितंदधि एतेसप्तजलधयः सप्तद्वीपानांपरिखइवाभ्यंतरेतेभ्ये

एवंहतइयचरणनेमिपरिखातास्तेसप्तसिंधवआसन् यतएवकृताः सप्तभुवोद्वीपाः जंबूप्लक्षशाल्मलिकुश
क्रौंचशाकपुष्करसंज्ञास्तेषांपरिमाणंपूर्वस्मात्पूर्वस्मात् उत्तरः उत्तरः यथासंख्यंद्विगुणमानेनबहिः समंत
तउपक्लृप्ताः १८ क्षारोदेक्षुरसोदसुरोदघृतोददधिमंडोदशुद्धोदाः सप्तजलधयः सप्तद्वीपपरिखाइवाभ्यंतरद्वी
पसमानाः १९ एकैकस्ययथानुपूर्वंसप्तस्वपिबहिर्द्वीपेषुपृथक्परितउपकल्पितास्तेषुजंब्वादिषुबर्हिष्मती
पतिरनुव्रतानात्मजानग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैके
कस्मिन्नेकमेवाधिपतिंविदधे २० दुहितरंचोर्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीनामकाव्य
सुता २१ नैवंविधः पुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणानांचित्रंविदूरविगतः सकृदाद
दीतयन्नामधेयमधुनासजहातिबंधं २२

वेष्टितायेद्वीपास्तैः समानविस्तारतः बहिर्बहिर्स्थिताः पृथक् १८ १९ २० २१ असंकीर्णतयाजिताषड्गुणाइंद्रि
याणिषड्र्मयोवायैः तेषामेवंविधः पुरुषकारइतिनचित्रंनासंभवितयतोविदूरविगतः अंत्यजोपियस्योरुक्रमस्य
नामसकृदुच्चारयेद्यः सअधुनातत्क्षणमेवअस्मिन्जन्मनिबंधंसंसारंप्रागंतरंतत्वंचंडालत्वंजहातिशब्दोपिवतीसत्यं २२

625/1981

तस्यपराक्रमसमुपसंहरन्निवृत्तिकाममाह सएवमिति देवर्षिचरणयोरनुशायनमुपसत्तिः तदनुपतितोयोगुणविसर्गोराज्यादि
प्रपंचः तत्संसर्गेण आत्मनिमनसिनिर्वेदोयस्य २३ मया असाध्वनुष्ठितंयदभिनिवेशितः नतः अलमलंविषयेः वि
नोदमृगंमर्कटं २४ परदेवतायाहरेः प्रसादेनागतः प्राप्तोय आत्मप्रत्यवमर्शोविवेकस्तेनतानारदस्यपदवीतदुपदिष्टमा
र्गमेवपुनरनुससारेत्यन्वयः किंकृत्वा अनुगतेभ्यः पुत्रेभ्यइमांपृथ्वींविभज्य भुक्तभोगीयस्यास्तांचमहाविभूतिः मांस्मा

सएवमपरिमितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवा
त्मानंमन्यमानआत्मनिर्वेदइदमाह २३ अहोअसाध्वनुष्ठितंयदभिनिवेशितोहमिंद्रियैरविद्यारचित
विषमविषयांधकूपे तदलमलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार २४ परदेव
ताप्रसादाधिगतात्मप्रत्यवमर्शेणानुप्रवृत्तेभ्यः पुत्रेभ्यः इमांयथादायंविभज्यभुक्तभोगांचमहिषींमृतक
मिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृदिगृहीतहरिविहारानुभावोभगवतोनारदस्यपदवींपुन
रनुससारतस्यहवाएतेश्लोकाः २५ प्रियव्रतकृतंकर्मकोनुकुर्याद्विनेश्वरं यानेमिनिम्नैरकरोच्छायाघ्नन्सप्त
वारिधीन् २६ भूसंस्थानंकृतंयेनसरिद्गिरिवनादिभिः सीमाचभूतनिर्वृत्यैद्वीपेद्वीपेविभागशः २७ श्रीः

ज्यसंपत्तत्सहितांमहिषींमृतकमिवप्रतशरीरमिवपरित्यज्यतत्रहेतुः हृदिनिहितोनिर्वेदोयेनहृदीत्यस्योत्तरत्राप्य
न्वयः हृदिगृहीतोनिश्चितोहरिविहारस्तेनानुभावः त्यागसामर्थ्यंयस्यतस्यमहिमोपनिबंधनश्लोकाः पूर्वसिद्धाः कथ्य
तेयथावेदेतदप्येषश्लोकोभवतीति २५ कोनुकोनाम कुर्यात् छायांघ्नन्तमोनिरस्यन् २६ भूसंस्थानंद्वीपः कृतंसरि
द्गिरिवनादिभिः सीमाचयेनकृता भूतानांनिर्वृत्यसंकरवायअविवादाय २७

भाग० भौमंपातालजंदिव्यंस्वर्गजंमानुषंमर्त्यलोकजंमहित्वंभवयोनिरयतुल्यमेने पुरुषानुजनाविरुभक्तास्त्वणवप्रियायस्येति पं०
२८ इतिपंचमेटीकायांप्रथमोध्यायः १ द्वितीयेग्नीध्रचरित्रंस्त्रैणसंमतं पत्न्यांहिपूर्वचित्यांयोगेनाभिमुख्यानजीज
८ नत् १ अस्मिन्वंशेप्रसिद्धोयमाग्नीध्रस्त्रिय पुंगवः विहसन्निवतस्येदंचरितंमुनिरब्रवीत २ जंबूद्वीपमोकायांसांताः प्रजाः
पुत्रवत्पालयामास धर्मावेक्षमाणः धर्मवक्षमाणइत्यर्थः १ पितृलोककामः पुत्रकामः सुरवराणांवनितास्ताः सामाक्रीडाच

भौमंदिव्यंमानुषंचमहित्वंकर्मयोगजं यश्चक्रेनिरयोपम्यंपुरुषानुजनप्रियः २८ इतिश्रीभागवतेमहापुराणेपंचम
स्कंधेभुवनकोशेप्रियव्रतविजयेप्रथमोध्यायः १ श्रीशुकउवाच एवंपितरिसंप्रवृत्तेतदनुशासनेवर्तमानआ
ग्नीध्रोजंबूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् १ सचकदाचित्पितृलोककामः सुरवरव‍नि
ताक्रीडाचलद्रोण्यांभगवंतंविश्वसृजांपतिमाभृतपरिचर्योपकरणआत्मैकाग्र्येणतपसा आराधयांबभूव २ तदु
पलभ्यभगवानादिपुरुषः सदसिगायंतीपूर्वचित्तिंनामाप्सरसमभियापयामास ३ साचतदाश्रमोपवनमतिरम
णीयंविविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहंगमिथुनैःप्रोच्यमानश्रुतिभिः प्रतिबोध्य
मानसलिलकुक्कुटकारंडवकलहंसादिभिः विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ४ श्रीरुरु

ल्गोमंदरः तस्यद्रोण्यां आभृतानिसंपादितानिपरिचर्योपकरणानिपुष्पादीनियेन २ तदुपलभ्यज्ञात्वा अभियापयामास
संभोगार्थंप्रस्थापयामासः ३ साचतदाश्रमोपवनमुपबभ्रामेत्यन्वयः रमयणीयत्वमेवाह विविधाश्चनिबिडाश्चयेवि
टपिनस्तेषांविटपाः निकराः तैःसंश्लिष्टाः पुरटलताः स्वर्णवल्ल्यः तासुआरूढाः स्थलविहंगामयूरादयस्तेषांमिथुनैःप्रोच्य
मानाभिः उच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमानायंसलिलकुक्कुटादयस्तैर्विचित्रंयथातथोपकूजितानादिताअमलजलाश
यास्तेषुकमलानितेषामाकरमुपवनं ४

627
1981

सललितेगमनेयपदन्यासास्तेनगतिविलासोयस्याः तस्याः चकारस्तस्याश्चअलंकारावयवान्सखणरवणानिधनिं कुर्वंता
रुचिरस्यचरणाभरणस्यस्वनं अमीलितेनयनेएवनलिनमुकुलेतयोर्युगलंसमीपाहिकचय्यकिंचिदुन्मील्यभ्रमरदेवतां ५
नामधरेवींभरूध्वजस्यवशमुपनीतः सन्जडवांछतिहोवाचवक्ष्यमाणान्दशश्लोकानउवाच आदृपानुकरणंचवरुध्वन
तद्वशीकारार्थं दिविजानांदेवानांमनुजानांचयानिमनांसिनयनानिचतेषामाह्लादद्रुधगत्यादिभिर्नेणान्मनसिकामस्य

तस्याःसुललितगमनपदविन्यासगतिविलासायाश्चानुपदंखणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्यन
रदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्याचष्ट ५ तामेवाविदूरेमधुकरीमिव
सुमनसउपजिघ्रंतींदिविजमनुजमनोनयनाह्लाददुधैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसिनृणां
कुसुमायुधस्यविदधतींविवरं ६ निजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरो
धेनद्रुतपदविन्यासेनवल्गुस्पंदनस्तनकलशकबरभाररशनांदेवीतदवलोकनेननिवृत्तावसरस्यभगवतामक
रध्वजस्यवशमुपनीतोजडवदितिहोवाच ० ११ ७ ७ ६

विवरंप्रवेशद्वारंविदधतीं गतिश्चविहारश्चक्रीडाविनयश्चावलोकश्चसुस्वराण्यक्षराणिच अवयवाश्चनेत्रादयस्तैः ६
निजमुखाद्विगलितममृतमिवस्वादुआसववन्मादकंचयत्सहासंभाषणंचतस्मिन्नामोदोनिश्वासगंधः तेनमदां
धायेमधुकरानिजकरास्तैरुपरोधः आवरणंतेनभयात्द्रुतःशीघ्रःयःपदविन्यासःतेनवल्गुस्पंदनंकिंचिच्चल
नंस्तनयोःकबरभाररशनायांचयस्याः तस्याअवलोकनेननिवृत्तावसरस्यदत्तावकाशस्य ७ श्रीराम

भा० कातंशैलेगिरावस्मिन्किंचिकीर्षसि मुनिवर्येत्यादिपुंस्त्वेनसंबोधनादिजाड्यानुकारान्ननूनंभगवतः परदेवताभूतस्यमा पं०
यासिश्चेत्यस्यबालस्यआह हेमहतसर्वविज्यनिर्गुणधनुषिबिभर्षि किमात्मनोर्थे नवेवअन्यार्थंकिंकार्यमस्ति किंवाप्रमत्तानअ
८ जितेंद्रियान्मृगतुल्यानस्मदादीन्मृगयसेतान्वशीकर्तुंधनुषिधारयसीत्यर्थः ८ कटाक्षाबालस्याह बाणाविमौ शतपत्र
नेत्रकमलेते एवपत्राणिपिच्छानियोः शांतौविभ्रमणमंथरौ पुंखाभ्यांविनापिरुचिरोपलनतयाकल्पितनेत्राभ्यांपरभागस्य
पुंखस्थानीयस्याभावात् अतितिग्मौतीक्ष्णादंतौअग्रभागौययोः नौकस्मैप्रयोक्तुमिच्छसीतिनविप्रः अतोनपादेनावबुध्या

कात्वंविकीर्षसिचकिंमुनिवर्यशैलेमायासिकापिभगवत्परदेवतायाः विज्येबिभर्षिधनुषीसुहृदात्मनोर्थे
किंवामृगान्मृगयसेविपिनेप्रमत्तान् ८ बाणाविमौभगवतः शतपत्रपत्रौशांतावपुंखरुचिरावतितिग्मदंतौ
कस्मैयुयुंक्षसिवनेविचरन्नविप्रः क्षेमायनोजडधियांतवविक्रमोस्तु ९ शिष्याइमेभगवतः परितःपठंति
गायंतिसामसरहस्यमजस्रमीशं युष्मच्छिखाविलुलिताः सुमनोभिवृष्टीः सर्वेभजंत्यृषिगणाइववेदशाखाः
१० वाचंपरंचरणपंकजतित्तिरीणांब्रह्मन्नरूपमुखराश्रृणवामतुभ्यं लब्ध्याकदंबरुचिरंगविटंकबिंबेय
स्यामलातपरिधिः क्वचवल्कलंते ११ श्रीः ❁ ❁ ❁ ❁

प्रार्थयामाहे तवायंविक्रमोस्माकंक्षमाय अस्तु ९ तदंगपरिमललोभेनानुगच्छतोभ्रमरानालक्ष्याह शिष्याइति अजस्रसं
ततं युष्मच्छिखातोविलुलिताविगलिताः सुमनसामभितोवृष्टीः गलितानिकुसुमानिभजंतीत्यर्थः शाखात्वेनोपमावेदशा
खाइवेति १० नूपुरःस्वनमाकर्ण्याह वाचमिति तुभ्यंतवचरणपंकजयोः नपुरयोस्तित्तिरीणां अंतर्गर्भरत्नानांपरंकेव
लंवाचंश्रृणुवामः कथंभूतं अरूपा अदृश्यवक्त्रकामुकरा अतिप्रकरांताचनोच पीतंपरिधानवस्त्रंनीतंवकांतित्वेनप्रकल्प्याह
कदंबकुसुमस्यरुचिरश्मिः अंकविटंकबिंबेनितंबस्यसुंदरमंडलेकलब्ध्या पाठांतरे अंवस्त्रमदृश्यवस्त्रछति क्वचवल्कलमिति ११

629/1981

स्तनावालक्ष्याह भृंगयोः स्तनयोः किंसंभृतं पूर्णमस्तिमनोहरं किंचिदस्तीत्यताबस्कजानामि यतोमध्यात्रुजोत्कृष्णवह
सियत्रत्रमेदृष्टिः श्रिनासंलग्नास्ति भन्यथहृदयंनघटतइतिभावः स्तनगतं कुंकुममालक्ष्याह पंकारुणा आत्मनस्तवविषा
णस्तनेइदंकु अस्यपूर्वः कुतइत्यत आह येनपंकेन १२ लोकंस्थानं यतस्याजनउरसाइत्यमपूर्वावयवीबिभर्ति मनसउ
न्नयनोत्सोमको पाठांतरे इत्थंभूतलक्षणेतृतीया वेत्थेचवद अद्भुतंबिभर्तिकिंतदाह रसोमधुरालापः रासोविलासःना
भ्यांसहितासुधा अधरामृतं आदिशब्दात् स्मितनर्मादि १३ कावानवलोके आत्मनोदृश्यत्वेति आहारः अंगहेस

किंसंभृतंरुचिरयोर्द्विजभृंगयोस्तेमध्येकृशोयत्रवदसिदृशिःश्रितास पंकारुणःसुरभिरात्मविषाणईदृक्
येनाश्रमंसुभगमेसुरभिकरोषि १२ लोकंप्रदर्शयसुहृत्तमतावकमेयत्रत्यइत्थंस्तरमावयवावपूर्वो अ
स्मद्विधस्यमनउन्नयनोविभर्तिबद्धद्भुतंसरसरासुधादिवक्त्रे १३ कावात्मवृत्तिरदनाद्धविरंगवातिविष्णोःक
लास्यनिमिषोमकरोचकर्णौ उद्विग्नमीनयुगलंद्विजपंक्तिशोचिरासन्नभृंगनिकरस्सरइन्मुखंते १४

ते अदनात् चर्वणात् हविरितितत्संबंधिगंधोवाति आगच्छतीतितांबूलाभिप्रायं अदनाद्बहीरंगभातीतिया
ठेममतावद्भोजनात् बहिर्भूतेवदृत्तिर्भातीत्यर्थः यतस्त्वंविष्णोःकलासिविष्णुश्वनाश्नाति अनश्नन्न्योअभिकशीति
श्रुतेः विष्णोःकलासीत्यत्रहेतुः तव नकर्णौविष्णोरिव अनिमिषोन्मकरो अनिमीषोरलवेत्रत्वेननिमेषशून्या उद्बुसं
तोमकरोनदाकारेकुंडलेययोः तौकिंचतवमुखंसरइत्सरइवतदेवाह उद्विग्नंचंचलंपिनयुगुलमिवनेत्रद्वयंयस्मिन्
द्विजाःदंताः तेषांपंक्त्याशोचिःशोभायस्मिन्सरसितुद्विजाहंसाः आसन्नोभृंगानिकरइववकेशस्तोमः परिमललुब्धभृं
गस्तोमोवायस्मिन् १४

भा०
८

पतंगः कंदुकः भ्रमतः भ्रमच्चितस्य मे अक्षिणी एजयते चंचलतां नयति वक्रं केशसमूहं मुक्तबंधनं न स्मरसि न संभावयसि किं कष्टः धूर्त्तो नीवीं हरति एतच्च न स्मरसि किं १५ उपलब्धं प्राप्तं मह्यं मम हे मित्र मया सह तपश्चर्तुमर्हसि किंच सर्वाध्य भावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति त्वां मह्यं कल्पयतीत्यर्थः १६ द्विजदेवेन ब्रह्मणा दत्तां दकुमनश्च लग्नं सतना

यौसौ त्वया करसरोजहतः पतंगो दिक्षु भ्रमन् भ्रमत एजयते क्षणी मे मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टो निलो हरति लंपट एष नीविं १५ रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धं चर्तुं तपोर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे १६ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नं मां चारुशृंग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः १७ इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास १८ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जंबुद्वीपपतिना भौमस्वर्गभोगान्बुभुजे १९ तस्यामु ह वा आत्मजान्स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् २० सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे २१ श्री : ५

पयाति हे चारुशृंगि यतस्ते चित्तं नं त्वं व मां त्वदधीनं नेतुमर्हसि सचिव्यस्त्वत्सख्योपि शिवा अनुकूलाः सत्यः मां प्रतिसरंतु अनुवर्त्ततां यद्वा एता च सयंतं मेया सचिव्यः सख्यः शिवाः पेरवः ताः प्रतिसरंतु निर्यांतु यद्वा वनवासे सहचर्यो हरिण्यः शिवाः प्रतिसरं तु मद्दक्षिणं गच्छंतु १७ ग्राम्यवैदग्ध्यं यस्याः बुध्या दीनां द्वैदकं १८ जंबुद्वीपपतिना आग्नीध्रेण समा पूर्वचित्तिः १९ सुत्वा प्रसूय उपतस्थे अभजत् २१ श्री

631
1981

औत्पत्तिकेन स्वभावेन सहननं दृढांगत्वं २१ कामानां भोगैः अधि अधिकं मन्यमानः श्रुतिभिर्वेदोक्तैः कर्मभिः अवरुंधत्ता पमादयंते मोदंते २२ इति एवंभूतां संज्ञायासां ताः परिणीतवंतः २३ इति पंचमे टीकायां द्वितीयोध्यायः तृतीये चरितं नाभेः परं मंगलमीर्यते यस्य यज्ञे प्रतीतः सन्पुत्रो भूदृषभो हरिः १ नाभिराग्नीध्रसुतः अपुत्रया मेरुदेव्या भार्यया मा हृ १

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जंबुद्वीपवर्षाणि बुभुजुः २१ आग्नीध्रो राजातृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवरुंधयत्र पितरो मादयंते २२ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीमिति संज्ञा नवोदवहन् २३ इति श्रीभागवते महापुराणे पंचमस्कंधे आग्नीध्रवर्णनं नाम द्वितीयोध्यायः २ श्रीशुक उवाच नाभिरपत्यकामोप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमवहितात्मायजत १ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोपि भगवान्भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रायार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्चकार २ ७ ७ ७

प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सप्त ये योगा उपायास्तेषामुपपत्त्या दुरधिगमोद्रष्टुः प्रायोपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन् आत्मानमाविश्चकार अपराजितं स्वतंत्रं निजभक्तानां ये अभिप्रेतार्थास्तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य हृदयंगमं सुखकरं यन्मनो नयनान्यानंदयंति ये अवयवास्तैरभिरामं सुंदरं २

पं०

भा० अथहेत्यादि निपातवाहुल्यंवाक्यालंकाराय अविष्कृतंभुजानांयुगलद्वयंचतुष्टयंयेन हिरण्मयं तेजोमयंपुरुषविशेषं

५ शिष्यतइतितथापुरुषोत्तममित्यर्थः अर्हणेनार्घ्येणसहोपतस्थुः अभाजयन्निष्वन्वयः विलसन्श्रीवत्सश्च पं०

लामंचिन्हंयस्य दरवरः शंखः वनरुहं पद्मं अच्छूरिचक्रं अमृतमणिकौस्तुभः एवमादिभिः स्फुरत्किरणायेप्रवरा

मणयः तन्मयानियानिमुकुटादीन्यंगानांभूषणानितैर्विभूषितं बहुमानेदृष्टांतः अधनाइवोत्तमधनंनिधिं ३

अर्हसीत्यादिनानिगदेनस्तुवंति हे आर्हत्तम परिपूर्णोपित्वमनुपथानां भक्तानामस्माकं अर्हणंपूजां स्वयमेवस्वी

कर्तुमर्हसि नवयंस्तोतुंशक्ताइत्याहुः नमोनमइत्येतदेवास्माकंसद्भिरुपशिक्षितंत्वद्रूपस्यदुर्ज्ञेयत्वात् ४ तदेवा

अथहैवमाविष्कृतभुजयुगलद्वयंहिरण्मयंपुरुषविशेषंकपिशकौशेयांबरधरमुरसिविलसन्श्रीवत्स

ललामंदरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिः स्फुटकिरणप्रवरमणिमयमुकुटकुंडलकटकक

टिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषितम् त्विक्सदस्यगृहपतयोधनाइवोत्तमधनमुपलभ्यसबहुमान

मर्हणेनावनतशीर्षाणउपतस्थुः ५ अर्हसिमुहुरर्हत्तमार्हणमस्माकमनुपथानांनमोनमइत्येतावत्सदुपशिक्षि

तं ४ कोर्हतिपुमान्प्रकृतिगुणव्यतिकरमतिरनीशईश्वरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभीरूपनि

निरूपणं ५ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृतेपरिजनानुरागविर

चितशबलसंशब्दसलिलसितकिसलयतुलसिदूर्वांकुरैरपिसंभृतयासमर्पययाकिलपरमपरितुष्यसि ६

ऊः कोर्हतीतिप्रकृतिगुणानांव्यतिकरः प्रपंचस्तस्मिन्नेवमतिर्यस्य अतएवानीशः प्रकृतिपुरुषयोःपरस्य अतएवईश्वर

स्य अर्वाक्तनाभिस्तामसप्रज्ञाभिः प्रपंचांतर्गताभिः नामचरूपंच आकृतिश्च आकारस्ताभिः नवस्वरूपनिरूपणंक

र्तुंकोनामपुमानर्हतीति ५ सद्भेरन्मात्रमेवाहतीतिनाधिकमित्याहुः सकलजननिकायस्यवृजिनंनिरस्यंतीति तथाशिवत

माःप्रवराश्चयेगुणगणास्तेषामेकदेशस्तस्यकथनादृतेना अवाक्ष्नेनागोवरोपित्वंभक्तानांस्तवाराध्यएवेत्याहुः हिपरमपरिजनै

रनुरागणैविरचिताशबलसंशब्दागद्गदाक्षरास्तत्सलिलंचसितकिसलयाश्चशुद्धपल्लवाः शीतलतिपाठेशीतलतुलसिमंजरीए

वमादिभिःसंभृतयासंपादितयापूजयापरितुष्यसि ६

633
1481

अथेतिप्रकारांतरे अन्यथात्तु अनयाइज्ययायागेनापिउरुभारभरया अनेकांगसमृद्ध्यापिभवतःसमुचितमपेक्षितप्रयोजनंनै

वपश्यामः ७ अत्रहेतुः आत्मनःस्वतएव अनुसवनंसर्वदांजसासाक्षात्तबाध्यमानोअतिशयेनभवतोयेनोषाः पुरुषार्थास्त

स्वरूपंयस्यपरमानंदस्य नचैवंसत्यपियागानर्थक्यमित्याह किंत्विति सकामनामस्माकमेवेनुरुपपद्यतेनतवेत्यर्थः ८ स्वापवर्गा

गमेवप्रदर्शयति तद्यथेति परमेभ्योपिपरमपुरुषःप्रकर्षेणयुक्तयाकरुणयाउपकल्पयिष्यन्संपादयिष्यन्चकारात्कामितंत्वनाप

चितःअनपचितःअपूजितएवसुज्ञानपेक्षत्वात् स्वयमेवोपलक्षितःदृष्टोसिइतरवत्सापेक्षवत् ९ यद्यपित्वंवरान्दातुमावि

अथानयापिनभवतइज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ७ आत्मनएवानुसवनमंजसाव्यतिरेक

बोभूयमानाशेषपुरुषार्थस्वरूपस्यकिंतुनाथाशिष आशासानानामेतदभिसंराधनमात्रंभवितुमर्हति ८ तद्यथा

बालिशानांस्वयमात्मनःश्रेयःपरमविदुषांपरमपरमपुरुषप्रकर्षकरुणयास्वमहिमानंचापवर्गाख्यमुपकल्पयिष्यन्

स्वयंनापचितएवेतरवदिहोपलक्षितः ९ अथायमेववरोह्यर्हत्तमयर्हिबर्हिषिराजर्षेर्वरदर्षभोभवान् निजपुरुषे

क्षणविषयआसीत् १० असंगनिशितज्ञानानलविधूताशेषमलानांभवत्स्वभावानामात्मारामाणांमुनीनामन

वरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोसि ११ अथकथंचित्स्खलनक्षुत्पतनजृंभणदुःख

स्थानादिषुविवशानांनःस्मरणायजरामरणदशायामपिसकलकश्मलनिरसनानितवगुणकृतनामधेयानिवचनगोच

र्हतोसितथापिहे अर्हत्तमराजर्षेर्बर्हिषियज्ञेनिजपुरुषाणांत्वद्भक्तानामीक्षणविषयोभवान यर्हियदा आसीत्तदाहि अयमे

ववरःसंजातः १० दर्शनस्यदुर्लभतामाहुः असंगेनवैराग्येणनिशितंयत्ज्ञानंसएवानलस्तेनविधूताअशेषामलायेषांअ

तोभवतइवस्वभावोयेषांतानेवाह आत्मारामाणांएवंभूतानांमुनीनामपिपरममंगलायनंगुणगणकथनमेवनतुदर्शनंय

स्य अतस्तैरनवरतंपरिगुणिताअभ्यस्ताःगुणगणायस्येतिसंबोधनं ११ दर्शनेनैवकृतार्थाअपिवरमित्थंप्रार्थयंते अथेति स्म

रणायविवशानांत्वांशंकुस्मर्तुमशक्तानांनः १२

भा० अन्यचप्रार्थनीयमस्तीत्याहुः किंचेति आशिषामैहिकानांस्वर्गापवर्गयोरपीश्वरंत्वामुपधावति प्रजायामेवपुरुषार्थइतिप्रत्ययोय पं०
स्य अवधानोयथाफलीकरणं तुषकणादिकमाशासानोधनदमुपधावति १३ इदंचनातिचित्रमित्याहुः इहसंसारेते अपराजितमाय
९० या अनवासितपदव्या अलक्षितमार्गया अपराजितः कोवैनकोपि अतस्तथानावृत्तमतिः कः अतएवविषयाएवविषंतस्यरया
वेगास्तैरनावृतापकृतिर्यस्यसः यदि अनुपासितमहच्चरण अतस्त्वंमायामोहतस्यैवमाशंसाघटतइत्यर्थः १४ अदभ्रकर्त्तः हे

किंचार्यराजर्षिरपत्यकामः प्रजांभवादृशीमाशासानईश्वरमाशिषांस्वर्गापवर्गयोरपिभगवंतमुपधावति प्रजा
यामर्थप्रत्ययबोधनदमिवाधनः फलिकरणं १३ कोवाइहतेपराजितमाययानवसितपदव्यानावृतमतिविषयवि
षरयानावृतप्रकृतिरनुपासितमहच्चरणः १४ यदुहवावतवपुनरदभ्रकर्त्तरिहसमाहूतस्तत्रार्थधियांमं
दानांनस्तद्यद्देवहेलनंदेवार्हसिसाम्येनसर्वान्देवान्प्रतिवोढुमविदुषामतिनिगदेनाभिष्टूयमानोभगवान
निमिषर्षभोवर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह १५ श्रीभगवानुवाच अहोबताहमृषयो
भवद्भिरवितथागीर्भिर्वरमसुलभमभियाचितोयदमुष्यात्मजोमयासदृशोभूयादितिममाहमेवाभिरूपः कै
वल्यादथापिब्रह्मवादोनमृषाभवितुमर्हतिममैवहिमुखंयत्द्विजदेवकुलं १६ ततआग्नीध्रीयेंशकलयावतरि
ष्याम्यात्मतुल्यमनुपलभमानः इतिनिशामयंत्यामेरुदेव्याःपतिमभिधायांतर्दधेभगवान् १७ ८

वकुलकार्यकारिन् अल्पीयसेकार्यायत्वंपदस्मारिहेभिःसमाहूतोसि अत्रअस्मायामर्थधीर्येषांमंदानांतेषांनोयत्देवहेल
नमवज्ञानंतत् सर्वान्प्रतितवचसाम्येनहेतुनाप्रतिवोढुंसोढुं अर्हसि इतिनिगदेनगद्यात्मकस्तोत्रेणवर्षधरोभारतवर्ष
पतिर्नाभिः तेनाभिवादितायत्रऋत्विजः तैरभिवंदितौचरणौयस्य १५ ममाहमेवाभिरूपःसदृशः कैवल्यात् अद्वितीयत्वा
त्द्विजेषुदेवाइवयेब्राह्मणास्तेषांकुलं १६ आग्नीध्रीयेनाभौपतिंनाभिं १७ ८ ८ ८

635/1981

हेविष्णुदत्त तस्यावरोधायने अंतःपुरेमेरुदेव्यां ऋतृकयाऋदसत्वमूर्त्यावततार केषांधर्मान्वातरशनानांदिक्वाससांप्रकटयितु
मित्यर्थमाह श्रमणानांतपस्विनांऋषीणांज्ञानिनांऊर्ध्वमंथिनांनैष्ठिकब्रह्मचारिणां १८ इतिपंचमस्कंधटीकायांतृतीयोध्या
यः ३ चतुर्थादित्रिभिः प्रोक्तमृषभस्यहितंमहत् लोकार्थंयेनसत्कर्मनैष्कर्म्यंचनिदर्शितं ४—१ चतुर्थेजातपुत्रस्यराज्यंत
स्यापवर्ण्यते यस्यराज्येजनःसर्वःसंतोषामृतनिर्वृतः २ अभिव्यज्यमानानिभगवल्लक्षणानिपादतलादिषुवज्रांकुशादीनियस्य

बर्हिषितस्मिन्नेवंविष्णुदत्तभगवान्परमर्षिभिःप्रसादितोनाभेःप्रियचिकीर्षयातदवरोधायनेमेरुदेव्यांधर्मान्दर्श [illegible]
यितुकामोवातरशनानांश्रमणानामृषीणांऊर्ध्वमंथिनांशुक्लयातनुवांचततार १८ इतिश्रीभागवतेमहापुराणे
पंचमस्कंधेतृतीयोध्यायः श्रीशुकउवाच अथहतमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणंसाम्योपशमवैराग्यैश्वर्यमहा
विभूतिभिरनुदिनमेधमानानुभावंप्रकृतयःप्रजाब्राह्मणादेवताश्चावनितलसमवनायातितरांजगृधुः १ तस्यहवा
इत्थंवर्ष्मणावरीयसाबृहच्छ्लोकेनचौजसाबलेनश्रियायशसावीर्यशौर्याभ्यांचपिताऋषभइतीदंनामचकार २
यस्यहींद्रःस्पर्द्धमानोभगवान्वर्षेनववर्ष ३ तदवधार्यभगवानृषभदेवोयोगेश्वरः प्रहस्यात्मयोगमाययास्ववर्षमजना

महाविभूतिःसर्वसंपत्तिःसाम्यादिभिः सहवर्धमानप्रभावं प्रकृतयोमात्यादयः जगृधुःअभिकांक्षंतिस्म १ स्व
वर्ष्मणादेहेन तस्यविशेषणद्वयंवरीयसाश्रेष्ठतमेन बृहंतः श्लोकाः पद्यानिकवीनांयस्मिन् तेनच ओजस्तेजःधैर्यं
प्रभावः शौर्यमुत्साहःएतैर्गुणैरतिश्रेष्ठत्वादृषभःइत्येवइतिनामचकार २ तस्यवर्षेमंडले ३॥४॥ ७ ७

भा० अवरुध्यप्राप्य स्वैरं इछया गृहीतो नरलोकसमानधर्मो मनुष्याकारो येन तं अतएव मायया स्वपुत्र इति विलसिता मतिर्यस्य पं०
आपारम्प्रकृतिं पौरान् प्रकृतीः श्वाभिव्याप्य विदितानुरागो यस्मिन् कथंभूतो नाभिः जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः
११ आत्मजं धर्ममर्यादारक्षणार्थं अभिषिच्य ब्राह्मणानामुत्संगे निधाय विशालायां बदरिकाश्रमे प्रसन्नं परानुद्वेजकं निपुणं चनी

नाभिस्त्वथ यथाभिलषितं सुप्रजास्त्वमवरुध्याति प्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवंतं पु
पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृत्तिमुपगतो विदितानुरागमापौरप्रकृ
तिं जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्न
निपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवंतं वासुदेवं उपासीनः कालेन तन्महिमानमवाप यत्र ह पांडवेय
श्लोकावुदाहरंति ५ को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ६ ब्रह्मण्योन्यः
कुतो नाभेर्विप्रा मंगलपूजिताः यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ७ अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रं
अनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्र
दत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन् आत्मजानामात्मसमानानां शतं जनयामास ८ येषां ख
लु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतं व्यपदिशंति ९ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो
मलयः केतुर्भद्रसेन इंद्रस्पृग्विदर्भः कीकट इति नव नवति प्रधानाः १० ७ ७ ७

यं तेन उपासीनः सेव्यमानः ५ नाभेः प्रसिद्धं कर्म अनु तदनंतरं को नु पुमानाचरेत् ७ मंगलैर्दक्षिणाभिः पूजिताः संतः ओज
सा मंत्रबलेन ७ अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणः अनुशिक्षयन् उभयविधं श्रुतिस्मृतिलक्ष ११
णं कर्मविधिं अभियुंजन् अनुष्ठितं जयंत्यामात्मजानां शतं जनयामास ८।।९ ते भरतमनु कुशावर्तादयो नव पुत्राः नवतेः प्रधाना श्रेष्ठाः १०

637/1981

नदनंतरं कविप्रमुखा नव भागवतधर्मप्रकाशकाः वसुदेवनारदयोः संवादो यस्मिन् उपरिष्टात् एकादशे ११ महाशालीना अतिविनी
ताः केवलाः शुद्धाः १२ विपरीतवत् अनीश्वरवत् कर्माणि कुर्वन् लोकं यमयत् नियमितवान् पाठांतरेनितरामरमयत् कर्मकरणहेतुः
अनुगतं उत्सन्नं धर्मं स्वयमाचरणेन अतद्विदामुपशिक्षयन् कथं धर्मादीनामविरोधेन संग्रहणेन आनंदो भोगः अस्तं मोक्षः १३
शीर्षण्यः श्रेष्ठः तेनाचरितं तत्तदनुवर्तते यतः सकलो धर्मो यस्मिन् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्म

कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोथ द्रुमिडश्चमसः करभाजनः इति भागवतधर्मदर्शना नव म
हाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टात् वर्णयिष्यामः ११
यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा
बभूवुः १२ भगवानृषभ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवल आनंदानुभव ईश्वर एव विपरीतवत्कर्मा
ण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन् अतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशःप्रजानंदा
मृतावरोधेन गृहेषु लोकं नियमयत् १३ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः यद्यपि स्वविदितं सकलधर्मं ब्राह्मं
गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास १४ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचि
तैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज भगवतर्षभेणापरिरक्ष्यमाण एतस्मिन् वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमि
वात्मनोन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं निजं भितस्नेहातिशयमंतरेण १५ श्रीराम

णं दृष्ट्वैव करोतीत्यर्थः १४ इत्यादिभिरुपचितैर्यज्ञैरिष्टवान् तत्र वयो यौवनं सुवेषधर्मं मन्विष्टादिति वचनात् विविधोद्देशाः नाना
देवतोद्देशाः यथोपदेशं यथाविधि अन्यस्मात्मकाशादात्मनः कश्चिदपि किमपि कथंचनापि न वांछति इच्छानुदये दृष्टांतः अवि
द्यमानं खपुष्पादिकमिव न चान्यदीयमवेक्षतेपीत्यर्थः भर्तरि ऋषभदेवे प्रतिक्षणमुच्छ्वसित स्नेहोद्रेकं विनान्यं न वांछति १५

भा० अवहितात्मनः संयतचित्ता अपि प्रजा अनुशासनार्थमुपशिक्षयन्निति यद्वक्ष्यमाणमुवाच १८ इति पंचमे चतुर्थोऽध्यायः पंचमे पं०
१२ मोक्षधर्मोपदेशोपुत्रानुशासनमुक्तं परमहंस्यं च तस्य हंहेतितिस्रया १ विड्भुजामपि ये संति तान् कष्टान् दुःखदान् कामान् विषया
न्नार्हतेनतद्योग्योयंमनुष्यदेहो न भवति दिव्यमुक्तं येन तपसा यस्मात् शुद्धात् सत्वादनंतं ब्रह्मसुखं भवतीति १ मोक्षबंधयो
र्निदानमाह महत्सेवामिति तमसः संसारस्य द्वारं योषितां ये संगिनः स्तेषां संगं महतां लक्षमाह साईन महांत इति साधव
सादाचाराः २ मयि ईशे कृतं सौहृदमेव अर्थः पुरुषार्थो येषां वाशब्देनान्यनिरपेक्षस्यैवास्य लक्षणत्वं दर्शयति देहं बिभर्त्ती

सकदाचिदटमानो भगवानृषभो ब्रह्मावर्त्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहितात्म
नः प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति होवाच १८ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋष
भदेवानुचरिते चतुर्थोध्यायः ४ ऋषभ उवाच नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये न
पोदिव्यं पुत्रका येन सत्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतं १ महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगि
संगं महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये २ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभ
रवार्त्तिकेषु गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ३ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रिय
य आपृणोति न साधु मन्ये यत आत्मनोयमसन्नपि क्लेशद आस देहः ४ ७ ७ ७

तिदेहंभराविषयवार्त्तैव न धर्मविषया येषु तेषु जनेषु जायादियुक्तेषु गृहेषु च रातिर्मित्रं धनं वा पाठांतरे जायादिप्रदेषु
यावदर्थाश्च यावदर्थमेवार्थो येषामिति मध्यमपदलोपीसमासः देहनिर्वाहाधिकस्परार्थन्याइत्यर्थः ३ कामान्नार्ह
तीति यदुक्तं तदुपपादयति नूनमिति यत् यदा इंद्रियप्रीतये आपृणोति व्याप्रियते व्यापारवान्भवति तदा प्रमत्तः सन्
विकर्म पापं नूनं कुरुते यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातः तस्यैव पुनः करणं साधु न मन्ये ४ श्रीः

639
1981

देहादेर्नश्वरत्वात् क्रियातयमनर्थ इत्याशंक्याह पराभव इति देहादिना स्वरूपाभिभवः अज्ञानकृतस्तावद्भवति तत्र हेतुः यावत्क्रियाः सुः
तावदिदं मनो हि कर्मस्वभावमेव स्यात् येन कर्मात्मकेन मनसा ५ उक्तमुपसंहरति एवं पूर्ववत् कर्म कर्त्तृभूतं मनः कर्मभूतं वशाप्रयुक्त
थ पुनः कर्म निष्टं करोति जीवन्मुक्तकर्म व्यावृत्त्यर्थमाह अविद्ययेति ७ अविद्यया आत्मन्युपधीयमाने सति एवं मनः कर्त्तृ पुरुषं वशं प्रयु
क्ते ६ न केवलं देहयोगमात्रं अनर्थांतरं चेत्याह यथा गुणानामिंद्रियाणामीहां चेष्टां अयथा मिथ्या आत्मीयान् भवतीति विपश्चित्
विवेकी सन् न पश्यति तु पश्यतीति पाठे अयथा आत्मीयत्वेनेत्यर्थः तत्र तदा महसा यत स्मृतिः स्वरूपः स्मृतिशून्यः सन् अज्ञात्म
कः मैथुनं सुखं प्रधानं यत्र तद्गृहं प्राप्य तापान्विंदति ७ ननु यथोपयोगं स्त्रिया मिथुनीभूय सुखमात्रानुभवतः कुतस्तापाः स्युः स्तत्राह

यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः ५
पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वं
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ६
एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने
यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ७
पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोयमहं ममेति ८
यदा मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ आश्लथेत तदा जनः संपरिवर्त्तते स्मान्मुक्तः परं यात्यतिहाय हेतुं ९ हंसे
गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या १० श्रीः

पुंसः इति प्रत्येकं तयोरैक्यात् हृदयग्रंथिस्त्वेव एवं मिथः स्थूलमन्यं हृदयग्रंथिं दुर्भेद्यं वदंति कुत इत्यत आह अतः अस्मान्मिथुनी
भावात् प्रत्येकं हृदयग्रंथिना तु देहेंद्रियमात्रे हमममिति मोहः अस्मात्तु गृहादिभिर्विषय भूतैर्महान्मोहो भवेदित्यर्थः ८ कदा नर्हि तस्य
निवृत्तिरत आह यदा स्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथिलो भवेत् तदा अस्मान्मिथुनीभावान्निवर्त्तते ततश्च
हेतुमहंकारं त्यक्त्वा मुक्तः सन् परं पदं याति ९ हेतुमतिहायेत्युक्तं तत्र पंचविंशति साधनान्याह चतुर्भिः हंसे मयि गुरौ भक्तिः
सेवा अनुवृत्तिस्तत्परता विगततृष्णया सर्वत्र लोकांतरेपि व्यसनावगत्या दुःखानुसंधानेन ईहानिवृत्त्या काम्यकर्मत्यागेन १०

भा० मदर्थैः कर्मभिः अहमेवदेवोयस्यांतैः संगात हेतुना देहगेहयोरात्मबुद्धः अहंममेतिमुद्ध ११ अध्यात्मयोगेनाध्यात्मशास्त्राभ्यासे ५०
न सध्यक् सम्यक् असंभ्रमादेन कर्तव्यपरित्यागेन १२ सर्वत्रमद्भावेनानतविचक्षणेननिपुणेनविज्ञानविराजितेन अनुभवपर्य
३२ तेनज्ञानेनयोगेनसमाधिना धृत्युद्यमसत्वयुक्तः धैर्यप्रयत्नविवेकयुक्तः मन अहंकाराख्यमुपाधिंव्यपोह्यनिरस्यततः साधना
दुपरमेत १३ ततः साधनादुपरमेदित्याह कर्माण्याशेरते यस्मिन् योगेनभउपायेन यद्यपिफलेसिध्यसाधनोपरमः सिद्धएव

मत्कर्मभिर्मत्कथयाचनित्यंमद्देवसंगातगुणकीर्तनान्मे निर्वैरसाम्योपशमेनपुत्राजिज्ञासयादेहगेहात्मबुद्धः ११
अध्यात्मयोगेनविविक्तसेवयाप्राणेंद्रियात्माभिजयेनसध्यक् सच्छ्रद्धयाब्रह्मचर्येणशश्वदसंप्रमादेनयमेनवाचां १२
सर्वत्रमद्भावविचक्षणेनज्ञानेनविज्ञानविराजितेन योगेनधृत्युद्यमसत्वयुक्तोलिंगंव्यपोहेनकुशलोहमाख्यं १३
कर्माशयंहृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः अनेनयोगेनयथोपदेशंसम्यग्व्यपोह्योपरमेतयोगात १४
पुत्रांश्चशिष्यांश्चव्यपोगुरुर्वामल्लोककामोमदनुग्रहार्थः इत्थंविमन्युरनुशिष्यादतज्ज्ञानयोजयेत्कर्मसुकर्मम
ढान् १५ कोकस्तनिश्रेयसिनष्टदृष्टिर्योर्थान्समीह्यथनिकामकामन् अन्योन्यवरः सुखलेशहेतोन रनंत
दुःखंचनवेदमूढः १६ कस्तंस्वयंतदभिज्ञोविपश्चिदविद्यायामंतरेविद्यमानं दृष्ट्वापुनस्तंसघृणः कुबुद्धिंप्र
योजयदुत्पथगम्यथान्ध १७ श्रीः ५ ५ ५ ५

तथापियावद्देहपातंनदभ्यासशंकावारणायोक्तं १४ किंच पुत्रान्पिताशिष्यान्वागुरुः नृपश्चप्रजाः एवमनुशिक्षयन मम
लोकंयः कामयते यद्वामदनुग्रहएवार्थोयस्य विमन्युः शिक्षितस्याकरणेपिकोपशून्यः अतज्ज्ञानतत्त्वमविदुषः श्रेयोबुध्याकु
र्मसुमूढान् १५ नयोजयेदित्यत दुपपादयति लोकइतित्रिभिः नष्टदृष्टिर्हेतुः यइतिनिकाम अतिशयेनकामोयस्य १६ तमी
दृशंकुबुद्धिंदृष्ट्वातत्रैवकर्मसुप्रवर्तयेत नकोपि उत्पथेनगच्छंतमंधंयथातत्रैवगच्छेतिकः ब्रूयात १७ श्रीराम ५

641/1481

समुपेतः संप्राप्तोमृत्युः संसारोयेनततोभक्तिमार्गोपदेशेनमोचयेत सगुर्वादिर्नभवतीत्यर्थः यद्वायस्तंमोचयितुंनशक्नुयात अ
नस्यगुर्वादिर्नस्यादितिनिषेधः ततश्चपितानस्यादितिपुत्रोत्पादनोयत्नोनकार्यः देवंदेवतानस्यादितिपूजानग्राह्येत्यर्थः एवम
न्यदपिद्रष्टव्यं १८ एवमोक्षधर्मानुपदिश्यआर्तश्रुश्रूषालक्षणधर्मस्फुटानिवृत्तएतेषांजन्मकथनपूर्वकमाह द्वाभ्यां इदमनुष्या
कारंशरीरंममदुर्विभाव्यमवितर्क्यंमदिच्छाविलसितं नत्वहप्राकृतमनुष्यइत्यर्थः मेहृदयंतुतत्त्वंकिंतत्हृदयंमेत्रधर्मः तत्शुद्धं
सत्वमित्यर्थः कुतः यद्यस्मान्मयाधर्मोदूरादेवपृष्ठकृतः उत्सारितः अतएवमामृषभंप्राहुः १८ भवंतश्चहृदयेनशुद्धस
त्वमयेनजाताः तस्मान्मत्सरंहित्वामहत्तमंसनाभंसोदरंभजधंननुत्वत्पुत्रात त्वांवयंभजेम राजपुत्रत्वात प्रजाश्चपालयामे

गुरुर्नसस्यात्स्वजनोनसस्यात्पितानसस्यात्जननीनसास्यात् दैवंनतत्स्यान्नपतिश्चसस्यान्नमोचयेद्यः स
मुपेतमृत्युं १८ इदंशरीरंममदुर्विभाव्यंसत्वंहृदयंहिमत्रधर्मः पृष्ठेकृतोमेयदधर्म आरादतोहिमामृषभंप्राहु
रार्याः १९ तस्माद्भवंतोहृदयेनजाताः सर्वेमहीयांसममुंसनाभं अक्लिष्टबुद्ध्याभरतंभजध्वंशुश्रूषणंतद्भरणं
प्रजानां २० भूतेषुविरुध्यउद्गतमायेसरीसृपास्तेषुसबोधनिष्ठाः ततोमनुष्याः प्रथमास्ततोपिगंधर्वसिद्धावि
बुधानुगाये २१ देवासुरेभ्योमघवत्प्रधानादक्षादयोब्रह्मसुतास्तुतेषां भवः परः सोथविरिंचवीर्यः समत्परोहंद्विजदेवदेवः २२

तिचेदत आह तदेवमेशिश्रूषणंप्रजानांचपालनं भरतानुवृत्त्यैवसर्वंकृतंस्यादितिभावः २० इदानींब्राह्मणश्चसेव्याइत्या
शयेनाह तेषांसर्वेभ्यः श्रेष्ठमाहपंचभिः भूतेषुचेतनाभूतेषुविराहतीतिविरुध्यः स्थावराः इत्तउच्चैः अतिशयेनानमाः
तेष्वपियेसरीसृपाः सर्पंतीतिजंगमाः तेउत्तमाइतिसर्वत्रानुषंगः तेष्वपिसंबोधनिष्ठाः स्थितिर्येषांपश्वादीनांतिकीटा
दिभ्यः ततः तेष्वपिमनुष्याः ततोपिप्रमथाभूतप्रेताद्यः ततोपिगंधर्वाः ततसिद्धाः ततोन्येविबुधानुगाः किन्नराद्यः २१
तेभ्योसुरादेवाः असुरेभ्यः संधिरार्थः देवाश्चमघवत्प्रधानाः देवेष्वपिइंद्रः श्रेष्ठइत्यर्थः ततोपिब्रह्मसुतादक्षादयः तेषांमध्येभवः श्रेष्ठः
सविरिंचावीर्यंशक्तिः कारणंयस्यसाविरिंच्यवीर्यः अतस्तज्ज्ञानकत्वात विरिंच्यस्तनः परइत्यर्थः सविरिंचोमत्परः अहंपरोयस्यसौ
हंद्विजादेवाब्राह्मणाएवदेवाः पूज्यायस्य २२

सोहंब्राह्मणैरन्यद्भूतंन तुलयेसमंनपश्यामि अतोब्राह्मणासरंतुम्हतुंकिंपश्यामि नकिंचित् विःप्राइतितत्रत्यानांब्राह्मणानां
संबोधनं समस्यैवाभावादधिकंकुतस्समित्यर्थः तत्रहेतूनाह साईाभ्यां यस्मिन्ब्राह्मणेश्रद्धयाप्रकर्षेण हुतमन्नादिकामयथा
ष्टमहमश्नामि २३ मेतनूर्मूर्त्तिः वेदाख्यायेनब्राह्मणेनइहलोके धृतायत्र चब्राह्मणेसत्वादयोष्टौगुणाःसंतिनतःपरंकिं
पश्यामित्यन्वयः २४ निस्पृहत्वमाह मनोपियेषांनकिंचित्प्रार्थनीयमस्ति तेषामितरेणराज्यादिना किमुस्यात् नकिमपि २५

नब्राह्मणैस्तुलयेभूतमन्यत्पश्यामिविप्राःकिमतःपरंवा यस्मिन्नृभिःप्रहुतंश्रद्धयाहंअश्नामिकामंनतथाग्निहो
त्रे २३ धृतातनूर्मेउषतीपुराणीयेनेहसत्वंपरमंपवित्रं शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र २४
मत्तोप्यनंतात्परतःपरस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित् येषांकिमुस्यादितरेणतेषामकिंचनानांमयिभक्तिभाजां
२५ सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रुवाणि संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणं
मे २६ मनोवचोदृक्करणेहितस्यसाक्षात्कृतंमेपरिबर्हणंहि विनापुमान्येनमहाविमोहात्कृतांतपाशान्नविमोक्तुमीशेत् २७

तदेवंब्राह्मणसन्मानंविधायेदानींसर्वभूतसमानत्वंविधत्ते हेसुताः सर्वाणिजंगमानिस्थावराणिचभूतानिम
दधिष्ठानतयावोयुष्माभिःसंमाननीयानि पदेपदेक्षणेक्षणे विविक्ताधृतामत्सरादिरहितादृष्टिर्येषांतैः तदेव
ममार्हणं २६ सर्वकर्माणांईश्वरार्पणंविदधत् मनोवचोदृशामन्येषांकरणानामीहितस्यव्यापारस्यमेपरिबर्हणं
आराधनमेवसाक्षात्कृतंफलं येनपरिबर्हणेनविनाकालपाशाद्विमोक्तुंनईशेत् नसमर्थोभवेत् २७ श्रीराम् ९४

6413
1981

स्वतएवसुशिक्षितानपिलोकाननुशासनार्थमनुशास्यमुनीनांपारमहंस्यधर्ममुपशिक्षयिष्यन्भरतमभिषिच्यऋषभइत्युपदे
शोनामयस्यसभगवान्ब्रह्मावर्तात् प्रवव्राजेत्यन्वयः उर्वरितोवशिष्टः शरीरमात्रपरिग्रहोयस्य २८ अभिभाष्यमाणोपिज
नानांमध्येजडादिवद्वर्तमानस्तूष्णींबभूव अवधूतस्येववेषोयस्य तत्रपुरादिष्वनुपथंमार्गेमार्गे अवनिचरापसदैस्तर्जनादिभिः
परिभूयमानोपितदविगणयन्नेवैकचरएकाकीपृथिवीं परिबभ्रामेत्यन्वयः तत्रपुरंपत्तनंग्रामाहृदवंतः आकरःखनिःखेटः

श्रीशुकउवाच एवमनुशास्यात्मजान्स्वयमनुशिष्टानपिलोकानुशासनार्थंमहानुभावः परमसुहृद्भगवानृषभः प्र
देशमशीलानामुपरतकर्मणांमहामुनीनांभक्तिज्ञानवैराग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणःस्वतनयशतज्येष्ठंप
रमभागवतंभगवज्जनपरायणंभरतंधरणीपालनायाभिषिच्यस्वयंभवनयेवोर्वरितशरीरमात्रपरिग्रहउन्मत्तइव
गगनपरिधानःप्रकीर्णकेशआत्मन्यारोपिताहवनीयोब्रह्मावर्तात्प्रवव्राज २८ जडांधमूकबधिरपिशाचोन्मादकं
वदवधूतवेषोभिभाष्यमाणोपिजनानांगृहीतमौनव्रतस्तूष्णींबभूव तत्रतत्रपुरग्रामाकरखेटवाटिशिबिरव्रजघो
षसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैःपरिभूयमानोमक्षिकाभिरिववनगजस्तर्जनताडनावमेहनष्ठीव
नग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थानएतस्मिन्देहोपलक्षणे सदपदेशउभ
यानुभवस्वरूपेणस्वमहिमावस्थानेनसमारोपिताहंममाभिमानत्वात् अविखंडितमनाःपृथिवीमेकचरःपरिबभ्राम २९

कृषीवलग्रामः वाटिःपुष्पादिवाटिकाशिबिरंसेनावायोसंस्थानंव्रजोगवांस्थानंघोषोगोपांस्थानंसार्थोयात्रिकजनसंपातः
आश्रमाऋषीणांतर्जनंभयजननंताडनंप्रहारःमेहनंउपरिमूत्रणंष्ठीवनंफूत्कृत्यश्लेष्मप्रक्षेपःग्रावशकृद्रजसांप्रक्षेपःपूतिवातो
धोवायुःदुरुक्तंशापःएतेअगणनेदृष्टांतमक्षिकाभिरिवेति तत्रहेतुःअसतिमिथ्याभूतेस्वसंस्थानेसन्निवेशेदेहइत्युपल
क्षणंआकारोयस्यसदितिपदेशमात्रंयस्यतस्मिन्निरभिमानत्वात्केनहेतुनाउभयोःसदसतोर्योअनुभवस्वरूपेणयत्स्वमहिम्नि
अवस्थानंतेन अतएवाखंडितमनोयस्यसःपरिबभ्राम २९

भा० सचनदाग्रहीतइवादृश्यते तत्रहेतुः परावपुरतोवलंबमानाश्चतेकुटिलाश्चकपिशाश्चकेशाः तेषांभूरिभारोयस्यसः अवधू पं०
१५ तमनादृतं अतएवमलिनंनिजशरीरंतेनकथंभूतोप्यवोक्षरवयतेअतिसुकुमाराणिकरचरणोरस्थलानितथाविपुलाबाह्वाद
यःतएवावयवाःतेषांविशिष्टोन्यासःसन्निवेशोयस्यसः तथाप्रकृत्यैवसुंदरःस्वभावसिद्धोहासःतेनशोभनंमुखंयस्यसः
तथानवनलिनदलवत्आचरंतीयेशिशिरतारेतापहारिकनीनिके अरुणे आयतेनेत्रेताभ्यांरुचिरः तथासदृशाअन्यूनानधि
काःसुभगाश्चकपोलकर्णकंठनासिकायस्यतथाविगूढस्मितंयद्वदनंतस्यमहोत्सवेनपुरांगनानांमनसिकाममुद्दीपयन् जनयन्

अतिसुकुमारकरचरणोरस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासःप्रकृतिसुंदरःस्वभावहासस्फुरितो
नवनलिनदलायमानशिशिरताराद्यायतनयनरुचिरःसदृशसुभगकपोलकर्णकंठनासोविगूढस्मितवदन
महोत्सवेनपुरवनितानांमनसिकुसुमशरासनमुपदधानःपरागवलंबमानकुटिलकपिशकेशभूरिभारोवधू
तमलिननिजशरीरेणग्रहगृहीतइवादृश्यत ३० यर्हिवावसभगवान्लोकमिमंयोगस्याद्धाप्रतीपमिवाचक्षाण
स्तत्प्रतिक्रियाकर्मबीभत्सितमितिव्रतमाजगरमास्थितःशयानएवाश्नातिपिबतिखादत्यवमेहतिहदतिस्म
चेष्टमानउच्चरितआदिग्धोद्देशः ३१ तस्यहयःपुरीषःसुरभिसौगंध्यवायुस्तंदेशंदशयोजनंसमंतात्सुरभीकार ३२

एवंभूतोपितथादृश्यतेत्यन्वयः ३० यर्हियदालोकंजनंयोगस्यप्रतिपक्षमाचक्षाणःपश्यन्बभूव तस्यप्रतिक्रियाका
रणेचनिंदितमित्याचक्षाणःतदाअजगरंव्रतमास्थितःसनशयानएवाश्नातीत्यन्वयः आजगरंव्रतंनामएकत्रैवस्थि
त्वाप्रारब्धकर्मोपभोगअवमेहंतिमूत्रयंतिहदतिपुरीषमुत्सृजति उच्चरितपुरीषेचेष्टमानोविलुंठनतेनवादिग्धाआलिप्ता १५
उद्देशादेहप्रदेशायस्यसः ३१ बिभत्समिवाशंक्याह तस्येति पुरीषस्यसुरभिनागंधेनसौगंध्यंयस्यसवायुः ३२ श्रीः

645/1981

एवंगवादिचर्ययापानादिकरोतिस्म अजस्त्रमादि काकमृगगवामिवात्मदपिचरितंदर्शयति ३३ नानायोगचर्या आचरतीतितथा
लोकयात्रापरिहारायपोगिभिरेवंवर्तितव्यमितिप्रदर्शनायतथाकृतवान् वस्तुतस्तुभगवान् यतःअविरतःपरममहानंदोऽनुभवस्वरूपः किंचवासुदेवेआत्मनोव्यवधानेनअभेदेननविद्यतेअन्यवामिवअंतरामध्यउ
दरस्थदेहोपाधेर्भावस्तेननित्यनिवृत्तोपाधित्वेनत्यर्थः स्वतएवसिद्धः समस्तार्थःफलःपरिपूर्णत्वात् योगैश्वर्याणिनाभ्यनंद

एवंगोमृगकाकचर्ययाव्रजंस्तिष्ठन्नासीनःशयानःकाकमृगगोचरितःपिबतिखादत्यवमेहतिस्म ३३ इतिना
नायोगचर्याचरणोभगवान्कैवल्यपतिऋषभोविरतपरममहानंदानुभवआत्मनिसर्वेषांभूतानामात्मभूतेभगवतिवा
सुदेवेआत्मनोव्यवधानानंतरोदरभावेनसिद्धसमस्तार्थपरिपूर्णोयोगैश्वर्याणिवैहायसमनोजवांतर्धानपरकायप्रवेशदू
रग्रहणादीनियदृच्छयोपगतानिनांजसानृपहृदयेनाभ्यनंदत् ३५ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेऋषभदेवानु
चरितेपंचमोध्यायः ५ राजोवाच ननूनंभगवः आत्मारामाणांयोगसमीरितज्ञानावभर्जितकर्मबीजानांयोगै
श्वर्याणिपुनःक्लेशदानिभवितुमर्हंतियदृच्छयोपगतानि १ २ ३ ४

नु वैहायसंखेचरत्वंमनोजवःमनसइवदेहस्यवेगःदूरग्रहणंदूरदर्शनंहेनृप हृदयेनमनसा ३४ इतिश्रीभागवतेपंचम
स्कंधेटीकायांपंचमोध्यायः ५ षष्ठेलोकाभिमानस्यदेहत्यागक्रमाभिधा ऋषभंदवाग्निंयःपश्यन्नपिनपश्यति १ यो
गैश्वर्याणिनाभ्यनंददित्युक्तं तत्रपृच्छतिनेति भगवःहेभगवन् योगेनसमीरितमुद्दीपितंयत्ज्ञानंतेनावभर्जितानिदग्धानिक
र्मबीजानिरागादीनियैःतेषांयदृच्छयाप्राप्तानियोगैश्वर्याणिपुनःक्लेशदानिभवितुंनार्हंति अतःकिमितिनाभ्यनंददित्यर्थः १

भा०
३६

अंगीकृत्यपरिहरति सत्यमिति एकेबुद्धिमंतोनवस्थानस्यचंचलस्यमनसोविश्वासेनसंगच्छेतेनसम्पक्प्राप्नुवंति शठः किरातो यथा
धृतेष्वपिमृगेषुशठैकिरात यथामृगाइतिसम्बंध्यतेवा पादांततरशठोवंचकः किरातवणिक्व्यवहर्तायथा अभिन्नयवहर्तायथा
विश्वासेनयातीत्यर्थः पत्निकोदोषावर्जनीयइत्युपदेष्टुंनाप्यनंददितिभावः २ यदि अंभातपस्यविश्वासात्चिरातचीर्णंबहु
कालसंचितंतपः चस्कंदक्षरत्यावैश्वरंविक्षोभीमोहिनीरूपदर्शनेन यद्वाईश्वराणांसमर्थानामपिसौभरिप्रभृतीनांतपः ३ नत्रहे
तुःनित्यमिति यद्विश्रंभात्यस्यविश्वासात्कृतविश्वासोयोयोगीतदीयंमनः कामस्यतमनुयन्तेषांचछिद्रमवकाशंददाति य पं०

सत्यमुक्तं ऋषिरुवाच किंत्विहवाएकेनमनसोह्यविश्रंभमनवस्थानस्यशठकिरातइवसंगच्छेत २ तथाचोक्तंन
कुर्यात्कर्हिचित् सख्यंमनसिह्यनवस्थिते यद्विश्रंभात्चिराच्चीर्णंचस्कंदतपऐश्वरं ३ नित्यंददातिकामस्यछिद्रंतम
नुयेरयः योगिनःकृतमैत्रस्यपत्युर्जायेवपुंश्चली ४ कामोमन्युर्मदोलोभः शोकमोहभयादयः कर्मबंधश्चयन्मूलःस्वी
कुर्यात्कोनतद्बुधः ५ अथैवमखिललोकपालललामोविलक्षणैर्जडवदवधूतवेषभाषाचरितैरलक्षितभगवत्प्रभा
वोयोगिनांसांपरायविधिमनुशिक्षयन्स्वकलेवरंजिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाणः
उपरतानुवृत्तिरुपरराम ६

थाकृतविश्वासस्यपत्युः पुंश्चलीजायाजाराणामवकाशंदत्वापतिंघातयति तथामनोपिकामादिभिर्योगीनंभ्रंशयतीत्य
र्थः ४ अरीन्कथयन्उपसंहरतिकामइति यन्मूलः यन्निमित्तोभवति तन्मनः कोनुबुधःस्वीकुर्यात् स्वाधीनमितिमन्येत
५ प्रासंगिकंसमाप्यप्रस्तुतमाह अथेति अखिलानांलोकपालानांललामोमंडनभूतोपिउपरताबाधितानुवृत्तिर्यस्मात्
सउपररामदेहाभिमानंजहौ विलक्षणैरनेकप्रकारैरवधूतवेषादिभिर्नविलक्षितोभगवत्प्रभावोयस्मिन्सः सांपरायविधि १६
देहत्यागप्रकारं आधाराधेयभावव्यावृत्यर्थमाह अनर्थांतरेणभावेन अभेदेनउपासनव्यावृत्यर्थमाह असंव्यवहितं ६

647/1881

मनसास्वयंत्यक्तेप्यभिमानेकृताभिसंस्कारेणदेहः प्रचलति यथाकुलालचक्रेसोपभिमानाभासः तेनसतुजीवन्मुक्तानामपि
यावासनयाप्रवर्तीतिततोविशेषमाह योगमायावासनयेति ७ कोंकणवंकुटवान्दक्षिणकर्णाटकादीन्देशानगतः सनकु क
यापिवासनयाआस्यकृतः अश्मकवलोयेन असंवीतोनग्नः ८ समीरवेगेनविधुतानांकंपितानांवेणूनांसंघर्षणेनजातउग्रो
दवानलः आलेलिहानः सर्वतोग्रसन् ९ अवधूतवेषेणऋषभदेवस्तत्रगतइत्येतस्यमत्वकमाह यस्यकिलाश्रमातीतम

तस्यहवाएवंमुक्तलिंगस्यभगवतऋषभस्ययोगमायावासनयादेहइमांजगतिमभिमानाभासेनसंक्रममाणः ७ कों
कणवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवनआस्यकृताश्मकवलउन्मादइवमुक्तमूर्ध
जोसंवीतविचचार ८ अथसमीरवेगविधुतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सहतेनददाह ९ यस्य
किलानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजार्हन्नामोपशिक्ष्यकलावधर्मउत्कृष्यमाणेभवितव्येनविमोहितः स्वधर्म
पथमकुतोभयमपहायकुपथपाखंडमसमंजसंनिजमनीषयामंदः संप्रवर्तयिष्यते १० येनहवावकलौमनुजापसदादेवमायामो
हिताः स्वविधिनियोगशौचचारित्रविहीनादेवहेलनान्यपव्रतानिनिजेच्छयागृह्णानाअस्नानाचमनाशौचकेशोपलुंचना
दीनिकलिनाधर्मबहुलेनोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकदूषकाः प्रायेणभविष्यंति ११

मनुचरितंतद्देशवासिभ्यउपाकर्ण्य अर्हन्निति नामस्यसराजास्वयंतत्रउपशिक्ष्यशिक्षित्वा कुपथ्यश्चासौपाखंडश्चतंनिजम
नीषयासंप्रवर्तयिष्यतइत्यन्वयः तत्रहेतुः कलावित्यादिभवितव्येनप्राणिनांपूर्वसंचितपापफलेन १० येनप्रवर्तकेनमनु
जेष्वपसदानिकृष्टाः स्वविधिनानियोगोयस्मिन्शौचचारित्रेतद्विहीनाः देवावज्ञारूपाण्यस्नानादीनिकुव्रतानिगृह्णानाः
वेदादीनांविदूषकाभविष्यंति ११

भा० तत्फलंचांधंतमः प्राप्स्यंतीत्याह अर्वाकृतनया अवेदमूलयानिजलोकयात्रयास्वेछयाकृतप्रत्यया आप्तत्ताः कृतविश्वासाः १२ पं०
ननुतर्हि अनर्थकारीकिमर्थोयमृषभावतारस्तत्राह आयमिति रजोव्याप्तानांजनानांमोक्षमार्गोपशिक्षणार्थः तस्यैकैवल्योपशि
९७ क्षणस्यानुरूपात् १३ अधिकंपुण्यंयस्मिन् एतद्भारतंवर्षंऋषभाद्यवतारप्रयुक्तानिकर्माणिकरोति १४ प्रियव्रतस्यवंशः
अवदातः शुद्धः यत्रवंशेयपत्यस्मात् अकर्ममोक्षस्तस्यहेतुंधर्मंचचार १५ अपरः कोनुयोगी अस्यकाष्ठांदिशमप्यनुगछे

तेचव्यर्थाकृतनयानिजलोकत्रयांधपरंपरया श्वस्तास्तमस्यंधेस्वयमेवप्रपतिष्यंति १२ अयमवतारोरजसो
पप्लुतकैवल्योपशिक्षणार्थः तस्यानुगुणान् श्लोकानुगायंति १३ अहो भुवः सप्तसमुद्रवत्याद्वीपवर्षेष्वधिपुण्य
मेतद्गायंतियत्रत्यजनामुरारेः कर्माणिभद्राण्यवतारवंति १४ अहोनुवंशोयशसावदातः प्रैयव्रतोयत्रपु
मान्पुराणः कृतावतारः पुरुषः स आद्यश्चचारधर्मंयदकर्महेतुं १५ कोन्वस्यकाष्ठामपरोनुगछेन्मनोरथेना
प्यभवस्ययोगी योयोगमायाःस्पृहयत्युदस्ताह्यसत्तयायेनकृतप्रयत्नाः १६ इतिहस्मसकलवेदलोकदेवब्राह्म
णगवांपरमगुरोर्भगवतऋषभाख्यस्यविशुद्धाचरितमीरितंपुंसांसमस्तदुश्चरिताभिहरणंपरममहामंगलायनमिदम
नुश्रद्धयोपचितयानुश्रृणोति आश्रावयतिवावहितोभवति तस्मिन्वासुदेवएकांततोभक्तिरनयोरपिसमनुवर्तते १७

तु योयोगीयेनऋषभेण असत्तया अवस्तुत्वेनउदस्ताविरस्ताः योगमायाः सिद्धीर्वांछतिकथंभूताः कृतप्रयत्नोयाकृतद
र्थंप्रयत्नंवनकरोतीत्यर्थः यद्वाकथंभूताउदस्ताः कृतप्रयत्नाः सेवितुमुद्यता अपीत्यर्थः १६ विशुद्धाचरितंकथितंतत्समस
स्तंदुश्चरितमभितोहरतीति तथापरममहामंगलानामयनंच अवहितः सन् अनयोः श्रोतृश्रावयित्रोरविशेषेणभक्तिः सम्य
गनुवृत्ताभवतीत्यर्थः १७

6419 / 1981

भक्तेः परमपुरुषार्थत्वमाह यस्यांभक्तावेवनयोगादिषु अनुसवनमविरतमात्मानंस्नापयंतः स्वयमासादितं अप्रार्थितंभ
गवतास्वयमेवदीयमानमपि अनादरेहेतुः भगवदीयत्वेनैवपरितः समाप्ताः सम्यक्प्राप्ताः सर्वपुरुषार्थायैस्ते १८ ननुभगव
तोतिसुलभत्वदर्शनान्मोक्षस्यचातिदुर्लभत्वादियमतिस्तुतिरित्वत्राशंक्याह हेराजन्भवतांपांडवानांयदुनांचपतिः पाल
कः गुरुः उपदेष्टादैवमुपास्यः प्रियः सुहृत्कुलस्यपतिः नियंता किंबहुना क्वचित्कदाचित्दैत्यादिषुवः पांडवानांकिंकरो

यस्यामेवकवयआत्मानमविरतंविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनंस्नापयंतस्तयैवपरयानिर्वृत्याह्यप
वर्गमात्यंतिकंपरमपुरुषार्थमपिस्वयमासादितंनोएवाद्रियंते भगवदीयत्वेनैवपरिसमाप्तसर्वार्थाः १८ राजन्
पतिर्गुरुरलंभवतांयदूनांदैवंप्रियः कुलपतिः क्वचकिंकरोवः अस्त्वेवमंगभगवान्भजतांमुकुंदोमुक्तिंददातिकर्हिचि
त्स्मनभक्तियोगं १९ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनयाचिरसुप्तबुद्धेः लोकस्ययः करुणयाभय
मात्मलोकमाख्यान्नमोभगवतेऋषभायतस्मै २० इतिभा० प० शु० भारतस्कंधमहाभागवतोपदाभगवतावनिन
लपरिपालनायसंचिंतितस्तदनुशासनपरमः यश्चजनींविश्वरूपदुहितरमुपयेमे १ ७ ८

पिअज्ञानुवर्तिनीं अस्तुनामैवं तथाप्येतेषांनित्यंभजनामपिमुक्तिंददातिनतुकदाचिदपिसप्रेमभक्तियोगं १९ वर्णितमृषभा
वतारंनमस्करोति नित्यमनुभूतंयत्निजरूपंसएवलाभः तेननिवृत्तातृष्णायस्यसः अतद्रचनयादेहाद्यर्थमनोरथेनश्रेयसिवि
षयेचिरसुप्ताबुद्धिर्यस्यतस्यजनस्यकरुणयानिर्भयमात्मस्वरूपंयथाख्यातवान्तस्मैनमः २० इतिश्रीभावार्थदीपिका
यांपंचमटीकायांषष्ठोध्यायः अध्यायानांत्रयेणैवमृषभाख्यानमीरितं अष्टभिर्भरताख्यानमतःप्रास्तूयतेमतं १ सप्तमे
भरतोराज्यंचिरंयज्ञैर्हरिंयजन् आरब्धकर्मनिर्वाणंहरिक्षेत्रभजेद्दरिं १ ७ ७ ७

संचिंतितः संकल्पेनैवराज्यादौनियुक्तः १ आत्मनोनुरूपान्पंचजनयामास भूतादिरहंकारइवस्तुतसूक्ष्माणीतिसं
नतिदृष्टांतः २ भारतमिति स्वनाम्नाख्यापकत्वेनधर्माद्यतिशयःसूचितः ३ बहुवित्सर्वज्ञः ४ यज्ञाभा
यूपाःक्रतवःसयूपाः तद्रूपंउच्चावचैर्महद्भिरन्यैश्चक्रतुभिःकर्मभिः श्रद्धयाईजेनानेवाह आहृताःसाधिका

तस्यामुह आत्मजानूकाक्लेनानुरूपानात्मनः पंचजनयामासभूतादिरिवभूतसूक्ष्माणिसुमतिंराष्ट्रभृतंसुद
र्शनमावरणंधूम्रकेतुमिति २ अजनाभंनामैतद्वर्षंभारतमितियत आरभ्यव्यपदिशंति ३ सबहुविन्महीप
तिःपितृपितामहवदुरुवत्सलतयास्वेस्वेकर्मणिवर्तमानाः प्रजाः स्वधर्ममनुवर्तमानःपर्यपालयत ४
ईज्येचभगवंतंयज्ञपुरुषंक्रतुभिरुच्चावचैः श्रद्धया आहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानांप्र
कृतिविकृतिभिरनुसवनंचातुर्होत्रविधिना ५

रेणात्मसात्कृताः ये अग्निहोत्रादयःतेषांप्रकृतिविकृतिभिः अग्निहोत्रादयोविविधाःसकलावयवयुक्ताःप्रकृ
तयः विकलांगाविकृतयइतितद्विधैरपिइष्टवानित्यर्थः अनुसवनमित्यंतेवाचातुर्होत्रविधिनेत्यंतेवागदं ५ १८

651
1981

किंच संप्रचरत्सुप्रवर्तमानेषुनानायागेषुविरचिता अनुष्ठिता अंगक्रियायेषांतेषुपरंपूर्वंतत्वासुदेवएवभावयमानोग्नि
तयनसयजमानोयज्ञभाजोयेदेवाःसूर्यादयः स्तान्पुरुषस्यवासुदेवस्यावयवेषुचक्षुरादिषुध्यायत ननुपरश्चकेनेस्य
न्वयः अपूर्वपक्षद्वयं मिमांसकानांतदानीमेवमस्मत्वनात्पन्नंफलमेवापूर्वं कालांतरफलोत्पादिकाकर्मशक्तिर्वेति तदुक्तं
यागादेवफलंतद्धिशक्तिद्वारेणसिद्ध्यति सूक्ष्मशक्त्यात्मकंवापिफलमेवोपजायतइति तदेवाह क्रियाफलं धर्माख्यमि
ति ननुयद्यंगंदेवताकर्मप्रधानमिति मनंतर्हिकर्मनिष्ठमपूर्वंस्यात तदुक्तं कर्मभ्यःप्रागयोग्यस्यकर्मणःपुरुषस्यवा यो
ग्यताशास्त्रगम्यायापरासापूर्वमीष्यतइति अर्थदेवताप्रधानं कर्मतुदेवताराधनार्थंतदादेवताप्रसादरूपत्वादपूर्व

संप्रचरत्सुनानायागेषुविरचितांगक्रियेष्वपूर्वंयत्तत्क्रियाफलंधर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवतालिंगा
नांमंत्राणामर्थनियामकतयासाक्षात्कर्त्तरिपरदेवतायांभगवतिवासुदेवएवभावयमान आत्मनेपुण्यैर्मृदि
तकषायोहविः ष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवास्तान्पुरुषावयवेष्वभ्यधायत ६

स्यदेवताप्रसादरूपत्वा श्रयत्वमेवयुक्तं प्रोक्षणाद्येपूर्वस्येवव्रीह्याद्याश्रयत्वं कुतोवासुदेवाश्रयपूर्वंभावयति उच्य
तेयदिकर्तृनिष्टमपूर्वंतर्हिवासुदेवस्यांतर्यामिणःप्रवर्तकत्वेनमुख्यकर्तृत्वात्तदाश्रयमेवापूर्वंनतुतस्यायोज्ययज
मानाश्रयं शास्त्रफलंप्रयोक्तरीतिन्यायात अन्यथाकृत्विजामपूर्वाश्रयत्वप्रसंगात तदेतदाह साक्षात्कर्त्तरीति
देवताश्रयत्वेपि वासुदेवाश्रयत्वमेवेत्याह परदेवतायामिति परदेवतात्वेहेतुः सर्वदेवतालिंगानांतत्त
द्देवताप्रकाशकाणांमंत्राणां येर्था इंद्रादिदेवतास्तेषांनियामकतस्यैवप्रमादनीयत्वात फलदातृत्वाच्चयुक्तमेवापू
र्वाश्रयत्वमित्यर्थः एवंभावनमेवात्मनोनैपुण्यंकौशलंतेनमृदिताःक्षीणाःकषायाःरागादयोयस्य अध्वर्युभि
रिति बहुवचनंनानाकर्माभिप्रायेण ६

भा० एवंभूतयाकर्मविशुद्ध्याविशुद्धसत्वस्यभक्तिरजायतेत्यन्वयः ॥ अंतर्हृदयेय आकाशः सएवशरीरमभिव्यक्तिस्थानंयस्यत पं०
स्मिन्ब्रह्मणिकीदृशेमहापुरुषस्योपलक्षणं आकारोयस्यतस्मिन्नकिंच श्रीवत्सादिभिरुपलक्षितोनिजपुरुषाणांनारदादीनां
१९ हृदिलिखितवत्स्थितेन। एवंलतयास्थितेनउक्तेनपुरुषरूपेण आत्मनिस्वमनसिविरोचमानेकीदृशीभक्तिः अत्यंतातिशयेनवर्ध
मानोरयोवेगःप्रकर्षोयस्याः ७ एवमनुवृत्त्यावर्षाणामयुतानितेषांसहस्रंतावत्पर्यंतकालेवसितोनिश्चितः कर्मनिर्वाणाव

एवंकर्मविशुद्ध्याविशुद्धसत्वस्यांतर्हृदयाकाशशरीरेब्रह्मणिभगवतिवासुदेवमहापुरुषोपलक्षणेश्रीवत्सकौस्तु
भवनमालारिदरगदादिरूपलक्षितेनिजपुरुषहृल्लिखितेनात्मनिपुरुषरूपेणविरोचमानउच्चैस्तरांभक्तिरनुदिनमेध
मानरयारजायत ७ एवंवर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोधिभुज्यमानंस्वतनयेभ्योरिक्थंपितृप
तामहंयथादायंविभज्यस्वयंसकलसंपन्निकेतात्स्वगृहात्पुलहाश्रमंप्रवव्राज ८ यत्रहवावभगवान्हरिरद्या
पितत्रत्यानांनिजजनानांवात्सल्येनसंनिधापयतइच्छारूपेण ९ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदी
नामसरित्प्रवरासर्वतःपवित्रीकरोति १० तस्मिन्वाववकिलसएकलःपुलहाश्रमोपवनेविविधकुसुमकिसलयतु
लसिकांबुभिःकंदमूलफलोपहारैश्चसमीहमानोभगवतआराधनंविविक्तउपरतविषयाभिलाषउपभृतोपशमःपरांनिर्
वृतिमवाप ११

सरःराज्यभोगादृष्टसमाप्तिसमयोयेनसः अधिभुज्यमानंरिक्थंधनंयथाभागंविभज्यसकलसंपदांनिकेतात्आश्रया
त्स्वगृहात्पुलहाश्रमंहरिक्षेत्रंप्रवव्राज ८ यत्रक्षेत्रेविद्याधरकुंडेवात्सल्यकर्तृत्वेनसन्निहितःक्रियतेभक्तानांअपेक्षितेन
रूपेणसंनिहितोभवतीत्यर्थः आश्रमस्थानानिउभयतउपर्यधश्चनाभिर्येषांतैःदृषच्चक्रैःशिलामध्यगतैश्चक्रैःचक्रनदीगं
डकीसरितांश्रेष्ठापवित्रीकरोति १० एकलःएकआराधनंसमीहमानःकुर्वाणःविविक्तःशुद्धः अतएवउपरतोविषयाभिलाषोय
स्मात्उपभृतःसंवृद्धःउपशमोयस्य ११ ३९

653/1981

प्रवृद्धमानानुरागस्यभरेणयतद्रुतंद्रवीभूतंहृदयंतस्मिन्शैथिल्यमनुबोधमोयस्य आत्मनिदेहेउद्भिद्यमानंरोमपुलककुलकंयस्यक
श्चासौसमासोतः औत्कंठ्यात्प्रवृत्तेनप्रणयबाष्पेणनिरुद्धादुवलोकायायोस्तेनयनेयस्यसः एवंवर्तमानस्तामपिभगवत्सपर्यांनस
स्मारेत्यन्वयः तत्रहेतुःनिजरमणस्यस्वप्रीतिदातुः येअरुणचरणारविंदेतयोरनुध्यानेनपरिचितःसमृद्धोभक्तियोगःतेनपरि
प्लुतःसर्वतोव्याप्तःपरमह्लादःपरमानंदोयस्मिन् गंभीरहृदयह्रदेतस्मिन्नवगाढानिमग्नाधिषणायस्य १२ एतानिभगवद्व्रतानि
येनसभगवंतंसूर्यमंडलेअभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः कीदृशःऐण्याहरिण्याअजिनमैणेयंतदेववासस्तेन अनुसव

नथेत्थमविरतपुरुषपरिचर्ययाभगवतिप्रवृद्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरो
मपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयनएवंनिजरमणारुणचरणारविंदानुध्यानपरिचि
तभक्तियोगेनपरिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढधिषणस्तामपिक्रियमाणांभगवत्सपर्यांनसस्मार १२
इत्थंधृतभगवद्व्रतऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेनचविरोचमानः १३ सूर्यर्चाभगवंत
तंहिरण्मयंपुरुषंउज्जिहानेसूर्यमंडलेभ्युपतिष्ठन्नेतदुहोवाच १४ परोरजःसवितुर्जातवेदोदेवस्यभर्गोमनसेदंज
जान सरेतसादःपुनराविश्यचष्टेहंसंगृध्राणंनृषद्रिंगिरामिमः १५ इतिश्रीभागवतेम० पंचमस्कंधेसप्तमो० ७

नाभिषेकेणार्द्राःकपिशाःश्वकुटिलाजटास्तासांकलापेनचविरोचमानः १३ सूर्यप्रकाशिकयारुचाहिरण्मयंध्येयंसविता
तमंडलमध्यवर्तीत्यादिनोक्तं उज्जिहानेउद्गच्छति सकतपाठेअर्थस्तुसएव १४ परोरजसःप्रकृतेःपरंशुद्धसत्वात्मकंसवितु
र्देवस्यसूर्यस्यभर्गःस्वरूपभूतंतेजःजातवेदोधनंकर्मफलंयस्मात्कर्मफलदमित्यर्थः अत्रहेतुः यतमनसेवेदंविश्वजजानसस
र्जपुनश्चअदःसृष्टंविश्वमंतर्यामिरूपेणप्रविश्यगृध्राणंकांक्षंतंहंसंसंज्ञीवंस्मरेतसाचिच्छक्त्याविचष्टेपश्यतिपालयतीत्यर्थः
नृषत्सीदतिउपाधितयातिष्ठतीतिनृषत्बुद्धिःतस्याःरिंगिरिंगणंगिरिणीराततिनृषद्रिरावांछंदसीत्यमिपूर्वत्वसत्वाभावः
तद्रंगंमरे शरणंव्रजामः १५ इतिभागवतेपंचमटीकायांसप्त॰

भा०
२०

अथमृगजतो विधुंनस्यकर्मांतरायनः येणरसाप्रसक्तस्य ज्ञातमेणत्वमीयिने कृपयाधिकृतस्नेहः २पतनायैवयोगिनः ३
तिप्रदर्शयन्नाहभरतस्येणपोषणं नैमित्तिकविधिप्राप्तं अवश्यकं अथप्राप्तं मूत्रोत्सर्गादिकृतमभिषेकादिकंयेन अस्मा
सरप्रणवंजपन् उदकांतेनद्यास्तीरे १ जलाशायाभ्यासनद्यासमीपे २ आत्यासक्त्यापपीयमानेसति नावदेवतस्सणमेव
अतिदूरेणसंनिधौ मृगपतेःसिंहस्यवुन्नादोमहानादउद्दतः ३ प्रकृत्यास्वभावतएवत्याकुलास्ततरांतुहरिभयस्याभिनिवे

श्रीशुकउवाच एकदातुमहानद्यांकृताभिषेकनैमित्तिकावश्यकोब्रह्माक्षरमभिगृणानोमुहूर्तत्रयमुदकांतउ
पविवेश १ तत्रतदाराजन्हरिणीपिपासयाजलाशायाभ्यासमेकैवोपजगाम २ तयापपीयमानउदकेतावदे
वाविदूरेणनदतोमृगपतेरुन्नादोलोकभयंकरउदपतत् ३ तमुपश्रुत्यसामृगवधूः प्रकृतिविक्लवाचकितनि
रीक्षणासुतरामपिहरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषाभयात्सहसैवोच्चक्राम ४ तस्याउत्प
तंत्याअंतर्वत्न्याउरुभयावगलितोयोनिर्गतोगर्भः स्रोतसिनिपपात ५ तत्प्रसवोत्सर्पणभयखेदातुरास्वगणेन
वियुज्यमानाकस्यांचिद्दर्यांकृष्णसारसतीनिपपातअथचममार ६ तंत्वेणकुणकंकृपणंस्रोतसानूह्यमानमभि
वीक्ष्यापविद्धंबंधुभिर्वानुकंपयाराजर्षिर्भरत आदायमृतमातरमित्याश्रमपदमनयत ७ श्रीराम्

शेनव्यग्रंव्याकुलंहृदयंयस्याः पारिप्लवदृष्टिः परिभ्रांतनेत्रानगतानतृषायस्याः उच्चक्रामनदीमुल्लंघितवती ४ अंतर्व
त्न्यागर्भिण्याः उरुभयेनस्थानाद्विचलितोयोनिनिर्गतः स्रोतसिप्रवाहेनिपतितः ५ तत्प्रसवागर्भपातः उत्सर्पण
मुल्लंघनंभयंचएतैः खेदेनातुरापीडितादर्यांगिरिगुहायांहरिणावक्षः पपात अथानंतरंमृताच ६ एणकुणकंहरिण
बालकं अपविद्धंबंधुभिस्त्यक्तं इतिएतैः कृपणत्वादिहेतुभिर्यानुकंपातया अनयत ७ ७ ७ ७

कृतोनिजःस्वीमदइत्यभिमानोयेन पोषणंतृणादिना पालनंवृकादिभ्योरक्षणं प्रीणनंकंडूघनादिना लालनंचुंबनादिना एते
यदनुध्यानमासक्तितेन आत्मनोनियमाः स्नानादयः यमाः अहिंसादयः तत्सहिताईश्वरपरिचर्यादयस्त्वप्रत्यहमेकैकशा
वियुज्यमानाःसंतः कतिपयेनाहर्गणेनसर्वेउत्सन्नाबभूवुः ८ आसक्तिंप्रपंचयति अहोइत्यादिना इतिकृतानुषंगइत्ये
तत्पर्यतेन ईश्वरस्यचरणः कालचक्रंतस्यपरिभ्रमणवेगेनस्वगणादिभ्योविभ्रंशितः माइतिमांचशरणंप्रापितोमामेव

तस्यहवाकुणकउच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमस्सह
माः पुरुषपरिचर्यादयएकैकशः कतिपयेनाहर्गणेनवियुज्यमानाः किलसर्वएवोदवसन् ८ अहोवतायंहरिणकु
णकः कृपणईश्वररथचरणपरिभ्रमणरयेणस्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणंचमोपसादितोमामेवमाता
पितरौभ्रातृज्ञातीन् यौथिकांश्चैवोपयायनान्यंकंचनवेदमय्यतिविस्रब्धश्चातएवमयामत्परायणस्यपोषणपालन
प्रीणनलालनाद्यनुसूयुनानुष्ठेयंशरण्योपेक्षादोषविदुषा ९ नूनंह्यार्याः साधवउपशमशीलाः कृपणसुहृदएवंवि
धार्थस्वार्थानपिगुरुतरानुपेक्षंते १० इतिकृतानुषंगआसनशयनाटनस्थानाशनादिषुसहमृगजहुनास्नेहेनानु
बद्धहृदयआसीत् ११ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरनवृकशालावृकादिभ्योभयमाशंसमानःसह
हरिणःकुणकेनवनंसमाविशाति १२ श्रीराम् श्रीकृष्ण श्रीगोपाल श्रीगोविंद श्रीअनंत

मातापित्रादिबुध्याउपेयायप्राप्तः यौथिकान्यूथसंघातिनः अनुसर्यनमेतन्निमित्तंममस्वार्थोभ्यश्यतीतिदोषदृष्टिम
कुर्वता ९ तदेवाहनूनंहीति १० इतिएवंकृतोनुषंगः आसक्तिर्येनमृगजहुनामृगापत्येनसहस्नेहेनानुबद्धंहृदयंयेन
११ स्नेहानुबंधमेवप्रपंचयति कुशकुसुमेत्यादिना स्वधयंतीत्येतेनशालावृकाः श्वानयदाभयंशंकमानोभवति
तदातेनसहवनंसमाविशाति १२ ७ ७ ७ ७

655
1981

भा·
२१ अतिशयितः प्रणयभरोयस्यतत्हृदयंयस्यसः १३ बर्वपतिर्भरतः प्रकृतिस्थेनस्वांकूयात् १४ अन्यदा अदर्शनेसकरुणंयथाभवत्ये १०
वमेनशोचन्निति होवाचेत्यन्वयः अतितर्षेण अस्यौत्सुक्येनहरिणकुणकविरहेणविङ्क्लेहृदयेसंतापोयस्य कश्मलंमोहंप्रा
पितःसन् १५ अपीतिसंभावनायांबतेत्यनुकंपायां अहोइति खेदे शठकिरातयोरिव वचनपराक्रमतिर्यस्यअकृतसुकृत
स्यनिर्भाग्यस्यममतत्शाठ्यादिकमगणयन् चिंतयन्नागमिष्यतिकिं अपराधाशिंतनेहेतुः आत्मप्रत्ययेनस्वचित्तशुध्याकृत

पथिषुचमुग्धभावेनतत्रतत्राविशक्तमतिशयप्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहति एवमुत्संगेउरसिकुणकंन्वा
धायपोषणलालयन्मुदंपरमवाप १३ क्रियास्वानिर्वर्त्यमानास्वंतरालेप्युत्थायोत्थाययदेनमभिचक्षीततर्हियाव
र्षपतिःप्रकृतिस्थेनमनसातस्माआशिषआशास्तेस्वस्तिस्ताद्वत्सतेसर्वतइति १४ अन्यदाभृशमुद्विग्नमनाइवविणष्टद्रविणइवकृ
पणःसकरुणमतितर्षेण हरिणकुणकविरहविङ्क्लहृदयसंतापस्तमेवानुशोचन्किलकश्मलंमहदभिलंभितइति
होवाच १५ अपिबतसवैकृपणबालकोमृतहरिणीसुतः अहोममानार्यस्यशठकिरातमतेरकृतसुकृतस्यकृतविस्रंभआ
त्मप्रत्ययेनतदविगणयन्सुजनइवागमिष्यतिकिं १६ अपिक्षेमेणास्मिन्नाश्रमोपवनेशष्पाणिचरंतंदेवगुप्तंद्रक्ष्यामि
१७ अपिनवृकःशालावृकोवान्यतमोवानैकचरएकचरोवाभक्षयति १८ निम्लोचतिहभगवान्सकलजगत्क्षेमोदयस्त्रय्या
त्माद्यापिनममृगवधून्यासआगच्छति १९ अपिस्विदकृतसुकृतमागत्यमांसुखयिष्यतिहरिणराजकुमारोविविधरुची
रदर्शनीयैर्निजमृगदारकविनोदैरसंतोषंस्वानामपनुदन् २० ७ ७ ७

विश्वासः सन्सुजनोयथा अगणयन्नीतितद्वत् १६ शष्पाणिकोमलतृणानि १७ नैकचरोएकचरः सूकरादिः एकएवचरन् २१
रतीतियः क्रूरस्वभावोव्याघ्रादिर्नभक्षयतिकिं १८ सकललोकस्यक्षेमोयस्मात्सउदयोयस्यवेदत्रयी आत्मास्वरूपंयस्यसः स्वयोनि
भिः स्वरूपैर्यातिअस्तंयातिमृगवधून्यासोनिक्षेपभूतः १९ हरिणरूपराजकुमारः आगत्यमां अपिस्वित्सुखयिष्यतीत्यन्वयः किंकुर्व
न्विविधैरुचिरैर्स्पृहणीयैर्निजमृगदारकविनोदैः स्वीयानांखेदमपनुदन् २० ७ ७ ७

657/1981

संभवतिचेतदित्याह क्ष्वेलिकया क्रीडयामृषापासमाधिस्तेनामीलितदृशायेनतंमांप्रेमसंरंभेणप्रणयकोपेनपृषत्जलबिं
दुः तद्वत् अपरुषेणमृदुनाविषाणाग्रेणलुंठतिसंघट्टयति २१ आसादितहविर्यस्मिन्बर्हिषिदर्भेदंताकर्षणादिनाचापलेनदूषिते
सतिदूषितत्वेतिपाठेबर्हिर्षिविषयेदूषणंकृत्वेत्यर्थः मयाविक्षिप्तः सन्तत्क्षणमेवापरतक्रीडोनिभृतआस्ते २२ इतिबद्धाभला
पोत्थायबहिर्निर्गत्यखुरखातभूभागोपलंभसंभ्रांतहृदयआह किंवेति अरे अहो अनयाक्षित्याकिंवातप आचरितंतपस्विन्या
सभाग्यया यद्यस्मादियंसाविनयस्यतनुतराःसूक्ष्माः कृष्णसारस्यशिवतमा खरा खुराः पादास्तेषांपदानितत्रतत्रांकितानांपंक्तिभिः द्र
विणमृगस्तेनरहितस्य अतएवातुरस्यदुःखितस्यममद्रविणमार्गंस्वर्गंसूचयंतीसतीस्वात्मानंचनाभिः कृतमंडनांद्विजानायज्ञभूमिंकरो

क्ष्वेलिकयामांमृषासमाधिनाआमीलितदृशंप्रेमसंरंभेणचकितआगत्यपृषदपरुषविषाणाग्रेणलुंठति २१ आसा
दितहविषिबर्हिषिदूषितेमयोपालब्धोभीतभीतः सपद्युपरतरासइवऋषिकुमारादितकरणकलापआस्ते २२ किंवा
अरे आचरितंतपस्तपस्विन्यानयायदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमखरखुरपदपंक्ति
भिर्द्रविणपदवीस्सूचयंत्यात्मानंचसर्वतः कृतकौतुकंद्विजानांस्वर्गापवर्गकामानांदेवयजनंकरोति २३ अपिस्विद
सौभगवानुडुपतिरेनंमृगपतिभयात्मृतमातरंमृगबालकंस्वाश्रमपरिभ्रष्टमनुकंपयाकृपणजनवत्सलः परियाति
किंवात्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनींकंमामुपसृतमृगीतनयंशिशिरशांतानुरागगु
णितनिजवदनसलिलामृतमयगभस्तिभिःस्वधयतीतिवा २४
ति यस्मिन्देशेमृगः कृष्णस्तस्मिन्धर्मान्निबोधतेतिस्मृतेः २३ तावदुदितेचंद्रेमृगंदृष्ट्वास्वमृगत्वंसंभावयन्नाह अपिनंदति चंद्र
स्मिस्पर्शसुखंप्राप्याह किंचेति संभावनायां आत्मजविश्लेषणज्वरस्तापसएवदवदहनः तस्यज्वालाभिरुपतप्यमानहृदयरूपास्थ
लनलिनीयस्यजलस्थपद्मंतापसोढुंक्षममतिस्थलग्रहणं उपसृतामृगीतनयायेनतंमांचंद्रः स्वधयतिशांतिंगमयतिकः शिशि
रंचतत् शीतंचमप्यनुरागेणगुणितंच आवर्तितंपुनः स्रवत्यद्वदनसलिलंतदेवामृतमयागभस्तयः तैः लोकेहिमंत्रवादिनोव
दनसलिलेस्तापंशमयंतीतिप्रसिद्धं उपसृत्यमृगीतनयः किंवामांस्वधयिष्यतीतियोमंसभानं २४ श्रीराम जयराम ७

भा० मृगदारकवदाभासमानेन भगवदाराधनलक्षणात्कर्मणोऽस्माद्विभ्रंशितः प्रारब्धकर्मैतत्रहेतुः कथमितरथेति साक्षात्पुत्रवत्कथमासंगस्यात् पं०
२२ पूर्वंपरित्यक्ताः दुस्त्यजा औरसाद्यैर्न अंतरायेणदिहितयोगारंभणं यस्य आत्मानमविगणयतः आत्मचिंतामकुर्वतः तावदेवतीव्रवेगः का
लोमृत्युसमयआपद्यत २५ लोकंदेहंमृगेणसहितंविसृज्य प्राकृतनरवन्मृगशरीरमवाप २६ कथंभूतंकलेवरंमृतमनुनष्टनानविन
ष्टपूर्वजन्मानुस्मृतिर्यस्य आहस्वचित्त २७ अहोकष्टंधीराणांमार्गात्भ्रष्टोऽहंयत्रामेवाह यद्यतः विमुक्ताः समस्ताः संगायेन विविक्तंपुण्या

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः सयोगतापसो भगवदाराधन
लक्षणात्कथमितरथाजात्यंतरण्यकुणक आसंगः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैव
मंतरायविहितयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आत्मानमहिमि
वाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत २५ तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणो मृगएवा
भिनिवेशितमना विसृज्य लोकमिमंसह मृगेन कलेवरं मृतमनुनमृगजन्मानुस्मृतिरितरवन्मृगशरीरमवाप २६ तत्रापिहवाआ
त्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह २७ अहोकष्टंभ्रष्टोऽहमात्मवतामनुपथाद्यद्वि
मुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवतः सर्वेषामात्मनां आत्मनि भगवति वासुदेवे तदनुश्रवणमनन संकीर्तनाराधना
नुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तदपि पुनर्ममाबुधस्यारान्मृगसुतमनुपरि
सुस्राव २८ इत्येवं निगूढनिर्वेदो विसृज्य मृगीमातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्र
मं कालंजरात्प्रत्याजगाम २९ तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमा
नो मृगत्वनिमित्तावसानमेवगणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ३० इति श्रीभागवते पंचमस्कंधे भरतोपाख्याने अष्टमोऽध्यायः ८

रण्यंशरणंयस्य आत्मवतो धीरस्य मममनः सर्वेषांभूतानांआत्मनि वासुदेवे सप्रावेशितं समाहितं निश्चलं सत् आरात् दूराद्वत्कस्राव
निःसृतं केनसमावेशितं तस्यानुश्रवणादिष्वभियोगेन अभिनिवेशेन अशून्याः सकलायामा यस्मिन् तेन कालेन २८ निगूढनाविष्कृ
तो निर्वेदो येन न्यालक्ष्मणोपलक्षितं ग्रामं कालंजरात् यत्र हरिणोजातः तस्मात्पर्वतात् २९ आत्मैवसहचरो एकाकीप्रति सएवस्यैव
प्रपंचः मृगत्वनिमित्तेनेति तीर्थोदकेनक्लिन्नमार्द्रं अर्धोदकस्थमित्यर्थः ३० इतिपंचमेटीकायांअष्टमोऽध्यायः ८ ७ २२

659
1951

नवमेजडविप्रत्वेनस्यरागाद्यभावतः भद्रकालीपशूत्वेपिनिर्विकारत्वमीर्यते पितुः श्राद्धान्मविज्ञानो भरतमृगतांगतः प्रारब्धक
र्मवेगेन तदंते जडविप्रतां अंगिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य सागोत्रातिथ्यादिस्थानदानादि विद्याकर्मविद्या
आत्मज्ञानं देहादिव्यतिरिक्तमात्मज्ञानं आनंदोधर्मसंपन्नोजः आत्मनासदृशाः श्रुतादयोगुणायेषांतेसमानोदरानवपुत्राबभू
वुः १ यवीयस्यांकनिष्ठायांचमिथुनंस्त्रीपुरुषयुग्मं २ उत्सृष्टंमृगशरीरंयेनशुचीनां श्रीमतां गेहेयोगभ्रष्टाभिजायतइतिस्मृतेः
२ तत्रचान्यसंगादात्मनोऽभ्रंशमाशंकमान आत्मनमुन्मत्तादिरूपेणदर्शयामासेत्यन्वयः किंकुर्वनकर्मबंधविध्वंसनं श्रवणंगुणा

श्रीशुकउवाच अथकस्यचिद्द्विजवरस्यांगिरः प्रवरस्यशमदमवतः साध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रय
विद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणानवसोदर्याः अंगजाबभूवुः १ मिथुनंचयवी
यस्यांभार्यायां २ यस्तुतत्रपुमांसंपरमभागवतंराजर्षिप्रवरंभरतमुत्सृष्टमृगशरीरंचरमशरीरेणविप्रत्वंगतमा
हुः ३ तत्रापिस्वजनसंगाच्चभृशमुद्विजमानोभगवतः कर्मबंधनविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंद
युगलंमनसाविदधदात्मनः प्रतिघातमाशंकमानोभगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिर
स्वरूपेणदर्शयामासलोकस्य ४ तस्यापिहवाआत्मजस्यविप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदिशमानः ५ अ
नुशिष्टेनहिभाव्यंपितुःपुत्रेणेति ६ सचापितदुहपित्रसन्निधावेवासध्रीचीनमिवस्मकरोति छंदांस्यध्यापयिष्य
न्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ७

नांविवरणंकथनंचयस्य तद्भगवतश्चरणारविंदयुगलंमनसाविशेषेणधारयन्प्रतिघातशंकायांहेतुः अनुस्मृतास्वीयपूर्वजन्म
नामावलीपरंपरायेनसः ४ पुत्रस्नेहानुबद्धमनायस्यजडस्यगार्हस्थ्यानधिकारात्संस्कारानविदधानस्तमुपनीयउपनीतस्यपु
नः शौचाचारादीन्तस्यानभिप्रेतानभिशिक्षितवान् ५ तत्रहेतुः अनुशिष्टेनहिभाव्यंपितुःसकाशात्पुत्रेणेति ६ सोपिचपितुः शि
क्षानिबंधनिवृत्तयेआसध्रीचीनमसमीचीनमिवकरोतिस्म उपाकरणविद्यानारंभानंतरंश्रावणादिमासचतुष्टयेवेदानध्यापयिष्यन् आरोता
नध्याहृतिभिः सहप्रणवशिरःसहितांत्रिपदींचवासंतिकान्मासानधीयानमप्यसमवेतरूपंग्राहयामासतानापिकालेन
स्वरानुपूर्व्यादियुक्तंव्याहृत्यादिनस्यनागतमित्यर्थः ७

भा०

२३ आत्मभ्रतेस्वततुजे अनुरागेनावेशितंचित्तंयेन शौचादीनियान्योपकुर्वाणकस्यसावधि अस्त सर्वमन्न तः कर्माणितेनानुभि पे०
युक्तानि अनावृतान्यपितंपुत्रंमस्यनुशास्यमपि अप्राप्तपुत्रप्रापिप्सिमनोरथः स्वयंकाल्या नोपसंहृतः मतइत्यर्थः अनुशासननिर्वर्त्य
नस्तमेवहेतुमाह अनुशिष्टेनभाव्यमित्यसत्याग्रह अभूत् हाग्यस्य ८ सपत्न्यसमथ अनुसंस्थया अनुमरणेनसपत्न्यतपाठ्य
मेवार्थः ९ न्यवृत्तनतर्निवर्तितुमिच्छन् निरतनाइत्यर्थः १० यदाभिभाष्यमाणस्तदानदनुरूपाणि प्रभाषते स्म ऊामंतरेणव

एवंस्वतनुज आत्मन्यनुरागावेशितचितः शौचाचमनाध्ययनव्रतनियमगुर्वनशुश्रूषणाद्योपकुर्वाणकस्य कर्माण्य
नभियुक्तान्यपिसमनुशिष्टेनभाव्यमित्यसदाग्रहः पुत्रमनुशास्यस्वयंनावद्दनधिगतमनोरथः कालेनाप्रमत्तेनस्वयं
गृहस्वप्रभत्तउपसंहृतः ८ अथयवीयसीद्विजसतीस्वगर्भजातं मिथुनसपत्न्याउपन्यस्यस्वयमनुसंस्थयापतिलोक
मागात् ९ पितर्युपरतेभ्रातरएनमतत्प्रभावविदस्त्रय्यांविद्यायामेवपर्यवसितमतयोन परविद्यायाजडमतिरि
तिभ्रातुरनुशासननिर्बंधात्न्यवृत्सन् १० सचप्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणोयदातदनुरू
पाणिप्रभाषते कर्माणिचकार्यमाणः परेछयाकरोतिविष्टितोवेतनतोयांच्यायदृछयाचोपसादितमल्पंबहूछिष्टंकदन्नंवाभ्य
वहरतिपरंनेंद्रियप्रीतिनिमित्तंनित्यनिवृत्तनिमित्तः स्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमःसुखदुःखयोर्द्वंदनिमित्त
योरसंभावितदेहाभिमानः ११

नायत्कर्मकार्यतेसाविष्टिः वेतनंमूल्यंविष्ट्यादिभिरुपसादितमन्नमभ्यवहरति परभुंक्तेकेवलंनत्विंद्रियप्रीतये अ
त्रहेतुद्वयमाह नित्यंसदानिवृत्तनिमित्तंयस्मात् उत्पादकहृत्य स्वाशात्सिद्धः अभिव्यंजकशून्यः विशुद्धः केवलोयोनुभ २३
वोसएवानंदरूपःस्वात्मातस्यलाभएवंभूतोहमिति ज्ञानंतस्याधिगमः प्राप्तिरस्ति द्वंद्वानिसन्मानावमानादीनिद्वंद्वनिमित्तुक
यो ः सुखदुःखयोरकृतनरदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तनम्यवहरतीत्यन्वयः ११ ७ ७

661
1984

अतएवशीतोष्णादिनोव्वेवृतांगः विचचारेत्यन्वयः कीदृशः पीनपुष्टः संहननांगः संहन्यंतेनिविडीभवंतिस्म अंगानि
यस्यकठिनायवयवइत्यर्थः स्थंडिलसंवेशनं भूमिशयनं अन्नृ अर्दनंमर्दनाभावः अमज्जनंस्नानाभावः तैर्यद्रजः तेनाप्र
कटंब्रह्मवर्चसंब्राह्म्यंतेजोयस्य यथामहामणिरनभिव्यक्ततेजाभवति कुत्सितेनपटेनावृताकटिर्यस्य उरुमषिणा अतिमलिनवा
नतत्वनस्वजानंतियेतेजनैरवमतः सन् १२ यदातुपरेभ्यःकर्ममाल्यत्वेनाहारमपेक्षमाणाभवतीतदाकेदारकर्माणिशालिसत्वकंदं

शीतोष्णवातवर्षेषुवृषइवानावृतांगः पीनः संहननांगः स्थंडिलसंवेशनानृन्मर्दनामज्जनरजसामहामणिरिवानभि
व्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवितनोरुमषिणाद्विजातिरितिब्रह्मबंधुरितिसंज्ञयातज्जनावमतोविचचार १२
यदातुपरतआहारंकर्मचेतननतुईहमानःस्वभ्रातृभिरपिकेदारकर्मणिनिरूपितंतदपिकरोति १३ किंतुनसमविषमन्यू
नमधिकमितिवेदपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति १४ अथकदाचित्कश्चिद्वृषलपतिर्भ
द्रकाल्यैपुरुषपशुमालभतापत्यकामः १४ तस्यहदैवविमुक्तस्यपशोः पदवींतदनुचराः परिधावंतोनिशिनिशीथसमय
तमसावृतायामनधिगतपशवःआकस्मिकेनविधिनाकेदारान्वीरासनेनमृगवाराहादिभ्यः संरक्षमाणमंगिरःप्रवरसुतमपश्यन् १५

मविलोडनादौ आहारप्रलोभेननियुक्तः सन्करोति १३ किंतु अत्रकर्दमस्यप्रक्षेपेप्रसंगसमंभवेतद्दत्तउद्धरणेविषमंस्यादितिन
वेदभार्ताभिर्दत्तान्कणादीन्यमृतवत्भुंक्ते कणाश्चूर्णतंडुलाः पिण्याकंतैल्ययंत्रोद्धृततिलखलीफलीकरणंतुषाः कुल्माषाःकी
टदुष्टामाषाः स्थालीपुरीषंस्थाल्यांलग्नंदग्धान्नं १४ तस्यरागादिराहित्यमलौल्यंचेवमीरितं अथान्यच्चरितंप्राह चित्रंमस्या
वसंभ्रमंवृषलीपतिः शूद्रसामंतश्चोरराजा आलभत आलब्धुंप्रवृत्तः १४ दैवात्बंधनमुक्तस्यपशोः नमस्यांव्यक्तायां
निशितत्रापिनिशीथसमयेअर्धरात्रावसरेआकस्मिकाद्दैवनिर्मितःविधिःप्रकारःतेनवीरासनेऊर्ध्वावस्थानेन १५

भा० अवमत्यज्ञात्वा १६ पणयश्चाराः अहतेनवस्तेनउपरिष्कृते अलंकृतं वेशासंस्थयाहिंसाविधानेनगीतादिघोषणेनसह १७ पं०
२४ वृषकराजस्यपणिः पुरोहितत्वेनवर्त्तमानः चोरः तदाभिमंत्रितंभद्रकालीमंत्राभिमंत्रितं १८ धनमदरजस्तमः तेनउत्सिक्तं
स्य तस्मादस्मनोमेषांभगवत्कलासुसंकुवीराणांब्राह्मणानांकुलंतुच्छीकृत्यपथिस्थंवनेमानानांथकर्मतद्भलभ्यदेवीउज्वाद
प्रतिमायाजन्त्वाबहिर्निर्गता कथंभूतमात्मनंस्तनायामपिहिंसायामननुज्ञातंभद्रकालीत्यनदेनेगद्यं १९ अमर्षोपराधासह

अथतएनमनवद्यलक्षणमवमङ्गपभर्त्तकर्मनिष्पत्तिंमन्यमानाः बधारज्ञानपाचंडिकायागृहमुपनिन्युर्मुदाविकसि
तवदनाः १६ अथपणयः स्वविधिनाभिषिच्याहतवाससाछाद्यभूषणालेपस्रक्तिलकादिभिरुपस्कृतंभुक्तवंतंधूपदी
पमाल्यलाजकिसलयांकुरफलोपहारोपेतयावैशससंस्थयामहतागीतस्तुतिमृदंगवेणुप्रघोषेण चपुरुषपशुंभद्रकाल्याः
पुरतउपवेशयामासुः १७ अथवृषलराजपणिः पुरुषपशोरसृगासवेनदेवींभद्रकालीयक्ष्यमाणस्तदभिमंत्रितमसिम
तिकरालंनिशितमुपाददे १८ इतितेषांवृषलानांरजस्तमः प्रकृतीनांधनमदरजउत्सिक्तमनसांभगवत्कलावीरकुलंकद
र्थीकृत्योत्पथेनस्वैरंविहरतांहिंसाविहाराणांकर्मातिदारुणंयद्ब्रह्मभूतस्यसाक्षाद्ब्रह्मर्षिसुतस्यनिर्वैरस्यसर्वभूत
सुहृदः सूनायामप्यननुमतमालंभनंतदुपलभ्यब्रह्मतेजसातिदुर्विषहेणदंदह्यमानेनवपुषासहसोच्चचाटसैवदेवीभ
द्रकाली १९ भृशममर्षरोषावेशरभसविलसितभ्रुकुटीविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदनाहंतुकामे
वेदंमहाट्टहासमतिसंरंभेणविमुंचतीततउत्पत्यपापीयसांदुष्टानांतेनैवासिनाविवृक्णशीर्ष्णांगलात्स्रवंतमसृगास
वमत्युष्णंसहगणेननिपीयातिपानमदविह्वलोच्चैस्तरांस्वपार्षदैः सहजगौननर्त्तचविजहारचशिरःकंदुकलीलया २०

नंरोषश्चवेगोतदाहनंतयोरावेशस्तस्यरभसेनवेगेनविलसितोनंभितोभ्रुकुटीलक्षणोविटपः नारवाकुटिलादंष्ट्राश्चअरु
णानीक्षणानिचतेषामाटोपः संभ्रमस्तेनातिभयानकंवदनंयस्याः इदंतुजगदुत्सुधतेवमहांतमट्टहासंसनादंहासंननर्त्तस्था २४
नादुत्पत्यविवृक्णानिछिन्नानिशीर्षाणियेषांगणेनपरिवारेणसहशिरांस्येवकंदुकानितेषांलीलयाचविक्रीडेव २०

ननुकथंदेव्याराधकानामेवंविपरीतंफलंतत्राह एवमेवेति महत्सु अभिचाररूपोतिक्रमः अपराधः २१ नन्वसंभावितमिदमेवं
यन्मरणेप्यव्याकुलत्वंमारकेष्वक्रोधाभावइत्यादितत्राह नवाइतिविमुक्तोदेहाद्यात्मभावलक्षणः स्फुरदोहृदयग्रंथिर्येः सर्वस
त्त्वानांहृदः आत्मतेषांनचैतेषांदेहाद्यभिमानसद्भावेपिमरणाद्भियमस्तीत्याह साक्षाद्भगवता अभिमानेरक्ष्यमाणानां केन अनि
षः कालः सएवअरिस्वकंतेनवरायुधेनतेस्तेभावैश्च अंतर्यामितयाप्रवर्त्तमानेः भद्रकाल्यादिरूपः नकुतश्चिदपिभयंयस्मिन्भागव
तानांभगवदुपासकानांपरमहंसानां २२ इतिपंचमस्कंधेटीकायांनवमोध्यायः ९ इदानींक्षिपतारातामिशिविकां

एवमेवखलुमहदभिचारातिक्रमः कार्त्स्न्येनात्मनेफलति २१ नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमः स्वशिरश्छेदनआप
तितेपिविमुक्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनांसर्वसत्त्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भगवतानिमिषारिवरायुधेनाप्रम
त्तेनतैस्तैर्भावैः परिरक्ष्यमाणानांतत्पादमूलमकुतश्चिद्भयमुपसृतानांभागवतानांनिमिषारिवपरमहंसानां २२ इतिश्रीभाग
वतेमहापुराणेपंचमस्कंधेजडभरतचरितेनामनवमोध्यायः ९ श्रीशुकउवाच अथसिंधुसौवीरपतेरहूगणस्यव्रज
तइक्षुमत्यास्तटेतत्कुलपतिनाशिबिकावाहपुरुषान्वेषणसमयेदैवेनोपसादितः सद्विजवरउपलब्धएषपीवायुवातन
नांगोगोखरवद्धुरंवोढुमलमितिपूर्वविष्टिगृहीतैः सहगृहीतः प्रसभमतदर्ह उवाहशिबिकांसमहानुभावः १

स्तांवहन्मुनिः स्वदुर्वादानुवादेनविज्ञायाशुप्रसादितः १ एवंभूतांविकारित्वमज्ञसर्वज्ञयोः समं इतिसर्वतामिंधरहूगण
कथंरणं रहूगणोनामसिंधुसौवीरदेशयोः राजातत्त्वजिज्ञासुः कपिलाश्रमंयदागच्छतिस्मतदायदवृत्तंतदाह अथेति इक्षुमत्या
नद्यास्तीरे तेषांशिबिकावाहकानांकुलस्यनाथेन एषगोरिवखरइवचभारंवोढुंसमर्थइतिधियापूर्वंयेकेचनविष्टयाबलाद्गृही
तास्तैः सहप्रसभंबलात्गृहीतः सन् अतदर्होपिसमहानुभावः शिबिकामुवाहेत्यन्वयः १ २ ३ ४

663
1981

हिंसापरिहारार्थं इषुमात्रप्रदेशावलोकस्यानुपश्चात्त्याऽगतिः तस्याः हेतुभूतायाः पुरुषाणांगतिर्नसम्यगाहितापकरूपाना १०
भूत् २ सोपालंभंसासूयंसामदानविधिभेदरूपायेषु चतुर्थ्याद्यंकितचित्ताः ३ भवनियमानुपथाः तदाज्ञानुवर्त्तिनः ४
नपारयामः नशक्नुयामः ५ कृपणानांवचांनिशम्यसांसर्गिकः संसर्गनिमित्तः एकस्यापिदोषः सर्वेषामेवभवितुमर्हतीतिनि
श्चित्यरहूगणआहेत्यन्वयः कथंभूतः उपासितावृद्धायेनसोपिस्वभावेनबलात्परवशःसन् कथंभूतः प्रमादेनस्पष्टंप्रज्वलन्

यदाहिद्विजवरस्येषुमात्रावलोकानुगतेनसमाहितापुरुषगतिस्तदाविषमगतांस्वशिबिकांरहूगणउपधार्यपुरुषानधिव
हतआहहेवोढारःसाध्वतिक्रमतकिमितिविषममुह्यतेयानमिति २ अथतईश्वरवचःसोपालंभमुपाकर्ण्योपायतु
रीयाद्वेकितमनसस्तेविज्ञापयांबभूवुः ३ नवयंनरदेवप्रमत्ताभवनियमानुपथाःसाध्वेववहामः ४ अयमधुनानियु
क्तोपिनद्रुतंव्रजतिनानेनसहवोढुमुहवयंपारयामइति ५ सांसर्गिकोदोषएवनूनमेकस्यापिसर्वेषांसांसर्गिणांभ
वितुमर्हतीतिनिश्चित्यनिशम्यकृपणवचोराजारहूगणउपासितवृद्धोपिनिसर्गेणबलात्कृतईषदुत्थितमन्युरविस्प
ष्टब्रह्मतेजसंजातवेदसमिवरजसावृतमतिराह ६ अहोकष्टंभ्रातर्व्यक्तमुरुपरिश्रांतोदीर्घमध्वानमेकएववहिवान् ७
सुचिरंनातिपीवाननसंहननांगोजरसाचोपद्रुतोभवान्सखेनोएवापरएतेसंघट्टिनइतिबहुविप्रलब्धोप्यविद्ययावि
हितद्रव्यगुणकर्माशयस्वचरमकलेवरेवस्तुनिसंस्थानविशेषेहंममेत्यनध्यारोपितमिथ्याप्रत्ययोब्रह्मभूतःत
ष्णींशिबिकांपूर्ववदुवाह ८ अथपुनःस्वशिबिकायांविषमगतायांप्रकुपितउवाचरहूगणः ९ ७ ७

जोयस्मिन्भस्मनाछन्नमग्निमिवस्थितं ६ भ्रातरितिसंबोधनंअसंभोपाभिप्रायंव्यक्तंनिश्चितंउरुअधिकंपरिश्रांतोसीत्यादी
निविपरीतार्थानिषड्वाक्यानिऊहिवान्प्रापितवान् ७ तत्रापिसुचिरंजरसाचवहुदुत्वेन सघट्टिनः सहचराः बहुनाप्रकारेणैवं
विप्रलब्धोपिवक्रोक्त्याउपहसितोपितूष्णींउवाहेत्यन्वयः तूष्णींभावेहेतुः अविद्ययारचिताः द्रव्यादयोयस्मिन्स्वचरमकले
वरेनाध्यारोपितःमिथ्याप्रत्ययोयेन तत्रद्रव्याणिमहाभूतानिगुणाः इंद्रियाणिकर्माणिपुण्यपापानि आशयोंतःकरणंयतःब्रह्मभूतः ८।९

665
1981

मामनादृत्यभर्त्तुःस्वामिनोममशासनमाज्ञामतिक्रामसि १० चिकित्सांशास्तिंदंडपाणिर्यमोयथाजनस्यमहस्यशास्तिंकरोति
तथास्वांप्रकृतिंअप्रमत्तता ११ अबद्धंअनन्वितं नरदेवाहमित्यभिमानोयस्यतं अनुगुणितेनतिरस्कृतः अशेषमेषणोभ
गवःप्रियोनिकेतन्याप्रियोयेनतं यद्वा अशेषाणांभगवत्प्रियाणांनिकेतःसर्वेषांभूतानांसुहृच्च आत्मावयोगेश्वराणां
चर्यासुजडादिवत्आचरणंतस्यांचात्यंतंव्युत्पन्नापरिचितामतिर्यस्यसः तंस्मयमानोहसन्निवेतिमुखप्रसत्तिर्द्योत्यते विगतः
विस्मयःगतगर्वः १२ तत्रवक्रोक्त्याघडुक्तंत्वंनश्रांतःनचदीर्घमध्वानमागतइतितत्रोत्तरमाह त्वयायदुदितंउक्तंश्रमादित
स्तीतितद्व्यक्तंस्फुटंतत्तथैव अविप्रलब्धोविप्रलंभोनभवति तदेवाह हेवीरयदिभारेनामकश्चित्स्यात्सचभर्त्तुर्वोढुर्देहस्ययदि

किमिदमरेत्वंजीवन्मृतोमांकदर्थीकृत्यभर्त्तुशासनमतिचरसि १० प्रमत्तस्यचतेकरोमिचिकित्सांदंडपाणिरिवज
नतायायथाप्रकृतिंस्वांभजिष्यसइति ११ एवंबहुबद्धमपिभाषमाणंनरदेवाभिमानंरजसातमसानुविद्धेनमदेनतिर
स्कृताशेषभगवत्प्रियनिकेतंपंडितमानिनंसभगवान्ब्राह्मणोब्रह्मभूतःसर्वभूतसुहृदात्मायोगेश्वरचर्यायामितिव्यु
त्पन्नमतिःस्मयमानइवविगतस्मयइदमाह १२ ब्राह्मणउवाच त्वयोदितंव्यक्तमविप्रलब्धंभर्त्तुःसमेस्याद्यदिवीरभा
रः गंतुर्यदिस्यादधिगम्यमध्वापीवेतिराशौनविदांप्रवादः १३ स्थौल्यंकार्श्यंव्याधयआधयश्चक्षुत्तृड्भयंक
लिरिच्छाजराच निद्रारतिर्मन्युरहंमदःशुचोदेहेनजातस्यहिमेनसंति १४ ७ ७

स्यात्सचमेमदिप्रसक्तःस्यात् नहिइदानीभारभावात्विप्रलंभःस्यात्नत्वेनदस्मि भारस्यवोढुश्चानुरूपत्वात्ममचतत्संबं
धाभावात् तथागंतुरधिगम्यंप्राप्यमध्वावायदिस्यात् अद्धेति पाठसाम्येपरमार्थतः तच्चमेयदिस्यात्इत्यादियोज्यं पु
नत्वयोक्तंनातिपीवेतितत्राह चेतनमुद्दिश्यत्वंपीवेतिप्रवादोविदांविदुषांनभवति किंतुमूर्खाणां यतोयंप्रवादःसमा
भूतसंघेदेहेनत्वात्मनिदेहएवपीनोनाहमित्यर्थः १३ एतत्प्रपंचयति स्थौल्यमिति कलिःकलहः अहंकारेणमदःस्वदेहेनस
हलदभिमानेनजातस्यहिभवति ममतुनिरभिमानस्यनसंतियद्वा देहजातेयोजातस्तस्यैवतानिममतुतत्रजातस्यनसंतीति १४

भा० यत्त्वोक्तं जीवन्मुक्तोऽसीति तत्राप्याह जीवन्मुक्तत्वं न केवलं मम किं तु विकृतस्य सर्वस्य परिणामिनो देहं यद्यस्मादिह कृतं प्रति सणमा पं०
धीनवत् यदुक्तं भर्तुः शासनमातिष्ठसीति तत्राह स्वत्वस्वाम्यवतयोर्भावः सत्ता देहेऽप्ययस्य त्वपसंभवः यदिव्यवस्थितस्मादित्यर्थः त
हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो भवत्युच्येत उचितो भवति उच्चसमवायइति धातुः यदि नु तव राज्यकं शोभमचराज्येस्यात
२६ तदा सर्वमेतद्विपरीतं स्यादित्यर्थः १५ ननु यावद्राजा हि तावत्तव स्वामी भवाम्येवेति चेत्तत्राह विशेषाणां गजस्त्यादि भेदस्तद्बुद्धे विवरं
अवकाशं व्यवहारादन्यत्र न पश्यामि मनागीषदपि अथापि तवायं मत्समानः स्वतोहि ब्रूहि किं तेकरवामीति १६ यदुक्तं प्रमत्तस्य

जीवन्मुक्तत्वं नियमेन राजन्नार्यं न तवस्य हि कृतस्य देहे स्वस्वाम्यभावो भववर्ड्डव्ययत्र तद्युच्यते मा विधि कृत्ययोगाः १५
विशेषबुद्धेर्विवरं मनागवप पश्यामि यन्न व्यवहारतोऽन्यत्र कईश्वरस्तत्र किमाशितव्यं तथापि राजन्करवाम किं ते १६
उन्मत्तमत्तजडवत्स्वसंस्थागतस्य मे वीरत्वं विकित्सितेन अर्थः क्रियात्र भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः १७
रहूगण उवाच एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्य
पनयन्नराजयानमपि तथोवाह १८

नैचिकित्सां करोमि यथा स्वां प्रकृतिं भजिष्यसइति तत्राह उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्था ब्रह्मभावं गतस्य भ
वता कृतेन चिकित्सितेन दंडेन शासितेन वा क्रिया नर्थः मुक्तस्यार्थानर्थयोरसंभवात् यदि पुनरहं न मुक्तः किं तु प्रमत्तः स्तब्ध
एव तथापि मम शिक्षादिकं पिष्टपेषणं व्यर्थमित्यर्थः नहि जडस्वभावः शिक्षयापि मृदु कर्तुं शक्यत इत्यर्थः १७ अनुवाद
रूपया परिभाषया प्रत्युत्तरं दत्वा उपरतं अनात्म्यदेहात्मत्वं निमित्तं मविद्या यस्य आरब्धफलं कर्म क्षपयन् १८ श्रीः २६

667/1981

हे पांडवेय सम्यक्श्रद्धया श्रद्धानया तत्वजिज्ञासया प्राप्तोऽधिकारो येन यथा दर्शपूर्णमासमधिकृतस्य वर्गादीहृतेन पशुकामस्याप्रण
येदितिगुणफलसंबंधे प्यधिकारः एवं सात्विकश्रद्धायामधिकृतस्यैव अस्यामधिकार इत्यर्थः बहुयोगग्रंथसंमतं हि जस्यतद्वचः
श्रुत्वा विगतोऽन्तरपरे वाधिराजरतिगर्वोयस्य १९ द्विजानां मम मध्ये कतमः यतः सूत्रमुपवीतं बिभर्षि यद्वा दत्तात्रेयादीनां मध्ये क
तमोऽवधूतः इहापिकस्माद्धेतोः प्राप्तः नोऽस्माकं क्षेमाय चेत्प्राप्तस्तर्हि शुक्लः कपिलमुनि न भवसि किं उतेति वितर्के २० किमन्य

सचापि पांडवेय सिंधुसौवीरपतिस्तत्वजिज्ञासायां सम्यक्श्रद्धयाधिकृताधिकारस्तद्धृदयग्रंथिविमोचनं द्विज
वच आश्रुत्य बहुयोगग्रंथसंमतं त्वरयावरुह्य शिरसा पादमूलमुपसृतः क्षमापयन्विगतनृपदेवस्मय उवाच १९
कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः कस्यासि कुत्रत्य इहापि कस्मात्क्षेमाय नश्चेदसि नोत शुक्लः २०
नाहं विशंके सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दंडात् नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंके भृशं ब्रह्मकुलाव
मानात् २१ तद्ब्रूह्यसंगो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः वचांसि योगग्रथितानि साधो न नः क्षमं
ते मनसापि भेत्तुं २२ अहं च योगेश्वरमात्मतत्वविदां मुनीनां परमगुरुं वै प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णं
२३

याचिंतया शिबिकां तावद्दहामिति चेदत आह नाहमिति वित्तपः कुबेरः २१ यस्मात्प्रवृत्तोऽशंके तस्मात्कस्त्वमि
ति आदि प्रश्नानामुत्तरं ब्रूहि निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन अपारः अनंतमहिमा तत्र हेतुः नोऽमनसापि भे
त्तुं न क्षमं न शक्यं किं भेत्तुमित्यपेक्षायामाह तेवचांसीति यद्वा मनसा युक्ताः सूरः स्म दृष्टयोऽपि भेत्तुं न शक्नुवंतीत्यर्थः
२२ स्वस्य ज्ञानार्थितां दर्शयति अहं चेति इह संसारे यत्तु अरणं शरणं तत्तु किमिति प्रष्टुं प्रवृत्तोऽस्मीति ज्ञानशक्त्या चतीर्णं क
ले २३

भा० सएवभगवान् किंस्विदेवविचरतिगूढाविष्टः कथंविचक्षीत प्रक्ष्येत् . २५ एवंतत्स्वरूपंपृष्ट्वातदुक्तोनराण्यासिपृतिन पं०
त्रयदुक्तंममश्रमोनास्तीतितत्राह दृष्टइति आत्मनोमे अनुमन्येमिमं अनुमानंचैव भवान्भारवाहनादिनाश्रांतः कर्तृत्वात्
२७ यःकर्त्तासश्राम्यतियथाहंयुद्धादिकर्त्तेतिनचेदंव्यवहारमात्रंनतुसत्यं तदुक्तंव्यवहारतोन्यन्नपश्यामीतितत्राह यथेति
व्यवहारमार्गप्रपंचःसमूलःसप्रमाणकएवदृष्टः यथायथावत् असताघटादिनाउदकानयनादेरभावात् एवंभवान्प्रपंचः
सत्यःअर्थक्रियाकारित्वात्यः पुनरसत्यःनासौअर्थक्रियाकारी यदुक्तंउपाधिधर्मोः८स्थाल्याग्नेयोमेनवस्तुतः संतीति औपाधि
कत्वेपिसत्यत्वंकिंनस्यादित्याह स्थाल्या अग्निनातापंतन्मध्यवर्त्तिनः क्षीरस्यतापःतस्यतापात्तंडुलानांबहिर्भागस्यक्लेतस्त

सवैभवान्लोकनिरीक्षणार्थमव्यक्तलिंगोविचरस्यपिस्वित् योगेश्वराणामतिमेदबुद्धिः कथंविचक्षीतगृहानुबं
धः २५ दृष्टःश्रमःकर्मतआत्मनोवैभर्त्तुर्गंतुर्भवतश्चानुमन्ये यथासतोदानयनाद्यभावात्समूलइष्टोव्यवहारमार्गः २५
स्थाल्यग्नितापात्पयसोपितापस्तत्तापतस्तंडुलगर्भरंधिः देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधा
त् २६ शास्ताभिगोप्तानृपतिःप्रजानांयःकिंकरोवैनपिनष्टिपिष्टं स्वधर्ममाराधनमच्युतस्ययदीहमानोविजहात्यघौघं २७

डुर्भस्यचरंधिःपाकः नचात्रकिंचिन्मिथ्या एवंदेहादिभिः सन्निकर्षात् संबंधात् तन्निमित्तात्संसृतिः पुरुषस्यभवति
असवःप्राणाः आशयोमनः अनुरोधात् उपाधिधर्मानुवृत्तेः तथाहिनिदाघादिनादेहस्तत्तेंद्रियाणांतापः ततःप्राणस्य
ततःमनसइत्येवंयथायथमूह्यं २६ यदुक्तंस्वस्वाम्यभावोध्रुवइतितत्राह शास्तेति अध्रुवत्वेपियदायोनृपतिःसप्रजा
नांशास्तागोप्ताचयदुक्तंत्वन्नादेःकिंकराधिरूढोयइतितत्राह योच्युतस्यकिंकरःसपिष्टंनपिनिष्फलंनकरोति स्वत्वभावादपि
गमेपिशास्तरीश्वराज्ञासंपादनेनेवफलत्वात् तदाहस्वधर्मरूपमच्युतस्याराधनंकुर्वन् यस्मादघौघंजहाति २७ २७

669
1981

यस्मादेवंममत्वदुक्तंविपरीतंप्रतिभातिनतस्तस्मात्नरदेवाभिमानमदेनलुब्धोहताःतिरस्कृताःसतमाभवात्दृशायेतुतस्यमेमैत्री
दशस्तेनयुक्तांदृष्टिंकृपांकरोतु सतामवज्ञारूपंपापंयथातरिष्यामि २८ ननुममावज्ञाकृतविकाराभावात्कुतःपापंतत्राह नेति
यद्यपितवविक्रियानास्ति विश्वसुहृत्सखासर्वात्मत्वात्तस्य अतःसर्वत्रसाम्येनस्वदेहेविगताभिमानस्य तथापिमहतामवमनात्
मादृशोविनश्यतीति अदूरात्क्षिप्रंशूलपाणिरिवातिममघोपीत्यर्थः २९ एकादशेथमंपृष्टारहूगणमहीभृता उपादिशत्सरंज्ञानं
सयोगीविनिगद्यते १ अकोविदआविद्वानपित्वंकोविदानांवादान् उपदरुणिकोत्तुल्यान्वाग्मनेववदसि अथो अतःअस्मत्

तन्मेभवान्नरदेवाभिमानमदेनतुच्छीकृतसत्तमस्य कृषीष्टमैत्रीदृशमार्त्तबंधोयथातरेसदवध्यानमंहः २८ नवि
क्रियाविश्वसुहृत्सखस्यसाम्येननवीताभिमतेस्तवापि महद्विमानात्स्वकृताद्धिमादृङ्नंक्ष्यत्यदूरादपिशूलपाणिः २९
इतिश्रीभागवतेपंचमस्कंधेजडभरतचरितेरहूगणसंवादेनामदशमोध्यायः १० ब्राह्मणउवाच अकोविदः
कोविदवादवादान्वदस्यथोनातिविदांवरिष्ठः नसूरयोहिव्यवहारमेनंतत्त्वावमर्शेनसहामनंति १ तथैवराजन्नुरु
गार्हमेधवितानविद्योरुविजृंभितेषु नवेदवादेषुहितत्त्वादःप्रायेणशुद्धोनुचकास्तिसाधु २ ७ ७

विदुषांमध्येश्रेष्ठोनभवसि कुतःहियस्मात् यंस्वामिभृत्यादिलौकिकव्यवहारंत्वसत्यमाच्छेनंसूरयस्तत्त्वविचारेणसह
नवदंति किंतु अविचारसंदरंवदंति अतोनमत्यः १ वैदिकोपिकर्मव्यवहारोनसत्यइत्याह तथैवेति दुग्धगाहो गृहसंबं
धिनोमेधाःयज्ञाःतेषांवितानेविस्तारः तद्विषयास्याविद्यातयाउरुअधिकंविजृंभितेषुविलसितेषुतत्त्ववादः तुनिश्चितं
नचकास्ति नप्रकाशते तथाचश्रुतिः नेहनानास्तिकिंचनेत्यादिशुद्धोहिंसादिशून्यःसाधुःरागादिशून्यश्चप्रायेणेतिईश्वरा
र्पितेकर्मणापरमार्थफलत्वाभिप्रायेणोक्तं २ ७ ७ ७ ७

भा०
२८

ननु अनेवेदांतस्यापिपुंसः कर्मरूपवृत्तेः कथमसत्यतानत्राह नेति साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योपिवेदांतवाचस्तस्यनस्युथा पं०
सत्यवभूवुः स्वप्नेयानिरुक्तिस्तयास्वप्नदृष्टांतेनरूपत्वादिहेतुनास्वयमेवहेयत्वेनानुमितंयस्यनस्यात् ३ एवंप्रपंचस्यसत्यत्वंनुद्दिश्य
निराकृत्यसंसारस्यापितदुक्तंसत्यतांनिराकर्तुंतस्यमनोनिमित्ततामाहयावदित्यादिनायावत्तमांसि मनोपावइजआदिभिर्गुणै
रनुरुद्धंवशीकृतंभवति तावत्तन्मनोनिरंकुशंसत्पुरुषस्यकुशलंधर्मंइतरधर्मंच आतनोति कैः चेतोभिः ज्ञानेंद्रियैः आकूति
भिःकर्मेंद्रियैश्च ४ ततश्चधर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यंकरोतीत्याह सइति पुंस्त्वमात्मशब्दविशेषणत्वेनतन्त्र

नतस्यतत्त्वग्रहणायसाक्षाद्वरीयसीरपिवाचः समासन् स्वप्नेनिरुक्त्यागृहमेधिसौख्यंनयस्यहेयानुमितंस्वयं
स्यात् ३ यावन्मनोरजसापुरुषस्यसत्वेनवातमसावानुरुद्धं चेतोभिराकूतिभिरातनोतिनिरंकुशंकुशलंचेतरंवा ४
सवासनात्माविषयोपरक्तोगुणप्रवाहोविकृतःषोडशात्मा बिभ्रत्पृथङ्नामभिरूपभेदमंतर्बहिष्ट्वंचपुरैस्तनोति ५
दुःखंसुखंव्यतिरिक्तंचतीव्रंकालोपपन्नंफलमाव्यनक्ति अलिंग्यमायारचितांतरात्मास्वदेहिनंसंसृतिचक्रकूटः ६

नद्दत्यर्थः वासनायुक्तः आत्मोपाधित्वादात्मा अतोविषयैरुपरक्तोनुविद्धः अतोगुणप्रवाहः गुणैरितस्ततश्चाल्यमानः
अतएवविकृतः कामादिरूपपरिणामवान् षोडशात्माषोडशकलासुभूतेंद्रियरूपास्वमुख्यः पृथङ्नामभिःसहपृथग्रूपभे
दंदेवतिर्यगादिरूपंबिभ्रत् अंतर्बहिष्ट्वंतत्कृष्टंनिकृष्टत्वंच पुरैःशरीरैर्देहैःहेतुभूतैस्तनोतिनामभिरित्यत्रैरफलोपदेशोभा
वयार्थः ५ फलंचतदनुरूपंकरोतीत्याह दुःखंसुखंव्यतिरिक्तंचमोहंतीव्रंदुर्निवारंकालप्राप्तंफलंसर्वतोभिव्यनक्तिसृजति
ननुजडः कथंसृजतितत्राह स्वदेहिनमालिंग्यअलिंगनेकारणमाह माययारचितः अंतरात्माजीवोपाधिःउपाधित्वमाह २८
संसृतिचक्रेकूटयतिछलयतीति तथायथाग्रामकूटकइति ६ श्रीः

671
1981

एवमयंमनोबंधनः संसारोजीवफलतीत्याह तावानिति आविःप्रकाशमानः सदाक्षेत्रज्ञस्यसाक्ष्यः दृश्योभवतिस्थू
लसूक्ष्मः जाग्रत्स्वप्नरूपः मनसः संसारहेतुत्वमुपसंहरन्मोक्षस्यापितदेवकारणमित्याह तस्मादिति अदोमनः
लिंगकारणं गुणत्वंगुणाभिमानित्वमगुणत्वंतद्राहित्यंतदेवपरमवरंचतस्य ७ कथमेकमेवविलक्षणयोःकारण

तावानयंव्यवहारःसदाविःक्षेत्रज्ञसाक्ष्योभवतिस्थूलसूक्ष्मः तस्मान्मनोलिंगमदोवदंतिगुणागुणत्व
स्यपरावरस्य ७ गुणानुरक्तंविषयायजंतोःक्षेमायनैर्गुण्यमथोमनस्यात् यथाप्रदीपोघृतवर्तिमश्नन्
शिखाःसधूमाः भजतिह्यन्यदास्वं ८ पदंतथागुणकर्मानुबद्धंवृत्तीर्मनःश्रयतेन्यत्रतत्वं एकादशा
सन्मनसोहिवृत्तयआकूतयःपंचधियोभिमानः ९ मात्राणिकर्माणिपुरंचतासांवदंतिहैकादशवीर
भूमीः गंधाकृतिस्पर्शरसश्रवांसिविसर्गरत्यर्तिभिजल्पशल्याः १०

अवस्थाभेदादित्याह गुणेति नैर्गुण्यंमथोमननिर्गुणंअथोइति कार्त्स्न्येनदृष्टांतेनस्पष्टयति यथेति अन्यदानुपल
क्ष्यस्वपदंशुक्लंभास्वररूपंमहाभूतात्मत्वंवा ८ अन्यत्रअन्यदा द्वितीयंदर्शयति एकादशवृत्तयआसन् आकूतयःक्रि
याकाराःपंचधियश्चज्ञानाकाराःपंचाभिमानश्चेति ९ हेवीर भूमिःविषयान्विषयानेवाह गंधादयःपंचज्ञानेंद्रिय
ग्राह्यावृत्तीनांविषयाःरतिःसंभोगःआर्तिर्गतिः १०

भा०
२९

पं०

पुरुषस्याभिमानविषयत्वप्रकारमाह एकादशापुरःस्वीक्रियतइतिस्वीकरणं अयमर्थः शरीरमभिमानस्यनहियत
यागंधादिवद्विषयः नापिकार्यतयाविसर्गादिवत्किंतुममेति भोगायतनत्वेनस्वीकार्यतयाविषयइति एकतुविव
क्तिनामेववपुरंममत्वाभिमानविषयः नमहानां अतोमरुद्दस्या अहं अहंकारंद्वादशांवस्त्येतरत्वाङ्कः तस्यचपुरमेव
शय्यासंज्ञंद्वादशविषयमाङ्कः तत्रहिजीवोहंकारेणैवोत यतः पुरिशयनात्पुरुषइतिउच्यते तासांवृत्तीनामवांत
रभेदेरानंत्यमाह द्रव्याणिविषयाः स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टंकालः क्षोभकः तेर्निमित्तभ

एकादशांस्वीकारणंममेतिशय्यामहद्वादशमेकआङ्कः द्रव्यस्वभावाशयकर्मकालैरेकादशामीमनसोवि
काराः ११ सहस्रशः शतशः कोटिशश्चक्षेत्रज्ञतोनमिथोनस्वतस्युः क्षेत्रज्ञएतामनसोविभूतिर्जी
वस्यमायारचितस्यनित्याः १२

तैः ११ प्रथमंशतशः सहस्रशः ततः कोटिशस्युः नतुमिथःस्युः नचस्वतः किंतुक्षेत्रज्ञतःपरमेश्वरात् तस्यचाने
कशक्तित्वात् अनंताःस्युरित्यर्थः यद्वातासांमिथ्यात्वमनोच्यते अतोकोटिशोभवंत्यस्ताः क्षेत्रज्ञतएवस्युः तन्मन्तयैव
सतोलभस्त्रनतुमिथोनचस्वतइति यद्वाक्षेत्रज्ञोजीवस्तस्मात्स्युः तस्याविकारित्वात् नमिथः तेरतराश्रयापत्तेःन
स्वतः आत्माश्रयत्वापत्तेः अतोमिथ्याभूताः एवेति तदेवंश्लोकत्रयेगुणकर्मानुबद्धंमनोवृत्तीःश्रयतइतियदुक्तंतत्प्रपंचि
तंअन्यदाततं श्रयतइतियदुक्तं तत्स्वतत्वमाह क्षेत्रज्ञइति जीवस्यजीवोपाधेःअविशुद्धकर्तुर्मनसः नित्याःप्रवाहरूपेणानवछिन्नाः १२

आग्रत्स्वप्नयोपिआविर्भूताः पश्यति क्वापिसुषुप्तौतिरोभूताः पश्यति अवस्थात्रयसाक्षीक्षेत्रज्ञः आत्मतत्त्वमित्यर्थः क्षेत्रज्ञा
द्विविधः त्वंपदार्थोजीवः तत्पदार्थईश्वरश्च तत्राद्यानिरूपितः इदानींतस्याप्यमीश्वरंनिरूपयति क्षेत्रज्ञआत्माव्यापी
पुराणोजगत्कारणभूतः पुरुषः पूर्णः साक्षादपरोक्षस्वयंज्योतिः ननुज्ञानविषयत्वेनवापरोक्षः अतोजन्मादिशू
न्यः परेषांब्रह्मादीनामपिईशः १३ नारंजीवसमूहः सः अयनंयस्यनियंतुभगवानैश्वर्यादिषड्गुणवान् वासुदेवः सर्वाश्र
तानामाश्रयः स्वाधीनयामायया आत्मनिजीव अवधीयमानः अवस्थाप्यमानः कर्मकर्तरिप्रयोगः तंनियंतृत्वेनवर्तमान

आविर्हिताःक्वापितिरोहिताश्चशुद्धोविचष्टेह्यविशुद्धकर्तुः क्षेत्रज्ञआत्मापुरुषः पुराणसाक्षात्स्वयंज्योति
रजःपरेशः १३ नारायणोभगवान्वासुदेवस्वमाययात्मन्यवधीयमानः यथानिलःस्थावरजंगमानांआत्म
स्वरूपेणनिविष्टईशेत १४ एवंपरोभगवान्वासुदेवः क्षेत्रज्ञआत्मेदमनुप्रविष्टः १५ नयावदेतांतनुभृ
न्नरेंद्रविधूयमायांवयुनोदयेन विमुक्तसंगोजितषट्सपत्नोवेदात्मतत्त्वंभ्रमतीहतावत् १६ नयावदेतन्म
नआत्मलिंगंसंसारतापावपनंजनस्य यच्छोकमोहामयरागलोभवैरानुबंधंममतांविधत्ते १७ भ्रमत

इत्यर्थः एतत्सदृष्टांतमाह यथेति आत्मस्वरूपेणप्राणरूपेणईशेतनियमयति १४ इदंविश्वंअनुप्रविष्टः १५ तदेवमात्मा
त्मनः शुद्धत्वंसंसारस्यमिथ्यात्वंप्रदर्श्यतन्निवृत्तिमाह ननुभृत्देहीवयुनोदयेनज्ञानोदयेनज्ञानासत्याययावन्मायां
विधूयात्मतत्त्वंनवेदतावदिहभ्रमति १६ यावच्चविषयानुरक्तंमनएवानर्थहेतुरितिनवेदतावन्निर्वेदाभावात्परि
भ्रमत्येवेत्याह नेति आत्मनोलिंगमुपाधिभूतंमनः संसारतापानामावपनंक्षेत्रंयावन्नवेदतावद्भ्रमतीत्यनुषंगः
तापावपनत्वेहेतुः यन्मनः शोकाद्यनुबंधंममतांचविधत्ते १७ ७ ७ ७

६७३
१९८१

भा० तस्मात् ज्ञानखड्गेन अध्येधितं संदृढं स्वयं व्यलीकं मिथ्याभूतं तं तथाप्यात्मानमुक्तातीतितिनथातं गुरुरेव हरिस्तस्य पं०
चरणोपासनमेव अस्त्रं यस्य तथाभूतः सन् उद्धिघातय १८ इतिश्रीभागवते पंचमस्कंधे टीकायां एकादशोध्यायः
३० द्वादशे पुनरारुः संदेहेन महीभृता सयोगी सर्वदेहानपानुददितीर्यते १ कारणमीश्वरः तस्य वलोकरक्षणार्थोवि
ग्रहो देहो यस्य स्वरूपेण परमानंदप्रकाशरूपेण तुच्छीकृतो विग्रहो येन हे अवधूत योगेश्वर द्विजबंधुलिंगेन वेषेण नि

भ्रातृव्यमेनं तदरभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममो
षं १८ इतिश्रीभागवते महापुराणे पंचमस्कंधे एकादशोध्यायः ११ रहूगण उवाच नमो नमः कारणवि
ग्रहाय स्वरूपतुच्छीकृतविग्रहाय नमोवधूत द्विजबंधुलिंगनिगूढनित्यानुभवाय तुभ्यं १ ज्वरामयार्तस्य
यथागदं सत् निदाघदग्धस्य यथा हिमांभः कुदेहमानाहिविनष्टदृष्टेर्ब्रह्मन्वचस्तेमृतमौषधं मे २ तस्माद्
भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधं अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलं चेतसो मे ३

गूढो नित्यानुभवो येन तस्मै नमः १ विशेषतः प्रवृत्त ह्यायमस्मिन्निति ज्वरस्वामयो रोगः तेनार्त्तस्य यथासत्
स्वादु आगदमौषधं यथा च निदाघेन दग्धस्य संतप्तस्य हिमांभः शीतलमुदकं गंगोदकं वा तथाहि अहं नकुत्सितेदे
हे यामानः अहंकारः स एव अहिः तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तदेवं वचः अमृततुल्यमौ ३०
षधं २ मम संशयो विभ्रम अर्थं पश्चात् प्रक्ष्यामि अधुना तावत् तदुक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्बोधं सुबो
धं यथा भवत्येवं व्याख्याहि कौतूहलमुत्कं चेतो यस्य तस्य मम ३ ७ ७ ७

675
1981

त्वयादितं विभ्रव्यक्तमविमलब्धमित्यादिना भारवाहादिक्रिया च तत्फलं च श्रमादि तत्तस्य साक्षादिभिर्दृश्यमानं सत् अबाधित
मपि व्यवहारमूलं यद्वा सतः अबाधितव्यवहारस्य मूलं कारणमपि नह्यंजसा तत्त्वविमर्शनाय सम्मितिं भवान्यत आह
अमुष्मिन्नर्थे मे मनो भ्रमति ४ अबाधितत्वमसिद्धमित्याह हे पार्थिव यः पार्थिवो विकारः स एव कस्य हेतोः कस्माच्चिका
रणात्पृथिव्यां चलन् अयं भारवाहकादिर्जनो नाम प्रसिद्धः यस्तत्र चलति स पाषाणादिरित्येतानेव भेदः तस्य च तत्र उत्ता
भारः श्रमश्च किंच भवेदेवं यदि श्रमस्याश्रयो निरूप्येत न त्वेतदस्ति अवयवव्यतिरेकेण श्रमास्य दृस्यावयविनो निरूपणा
दित्याशयेनाह तस्यापि पृथ्वीविकारस्यापि अंघ्र्योः अधि उपरि गुल्फादयः उसस्सलोपः आर्षः ५ शिबिकायामप्यव

यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलं नह्यंजसा तत्त्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे ४ ब्रा
ह्मण उवाच अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः तस्यापि चांघ्र्योरधि गुल्फजंघाजानूरु
मध्योरुशिरोधरांसाः ५ अंसेधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते यस्मिन्भवान्रूढनिजाभिमा
नो राजास्मि सिंधुष्विति दुर्मदांधः ६ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्या निगृह्णन्निरनुग्रहोसि जनस्य गोप्तास्मि वि
कत्थमानो न शोभसे वृद्धसभासु धृष्टः ७ यदा क्षिताववचराचरस्य विदाम निष्ठां प्रभवं च नित्यं तन्नामतोन्यद्व्य
वहारमूलं निरूप्यतां सत्क्रिययानुमेयं

यवीनास्ति तदाह यस्यां अयं पिंड आस्ते किं लक्षणः सौवीरराज इत्यपदेशो नाम
मात्रं यस्य स पार्थिवो विकार आस्ते राजेति संधिरार्षः यस्मिन् भवान् निरूढात्माभिमानः सिंधुषु राजास्मीति दुर्मदेनांधः सन् ६
शोच्यान्निर्विष्ट्या निगृह्णन् निष्करुणो वर्त्तसे अतोस्मि व्यथ गोप्तास्मीति श्लाघमानो महतां सभासु न शोभसे यतो धृष्टः ७
न चानंतरोत्तरावयवभारः पूर्वापूर्वावयवानां भवेदिति वाच्यं तेषामप्यनिरूपणादित्याशयेनाह यदेति निष्ठां नाशं प्रभवमु
त्पत्तिं विदाम विद्मः तत् तदा क्षितेरन्यस्य विकारस्याभावात् नाममात्रादन्यत् व्यवहारस्य मूलं कारणं अर्थक्रियया सादि
त्यनुमेयं निरूप्यतां तथा च श्रुतिः वाचारंभणं विकारो नामधेयं मृत्तिकेव सत्यमिति ८ श्रीः ७ श्रीः

भा० नहिक्षितेः सत्यतास्यात्तत्राह एवंक्षितिशब्दस्यापिवृत्तं वर्तनं अर्थंविनैवनिरुक्तं यद्वा क्षितिशब्दस्यवृत्तंयस्मिन्नतदपिमिथ्यात्वेननि पं०
रुक्तमित्यर्थः कुतः असत्कसूक्ष्मेषुपरमाणुषुसत्कारणभूतेषुनिधानात् विलयात् अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः प
३१ रमाणवस्तर्हिसत्याःस्युः तत्राह तेमनसाकार्यानुपपत्त्यादिभिः कल्पिताः कल्पनाबीजमाह एषांसमूहेनविशेषकृतः तेषां
समूहेषुघटबुध्यालंबनमित्यर्थः अवयविनानिरस्तत्वात्समूहग्रहणं तथापिसत्याःस्युः न अविद्ययाप्रपंचस्यभगवन्मायावि
लसितत्वादज्ञानेनकल्पिताः ९ एवंयदपिकृशत्वादिधर्मकंबुध्याप्रतीतं द्वितीयंद्वैतंद्रव्यादिनाम्नाउपलक्षितं यातयामाययात्वेन

एवंनिरुक्तंक्षितिशब्दवृत्तमसन्निधानात्परमाणवोये अविद्ययामनसाकल्पितास्तेयेषांसमूहेनकृतोविशेषः ९ एवं
कृशंस्थूलमणुर्बृहद्यदसच्चसज्जीवमजीवमन्यत् द्रव्यस्वभावाशयकालकर्मनाम्नाजयावेहिकृतंद्वितीयं १० ज्ञानं
विशुद्धंपरमार्थमेकमनंतरंत्वबहिर्ब्रह्मसत्यं प्रत्यक्प्रशांतंभगवच्छब्दसंज्ञं यद्वासुदेवंकवयोवदंति ११ रहूगणैतत्त
पसानयातिनचेज्ययानिर्वपणाद्गृहाद्वा नच्छंदसानैवजलाग्निसूर्यैर्विनामहत्पादरजोभिषेकं १२ श्रीकृष्ण

मेवेहि तत्रकृशंह्रस्वं स्थूलंतत्प्रतियोगि अणुबृहतोःपृथगुपादानात् असत्कारणंसत्कार्यंजीवंचेतनं अजीवंजडं १० त
र्हिकिंसत्यंतदाह ज्ञानंसत्यं व्यवहारिकसत्यत्वंव्यावर्तयतिपरमार्थंरत्नेर्ज्ञानव्यवच्छेदार्थानिषट्विशेषणानि विशुद्धंतत्तु अ
विद्यकं एकंतत्तुनानारूपं अनंतरंत्वबहिःबाह्याभ्यंतरशून्यं तत्तुविपरीतं ब्रह्मपरिपूर्णं तत्तुपरिछिन्नंप्रत्यक् तत्तुविषयाकार
प्रशांतंनिर्विकारं तदेवंस्वरूपज्ञानंसत्यमित्युक्तं कीदृशंतत् ऐश्वर्यादिषट्गुणत्वेनभगवच्छब्दः संज्ञायस्य यच्चज्ञानंवासुदे
वंवदंति ११ एतस्यापिश्वमहत्सेवांविनानभवतीत्याह हेरहूगण एतज्ज्ञानंतपसापुरुषोनयाति ईज्ययावैदिककर्मणानिर्वपणा ३१
त् अन्नादिसंविभागेनगृहाद्वा तन्निमित्तपरोपकारैः छंदसावेदाभ्यासेनजलाग्न्यादिभिरुपासितैः १२ श्रीगोपालकृष्ण

6417/1981

१३
महत्सेवायास्तत्प्राप्त्युपायतामाह यत्रयेषुमहत्सु ग्राम्यकथनस्यविघातोयस्मात् विषयसंगस्तत्कथाप्रसंगः कइतिवदन्नकस्त्वंनिरु
हस्वरसीतिप्रश्नोत्तरमाह अहमितिद्वाभ्यां विमुक्तोदृष्टश्रुताभ्यां संगानिमित्तोबंधोयेन हत अर्थः प्रयोजनंयस्य १४ श्री
कृष्णार्चनंप्रष्टमप्युद्धरतीत्याह सेतिजगत्संगात्त्विशंकमानः अविवृतः अप्रकटः १५ असंगेमहद्भिः यःकृतसंगस्तेनज्ञानं
ज्ञानमेवासिस्तेनाछिन्नमोहः सन् अध्वनः संसारमार्गस्य अतिशयितेअपंपारंहरिंयाति यद्वापारमतिक्रम्यहरिंयाति अतिपति

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयतेग्राम्यकथाविघातः निषेव्यमाणोनुदिनंमुमुक्षोर्मतिंसतींयछतिवासुदेवे १३ अ
हंपुराभरतोनामराजाविमुक्तदृष्टश्रुतसंगबंधः आराधनंभगवतईहमानोमृगोभवंमृगसंगाद्धतार्थः १४ सामांस्मृ
तिर्मृगदेहेपिवीरकृष्णार्चनप्रभवानोजहाति अथो अहंजनसंगादसंगोविशंकमानोविवृतश्चरामि १५ तस्मान्नरो
संगसुसंगजातज्ञानासिनेहेवविवृक्णमोहः हरिंतदीहाकथनश्रुतिभ्यांलब्धस्मृतिर्यात्यतिपारमध्वनः १६ इ
तिश्रीभागवतेमहापुराणे पंचमस्कंधेब्राह्मणरहूगणसंवादेद्वादशोध्यायः १२ ब्राह्मणउवाच दुरत्ययेध्व
न्यजयानिवेशितोरजस्तमःसत्वविभक्तकर्मदृक् सएषसार्थोर्थपरः परिभ्रमन्भवाटवींयातिनशर्मविंदति १

कृमणेचेति कर्मप्रवचनीयत्वात् द्वितीया तस्यहरेरीहानांकथनंश्रुतिभ्यांलब्धास्मृतिर्येनसः १६ इतिश्रीभागवते
पंचमस्कंधेटीकायांद्वादशोध्यायः त्रयोदशेविरक्तायाः दृष्टांतनिरूपणं इतिवैराग्यदार्ढ्यायभवाटव्युपवर्ण्यते
अध्वनः पारमित्युक्तं तदेवाध्वानंप्रसिद्धमार्गरूपंवैराग्यायप्रपंचयति दुरत्ययेदुस्तरं अध्वनिप्रवृत्तिमार्गे रजस्तमःसत्वैर्वि
भक्तानिकर्माणिकार्यतयापश्यतीति तथासएषःप्रसिद्धःसार्थोजीवसमूहःस्वार्थसन्यथावणिक्सार्थोर्थार्जनायगच्छन्
अटवींयातितद्वत् १

भा० अस्याध्यायस्य व्याख्यानरूप उत्तराध्यायोस्ति तथापि सुखप्रतिपत्तये किंचिद्व्याख्यायते यस्यां भवाट्व्यां इमे इंद्रियनामानः पं०
षट् दस्यवः चोराः कुत्सितो नायकः सारथिबुद्धिर्यस्य तं सार्थं विलुंपंति तस्य धर्मं धनमुपभोगेन मुष्णंतीत्यर्थः गोमायवः शृ
३२ गालतुल्या दारापत्यादयः तं मे मर्त्यशिने स्वैवं प्रविश्य प्रमत्तं सार्थिकं सार्थिकस्थितं हरंति इतस्ततः आकर्षंति उरणं मेषं २ वीरुधा
लतात्तृणानि गुल्मानि चालतादिजालानि प्रभूतैरेतैः गह्वरे दुःप्रवेशे तत्र क्रूरैः स्त्रीभिर्दंशैः मक्षिकाविशेषैः मशकैः स्वनकथाक
स्त्रिउपद्रुतो भवति एवं कामधर्मादिभिर्गह्वरे गृहाश्रमे वर्त्तमानो दुर्जनैरुपद्रुतो भवतीत्यर्थः गंधर्वपुरवद्घटमानमेव देहा
दिकं प्रकर्षेण सत्यमेवेदमिति पश्यति क्वचित् क्वचित् क्वापि क्वापि आशुरयः अतिवेग उल्मुकाकारो ग्रहः पिशाचः तत्तुल्यं

यस्यामिमे षट् नरदेवस्यवः सार्थं विलुंपंति कुनायकं बलात् गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोर
णं वृकाः २ प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुर
योल्मुकग्रहं ३ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्यां क्वचिच्च वात्योत्थितपांसुधूम्रा दि
शो न जानाति रजस्वलाक्षः ४ अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितांतरात्मा अपुण्यवृक्षान् श्रय
ते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ५ ७ ७ ७

सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः निवासादिष्वात्मास्वभावो यस्याः सा बुद्धिर्यस्य सः ततस्ततो धावतीत्यक्षमपत्रतावा
नेवार्थः वात्याचक्रवातः तस्यामुत्थितः पांसुस्तेन धूम्रा दिशः रजस्वले रजोव्याप्ते अक्षिणी यस्य यथा न जानाति तथा वात्ये
व प्रमदा तीया स्त्री तस्यामुद्धतै रागादिभिः अप्रकाशमाना दिग्देवताः कर्मसाक्षिभूताः न जानातीत्यर्थः ४ अदृश्या
नां झिल्लिनां भृंगारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलं व्यथा यस्य उलूकाः घूकास्तेषां वाग्भिः व्यथितः अंतरा ३२
त्मा मनो यस्य अत्र च परोक्षप्रियवक्तारो झिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारो घूकतुल्याः एषां छायापिपासे हेतुः ते अपु
ण्यवृक्षास्तत्तुल्यान् धार्मिकान् सेवते मरीचितोयानि तानि निष्फलत्वेन विज्ञातामपि विषयान् ५ श्रीः ७

6/79
1981

चितोयाक्षसरित्क्व अभियाति तत्र गात्रभंगात् सद्योऽदःखं भवति न चोरकलापः ताद्दृदि हृत्परत्रेच दुःखदान् पारवेडान
भियाति अलषते दायादादिभ्यो न्नादि वाञ्छति उभयत्रापि सम्प्यवार्थः दावदावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो
निर्विद्यते विषीदति तत्र च यत्र राक्षसतुल्यै राजभिः हृतं असकृत् प्रभूतधनं यस्य सनिर्विद्यते ६ अन्यैश्च शूरैः हृतस्ववित्तं
यस्य निर्विण्णं विषण्णं चेतो यस्य सः कश्मलं मूर्च्छां गंधर्वपुरमिव मनोरथोपगतैः पितृपुत्रादिसमानं प्रविष्टः सन् ७ कंटका
दिविद्धांघ्रिरिव विभ्ररक्तिभृतः सन् नगतुल्यं महत्कर्म आरोढुं कर्तुमिच्छु र्विमना इव आस्ते पदे पदे क्षणे क्षणे अभ्यंतरवह्नि

क्वचिद् द्वितोयाः सरितोभियाति परस्परं चालषते निरंधः आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ६
शूरैर्हृतस्वः क्व निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलं क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृत्तवन्मुहूर्तं
७ चलन्क्वचित्कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमना इवास्ते पदे पदेऽभ्यंतरवह्निनार्दितः कौटुंबिकः क्रुध्यति वै जनाय ८
क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः दष्टः स्म शेते क्व च दंदशूकैरंधोऽधकूपे पतितस्तमिस्रे
९ कर्हिस्म चित्क्षुद्ररसान्विचिन्वन् तन्मक्षिकाभिर्व्यथितो विमानः तत्रातिकृच्छ्रात् प्रतिलब्धमानो बलाद्विलुंपंत्यथ तं त
तोऽन्ये १० क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृच्छत्यत वित्तशाठ्यात् १२

ग ज्वाहरेण ८ अजगराहिना निद्रारूपेण गिलितो लीनो वेति विपिने त्यक्तः शाव इव दंदशूकैः हिंस्रैः दुर्जनैः दष्टः पीडितः अंधो लु
प्तविवेकः अंधकूपे मोहे पतितः तमिस्रे दुःखे शेते लीयते ९ क्षुद्ररसान् परयोषादीन् विचिन्वन् गवेषयन् तन्मक्षिकाभि
र्योषादिस्वामिभिः व्यथितः पीडितो विमानः अवज्ञातः ताडितः सन् व्यथितो भवति यदि कथंचित्तत्रापि क्लेशेन प्रतिलब्धमा
न्मांशस्तयोषादिर्भवति तदा बलाद् अन्येऽपहरंति तान् यदा भियुक्ते तदा ततोऽप्यन्ये हरंति १० यत्किंचित् अत्यल्पमपि मिथोऽन्य
वहरन् क्रयविक्रयादिना गृण्हन् वित्तशाठ्यात् धनवंचनात् ११
व

भा० राज्याद्विहीनः आस्यतेस्मिन्निति आसनंकेवलादिस्थियतेत्रेतिस्थानंगृहं विहरत्यनेनेति विहारोयानादि याचमानोपिच पं०
यदापरस्मादप्राप्तकामः तदापरकीयेवस्तुनिदृष्टिरभिलाषोयस्यासोपमानंप्राप्नोति १२ एवमन्योन्यंवित्तव्यतिषंगेणधन
३३ विनिमयेनविवृद्धोवैरानुबंधोयस्यतथाविधोपिपरस्परंविवहन्विवाहादिसंबंधंकुर्वन्उरुभिःकृच्छ्रैःश्रमैः। वित्तबाधः
उपसर्गैःश्चेद्रयादिभिर्विपन्नःमृतप्रायोभवति १३ दुरत्ययत्वमध्वनोदर्शयतिरतांस्तान्विपन्नान्मृतान्विहायजातं
परिगृह्यविहरन्यतःप्रस्थितःतंप्रतिनावर्त्तते हेवीरअध्वनःपारंयोगस्तंचनापेयति अत्रमार्थः कश्चित्अतिसमर्थोपि
१४ तदेवाह मनस्विनःशूराःनिर्जितादिग्गजेंद्रायैःममेयंभूर्ममतिद्देयेति भुविनिमित्तभूतायांबद्धवैरायैः तेपिमृधेसंग्रा

क्वचित्कचित्तक्षीणधनस्तत्स्मिन्नाय्यासनस्थानविहारहीनः यावत्परादप्रतिरीलब्धकामःपारक्यदृष्टि
र्लभतेचमानं १२ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधोविवहन्मिथश्च अध्वन्यनुष्मिन्नुरुकृच्छ्रवित्तबा
धोपसर्गैर्विहरन्विपन्नः १३ तांस्तान्विपन्नान्सहितत्रतत्रविहायजातंपरिगृह्यसार्थः आवर्त्ततेद्यापि
नकश्चिदत्रवीराध्वनःपारमुपैतियोगं १४ मनस्विनोनिर्जितदिग्गजेंद्राममेतिसर्वेभुविबद्धवैराः मृधेश
यीरन्ननतुतद्व्रजंतियन्यस्तदंडोगतवैरोभियाति १५ प्रसज्जतिक्वापिलताभुजाश्रयस्तदाश्रयाव्यक्तपदा
द्विजस्पृहः क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यंविधत्तेबककंकगृध्रैः १६ ७ ७

मेशयेरन्प्रतिपक्षबाणक्षुण्णशरीराः ननुतेतद्व्रजंति किंतत्न्यस्तोवा कायमनसांदंडोयेनसःन्यस्तदंडःसन्यासीयद्वि
स्ताःतं१पदमभियातितत्तुनव्रजंति १५ सिंहावलोकनेनपुनर्भवाटवीमेवानुवर्णयति प्रसज्जति आसक्तिंकरोति कीदृशः ३३
लतानांभुजाः शाखाः तद्वत्सुकुमारायेस्त्रीणांभुजाः तदाश्रयःसन्तदाश्रयाअव्यक्तपदाअस्फुटाक्षराकलभाषिणोयेद्वि
जाःपक्षिणस्तत्तुल्येषुस्त्रीसंभ्रमनेष्वपत्येषुस्पृहायस्यतादृशोभवत्वाहरिचक्रसिंहसमूहः ततुल्यात्कालचक्रनिमित्ता
त्जन्ममरणादेःत्रसन्तत्परिहारायकेश्चिल्लोभिनोबकादिवद्दंबकैःक्रूरैश्वपारवंडैसहसख्यंविधत्तेकरोति १६

681
1981

नैवंचितःसन्पुनस्तत्फलासावेशात्तादृशमानांब्राह्मणानांकुलेपुनःप्रविशन्तेषांशीलंआयद्वित्तपर्वके पुनरुपनयनाद्याचारं
अचरोयन्अभिप्रायंपश्यन्वानरतुल्यान्धर्मशचारान्शूद्रप्रायानुपैति तज्जातिरासेनवानरजातिर्क्रीडयास्त्रियामिथुनी
भूयपरस्परमुखवीक्षणनविस्मृतोजीविताविधिर्येन १७ द्रुमवत्केवलदृष्टार्थेषुगृहेषु व्यवायदीनःसन्तत्छायारूपणः
एवंस्वस्ययद्धनंप्राप्तंतस्मिन्निविवृताः एहिकफलोपभोगयोग्यगृहेषुविवशःपरिहृतंभशक्तः पाठांतरंतुवनस्संसारेचरन्नि
स्थर्यः गिरिकंदरवत् अतिभयानकरोगादिदुःखेवतन्कंदरस्थानगजतुल्यात्मत्योभीतः सन्वल्लीतुल्यंप्राचीनकर्मावलं

नैवंचितोद्दंसकुलंसमाविशन्अरोचयञ्छीलमुपैतिवानरान् तज्जातिरासेनसुनिर्वृतेंद्रियःपरस्परोद्वीक्षणवि
स्मृतावधिः १७ द्रुमेषुरंस्यन्सुतदारवत्सलोव्यवायदीनोविवशःस्वबंधने क्वचित्प्रमादाद्गिरिकंदरपतन्वल्लिं
गृहीत्वागजभीतआस्थितः अतःकथंचित्सविमुक्तआपदःपुनश्चसार्थंप्रविशत्यरिंदम अध्वन्यमुष्मिन्नज
यानिवेशितोभ्रमंजनोद्यापिनवेदकश्चन १९ रहूगणत्वमपिह्यध्वनोस्यसन्न्यस्तदंडःकृतभूतमैत्रः अस
ज्जितात्माहरिसेवयाशितज्ञानासिमादायतरातिपारं २० राजोवाच अहोन्जन्माखिलजन्मशोभनं
किंजन्मभिस्त्ववेरैरप्यमुष्मिन् नयद्धृषीकेशयशःकृतात्मनांमहात्मनांवःप्रचुरःसमागमः २१

म्बावस्थितोभवति १८ कथंचितमहताकष्टेनविमुक्तआपदःपुनःसार्थंप्रविशतियथापूर्वंप्रवृत्तिमार्गेएतेनवेदपरमपु
रुषार्थमिति हेरहूगणत्वमपि अध्वनिनिवेशितइत्यनुषंगः अतोस्याध्वनःपारमतितर असज्जितात्माविषयेष्वनभि
निवेशितचितःसन्हरिसेवयाशितेनतीक्ष्णीकृतं २० अखिलजन्मसुशोभनंनृजन्मवपरंश्रेष्ठंयोग्यंदेवादिजन्मभ्यः
नैरपिकिं अमुष्मिन्स्वर्गेपिजन्मभिःकिंनकिंचितयत्तयेषुच जन्मसुयत्र स्वर्गेवाविमहात्मनांसमागमःप्रचुरोनभवति त
श्रीकेशवस्यपशसाकृतःशोधितःआत्मायेषांसमा
गमन २१

भा० सततमुपासितैः त्वत्पादारविन्दरेणुभिर्हतमंहो यस्य तस्याधोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतं यस्य तव मुहूर्तमात्रभावात्सभा पं०
गममात्रादपि दुस्तर्कमूलबद्धमूलोपि मम अविवेको नष्टः २२ ब्रह्मविदः केनरूपेण विचरंतीत्यज्ञानात्सर्वान्नमस्यति नम इति
३४ येबटवो क्रीडारतत्वाद्बालाद्धयथारेयास्तानप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः स्वदर्शनेन राज्ञां महद्वज्ञां संभाव्य आह राज्ञो
शिवमस्तु इति २३ उत्तरामातायस्य हे उत्तरामातः नविगण्यनः अतमंतर्यपि परमकरुणाकरत्वेन सिंधुपतये आत्मतत्व
मुपादिश्य निभृताः शांताः करणानाम् ऊर्मयो यस्मिन्स आत्मा यस्य २४ स्वज्ञानात्तस्मात्सम्यगवगतं परमात्मसतत्वं येन त

नह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेमला मौहूर्तिकाद्यस्य समागमान्मे दुस्तर्कमूलोपहतोपहतो
विवेकः २२ नमो महद्भ्योस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः
शिवमस्तु राज्ञां २३ श्रीशुक० इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मतत्वं विगणयतः परानुभावः प
रमकारुणिकयोपदिश्य रहूगणेन सकरुणमभिवंदितचरणकमलः पूर्णार्णव इव निभृतकरणोर्म्याशयो धरणि
मिमां विचचार २४ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्व आत्मन्यविद्याध्यारोपितां च देहात्ममतिं वि
ससर्ज २५ एवं हि नृप भगवदाश्रिताश्रितानुभावः २६ राजोवाच योहवा इह बहुविदा महाभागवत त्वयाभिहि
तः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाव्युत्पन्नलोकसमधिगमः व्य
थ तदेतद्दुरवगमं समवेतानुकल्प्येन निर्दिश्यतामिति २७ इति श्रीभागवते पंचमस्कंधे त्रयोदशोध्यायः १३

८ थाभूतः स तदानीमेव देहे आत्ममतिं च विससर्ज २५ नृप भगवदाश्रितो रहूगणो यः तस्यानुभावः स योदेहाहंकारस्य
त्यागः २६ परोक्षेण वणिक्सार्थरूपेण आर्याणां विवेकिनां मनीषया दस्युस्थानानींद्रियाणि गोमायुस्थानीयान्यपत्यादी ३१
नि त्येवं कल्पित विषयः अव्युत्पन्नस्य लोकस्य जनस्य सम्यक् अधिगम्यो न भवति अथ अतः तदेव भवाध्वरूपं समवेतानु
कूल्येन प्रस्कंतेन तदनुरूपार्थोपकल्पनेन २७ इति श्रीभावार्थदीपिकायां श्रीधरस्वामिविरचितायां टीकायां पंचमस्कंधे त्रयो०१३

683
1981

चतुर्दशे भवारण्यरूपकव्याकृतिः कृता प्रस्कन्नेतस्य गोमायुमशकाद्यर्थकल्पनं १ यः परिक्षिताप्रष्टः श्रीशुक उवाच
स होवाचेति सूक्तोक्तिः दुरत्यये ध्वन्यजया निवेशित इति यदुक्तं तदेव निवेशनप्रकारकथनेन प्रपंचयति यः एष सिद्धो जीवलोकः
अयं वणिक्समूहो यथा असकृत्गमे ध्वन्यापतितो भवाटवीं गतः सन्नतु हरिरूपस्य गुरोश्चरणारविंदयो मधुकराः सेवकास्तेषां अ
नुपदवीं तदनुष्ठितं भक्तिमार्गमप्राप्य नावरुंधन प्राप्नोतीत्यन्वयः मायायास्वकार्यद्वारेण संसारमार्गपातहेतुत्वमाह देहा
त्ममानिनां सत्वादिगुणविशेषविकल्पितानि विभक्तानि यानि कुशलाकुशलमिमित्रकर्माणि तैर्विनिर्मिताभिर्विविधदे

स होवाच य एष देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदे
हावलिभिर्वियोगसंयोगाद्यनादिसंसारोद्भवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमे ध्वन्यापति
त ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोयं यथा वणिक्सार्थोर्थपरः स्वदेहनिष्पादितकर्मा
नुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरु
चरणारविंदमधुकरानुपदवीमवरुंधे यस्यां य ते षडिंद्रियनामानः कर्मणा दस्यव एव ते २ तद्यथा पुरुषस्य
धनं यत्किंचिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योसौ धर्मस्तं तु सांपराय उदाहरंति
२

हावलिभिर्वियोगसंयोगादिर्योनादिः संसारः तस्य तदुद्भवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन्संसाररूपे दुर्गमार्ग
वदसुगमे ध्वन्यापतितः यथा वणिजां सार्थः समूहः अर्थार्जनपरः स्वदेहनिष्पादितानां कर्मणां फलद्वादस्युतुल्यैरेणा
नुभवो यस्य विफलाश्च बहुप्रतियोगाः बहुविघ्नाश्च ईहाः चेष्टाः यस्य सः यस्यां संसाराटव्यां २ दस्युतुल्यं तेषां कर्मदर्श
यति धर्मौपयिकं धर्मकारणं तमेव स्वामिनं तं धनमाह साक्षादिति तं तु सांपरायं परलोकार्थमुदाहरंति २ ६७

भा०
३५

मोक्षकारणसाधनं यत्किंचिद्धनंतदुम्यंधर्मारव्यंधनं दर्शनाद्याः पंचज्ञानेंद्रियाणांवृत्तयः संकल्पविकल्पावंतः करणस्य स्वै
गृहेर्ग्राम्य उपभोगतः तेनकुनाथस्यकुबुद्धेरजितात्मनोविलुंपंति यथाचोराः कृपालुस्यानवहितात्मनः सार्थस्य धनंहर
तितद्वत् ३ गोमायवोयत्रेतद्व्याचष्टे अथचेति अथचयत्र गोतिरोपन्यासेभा दारापत्यादयः कर्मणातुवृकाः शृगाला
श्व कदर्यस्यातिलुब्धस्य सासतिविभवेदानभोगरहितस्यलुब्धस्यसंरक्षमाणंसम्यक्संरक्षणं मिषतः कदर्यस्यापह
रंतिहि ४ प्रभृतवीरुत्तृणगुल्मगह्वरइत्येतद्व्याचष्टेयथाहीति नदग्धानिबीजानियस्मिन् यद्यस्मात् योयमावसथ

तद्दुम्यंधनंदर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायेगृहग्राम्योपभोगेनकुनाथस्याजितात्मनोय
थासार्थस्यतथाजितात्मनोविलुंपंति ३ अथचयत्रकौटुंबिकादारापत्यादयोनाम्नाकर्मणावृकसृगालतुल्याए ?
वअनिच्छतोपिकदर्यस्यकुटुंबिनउरणकवत्संरक्षमाणंमिषतोपिहरंति ४ यदाह्यनुवत्सरंकृष्यमाणम
प्यदग्धबीजक्षेत्रंपुनरेवावपनकालेगुल्मतृणवीरुद्भिर्गह्वरमिवभवति एवमेवगृहाश्रमः कर्मक्षेत्रंयस्मिन्नहि
कर्माण्युत्सीदंतियदयंकामकरंडएषअवसथः ५ तत्ररतोदंशमशकसमापसदमनुजैःशलभशकुंततस्क
रमूषकादिभिरुपरुध्यमानबहिःप्राणःक्वचित्परिवर्तमानोस्मिन्नध्वनिअविद्याकामकर्मभिरुपरक्तमनसानुपपन्ना
र्थंनरलोकंगंधर्वपुरमुपपन्नमिथ्यादृष्टिरनुपश्यति ६ क्वाचिदातपोदकनिभान्विषयाननुपधावतिपानभोजनव्यवायादि

आश्रमः एषः कामानांकरंडः यथाकर्पूरभाजनेकर्पूरस्यापिपरिमलोनसीयतएवमत्रवासनामर्शाभात्वात्कर्माण्यु
त्सीदंतीत्यर्थः ५ दंशमशकतुल्यरपसदैर्नीचैः शलभादिभिश्चउपरुध्यमानः पीड्यमानाबहिःप्राणाधनंयस्यतथाविधोय
स्मिन्नध्वनिपरिभ्रमन्अविद्यादिभिरुपरक्तमनसागंधर्वपुरतुल्यमघटमानंनरलोकंसत्यतयामिथ्यादृष्टिरनुपश्यति ६ य
पश्यनीप्रशब्दस्य चितमभांतरंदर्शयति यत्रचगंधर्वपुरेक्वचिदातपादकंमरुजलंतत्तुल्यान्विषयाननुपधाविनीति ७

685
1981

क्वचिच्चकचिच्चाशरयोन्मुकअहमिस्येतद्व्याचष्टे क्वचिच्चाशेषाणांनिषदनंस्थानंपुरीषविशेषं अग्नेविशानस्मपुरीषस्यलोहितोव
र्णोयस्यरजोगुणस्येतेननिर्मितविषमामतिर्यस्यसः सुवर्णमुपादातुमिच्छति अग्निकामेनकातरः परवशः उल्मुकसदृशंपिशा
चमिव शीतातुरोअरण्यअग्निवज्ज्वाज्वल्यमानंततस्ततोधावतमुल्मुकंपिशाचमग्निबुध्यानुधावति नतुतंप्राप्नोति कथंविलाप
श्चेत्तर्हितेनप्रसितः सन्म्रियतेएवसुवर्णमनुधावन्नपीत्यर्थः ८ निवासतोयद्रविणेत्येतद्व्याचष्टे अथेति निवासादिष्वनेकेष्वा
त्मनउपजीव्येष्वभिनिवेशोयस्य ९ क्वचिच्चवात्योथितेत्येतद्व्याचष्टे क्वचिच्चेति सक्षकृचित वात्योपम्यया अतिचंचलया आरो
हं अंके आरोपितोविषयसेवासमयेतस्मिन्कालेयद्रजः रागः तेनस्वदृष्ट्यावरकेन रजन्यांरात्रौभृताइवदृक्स्वपाठरजनीभृतस्तमोमय

क्वचिच्चाशेषदोषनिषदनंपुरीषविशेषंतद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातरइवोल्मुकपिशाचं ८
अथकदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेशएतस्यासंसाराटव्यामितस्ततः परिधावति ९ क्वचिच्च
वात्यौपम्ययाप्रमदायारोहमारोपितस्तत्कालरसाजेरजनिभूतजनइवासाधुमर्यादारजस्वलाक्षोदिग्देवताअतिरजस
लमतिर्नविजानाति १० क्वचित्सकृदवगतविषयवैतथ्यः स्वयंपराभिध्यानेनविभ्रंशितस्मृतिस्तयैवमरीचितोयप्रायांस्ता
नेवाभिधावति ११ क्वचिदुलूकझिल्लिस्वनवदतिपरुषरभसाटोपप्रत्यक्षंवारिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः १२

इव अतिवरजसाछन्नमतिः अतएवरजोव्याप्तचक्षुरिवदिक्षुस्थितादिग्देवतासाधुमर्यादातिक्रमसाक्षिभूतादेवतानजानाति १०
अनुपादेयमेवोपादेयतयागृण्हातीतिप्रसक्तंसाजात्यादुत्तरश्लोकचतुर्थपादप्रथमंव्याचष्टे क्वचित्सकृदिति क्वचिदातपो
दकनिभानित्यत्रमिथ्याविषयेषुलंपटत्वमुक्तानिवासतोयेन्यत्रतदर्जनप्रयासउक्तः अत्रतु बाधितेष्वपिपुनः प्रवृत्तिरुच्यत
इत्यपौनरुक्त्यं स्वयमेवसकृदवगतंविषयाणांवैतथ्यंविफलत्वंयेन पराभिध्यानेनदेहाभिनिवेशेनविभ्रंशितास्मृतिर्यस्य तयैवविभ्रं
शितयास्मृत्यास्मृतिभ्रंशादेवेत्यर्थः ११ अस्यझिल्लीस्वनेत्येतद्व्याचष्टे क्वचिदुलूकेति अतिपरुषोरभसः तेनाटोपः संभ्रमोयथाभव
त्येवंरिपूणांराजकुलस्यचनिर्भर्त्सितेन अतिव्यथितंकर्णमूलहृदयंयस्य १२ ८ ५ ७

भा०
३६ अपुण्यदस्थानीत्येतद्व्याचष्टे सयदेति दुग्धमुपभुक्तं उत्साहपूर्वस्थूलंलेपेन तदाकारस्करीविद्यातिद्रुः तन्ममुरवोयेपुण्यद्रुमाः तथा
विशालताश्चविषोदपानाश्च विषकूपाः तत्तुल्यानदृष्टादृष्टप्रयोजनशून्यधनान उपधावतिसेवते १३ क्वचिद्वितोयाः सरितइत्ये ५०
तद्व्याचष्टे एकदाक्वचित असतांप्रसंगात निकृतावंचितामतिर्यस्यसः निरुदकनदीगर्त्तेपातियथासद्यः शिरः स्फुटति पश्चादपितद्दद
नानुवर्त्तते एवमिहचपरत्रचदुःखदंपारखंडं १४ परस्परंचालयतीनिरंधइत्येतद्व्याचष्टे यदात्विति अंधः आत्मनेनाप्रणमतिनोपति
ष्ठतिपितृपुत्राणांबर्हिः कुत्रातद्धतः पितुः पुत्राणांवाकुशादितृणमात्रमपियेषुपश्यतितान्भक्षयतीबाधतइत्यर्थः पितृपुत्रब

सयदापूर्वस्थूलतस्तदाकारस्करकाकतुंडापुष्पद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान्जीवन्मृतान्स्वयंजी
वन्म्रियमाणउपधावति १३ एकदासत्प्रसंगात्निकृतमतिर्निरुदकस्रोतस्ततस्खलनवदुभयतोपिदुःखदंपाखंडंम
भियाति १४ यदातुपरबाधयांध आत्मनेनोयनमतितदाहिपितृपुत्रबर्हिष्मतः पितृपुत्रान्वासरवलुभक्षयति
१५ क्वचिदासाद्यगृहदाववत्प्रियार्थमधुरमसृखोदर्कशोकाग्निनादह्यमानोभृशं निर्वेदमुपगच्छति १६ क्वचित्का
लविषमितराजकुलरक्षसापहृतप्रियतमधुनासुः प्रमृतकइव विगतजीवलक्षण आस्ते १७ कदाचिन्मनोरथो
पगतपितृपितामहाद्यसत्सदितिस्वप्ननिर्वृत्तिलक्षणमनुभवति १८

बर्हिष्मानितिनुपाठः सुगमः ततन्गृह्णाति बर्हिष्मान्भृत्यान्भक्षयतितान्पीडयतिद्रव्यापहरणेन १५ असाद्यदेवमित
द्व्याचष्टे क्वचिदासाद्येति १६ क्वचेचक्षैर्हृतासुमित्येतद्व्याचष्टे क्वचित्कालेनविषमितंप्रतिकूलतांनीतंयद्राजकुलंतदेवरक्ष
स्तेन अपहृताः प्रियतमधनरूपाः असवोयस्य विगतानिजीवलक्षणानिहर्षादीनियस्य मृतइत्यर्थः इत्यध्यनेनैवव्याख्यातं १७
क्वचिच्चगंधर्वपुरंप्रविष्टइत्येतद्व्याचष्टे कदाचिन्मनोरथप्राप्तपित्रादि असदेवसदितिमत्वा निर्वृतिंप्राप्नोतिपूर्वंगंधर्वपुरव ३६
दघटमानदर्शनमुक्तं इदानींतन्निमित्तसुखासक्तिरुच्यतइतिभेदः १८

687/1781

चलन्क्वचिदित्येतद्व्याचष्टे क्वचित्गृहाश्रमेयाः कर्मचोदनास्तासामतिभरोतिविस्तारः सएवगिरिस्तमारुक्षन्तदंतंगंतुमिच्छन् १९
पदेपदेभ्यंतरवन्हिनेतिव्याचष्टे क्वचिन्दुःसहेनेति २० क्वचिन्निगीर्णइत्येतद्व्याचष्टेसएवेति २१ दष्टः स्मक्वापि तइत्येतद्व्याच
ष्टे कदाचिदिति मानोगर्वएवदंष्ट्रापरपीडाकरत्वात् भग्नामानदंष्ट्रायस्य अतएवनलब्धोनिद्रायाः क्षणोपियेन अंधकूपेअं
धवत्पतति २२ कर्हिस्मचित्क्षुद्र सानित्येतद्व्याचष्टे कर्हिस्मकाममधुलवानिति यदानिर्दितोभवतितदासएवनिरये प

क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणोलोकव्यसनकर्षितमनाः कंटकशर्कराक्षेत्रंप्रविशन्निवसीदति १९
क्वचिद्दुःसहेनकायाभ्यंतरवन्हिनागृहीतसारः स्वकुटुंबायक्रुध्यति २० सएवपुनर्निद्राजगरगृहीतोंधेतमसिम
ग्नः शून्यारण्यइवशेतेनान्यत्किंचनवेदशवइवापविद्धः २१ कदाचिद्भग्नमानदंष्ट्रोदुर्जनदंदशूकैरलब्धनिद्राक्षणो
व्यथितहृदयेनानुक्षीयमाणविज्ञानोंधकूपेंधवत्पतति २२ कर्हिस्मचित्काममधुलवान्विचिन्वन्यदापरदारपरद्र
व्याण्यवरुंधानोराज्ञास्वामिभिर्वानिहतः पतत्यपारेनिरये २३ अथचतस्मादुभयथापिहिकर्माऽस्मिन्नात्मनः संसारावपन
मुदाहरंति २४ मुक्तस्ततोयदिबंधाद्देवदत्तउपच्छिन्नतितस्मादपिविष्णुमित्रइत्यनवस्थितिः २५ क्वचिच्चशीतवाता
द्यनेकाधिदैविकभौतिकात्मीयानांदशानांप्रतिनिवारणेऽकल्पोदुरंतचिंतयाविषण्णआस्ते २६ श्रीजयराम

तति २३ प्रसंगात्प्रवृत्तस्यकर्मणः संसारहेतुत्वंस्फुटयति अथचेति यस्मादेवं अथअनंतरमेवउभयथाइहपरत्रच अ
स्मिन्प्रवृत्तिमार्गेसंसारस्यावपनंजन्मक्षेत्रंकर्मउदाहरंति २४ तत्रानिरूढंप्रतिलब्धमानइत्येतद्व्याचष्टे मुक्तइति यदिबंधान्मु
क्तोभवतितर्हितनतः सकाशात् अन्योहरति तस्मादप्यन्यः नत्वसौभोक्तुंलभतइत्यर्थः २५ क्वचिच्चशीतातपतपेंतद्व्याचष्टे क्व
चिच्चेति शीतादयोनेकाआधिदैविकाद्याद्याःदशाःदुःखावस्थास्तासांनिवारणेयदाअसमर्थःतदादुरंतचिंतयाविषण्णमूर्छितइवास्ते २६

भा०

क्वचिन्मिथइत्येतद्व्याचष्टे क्वचिन्मिथोपात्किंचिद्धनंव्यवहरन् काकिणिकामात्रंविंशतिकपर्दकमात्रंततोपिन्यूनंयत्किंचि पं०
५७ दपहरन्विद्वेषमेति २७ अधन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्यन्त्यानुपसर्गान्प्रपंचयति अधन्यमुष्मिन्नुरुकृ
च्छ्रवित्तबाधादयः तथासुखदुःखादयश्च व्युत्क्रमेः पुनरुक्तैस्तैर्नानापाठैरतःपरं दुर्गमोपिभवाध्यायसंग्रहस्येनवर्ण्यतेतत्र

क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमन्येभ्योवाकाकिणिकामात्रमप्यपहरन्यत्किंचिद्वाविद्वेषमेतिवित्तशा
ठ्यात् २७ अधन्यमुष्मिन्निमउपसर्गास्तथासुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलो
भमात्सर्येर्ष्यमाणनक्षुत्पिपासाधिव्याधिजन्ममरणादयः २८ क्वापिदेवमाययास्त्रियाभुजलतोपगूढः
प्रस्कन्नविवेकविज्ञानोयद्विहारगृहारंभाकुलहृदयः २९ तदाश्रयावसक्तस्तत्कृततद्दुहितृकलत्रभा
षितावलोकविचेष्टितोपहृतहृदय आत्मानमजितात्मा अपारेंधतमसिप्रहिणोति ३० श्रीगोपाळ०

प्रसज्जतिक्वापीत्यादिनासिंहावलोकनन्यायेनोक्तमर्थमपकृष्यन्क्रमेणव्याचष्टे क्वापिदेवमाययेति प्रस्कन्नमप
गतंविवेकविज्ञानंयस्य यस्याः स्त्रियाविहारगृहंक्रीडागृहं तदारंभआकुलंहृदयंयस्य अनेनप्रसज्जतीतिव्याख्या
तं २९ तदाश्रयेत्यादिव्याचष्टे तस्याश्रयेवसक्ताः संलग्नाः सुतदुहितरश्च कलत्रंचसैवस्त्रीतेषांभाषितादिभि
रुपहृतंहृदयंयस्यसआत्मानं अंधेतमसिप्रहिणोतिप्रक्षिपति ३० श्रीगोपाळ कृष्ण प्रसन्न ७ २०

689
1981

क्वचित्कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे कदाचिदीश्वरस्येति परमाण्वादिर्द्विपरार्द्धोपवर्गोंतः देवोपलक्षणंयस्यतस्मात्
कालोपलक्षणादितिपृथक्पदत्वेनपाठेकालस्वरूपादित्यर्थः रहंसाउगीभ्रेणापरिवर्त्तितेनपरिभ्रमणेनवयसाबाल्यादिक्रमेणब्र
ह्माण्यमभिव्याप्यतृणस्तंभादीनिभूतानिचक्रतः सकाशात्वित्रस्तहृदयः सर्वपाखंडदेवता अभिमुख्येनधत्तइत्यन्वयः अनिमि
षतः निमेषमकुर्वतः अप्रमत्तादित्यर्थः मिषतांप्रतिकर्त्तुमशक्तानामित्यर्थः कर्षणिषक्ष्मः कालचक्रंनिजंनित्यमायुर्धयस्य

कदाचिदीश्वरस्यभगवतोविष्णोश्चक्रात्परमाण्वादिः परार्द्धापवर्गकालोपलक्षणात्परिवर्त्तमानेनवयसारंहसा
हरतआब्रह्मतृणस्तंभादीनांभूतानामनिमिषतोमिषतांवित्रस्तहृदयस्तमेवेश्वरंकालचक्रनिजायुधंसाक्षाद्भग
वंतंयज्ञपुरुषमनादृत्यपाखंडिबिरात्मवंचितोब्रह्मकुलंसमावसंस्तेषांशीलमुपनयनाश्रौतस्मार्त्तकर्मानुष्ठानेन
भगवतोयज्ञपुरुषस्य अराधनमेवतदरोचयन्शूद्रकुलंभजतेनिगमाचारेऽशुद्धितोयामिथुनीभावः कुटुंबभ
रणंतथावानरजाते ३२ तत्रापिनिरवरोधःस्वैरेणविरहन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिनाग्राम्यकर्मणैवविस्मृतकालावधिः ३३

सांकेत्येनमूलप्रमाणशून्येनपाखंडागमेन अभिधत्तेआश्रयति ३१ नैर्वचितइत्येतद्व्याचष्टे यदात्विति आत्मनावं
चितैः उरुअधिकंवंचितः सन्तेषांब्राह्मणानांयच्छीलमुपनयनादितदरोचयन्शूद्रवद्वर्त्ततेनिगमोक्ताचारेअशुद्धितः
स्वस्यबुध्यभावात् यस्यशूद्रस्यकेवलमिथुनीभावः कुटुंबभरणंचव्यापारोनाग्निहोत्रादि ३२ तज्जातिरासेनत्या
दिव्याचष्टे तत्रापिनिरवरोधःप्रतिबंधरहितःस्वैरेणस्वेच्छयाक्रीडन्विस्मृतमृत्युकालःसन् ३३ श्रीकृष्णः ७

डुमेषुरंस्यन्नित्येतद्याचष्टे क्वचिनडुमवदिति व्यवायक्षणः मिथुनोत्सवोभवति ३४ क्वचिन्प्रमादादित्येतद्याचष्टे एवमध्वनिसक्तदुःखाद्य
रुधानोगिरिकंदरप्रायेतमूसिरोगाद्यापदि पतितीतिशेषः ३५ क्वचिच्छीतवात्येत्यादि पूर्वस्मादधिकोक्तिः रोगाद्यापदि पतितः सन्शीतादि ५०
भिःक्लिश्यन्नास्तइत्यर्थः ३६ तदेवंसिंहावलोकनान्यायेनोक्तमर्थंयथास्थानमक्षम्यव्याख्यायक्रमस्थमनुवर्तयितुंपूर्वोक्तमेवानुव
दति क्वचिन्मिथइति वित्तशाठ्येन कदाचिद्यत्किंचिद्धनमुपयाति ३७ क्वचित्क्वचित्क्षीणधनस्त्वितिव्याचष्टे क्वचित्क्षीणधनइति

क्वचिद्रुमवदैहिकार्थेषुगृहेषुरंस्यन्यथावानरःसुतदारवत्सलोव्यवायक्षणः ३४ एवमध्वन्यवरुंधानोमृत्युगजभयात्त
मसिगिरिकंदरप्राये ३५ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानांदुःखानांप्रतिनिवारणे अकल्पदुरंतविषयविष
ण्ण आस्ते ३६ क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमुपयातिवित्तशाठ्येन ३७ क्वचित्क्षीणधनःशय्यासनाद्युपभोगवि
हीनोयावदप्रतिलब्धमनोरथः तस्यादानेव्यवसितमतिस्ततस्ततोवमानादीनिजनादभिलभते ३८ एवंवित्तव्यतिषंग
विवृद्धवैरानुबंधोपिपूर्ववासनयामिथउद्वहत्यथापवहति ३९ एतस्मिन्संसाराध्वनिनानाक्लेशोपसर्गबाधितआप
न्नविपन्नोयस्तमुहवावेतरस्तत्रविसृज्यजातंजातमुपादायशोचन्मुह्यन्बिभ्यद्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमा
नःसाधुवर्जितोनैवावर्ततेद्यापियतआरब्धएषनरलोकसार्थः यमध्वनःपारमुपदिशंति ४० यदिदंयोगानुशास
नंवाएतदवरुंधतेयन्न्यस्तदंडामुनयउपशमशीलाउपरतात्मानःसमवगच्छंति ४१ ७ ६७

अप्रतिलब्धयन्मनोरथेनोपगतंवांछितंतस्यादानेस्वीकारेनिश्चितमतिःसन् ३८ अन्योन्यवित्तव्यतिषंगेत्येतद्याचष्टे एवं
वित्तव्यतिषंगेति वहतिसजति ३९ अध्वन्यमुष्मिन्नित्यादिव्याचष्टे एतस्मिन्निति आपन्नः आपदंप्राप्तःविपन्नोवि
नष्टावायत्रयः तमितरस्तत्रैवविसृज्य नह्यमानः बध्यमानः साधुवर्जितः साधुव्यतिरिक्तः ४० अनाहेनोहेतुमाहयदिदमितिं४१ २८

691
1981

मनस्विनइत्यादिव्याचष्टे यदपीति येवैराजऋषयस्तेपिनावरुंधंतेकिंतुपरंकेवलंमन्येरन्नायीरन् ४२ प्रसज्जतिसादिगिरिकंदरइत्यंतमप
हृष्टव्याख्यानेग्रंथमतिक्रम्यवल्लींगृहीत्वेत्यादिग्रंथव्याचष्टे कर्मवल्लीमिति एवमुपरिस्वर्गंगतोपिनरलोकसार्थमेवोपयाति ४३ नदेवंभर
तोक्तिंव्याख्यायतच्चरितिसंग्रहश्लोकानाह तस्येदंकर्मश्लोकैरुपगायति आर्षभस्यऋषभस्यपुत्रस्य अन्योनृपः अनुवर्त्मनार्हति
वर्त्मनानुगंतुंमनसापिनशक्नोति ४४ तत्रहेतुमाहयइति सुहृद्राज्ययोर्हृद्यंकं योदुस्त्यजान्दारादीन्विष्टामिवजहौतस्यार्षभ
स्येतिसंबंधः दुस्त्यजत्वेहेतुः हृदिस्पृशः मनोज्ञानत्यागेहेतुः उत्तमश्लोकेलालसालंपटत्वंयस्य ४५ तस्यैवंविषयत्यागोनचि
त्रमित्याह यएवंभूतोसौस्वपःसःक्षित्यादीन्नैच्छदिति यत्तदुचितं सदयावलोकं भरतस्यदयायथाभवत्येवमवलोकोयस्माइति परजना

यदपिदिगिभजयिनोयज्विनोवैराजर्षयः किंतुपरंमृधेशयीरन् अस्यामेवममेयमितिकृतवैरानुबंधाः यांविसृज्यस्वयमुपसं
हृताः ४२ कर्मवल्लीमवलंब्यततआपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवंसंसाराध्वनिवर्तमानोनरलोकसार्थमुपयातिएवमुप
रिगतोपि ४३ तस्येदमुपगायंति आर्षभस्येहराजर्षेर्मनसापिमहात्मनः नानुवर्त्मार्हतिनृपोमक्षिकेवगरुत्मतः ४४ यो
दुस्त्यजान्दारसुतान्सुहृद्राज्यंहृदिस्पृशः जहौयानेवमलवदुत्तमश्लोकलालसः ४५ योदुस्त्यजान्क्षितिसुतस्वजनार्थदा
रान्प्रार्थ्यांश्रियंसुरवरैःसदयावलोकां नैच्छन्नृपस्तदुचितंमहतांमधुद्विट्सेवानुरक्तमनसामभवोपिफल्गुः ४६ यज्ञा
यधर्मपतयेविधिनैपुणाययोगायसांख्यशिरसेप्रकृतीश्वराय नारायणायहरयेनमइत्युदारंहास्यन्मृगत्वमपियःसमुदाजहार
४७

वलोकः श्रियासुपचर्यते यतःमधुद्विषः सेवायामनुरक्तंमनोयेषांतेषांमहतांअभवोमोक्षोपिफल्गुः तुच्छइत्येव ४६ सेवानुरा
गमेवाह यज्ञायेति यज्ञरूपायधर्मपतये यज्ञादिफलदात्रे विधौनैपुण्यंयस्य तस्मैधर्मानुष्ठाने योगोष्टांगः तस्मैसांख्यंज्ञानंतच्छि
रःप्रधानंफलंयस्मैयोगाय प्रकृतीश्वरायमायानियंत्रे अतएवनारंजीवसमूहःसः अयनमाश्रयोयस्य सर्वजीवनियंत्रे एवंकर्म
ज्ञानदेवताकांडैःप्रतिपादिता।यहरयेनमइउदारंउच्चैर्यःसम्यगुच्चारितवान्मृगत्वंमृगदेहमपिहास्यन्नत्यक्ष्यन्यएवंभूतः तस्यतत्
दुचितमितिवातस्यानुवर्त्मनार्हतीतिवासंबंधः ४७

भा० भरतस्यचरितश्रवणादिफलमाह इदमिति भागवतैः सभाजिताः अवदाताः शुद्धाः गुणाः कर्माणिचयस्य तस्यभरतस्यानुचरितं पं०
योनुश्रृणोत्स आत्मनएवसकाशात्सर्वा आशिष आशास्ते सतएवप्राप्नोति नतुकांचिदपिपरस्मादपेक्षतइत्यर्थः ४८ इतिपंचमे
३९ टीकायांचतुर्दशोध्यायः १४ एवमष्टभिरध्यायैर्भरतस्योत्क्रमीहितं ततःपंचदशेतस्यकीर्त्यतेराजसत्तमाः १ ऋष
भपदवींजीवन्मुक्तमार्गमनुवर्त्तमानंयं दृष्टेतिशेषः यद्वायंसुमतिं अवेदसमाम्नातांदेवतांगोस्वामीसदाजीवमहावीरपार्श्वे

इदंभागवतसभाजितावदातगुणकर्मणोराजर्षेर्भरतस्यानुचरितंस्वस्त्ययनमायुष्यंधन्यंयशस्यंस्वर्गापवर्ग्यंचानुश्रृणो
त्याख्यास्यति अभिनंदतिचसर्वाएवाशिष आत्मन आशास्ते नकांचनपरतइति ४८ इतिश्रीभागवतेमहापुराणे
पंचमस्कंधेब्राह्मणरहूगणसंवादेचतुर्दशोध्यायः १४ श्रीशुकउ० भरतस्यात्मजःसुमतिर्नामाभिहितोयमुहवाव
विसारवंडिन ऋषभपदवीमनुवर्त्तमानंचानार्या अवेदसमाम्नातांदेवतांस्वमनीषयापापीयस्याकलौकल्पयिष्यंति १ त
स्माद्वृद्धसेनायांदेवताजिन्नामपुत्रोभवत् २ अथासुर्यांतत्तनयोदेवद्युम्नस्ततोधेनुमत्यांसुतः परमेष्ठीतस्यसुवर्चला
यांप्रतीहउपजातः ३ य आत्मविद्यामाख्यायस्वयंसंशुद्धोमहापुरुषमनुसस्मार महापुरुषंश्रीनारायणं प्रतीहारात्प्र
तिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानौ अजनिषातां ३० भूम्न ऋषिकुल्यायामुद्गीथ
स्ततः प्रस्तावोदेवकुल्यायांप्रस्तावान्नियुत्सायांहृदयज आसीद्विभुः ४ विभोरत्यांच पृथुषेणः तस्मान्नक्त आकूत्यांज
ज्ञेनक्ताद्द्रुतिपुत्रोगयोराजर्षिप्रवरउदारश्रवा अजायतसाक्षाद्भगवतोविष्णोर्जगद्रिरक्षिषयागृहीतसत्त्वस्यकलात्मवत्त्वादिल
क्षणेनमहापुरुषतांप्राप्तः ५

नाथेतिसंज्ञांकलौकल्पयिष्यंति बुद्धोयंसाक्षादवतीर्णइतिमंस्यंतइत्यर्थः १ तत्तनयः देवताजित्पुत्रः आत्मविद्यांबहुभ्यः आख्या
यव्याख्यानेनैवस्वयंसंशुद्धःप्रतीहः उपजातः यः आत्मविद्यामाख्यायस्वयंसंशुद्धोमहापुरुषमनुसस्मार अपरोक्षतयानुभूत
वान् ३ प्रतीहर्त्ताप्रस्तोताउद्गातेतित्रयोयज्ञनिपुणाः सूनव आसन् अजनिषातांजातौ ३ हृदयजः पुत्रः जगतोरिरक्षिषया ७९
गृहीतंसत्त्वंयेनतस्यविष्णोः कला अंशःसन् ५ ५ ५ ५ ५

693/1981

महापुरुषत्वमाह सवैइति धर्मस्तस्यद्विविधः अभिषिक्तत्वात्प्रजापालनादिरेकः नागृहस्थत्वादिज्यादिश्चापरः द्विविधोपिभगवति
सर्वात्मनार्पितःसन् परमार्थलक्षणः तेनपरिभावितासंस्कृता अतिशुद्धामतिर्यस्य अतएवोपरतमनात्म्यं देहाद्यहंभावोयस्मिन्तस्मि
न्नात्मनिचित्तेस्वयमेवोपलक्ष्यमाने ब्रह्मण्यात्मानुभवोयस्यतादृशोपिनिरभिमानएव अवनीमजूगुपत्पालयामास ६ कर्मभिः

सवैस्वधर्मेणप्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनज्यादिनाचभगवतिमहापुरुषेपरावरेब्रह्मणिस
र्वात्मनार्पितपरमार्थलक्षणेनब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनचाभीक्ष्णशः परिभावितविशुद्धमति
उपरतानात्म्यः स्वात्मनिस्वयमुपलक्ष्यमाणब्रह्मात्मानुभवोपिनिरभिमानएवावनीमजूगुपत् ६ तस्येमांगाथांपां
डवेयपुराविदउपगायंति गयंनृपंकः प्रतियातुकर्मभिः यज्वाभिमानीबहुविद्धर्मगोप्ता समागतश्रीः सदसस्पतिः सतां
सत्सेवकोन्योभगवत्कलामृते ७ यमभ्यषिंचन्परयामुदासतीः सत्याशिषोदक्षकन्याः सरिद्भिः यस्यप्रजानां
दुदुहेधराशिषोयथेप्सितागुणवत्सस्नुतोधाः ८ श्रीः श्रीः श्रीः ५

गयंकः प्रतियाति अनुकरोतिनकोपि अत्रहेतुः यज्ञादिरूपांभगवत्कलांगम्तेन्यः कुइव्यनुषंगः अभिमानी सर्वतोमानास्पदं
मनस्वीतिवा समागतासंभाषा श्रीर्येनयमितिवासतांसदसः सभायाः पतिः सतांसेवकः अद्धा यज्ञादिरूपोपिभगवत्कलामृते
गयंकोन्यःप्रतियातीत्यन्वयः ७ सतीःसत्यः सत्या आशिषोयासांताः दक्षकन्याः श्रद्धामैत्रीदयस्ताभ्यः निराशिषोयस्यप्रजानामा
शिषकामान्धरादुदुहे तस्यगुणाएववत्सः तेनस्नुतमूधोयस्याः पृथिव्याः यद्वस्नानंतंगयंकः प्रतियातीतिसंबंधः ८ श्रीराम

भा० छंदांसिवेदास्तद्विहितकर्माणिच दुहुहुः दुदुः युधिप्रत्यंचिताः बाणैः प्रतिपूजिताः नृपाायस्यबलिमाजहुः आर्पयामासुः धर्मेण पं०
पालनेनदक्षिणादिभिश्चयदाप्रत्यंचिताविप्राः तदापरेत्यलोकांतरे आशिषांधर्मपालनांषष्ठमंशभाजहुः पुण्यषड्भागमदत्त
४० न्यायेनपरिपालयन्नितिस्मृतेः ९ उरुसोमपीथेबहुसोमपानेध्वरेमघोनिइंद्रमाद्यतिमदंप्राप्नुवतिसतिश्रद्धयाविशुद्धचलोभानि

छंदांस्यकामस्यचयस्यकामान्दुदूहुराजहुरथोबलिंनृपाः प्रत्यंचिताःयुधिधर्मेणविप्रायदाशिषांषष्ठमंशंपरेत्य९
यस्याध्वरेभगवानध्वरात्मामघोनिमाद्यत्युरुसोमपीथेश्रद्धाविशुद्धाचलभक्तियोगस्समर्पितेज्याफलमाजहार१०
यत्प्रीणनाद्बर्हिषिदेवतिर्यग्मनुष्यवीरुत्तृणमाविरिंच्यात् प्रीयेतसद्यःसहविश्वजीवःप्रीतःस्वयंप्रीतिमगाद्गयस्य
११ गयाद्गयन्त्यांचित्ररथःसुगतिरवरोधनइतित्रयःपुत्रावभूवुः चित्ररथादूर्णायांसम्राडजनिष्ट १२ ततउत्कला
यांमरीचिर्मरीचेर्बिंदुमत्यांबिंदुमानुदपद्यत तस्मात्सरघायांमधुनामाभवत् मधोःसुमनसिवीरव्रतः ततोभोजायांमन्थु
प्रमन्थूजज्ञाते मन्थोःसत्यायांभौवनस्ततोदूषणायांत्वष्टाजनिष्टत्वष्टुर्विरोचनायांविरजःविरजस्यशतजित्प्रवरंपुत्र
शतंकन्याचविषूच्यांकिलजातं१३ तत्रायंश्लोकः प्रैयव्रतंवंशमिमंविरजश्चरमोद्भवः अकरोदत्यलंकीर्त्या
विष्णुःसुरगणंयथा १४ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेप्रियव्रतवंशानुकीर्त्तनंपंचदशोध्यायः १५

योगस्तेसमर्पितमिज्याफलंआजहार अर्हणमिवप्रत्यक्षतःस्वीकृतवानित्यर्थः १० यस्यभगवतःप्रीणनात् देवादीनांद्
हैक्यंतत्सद्यःप्रीयेतप्रीतिंगच्छेत्सःविश्वजीवःसर्वांतर्यामीस्वयंप्रीतिरूपएवबर्हिषियज्ञेगयस्यहस्फुटंप्रीतिमगात्
तत्प्रीतोस्मीतिप्रत्यक्षंप्रीतिमाविष्कृतवानित्यर्थः ११ १२ सुमनसिस्त्रियां १३ कीर्त्याअतिशयेनअलमकरोत्भूषितवान् १४
इतिपंचमटीकायांपंचदशोध्यायः १५ पूर्वोक्तद्वीपसिंध्वादिमानंसुस्वस्वरूपतःस्पष्टंप्रवक्तुमारब्धापंचाध्यायीततःपरं १ ४०

695/1981

कोशोधःस्वथाचोर्ध्वंपरितःसन्निवेशतः मेरोस्थितिर्महीकंजकर्णिकाचोपवर्ण्यते २ प्रियव्रतचरित्रोक्तावर्षद्वीपादिकल्पना तद्वि
शेषविजिज्ञासुः कथांपरिवृभुत्सति ३ उक्तइति किंपर्यंतमनुभुक्तस्तदाह यावदादित्यस्तपतियत्रचासौशुक्लकृष्णपक्षयोःनक्षत्र
गणैःसहचंद्रश्चवारदृश्यतेतावत् १ यतोयेभ्यःसिंधुभ्यस्तस्यानुवः हेभगवन्तस्यानुभावःसूचितःसंक्षेपतादर्शितः २ २
जिज्ञासायाःफलमाह भगवतइति स्थूलरूपेआविशितमनःसूक्ष्मेभगवतोनिर्गुणेप्रवेष्टुंक्षमंस्यात् भगवतःयामायागुण
विसृतेस्तस्याःकात्स्न्र्यंतत्तं रूपंसन्निवेशःलक्षणंचिन्हप्राधान्येवकथयिष्यामि ४ कुवलयंभूमंडलंतदेवकमलंतस्यकोशःस

राजोवाच उक्तस्त्वयाभूमंडलायामविशेषोयावदादित्यस्तपतियत्रचासौज्योतिषांगणैश्चंद्रमावासहदृश्यते१
तत्रापिप्रियव्रतरथचरणपरिखातैःसप्तभिःसप्तसिंधवउपकॢप्तायतएतस्याःसप्तद्वीपविशेषविकल्पस्त्वयाभ
गवन्खलुसूचितः एतदेवाखिलमहमानतोलक्षणतश्चसर्वंविजिज्ञासामि २ भगवतोगुणमयेस्थूलरूपआ
वेशितंमनोह्यगुणेपिसूक्ष्मतमआत्मज्योतिषिपरेब्रह्मणिभगवतिवासुदेवाख्येक्षममावेशितुंतदुहैतद्गुरोर्हस्य
नुवर्णयितुमिति ऋषिरुवाच नवैमहाराजभगवतोमायागुणविभूतेःकाष्ठांमनसावचसावाधिगंतुमलंवि
बुधायुषापिपुरुषस्तस्मात्प्राधान्येनैवभूगोलकविशेषंनामरूपमानलक्षणतोव्याख्यास्यामः ४ योवाअयंद्वीपःकुवलयक
मलकोशाभ्यंतरकोशोनियुतयोजनविशालःसमवर्तुलोयथापुष्करपत्रं ५ यस्मिन्नववर्षाणिनवयोजनसहस्रायाा
मान्यष्टभिर्मर्यादागिरिभिःसुविभक्तानिभवंति ६

सद्वीपास्तेष्वभ्यंतरःकोशः प्रथमोजंबुद्वीपनियुतयोजनविशालोलक्षयोजनविस्तीर्णः ५ नवयोजनसहस्रआयामोयेषांआया
मोत्रविस्तारः एतच्चभद्राश्वकेतुमालव्यतिरेकेणद्रष्टव्यं तयोश्चतुस्त्रिंशद्योजनसहस्रायामत्वात् केचित्तुनीलनिषधयोःसंलग्नयोः
समुद्रप्रवेशमंगीकृत्यतयोरपिसंकुचितत्वेननवसहस्रायामत्वंसंपादयंति सन्निवेशस्तुवायुनोक्तःधनुर्वत्संस्थितेज्ञेयेद्वेवर्षे
दक्षिणोत्तरेदीर्घाणितत्रचत्वारिचतुरस्रमिलावृतमिति ६

भा० नाभ्यांमध्येद्वीपस्यायामो लक्षयोजनप्रमाणः तावान्समुन्नाह उच्छ्रायोयस्य ७ मूलेषोडशयोजनवितत: तावताषोडशयोजनसहस्र १०
संवितत: तावताषोडशयोजनसहस्रमानेन चतुरशीति सहस्रमानेन चबहिर्दृश्यते एवंलक्षयोजनोन्नाहः ८ उत्तरोत्तरेणेलावृत्तं
४१ लावृत्तस्योत्तरोत्तरतः क्रमेणनीलादयस्त्रयोमर्यादागिरयः प्रागायताः पूर्वतोदीर्घाः क्षारोदस्वावधियेषां द्विसहस्रयोजनविस्तीर्णाः
एकैकशः पूर्वस्मातउत्तरोत्तरोदशांशोधिकांशेनधिकोयोंशस्तेनदैर्घ्यएवह्रसंतिनतत्त्वतेपृथुत्वेवा यथोक्तंविष्णुपुराणे लक्षप्रमा

एषांमध्येइलावृतंनामाभ्यंतरंवर्षंयस्यनाभ्यामवस्थितः सौवर्णः कुलगिरिराजोमेरुर्द्वीपायामसमुन्नाहः ७ कर्णि
काभूतः कुवलयकमलस्यमूर्द्धनिद्वात्रिंशत्सहस्रयोजनविततोमूलेषोडशसहस्रंतावतांतर्भूम्यांप्रविष्टः ८ उत्तरोत्त
रेणेलावृतंनीलःश्वेतःशृंगवानितित्रयोरम्यकहिरण्मयकुरूणांवर्षाणांमर्यादागिरयः प्रागायताउभयतः क्षारोदा
वधयोद्विसहस्रपृथ्व्याएकैकशः पूर्वस्मातपूर्वस्मादुत्तरउत्तरोदशांशाधिकांशेनदैर्घ्यएवह्रसंति ९ एवंदक्षिणेनेला
वृतंनिषधोहेमकूटोहिमालयइतिप्रागायताययथानीलादय अयुतयोजनोत्सेधाहरिवर्षकिंपुरुषभारतानांयथासंख्यं
तथैवेलावृतमपरेणपूर्वेणचमाल्यवद्गंधमादनावानीलनिषधायतौद्विसहस्रंपप्रथतुःकेतुमालभद्राश्वयोःसीमानंविदधाते १०

णाद्वौमध्येदशहीनास्तथापरइति एतच्चस्थूलदृष्ट्यैवोक्तं तयोरपियथावन्मध्यमत्वाभावेनलक्षप्रमाणत्वात् अयुतयोजनं
उत्सेधःउच्छ्रायोयेषां अयचोत्सेधोनीलादीनामपिद्रष्टव्यः नीलादिपृथुत्वंचैषामधिपिद्रष्टव्यंयथासंख्यंमर्यादागिरयइतिशेषः ४१
आनीलनिषधौउत्तरतोनीलपर्यंतंचदीर्घौपप्रथतुःविस्तीर्णौभवतः तावेवकेतुमालभद्राश्वयोर्वर्षयोःसीमानंकुरुतेति १०

697
1981

नन्वेवंसतिपूर्वापररेखायामिलावृतवेष्टितोमेरुर्मध्येततःपूर्वापरतोगिरिद्वयंवर्षद्वयंचनातः किंचिदस्तिदक्षिणोत्तररेखायां
तुतथैवचेलावृतवेष्टितोमध्येमेरुस्ततस्त्रीणित्रीणिचवर्षाणिगिरयश्चतत्कथंसर्वतोलक्षप्रमाणत्वंजंबुद्वीपस्य उच्यते मेरोःषो
डशसहस्राणिसर्वतःस्थितत्वादिलावृतस्याष्टादश अन्येषांषण्णांचतुःपंचाशद्गिरीणांद्वादशेत्येवंदक्षिणोत्तररेखायांतावल्लक्षं
पूर्वापररेखाःतावल्लक्षं पूर्वापररेखायामपिसमेरोरिलावृतस्यचतुस्त्रिंशद्गिरयोश्चत्वारिशेषाणिद्विषष्टिसहस्राणिपूर्वापरवर्षयो
रासमुद्रदैर्घ्येद्रष्टव्यानि अतोनविरोधः अयुतयोजनप्रमाणोविस्तारोन्नाहौयेषांविस्तीर्णमध्यंमेरोरवष्टंभत्वात्पूर्वपश्चिमोगिरीद

मंदरोमेरुमंदरःसुपार्श्वःकुमुदइति आयुतयोजनविस्तारोन्नाहाश्चतुर्दिशामवष्टंभगिरयउपक्लृप्ताः ११ चतुर्ष्वेतेषु
चूतजंबूकदंबन्यग्रोधाश्चत्वारःपादपप्रवराःपर्वतकेतवइव अधिकशतसहस्रयोजनोन्नाहाः १२ तावद्विटपवितत
यःशतयोजनपरिणाहाह्रदाश्चत्वारःपयोमध्वीक्षुरसमृष्टजलायदुपस्पर्शनोपदेवगणायोगैश्वर्याणिस्वाभाविकानि
भरतर्षभधारयंति १३ देवोद्यानानि भवंतिचत्वारिनंदनंचैत्ररथंवैभ्राजकंसर्वतोभद्रमिति १४ येष्वमरपरिदृढाःसहसु
रललनाललामयूथपतयउपदेवगणैरुपगीयमानमहिमानःकिलविहरंति १५ ७ ७

क्षिणोत्तरविस्तारोदक्षिणोत्तरौचपूर्वापरविस्तारौद्रष्टव्यौ सर्वतोदशयोजनसहस्रविस्तारांगीकारेत्विलावृतलोपात्पूर्वेणेला
वृतमुपप्लावयतीत्यादिविरोधःस्यात् अतोद्विसप्तपृथवः ११ अधिसहस्रमेकादशशतानिउन्नाहोयेषां १२ तावत्प्रमाणंविटपवि
ततिर्येषां शतयोजनंपरिणाहविस्तारोयेषांयदुपस्पर्शनात्सैर्यैवनः योगैश्वर्याणि अणिमादीनि १३ १४ ललामोभूषणं
सुरललनानांभूषणभूताःश्रेष्ठायाःस्त्रियास्तासांयूथस्यपतयःसहसंभूययेषुविहरंति १५ ७ ७ ७

एकादशशतयोजनमुत्तुंगोयोदेवचूतस्तस्यशिरसः सकाशात् फलप्रमाणमुक्तं वायुपुराणे अरत्नीनां शतान्यष्टौ एकषष्ट्यधिका
निच फलप्रमाणमाख्यातम्महर्षिभिस्तत्वदर्शिभिरिति अतिमधुरश्चासौसुरभिश्चसुगंधिश्चवन अन्येषांगंधैरधिवासितःअ
रुणश्चासावरुणश्चरसः सएवउदकं तेनमेरुमूलेस्तंयाति १६ अनस्थिप्रायाणां अतिसूक्ष्मबीजानां यत्रनियतंतीनतआरभ्याभ्र

मंदरोत्संगएकादशशतयोजनोत्तुंगदेवचूतशिरसोगिरिशिखरस्थूलानिफलान्यमृतकल्पानिपतंतितेषांविशीर्यमा
णानामतिमधुरसुरभिसुगंधिबहलारुणरसोदेनारुणोदानामनदीमंदरगिरिशिखरान्निपतंतीपूर्वेणेलावृतमुपप्लावय
ति १६ यदुपजोषणाद्भवान्या अनुचरीणांपुण्यजनवधूनां अवयवस्पर्शसुगंधवातोदशयोजनंसमंतादनुवासयति १७
एवंजंबूफलानामत्युच्चनिपातविशीर्णानां अनस्थिप्रायाणामिभकायनिभानांरसेनजंबूनामनदीमेरुमंदरशिखरा
दयुतयोजनादवनितलेनिपततीदक्षिणेनात्मानंयावदिलावृतमुपस्यंदति १८ तावदुभयोरपिरोधसोर्यामृत्तिका
सेनानुविध्यमानावाय्वर्कसंयोगविपाकेनसदामरलोकाभरणंजांबूनदंनामसुवर्णंभवति १९ यदुहवावविबुधादयः
सहयुवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेणखलुधारयंति २० यस्तुमहाकदंबः सुपार्श्वनिरूढोयास्तस्यकोटरे
भ्योविनिस्सृताः पंचव्यामपरिणाहाः पंचमधुधाराः सुपार्श्वशिखरात्पतंत्योपरेणात्मानमिलावृतमनुमोदयंति २१
यन्मधूपयुंजानानांमुखनिर्यासितोवायुःसमंताच्छतयोजनमनुवासयति २२ ७ ७

नोदक्षिणतः सर्वमिलावृतंव्याप्यवहंतीत्यर्थः यदुपजोषणतयस्यरसस्यसेवनात् १७ इलावृतमुपप्लाव्यमेरुमूलेस्तंयाति
१८ तावत्सर्वतः रोधसोस्तटयोः १९ २० आयामोत्रव्यायामः सव्यामोबाह्वोः सकरयोस्ततयोः स्तिर्यगंतरमित्यल्कल
क्षणः पंचव्यामंपरिणाहः स्थौल्यंयासामित्यर्थः केचित्तुपंचव्यायामपरिणाहाइत्येवंपठंति २१ २२ श्रीकृष्ण ॥ ४२.

699
1981

नीचानामधोमुखाग्राः यावज्जीवंनिरतिशयसुखमेवेत्यर्थः चतुर्दिक्षु मेरुमूलेपरितः केसराचलाइवपरिक्षिप्ताः मेरुमूलाद्यो
जनसहस्रांत्यन्तात्तैः परितः परिधयइवजठरदेवकूटादयस्तिष्ठंति अतोष्टादशयोजनसहस्रप्रमाणमन्यत्रोक्तं वैरुवादिपुराणेषु
२६ परिमाणादियत्तुनः अन्यथावर्णितंतत्तुकल्पभेदाद्यपेक्षयाद्विसहस्रपृथुश्चतुंगोच २७ २८ यथादिशंयाव्यादिदि

एवंकुमुदनिरूढोयः शतवल्शोनामवटस्तस्यस्कंधेभ्योनिर्गताः पयोदधिघृतमधुगुडान्नाद्यंबरशय्यासनाभरणा
दयः सर्वएवकामदुघानदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति २३ यानुपजुषाणानांनकदाचिदपिप्र
जानांवलितपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषाभवंति २४ यावज्जीवं
सुखंनिरतिशयमेवकुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधसिनीवासकपिलशंखवैदूर्यजारुधि
हंसर्षभनागकालंजरनारदादयोगिरयोमेरोः कर्णिकायाइवकेसरभूतमूलदेशेपरितउपक्लृप्ताः २५ जठरदेवकू
टौमेरुंपूर्वेणाष्टादशयोजनसहस्रमुदगायतौद्विसाहस्रंपृथुतुंगौभवतः २६ एवमपरेणपवनपारियात्रौदक्षिणेन
कैलासकरवीरौप्रागायतौएवमुत्तरतस्त्रिशृंगमकरौअष्टाभिरेतैः परिस्तृतोग्निरिवपरितश्चकास्तिकांचनगिरिः २७
मेरोर्मूर्धनिभगवतोआत्मयोनेर्मध्यउपक्लृप्तांपुरीमयुतयोजनसाहस्रींसमचतुरस्रांशातकौंभींवदंति २८ तामनु
परितोलोकपालानामष्टानांयथादिशंयथारूपंतुरीयभागेनदिशंपुरोष्टावुपक्लृप्ताः २९ इतिश्रीभागवतेमहापुरा
णेपंचमस्कंधेभुवनकोशवर्णनंनामषोडशोध्यायः १६ ७ ७ ७

सुयथारूपंइंद्रादिवर्णनानतिक्रमेणतुरीयमानेनसार्द्धद्विसहस्रप्रमाणेन नामानिपुराणांतरात्ज्ञातव्यानियोक्तं
मेरौनवपुरास्युर्वैमनोवत्यमरावती तेजोवतीसंयमनीतथाकृष्णांगनापरा श्रद्धावतीगंधवतीतथाचान्यामहोदया य
शोवतीचब्रह्मेंद्रवन्ह्यादीनांयथाक्रममिति २९ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेटीकायांषोडशोध्यायः १६.

भा० ततः सप्तर्षयोगंगागमनंतच्चतुर्द्दिशं इळावृतेचरुद्रेणसंकर्षणनिषेवनं १ यज्ञलिंगस्यबलेर्यज्ञेलिंगंत्रिविक्रमाम्रूर्तेर्यस्य पं०
विक्रमतः दक्षिणेनपदाभुवंक्रांत्वावामपादमुपक्षिपतः वामपादांगुष्ठनखेनविर्भिन्नमूर्द्ध्वमुपरिभागोयस्यांडकटाहस्यतस्यवि
४२ वरेणांतःप्रविष्टायाबाह्यजलधारासादिवोमूर्द्धनि अवततारेत्यन्वयः तस्ययच्चरणपंकजंतस्यावनेजनेन क्षालनेन अरुणेनतद्गतं
कुंकुमंतदेवकिंजल्कास्तैरुपरंजिताः अतएवाखिलस्यजगतेद्दुघमलापहत्रुपस्पर्शनयस्याःतथाप्यमलातन्मलसंगशून्या साक्षा

शुकउवाच तत्रभगवतःसाक्षाद्यज्ञलिंगस्यविष्णोर्विक्रमतोवामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतः
प्रविष्टायाबाह्यजलधारातच्चरणपंकेजावनेजनारुणकुंकुमकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शना
मलासाक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानातिमहताकालेनयुगसहस्रोपलक्षणेनदिवोमूर्धन्यवतता
र १ यत्तद्विष्णुपदमाहुः यत्रहवावीरव्रत औत्तानपादिः परमभागवतोस्मत्कुलदेवताचरणारविंदोदकमि
तियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदय औत्कंठ्यविवशामीलितलोचनयुग
लकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलक अधुनापिपरमादरेणशिरसाबिभर्त्ति २

द्भगवत्पदीतियदनुपलक्षितंजाह्नवीभागीरथीत्याद्युपलक्षणांतररहितंवचोनामतेनअभिधीयमाना १ दिवोमूर्धन्यवत
तार कोसौदिवोमूर्धातमाहयदिति किंतद्विष्णुपदंतदाह यत्रेति धीरव्रतः दृढसंकल्पः अस्मत्कुलदेवतायादेरश्चरणारविंदोद
कमितिहेताः परमादरेणबिभर्तीत्यन्वयः कथंभूतःसन्प्रतिक्षणंवर्द्धमानेनभगवद्भक्तियोगेनदृढमत्यंतंक्लिद्यमानमंतर्हृ ४२
दयंयस्य अतएव औत्कंठ्येनविवशमामीलितंयल्लोचनयुगुलंतस्यकुड्मलेताभ्यांविगलितममलंबाष्पंतस्यकलयासहअभिव्य
ज्यमानंरोमपुलकानांकुलंयस्य २

7/01
1981

ततः सप्तर्षयस्तस्यागंगायाः प्रभावाभिज्ञाःसंतोयांजटाजूटैरुद्वहंतीत्यन्वयः एतावत्येवनातोधिकारस्त्यितिप्रायश्चंतः तत्रहेतुः भगवतिसंततं
भक्तियोगलाभेनैवउपेक्षिताअन्येपुरुषार्थाः आत्मज्ञानंचयैः कामिककइवधारयंति प्रत्यक्षमुक्तिमिवतामागतामुमुक्षवोजनाइवेति ३
ततोनेकसहस्रकोटीनांविमानानांअनीकैःसंकुलेनदेवयानेनआकाशमार्गेणावतरंती सप्तऋषिभ्योर्वागेवप्रायशःकर्मिणांगति
नतोर्वागेवसंकुलत्वमुक्तं अर्वाकआप्लाव्यमेरूमूर्द्ध्निब्रह्मसदनेनियततिं ४ अभिस्यंदंती अभितोगच्छंती ५ केसराचला

ततसप्तर्षयस्तत्प्रभावाभिज्ञाः इयंननुतपसआत्यंतिकीसिद्धिरेतावतीभगवतिसर्वात्मनिवासुदेवेनुपरतभक्तियोगलाभेनैवो
पेक्षितान्यार्थात्मगतयो मुक्तिमिवागतांमुमुक्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति ३ ततोनेकसहस्रकोटीविमानानी
कसंकुलदेवयानेनावतरंतींदुमंडलमावार्यब्रह्मसदनेनिपतति ४ तत्रचतुर्द्धाभिद्यमानाचतुर्भिर्नामभिश्चतुर्दिशमभिस्पं
दंतीनदनदीपतिमेवाभिनिविशतिसीतालकनंदावंक्षुःभद्रेति ५ सीतातुब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योधोधः
प्रस्रवंतीगंधमादनमूर्द्धसुपतित्वाअंतरेणभद्राश्ववर्षंप्राच्यांदिशिक्षारसमुद्रमभिप्रविशति ६ एवंमाल्यवच्छिखरान्निपतं
तीततउपरतेकेतुमालमभिवंक्षुःप्रतीच्यांदिशिसरित्पतिंप्रविशति ७ भद्राचोत्तरतोमेरुशिरसोनिपतितागिरिशिखराद्गिरिशि
खरमतिहायशृंगवतःशृंगादवस्यंदमानाउत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति ८ श्रीराम

केसराचलानांमेरुसमानोच्छ्रयत्वात्प्रथमंतेषांआदिशिखरेषुमुख्यशृंगेषुपतितिततस्तेभ्योधोधःस्रवंतीसतीपूर्वस्यांदिशिक्षारसमुद्रमभिया
ति ६ माल्यवच्छिखरात्केतुमालाभिमुखंनिःपतंतीवंक्षुःसंज्ञागिरिशिखरात्प्रस्रवंतीसरित्पतिंप्रविशति ७ गिरिशिखरादितिकु
मुदशिखराउच्चलितानीलशिखरंततऊच्चलिताश्वेतशिखरंतदप्यतिहाय शृंगवतःशृंगादधोधःस्रवंती ८ श्रीः रामजयराम

भा· ४४

अतिरभसतररंसाअस्खलिततीव्रवेगेनलवणार्णवंप्रविशति ९ बहुशः बहुविधाः मेर्वादिगिरीणांदुहितरः तत्प्रसूताः १० दिव्य पं·
भौमबिलभेदात्त्रिविधः स्वर्गः तत्रभौमस्वर्गस्थानानिव्यपदिशंति ११ अयुतंपुरुषमानेनआयुर्वर्षाणियेषां वज्रवत्दृढं
संहननंशरीरंतस्मिन्बलवयोमोदाः तैःप्रमुदितानियानिमहासौरतानिमिथुनानितेषांव्यवायापवर्गेसंभोगावसानेएकवर्षशेषेआ
युषिधृतएकोगर्भोयैस्ताहृशानिकळत्राणियेषांत्रेतायुगसमः विषयः सुखोत्कर्षात्कृतयुगेहिसर्वेध्याननिष्ठाः द्वापरादौतुदुःख

तथैवालकनंदादक्षिणेनब्रह्मसदनाद्बहूनिगिरिकूटान्यतिक्रम्यहेमकूटाद्धिमकूटान्यतिरभसतररंहसाः भुवमितिभारतमभिवर्षंदक्षिण
स्यांदिशिजलधिमभिप्रविशतियस्यांस्नानार्थंपानार्थंवागच्छतः पुंसः पदेपदेअश्वमेधराजसूयादीनांफलंनदुर्लभमिति ९ अ
न्येचनदानद्यश्चवर्षेवर्षेसंतिबहुशोमेर्वादिगिरिदुहितरःशतशः १० तत्रापिभारतमेववर्षंकर्मक्षेत्रमन्यान्यष्टवर्षा
णि स्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशंति ११ येषुपुरुषाणामयुतंपुरुषायुर्वर्षाणांदेवकल्पा
नांनागायुतप्राणानांवज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतुत्रेतायु
गसमःकालोवर्तते १२ यत्रहदेवपतयः स्वैः स्वैः स्वगणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलय
श्रियानम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरीद्रोणीषुतथाचामलजलाशयेषु
विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिर्मधुकरनिकरादिकृतिभिरुप
कूजितेषुजलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुंदरीणांकामकलितविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरंविहरंति
॥१३॥

बहुलाः १२ यत्रहयेषुहिवर्षेषुदेवपतयः स्वैःस्वैः सेवकगुणेषुमुख्यैःकृतमहोपचाराः संतः स्वैरंविरहंतीत्यन्वयः केषुस्थानेषुसर्वेषुसतु ४४
कुसुमस्तबकादीनांश्रियासमृध्याअत्यंतंनम्यमानाविटपीलताश्रिताः लताश्चयेषुतैर्विटपिभिरुपशुंभमानानिशोभमानानिरुचिराणि
काननानियेषुतेष्वाश्रमायतनेषु वर्षगिरिद्रोणिषुच अमलेषुजलाशयेषुचविकचानिविविधानिनवानिचयानिवनरुहाणिनीर
जानितेषामामोदेनमुदिताराजहंसादिभिर्मधुकरनिकराणांवा आकृतिभिर्जातिविशेषैरुपकूजितेषु कामेनकेलितैः सुभितैर्विला
सादिभिराकृष्टंमनोदृष्टिश्चयेषांतेस्वैरंविरहंति १३ श्रीः

7103/1981

नववर्षेष्वपिवर्षेषुयेपुरुषास्तेषांतदनुग्रहायसचासौवक्ष्यमाणोनुग्रहस्तदर्थं आत्मतत्वव्यूहेनस्वमूर्तिसमूहेनसन्निधीयतेसन्निहितो
भवति १४ अपरअर्वाचीनः पश्चात्तनवमस्कंधद्विलोपाख्याने १५ भवानीनाम्नास्वामिनीयेषांतैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमा
नःसर्वतः सेव्यमानः आत्मनःप्रकृतिंकारणं आत्मनिसमाधिध्यानंयस्यतेनरूपेणएतद्वक्ष्यमाणमंत्रादिकंअभिगृणन्जपन् १६
सर्वेषांगुणानांसंख्यानंप्रकाशोयस्मात्स्वयंतुअव्यक्तायअप्रमेयाय १७ हेभजन्यभजनीयत्वात्त्वांपरमीश्वरंभजइत्यन्वयः अरणं

नववर्षेष्वपिवर्षेषुभगवान्नारायणोमहापुरुषः पुरुषाणांतदनुग्रहायात्मतत्वव्यूहेनात्मनाद्यापिसन्निधीयते १४
इलावृतेतुभगवान्भवएकएवपुमानत्यन्यस्तत्रापरोनिर्विशतिभवान्याःशापनिमित्तज्ञःयत्प्रवेशात्स्त्रीभावस्त
त्पश्चाद्वक्ष्यामि १५ भवानीनाथैःस्त्रीगणानांअर्बुदसहस्रैरवरुध्यमानोभगवतश्चतुर्मूर्तेर्महापुरुषस्यतुरीयां
तामसींमूर्तिंप्रकृतिमात्मनः संकर्षणःसंज्ञामात्मसमाधिरूपेणसन्निधायैतदभिगृणन्भवउपधावति १६ श्रीभ
गवानुवाच ओंनमोभगवतेमहापुरुषायसर्वगुणसंख्यानायानंतायाव्यक्तायनमइति १७ भजेभजन्यारणपा
दपंकजंभगस्यकृत्स्नस्यपरंपरायणं भक्तेष्वलंभावितभूतभावनंभवापहंत्वाभवभावमीश्वरं १८ नयस्यमायागुण
चित्तवृत्तिभिर्निरीक्षतोह्यण्वपिदृष्टिरज्यते ईशेयथानोजितमन्युरंहसांकस्तंनमन्येतजिगीषुरात्मनः १९ गोविंद

शरणंपादपंकजंयस्यकृत्स्नस्यभगस्यऐश्वर्यादिषाड्गुण्यस्यपरमयनमाश्रयं भक्तेषुअलमत्यर्थंभावितंप्रकटितंभूतभावनंस्वरूपंयेन
भवापहंसंसारहरंभक्तेषुइत्यनुषंगः भवंभावयतीतितथातं अर्थाद्भक्तेष्वितिद्रष्टव्यं १८ ईश्वरत्वमुपपादयन्नमस्त्वेनप्रसक्त
मनादरंवारयति नयस्येति निरीक्ष्यमाणस्यापिदृष्टिर्मायागुणविषये चित्तवृत्तिभिःकरणैश्चअण्वपिईषदपिनाज्यतेनलि
प्यते किमर्थंनिरीक्ष्यमाणस्यईशेईशानाय नियमनाय ईशानमीदृसपदादित्वाद्वाबेक्किर अत्रचव्यधर्म्यदृष्टांतः यथाजितक्रोधवेगा
नामस्माकंदृष्टिरज्यतेनतथेति अतःआत्मनः इंद्रियाणिजिगीषुजेतुमिच्छुः मुमुक्षुः तंकोनमन्येत नाद्रियेत १९ श्रीः

ननुसुरामद्याभ्यांमत्तस्यकुतोदृष्टिर्नाव्यतेतत्राह असतीदृक्दृष्टिर्यस्यतस्यसमाययाक्षीबोमत्तइवयोभयंकरः प्रतिभाति
मध्वासवाभ्यामाताम्रलोचनइवच नागवधूविमोहनेनतथाप्रतिभातंयुक्तमित्याह नेति पादार्चनेयस्यपादयोःस्पर्शेनधर्षितं
मोहितमिंद्रियंमनोयासांताः क्रियालज्जयाभुजाद्यर्हणेनईशिरेनशेकुः कस्तमन्येतेतिपूर्वेणैवान्वयः २० अस्यविश्वस्यस्थि
तिजन्मसंयमहेतुंतमाहुः अतएवत्रिभिःस्थित्यादिभिः स्थित्यादिभिर्विहीनं अनंतंचयमाहुः सप्तयोमंत्राः छंदोनुरोधेनदीर्घपा
ठेभकारोदेवमातालक्ष्मीःसाचसप्तयश्चेत्यर्थः अनंतत्वंदर्शयति मूर्द्धसहस्रमेवधामानिस्थानानितेषुक्वचिदेकदेशेस्थितं

असद्दृशोयःप्रतिभातिमाययाक्षीबेवमध्वासवताम्रलोचनः ननागवध्वोर्हणईशिरेह्रियायत्पादयोःस्पर्शनधर्षितेंद्रि
याः २० यमाहुरस्यस्थितिजन्मसंयमंत्रिभिर्विहीनंयमनंतमीश्वरं नवेदसिद्धार्थमिवक्वचित्स्थितंभूमंडलंमूर्द्धसहस्र
धामसु २१ यस्याद्यआसीद्गुणविग्रहोमहान् विज्ञानधिष्ण्योभगवानजःकिल यत्संभवोहंत्रिवृतास्वतेजसावैका
रिकंतामसमैंद्रियंसृजे २२ एतेवयंयस्यवशेमहात्मनःस्थिताःशकुंताइवसूत्रयंत्रिताः महानहंवैकृततामसेंद्रि
याःसृजामसर्वेयदनुग्रहादिदं २३

भूमंडलंयोनवेदसिद्धार्थंसर्षपमिवतस्मैनमइतिचतुर्थेनान्वयः २१ नचजन्महेतुत्वंमहदादिद्वारेणप्रपंचयति यस्यगुणानि
मित्तोमहान्नामविग्रहआसीत्विज्ञानसत्ताधिक्यंआश्रयोयस्यसः तस्यचित्तरूपत्वेनसत्वप्रधानत्वात् एसएवकिलाधिदेवोवा
सुदेवोभेदविवक्षयाभगवानजोब्रह्मायत्संभवःयस्मान्महत्तत्वाःसंभूतः अहंरुद्रःत्रिवृतागुणेनस्वतेजसास्वचित्ते निरूपेणअहंका
रेणवैकारिकंदेवतावर्गतामसंभूतवर्गंऐंद्रियंइंद्रियवर्गंचसृजामि २२ किंच एतेवयंमहदादयःसर्वेयस्यानुग्रहादिदंब्रह्मांडंसृ
जामःकथंभूताःयस्यमहात्मनोवशेस्थिताःसंतायतःसूत्रेणक्रियाशक्त्यायंत्रिताःप्रोताःशकुंताःपक्षिणइवलोकेवेतनसूत्रेण वयमित्युक्तं
तानेवाहमहानहंकारश्चवैकृतादयःसर्वोभावगाम्य २३ ४५

1705
1981

स्थितिलयहेतुत्वंदर्शयनप्रणमति यन्निर्मितांमायामेवायंजनोंजसावेद नतुतन्निस्तारणयोगमुपायंकर्हिचिदपिवेदेनिस्थितिहेतुत्वं
दर्शितं कथंभूतांकर्मपर्वणींकर्माणिविहितप्रतिषिद्धलक्षणानिपर्वाणिग्रंथयोयस्यास्तां कर्मण्येवपर्वाणिग्रंथयः तानिनयतिप्रा
पयतीतितथाताम् प्रलयहेतुत्वमाह विलीयतेस्मितिविलयःउदेत्यस्मादित्युदयः विलयश्चोदयश्चात्मास्वरूपंयस्यतस्मैनमः २४
इतिश्रीभागवतेमहापुराणेपंचमस्कंधेटीकायांसप्तद· १७ अष्टादशेतत्तन्मेरोःपूर्वादिक्रमतस्त्रिषु त्रिषुचात्तरवर्षेषुसेव्यसेव
कवर्णनं १ भद्रश्रवावर्षपतिःतस्यकुलपतयःसेवमुख्यास्थपरमेणसमाधिनाचित्तैकाग्र्येणतद्दिसन्निनिधाप्यइदंवक्ष्यमाणंमंत्रज

यन्निर्मितांकर्ह्यपिकर्मपर्वणींमायांजनोयंगुणसर्गमोहितः नवेदनिस्तारणयोगमंजसातस्मैनमस्तेविलयोदया
त्मने २४ इतिश्रीभागवते॰ राणेपंचमस्कंधेसप्तदशोध्यायः श्रीशुक॰ तथाचभद्रश्रवानामधर्मसुतस्तत्कुल
पतयःपुरुषाभद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनुं धर्ममयींहयशीर्षाभिधानांपरमेणसमाधिनासन्नि
धाप्येदंअभिगृणंतउपधावंति १ भद्रश्रवसऊचुः ॐनमोभगवतेधर्मायात्मविशोधनायनमइति २ अहोविचित्रंभ
गवद्विचेष्टितंघ्नंतंजनोयंहिमिषन्नपश्यतिध्यायन्नसद्यर्हिविकर्मसेवितुंनिर्हृत्यपुत्रंपितरंजिजीविषुः ३ वद
तिविश्वंकवयश्चनश्वरंपश्यंतिचाध्यात्मविदोविपश्चितः तथापिमुह्यंतितवाजमाययासुविस्मितंकृत्यमजंनतोस्मि ४

पंतस्तुवंति १ भद्रश्रवसऊचुरिति प्राणभृतउपदधातीतिवद्गुणलक्षयानतयोगाद्गुणितपुलिंगसमवायन्यायेनबहुवचनं २
अयंजनोमिषंनपिपश्यन्नपिघ्नंतंहिंसंतंनपश्यतिनालोचयतीतिभगवद्विचेष्टितमेव तच्चविचित्रं अदर्शनेलिंगं पुत्रंबालंपितरं
चवृद्धंमृतंनिर्हृत्यदग्ध्वास्वयंतदुभयधनैर्जिजीविषति जीवितुमिच्छति किंधर्मार्थंयत्नयर्हियतः असत्तुच्छंविषयसुखंसेवितुंविक
र्मपापमेवध्यायन् ३ नन्वविद्वानपश्यतिकिमित्रचित्रं तत्राह नश्वरं नाशवंतंवदंतिस्मशास्त्रतः पश्यंतिचसमाधौहेअजात
पापिमाययाःमुह्यंति एतच्चतवकृत्यंचेष्टितंसुविस्मितं अतिचित्रं अतःशास्त्रादिश्रमंविहायतंत्वां अजंनतोस्मि ४ श्रीकृष्ण

भा·
४६

इदमपरंचित्रवस्तुतयिमानमपित्वयिनचित्रमित्याह विश्वस्योद्भवादिकर्मअकर्तुरपि अपगताआवृत् आवरणंयस्मात्तादृश पं·
स्यापितेअंगीकृतंवेदेनत्वयितन्नचित्रंयतः मायया सर्वात्मनि कार्यस्वकारणेस्रष्टरिकर्मयुक्तं वस्तुतःसर्वव्यतिरिक्तेनिरुपाधौवस्तु
निपरमार्थभूतेअनावृतत्वमकर्तृत्वंचयुक्तं ५ वेपरमेश्वरत्वेनस्तुत्वाप्रस्तुतावतारचरितमाह वेदानिति तमसादैत्यरूपेणतिरस्कृ
तान्अपनीतान् नान्वतुरंगश्चतद्रूपोविग्रहोयस्य कवयेब्रह्मणे अवितथेहितायसत्यसंकल्पाय ६ उत्तरत्रप्रल्हादचरित्रे७
महापुरुषस्यगुणानांभाजनंआश्रयः दैत्यदानवकुलस्यतीर्थीकरणंशीलमाचरितंयस्य फलसंकल्पव्यवधानशून्यश्चासौ

विश्वोद्भवस्थाननिरोधकर्मतेह्यकर्तुरंगीकृतमप्यनावृतः युक्तंनचित्रंत्वयिकार्यकारणेसर्वात्मनिव्यतिरिक्तेचवस्तुनि
५ वेदान्युगांतेतमसातिरस्कृतान्रसातलाद्योनृतुरंगविग्रहः प्रत्याददेवैकवयेभियाचतेतस्मैनमस्तेवितथेहिताय
६ हरिवर्षेचापिभगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये ७ तद्दयितंरूपंमहापुरुषगुणभा
जनोमहाभागवतोदैत्यदानवकुलतीर्थीकरणशीलाचरितप्रह्लादोव्यवधानानन्यभक्तियोगेनसहतद्वर्षपुरुषैरुप
स्तेइदंचोदाहरति ८ ओंनमोभगवतेनरसिंहायनमस्तेजस्तेजसेआविराविर्भववज्रदंष्ट्रकर्माशयान्रंधयरंधयतमो
ग्रसग्रसस्वाहाअभयमात्मनिभूयिष्ठाः ओंक्ष्रौं ९ स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवं
मिथोधिया मनश्चभद्रंभजतादधोक्षजेआवेश्यतांनोमतिरप्यहैतुकी १० श्री: श्रीकृष्ण गो·

अनन्यश्चाव्यभिचारीयोभक्तियोगस्तेनउपास्तेसेवते ८ तेजसामपितेजसे आविराविःअतिप्रकटोभवविषावा कर्माशयान्
कर्मवासनाःकर्माश्रयानितिपाठेरागादीन्रंधयनिर्दह भूयिष्ठाःभयाः ९ विश्वस्यस्वस्तिप्रार्थनेखलस्यापिभवेत् तच्चसा
धुपीडांविनानस्यात् अन्योन्यममंगलंध्यायतांचभूतानांअन्योन्यघातंविनानभवेदित्याशंक्याह खलःप्रसीदतुकोयंत्यज
तुभूतानिचमिथःशिवमेवध्यायंतुतेषांमनश्चभद्रंउपशमादिभजतुनोस्माकमपिमतिःअपिशब्दात्भूतानांचमतिःअहै ४६
तुकीनिष्कामासती अधोक्षजेस्तु १० श्रीमत्

707/1481

नसंगःक्वापिमास्यात्यदिकथंचित्स्यात्तर्हिआगारादिषुमास्यात्किंतुभगवत्प्रियेष्वेवस्यात् आगारादिसंगेदोषमाह यइति यःआत्म
वान्केवलंप्राणवृत्त्यापरितुष्टःसभद्भिरात् शीघ्रमेवसिध्यति संसारान्मुच्यतेतथाइंद्रियप्रियोगृहाद्यासक्तःनमुच्यते अगारादावासक्त
स्यैवदोषइत्यर्थः ११ भगवत्प्रियसंगगुणमाह येषांभगवत्प्रियाणांसंगात्लब्धंमुकुंदविक्रमंश्रुतिभिःश्रवणादिभिःसंस्पृशतांसेवमा
नानांश्एवतानोपुंसांअंतर्गतोजोमानसंमलंहरतिकथंभूतंविक्रमंनिजमसाधारणंवीर्यवैभवंप्रभावातिशयोयस्यतं अथवामुकुंदतत्पु
रुषस्यसंगात्लब्धमानसंतीर्थंवासुदेवस्मरणंयेषांतान्स्पृशतांमानसंमलंयात्येतन्नचित्रंतीर्थंतुगंगादिमुक्तःसंस्पृश तामंगजम
लंकेवलंहरतिनतुवासनां तावद्विष्णुभक्तान्कोवैनसेवेतेत्यन्वयः १२ मानसमलापगमफलमाह अकिंचनातिःकामाःमनःसु
हृद्धरेर्भक्तोभवति ततश्चतत्प्रसादेसतितस्मिन्देवाःसर्वैर्गुणैःधर्मज्ञानादिभिःसहतत्रसम्यगासनेनित्यंवसंति १३ गृहाद्यासक्तस्य

मागारदारात्मजवित्तबंधुषुसंगोयदिस्याद्भगवत्प्रियेषुनः यःप्राणवृत्त्यापरितुष्टआत्मवान्सिध्यत्यदूरान्नतथेंद्रियप्रि
यः ११ यत्संगलब्धंनिजवीर्यवैभवंतीर्थंमुहुःसंस्पृशतांहिमानसं हरत्यजोंतःश्रुतिभिर्गतोंगजंकोवैनसेवेतमुकुंदविक्र
मं १२ यस्यास्तिभक्तिर्भगवत्यकिंचनासर्वैर्गुणैस्तत्रसमासतेसुराः हरावभक्तस्यकुतोमहद्गुणामनोरथेनासतिधावतोब
हिः १३ हरिर्हिसाक्षाद्भगवान्शरीरिणांआत्माझषाणामिवतोयमीप्सितं हित्वामहांस्तंयदिसज्जतेगृहेतदामहत्त्वंवयसादंपतीनां
१४ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं हित्वागृहंसंसृतिचक्रवालंनृसिंहपादंभजताकुतोभयं १५

तुहरिभक्त्यसंभवात् कुतोमहतांगुणाःज्ञानवैराग्यादयोभवंति असतिअशाश्वतेविषयसुखेमनोरथेनबहिर्धावतःकुतोगु
णाःमहत्त्वंच १३ ननुहरिविमुखस्यगृहाद्यासक्तस्यापिलोकेमहत्त्वंदृश्यते सत्यंदृश्यते तदुपहासास्पदमितिसहेतुमाह हरिर्ही
ति यःयथाझषानांमीनानांमीप्सितंतोयमेवात्मा तेनविनाजीवनाभावात् महानतिप्रसिद्धोपिगृहेयदिसज्जते तदादंपतीनांमि
थुनानांक्षुद्रादिष्वपिप्रसिद्धवयसैवकेवलंयन्महत्त्वंनदेवतस्यभवतिनतुज्ञानादि मिथुनेषुपूज्यमानवृद्धेभ्यःपुंसांमहत्त्वंक्वा
लमिथुनेभ्यश्चवृद्धमिथुनानांमहत्त्वंयथेत्यर्थः १४ यस्मादेवंतस्मात्गृहंहित्वाकुतोभयंनृसिंहपादंभजनेत्यसुरानुपदिशति वी
दृशंगृहंरजस्तच्छारागाभिनिवेशःरजआदीनांमूलंकारणं अतएवसंसृतीनांजन्ममरणादीनांचक्रवालंमंडलमविच्छेदोयस्मात् १५

भा० केतुमालेपिकामदेवस्वरूपेणभगवान् आस्तइति शेषः किमर्थमास्ते अतआह लक्ष्म्याइति प्रजापतिःसंवत्सरः संवत्सरोवैप्रजापतिरितिश्रुतेः
तस्यदुहितरोराअभिमानिन्योदेवताः पुत्रादिवसाभिमानिन्योदेवताः तेषांचप्रियचिकीर्षया पुरुषायुषावर्षेनेनयान्यहोरात्राणितैःपरिसंख्या
४० नंगणनायेषां षट्त्रिंशत्सहस्राणामित्यर्थः यासांदुहितृणां महापुरुषस्यमहास्त्रंचक्रंतस्यतेजसाउद्विग्नमनसांपुत्राणांपुत्रीणांगर्भाव्य
सवःसंवत्सरांतेनिपतंति सभगवान्कामदेवरूपेण १६ रमांरमयन्स्वीयानिंद्रियाणिरमयते केनसाधनेनरमयत्तदाह अतीवसुललित
यागत्यायोविलासस्तेनविलसितोरुचिरोहासलेशोमंदस्मितंतत्सहितोय लोकस्वलीलातयाकिंचिदुत्तंभितउन्नमितंसुंदरंयत्भ्रूमंडलं

केतुमालेपिभगवान्कामदेवस्वरूपेणलक्ष्म्याःप्रियचिकीर्षयाप्रजायतेर्दुहितृणांपुत्राणांचतद्वर्षपतीनांपुरुषायुषाहोरात्र
परिसंख्यानांयासांगर्भामहापुरुषमहास्त्रतेजसोद्विग्नमनसांविध्वस्तांविध्वस्ताव्यसवःसंवत्सरांतेनिपतंति १६ अतीव
सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलयाकिंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रियार
मांरमयन्इंद्रियाणिरमयते १७ तत्तुभगवतोमायामयंरूपंपरमसमाधियोगनरमादेवीसंवत्सरस्यरात्रिषुप्रजापतेर्दु
हितृभिरुपेताहस्सुचतद्भर्तृभिरुपास्तइदंचोदाहरति १८ ओंह्रांह्रींह्रूं ओंनमोभगवतेहृषीकेशायसर्वगुणविशेषैर्वि
विलक्षितात्मनेआकूतीनांचित्तीनांचेतसांविशेषाणांचाधिपतयेषोडशकलायच्छंदोमयायान्नमयायामृतमयायसर्वमयायसहसेओज
सेबलायकांतायकामायनमस्तेउभयत्रभूयात् १९ श्रीराम् श्रीकृष्ण श्रीगोविंद श्रीगोपाल श्रीमाधव

तेनसुभगंवदनारविंदंतस्यश्रियारमांरमयन् इंद्रियाणिरमयते १७ रमांरमयतइत्तैर्भिः दिवसाधिष्ठातृभिरुपेताउपास्तेइदंच
मंत्रमुदाहरति १८ सर्वगुणविशेषैःश्रेष्ठवस्तुभिर्विविक्षितात्मलक्षीकृत आत्मायस्य आकूतीनांक्रियाणांसर्वानुभवसंस्काराणांचि
त्तीनांज्ञानानां चेतसांसंकल्पाध्यवसायादीनांविशेषाणांतत्तद्विषयाणांषोडशकलाअंशाएकादशेंद्रियपंचविषयलक्षणायस्यछं
दोमयायवेदोक्तकर्मप्राप्याय अन्नमयाय अन्नोपष्टंभ्यत्वात् अमृतमयायपरमानंदविकारवत्वात् सर्वमयायसर्वविषयत्वात् स ४०
हसेओजसेबलायतद्धेतुत्वात् एवंविधायकामायउभयत्रवचसामनसातेनमोस्तु १९ श्रीरामजयरामजयजयराम

4109
1981

त्वकामेनेववत्सेवकत्वादहंकृतार्थास्मि अन्यकामनयातुत्वामर्चयंत्यःपरिपूर्णमनोरथाःस्युरित्याह स्त्रियइति स्वतएवहृषीकाणा
मीश्वरंपतिंसंतत्वामाराध्ययाःस्त्रियोन्यंपतिंप्रार्थयंति पतिकामानादिकामाराधनंव्रतेषुप्रसिद्धं तासामपत्यादीनितिपतयो
नपातुंशक्ताः २० अतस्तेपतयएवनभवंत्याह सवाइति सर्वभूतःपतिः भवानेकएवनान्योयोभवानात्मलाभात्परमन्यदधिकं
नमन्यते इतरथाअन्याधीनस्त्वस्यनस्वतंत्रता अस्वतंत्रता नानात्वेचमंडलेश्वराणामिवमिथ्याथो भयस्यादित्यर्थः २१
किंचनिष्कामभजनेप्रार्थिताएवसर्वकामाभवंति सकामभजनेतुकामितमात्रंअनित्यंचेत्याह यास्त्रीतस्यउक्तलक्षणस्यते पाद

स्त्रियोव्रतैस्त्वांहृषीकेश्वरंस्वतोह्याराध्यलोकेपतिमाशासतेन्यं तासांनतेवैपरिपांत्यपत्यंप्रियंधनायूंषिय
तोस्वतंत्राः २० सवैपतिःस्यादकुतोभयःस्वयंसमंततःपातिभयातुरंजनं सएकएवेतरथामिथोभयंनैवात्मला
भादधिमन्यतेपरं २१ यातस्यतेपादसरोरुहार्हणंनिकामयेत्साखिलकामलंपटा तदेवरासीप्सितमीप्सितोर्चितोयद्भ
ग्नयाच्ञाभगवन्प्रतप्यते २२ मत्प्राप्तयेजेशसुरासुरादयस्तप्यंतउग्रंतपऐंद्रियेधियः ऋतेभवत्पादपराय
णान्नमांविंदंत्यहंत्वद्धृदयायतोजित २३

सरोरुहस्यार्हणंपूजामेवकामयेत् नफलांतरंसा अखिलेषुकामेषुलंपटासर्वान्कामान्प्राप्नोतीत्यर्थः ईप्सितमीप्सितफ
लांतरमाप्तुमपेक्षितःसन् अर्चितश्चेत्तर्हितदेवकंरासिददासि किंचयद्यतःफलभोगानंतरंभग्नायांच्यायाचितोर्थोयस्याः
सा प्रतप्यतेदुःखंप्राप्नोति तदेवरासि नतुनित्यं २२ ननुममार्हणकृतःसर्वकामप्राप्तिःत्वमेवहिकामार्थिभिः सेव्यसे अतआह
मत्प्राप्तयेब्रह्मादयस्तपस्तप्यंतकुर्वंति कथंभूताः ऐंद्रियसुखएवधीर्येषां अलुक्समासः तथापिभवत्पादपरायणादृतेमांनविंदंति
मत्कटाक्षविलसितविभूतिर्नलभंतइत्यर्थः यतःत्वय्येवहृदयंयस्यासाहं त्वत्परतंत्रत्वात्तदनुवर्तिनिभवविभ्रमपाभिन्नान्यमि
त्यर्थः २२

इदानींतत्कृपांप्रार्थयते सत्वमिति यद्दर्शनंविनानकश्चित्पुरुषार्थः सत्वंत्वदितित्वयायत्करांबुजंसात्वतोभक्तानांशीर्ष्णि अधोयिदूप
यान्यस्तंनत्वमाधिशीर्ष्णिनिधेहीतिशेषः कथंभूतंवंदितंसर्वकामवर्षिणंसद्भिः कृतं नचमयितवानादरः यतः हेवरेण्यभावत्सलिलस्म
बिभर्षि अहोचित्रमेतत्तमयिकेवलमनादरमात्रंभक्तेषुपरमाकृपाअतईश्वरस्यतत्वमाययाईहितंतत्कोवितर्कयितुंसमर्थः २४ २५
इदंवक्ष्यमाणंमंत्रंसत्वायसत्वप्रधानायमुख्यतमायप्राणायसूत्रात्मनेमहामत्स्यायनमः २६ ऊरुस्वनोवेदात्मकोनादोनादोयस्य य
इदंविश्वंब्राह्मणादिनाम्नाविधिनिषेधात्मकेनतेनवशेअनयत्नियमितवान्सःत्वंईश्वरः तथाचश्रुतिः तस्यवाकृतंतिर्नामनीति २७

सत्वंममाप्यच्युतशीर्ष्णिवंदितंकरांबुजंयत्त्वदधायिसत्वतां बिभर्षिमांलक्ष्मवरेण्यमायमाकईश्वरस्येहितमीहितुंप्रभुरिति
२४ रम्यकेचभगवतःप्रियतमंमात्स्यमवताररूपंतद्वर्षपुरुषस्यमनोःप्राक्प्रदर्शितंसइदानीमपिमहताभक्तियोगेनराधयती
दंचोदाहरति २५ ॐनमोभगवतेमुख्यतमायनमःसत्वायप्राणायौजसेसहसेबलायमहामत्स्यायनमइति २६ अंतर्बहिश्चा
खिलंलोकपालैरदृष्टरूपोविचरःस्युरुस्वरः सईश्वरस्त्वंयइदंवशेनयन्नाम्नायथादारुमयींनरःस्त्रियं २७ यंलोकपालाःकि
लमत्सरज्वराहित्वायतंतोपिपृथक्समेत्यच यातुंनशेकुर्द्विपदश्चतुष्पदःसरीसृपस्थाणुयदत्रदृश्यते २८ भवान्युगांतार्ण
वऊर्मिमालिनिक्षोणीमिमामोषधीवीरुधांनिधिं मयासहोरुक्रमतेऽजओजसातस्मैजगत्प्राणगणात्मनेनमइति २९ श्रीः

ननुइंद्रादयोवशेनयंतिलोकपालकत्वात्कुतोहंतत्रायमिति मत्सरएवज्वरोयेषांते यंलित्वाद्विपदश्चतुष्पदःसरीसृपंजंगमंस्था
णुंस्थावरंचयत् अत्रदृश्यतेतत्किंचिदपिपातुंनशक्ताःसःत्वमेवप्राणरूपेणपालकईश्वरश्चेत्यर्थः तथाचश्रुतिः ताअहिंमंताहम्
क्रमस्मीत्यादि २८ अवतारचरितमाह भवानिमांक्षोणींमयामनुनासहमत्स्यहितंत्वत्यध्याहारः ऊर्मिमाले अतिप्रलयार्ण
वे ओजसाक्रमतेविचरतियद्वापातुमित्यस्यानुषंगः क्षोणीपातुंक्रमतेउत्सहतइत्यर्थः यतः अजः कीदृशीं ओषधीनांविरुधां
चनिधिंआश्रयंमतातस्मैनमः जगतोयःप्राणगणस्तस्यात्मनेनियंत्रे २९ ७ ७ ७ ४८

७॥ १३८१

तन्त्रिपतमांतांप्रियतनुंतस्मैनमः ३० मंत्रमाह अकूपारायकूर्माय सर्वैःसंपूर्णैःसत्वगुणोविशेषणंयस्य नतुउपलक्षितंस्था
नंयस्यवारिचरत्वात् वपुषोवर्ष्मणेयसेकालानवच्छिन्नाय भूम्नेसर्वगताय अनवस्थाय आधाराय ३१ निजमायया पिंसंप्रकाशितंएत
दयंस्वरूपंदृश्यंपृथिव्यादियस्यैवरूपंयतः पृथक्नास्ति कथंभूतंबहुभिरूपैःरूपितंप्रकाशितंयस्यचसंख्यानास्ति कुतः अयथा
मिथ्यैवोपलंभनात् नहिमरीचिजलमेतावदितिसंख्यातुंशक्यते अव्यपदेशरूपिणे अनिरुक्तनपंचाकाराय ३२ बहुरूपत्वंद

हिरण्मयेपिभगवान्निवसतिकूर्मतनुंबिभ्राणस्तस्यप्रियतमांतनुंअर्यमासहवर्षपुरुषैःपितृगणाधिपति
रुपधावतिमंत्रमिमंचानुजपति ३० ओंनमोभगवतेअकूपारायसर्वसत्वगुणविशेषणायनोपलक्षितस्थाना
यनमोवर्ष्मणेनमोभूम्नेनमोवस्थानायनमस्ते यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपंबहुरूपरूपितं संख्यानय
स्मास्त्ययथोपलंभनात्तस्मैनमस्तेव्यपदेशरूपिणे ३२ जरायुजंस्वेदजमंडजोद्भिजंचराचरंदेवर्षिपितृभूतमैंद्रियं
द्यौःखंक्षितिःशैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेयएकः ३३ यस्मिन्नसंख्येयविशेषनामरूपाकृतौकविभिः
कल्पितेयंसंख्यायया तत्त्वदृशापनीयतेतस्मैनमःसांख्यनिदर्शनायतइति ३४ ७ ७

शयन् तस्येश्वराद्व्यतिरेकमाह जरायुजेति द्वीपग्रहर्क्षमित्यभिधेयः त्वमेवकः नत्वद्व्यतिरिक्तमस्ति सर्वंखल्विदंब्र
ह्मेत्यादिश्रुतेरित्यर्थः ३३ सप्रपंचतामनूद्यतन्निरासेनप्रणमति सप्रपंचतामनूद्यतन्निरासेनप्रणमति यस्मिन्निति अ
संख्येया अनंताविशेषायेषांतानिनामानिरूपाण्याकृतयश्चयस्य तादृशेयस्मिन्त्वयिकविभिःकपिलादिभिरियंचतुर्विं
शत्यादिसंख्याकल्पितासतीययातत्त्वदृशायेनतत्वज्ञानेनापनीयतेतस्मैनेसांख्यसिद्धांतरूपायपरमार्थरूपायेतिवा ३४

इषाभूरूपधावतीत्यन्वयः मंत्रस्तत्त्वेनलिंग्यतइतितथातस्मै यज्ञाः अयूपाः क्रतवःसयूपाः तद्रूपायनमः अतएवमहांतोऽध्वरा अवयवभूतायस्य कर्मणाऽऽत्मक्लायकर्मद्वापयज्ञानुष्ठात्रे त्रियुगायकृतयुगेयज्ञाभावात यज्ञाकलियुगेछन्नत्वात ३६ कवयोविद्वांसोविपश्चितोनिपुणाः गुणाभ्रदेहेंद्रियादिषुमथ्नंति विविच्यंतिमथ्यविवेकसाधनेनसवसाक्रियार्थैःकर्मभिः तत्फलभूतगूढम प्रकाशमानंदिदृक्षवःएवंमंथनेईरितःप्रकटितआत्मास्वरूपंयस्यतस्मैनमः ३७ मथनमेवदर्शयंल्लाह द्रव्यंविषयः क्रियाइंद्रि

उत्तरेषुचकुरुषुभगवान्यज्ञपुरुषः कृतवराहरूपआस्ते तंतुदेवीहधात्री सहकुरुभिरस्खलितभक्तियोगेनोपधावतिइमांचपरमामुपनिषदमावर्त्तयति ३५ ओंनमोभगवतेमंत्रतत्त्वलिंगाययज्ञक्रतवेमहाध्वरावयवायमहापुरुषायनमःकर्मशुक्लायत्रियुगायचनमस्ते ३६ यस्यस्वरूपंकवयोविपश्चितोगुणेषुदारुष्विवजातवदसं मथ्नंतिमथ्नामनसादिदृक्षवोगूढंक्रियार्थैर्नमईरितात्मने ३७ द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने अन्वीक्षयांगातिशयात्मबुद्धिभिर्निरस्तमायाकृतयेनमोनमः ३८ ७ ७ ७

यव्यापारः हेतुर्देवता अयनंदेहः ईशः कालः कर्त्ता अहंकारः एतैर्मायया गुणैःकार्यरूपलक्षणैःवस्तुत्वेननिरीक्षितायआत्मा तस्मै अन्वीक्षयाविचारेण अंगैर्यमनियमादिभिः अतिशयात्मानिश्चयवती बुद्धिर्येषांतैः निरस्तामायानिमित्ता आकृतिर्यस्मात्तस्मै यद्वा द्रव्येषुशब्दादिषुयाक्रियावृत्तिः तस्यहेतवः इंद्रियाणितेषां अयनंशरीरंमायागुणैःइंद्रियैः वस्तुत्वेनज्ञातोयः आत्मातस्मैनमः पुनःकथंभूताय अन्वीक्षयाज्ञानेन अंगंशरीरंअतिशेते अतिक्रम्यतिष्ठतीति अंगातिशयंब्रह्मतस्मिन्नात्मा बुद्धिर्येषांतैः ३८

713/1381

तदेवंनिर्गुणरूपेणनत्वापरमेश्वररूपेणप्रणमतिकरोतीति यस्येक्षितुरीशार्थमीक्षितं अत्यंतानिच्छयाईक्षणायोगात्स्वार्थेतुनेक्षितं विश्वस्थित्यादिस्वगुणैर्मायाकरोति तस्याज्जड्त्वेपीश्वरसन्निधानात्प्रवृत्तिरदृष्टांतेनाह यथा अयोलोहंग्रावाणो अयस्कांतान्निमित्तात्भ्रमतितदाश्रयंतदभिमुखंसत गुणानांकर्मणांजीवादृष्टानांचसाक्षिणेतस्मैनमः ३९ अवतारचरितमाह प्रमथ्येति योजगतामादिः करणतःसूकरः मोपृथ्वीं भग्नदंष्ट्रदंष्ट्राग्रेकृत्वारसातलादारभ्यउद्गतप्रलयार्णवात इभोगजइवनिरगात ततश्च

करोति विश्वस्थितिसंयोदयंयस्येप्सितंनेप्सितमीक्षितुर्गुणैः मायायथायोभ्रमतेतदाश्रयंग्राव्णोनमस्तेगुणकर्मसाक्षिणे ३९ प्रमथ्यदैत्यंप्रतिवारणंमृतेयोमांरसायाजगदादिसूकरः कृत्वाग्रदंष्ट्रेनिरगादुदन्वतः क्रीडन्निवेभःप्रणतास्मितंविभुं ४० इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभुवनकोशवर्णनेनामाष्टादशोऽध्यायः १८ श्रीशुकउवाच किंपुरुषवर्षेभगवंतमादिपुरुषंलक्ष्मणाग्रजंसीताभिरामंतच्चरणसन्निकर्षाभिरतः परमभागवतोहनुमान्सहकिंपुरुषैरविरतभक्तिरुपास्ते १ आर्ष्टिषेणेनसहगंधर्वैरनुगीयमानांपरमकल्याणींभर्तृभगवत्कथांसमुपशृणोतिस्वयंचेदंगायति २ ओंनमोभगवतेउत्तमश्लोकायनमआर्यलक्षणशीलव्रतायनमउपशिक्षितात्मनेउपासितलोकायनमःसाधुवादनिकषणायनमोब्रह्मण्यदेवायमहापुरुषायमहाराजायनमइति ३ ७ ७

प्रतिगजतुल्यंरसायांहिरण्याक्षंप्रमथ्यपःक्रीडन्स्थितःतंविभुंप्रणतास्मीत्यन्वयः ४० इतिपंचमस्कंधेटीकायांअष्टादशोऽध्यायः १८ ईनविंशेकिंपुरुषैर्भारतेचोपवर्ण्यते सेव्यसेवकभावश्चभारतश्रैष्ठ्यमेवच १ आर्ष्टिषेणनामगंधर्ववरःतत्प्रभृतिभिर्गंधर्वैर्भर्तारासोभगवांश्चतस्यकथां २ आर्याणांलक्षणानिशीलंवृत्तंचयस्मिन्उपशिक्षितात्मनेसंयतचित्तायउपासितोनुरक्तोलोकोयेन साधुवादःसाधुत्वप्रसिद्धिः तस्यनिकषणायनिकषाश्मवन्निर्द्धारायस्मानायपरमसीमइत्यर्थः ३

भा० श्रीरामपरमार्थरूपेणप्रणमति यदेकंवेदांतेषुप्रसिद्धं तत्त्वंतत्प्रपद्ये कथंभूतं विशुद्धश्चासावनुभवश्चसएवमात्रास्वरूपंयस्य वि ५०
शुद्धत्वेहेतुः प्रशांतंतत्रापिहेतुः स्वतेजसास्वस्वरूपप्रकाशेनध्वस्तागुणानांविविधाजाग्रदाद्यवस्थायस्मिन् अनुभवमात्रत्वेहेतुः
५० प्रत्यग्दृश्यादन्यत्तत्कृतः अनामरूपं ननुवस्तुतएवंभूतस्यापिजीवस्योक्तसर्वविपर्ययोदृश्यते तत्राह निरहं अहंकाराभावा
त्तथाविपरीतमित्यर्थः ननुःश्रीरामरूपंनैवंप्रतीयतेतत्राह सुधीयापुंसाउपलभ्यतइत्युपलंभनं शुद्धचित्तेनब्रह्मत्वेनैवोप
लभ्यइत्यर्थ ४ ननुकथंतर्हिदशरथपुत्रत्वंतत्राह विभोर्मर्त्यावतारस्तुरक्षसोरावणस्यवधाय तस्यमनुष्यादन्यतोवधत्वात

यत्तद्विशुद्धानुभवमात्रमेकंस्वतेजसाध्वस्तगुणव्यवस्थं प्रत्यक्प्रशांतंसुधियोपलंभनंह्यनामरूपं
निरहंप्रपद्ये ४ मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः कुतोन्यथास्युर्रमतस्वआत्म
नःसीताकृतानिव्यसनानीश्वरस्य ५ नवैसआत्मात्मवतांसुहृत्तमःसक्तस्त्रिलोक्यांभगवान्वासुदेवः न
स्त्रीकृतंकश्मलमाप्नुवीतनलक्ष्मणंवापिविहातुमर्हति ६ ५ ५

नकेवलमेतावत् किंतुइहसंसारेस्त्रीसंगादिकृतंदुःखंदुर्वारंइतिमर्त्यानांशिक्षणंचशिक्षार्थमपीत्यर्थः अन्यथास्वेस्वरूपेर
ममाणस्यजगदात्मनःसीताविरहकृतानिव्यसनानिकुतःस्युः ५ विषयासक्त्यभावेनव्यसनानर्हत्वमुपपादयति नवैसभग
वान् त्रिलोक्यांक्वापिसक्तः यतःआत्मवतांधीराणांआत्मासुहृत्तमश्च अतोनस्त्रीकृतंमोहंप्राप्नुयात् नलक्ष्मणंचेति तदेवाह
देवदूतेनश्रीरामसंमंत्रयताविज्ञापितंयत् आवयोर्गोष्ठींकुर्वतोःयःअत्रागतःसत्वयावध्यइति इत्युक्त्वानगराद्बहिर्देवागा
रंगतात्तद्देवद्वारिस्थितंलक्ष्मणंदुर्वाससमागतंविज्ञापयितुंप्रविष्टंहंतुमुद्यतोरामःवसिष्ठवाक्यात्तंतत्याजतत्त्वनयुज्यतइत्यर्थः ६ ५०

715
1981

अतःश्रीरामएवसर्वैःसेव्यइतिवक्तुंनतस्यतोषहेतुःसत्कुलजन्मादिकिंतुभक्तिरेवेत्याह नजन्मेतिमहतःपुरुषाज्जन्मसहतःश्री
रामस्यचेतिवासोभगंसौदर्यं आकृतिर्जातिःतोषहेतुर्नयद्यस्मात्तंजन्मादिभिर्विसृष्टानत्यक्तानपिनोवनचरान्वत अहोलक्ष्म
णस्याग्रजोपसखित्वेकृतवान् अतोनतस्यतोषहेतुःसत्कुलजन्मादिकिंतुभक्तिरेवेत्यर्थः ७ तस्मात्सुरोवा अन्योवाकोपि
श्रीराममेवसर्वप्रकारेणभजेत् सकृतज्ञं अल्पस्यापिभजनंबहुमानितं उत्तरान्कोशलान् अयोध्यावासिनःदिवं अनयत्

नजन्मनूनंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः तैर्यद्विसृष्टानपिनोवनौकसश्चकारसख्येबतलक्ष्म
णाग्रजः ७ सुरोसुरोवाप्यथवानरोनरःसर्वात्मनायःसुकृतज्ञमुत्तमं भजेतरामंमनुजाकृतिंहरिंयउत्तराननय
त्कोशलान्दिवं ८ भारतेपिवर्षेभगवान्नरनारायणाख्यो आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोप
रमात्मोपलं॰ भनमनुग्रहायात्मवतामनुकंपयातपोव्यक्तगतिश्चरति ९ तंभगवान्नारदोवर्णाश्रमवतीभिर्भा
रतीभिःप्रजाभिर्भगवत्प्रोक्ताभ्यांसांख्ययोगाभ्यांभगवदनुभावोपवर्णनंसावर्णेरुपदेक्ष्यमाणपरमभक्तिभावेनो
पसरति इदंचाभिगृण्हाति १० ॐनमोभगवतेउपशमशीलायोपरतानात्म्यायनमोकिंचनवित्तायऋषिऋषभाय
नरनारायणायपरमहंसपरमगुरवे आत्मारामाधिपतयेनमोनमइति ११ गायतिचेदं कर्तास्यसर्गादिषुयोनबध्यतेन
हन्यतेदेहगतोपिदैहिकैः द्रष्टुर्नदृग्यस्यगुणैर्विदूष्यतेतस्मैनमोसक्तविविक्तसाक्षिणे १२ ७

तवान् ८ उपचितधर्मादिभिरात्मोपलभ्यतेयेनतत्तपश्चरति तत्रउपशमःइंद्रियाणांसंयमःउपरमोनिरहंकारता आत्म
वतामनुग्रहायनस्वार्थंईश्वरत्वात् ९ भगवदनुभावउपवर्ण्यतेयेनपंचरात्रेणतत्सावर्णैर्मनोःउपसरतिसेवते इमंमंत्रमभि
गृह्णाति १० उपरतानात्म्यायनिरहंकाराय ११ असक्तश्चासौविविक्तसाक्षीचतस्मैनमः असक्तत्वदर्शयति अस्यविश्व
स्यसर्गादिषुकर्तापियोनबध्यतेअहंकर्त्रेतिनमन्यते विविक्तत्वमाह द्रष्टुर्दृश्यंनदृश्यतेनविक्रियते १२ ७

योगकौशलंनिरूपयन्योगंप्रार्थयते इदमिति त्रिभिः हेयोगेश्वरहिरण्यगर्भः यद्योगनैपुण्यंजगाद इदमेवतत्तुकिंजन्मप्रभृतिभ
न्या अंतकाले पुमांस्त्वपिमनोधारयेदितियत्कथंभूतः सन् उज्झितदुःकलेवरं तदभिमानोयेन १३ अन्यथातस्यशास्त्राभ्यासा
दिश्रमोव्यर्थइत्याह ऐहिकामुष्मिककामेषुलंपटान्सर्वः सुतादिषुयोगक्षेमंचिंतयन्कुत्सितस्यकलेवरस्य अत्ययात् मृत्योः पथाशंके

इदंहियोगेश्वरयोगनैपुणंहिरण्यगर्भोभगवान्जगादयत् यदंतकालेत्वयिनिर्गुणेमनोभक्त्यादधीतोज्झितदुःकलेव
रं १३ यथैहिकामुष्मिककामलंपटः सुतेषुदारेषुधनेषुचिंतयन् शंकेतविद्वान्कुकलेवरात्ययाद्यस्तस्ययत्नः श्र
मएवकेवलं १४ तन्नः प्रभोत्वंकुकलेवरार्पितांत्वन्माययाहंममतामधोक्षज भिंद्यामयेनाचिरवयेस।दुर्भिदांविधे
हियोगंत्वयिनःस्वभावमिति १५ भारतेप्यस्मिन्वर्षेसरिच्छैलाः संतिहिबहवःमलयोमंगलप्रस्थोमैनाकस्त्रिकूटऋष
भः कूटकः कोल्लकः सह्योदेवगिरिः ऋष्यमूकः श्रीशैलोमहेंद्रोवारिधारोविंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रोद्रो
णश्चित्रकूटोगोवर्धनोरैवतकः ककुभोनीलोगोकामुखः शुक्तिमान् ऋक्षगिरिः पारियात्रोद्रोणश्चित्रकूटोगोवर्धनोरैव
तकः ककुभोनीलोगोकामुखइंद्रकीलः कामगिरिरितिचान्येसह्स्रशःशतसहस्रशः शैलास्तेषांनितंबप्रभवानदानद्यश्च
सत्यसंख्याताः १६ एतासामपोभारत्यः प्रजानामभिरेवपुनंतीनामात्मनाचोपस्पृशंति १७ चंद्रवशाताम्रपर्णीअ
वटोदाकृतमालावैहायसीकावेरीवेणापयस्विनीशर्करावर्तातुंगभद्राकृष्णावेण्याभीमरथीगोदावरीनिर्विंध्यापयोष्णीतापीरे
वासुरसानर्मदाचर्मण्वतीसिंधुशोणश्चनदौमहानदीवेदस्मृतिऋषिकुल्यात्रिसामाकौशिकीमंदाकिनीयमुनासरस्वतीदृषद्वती
गोमतीसरयूरोघवतीसप्तवतीसुषोमाशतद्रुश्चंद्रभागामरुद्वृधावितस्ताअसिक्नीविश्वेतिमहानद्यः १८ ७

त तथाविद्वानपिसन्नयः शंकेत तस्ययत्नः शास्त्रपठनंश्रमएव १४ यस्माद्विदुषोपिइयमेवदशातस्मात्हेप्रभोआस्तांपाशादेवप्यर्थं
प्रार्थयति हेअधोक्षजत्वमेवनायोगंविधेहिकीदृशंत्वयिस्वभावंसहजवासनारूपंयेनयोगनवयंत्वन्माययानःकुकलेवरे अर्पितां अहंममतां
शीघ्रंभिंद्यां अत्यजेमस्त्दुर्भिदांउपायांतरैः सर्वथात्यक्तुमशक्यां १५ इलावृतवदस्मिन्नपिवर्षेसरितःशैलाश्चबहवस्संतिनितंबप्रभवास्तेभ्यः
संभूताः सहस्रशःसंति १६ आत्मनाचदेहेनाप्युपस्पृशंति १७ १८

717
1981

लब्धंजन्मयैस्तैः पुरुषैः सात्विकादिस्वकृतेनकर्मणादिव्यादिगतय आत्मनोविधीयंतेसाध्यंते हियस्मात्सर्वास्वगतयःकर्मानुसा
रेणसर्वेषांभवंति मस्यवर्णस्यपद्विधानंमोक्षप्रकारः सन्यासवर्णस्यत्वादिनदनतिक्रमेणास्मिन्वर्षेन्नणामपवर्गोप्यभवति एतच्च
कर्मादिबहुसाधनसंभावाभिप्रायेणोक्तंनत्वन्यत्रापवर्गाभावेन तदुपपत्तिविवादरायणः संभवादितिदेवानामपिमोक्षस्यसूचित
त्वात् १९ अपवर्गस्यस्वरूपमाह योसाविति अनात्म्ये आत्मनिभवमात्म्यंरागादितद्रहिते अनिरुक्तेवाचामगोचरे अनिलयने

अस्मिन्नेववर्षेपुरुषैर्लब्धजन्मभिःशुक्ललोहितकृष्णवर्णेनस्वारब्धेनकर्मणादिव्यमानुषनारकगतयोबह्व्य आत्मन
अनुपूर्व्येणसर्वाह्येवसर्वेषांविधीयंते यथावर्णविधानमपवर्गश्चापिभवति १९ योसौभवतिसर्वसंगतात्मन्यनात्म्यनि
रुक्तेनिलयनेपरात्मनिवासुदेवेनन्यनिमित्तभक्तियोगलक्षणनानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेणयदाहिमहापुरु
षपुरुषप्रसंगः २० एतदेवहिदेवागायंति अहोअमीषांकिमकारिशोभनंप्रसन्नएषांस्विदुतस्वयंहरिः येर्जन्मलब्धं
नृषुभारताजिरेमुकुंदसेवौपयिकंस्पृहाहिनः २१ ७ ७ ७

अनाधारे अनन्यनिमित्तोहेतुर्कोभक्तियोगएवलक्षणंस्वरूपंयस्य कथंभवति नानागतीनांनिमित्तंयोविद्याग्रंथिस्त
स्यरंधनंछेदनंतद्द्वारेणमहापुरुषपुरुषाविष्णुभक्तास्तैः प्रकृष्टसंगायदाभवतितदा २० एतदेवमानुष्यमेवसर्वपुरुषार्थसा
धनंदेवापिगायंति अमीषांनृभिः उतस्वित् अथवास्वयमेवसाधनंविनैवहरिरेषांप्रसन्नोभूत् एवंभूतस्यपुण्यस्यदुष्करत्वा
त् भारताजिरेभरतांगणेनकेवलंस्वर्गेहेतव्यत् तन्मुकुंदसेवौपयोगिनृषुजन्मयैर्लब्धं २१ ७ ७

स्य२ हामेवाह कमित्यादि सप्तभिः दुष्करैः क्रत्वादिभिर्नः फाल्गुनः तृष्णेन धुजयेन स्वर्गप्राप्त्यादिभिः किं न किंचित्फलं कृतः यत्र नाराय
५२ णपादपंकजस्मृतिर्नास्ति प्रत्युत अतिशयितादिंद्रियाणामुत्सवात् भोगात् विष्णोः स्मृतिः प्रमृष्टा स्यात् २२ क्षणमल्पमेवा
युषां वरत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरेः पदं संयांति २३ अतः यत्र वैकुंठकथामृतनद्यो न सं
ति तदाश्रयाः कथापगाश्रयाः महांतो न त्याद्युत्सवाः यज्ञेशमखाश्च पूजा न सः सुरेशस्य ब्रह्मलोकोऽपि लोको न सेव्य
२४ अत्रमुक्षत्तनरा नवनिंदति प्राप्ताइति ज्ञानं च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन संभृता पूर्णा अपुन

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फाल्गुना न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयें
द्रियोत्सवात् २२ कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरं क्षणेन मर्त्येन कृतं मनस्विनः सं
न्यस्य संयांत्यभयं पदं हरेः २३ न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः न यत्र यज्ञेशम
खा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यतां २४ प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां
न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनं २५ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधि
मंत्रवस्तुतः एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः २६ ८२ श्रीः

र्भवाय मोक्षाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकात् मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरंति तर्हि य
था बध्यंते तद्वत् २५ अहो भारतवासिनां भाग्यमित्याह यैरिति अग्नेर्जुष्टं निर्वपामि इत्येवं भागशो निरुप्तं पृथक्कृतं कथं
विधानप्रकारेण मंत्रेण च वस्तुतः द्रव्यं चरुपुरोडाशादि भिर्दन इष्टं देवतामुद्दिश्य त्यक्तं निरुप्तं च मम इदमिति स्वीकृत्य त्यागान ५२
तरं भातीत्यर्थः पृथगिंद्रादिनामभिराहुतः आहूतः आशिषां प्रभुः स्वयं पूर्णोऽपि हरिः २६ ८७ श्रीः

713/1981

तत्रापि निष्कामाः कृतार्थाः स्युः सत्यमिति प्रार्थितः सन्नर्थितं ददातीति सत्यं अथापि परमार्थदो नैव भवत्येव यद्यस्मात्
यतो दत्तानंतरं पुनरस्यार्थिता भवति ननु नार्थितश्चेत् किमपि न दद्यादित्याशंक्याह अनिच्छतां निष्कामानां पिधानमाच्छादकं स्व
व कामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति २७ स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्य अन्यस्यापि क

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्ल
वं २० यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं तेनाजनाभे स्मृतिमज्जन्मनः स्याद्वर्षे हरिर्यद्भजतां
शं तनोति २८ श्रीशुक उवाच जंबुद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमाम्
दीं परितो निखनद्भिरुपकल्पितान् तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो
लंकेति २९ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ३० इति श्रीभागवते
महापुराणे पंचमस्कंधे जंबूद्वीपवर्णनं एकोनविंशोऽध्यायः १९ ऋषिरुवाच अतः परं प्लक्षा
दीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते १ जंबूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना
परिवेष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योप
वनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज
इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम २

र्मणः स्वर्गसुखावशेषः फलात् अवशेषितं यदि किंचिदस्ति तेन अजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृशं स्मृतिमत् कुत्र हरिरेव मय
इत्यनुसंधानयुक्तं यतो हरिः भजतां शं सुखं तनोति २८ २९ ३० इति पंचमटीकायां एकोनविंशोऽध्यायः १९ विंशे प्लक्षा
दिषट्द्वीपमानमहासहार्णवैः लोकालोकस्थितिं चांतर्बहिर्भागादिमानतः १ तावता लक्षविस्तारेण परिक्षिप्तः परिवेष्टितः उ
पान्तिष्ठतीति आकलय्य समाप्य २

भा० अभिज्ञाताः प्रसिद्धाः सप्तैव अत्यैव पर्वतान्नद्यश्च सहस्रशः संतीत्यर्थः २ मानसोत्तरस्य मंडलाकारत्वाके रेतेषु प्लक्षादिपंचद्वीपेषुवर्ण ५०
द्वयास्तिर्यक् रेखाकाराउभयतोब्धिस्पृशंतीतिगम्यते अन्यथासप्तभिः सप्तभिः सपूर्वचर्षविभागासंभवाच्चवंतवर्षाणां पूर्वादिक
५२ मोक्षेश्च यासांजलोपस्पर्शनेन विधूतरजस्तमश्चपांहंसादयोब्राह्मणादिस्थानीयाः विबुधोपमसंदर्शनेकुमस्वेदादिरहितंरूपंप्र
जननमपत्योत्पादनंचएषां ४ विगीता अपद्वीपमंत्राव्याख्यायंते प्रत्नस्यपुराणपुरुषविष्णोर्यद्रूपंसत्यमिमाहिशरणंव्रजेम कथंभूतं

शिवंयवः यसंकम्भद्रंशांतंक्षेममस्रतमभयमितिवर्षाणितेषुगिरयोनद्यश्चसप्तैवाभिज्ञाताः ३ मणिकूटोवज्रकूटःइ
न्द्रसेनोज्योतिष्मान्सुपर्णोहिरण्यष्ठीवोमेघमालइतिसेतुशैलाः अरुणान्नृम्णांगिरसीसावित्रीसुप्रभातात्र
तंभरासत्यंभरेतिमहानद्यः यासांजलोपस्पर्शनविधूतरजस्तमसाहंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारोवर्णाः संह
स्रायुषोविबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारंत्रैय्याविद्ययाभगवंतंत्रयीमयंसूर्यमात्मानंयजंते ४ प्रत्नस्यविष्णोरू
पंयत्सत्यस्यव्रह्मणअमृतस्यमृत्योश्चसूर्यमात्मानमीमहीइति ५ प्लक्षादिषुपंचसुपुरुषाणामायुरिंद्रियमोजः
सहोबलंबुद्धिविंक्रमइतिचसर्वेषामौत्पत्तिकीसिद्धिरविशेषेणवर्तते ६ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतोयथा
तथाद्वीपोविशाल्मलोद्विगुणविशालः समानेनसुरोदेनावृतः परिवृंक्ते ७ यत्रदैवशाल्मलीप्लक्षायामायस्यांचवि
ल्वनिलयमाहुर्भगवतः छंदस्तुतः पतत्रिराजस्यसद्वीपहूतयउपलक्ष्यते ८ तद्द्वीपाधिपतिः प्रियव्रतात्मजोयज्ञबा
हुः स्वसुतेभ्यः सप्तभ्यः स्वनामानिसप्तवर्षाणिविभक्तयामासरोचमानंसौमनस्यंरमणकंदेववर्षंपारिभद्रमाप्यायन
मविज्ञानंइति ९ तेषुवर्षाद्रयोनद्यश्चसप्तैवाभिज्ञाताः स्वरसःशतशृंगोवामदेवःकुंदःकुमुदःपुष्पवर्षःसहस्रश्रुतिरिति अ
नुमतोसिनीवालीसरस्वतीकुहूरजनीनंदाराकेति १०

सत्यादीनामात्मानंअधिष्ठातारं तत्रसत्यमनुष्ठीयमानोधर्मः ऋतंप्रमीयमानोधर्मः ब्रह्मणः तद्बोधकस्यवेदस्य अमृतस्यशुभ
फलस्यमृत्योः अशुभफलस्य अधिष्ठातारंसूर्यंव्रजेमसुपर्णासिगरुत्मामत्रिवृतेशिरइत्यादिश्रुतेः ५ ६ ७ छंदोभिःस्वाव ५३
यवभूतेःविष्णुंस्तौतीतिछंदःस्तुतः तस्यद्वीपस्यहूतव्यपदेशाय ८ ९ १० ७ ७

721
1381

११ स्वगोभिःस्वरश्मिभिः अंधः अन्नंसोमोनोराजा अस्तु आभिमुख्येनभवतु कृष्णपादेनु अविवस्वपासंध्याभावः १२ एवंसुरो
दाद्वहिर्धृतोदेनावृतः कुशद्वीपइत्यन्वयः स्वशाष्पाणिस्वकोमलाशिखाः तासांरोचिषादिशोविराजयति १३ १४ १५ १६

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरइषुधरसंज्ञाभगवंतंवेदमयंसोममात्मानंवेदेनयजंते ११ स्वगोभिःपितृदेवे
भ्योविभजन्कृष्णशुक्लयोः प्रजानांसर्वासांराजाअंधःसोमोनआस्त्विति १२ एवंसुरोदाद्वहिस्तद्द्विगुणस्समानेना
वृतोघृतोदेनयथापूर्वंकुशद्वीपोयस्मिन्कुशस्तंबोदेवकृतस्तत्द्वीपाख्यापनोज्वलनइवापरः स्वशष्परोचिषादिशो
विराजयति १३ तद्द्वीपपतिः प्रैयव्रतोराजन्हिरण्यरेतोनामस्वंद्वीपंसप्तभ्यः स्वपुत्रेभ्योयथाभागंविभज्यस्व
यंतपआतिष्ठत १४ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यस्तेषांवर्षेषुसीमागिरयो
नद्यश्चज्ञाताः सप्तैवचक्रश्चतुःशृंगःकपिलश्चित्रकूटोदेवानीकऊर्ध्वरोमाद्रविणइति १५ रसकुल्यामधुकुल्या
मित्रविंदाश्रुतविंदादेवगर्भाघृतच्युतामंत्रमालेतियासांपयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुला
कसंज्ञाभगवंतंजातवेदसरूपिणंकर्मकौशलेनयजंते १६ परस्यब्रह्मणःसाक्षाज्जातवेदोसिहव्यवाट्देवानां
पुरुषांगानांयज्ञेनपुरुषंयजेति १७ तथाबहिःक्रौंचद्वीपोद्विगुणःस्वसमानेनक्षीरोदेनपरितउपक्लृप्तःउपाव
तोयथाकुशद्वीपोघृतोदेन १८ यस्मिन्क्रौंचोनामपर्वतराजोद्वीपनामनिर्वर्तकआस्ते योसौगुहप्रहरणोन्म
थितनितंबकुंजोपिक्षीरोदेनासिच्यमानोभगवतावरुणेनाभिगुप्तोविभयोबभूव १९

/ हेजातवेदः त्वंसाक्षात्परस्यब्रह्मणोहरेर्हव्यवाट् असि अतोदेवानांयज्ञेनपुरुषंहरिमेवयज अंगानांनाम्नादत्तंअग्नेस
मर्पयेत्यर्थः १७ उपक्लृप्तोवेष्टितःयथाकुशद्वीपोघृतोदेनवृतः १८ गुहस्यकार्तिकेयस्यप्रहरणेन आयुधेनउन्मथितानितंबाःकुंजा
निचयस्यवरुणेनरक्षमाणस्तिष्ठति १९

भा० स्वयंभगवान्ज्ञानीपरमकल्याणयशोयस्य २० २१ तस्यदरेश्वरणारविंदंशरणंजगाम २१ अपोमयंअउमयं२२ षं०
हेआपः पुरुषवीर्याईश्वरातलब्धसामर्थ्याः स्थभवथ अतएवभूर्भुवःस्वः त्रैलोक्यंपुनंत्यः ताःभवंत्योनोस्मकंस्य
५४

तस्मिन्नपिप्रैयव्रतोघृतपृष्ठोनामाधिपतिः श्वेतद्वीपेवर्षाणिविभज्यतेषुपुत्रनामसुसप्तरिक्थादानव
पान्निवेश्यस्वयंभगवान्भगवतः परमकल्याणयशसआत्मभूतस्यहरेश्वरणारविंदमुपजगाम २० आमोम
न धुरुहोमेघपृष्ठःसुधामाभ्राजिष्ठोलोहितार्णोवनस्पतिरितिघृतपृष्ठसुतास्तेषांवर्षगिरयः सप्तसप्तैवनद्यश्चा
भिख्याताः शुक्लोवर्द्धमानोभोजनउपबर्हणोनंदोनंदनःसर्वतोभद्रइति २३ अभयामृतौघाआर्यका
तीर्थवतीवृत्तिरूपवतीपवित्रवतीशुक्लेति यासामंभपवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञा
वर्षपुरुषाआपोमयंदेवमपांपूर्णेनांजलिनायजंते २२ आपःपुरुषवीर्याः पुनंतीर्भूर्भुवःसुवः तानःपुनी
तामिवघ्नीस्पृशतामात्मनाभुवइति २३ एवंपुरस्तात्क्षीरोदात्परितउपवेशितः शाकद्वीपोद्वात्रिंशल्ल
क्षयोजनायामः समानेनचदधिमंडोदेनपरितः यस्मिन्शाकोनाममहीरुहः स्वक्षेत्रव्यपदेशकोयस्य
हमहासुरभिगंधस्तंद्वीपमनुवासयति २४ तस्यापिप्रैयव्रतएवाधिपतिर्नाम्नामेधातिथिः सोपिवि
ना भज्यसप्तवर्षाणिपुत्रनामानितेषुस्वात्मजान्पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसं
ज्ञान्निधायाधिपतीन्स्वयंभगवत्यनंतआवेशितमतिस्तपोवनंविवेश २५

शतांस्पर्शनंकुर्वतांभुवः शरीराणिपुनंतुयत आत्मनास्वरूपेणैव अमीवघ्नीः पापहंत्र्यः २३ दध्नोमंडरसःसएवउ ५४
दकंयस्यतेन पर्णान्यंतःस्वरस्पर्शानिबहिर्मदुस्पर्शानिसशाकोनाममहान् २४ २५

1723/1981

२६ २७ आत्मकेतुभिः प्राणादिवृत्तिभिः २८ २९ अरुणशिखावदम्लानानांकनकपत्राणांअयुतानियस्यतत दशकोटि

एतेषांवर्षमर्यादागिरयोनद्यश्वसप्तसप्तैवईशानउरुशृंगोबलभद्रः शतकेसरःसहस्रस्रोतोदेवपालोमहानसइति २६
अविद्याआयुर्दाउभयस्पृष्टिरपराजितापंचपदीसहस्रस्तुतिर्निजधृतिरिति तद्वर्षपुरुषाऋतव्रतसत्यव्रतदानव्रता
नुव्रतनामानोभगवंतंवाय्वात्मकंप्राणायामविधूतरजस्तमसः परमसमाधिनायजंते २७ अंतःअविश्यभूता
नियोबिभर्त्यात्मकेतुभिः अंतर्यामीश्वरःसाक्षात्पातुनोयद्वशेइदमिति २८ एवमेवदधिमंडोदात्परतः पुष्करद्वी
पस्ततोद्विगुणायामःसमंततउपकल्पितः २९ समानेनस्वादूदकेनसमुद्रेणबहिरावृतोयस्मिन्बृहत्पुष्करंज्वलनशि
खामलकनकपत्रायुतायुतंभगवतःकमलासनस्याध्यासनंकल्पितंतद्द्वीपमध्येमानसोत्तरनामकएवार्वाचीनपराचीन
वर्षयोर्मर्यादाचलो अयुतयोजनोच्छ्रायायामोयत्रतुचतसृषुदिक्षुचत्वारिपुराणिलोकपालानामिंद्रादीनांयदुपरिष्टात्
सूर्यरथस्यमेरुंपरिभ्रमतःसंवत्सरात्मकंचक्रंदेवानामहोरात्राभ्यांचक्रवत्परिभ्रमति ३० तद्द्वीपस्याधिपतिःप्रैयव्रतो
वीतिहोत्रनामैतस्यात्मजौरमणधातकीनामानौवर्षपतीनियुज्यस्वयंपूर्वजवत्भगवत्कर्मशील आस्ते ३१ तद्वर्षपुरु
षाभगवंतंब्रह्मरूपिणंसकर्मकेनकर्मणा आराधयंति इदंचोदाहरंति ३२

पत्राणीत्यर्थः देवानामहोरात्राभ्यांउत्तरदक्षिणायनाभ्यामित्यर्थः ३० ३१ ब्रह्मरूपिणंकमलासनमूर्तिंसकर्मकेनब्रह्मसालोक्यादि
साधनेन ३२

श्री० कर्मभयंकर्मफलरूपंब्रह्मलिंग्यतेयस्मात् एकस्मिन्नेवपरमेश्वरे अंतोनिष्ठायस्यनत् अतएवस्कतोद्दितं ३२ ततः शुद्धोदासस्स्मात्तलो पं०
कस्तयोर्लोकवान्देशः अलोकः तद्रहितः तयोरंतरालमध्येवर्षविभागाथमित्यर्थः ३४ ततः परस्तादित्युक्तं तदेवकियतांतरेण
५५ इत्यपेक्षायांतदंतरवर्तिनींभूमिमाह यावन्मानसोत्तरमेवंतरंसार्द्धसप्तलक्षोत्तरसार्द्धकोटिपरिमितंतावतीभूः शुद्धोदात्परतोस्ती
तितत्रचप्राणिनापिसंति ततः कांचनीभूमिरन्या अस्तीत्यर्थः सा चैकोनचत्वारिंशल्लक्षोत्तरकोट्येकपरिमिताज्ञेया एवंदिमतिमे
रुलोकालोकयोरंतरंसार्द्धद्वादशकोटिपरिमितंवक्ष्यमाणमुपपन्नंभवति एतदेवद्वीवतंत्रेभूक्तंकोटिद्वयंत्रिपंचाशल्लक्षाणिचततः

यतत्कर्मभयंलिंगंब्रह्मलिंगंजनोर्चयेत् एकोनमहयंशांतंतस्मैभगवतेनमइति ३३ ऋषिरुवाच ततःपरस्ता
ल्लोकालोकनामचलोल्लोकालोकयोरंतरालेपिपरितउपक्षिप्तः ३४ यावन्मानसोत्तरमेवोरंतरंतावतीभूमिः कां
चन्यादर्शतलोपमायस्यांप्रहितःपदार्थोनकथंचित्पुनःप्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृतासीत् ३५ लो
कालोकइतिसमाख्यायदनेनाचलेनलोकालोकस्यांतेवर्तिनावस्थाप्यते ३६ सलोकत्रयांतपरितईश्वरेणविहितः
यस्मात्सूर्यादीनांध्रुवपर्यंतानांज्योतिर्गणानांगभस्तयोर्वाचीनान्त्रीलोकानावितन्वानानकदाचित्पराचीनाभ
वितुमुत्सहंतेतावदुन्नहनायामः ३७

परं पंचाशच्चसहस्राणिसमहीपाःससागराः ततोहेममयीभूमिर्दशकोट्योविरानने देवानांक्रीडनार्थायलोकालोकस्ततः
परइति अत्रचदशकोटित्वंपूर्वोक्तभूम्यासहद्रष्टव्यं सर्वसत्त्वपरिहृतेतितद्व्यतिरेकेणतितेयंदेवानांक्रीडनार्थायेत्युक्तत्वात् ३५
३६ लोकत्रयस्यांतेपरितोमर्यादारूपोविहितः यस्मात्प्रतिबंधकात्सूर्य आदिर्येषांध्रुवःपर्यंतोयेषां आवितन्वानाःसमंता ५५
त्प्रकाशयतःपारतोगंतुंनोत्सहंते तावदुन्नहनमुत्सेधःतदनुरूपआयामश्चविस्तारोयस्य भुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूतइत्य
र्थः ३७

1725
1981

सोयंतुलोकालोकाचलस्तुरीयभागश्चतुर्थांशः सार्द्धद्वादशकोट्यः मेरोरेकतइतिद्रष्टव्यं ३८ आशास्विभ्यऋधिनिवेशिताः
तेआसते ३९ तेषांदिग्गजानांस्वविभूतीनांस्वांशभूतानांमहेंद्रादीनांचविविधवीर्योपबृंहणायसकलस्यलोकस्यस्वस्त्ययनाया
गवान्तस्मिन्नास्तइत्यन्वयः किंकुर्वन्आत्मनःस्वस्यषडुदंसत्त्वंनतसंधारयमाणः आविःकुर्वन्कीदृशंधर्मज्ञानादीन्यष्टमहा
सिद्धयश्चोपलक्षणंयस्यतत्तदादिरूपलक्षितःसन्महाविभूतेःपरमैश्वर्यस्यपतित्वादकपेवमूर्त्यासमंतादास्ते ४० नन्वेतयो
मिणांतस्यैमेवसर्वंकंतुंशक्यंकितस्यबहिःसमंतादवस्थानेनेत्याशंक्यतस्यार्थंस्वयमेवव्याचष्टे आत्मनोयोगमाययाविरचि

एतावांल्लोकविन्यासोमानेलक्षणसंस्थाभिर्विचिंतितःकविभिःसतुःपंचाशत्कोटिगणितस्यभूगोलकस्यतुरीयमा
गोयंलोकालोकचलःसार्द्धद्वादशकोटिरुन्नतायामः ३८ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणा
धिनिवेशितायेद्विरदपतयःऋषभःपुष्करचूडोवामनोपराजितसकललोकस्थितिहेतवः ३९ तेषांस्वविभूतीनांलो
कपालानांविविधवीर्योपबृंहणायभगवान्परममहापुरुषोमहाविभूतिपतिरंतर्याम्यात्मनोविशुद्धसत्त्वंधर्मज्ञान
वैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणंविष्वक्सेनादिभिःस्वपार्षदप्रवरैःपरिवारितोनिजवरायुधोपशोभितैर्भुजदंडैः
संधारयमाणस्तस्मिन्गिरिवरेसमंतात्सकललोकस्वस्तयआस्ते ४० आकल्पमेवंवेशंगतःएवंआत्मयोगमायावि
रचितविविधयात्रागोपीथायेत्यर्थः ४१ योंतर्विस्तारएतेनह्यलोकपरिमाणंचव्याख्यातंयद्बहिर्लोकालोकाच
लात्ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति ४२ अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरंसूर्यांडगोलयोर्मध्यकाद्यःस्युः
पंचविंशतिः ४३

नायाविविधलोकयात्रातस्यागोपीथायरक्षणायएवंभगवानेव आकल्पंवेशंगतः लीलयाव्याप्यइतिसमंतादास्तइत्य
र्थः ४१ अलोकपरिमाणंचमेरोरेकजःसार्द्धद्वादशकोटयःततोलोकात् अलोकाद्वापरस्तात् विशुद्धद्विजपुत्रानयने
अर्जुनस्यश्रीकृष्णेनप्रदर्शिताः ४२ विस्तारेणाकंब्रह्मांडमानंसर्वतोपिनिरूपयति अंडमध्यगतःकिंतन्मध्यंतदा
ह द्यावाभूम्योःपूर्वोत्तरकपालयोर्यदंतरंमध्यस्थानंसर्वतःपंचविंशतिकोटयःस्युः ४३ ७ ७

भा॰ अंडमध्यावस्थानेकारणंतन्नामनिर्वचनेनाह मृते अन्वतनेंडएषस्सूर्योविराजरूपेणयस्मान्प्रविष्टः ४४ किंचसूर्येणैवविभज्यंते पं॰
दिशाःखमंतरिक्षं भिदा अन्योपिविभागः स्वर्गापवर्गौभोगमोक्षदेशौ रसौकांसि अतलादीनि ४५ उपासनार्थमाह देवादीनां
५६ सर्वआत्माद्दगीश्वरः नेत्राधिष्ठाताच ४६ इतिश्रीभागवतेपंचमस्कंधेटीकायांविंशोध्यायः एवमध्यायविंशत्याम
मर्यादानिरूपिता अतःपरंद्युमर्यादापालनंत्रिभिरुच्यते एकविंशेरवेःकालचक्रेणक्रमतोन्वहं स्वगत्याराशिसंचारैः
लोकयात्रानिरूप्यते एतावान्विस्तारेणकोटयः पंचाशतउत्सेधेनपंचविंशतिः १ द्विदलयोर्मध्येयथैकस्यमानेनापरस्य

मृतेंडएषएतस्मिन्यदभूत्ततोमार्त्तंडइतिव्यपदेशः हिरण्यगर्भइतियद्धिरण्यांडसमुद्भवः ४४ सूर्येणहिविभ
ज्यंतेदिशःखंद्यौर्महीभिदा स्वर्गापवर्गौनरकारसौकांसिचसर्वशः ४५ देवतिर्यङ्मनुष्याणांसरीसृपसवी
रुधं सर्वजीवनिकायानांसूर्यआत्माद्दगीश्वरः ४६ इतिश्रीभागवेमहापुराणेपंचमस्कंधेविंशोध्यायः २०
श्रीशुकउवाच एतावानेवभुवलयस्यसन्निवेशः प्रमाणलक्षणतोव्याख्यातः १ एतेनहिदिवोमंडलमा
नतद्विदउपदिशंति यथाद्विदलयोनिष्पावादीनांतेअंतरेणांतरिक्षंतदुभयसंधितं २ यन्मध्यगोभगवानत
पतांपतिस्तपनआतपेनत्रिलोकींप्रतपत्यवभासयति आत्मभासासएषउदगयनदक्षिणायनवैषुवराशिसंज्ञाभि
र्मंदशीघ्रसमानाभिर्गतिभिरारोहणसमवस्थानेषुयथासवनमभिपद्यमानोमकरादिषुराशिष्वहोरात्राणिदीर्घह्रस्वसमाना
निविधत्ते ३ यदामेषतुलयोर्वर्त्तते तदाहोरात्राणिसमानानिभवंति यदावृषभादिषुपंचसुवर्ततेतदाहोरात्राणिविप

मानमुपदिशंतेतद्वत् ते अंतरेणतयोर्मध्येतदुभयसंधितंताभ्यामुपक्रमंतःसंलग्नं २ उदगयनादिसंज्ञाभिर्मंदक्षिप्रसम
गतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानोमकरादिष्वहोरात्राणिदीर्घह्रस्वसमानानिधत्ते ३ तत्प्रपंचय
ति यदेति अत्यंतवैषम्याभावात्समानीत्युक्तंसर्वथासाम्यंत्वेकस्यवाहोरात्रस्ययद्यपिवृषभमिथुनयोरुत्तरोत्तरवृद्धिः कर्कादिषुह्रासः ५६
तथापिरात्र्यपेक्षयाअधिकत्वाद्दिवर्द्धतइत्युक्तं एवंरात्रिवृद्धावपिदिनापेक्षयाह्रस्वतोक्ता एकैकस्मिन्मासेवृद्धिह्रासयोः प्रतिमास
वैषम्यात् विपर्याणीति अहानिन्यूनानिरात्रयोधिकाइत्यर्थः ४

427/1381

तद्वृद्धिह्रासकालमाह यावदिति एवंमंदादिगतिभिः नवकोटयइतिमेरोरुभयतो मानसोत्तरस्यांतरविस्तारेणपंचदशलक्षा
धिककोटित्रयपरिमितेनेदंपरिमंडलमानमुन्नेयं एवंपंचदशभिर्घटिकाभिरित्यादिष्वपित्रैराशिकगणितेनतत्तन्मानमुन्नेयं
अत्रापेक्षितोविशेषः पुराणांतरादवगंतव्यः तत्रारोहणादिस्थानानिवायुपुराणेदर्शितानि सर्वग्रहाणांत्रीण्यवस्थाना
निद्विजसत्तमाः स्थानंजरद्गवंमध्यंतथैरावतमुत्तरं वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतइति तदेवमध्यमोत्तरदक्षिणमार्ग
त्रयंप्रत्येकंवीथीत्रयेणत्रिधाभिद्यते त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैः नागवीथीगजवीथीऐरावतीचेत्युत्तरमार्गेवीथीत्रयं आ
र्षभीगोवीथीजरद्गवीचेतिवैषुवतेमध्यममार्गेवीथीत्रयं अथजवीथीमृगवीथीवैश्वानरीचेतिदक्षिणमार्गेवीथीत्रयं तदुक्तं तत्र
वअश्विनीकृत्तिकायाम्यानागवीथीतिशब्दिता रोहिण्यार्द्रामृगशिरोगजवीथ्यभिधीयते पुष्याश्लेषातथादित्यावीथीचैरावती
स्मृता एतास्तुवीथयस्तिस्रउत्तरोमार्गउच्यते तथाद्वेचापिफल्गुन्यौमघाचैवार्षभीमता हस्तश्चित्रातथास्वातीगोवीथीतितु
यावद्दक्षिणायनमहानिवर्द्धंते यावदुदगयनंरात्रयएवंनवकोटयएकपंचाशल्लक्षाणिचयोजनानांमानसोत्तरगिरिपरिवर्त्तनस्योपदिशंति ५ श्रीः
शब्दिता ज्येष्ठाविशाखानुराधावीथीजारद्गवीमता एतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते मूलाशालोत्तराग्नवीथ्यभि
शब्दिता श्रवणंचधनिष्ठाचमार्गीशतभिषक्तथा वैश्वानरीभाद्रपदेरेवतीचैवकीर्त्तिता एतास्तुवीथयःतिस्रोदक्षिणोमा
र्गउच्यते याम्याभरणी आदित्याअदितिदेवताकापुनर्वसुः मार्गीमृगवीथी एवंस्थितेउत्तरायणे ध्रुवेणयुगाक्षकोटिनि
बद्धवायुपाशद्वयाकर्षणेरथस्यारोहणं तदाभ्यंतरमंडलप्रवेशागतिमांद्यंचेति दिनवृद्धिः रात्रिःह्रासश्चदक्षिणायनेच
पाशप्रेरणादवरोहणंबहिर्मंडलप्रवेशोशीघ्र्यंचेत्यहोरात्रयोर्विपर्ययः वैषुवेतुपाशसाम्यात्समवस्थानमध्यमंडलप्रवे
शागतिसाम्यंचेत्यहोरात्रयोःसाम्यमिति तथाचपुराणांतरं आकृष्यते यदातानुध्रुवेणसमधिष्ठिता तदाभ्यंतरतःसूर्योभ्रमते
मंडलानितु ध्रुवेणमुच्यमानेनपुनरश्मियुगेनतुतथैवबाह्यतःसूर्योभ्रमतेमंडलानिचेति तदेतदुक्तं यदामेषतुलयोरित्यादिना ५

भा० उदयास्तादिकंवक्तुमाह तस्मिन्मानसोत्तरेमेरोः पूर्वतऐंद्रींपुरींउपदिशंतीत्यनुषंगः तासुपुरीषुउदया।दीन्नुपदिशंति चतुर्दशभि पं०
५७ स्ततेयमेरोर्दक्षिणदेशेतेषामैंद्रीयारभ्यपूर्वोदयः येपश्चिमेतेषांयाम्यामारभ्यये उत्तरेतेषांवारुणीमारभ्ययपूर्वेतेषांसौम्यामार
भ्य ७ तत्रत्यानांमेरुस्थानांसव्येनेति नक्षत्राभिमुखतयास्वगत्यारकंवामनकुर्वन्नपिप्रदक्षिणावर्त्तप्रवहाख्यवायुनाम्यमा
णज्योतिश्चक्रवशात्प्रत्यहंदक्षिणतःकरोति अतश्चक्रगतिवशात् अतिदूरतोभूसंलग्नस्येवदर्शनमुदयः आकाशमारूढ
स्येवदर्शनमध्याह्नः भूमिंप्रविष्टस्येवादर्शनमस्तमयः ततोतीवदूरगमनेनिशीथइति समुद्रतीरस्थदृश्याच अद्योवाण्यपा

तस्मिन्नैंद्रीपुरींपूर्वस्मान्मेरोर्देवधानींनामदक्षिणतोयाम्यांसंयमनींनाम पश्चाद्वारुणींनिम्लोचनींनाम्नउत्त
रतःसौम्यांविभावरींनाम तासूदयमध्यान्हास्तमयनिशीथानीति भूतानांप्रवृत्तिनिमित्तानिसमयवि
शेषेणमेरोश्चतुर्दिशं ६ तत्रत्यानांदिवसमध्यंगतएवसदादित्यस्तपति सव्येनाचलंदक्षिणेनक
रोति ७ यत्रोदेतितस्यहसमानसूत्रनिपातेननिम्लोचति यत्रक्वचनस्यंदेनाभितपतितस्यहैषसमानसू
त्रानिपातेप्रस्वापयतितत्रगतंनपश्यति ८ येसंसमनुपश्येरन्यदाचैंद्र्याःपुर्याःप्रचलितोतदापंचदशघ
टिकाभिःयाम्यांसपादकोटिद्वयंयोजनानांसार्द्धद्वादशलक्षाणीसाधिकानीचोपयाति ९ श्रीरामजय

तरुदेत्ययःसायंप्रविशतीतिश्रुतिव्यवहारोनवस्तुतः तदुक्तंपैप्पलैः उदयास्तमनेनैवसर्वकालंतुसंमुखे दिशास्वशेषा
सुतथाचैत्रयनिदिशासुच यत्रैर्दृश्यतेभास्वानसतेषामुदयःस्मृतः उदयास्तमनाख्यांहिदर्शनादर्शनंरवेः नैवास्तमन
मर्कस्यनोदयःसर्वदासतः शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयं विकर्णौद्वौविकर्णस्थःत्रीन्कोणान्द्वेपुरेतथेति अतएवत
त्रैवोक्तं सर्वेषांद्वीपवर्षाणांमेरुरुत्तरतःस्थितइति यत्रतोयत्रयःपश्यतिसवतत्रप्राचीतस्यचवामतोमेरुस्तिष्ठतीति ७ यत्रो
क्तमुदयास्तमनाद्यनियमंदर्शयति यत्रोदेत्यादिनास्पंदेनस्वदेशगमनप्रस्वापयतिनिशीथंकरोति ८ येसंसमनुपश्येरन्प्रस्वा ५७
पसमानसूत्रस्थाःसाधिकानिपंचविंशतिसहस्राधिकानि ८

729
1981

सहवासेव यद्यपिवस्तुतःसूर्यस्यापिनक्षत्रैःसहैवउदयास्तमयौतथापितस्यतत्साहित्यादर्शनात्सोमादीनामेवतत्साहित्यमुक्तं १०
त्रयीमयइत्याद्युपासनार्थं ११ द्वादशमासाआरायस्यषट्ऋतवोनेमयोयस्य त्रीणिचातुर्मास्यानिनाभयोयस्य १२ ऊतश्चनरभा
गोयस्य मानसोत्तरगिरौलक्षार्द्धादुपरिवायुवद्भ्रमावितिद्रष्टव्यं चक्रवातवद्भ्रमितमितिमंतव्यं अन्यथायुतमात्रोच्छ्रायत्वान्मा
नसोत्तरस्यमेरोश्च२तुरशीतिसहस्रोच्छ्रायत्वादक्षस्यसाम्यानुपपत्तेः १३ तस्मिन्नक्षेचक्रंप्रोतंकृतम्मूलःनिबद्धपूर्वभागः त्रयमासोमे

एवंततोवारुणींसौम्यांमैंद्रींचपुनस्तथान्येग्रहाःसोमादयोनक्षत्रैःसहज्योतिश्चक्रेसमभ्युद्यंतिसहवानिम्लोचंति
१० एवंमुहूर्त्तेनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौरोरथस्त्रयीमयोसौचतसृषुपरिवर्ततेपुरीषु ११ यस्य
कंचक्रंद्वादशारंषट्नेमित्रिणाभिसंवत्सरात्मकंसमामनंति १२ तस्याक्षोमेरोर्मूर्द्धनिकृतोमानसोत्तरेकृतेतरभा
गोयत्रप्रोतंरविरथचक्रंतैलयंत्रचक्रवद्भ्रमतिमानसोत्तरगिरौपरिभ्रमति १३ तस्मिन्नक्षेकृतमूलोद्वितीयोक्ष
स्तुर्यमानेनसंमितस्तैलयंत्राक्षवद्ध्रुवेकृतोपरिभागोरथनीडस्तुषट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावा
न्रथयुगोयत्रहयाःछंदोनामानःसप्तारुणयोजितावहंतिदेवमादित्यं १४ पुरस्तात्सवितुररुणःपश्चाच्चानियुक्तःसौ
त्यकर्मणिकिलास्ते १५

रुमानसोत्तरायतः सार्द्धसप्तलक्षाधिकसार्द्धकोटिप्रमाणः तस्यतुर्यमानेनसार्द्धसप्तविंशल्लक्षाधिकान् चत्वारिंशल्ल
क्षमानेनध्रुवेकृतःवायुपाशेनविबुद्धः। उपरिभागोयस्यनीडं उपवेशनस्थानंगायत्र्यादिछंदोनामानः अरुणेनयोजिता
संतोदेवंवहंति १४ पुरस्तात्स्थितोपिपश्चाल्लत्यमुखआस्ते यद्वायत्कर्मस्यपुरतः तस्यैवपश्चिमत्वात्पश्चादित्युक्तं
अश्वस्थानंचवायुनोक्तं समास्वकूपच्छदासिवहंतेवायतारवि चक्रपक्षानिबद्धानिचक्रेचाक्षःसमाहितइति १५

 सत्कवाकायस्रभाषिनाय १६ एकैकश्चतुर्दश इंद्रासप्तगणाः संतोमासिमासिउपासिनइत्यन्वयः १७ गव्यूतिक्रोशद्वयं संगव्यु
स्कृतरंयथास्त्ववत्तितथा १८ इतिपंचमटीकायांएकविंशः द्वाविंशे सोमभृत्कादिस्थानमादौनरांतरं तत्तद्गत्यनुसारेणइष्टा
 निष्टतथान्नणां राशीनामभिमुखंअप्रदक्षिणंचोपवर्णितं सव्येनचलन्नदक्षिणेनकरोतीतिवदन अमुष्ययूयंकथमनुमीमहि

तथावालखिल्याऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणिपुरतः सूर्यंस्त्कवाकायनियुक्ताः स्तुवंति १६ तथान्येचऋषयो
धर्वाप्सरसोनागाग्रामण्योयातुधानाः देवाइत्येकैकशोगणाः सप्तचतुर्दशमासिमासिभगवंतंसूर्यमात्मानंनानानामानं
पृथङ्नामानः पृथक्कर्मभिर्द्वंद्वशउपासते १७ लक्षोत्तरसार्द्धनवकोटियोजनपरिमंडलंभूवलयस्यक्षणेनसगव्यूत्युत्त
रद्विसहस्रयोजनानिसभुंक्ते १८ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेज्योतिश्चक्रसूर्यरथमंडलरथवर्णनंनाम
एकविंशतितमोध्यायः २१ राजोवाच यदेतद्भगवत आदित्यस्यमेरुंध्रुवंचप्रदक्षिणेनपरिक्रमतोराशीनामभिमु
खंचप्रचलितंचाप्रदक्षिणंभगवतोपवर्णितममुष्यवयंकथमनुमीमहीति १ सहोवाच यथाकुलालचक्रेण
भ्रमतासहभ्रमतांतदाश्रयाणांपिपीलिकादीनांगतिरन्यैवनक्षत्रांतरेराश्यंतरेचोपलभ्यमानत्वात् ३ सएषभगवा
नादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशुद्धिनिमित्तंकविभिरपिचवेदेनवि
जिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिषुऋतुषुयथोपजोषमृतुगुणानविदधाति ४ श्रीगोपालकृष्ण

एतत्कथंज्ञास्यामोविरुद्धत्वादित्यर्थः कुलालचक्रवत् चक्रवशात्स्वतश्चगतिद्वयमविरुद्धमितिपरिहारार्थः २ एवंनक्ष
त्रराशिभिरुपलक्षितेनकालचक्रेणध्रुवंमेरुंचप्रदक्षिणतः परिचरतसहपरिधावमानानांतदाश्रयाणांसूर्यादीनांग्रहाणांगतिर
न्यास्त्येव नक्षत्रांतरेराश्यंतरेचोपलभ्यमानत्वात् ३ तत्कालनियमेनकर्मणांविशुद्धेः साद्गुण्यस्यनिमित्तभूतमात्मानंविभ
ज्यविजिज्ञास्यमानोवितर्क्यमाणः यथोपजोषंयथाकर्मभोगंऋतुगुणान्शीतोष्णादीन् ४

731
1981

वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या आम्नातैः कर्मभिरिंद्रादिरूपंयोगवितानैश्चईश्वरार्पणबुध्याक्रियमाणैः ध्यानादिभिःअं
तर्यामीरूपंश्रद्धयंतः ५ स्वएवस्वगत्यामासादिव्यवहारकरणमित्याह सएवलोकानामात्माद्यावापृथिव्योरंतरेणमध्येनभोवल
यमंतरिक्षंतस्यमध्येयत्कालचक्रंतद्गतः राशिभिर्मेषादिभिसंज्ञाएषांचैत्रादिसंज्ञास्तचांद्रमासानांमानमाहपक्षद्वयंमासइति
चांद्रेणमानेनसपादमहानक्षत्रद्वयंसौरेणदिवानक्तंचअहोरात्रमितिपित्र्येणषष्ठमंशंराशिद्वयंमंडलात्यांसहभुंजीतसहसहितस्य

तमेतमिहपुरुषास्त्रय्याविद्ययावर्णाश्रमाचारानुपथानुच्चावचैः कर्मभिराम्नातैर्योगवितानैश्चश्रद्धयायजं
तोंजसाश्रेयःसमधिगच्छंति ५ अथसएवआत्मालोकानांद्यावापृथिव्योरंतरेणनभोवलयस्यकालचक्रगतोद्वादश
मासान्भुंक्तेराशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयंदिवानक्तंचेतिसपादर्क्षद्वयमुपदिशंति यावतामषष्ठम
शंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयव ६ अथचयावतार्द्धेननभोवीथ्यांप्रचरतितंकालमयनमाचक्षते
७ अथचयावन्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकार्त्स्न्येनसहभुंजीततंकालंसंवत्सरंपरिवत्सरंइडावत्सरम
नुवत्सरमिद्वत्सरमितिभानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति ८ एवंचद्रमा अर्कगभस्तिभ्यउपरिष्ठाल्लक्ष
योजनतउपलभ्यमानोर्कस्यसंवत्सरभुक्तिंपक्षाभ्यांमासभुक्तिंसपादर्क्षाभ्यांदिनेनैवपक्षभुक्तिमग्रचारीद्रुततरगमनोभुंक्ते ९

६ ७ यदाशुक्लप्रतिपदिसंक्रांतिर्भवतितदासौरचांद्रमासयोर्युगपदुपक्रमोभवतिसंवत्सरः ततःसौरमानेनवर्षे
षड्दिनानिवर्द्धंते चांद्रमासेनचषड्ह्रसंतीतिद्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावोभवति एवंपंचवर्षाणिगच्छंति
तन्मध्येद्वौमलमासौभवतः ततः पुनः षष्टसंवत्सरोभवति तदेवमवांतरभेदेनसंवत्सरादिपंचकंसमामनंति ८
सोमादीनामपिस्थानंकार्यंचाह एवंचंद्रमाइति अर्कगभस्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यांसपाददिनद्वयेन ९

सर्वेषांजीवनिवहोप्राणाः आत्ममयत्वादमृतमयत्वाच्च अतएवजीवनहेतुत्वाच्चजीवश्च १० तदेवाहयएषइति ११ दक्षिणेनै
वनतुतेषांरथकृतस्यागतिरस्तीत्यर्थः कालायनेकालचक्रेउत्तराषाढाश्रवणसंधावभिजिन्नक्षत्रंफलविशेषेणपृथक्कल्पि
तंतेनसह तथाचश्रुतिः अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानांमध्यस्ताच्छ्रोणायाइत्यादि १२ पुरतः सूर्येणभोक्ष्यमाणे

अथापूर्यमाणश्चकलाभिरमराणांक्षीयमाणाभिश्चकलाभिःपितॄणांअहोरात्राणिपूर्वपक्षाभ्यांवितन्वानःसर्व
जीवनिवहप्राणोजीवश्चएकमेकंनक्षत्रंत्रिंशन्मुहूर्तैर्भुंक्ते १० यएषषोडशकलःपुरुषोभगवान्मनोमयोऽन्नमयो
देवपितृमनुष्यभूतपशुपक्षीसरीसृपवीरुधांप्राणाप्यायनशीलत्वात्सर्वमयइतिवर्णयंति ११ ततउपरिष्टात्त्रि
लक्षयोजनतोनक्षत्राणिमेरुंदक्षिणेनैवकालायनईश्वरयोजितानिसहाभिजिताऽष्टाविंशतिः १२ ततउ
परिष्टादुशनाद्विलक्षयोजनउपलभ्यतेपुरतःपश्चात्सहैवचार्कस्यशैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरतिलो
कानांनित्यदानुकूलएवप्रायेणवर्षयंश्चारेणानुमीयतेसवृष्टिविष्टंभग्रहोपशमनः १३ उशनसाबुधोव्याख्यातः
१३ उशनसाबुधोव्याख्यातःततउपरिष्टाद्विलक्षयोजनतोबुधःसोमसुतउपलभ्यमानःप्रायेणशुभकृद्यथाऽर्का
द्व्यतिरिच्यतेतदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते १४ अतऊर्ध्वमंगारकोऽपियोजनलक्षद्वितयउपलभ्यमान
स्त्रिभिस्त्रिभिःपक्षैरेकैकशोराशीन्द्वादशानुभुंक्ते यदिनवक्रेणाभिवर्ततेप्रायेणाशुभग्रहोऽघशंसः १५ ततउप
रिष्टाद्द्विलक्षयोजनांतरगतोभगवान्बृहस्पतिरेकैकस्मिन्राशौपरिवत्सरंपरिवत्सरंचरतियदिनवक्रःस्यात्प्रायेणानुकूलोब्रा
ह्मणकुलस्य १६

नक्षत्रपश्चाद्भुंक्ते सहैवभुज्यमाने चारेणक्रमस्यनक्षत्राणांतिक्रमेण वृष्टेर्विष्टंभः स्तंभनंयस्मात्ग्रहात्तमुपशमयतीति
तथा१३ तथाबुधोव्याख्यातःपश्चात्सहैवचरतीति किंचिद्विशेषंचाह ततइत्यादिना अशंसतेसूचयति १४ अघशंसः
दुःखसूचकः यदिनवक्रेणाभिवर्तते तर्हित्रिभिःपक्षैः १५ यदिनवक्रःस्यात्तर्हिपरिवत्सरं १६ श्रीगोपालकृष्ण

733
1981

१७ १८ इतिश्रीभागवतेपंचमस्कंधेटीकायांद्वाविंशतितमोऽध्यायः त्रयोविंशेध्रुवस्थानंज्योतिश्चक्राश्रयंततः शिशुमारस्वरू
पेणहरेश्चस्थितिरुच्यते १ यत्प्रसिद्धंविष्णोःपदंयत्रध्रुवउपास्तेतिष्ठतीत्यन्वयः समकालमेवयुज्यतइतितथातैर्नक्षत्ररू
पैः १ मेढीस्तंभवद्धान्याक्रमणपशवोबलीवर्दाः २ कर्मसारथिभिःसहायोरुषांतेपरिवर्तते परिभ्रमंति ३ ईश्वराधारत्वा

ततउपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानःशनैश्चरएकैकस्मिन्राशौत्रिंशन्मासान्विलंबमानःसर्वानेवानु
पर्येतितावद्भिरनुवत्सरैः प्रायेणहिसर्वेषामशांतिकरः १७ ततउत्तरस्मादृषयएकादशलक्षयोजनांतरउपल
भ्यंते यएवलोकानांशमनुभावयंतोभगवतोविष्णोर्यत्परमंपदंप्रदक्षिणंप्रक्रमंति १८ इतिश्रीभा०म०पंच० ज्योति
श्चक्रवर्णनंनामद्वाविंशतितमोऽध्यायः २२ श्रीशुकउवाच अथतस्मात्परतस्त्रयोदशलक्षयोजनांतरतोय
तद्विष्णोःपरमंपदमभिवदंति यत्रहमहाभागवतोध्रुवऔत्तानपादिरग्निनेंद्रेणप्रजापतिनाकश्यपेनधर्मेणच
समकालयुग्भिःसबहुमानंदक्षिणतःक्रियमाणइदानीमपिकल्पजीविनामाजीव्यउपास्तेतस्येहानुभावउपव
र्णितःचतुर्थस्कंधे १ सहिसर्वेषांज्योतिर्गणानांग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसाभगवताकालेनभ्राम्य
माणानांस्थाणुरिवावष्टंभईश्वरेणविहितःशश्वदवभासते यथामेढीस्तंभआक्रमणपशवःसंयोजितास्त्रिभि
स्त्रिभिःसवनैर्यथास्थानंमंडलानिचरंति २ एवंभगणाग्रहादयएतस्मिन्नंतर्बहिर्योगेनकालचक्रआयोजिताध्रुवमेवाव
लंब्यवायुनोदीर्यमाणाआकल्पांतंपरिचंक्रमंति नभसियथामेघाःश्येनादयोवायुवशाःकर्मसारथयःपरिव
र्तंते एवंज्योतिर्गणाःप्रकृतिपुरुषसंयोगानुगृहीताःकर्मनिर्मितगतयोभुविनपतंति ३ केचनैतज्ज्योतिरनी
कंशिशुमारसंस्थानेनभगवतोवासुदेवस्ययोगधारणायामनुवर्णयंति ४

त्वात्तन्नाशंकेवनास्तीतिवक्तुंमतांतरमाह केचिदिति ज्योतिरनीकंज्योतिश्चक्रं योगधारणायांस्थितमितिशेषः ४

भा० लांगूले अग्रादधोभागे उदगयनानि अभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीन्युत्तराषाढांता पं०
नि चतुर्दश वामपार्श्वे ५ तदेवस्थानविशेषेण विभज्य दर्शयति पुनर्वसुरुदगयनांत्यं नक्षत्रं पुष्यो दक्षिणायनस्याद्यं आरद्रा
६० श्लेषे तयोनिरंतरं अभिजिदुत्तराषाढे उत्तरादक्षिणायनयोराद्यंतनक्षत्रे श्रवणपूर्वाषाढे धनिष्ठामूले च तयोरप्युत्तरपूर्वे मघादीनि

यस्य पुच्छाग्रेवाक्शिरसः कुंडलीभूतस्य ध्रुव उपकल्पितः तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च क
ट्यां सप्तर्षयः यस्तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राणि उपकल्पयंति दक्षिणायना
नि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरवयवाः समसंख्या भवंति पृष्ठे अजवीथी आकाशगंगा
चोदरतः ५ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पश्चिमयोः पादयोरार्द्राश्लेषा च दक्षिणवामयोः पार्श्व
योरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिण
वामयोर्लोचनयोर्धनिष्ठामूलं दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववंक्रिषु युंजीत
तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववंक्रिषु प्रातिलोम्येन प्रयुंजीत शतभिषाज्येष्ठे स्कंधयोर्दक्षिणवामयोर्न्यसेत
६ उत्तराहनावगस्तिरधराहनौ यमः मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो
मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ७
एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकायनाय
निमिषां पतये महापुरुषायाभिधीमहीति ८ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालं नमस्यतः स्मरतो वा
त्रिकालं नश्यति तत्कालजमाशु पापं ९ इति श्रीभागवते महापुराणे पंचमस्कंधे शिशुमारसंस्थाने त्रयोविंशोऽध्यायः

यान्यनुराधांतानि दक्षिणायनान्यष्टौ तानि वामपार्श्ववंक्रिषु पार्श्वयोरस्थिषु मृगशीर्षादीनि प्रातिलोम्येन पूर्वभाद्रपदांतानि यान्युद ६०
गयनानि नक्षत्राणि अष्टौ तानि दक्षिणपार्श्वे शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोर्यावशिष्ये स्कंधयोः ६ यमो नक्षत्ररूपः तथा नारायणो
श्विनौ च ककुदि गले उपस्थे अंगे ७ ज्योतिर्लोकाश्रयाय कालचक्ररूपाय अभिमहिनमो धीमहीति मंत्रेणोपतिष्ठेत ८ मंत्रकृतां पूर्वोक्तं
जपतां ९ इति श्री भागवते पंचमस्कंधे टीकायां त्रयोविंशोऽध्यायः २३ ७ ७ ७

735
1981

एवं त्रिभिर्भूमर्यादापालनं वर्णितं तथा अधो भुवनमर्यादापालनं त्रिभिरुच्यते चतुर्विंशे राहोरर्वाक् स्वर्भान्वादिस्थितिक्रमात् अत
एवं त्रिभिर्द्युमर्यादा पालनं वर्णितं तथा अधो भुवनमर्यादापालनं त्रिभिरुच्यते सूर्यादधस्ताभिरूपयति अधस्तादिति स्वर्भानु
लादिबिलस्वर्गमर्यादाः सम्यग्वर्णिताः सूर्यमारस्य शकवांतसंन्निवेशानि रूप्यदानीं सूर्यादधस्तान्निरूपयति अधस्तादिति स्वर्भानु
राहुः अलभत लेभे सिंहिकायाः पुत्रः उपरिष्टात् अष्टमे १ ग्रहणवत्क्रमाह यदद इति प्रतपत तरणमंडलं अमृतपानेन ध्यन्यवेशेन
तयोर्व्यवधानं करोतीति तथा अतएवतास्यां स्वचितत्वात् वैरमनुबध्नातीति तथा २ भगवंतं चक्रं परिभ्रमत् अभि अभिमुखं भु

श्रीशुक उवाच अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवद
नुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः १ यददस्तरणेर्मंडलं प्रतपत
स्तद्विस्तारतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वाणि तद्व्यवधानकृद्वैरानुबंधः स्व
र्भानुः सूर्याचंद्रमसावभिधावति २ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा
दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वद
ति लोकः ३ ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेत
भूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यंते ४ ततोऽधस्ताच्छतयोजनांतर इयं पृथिवी या
वद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतंतीति ५ उपवर्णितं भूमेर्यथासन्निवेशावस्थानं अवनेरधस्तात्सप्त
भूविवराः एकैकशो योजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पाताल
मिति ६

हूरतं मवस्थितः सन् इति एवमनांतरं एवस्थानं उपरागं वदति तत्र च ऋजुवक्रस्थितिभ्यां सर्वग्रासार्धग्रासानतुग्रासास्तिद्वर्यात
रवात् ३ तावन्मात्रे योजनायुते अंतरिक्ष ग्रहादीनां तस्याप्यवधिमाह यावद्धंसादयः पार्थिवा विकारा ५ यावद्वायुः प्रवा
तीति ब्रःयाति तस्याप्यवधिमाह यावन्मेघाः ४ पृथिव्या उपरि भूलोकवधिमाह यावद्धंसादयः पार्थिवा विकारा ५ योजनायुतां
तरेण प्रत्येकं मूर्छिनाः आयामोऽकटाहस्य तावद्विस्तारेण ६

भा०
६१

सामान्येनविवराणिवर्णयति एतेष्वित्यादिना अथातलइत्यतः प्राक्तेनेनग्रंथेन एषुदैत्यादयोनिवसंति इत्यन्वयः कथंभूतेषु पं०
अधिकः कामभोगश्चऐश्वर्यानंदश्चविभूतिश्चसंपत्तिः संपत्तितेः सुसंपन्नमहाभवनादयोयेषु कथंभूता नित्यप्रमुदिता अनु
रक्ताः कलत्रादयोयेषां मायया विनोदायेषां ७ किंच हमहाराजयेषुमयेननिर्मिताः पुरः चकासतिइत्यन्वयः कथंभूताः नाना
येमणिप्रवराः तेषांप्रवेशकाः मुख्याः तैर्विरचितैर्विचित्रैर्भवनादिभिः तथाविवरेश्वराणांगृहोत्तमैश्चसमलंकृताः कीदृशै
गृहोत्तमैः नागाश्च असुराश्चमिथुनभूताः पारावतादयश्चतैराकीर्णाः कृत्रिमाभूमयोयेषुतैः पाठांतरेनानास्वत्वंमिथुनविशे
षणं ८ उद्यानानिच अतितराममरलोकश्रियमतिशाययितानिमयपुरःकासतीत्यन्वयः काभिः श्रीभिः केषांकुसुमफलस्तबकाश्च

एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिः सुसमृद्धभवनोद्यानाः क्रीडाविहारेषुदैत्यदानव
काद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकाममायाविनोदानिवसंति ७
येषुमहाराजमयेनमायाविनानिर्मिताः पुरोनानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यच
त्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकास
ति ८ उद्यानानिचातितरांमनइंद्रियानंदिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनांलतांगालिं
गितानांश्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानांझषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्
ल्हारनीलोत्पललोहितशतपत्रादिवनेषुकृतनिकेतनानामेकविहाराकुलमधुकरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रिय

सुभगकिसलयानिचतैरेवनतारुचिराविटपाःशाखायेषांविटपिनांलतानामंगैरालिंगितानांश्रीभिः ९ तथासमिथुनाः चक्रवाका
दिमिथुनसहिताविविधाविहंगमाः तद्युक्तानांजलाशयानां च श्रीभिः कीदृशानां अमलैर्जलैः पूर्णानांपुनरपिकैरतिशायिना
निझषकुलोल्लंघनेनक्षुभितंजलाशयानांनीरंतस्मिन्यानिरजादीनितेषांवनेषुकृतंनिकेतनंयैस्तेषां अर्थात्पक्षिणांएकाखंडो
योविहारः तेनाकुलाश्चतेमधुकराश्चविविधस्वनादयः तैर्येइंद्रियोत्सवाः तैश्च यद्वा समिथुनस्यादेरुत्तरेणवसंबंधः मनइंद्रिया
नंदिभिरितिस्वनादीनांविशेषणं तद्वनीरजंसामान्येनकमललोहितंशतपत्रंतद्विशेषः ९ ७ ७ ६१

737
1981

यत्रपाताले अहोरात्रादिभिर्यद्भयंतन्नोपलक्ष्यते सूर्याभावात् १० क्लमः श्रमः ग्लानिरुन्मादः ११ कल्याणानांमंगलरूपाणां १२ यस्मिन्नम
वनेजसिप्रविष्टेपुंसवनानिगर्भाः भावतुर्थातभवतस्रावःपातः पंचमषष्ठयोरितिस्रावपातौज्ञेयौ १३ १४ सवर्णस्ताः स्वैरिण्यः कामि
न्यस्त्वसवर्णापितत्राप्यपिचंचलाःपुंश्चल्यः १५ विलायनंविलायतनंसाधयित्वासंभोगसमर्थंकृत्वा स्वअसाधारणविलासाःनत्र

यत्रहवावनभयमहोरात्रादिभिःकालविभागैरुपलक्ष्यते यत्रमहाहिप्रवरशिरोमणयःसर्वंतमःप्रबाधंते १० नवाएतेषुव
सतांदिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयोव्याधयोवलीपलितजरादयश्चदेहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिति
वयोवस्थाश्चभवंति ११ नहितेषांकल्याणानांप्रभवतिकुतश्चनमृत्युर्विनाभगवत्तेजसश्चक्राभिधानात् १२ यस्मिन्प्रविष्टेऽसुर
वधूनांप्रायःपुंसवनानिभयादेवस्रवंतिपतंतिच १३ अथातलेमयपुत्रोऽसुरबलोनिवसतियेनहवाइहसृष्टाः षण्णव
तिमायाः याःकाश्चनाद्यापिमायाविनोधारयंति १४ यस्यविजृंभमाणस्यमुखतस्त्रयः स्त्रीगणाउपपद्यंते स्वैरि
ण्यःकामिन्यःपुंश्चल्यइति १५ याववलायनंप्रविष्टंपुरुषंरसेनहाटकाख्येनसाधयित्वास्वविलासावलोकनानुरा
गस्मितसंलापोपगूहनादिभिः स्वैरंकिलरमयंति १६ यस्मिन्नुपयुक्तेपुरुषईश्वरोऽहंसिद्धोऽहमिति आयुतमहाग
जबल आत्मानमभिमन्यमानःकत्थतमदांधइव १७ ततोऽधस्ताद्वितलेहरोभगवान्हाटकेश्वरःस्वपार्षदभूत
गणावृतःप्रजापतिसर्गोपबृंहणायभवोभवान्यासहमिथुनीभूयआस्ते १८ यतःभवयोर्वीर्येण यत्रचित्रभानुमातरिश्वनासमिध्यमानओजसापिबति तन्निष्ठ्यूतंहाटकाख्यंसुवर्णंभूष
णेनासुरेंद्रावरोधेषुपुरुषाःसहपुरुषीभिर्धारयंति १९ ७ ७ ७

र्वकोवलोकः तेनानुरागयुक्तंस्मितंतेनसल्लापउपगूहनंचतदादिभिः रमयंति १६ यस्मिन्नरसेयुपयुक्तेसेविते १७ भव
श्चभवान्यासह १८ चित्रभानुरग्निः तेननिष्ठ्यूतंफूत्कृत्यत्यक्तं असुरेंद्राणामवरोधेषु अन्तः पुरेषुपुरुषीभिः स्त्रीभिः
१९

भा० स्फुतलेवलिरधुनाप्यास्तइत्यन्वयः कथंभूतः महेंद्रस्यप्रियंकर्तुमिच्छताप्रथमंपरासिप्तमपहृतंलोकत्रयंयस्यसः पुनर्भगवतानुकंपयैव पुं०
तत्रप्रवेशितः सन्कीदृशेनयोदितेः सकाशात्भूत्वाबहूवामनरूपेणलब्धकायः तेन २० किंचित्तस्यसुतलराज्यंप्रमिदानफलमन्यं
६२ नेतन्निराकरोति नोएतदिति यद्विलनिलयविवरस्थानैश्वर्यमेतद्भूमिदानस्यसाक्षात्कारः फलंनभवत्येव कुतइत्यपेक्षायामेवंभूत
स्यदानस्यसाक्षादपवर्गहेतुत्वादित्याह यत्प्रसिद्धदानस्यतद्देवाह भगवत्यशेषजीवनिकायानांबीजभूतेश्वासावात्मभूतश्चसर्व
जीवनियंताचासावात्मारामश्चेत्यर्थः तस्मिन्संप्रतिपादितस्य २१ किंच यस्यनामश्रुतादिषुविवशोपिसकृदपिगृणन्कर्मबंध

ततोधस्तात्सुतलउदारश्रवाः पुण्यश्लोकोविरोचनात्मजोबलिर्भगवतामहेंद्रस्यप्रियंचिकीर्षमाणेनादितेर्लब्धकायो
भूत्वाबटुवामनरूपेणपराक्षिप्तस्वलोकत्रयोभगवदनुकंपयैवपुनःप्रवेशितइंद्रादिष्वविद्यमानयासमृद्ध्याश्रिया
भिजुष्टः स्वधर्मेणाराधयंस्तमेवभगवंतंआराधनीयमपगतसाध्वसआस्तेधुनापि २० नोएवैतत्साक्षात्कारोभूमिदान
स्ययत्तद्भगवत्यशेषजीवनिकायानांजीवभूतात्मभूतेपरमात्मनिवासुदेवेतीर्थतमेपात्रउपपन्नेपरयाश्रद्धयापरमाद
रसमाहितमनसाप्रतिपादितस्यसाक्षादपवर्गद्वारस्ययद्विलनिलयैश्वर्यं २१ यस्यहवावक्षुतपतनप्रस्खलनादिषुविव
शः सकृन्नामाभिगृणन्पुरुषः कर्मबंधनमंजसाविधुनोतियस्यहैवप्रतिबाधनंमुमुक्षवोन्यथैवोपलभंते २२
तद्भगवतामात्मवतांसर्वेषामात्मन्यात्मदतएव नैवभगवानस्यनममुष्यानुजग्राह यदुतपुनरात्मानुस्मृतिमोषणंमायामयभो
गैश्वर्यमेवातनुतेति २३

विधुनोति कथंभूतं यस्यप्रतिबाधनंमुमुक्षवोन्यथैवोपलभंते यत्निरत्यर्थंयोगसांख्यादीन्यनुभवंतीत्यर्थः तंकर्मबंधंत्यजंति २२
तस्मिन्भगवतांभक्तानांज्ञानिनांचयथायथं आत्मदेवे आत्मतमेचसमर्पितस्यभूमिदानस्यतत्फलमितिपूर्वेणैवसंबंधा किंच
नेदंभगवदनुकंपाफलमिति किंत्वेकांतभक्तस्यतस्यांतरायमात्रमित्याह नैति भगवान् अमुष्य अमुनेवानुगृहीतवान् तत्रहेतुः यदुत
ति आत्मनः ईश्वरस्यानुस्मृतिंमुष्णातीतितथा तदुक्तं वासुदेवमनोयस्यजपहोमार्चनादिषु तस्यांतरायोमैत्रेयदेवेंद्रत्वादिकंफलमिति २३ ६२

739
1981

तस्यैकांतभक्तिंसप्रपंचमाह यत्तत् अनिप्रसिद्धइतिवक्ष्यमाणमुवाचहेत्यन्वयः अनधिगतः अप्राप्तः अन्यउपायोयेनतेनभ
गवतायांच्याछलेनापहृतंस्वशरीरमात्रावशेषितंलोकत्रयंयस्यासम्यक्प्रतिमुक्तोवरुणः अपविद्धः प्रक्षिप्तः सन् २४ बतेतिखेदे
भगवान्विख्यातप्रियोसाविद्वः यस्यकालेनबृहस्पतिःसचिवः सहायः यतोमंत्रार्थंवृतःसोपिपुरुषार्थशून्यं।ननिष्णातः ननिपुणः
यतउपेंद्रेणद्वारभूतेनतंउपेंद्रविहायात्मानंमोलोकत्रयमयाचत तंमंत्रप्रदंबृहस्पतिंविहायएवतस्मिन्प्रसन्नेप्रार्थनीयान

यत्तद्भगवतानधिगतान्योपायेनयांच्याछलेनापहृतस्वशरीरावशेषितलोकत्रयोवरुणपाशैश्चसंप्रतिमुक्तोगिरिद
र्यांचापविद्धइतिहोवाच २४ नूनंबतायंभगवानर्थेषुनविशांतोयोसाविंद्रोयस्यसचिवोमंत्रायवृतएकांततोबृहस्
तिस्तमतिहायस्वयमुपेंद्रेणात्मानमयाचत आत्मनश्चाशिषोनोएवतद्दास्यमतिगंभीरवयसः कालस्यमन्वंतर
परिवृत्तंकियल्लोकत्रयमिदं २५ यस्यानुदास्यमेवास्मत्पितामहः किलवव्रेनतुस्वपित्र्यंयदुताकुतोभयंपदंदीयमा
नंभगवतः परमितिभगवतोपरतेखलुस्वपितरि तस्यमहानुभावस्यानुपथमसृजितकषायः कोवास्मद्विधःपरि
हीनभगवदनुग्रहउपजिगमिषतीति २६ अथतस्यानुचरितमुपरिष्टाद्विस्तरिष्यति २७

लोकत्रयंयतस्तददाति तुच्छमित्याह अतिगंभीरं अनंतंवयोयस्यतस्यकालस्ययत्मन्वंतरंतेनपरिवृत्तंविपर्यस्तंलोकत्रयं
मिदंकियत् २५ प्रह्लादस्त्वेकएवार्थनिष्णातइत्याह यस्यानुदास्यमितिस्वपितरिउपरतेमृतेसतिस्वपित्र्यंपदंभगवतादी
यमानमपिभगवतः खलुपरमन्यदितिकृत्वानतुजग्राहेत्यर्थः ननुत्वमतिवीरः कुतस्तमेवबहुमन्यसेतत्राह तस्यानुपथं अनु
वर्त्म असृजिताः असीणाः कषायारागादयोयस्य परिहीनोभगवदनुग्रहोयस्यसः कोवाउपगंतुमिच्छतीति २६ अथशुको
क्तिः नन्वेवंभूतश्चेद्बलिः तर्हितस्यैवचरितंविस्तरेणकथ्यतांतत्राह तस्यबलेरनुचरितंउपरिष्टादष्टमेविस्तरिष्यते २७ श्रीः

निजजनेष्वनुकंपितं हृतानुकंपं हृदयं यस्य द्वारपालकर्म दर्शयति येन श्रीनारायणेन बलेर्द्वारि विक्रांत दशकंधर उच्चाटितः केन पराक्रमेणाप्यंगु
ष्ठेनैव हरिणा स्वभक्तो बलिः सुतले निहतः सुखमास्ते एवं महादेवभक्तोपि मयस्तलातले सुखमास्त इत्याह ततइति लब्धपदं स्थानं येन महीयते पूज्यते २८ नैकशिरसां अनेकफणानां नागानामस्ति एतत्र पंचपतिकुहककेति महाभोगवंतां महाकायाः पुरुषवाहात् हरेर्वाहनाद्गरुडाद्वभी
ताः संतः कचित्प्रमत्ताः क्रीडंति २९ विबुधप्रत्यनीकाः देवशत्रवः सकलप्यपि लोकेषु अनुभवाय स्यतस्यैव तेजसा स्वदर्शनेन प्रतिहतोब

यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपित हृदयो येनांगुष्ठेन पदा दशकंधरो
योजनायुतायुतं दिग्विजय उच्चाटितस्ततोधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीसंचि
कीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते २८
ततोधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पत
त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति २९ ततोधस्ताद्र
सातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महा
साहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ३० ये वै सरमयेंद्रदूत्या
वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ३१ ततोधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतजय
धनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति ३२ येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां
फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ३३ इ० श्रीभा० म० पं० पातालविव

लाबलेपो वीर्यं येषां मदो येषां बिलेशयाः सर्पा इव ३० इंद्रदूत्या प्रयुक्ताभिर्मंत्ररूपाभिर्वाग्भिः एवं हि वैदिकमाख्यानं अरिभिः सरे
व्विगूढा गा अन्विष्टुं सरमा देवशुनि मिंद्रेण प्रहिता संधिमिच्छन् पणयः प्राहुः किमिच्छंती सरमेत्यादि सा च मघमानिच्छंतीइंद्रस्तुतिपूर्वकं
तान् अतिपरुषमाह हताइंद्रेण पणयः शयध्वमित्यादि तेन च ते च भ्रुत्वा बिभ्यतीति ३१ महाभोगिनः महाफणाः महान् अमर्षः क्रोधो येषां
३२ पंचादिसंख्यानि शीर्षाणि येषां शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यर्थः ३३ ५ इति पंचमस्कंधे टीकायां चतुर्विंशोध्यायः २४

६२

741
1981

पंचविंशे ततो धस्तादहिशेषस्य संस्थितिः संजिहीर्षोरिदं कालेयच्च रुद्रसमुद्भवः १ कोसावनंतः स्तत्राह यावै भगवतः कलानामा सिसात्व
तीयाः सात्वततंत्रनिष्ठाः चतुर्व्यूहोपासनेयं संकर्षणमित्याचक्षते तथाख्याने हेतुः द्रष्टृदृश्ययोः सम्यक् कर्षणमेकीकरणं येन तत्सृक्तः अ
हमित्यभिमानो लक्षणं चिह्नं अधिष्ठातुर्यस्य अहंकाराधिष्ठानं तद्दृकदृश्यसंकर्षणात्संकर्षण इत्यर्थः २ अनंतत्वमाह यस्येदमिति

श्रीशुकउवाच तस्यमूलदेशे त्रिंशद्योजनसहस्रांतर अनंत आस्ते यावै कला भगवतस्तामसी समाख्यातानंतइति १
सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं संकर्षण इत्याचक्षते २ यस्येदं क्षितिमंडलं भगवतोनंतमूर्तेः
सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ३ यस्य ह वा इदं कालेनोपसंजिहीर्षतोमर्षविरचित
रुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र एकादशव्यूहः त्र्यक्षः त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ४ यस्यांघ्रिकम
लयुगलारुणविशदनखमणिखंडमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फु
रत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ५ श्रीगोविंद श्रीमाधव

यच्छब्दानां स एष भगवाननंत इत्युत्तरेणान्वयः ३ तामसत्वमाह यस्येदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचितेरुचिरे ढते क्रु
टिलीकृते भ्रमंत्यौ भ्रुवौ तयोर्मध्ये उत्तंभयन् उत्तमयन् उदतिष्ठत् ४ सुभगत्वमाह यस्यांघ्रिकमलयुगुले अरुणा विशदा
नखा एव मणयः तेषां खंडसमूहः तस्य मंडलेषु परिस्फुरतां कुंडलानां प्रभया मंडितानि गंडस्थलानि येषु तानि ५
श्रीराम श्रीगोविंद श्रीकृष्ण श्रीमुकुंद श्रीमाधव श्रीहरे श्रीः

 चारुणि अंगवलयेविलसिताश्चतेविशदाविपुलाश्चधवलाश्चसुभगाश्चरुचिराश्चभुजाएवरजतस्तंभास्तेषुअगरु चंदनकुंकु
मानांपंकएवानुलेपः तेनावलिंपमानाः तेषामभिमर्षनेनउन्मथितंहृदयंमकरध्वजस्यावेशोनरुचिरंचललितंचस्मितंयासांताः
तस्यानुरागेणमदेनविघूर्णितेप्रचलितेचआईषदरुणेकरुणावलोकयुक्तेनयस्मितंतत्ववदनारविंदंविलोकयंति ६ अमर्षोम
हतंरोषःसक्रोधःउपसंहृतःतयोवेगोयेन ७ उपासनार्थमाह सुरादिभिःध्यायमानः अनवरतंमुदेनमुदितश्चासौविह्वलवि

यस्यैवहिनागराजकुमार्यआशिषआशासानाश्चावंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजत
स्तंभेषुअगरुचंदनकुंकुमपंकानुलेपनावलिंपमानास्तदभिमर्षणोनोन्मथितहृदयमकरध्वजावेशरुचिरललित
स्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदंसव्रीडंकिलविलोकयंति ६ सए
वभगवाननंतोनंतगुणार्णवआदिदेवउपसंहृतामर्षरोषवेगोलोकानांस्वस्तयआस्ते ७ ध्यायमानःसुरासुरोरगसिद्धगं
धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनःसुललिताःमुखरिकामृतेनाप्यायमानःस्वपार्षद
विबुधयूथपतीनपरिम्लानरागनववनतुलसिकामोदमध्वासवेनमाद्यन्मधुकरव्रतमधुरगीतश्रियंवैज
यंतींस्वांवनमालांनीलवासाएककुंडलोहलककुदिकृतसुभगसुंदरभुजोभगवान्महेंद्रोवारणेंद्रइवकांचनीक
क्षामुदारलीलोबिभर्ति ८ श्रीराम श्रीकृष्ण श्रीविठ्ठल श्रीहरि श्रीनारायण श्रीः ॥

ह्वललोचनश्चसुललितेनमुखरिकामृतेनवदनामृतेनस्वपार्षदान्विबुधयूथपपानांपातीश्चाप्यायमानाः हर्ष
यन् नीलंवाससीयस्य एकमेककुंडलंयस्य हलस्यककुदिपृष्ठेकृतःन्यस्तःसुभगश्चसुंदरश्चभुजोयेन उदारालीलायस्यसः नपरिम्लानोरागः कांतिर्यस्यतस्यानववनतुलसिकायाआमोदःमध्वासवेनसुरभिमधुरसेनमाद्यंतोमधु
कराणांव्रताःतेषांमधुरगीतेनश्रीर्यस्यास्तांमालां कांचनवत्रांउदारलीलाबिभर्ति ८ श्रीमन्नारायणगो०

7/43
1981

संश्लोकयामासवर्णयामास १० अस्यजगतः उत्पत्त्यादिहेतवोगुणायस्येक्षयाकस्मात् स्वकार्यसमर्थाआसन् यस्यतुरूपंध्रुव
अनंतंअकृतंच अनादि तत्रहेतुः यदेकमेवासत् आत्मन् आत्मनिनानाकार्यप्रपंचमधात् तस्यब्रह्मरूपस्यवर्त्मतत्त्वंजनःकथमुहवे
दनवेदेवेत्यर्थः ११ तर्हिकथमसौमुमुक्षुभिःसेव्यतेतत्राह मूर्तिमिति यत्रेदंसदसद्विभातितमनोस्माकंभक्तानांवङ्कृपयासंगृह्णंसत्त्वं
मूर्तिंबभार स्वजनानांमनांस्यादातुंवशीकर्तुंकृतां यद्वारूपयेस्यत्रहेतुः यद्यस्मात्स्वजनानांमनांस्यादातुंलीलामादत्ते मृगपतिरिवो

यएषएवमनुश्रुतोध्यायमानोमुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयंहृदयग्रंथिंसत्त्वरजस्तमोमयमंतर्हृदयं
गतआशुनिर्भिनत्ति ९ तस्यानुभावान्श्लोकान्स्वायंभुवोनारदःसहतुंबरुणासभायांब्रह्मणःसंश्लोकयामास १० उत्प
त्तिस्थितिलयहेतवोस्यकल्पाःसत्त्वाद्याःप्रकृतिगुणायदीक्षया यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाधात्कथमुहवेदतस्य
वर्त्म ११ मूर्तिंनःपुरुकृपयाबभारसत्त्वंसंशुद्धंसदसदिदंविभातियत्र यल्लीलांमृगपतिरादवेनवद्यामादातुंस्वजनमनांस्यु
दारवीर्यः १२ यन्नामश्रुतमनुकीर्तयेदकस्मादार्तोवायदिपतितःप्रलंभनाद्वा हंत्यंहःसपदिनृणामशेषमन्यंकंशेषाद्
भगवतआश्रयेन्मुमुक्षुः १३ मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नोभूगोलंसगिरिसरित्समुद्रसत्त्वं आनंत्यादनिमितविक्रमस्य
भूम्नःकोवीर्याण्यधिगणयेत्सहस्रजिह्वः १४ श्रीराम श्रीकृष्ण श्रीगोपालकृष्ण

दारवीर्यः यद्वा मृग्यतइति मृगाः कामप्रदास्तेषांपतिर्मुख्यः १२ किंच आस्तांतस्यरूपपावपुद्धारणं तद्भजनंवा तन्नामो
च्चारणेनातिचित्रमित्याह यस्यनामयदिपतितोमहापातक्यपि अनुकीर्तयेत् तर्हिसशुद्ध्येदितिकिंवक्तव्यंयतोसावेव
नृणामशेषमंहःसद्योहंति कथमनुकीर्तयेत् अन्यतःश्रुतंवा अकस्माद्वा आर्तोवासन्प्रलंभनाद्वापरिहासात् तस्माछे
षादन्यं १३ गिर्यादिसहितंभूगोलंसत्त्वानिप्राणिनः सहस्रजिह्वोपिकोगणयेत् नकोपीत्यर्थः १४ ७ ७

भा० दुरंतवीर्यं बलंयस्यउरवोगुणा अनुभवाश्चयस्यसच रसायाः भूमेः मूलेस्थितः तिष्ठति आत्मतंत्रः आत्माधारः १५ उक्तस्यफलो पं०
कविभागस्यउपयोगमेववदन्उपसंहरति एताह्येवेकामान्कामयमानैः नृभिरुपगंतव्याइत्यन्वयः १६ तस्यप्रपंचः एता
६५ वत्यः विपाकगतयः फलभूताः गतयःताः व्याख्यातवानस्मि १७ इतिपंचमेटीकायांश्रीधरस्वामिविरचितायांपंचविंशः२५
षड्विंशेतुततोधस्तान्नरकस्थितिरुच्यते पापिनोयत्रदंड्यंतेयमदूतैर्यथायथं १ पुंसांगतयः उच्चावचाविसदृशाइतिभोगवै

एवंप्रभावोभगवाननंतोदुरंतवीर्योरुगुणानुभावः मूलेरसायाः स्थितआत्मतंत्रोयोलीलयाक्ष्मांस्थितयेबिभ
र्त्ति १५ एताह्येवेहनृभिरुपगंतव्यागतयोयथाकर्मविनिर्मितायथोपदेशमनुवर्णिताः कामान्कामयमानैः १६
एतावतीर्हिराजन्पुंसःप्रवृत्तिलक्षणस्यधर्मस्यविपाकगतयउच्चावचाविसदृशायथाप्रश्नंव्याचख्येकिमन्य
त्कथयामहतेर्षेत्वद्वैचित्र्यंइति १७ इतिश्रीभागवतेपंचमस्कंधेपंचविंशतिमोध्यायः २५ राजोवाच ॥
महर्षेतद्वैचित्र्यंलोकस्यकथमिति १ ऋषिरुवाच त्रिगुणत्वात्कर्तुःश्रद्धयाकर्मगतयः पृथग्विधाःसर्वा
एवसर्वस्यतारतम्येनभवंति २ अथेदानींप्रतिसिद्धलक्षणस्याधर्मस्यतथैवकर्तुःश्रद्धयासादृश्यात्कर्मफ
लंविसदृशंभवति ३

चित्र्यमुक्तंतदेतत्कुतइतिपृच्छतिमहर्षइति १ कर्मणःसमानत्वेपिकस्यचित्सुखित्वंकस्यचिदुःखित्वंकस्यचिदुभयरूप
त्वमेवंतिश्रद्धावैचित्र्यफलवैचित्र्यमितिपरिहरतित्रिगुणत्वादिति २ सात्त्विक्याश्रद्धयाकर्तुःसुखित्वंराजस्यासुखित्वं
दुःखित्वंच तामस्यादुःखित्वंतत्रापितासांश्रद्धातारतम्यात्सुखादितारतम्यंसर्वेषामित्यर्थः प्रतिषिद्धंप्रतिषेधः स ६५
एवलक्षणप्रमाणंयस्यअधर्मकर्तुःश्रद्धावैसादृश्यंतमसस्तारतम्यात् ३ श्रीरामकृष्णविठ्ठलहरिनारायण गोपा

1145
1981

नत्रापिकारणदर्शयन्नाह अनाद्यविद्याकृतानांकामानांस्तत्फलानरकाःतासांनाः अथेदानींप्राचुर्येणानुवर्णयिष्यामः इत्यन्वयः ४
किंभूमावेवदेशविशेषाः त्रिलोक्याः ब्रह्मांडाद्बहिर्वा आवरणेषुमध्ये अंतरालेवा भूमिव्यतिरिक्ते ५ ७ कर्मदोषमनतिक्रम्य

याध्यनाद्यविद्याकृतकामानांतत्परिणामलक्षणाःसृतयः सहस्रशः प्रवृत्तास्तासांप्राचुर्येणानुवर्णयिष्यामः
४ राजोवाच नरकानामभगवन्किंदेशविशेषा अथवाबहिस्त्रिलोक्या आहोस्विदंतरालइति ५ ऋषिरुवाच अं
तरालएवत्रिजगत्यास्तुदिशिदक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च अंडजलाद्यस्यांअग्निष्वात्तादयः पितृग
णादिशिस्वानांगोत्राणांपरमेणसमाधिनासत्याएवाशिषआशासानानिवसंति ६ यत्रहवावभगवान्पितृराजोवै
वस्वतःस्वविषयंप्रापितेषुपुरुषेषुजंतुषुसंपरेतेषुयथाकर्मावद्यंदोषमेवानुल्लंघितभगवच्छासनःसगणोदमंधा
रयति ७ तत्रहैकेनरकानेकविंशतिंगणयंति अथेदानींतेराजन्नामलक्षणतोनुक्रमिष्यामः ८ तामिस्रोंध
तामिस्रोरौरवोमहारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनंसूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्त
सूर्मिर्वज्रकंटकशाल्मलीवैतरणीपूयोदः प्राणरोधोविशसनंलालाभक्षःसारमेयादनंअवीचिरयःपान
मिति ९ किंच क्षारकर्दमोरक्षोगणभोजनः शूलप्रोतोदंदशूकः अवटनिरोधनः पर्यावर्तनःसूचीमुखमि
त्यष्टाविंशतिर्नरकाविविधायातनाभूमयः १० तत्रयस्तुपरवित्तापत्यकलत्राण्यपहरतिसहिकालपाश
बद्धोयमपुरुषैरतिभयानकैस्तामिस्रेनरकेबलान्निपात्यते ११

दोषमेवदमंपापफलंदंडंकरोति नउल्लंघितंभगवच्छासनंयेन ७ ८ ९ मतांतरेण अष्टाविंशमाह किंचेति
१० पापभेदेनतत्तन्नरकयातनाभेदंप्रपंचयंतियस्त्वित्यादिना ११

पात्यमानाः पीड्यमानः १२ एकदेवात् देवंपुरुषंवंचयित्वा १३ १४ १५ एतच्छरीरमहमिति इदंधनादिममैतिमत्वास्वकुटुं
बमेवचपुष्णाति तेनअशुभेन १६ रुरवोभूत्वेतिकर्माण्येवतथापरिणामंप्राप्येत्यर्थः अतिक्रूरस्यप्रारुरुसंगारव्यस्यसत्व

अनशनादिनिपातनदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानाजंतुर्यत्रकश्मलमासादितएकदेवमूर्छा
मुपयातितामिस्रप्रायो १२ एवमेवांधतामिस्रेयस्तुवंचयित्वापुरुषंदारादीनुपयुंक्ते १३ यत्रशरीरीनिपात्यमा
नोयातनास्थोवेदनयानष्टमतिर्नष्टदृष्टिश्चभवति १४ यथावनस्पतिर्वृश्च्यमानस्तस्मादंधतामिस्रंतमुपदिशंति
१५ यस्त्विहवाएतदहमितिममेदमितिभूतद्रोहेणकेवलंस्वकुटुंबमेवानुदिनंप्रपुष्णातिसतदिहविहायस्वयमेवतदशुभेनरौ
रवेनिपतति १६ येत्विहयथैवामुनाविहिंसिताःजंतवःपरत्रयमयातनामुपगतंतएवरुरवोभूत्वातथातमेवविहिं
सतितस्माद्रौरवमित्याहुः रुरुरितिसर्पादतिक्रूरसत्वापदेशः १७ एवमेवमहारौरवोयत्रनिपतितंपुरुषंक्र
व्यादानामरुरवःतंक्रव्येणघातयंतियःकेवलंदेहंभरः १८ यस्त्विहवाउग्रःपशून्पक्षिणोवाप्राणतउपरंध
यंति १९ यस्त्विहपितृविप्रब्रह्मध्रुक्सकालसूत्रसंज्ञकेनरकेअयुतयोजनपरिमण्डलेताम्रमंडलेताम्रमयेत
प्तखलेउपर्यधस्तादग्न्यर्काभ्यामभितप्यमानोभिनिवेशितःक्षुत्पिपासाभ्यांदह्यमानांतर्बहिःशरीरआस्तेशेतेचे
ष्टतेअवतिष्ठतिपरिधावतिचयावंतिपशुरोमाणितावंतिवर्षसहस्राणि २० यस्त्विहवैनिजवेदपथादनापद्यपगतः
पाखंडंचोपगतस्तमसिपत्रवनंप्रवेश्यकशयाप्रहरंति तत्रासावितस्ततोधावमानउभयतोधारैस्तालवनासिपत्रैश्छि
द्यमानसर्वांगोहाहतोस्मीतिपरमयावेदनयामूर्छितःपदेपदेनिपतति स्वधर्महापाखंडानुगतंफलंचभुंक्ते २१

स्यापदेशसंज्ञात् १७ क्रव्येनमांसनिमित्तेनमांसार्थमित्यर्थः १८ प्राणतःसजीवानुपरंधयतिपचति अपकरुणं
निष्कृपं १९ खलसमेदेशो २० स्वधर्महास्वधर्मत्यागी २१ श्रीलक्ष्मीनारायण श्रीगोपालकृष्ण

7147
1981

स्वनयन्रुदन्कश्मलंमोहमुपगतोभवति अदृष्टदोषाःस्तेनोपरुद्धाःसंतोयथाकश्मलमुपगताःतद्वत् २२ ईश्वरेणोपकल्पिताः
मनुष्यरक्तपानादिलक्षणावृत्तिर्येषांमत्कुणादीनांनविविक्ताविज्ञातापरव्यथायैरविवेकिभिस्तेषांपुरुषेणब्राह्मणादिना
वेनविधिनिषेधपूर्वकमुपकल्पितावृत्तिर्यस्य विविक्तापरव्यथायेनविवेकिना अभिद्रुग्धाः हिंसिताः विहितानिद्रारूपानिवृत्ति

यस्त्विहराजावाराजपुरुषोवाअदंड्येदंडंप्रणयतिब्राह्मणेवाशरीरदंडंसपापीयानमुत्रनरकेसूकरमुखेनिपतति
तत्रातिबलैर्विनिष्पिष्यमाणावयवोयथैवेहेक्षुदंडआर्तस्वरेणस्वनयन्क्वचिन्मूर्छितःकश्मलमुपगतःयथै
वेहादृष्टदोषाउपरुद्धाः २२ यस्त्विहवैभूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानांस्वयंपुरुषोपकल्पित
वृत्तिर्विविक्तपरव्यथोव्यथामाचरतिसपरत्रांधकूपेतदभिद्रोहेणनिपतति तत्रहासौतैर्जंतुभिःपशुमृगपक्षिस
रीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्येकेचाभिद्रुग्धाःतैःसर्वतोभिद्रुह्यमानस्तमसिविहतनिद्रानिर्वृतिल
ब्धावस्थानःपरिक्रामतियथाकुशरीरेजीवः २३ यस्त्विहवाअसंविभज्यातियत्किंचनोप
नतमनिर्मितपंचयज्ञोवायससंस्तुतःसपरत्रकृमिभोजनेनरकाधमेनिपतति तत्रशतसहस्रयोजनेकृमिकुं
डेकृमिभूतःस्वयंकृमिभिरेवभक्ष्यमाणःकृमिभोजनोयावत्तदप्रत्तापहुतादोनिर्वेशमात्मानंयातयते २४ य
स्त्विहवैस्तेयेनबलाद्वाहिरण्यरत्नादीनिब्राह्मणस्यवापहरंति अन्यस्यवाऽनापदिपुरुषस्तममुत्रराजन्यपुरुषाअ
यस्मयैरग्निपिंडैःसंदंशैःत्वचिनिष्कुषंति २५ ७ ७ ७

यस्यानलब्धमवस्थानंयेनसतमसिपरिक्रामतिअंधकूपेनरकेपतति २३ यत्किंचनरकादिकंउपनतंप्राप्तंतदसंविभज्य
यावंतियोज
ननिर्मिताःपंचयज्ञायेनअतएववायसैःसंस्तुतःसमत्वेनवर्णितःकृमिभोजनःकृमीनेवभुंजानःयावत्तत्
नानितत्कृमिकुंडंतावंतिवर्षाणियावद्दातत्पापमित्यर्थःअप्रत्तमसंविभक्तंअप्रहुतंचानीतितथासःअनिर्वेशअकृतप्राय
श्चित्तं २४ निष्कुषंतिछिंदंति २५

भा० तिग्मयातप्तयास्सूर्म्यालोहप्रतिमया २६ सर्वाभिरामः पश्वाद्युपगंता २७ अपारवंडाः सकुलीनाः संतः द्वितीयां पं०
६७ तपावेसेतु विशेषणं नदींविशिनष्टिविण्मूत्रेति २८ पशुचर्यास्वेच्छाचारं २९ अनर्थिविहितादन्यत्रविध्यं

येत्विहवाअगम्यांस्त्रियमगम्यंवापुरुषंयोषिदपिगच्छतितावमुत्रकशयातांडयंतस्तिग्मयासूर्म्यालोहमय्या पुरुषमालिंगयंति स्त्रियंवापुरुषंवा पुरुषरूपयासूर्म्या २६ यस्त्विहवैसर्वाभिगमस्तममुत्रनिरये वर्तमानंवज्र कंटकशाल्मलीमारोप्यनिःकर्षंति २७ यस्त्विहवैराजन्याराजपुरुषावा अपारवंडाधर्मसेतून्भिंदंतितेसंप रेत्यवैतरण्यांनिपतंतिभिन्नमर्यादास्तस्यांनिरयपरिखाभूतायांनद्यांयादोगणैरितस्ततोभक्ष्यमाणाआत्म नानवियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेनकर्मपाकमनुस्मरंतउपतप्यंते विण्मूत्रपूयशोणितकेशनखा स्थिमेदोमांसवसावाहिन्यामुपतप्यंते २८ येत्विहवैवृषलीपतयोनष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंतितेचापिप्रेत्यपूयविण्मूत्रश्लेष्ममलापूर्णार्णवेनिपतंति तदेवातिबीभत्सितमश्नंति २९ यत्विहवै श्वगर्दभपतयोब्राह्मणादयोमृगयाविहाराअतीर्थेचमृगान्निघ्नंति तानपिसंपरेताँल्लक्ष्यभूतान्यमपुरुषाइ षुभिर्विध्यंति ३० येत्विहवैदांभिकादंभयज्ञेषुपशून्विशसंति तानमुष्मिँल्लोके वैशसेनरकेपतितान्निरयप तयोयातयित्वा विशसंति ३१ यस्त्विहवैसवर्णांभार्यांद्विजारेतः पाययतिकाममोहितः तंपापकृतममुत्ररेतःकुल्यायांपातयित्वारेतःसंपाययंति ३२ येत्विहवैदस्यवोग्निदागरदाग्रामान्सार्थान्वाविलुंपंतिराजानोराज भटावातांश्चापिहिपरेत्ययमदूतावज्रदंष्ट्राश्वानःसप्तशतानिविंशतिश्चसरभसंखादयंति ३३

नीतिप्राणनिरोधोदर्शितः ३० नियेपतयोयमपुरुषाः ३१ लालासमाह यस्त्विहेति रेतःपानंकारयंति ३२ यमदूतायश्वानः सरभसंरभसं लमं क्रोधनं ३३ ६७

7149 / 1981

द्रव्यविनिमयेक्रयविक्रयादौनिरवकाशेनिरालंबे ३४ अविचिशब्दार्थमाहयत्रेति विचिस्तरंगःतद्रहितत्वादवीचिः ३५ योविप्रस्स्व कलत्रंवासुरांपिबतिअन्योपिवाव्रतस्थःसन्राजन्योवैश्योवासोमपीथःकृतसोमपानइत्यन्वयः तयोःसोमस्थानेफलंचसोमेविधा

येत्विहअनृतंवदंतिसाक्ष्येद्रव्यविनिमयेदानेवाकथंचित्सवैप्रेत्यनरकेवीचिमत्यधःशिरानिरवकाशेयोजनशतोच्छ्रा यात्गिरिमूर्ध्नःसंपात्यते ३४ यत्रजलमिवस्थलमश्मपृष्ठमवभासतेतदवीचिमत्तिलशोविशीर्यमाणःपुनर पिआरोपितोनिपतति ३५ यस्त्विहवैविप्राराजन्योवैश्योवासोमपीथस्तत्कलत्रंवासुरांव्रतस्थोपिवापिबति प्रमाद तस्तेषांनिरयंनीतानांउरसिपदाक्रम्यास्येवह्निनाद्रवमाणंकार्ष्णायसंनिषिंचंति ३६ अथचयस्त्विहवाआत्मसंभावनेनस्व यमधमोजन्मतपोविद्याचारवर्णाश्रमवतोवरीयसोनबहुमन्यतेसमृतकएवमृत्वाक्षारकर्दमेनिरयेवाक्शिरानिपातितोदुरंतायातनाह्यश्नुते ३७ येत्विहवैपुरुषाःपुरुषमेधेनयजंतेयाश्चस्त्रियोनृपशून्खादंति तांश्चतेपशवइवनिहता यमसदनेयातयंतोरक्षोगणाःशौनिकाइवस्वधितिनावदायासृक्पिबंतिनृत्यंतिगायंतिचहृष्यमाणायथेहपुरुषादाः ३८ येत्विहवाअनागसोरण्येग्रामेवावैश्रंभकैरुपसृतानुपविश्रंभय्यजिजीविषूञ्शूलसूत्रादिषूपप्रोतान्क्रीडनकतयायात यंतितेपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मानःक्षुत्तृड्भ्यांचाभिहताःकंकवटादिभिश्चेतस्ततस्तिग्मतुंडै राहन्यमानाआत्मशमलंस्मरंति ३९ येत्विहवैभूतान्युद्वेजयंतिनराउल्बणस्वभावायथादंदशूकास्तेपिप्रेत्यनर केदंदशूकाख्येनिपतंति यत्रनृपदंदशूकाःपंचमुखाःसप्तमुखाउपसृत्यग्रसंतियथाबिलेशयान् ४०

नात्सोमपानःनिषेधाच्चतथाचश्रुतिः न्यग्रोधस्तिभीरात्तस्यताःसंपिष्यदध्युपमृज्यतस्मैभक्षंप्रयच्छेन्नसोममितिसपर्वमपिम नकउवसन्मृत्वा ३७ पुरुषस्यमेधनंहिंसयाभैरवादौनृयजंतेयाश्चस्त्रियःस्वधितिनाखड्गेनविदारयित्वालामरूपाःरक्षोगणा भक्त्वा यथेहतेपुरुषादाःसंतःपूर्वमन्त्यंततद्वत् ३८ वैश्रंभकैर्विश्वासोपायैउपविश्रंभय्यविश्वास्य ३९ बिलेशयान्मूषकान् ४०

भा० अवटेगर्तकुरख्ळधान्यकोष्ठे सगरेणसविषेण ४१ अतिथयोज्ञानप्रर्वा अभ्यागताःज्ञानपर्वस्तान् पापेनवक्रीकृतेन ४२ पं०
६८ आढ्याभिमानिधनगर्वितःअहंकृतिःश्रेष्ठोहमितिमानी निर्यक्प्रेक्षणंयस्य सर्वतःगुर्वादरपिधनंचोरयिष्यतीति विशंकमानःप
रिशुष्यमाणंहृदयंवदनंयस्य अनवगतः ४३ तत्सार्थस्योत्पादनादिभिःशमलंग्रहणातीति तथान्वपरिच्चयंतिस्तत्रप्रेतानि

येत्विहवाअंधवटकुहरळगुहादिषुभूतानिनिरुंधंति तानमुत्रतेष्वेवोपवेश्यसगरेणवह्निनाधूमेननिरुंधंति ४१
येत्विहवाअतिथीनभ्यागतान्वागृहपतिरसकृदुपगतमन्युर्दिधिक्षुरिवपापेनचक्षुषानिरीक्षतेतस्यचापिनिर
येपापदृष्टेरक्षिणीवज्रतुंडागृधाकंककाकवटादयःप्रसह्योरुबलादुत्पाटयंति ४२ यस्त्विहवाआढ्याभिमति
रहंकृतिस्तिर्यक्प्रेक्षणःसर्वतोभिविशंकीत्यर्थविनाशचिंतयापरिशुष्यमाणहृदयवदनोनिर्वृतिमनगतोग्रह
इवार्थमभिरक्षति ४३ सचापिप्रेत्यतदुत्पादनोत्कर्षणसंरक्षणशमलग्रहःसूचीमुखेनरकेनिपतति यत्रहवि
त्तग्रहंपापपुरुषंधर्मराजपुरुषावायकइवसर्वतोंगेषुपरिच्चयंति ४४ एवंविधानरकायमालयेसंतिशतशः
सहस्रशस्तेषुचसर्वेष्वाधर्मवर्तिनोयेकेचिदिहोदिताअनुदिताश्चावनिपतेपर्यायेणविशंति ४५ तथैवध
र्मानुवर्तिनइतरत्रइहतुपुनर्भवेतउभयशेषाभ्यांनिवसंति मार्गआदावेवव्याख्यातः ४६ एतावानेवांडकोशायश्च
तुर्दशधापुराणेषुविकल्पितउपगीयते ४७ यत्तद्भगवतोनारायणस्यसाक्षान्महापुरुषस्यस्थविष्ठंरूपमात्ममायागु
णमयवर्णितमादृतःपठतिशृणोतिश्रावयतिसउपगेयंभगवतःपरमात्मनोग्राह्यमपिश्रद्धाभक्तिविशुद्धबुद्धिर्वेद ४८

कुर्वंति ४४ ४५ इतरत्रस्वर्गादौ इहमर्त्यलोके पुनर्भवेपुनर्जन्मनिमित्तंउभयोर्धर्माधर्मशेषाभ्यां आदावेवद्वितीयस्कंधेवेरव्या ६८
नरंयातीत्यादिना ४६ ४७ उपगेयंउपनिषदांश्रद्धाभक्तिभ्यांविशुद्धाबुद्धिर्यस्यसः ४८

751/1981

तंनुवायकरवस्तत्रप्रेतान्कुर्वंति यथायथवच्छ्रुत्वा ४९ कथंभूतासंस्था सकलानांजीवानिकायानांधाम आश्रयभूतंवपुः ५०
इतिभागवतेपंचमस्कंधेटीकायांषड्विंशोध्यायः २६ पंचमस्कंधसंबंधिपदभावार्थदीपिने प्रियतीपरमानंदनहरिश्रीलभा
विलैः १ परिक्षिदुवाच निवृत्तमार्गःकथितआदौभगवतायथा क्रमयोगोपलब्धेनब्रह्मणायदसंसृतिः १ एतद्यःश
णुयान्नित्यंनिरयानस्वस्वरूपतः आयुर्धनंयशःस्वर्गगतिमैश्वर्यमाप्नुयात् १ श्लोकंश्लोकार्धंपादंवाशृणुयाद्भक्तिभावतः

श्रुत्वास्थूलंयथासूक्ष्मंरूपंभगवतोमतिः स्थूलेनिर्जितमात्मानंशनैःसूक्ष्मंधियानयेदिति ४९ भूद्वीपवर्षसरि
दद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था गीतामयातवनृपाद्भुतमीश्वरस्यस्थूलंवपुःसकलजीवनि
कायधाम ५० इतिश्रीभागवतेमहापुराणेपंचमस्कंधेअष्टादशसाहस्र्यांसंहितायांवैयासिक्यांनरकानुव
र्णनंनामषड्विंशतितमोध्यायः ॥ श्रीकृष्ण श्रीगोपालकृष्णाय श्रीगजाननाय श्रीविठ्ठल

सर्वपापविनिर्मुक्तोवैकुंठवींगतिमाप्नुयात् २ यस्त्विहवैगोमूत्रलविशेषंसरिज्जलधिमधुदधिदुग्धादिसप्तद्वीप
दिविशेषितलोकालोकमर्यादीकृतंमेरोरिकरचितंमर्यादीकृत्यसर्वलक्षणधर्माधर्मवर्णादिनामरूपलक्षण
विशेषणप्रमाणगर्भीकृतान्नावुशृणोतितद्दशकारेनधारयंतितेअज्ञानमयेमहामोहेसुचिनिरयेपतंतीतिप
शवस्त्वभवंति ३ श्रीकृष्णार्पणमस्तु श्रीराम श्रीगोविंद द्वारकानाथाय गोपालकृष्णाय श्रीः ७७

इतिपंचमस्कंधः समाप्तः ॥ पत्रेयकुं ८ ९

4153
1981

अथभागवतषष्ठस्कंधप्रारंभः श्रीराम ॥

भा०
१

श्रीगणेशाय नमः ॥ श्रीकृष्णचरणाववहं भीडे ॥ ॐ नमो वासुदेव पुण्यारण्ये नृसिंहैकनामसिंहो विराजते ॥ यन्नादतः पलायंते महा
कल्मषकुंजराः ॥ १ ॥ विसर्गसंभवान्जीवान्स्वमर्यादासु संयतान् ॥ विष्णुः पात्यखिले रूपैरित्येवं पंचमे स्थितं ॥ २ ॥ अध्याये कोन्नविं
शत्या षष्ठे पोषणमुच्यते ॥ अतिलंघितमर्याद भक्तरक्षणलक्षणं ॥ ३ ॥ अजामिलो मनुष्येषु महापापो यथावितः ॥ विश्वरूपादि घाती
च यथा देवेषु वासवः ॥ ४ ॥ अजामिलस्य भक्तत्वे विष्णुदूतैर्निरूपितं ॥ संकेतेन भगवन्नाम पुत्रश्री हानुषंगजं ॥ ५ ॥ इंद्रोपि भगवद्भक्तः सं
ख्यिनोपंद्रसेवकः ॥ तदधीनस्कैश्वर्यशत्रुर्निर्जयजीवितः ॥ ६ ॥ तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथा षड्भिरिंद्रदो
षाक्षयेन तः ॥ ७ ॥ इंद्रस्यैव तु दोषोत्स्यैतत्राख्यानं ततोष्टभिः ॥ द्वाभ्यां च मरुदाख्यानं एवं प्रकरणक्रमः ॥ ८ ॥ तत्रादौ प्रथमे विष्णुदूतैः पा

राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥ प्रवृत्तिलक्षण
श्चैव त्रैगुण्यविषयो मुने ॥ योसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥ श्री ॥

तकिमोचनं ॥ तत्पापख्यापनायोक्तं याम्यैधर्मादिलक्षणं ॥ १ ॥ अथ षष्ठस्कंधो व्याख्यायते ॥ पूर्वोक्तानुवादपूर्वकं निरंतरोक्तं नरकप
रिहारोपायं पृच्छति ॥ निवृत्तिमार्गद्वित्रिषड्भिः ॥ आदौ द्वितीयस्कंधे वैश्वानरं यातीत्यादिना भगवता त्वया यथा यथावत् येनयेन मार्गेण
क्रमेण योगार्चिरादिप्राप्तिः ॥ तेनोपलब्धो ब्रह्मा तेन सहासंसृतिर्मोक्षो भवति ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मा
नः प्रविशंति परं पदमिति वचनात् ॥ ३ ॥ त्रैगुण्यं स्वर्गादिकं खं तदेव विषयः प्राप्यं यस्य ॥ नलीनाप्रकृतिर्यस्य तस्य पुंसः पुनः पुनर्गुणस
र्गः भोगार्थदेहारंभरूपो यो मार्गः स च कथितः ॥ तृतीये दक्षिणेन पथार्यम्णाः पितृलोकं व्रजंतीत्यादिना ॥ २ ॥ श्लो० अधर्मलक्षणा
नानानरकाश्चानुवर्णिताः ॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ ३ ॥ टीका ॥ अनुवर्णिताश्च निरंतराध्याये ॥ व्याख्यार्थश्च तु
र्थस्यादौ मन्वंतरश्च व्याख्यातः ॥ आद्यः स्वायंभुवः ॥ यतः यस्मिन् पंचमे ॥ ३ ॥ श्री गोविंद ॥ ॥ ॥ १

755
1981

द्वीपादीन् भागतो लक्षणतो मानतश्च ॥ ४ ॥ धरामंडलस्य संस्थानं ज्योतिषां विवराणां च ॥ इदं संस्थानं विभुर्यथासृजत तथाख्यात
मित्यर्थः ॥ ५ ॥ नानाउग्रा यातना येषु तान् नरकान् यथा येनोपायेन न ईयात् न गच्छेत् तन्मे अधुना व्याख्यातुमर्हसि ॥ ६ ॥ तत्र ता
वन्मन्वाद्युक्तं प्रायश्चित्तं विना नरकाद्दुर्निवाराद्दुत्याह ॥ न चेदिति द्वाभ्यां मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसस्तैरेव इहैवापचि
तिं प्रायश्चित्तं न कुर्याद्चेत् हि पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति ॥ मेमया ये भवतः कीर्तिताः तिग्मा दारुणा यातना येषु तान् ॥ ७ ॥ य
स्मादेवं तस्मात्पापस्य प्रायश्चित्ते यतेत कदा ॥ मृत्योः पुरैव तत्रापि पद्यता अम्रियमाणेनात्मना देहेन ॥ यद्वा अविपत् विपन्निर हिताया

प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ॥ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥ धरामंडलसंस्थानं भागल
क्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥ ५ ॥ अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयात
नान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ श्रीशुक उवाच ॥ न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः
॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योर
विपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥ ८ ॥ राजोवाच ॥ दृष्टश्रुताभ्यां य
त्पापं जानन्नप्यात्मनो हितं ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं ॥ ९ ॥ ॥

वत् ॥ यतात्मना संयतेन मनसा तत्रापि आशु अन्यथा अतीव चिरकाले तु द्विगुणं व्रतमर्हतीति द्वैगुण्यापत्तेः तत्र च पापस्य महत्त्व
मल्पत्वं वा ॥ वेश्यतदनुरूपे प्रायश्चित्ते यतेत ॥ रुजां रोगाणां निदानवित् यथा वैद्यः तदनुरूपं चिकित्सेत तद्वत् ॥ ८ ॥ अत्र चोदयति द्वा
भ्यां ॥ दृष्टं राजदंडादि ॥ श्रुतं नरकपातादि ताभ्यामात्मनः पापमहितं जानन्नपि भूयः ॥ प्रायश्चित्तानंतरं करोति ॥ अथो अंतःकरणात्
द्वादशाब्दादिकं कथं प्रायश्चित्तं ॥ तेन समूलदोषस्यानिवृत्तेः ॥ निवृत्तो वा पुनश्च पापप्ररोहयोगादिति भावः ॥ ९ ॥ श्रीराम ॥ ६ ॥

भा० २ किंच ॥ क्वचित्कदाचिदभद्रात्पापान्निवर्तते क्वचित्तदेव पुनराचरति ॥ यथा कुंजरः स्नातोपि रजोभिरात्मानं मलिनीकरोति तथा पापस्य पृ०
पुनः दुर्निवारत्वेन नरकयातनस्यावश्यंभावित्वात्प्रायश्चित्तं व्यर्थमिति ॥ १० ॥ परिहरति ॥ कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य
निर्हारेण नाशः आत्यंतिकः समूलो न हीष्यते अविद्वानधिकारी यस्मिन् तस्य भावः तत्त्वं तस्मात् ॥ अतो अविद्यायां नाशाभावान्न इष्टे पित
स्मिन्यायेत तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहो भवत्येव ॥ किं तर्हि मुख्यं प्रायश्चित्तं तदाह ॥ प्रायश्चित्तं तु विमर्शनं ज्ञानं ॥ ११ ॥ ततु
नित्यमप्रमत्तः सन् शनैर्लभते नान्यदिति दृष्टांतमाह ॥ नेति पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाध्यंते ॥ तथा नियमादिकं

क्वचिन्निवर्ततेभद्रात् क्वचिच्चरति तत्पुनः ॥ प्रायश्चित्तमथो पार्थं मन्ये कुंजरशौचवत् ॥ १० ॥ बादरायणिरुवाच
॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ॥ ११ ॥ नाश्नतः पथ्यमेवान्नं
व्याधयोभिभवंति हि ॥ एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ॥ १२ ॥ तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्या
गेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥ देहवाक्बुद्धिजं धीराः धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वे
णुगुल्ममिवानलः ॥ १४ ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः
॥ १५ ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ १६ ॥

नीक्षेमाय तत्त्वज्ञानाय समर्थो भवति १२ एतदेव विशदयति द्वाभ्यां ॥ तपसा ऐकाग्र्येण मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति
स्मृतेः ॥ ब्रह्मचर्येणाष्टांगेन ॥ तदुक्तं ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥ संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतन्मैथु
नमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति ॥ शमो मनसो नियमनं ॥ दमो बाह्येंद्रियाणां त्यागो दानं ॥ य
मो हिंसादि ॥ नियमो जपादि १३ धीराः विवेकिनः अस्याति दुःकरत्वान्मुख्यमेवान्यत्प्रायश्चित्तमेवाह ॥ केचिदित्यनेनैवं भूता भक्ति श्रीः
प्रधाना विरला इति दर्शयति ॥ केवलया तपआदिनिरपेक्षया वासुदेवपरायणा इति नाधिकारि विशेषणमेतत् ॥ किं त्वन्येषामश्रद्धया २
नत्वाग्रहतेरर्थानेवंपर्यसानादनुवादमात्रं १५

75/1981

एतस्वज्ञानमार्गादपि श्रेष्ठमित्याह ॥ नतथा पूयेयं शुध्येतैनं स्तु पुरुष निषेवया ॥ कृष्णेर्पिताः प्राणा येन ॥ १६ ॥ सध्रीचीनः समीचीनः ॥ अयं
पंथा भक्तिमार्गः ॥ यतः क्षेमः क्षमत्वे हेतुः ॥ न कुतश्चिद् द्विष्टादिभयं यस्मिन् तदेवाह ॥ सुशीलाः कृपालवः साधवो निष्कामा यत्र दंभनिघाय
पंथा भक्तिमार्गः ॥ यतः क्षेमः क्षमत्वे हेतुः ॥ न कुतश्चिद् भयं ॥ नापि कर्ममार्गवित् मत्सरादियुक्तेभ्यो भयमिति भावः ॥ भक्तेरन्यनिरपेक्षत्वमुक्तं १७ कृ
तो न ज्ञानमार्गद्वा सहायताऽभिमित्तं भयं ॥ नापि कर्ममार्गवित् मत्सरादियुक्तेभ्यो भयमिति भावः ॥ सुराकुंभमापगा इवेति १८ भक्तिः स्वल्पापि
क्षुद्रादीनि तु भक्तिं विना न शोधयंतीत्याह ॥ प्रायश्चित्तानीति ॥ महतामघशोधकत्वे दृष्टांतमाह ॥ सुराकुंभमापगा इवेति १८ भक्तिः स्वल्पापि

न तथा ह्यघवान् राजन् पूयेत तप आदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया १६ सध्रीचीनो ह्ययं लोके पंथाः क्षे
मोकुतोभयः ॥ सुशीलाः साधवो यत्र नारायणपरायणाः १७ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ॥ न निःपुनं
ति राजेंद्र सुराकुंभमिवापगाः १८ सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भ
टान् स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः १९ अत्र चोदाहरंतीममितिहासं पुरातनं ॥ दूतानां विष्णुयमयोः संवादस्तं निबो
धमे २० कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः २१ बंद्यक्षकैतवै
श्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः २२ एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥
कालोत्यगान्महाराजन्नष्टाशीत्यायुषः समाः २३ श्रीराम ॥

पुनात्येवेत्याह ॥ सकृदिति ॥ तस्य गुणेषु राग मात्रमस्ति न तु ज्ञानं यस्य तत् मनः ॥ तावतैव चीर्णनिष्कृतं प्रायश्चित्तं यैः १९ इममर्थमिति ॥
हासेनोपपादयति ॥ अत्र चेति मे मत्तः २० कान्यकुब्जे पुरा दास्याः पतिः नाम्नाजामिलः २१ बंदीग्रहेण अक्षैश्च द्यूतेन कैतवैर्वंचनादिभि
श्च वृत्तिं जीविकां बिभ्रत् पुष्णन् यातयामास पीडयामास २२ आयुषः संबंधी महान् कालोत्यगात् ॥ स किंभागित्यपेक्षायामाह अष्टाशीत्या
संख्यया युक्ताः समाः संवत्सराः २३

प्रवयसोरुद्दस्य २४ बद्धंहृदयंयेनजठरोबद्धः २५ ॥२६॥ नश्वनदुपलालनादिनारायणनामोपचारमाहात्म्येनतद्भक्तिरेवाभूदि
ति सिद्धं नोपयोगित्वेनापिद्रष्टव्यं २७ वक्रानितुंडानिमुखानियेषां ऊर्ध्वानिरोमाणियेषांतान् २८ प्लावितेनप्लुतत्वंनीतेन २९
हरिकीर्तनं॥नेशाम्यअपतन्यतस्तद्भर्तुर्नाम ३०॥३१॥ पुरःसराभृत्याः॥अस्यनयनंनिषेधथ ३२ वयंयुष्मान्रजानीमइतिनकौ

तस्यप्रवयसःपुत्रादशतेषांतुयोवमः॥बालोनारायणोनाम्नापित्रोश्चदयितोभृशं २४ सबद्धहृदयस्तस्मिन्अ
र्भकेकलभाषिणि॥निरीक्षमाणस्तल्लीलांमुमुदेजठरोभृशं २५ भुंजानःप्रपिबन्खादन्बालकस्नेहयंत्रितः॥भो
जयन्पाययन्मूढोनवेदागतमंतकं २६ सएवंवर्तमानोज्ञोमृत्युकालउपस्थिते॥मतिंचकारतनयेबालेनारायणा
ह्वये २७ सपाशहस्तांस्त्रीन्दृष्ट्वापुरुषान्भृशदारुणान्॥वक्रतुंडानूर्ध्वरोम्णआत्मानंनेतुमागतान् २८ दूरे
क्रीडनकासक्तंपुत्रंनारायणाह्वयं॥प्लावितेनस्वरेणोच्चैराजुहावाकुलेंद्रियः २९ निशम्यम्रियमाणस्यब्रुवतो
हरिकीर्तनं॥भर्तुर्नाममहाराजपार्षदाःसहसापतन् ३० विकर्षतोंतर्हृदयाद्दासीपतिमजामिलं॥यमप्रेष्यान्
विष्णुदूतावारयामासुरोजसा ३१ ऊचुर्निषेधतस्तांस्तेवैवस्वतपुरःसराः॥केयूयंप्रतिषेद्धारोधर्मराजस्यशास
नं ३२ कस्यवाकुतआयाताःकस्मादस्यनिषेधथ॥किंदेवाउपदेवावायूयंकिंसिद्धसत्तमाः ३३ सर्वेपद्मपला
शाक्षाःपीतकौशेयवाससः॥किरीटिनःकुंडलिनोलसत्पुष्करमालिनः ३४ सर्वेचनूत्नवयसःसर्वेचारुचतुर्भुजाः॥ध
नुर्निषंगासिगदाशंखचक्रांबुजःश्रियः ३५ दिशोवितिमिरालोकाःकुर्वंतःस्वेनरोचिषा॥किमर्थंधर्मपालस्यकिंक
पःकार्यः ३३ यतोलौकिकाद्भूतरूपायूयमित्याहुः सर्वइतिसार्धाभ्यां लसंत्यःपुष्करमालाःसंतियेषां ३४ नूत्नंनवंवयोयेषांनिषं
गइषुधिःधनुर्निषंगादिभिःश्रीशोभायेषांते ३५ विगतंतिमिरंआलोकश्चान्यस्यप्रकाशोयास्तथाभूताद्दिशःकुर्वतःभवतामेतदनु
चितमित्याहुः॥किमर्थमिति ३६ छ छ

459
1981

अहोदंड्यादंड्यादिज्ञानसंज्ञाएतेचोराएवास्मद्विद्याधर्मराजस्यकिंकराइत्यनंतवदंतीति॥विस्मयेनप्रहस्यतान्प्रत्यूचुः मेघस्येवनि
र्ह्रादोध्वनिर्यस्यास्तया ३७ तत्त्वंस्वरूपंलक्षणंप्रमाणं ३८ कथंस्वित्केनप्रकारेणस्थानंविषयः॥कारिणःकर्मिणः॥नृणामि
तिनराएवनपश्वादयः॥लेषपिकतिचिदेवेत्यर्थः ३९ वेदेनप्रणिहितोविहितोधर्मःवेदप्रमाणकइत्यर्थः॥अनेनयोवेदप्रमाणकःस
धर्मः सवेदप्रमाणकइतिस्वरूपंप्रमाणंचोक्तं॥यथाहुर्जैमिनिः॥नोदनालक्षणोर्थोधर्मइतिस्वाख्यातंचभट्टैः॥इयमेकेनसूत्रेणश्रुत्य
र्थाभ्यांनिरूप्यतइति॥अधृष्टस्याधर्मस्यस्वरूपंलक्षणंचदंडस्थानकथनायाहुः॥तद्विपर्ययः॥योवेदनिषिद्धःसोधर्मःनिषेधश्च॥त
स्मिन्प्रमाणंइत्यर्थः॥वेदस्यप्रामाण्येहेतुः॥वेदोनारायणादुद्भूतःसएवसाक्षादित्युपचारः॥स्वयंभूरितिचनिश्वासमात्रेणस्वयमे

श्रीशुकउवाच॥इत्युक्तेयमदूतैस्तेवासुदेवोक्तकारिणः॥तान्प्रत्यूचुःप्रहस्येदंमेघगंभीरयागिरा ३७ विष्णु
दूताऊचुः॥यूयंवैधर्मराजस्ययदिनिर्देशकारिणः॥ब्रूतधर्मस्यनस्तत्त्वंयच्चाधर्मस्यलक्षणं ३८ कथंस्विद्ध्रियते
दंडःकिंवास्यस्थानमीप्सितं॥दंड्याःकिंकारिणःसर्वेआहोस्वित्कतिचिन्नृणां ३९ यमदूताऊचुः॥वेदप्रणिहितोध
र्मोह्यधर्मस्तद्विपर्ययः॥वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुमः ४० येनस्वधाम्न्यमीभावाःरजःसत्त्वतमोमयाः॥
गुणनामक्रियारूपैर्विभाव्यंतेयथायथं ४१ सूर्योग्निःखंमरुद्गावःसोमःसंध्याहनीदिशः॥कालःस्वयंधर्मइति
येतेदैह्यस्यसाक्षिणः ४२

वभवतीतितथाचश्रुतिः॥अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदइति ४० कोसोनारायणस्तत्राहुः॥येनस्वधाम्निस्वस्वरूपेअमी
भावाःप्राणिनः॥गुणाःसत्त्वादयः॥नामानिब्राह्मणइत्यादिनिक्रियाश्चाध्ययनाद्याःरूपाणिवर्णाश्रमादयःतेर्विभाव्यंतेविरच्यंते॥यथा
तथ्येन ४१ तथाप्यधर्मोनेनकृतइतिकुतोज्ञायतेतत्राहुः॥ये~~नस्वधा~~म्निसूर्यइति॥आदित्यचंद्रावनिलोनलश्चद्यौ॥भूमिरापोहृदयंय
मश्च॥अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति ४२ श्रीगोविंद॥ ॥श्रीगोपाळ॥ श्रीराम॥ ॥

स्थानमाहुः॥एतैर्निमित्तभूतैर्विज्ञानःसर्वद्रष्टेति ४३ विपरीतानिअभद्राणिकर्मिणांसंभवंतियतस्तेषांगुणसंगोपोस्तियदिकश्चिद
कर्तास्यात्तर्हितस्याभद्राणिनस्युःनत्वेदंतस्तीत्याहुः॥नहिदेववानकर्मकृदस्तीति॥अतःसर्वैकर्मिणः॥कर्मिणांचपापस्याविस्यंभावि
त्वात्तेसर्वेदंडमर्हंतीत्यर्थः ४४ कथंस्वल्पियतेदंडइत्यस्योत्तरंयनतिअधर्माचेतिदृष्टांतःअधर्मानुसारेणदंडोधर्मोनुसारेणसुख
मित्यर्थः ४५ नकेवलंसूर्यादयएवज्ञापकाःकिंत्वर्थापत्तिरपीत्याहुः यथेतिहेदेवप्रवराःइहजन्मनिशांतघोरमूढत्वेनवास्फखदुःखमि
श्रत्वेनवाधार्मिकत्वादिनावात्रैविध्यंभूतेषुयथोपलभ्यतेतथान्यत्रजन्मांतरेनुमीयतेत्रैविध्यंअन्यथानुपपत्त्याकल्प्यते ४६ वर्तमा

एतैरधर्मोविज्ञातःस्थानंदंडस्ययुज्यते॥सर्वेक्रमानुरोधेनदंडमर्हंतिकारिणः ४३ संभवंतिहिभद्राणिविपरीता
निचानघाः॥कारिणांगुणसंगोस्तिदेहवानत्यकर्मकृत् ४४ येनयावान्यथाधर्मोधर्मश्चेहसमीहितः॥सएवतत्फ
लंभुंक्तेतत्रतावदमुत्रवै ४५ यथेहदेवप्रवरास्त्रैविध्यमुपलक्ष्यते॥भूतेषुगुणवैचित्र्यात्तथान्यत्रानुमीयते ४६
वर्तमानोन्ययोःकालोगुणाभिज्ञापकोयथा॥एवंजन्मान्ययोरेतद्धर्माधर्मनिदर्शनं ४७ मनसेवपुरेदेवःपूर्वरूपं
विपश्यति॥अनुमीमांसतेपूर्वंमनसाभगवानजः ४८

नजन्मनापूर्वापरजन्मधर्माधर्मज्ञानंभवतीतिसदृष्टांतमाहुः वर्तमानोवसंतादिकालःअन्ययोर्भूतभविष्ययोःवसंतयोर्येगुणाःपु
ष्पफलादयःतेषामभिज्ञापकोयथा॥एवमेतज्जन्मअन्ययोर्भूतभाविजन्मनोधर्माधर्मौनिदर्शयतीतितथा॥अयंचधर्माधर्मज्ञानप्र
कारोन्येषां ४७ धर्मराजस्तुमनसैवसर्वेषांपश्यतीतिआहुः॥पुरेसंयमिन्यांस्थितएवयमः देहस्थितोंतर्यामीचजीवस्यपूर्वरूपंध
र्मादियुक्तंविशेषेणपश्यति॥अनुअनंतरमेवापूर्वरूपंमीमांसते॥यद्यस्मानुरूपंविचारयति॥यतोसौभगवानजः ४८ गोविंद॥ श्रीः ४

761 / 1981

ईश्वरेणउत्पादितेवर्तमानंदेहंपश्यतिनतुपूर्वमपरंचेत्याहुः॥अज्ञः॥अविद्योपाधिजीवस्तुव्यक्तमेवप्राचीनकर्माभिव्यक्तंवर्तमानं
देहंउपास्तेअहमितिमन्यतेपूर्वमपरंवानवेद॥अत्रहेतुः॥नष्टाजन्मनास्मृतिर्यस्या॥अत्रदृष्टांतः॥तमसानिद्रयायुक्तोयथास्वप्नेभि
व्यक्तमेवदेहाद्युपास्तेनतुजाग्रद्देहादिपूर्वस्वप्नादिगतंवानवेदित्यर्थः ४९ एवंभूतस्यजीवस्यसंसारंप्रपंचयतिपंचभिःश्लोकैःपंच
भिःकर्मेंद्रियैःस्वार्थानुपादानादीन्वचनादानविहरणविसर्गानंदात्पंचशब्दादीन्वेदपंचभिर्ज्ञानेंद्रियैःषोडशेनमनसासहसप्तदशः
षोडशोपाध्यंतर्गतोपिस्वयंएकएवसर्वेंद्रियविषयप्रतिसंधानात्॥त्रीन्ज्ञानकर्मेंद्रियमनोविषयान्व्याप्नोति ५० तदेतल्लिंगंश

यथाज्ञस्तमसायुक्तउपास्तेव्यक्तमेवहि॥नवेदपूर्वमपरंनष्टजन्मस्मृतिस्तथा ४९ पंचभिःकुरुतेस्वार्थान्पंचवेदाथ
पंचभिः॥एकस्तुषोडशेनत्रीन्स्वयंसप्तदशोश्नुते ५० तदेतत्षोडशकलंलिंगंशक्तित्रयंमहत्॥धत्तेनुसंसृतिंपुंसि
हर्षशोकभयार्तिदां ५१ देह्यज्ञोजितषड्वर्गोनेच्छन्कर्माणिकार्यते॥कोशकारइवात्मानंकर्मणाछाद्यमुह्यति ५२ नहि
कश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्॥कार्यतेह्यवशःकर्मगुणैःस्वाभाविकैर्बलात् ५३ लब्ध्वानिमित्तमव्यक्तंव्य
क्ताव्यक्तंभवत्युत॥यथायोनियथाबीजंस्वभावेनबलीयसा ५४

रीरंशक्तित्रयंगुणत्रयकार्यंमहदादि॥पुंसिजीवेअनुसंसृतिंधत्ते ५१ नेछत्अनिछन्नपिअनेनैवकर्माणिकार्यतेकोशकारःकीट
विशेषः॥मुह्यतिनिर्गमोपायंनजानाति ५२ कार्यतइत्यत्रानुभवंप्रमाणयतिगुणैर्गुणकार्यरागादिभिः स्वाभाविकैःपूर्वसंस्कारोद्भू
तैःकर्मवशेनच ५३ तदनुरूपोदेहोभवतीत्याह॥अव्यक्तंअदृश्यंनिमित्तंलब्ध्वाव्यक्ताव्यक्तंतदनुरूपंस्थूलंसूक्ष्मंचशरीरंभवति॥य
थायोनिमात्रसदृशंयथाबीजंपितृसदृशं॥स्वभावोवासना॥शुक्रशोणितयोरेकत्वेपिकर्मवासनायामातापितृसदृशोदेहोभवतीत्यर्थः
५४

संसारचक्रमुपसंहारेण मुक्तिप्रकारमाह॥ एषइति ईशसंघातपरमेश्वरभजनात् ५५ तदेवं सा मान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिळस्याधर्मप्रपंचयंतोदंड्यत्वमाहुः॥ अयं हीतियावदध्यायसमाप्ति तत्र ब्रह्मभ्यांतत्पूर्ववृत्तानुवादोन्यायाप्तिरेकप्रदर्शनार्थः॥ शीलं स्वभावः वृत्तंसदाचारः॥ गुणाः क्षमादयः तेषामालयः ५६ निरहंकृतिः निरहंकारः ५७ अवृत्तः वनात्परावृत्तः ५८ भुजिष्यया

एषप्रकृतिसंगेनपुरुषस्यविपर्ययः॥ आसीत्सएवनचिरादीशसंगाद्विलीयते ५५ अयंचश्रुतसंपन्नः शीलवृत्तगुणालयः॥ धृतव्रतोमृदुर्दांतः सत्यवान्मंत्रविच्छुचिः ५६ गुर्वग्न्यतिथिवृद्धानांशुश्रूषुरनहंकृतिः॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ५७ एकदासौवनंयातः पितृसंदेशकृद्द्विजः॥ आदायतत आवृत्तः फलपुष्पसमित्कुशान् ५८ ददर्शकामिनंकंचिच्छूद्रंसहभुजिष्यया॥ पीत्वाचमधुमैरेयंमदाघूर्णितनेत्रया ५९ मत्तयाविश्लथन्नीव्याव्यपेतंनिरपत्रपं॥ क्रीडंतमनुगायंतंहसंतमनयांतिके ६० दृष्ट्वातांकामलिप्तेनबाहुनापरिरंभितां॥ जगामहृच्छयवशंसहसैवविमोहितः ६१ स्तंभयन्नात्मनात्मानंयावत्सत्वंयथाश्रुतं॥ नशशाकसमाधातुंमनोमदनवेपितं ६२ तन्निमित्तस्मरव्याजग्रहग्रस्तोविचेतनः॥ तामेवमनसाध्यायन्स्वधर्माद्विरराम ह ६३ तामेवतोषयामासपित्र्येणार्थेनयावता॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेतयथातथा ६४ विप्रांस्वभार्यामप्रौढांकुलेमहतिलंभितां॥ विससर्जचिरात्पापः स्वैरिण्यापांगविद्धधीः ६५

भोगस्त्रियादास्या॥ मैरेयंमधुपैष्टीसुरांपीत्वा मदेनाघूर्णिते भ्रांते नेत्रे यस्याः ५९ विशेषेण श्लथंती नीवी यस्याः तयासह व्यपेतंस्वाराचारात् भ्रष्टं ६० कामोद्दीपकेन तदंगरागेण हरिद्रादिनालिप्तेन ६१ सत्वंधैर्यं श्रुतंज्ञानं तद्बलेन स्तंभयन्नपि मदनेन कंपितमनः समाधातुं नशक्तोभूत् ६२ तद्दर्शनमेवनिमित्तं यस्य सएव ग्रहस्तेन ग्रस्तः विचेतनो गतः स्मृतिः ६३ यावता सम ग्रेण ६४ लंभितां परिणीतां ६५

६६ अघरूपमायुर्यस्य॥ मळमेवतदीयमन्नादिकमत्तीति मळात् ६७ अकृतनिर्वेशं अकृतप्रायश्चित्तं॥ अस्यैव हितार्थं नेष्याम इत्याहुः॥ यत्रेति ६८ इतीश्रीभागवतटीकायांषष्ठस्कंधेप्रथमोध्यायः १ द्वितीयेचैवर्वर्याख्यानाममहात्म्यमद्भुतं॥ श्रावयित्वाहिजाविष्णोर्लोकंनीतइतीर्यते॥ नयकोविदाः न्यायनिपुणाः १ धर्मदृशां सतामधर्मः स्पृशतीति तदाह॥ यत्र सभायां ये धर्मदृग्भिः

यतस्ततश्चोपनिन्येन्यायतोन्यायतोधनं॥ बभारास्याः कुटुंबिन्याः कुटुंबंमंदधीरयं ६६ यदसौशास्त्रमुल्लंघ्यस्वैराचार्यगर्हितः॥ अवर्ततचिरंकालमघायुरशुचिर्मळात् ६७ ततएनंदंडपाणेः सकाशंकृतकिल्बिषं॥ नेष्यामोकृतनिर्वेशंयत्रदंडेनशुध्यति ६८ इतिभागवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांषष्ठस्कंधेप्रथमोध्यायः १ श्रीशुकउवाच॥ एवंतेभगवद्दूतायमदूताभिभाषितं॥ उपधार्याथतान्राजन्प्रत्याहुर्नयकोविदाः १ विष्णुदूताऊचुः॥ अहोकष्टंधर्मदृशामधर्मःस्पृशतेसभां॥ यत्रादंड्येष्वपापेषुदंडोयैर्ध्रियतेवृथा २ प्रजानांपितरोयेचशास्तारःसाधवःसमाः॥ यदिस्यात्तेषुवैषम्यंकंयांतिशरणंप्रजाः ३ यद्यदाचरतिश्रेयानितरस्तत्तदीहते॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ४ यस्यांकेशिरआधायलोकःस्वपितिनिर्वृतः॥ स्वयंधर्ममधर्मंवानहिवेदयथापशुः ५ सकथंन्यर्पितात्मानंकृतमैत्रमचेतनं॥ विश्रंभणीयोभूतानांसघृणो

तेषांतांसभां २ पितरः पितृवत्पालकाः शास्तारः अनुशिक्षकाः॥ वैषम्यं अदंड्यदंडनं ३ एतत्प्रवर्तितमधर्ममन्योपि करिष्यतीति महत्कष्टमभूदित्याहुः॥ यद्यदिति॥ श्रेयान् श्रेष्ठः॥ विश्वस्तघातादपीत्याहुः॥ यस्येति द्वाभ्यां॥ निर्वृतो निश्चिंतः ५ विश्वासेननितरां अर्पितआत्मा येनतं विश्रंभणीयः विश्वसनीयः सघृणश्चेत् ६ श्रीगोविंद॥ ॥श्रीराम॥ ॥६७॥

भागवत ६ नन्वस्य पापिनो दंडे किमर्थमाक्रोशाः क्रियंते तत्राह ॥ अयं हीति ॥ यद्यस्मादिवशोपि हरेर्नाम व्याजहार उच्चारितवान् ॥ न केवलं प्रा
यश्चित्तमात्रं हरेर्नाम ॥ अपितु स्वस्त्ययनं मोक्षसाधनमपि ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयं ॥ बद्धः परिकरस्तेन मोक्षाय गमनं
प्रतीति स्मृतेः ॥ ननु कर्मसाद्गुण्यकरं हरेर्नामेति युक्तं ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे त ५०
मच्युतमित्यादिवचनात् ॥ स्वातंत्र्येण त्वघनिवर्तकं हरेर्नाम कथं स्यात्तत्राहुः ॥ एतेनैवेति ॥ अघोनः अघवतः मघवतः शब्दवद्रूपं ॥ यतः
आह इति छेदः ॥ आदूषत् ॥ आभासमात्रं चतुरक्षरं यन्नामजगाद ॥ एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं च दर्शितं कथं जगाद
नारायण आय आगच्छ इत्येवं विक्रोशरूपेण पुत्राह्वानेन ॥ अयं भावः ॥ कर्मांगत्वेपि हरिनाम्नः स्वादिरत्ववत् संयोगादिपृथक्त्वेन सर्व

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ७ एतेनैवह्यघो
नोस्य कृतं स्यादघनिष्कृतं ॥ यदा नारायणायेति जगाद चतुरक्षरं ८ श्रीकृष्ण ॥

प्रायश्चित्तार्थत्वं युक्तमेव ॥ तथाहि ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्या
दिभिः पुराणेषु तावत्स्वहस्तशोनाम्नः स्वातंत्र्यभावो वगम्यते नार्थवाद इति शंकनीयं ॥ विधिशेषत्वाभावात् ॥ न च विध्यश्रवणादन्य
शेषता कल्पनीया ॥ यदाग्नेयोष्टाकपालो भवतीत्यादिवदप्राप्तार्थत्वेन विधिकल्पनोपपत्तेः मंत्रेषु च ॥ मर्ता अमर्त्यस्य ते भूरिनाम
नामहे ॥ विप्रासो जातवेदसः ॥ आस्य जानंतो नाम चिद्विवक्तनेत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते ॥ उपपादितं
च मंत्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकरणे तस्माच्छ्रीनारायणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यादिति ८ गोविंद श्रीः ६

1165
1981

ननु कामकृतानां च बहूनां महापातकानां सहस्रशः आवर्तितानां ह्यादशाब्दकोटिभिरप्यनिवृत्तानां कथमिदं लोके प्रायश्चित्तं स्यात्त
त्राहुः ॥ स्तेन इति द्वाभ्यां ॥ सर्वनिष्कृतिश्रेष्ठं प्रायश्चित्तं इदमेव तत्र हेतुः ॥ यतो नामव्याहरणात् ॥ तद्विषयानामोच्चारकपुरुषविषया म
दीयायं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति ९ ॥ १० श्रेष्ठत्वमेवोपपादयति नेति द्वाभ्यां ॥ ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रता
दिभिर्निष्कृतैः तथा न शुध्यतीति ॥ उदाहृतैः उच्चारितैः तैर्यथा नामपदैरित्यनेन नामीत्यादिक्रियायोगोपिनापेक्षित इति दर्शितं ॥
किंच ॥ तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां चोपलंभकं ज्ञापकं भवति ११ ननु कृच्छ्रचांद्रायणादिवत् पापनिवृत्तिमात्रो

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहंता ये च पातकिनोपरे ९ सर्वेषामप्यघवता
मिदमेव सुनिष्कृतं ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा वि
शुध्यत्यघवान्व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं ११ नैकांतिकं तद्धि कृते
पि निष्कृतं मनः पुनर्धावति चेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः १२ अथै
नं मापनयत कृताशेषाघनिष्कृतं ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३

पक्षिणमित्यर्थः १२ नैकांतिकं नात्यंतशोधकं तन्निष्कृतं यस्मिन् कृतेपि असत्पथे पापमार्गे मनो धावति चेत् कर्मणां पापानां नि
र्हारं आत्यंतिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं यतो सौ खलु सत्त्वभावनः चित्तशोधकः १३ अथ तस्मादेनं ब्राह्मणं मा
अपमार्गेण नयत कृतमशेषाणां अघानां निःकृतं येन यद्यस्मात् समग्रहीत् संपूर्णमुच्चारितवान् ॥ नामैकदेशेनाप्यलमिति भावः
॥ म्रियमाण इत्यनेन पुनः पापांतरासंभव उक्तः ननु तत्कालत्वमेव विवक्षितं १३ श्रीगोपालकृष्ण ॥ ७ ॥

भा०
७

ष०

इदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् ॥ न च विधिना काकतालीयनामोच्चारणं पापहरमिति प्रमाणमस्तिन
त्वयं पुत्रनामाग्रहीत् न तु भगवन्नामेत्यत आहुः ॥ सांकेत्यं पुत्रादौ संकेतितं परिहास्यं परिहासेन कृतं ॥ स्तोभं गीतालापपूरणार्थं
कृतं ॥ हेळनं किं विष्णुनेति सावज्ञमपि च वैकुंठनामोच्चारणं १४ ननु नायं संकल्पपूर्वं वैकुंठनामाग्रहीत् किंतु पुत्रस्नेहपरवशः
सन् तत्राह ॥ पतित इति ॥ अवशेनापि यो हरिरित्याह ॥ स यातनां नार्हति ॥ पुमानित्यनेनात्र न वर्णाश्रमादिनियम इत्युक्तं ॥ अ
वशत्वमेवाहुः ॥ पतितः प्रासादादिभ्यः स्खलितो मार्गे ॥ भग्नः भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना ॥ आहतो दंडादिना १५
ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं ॥ न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् ॥ तदाहुर्द्वाभ्यां ॥ गुरू
णां पापानां गुरूणि प्रायश्चित्तानि लघूनां चलघूनि च तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि ॥ अतस्तत्रैव तथैव व्यवस्था हरिनामस्तु

सांकेत्यं परिहास्यं वा स्तोभं हेळनमेव च ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः १४ पतितः स्खलितो भग्नः सं
दष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान्नार्हति यातनां १५ गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्राय
श्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः १६ तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तत् हृद
यं तदपीशांघ्रिसेवया १७ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथानलः
१८

नेयं व्यवस्थोक्ता ॥ विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् ॥ न च सुराबिंदुपाने महापातकत्वस्मरणांतरं तन्नाम्नस्त
त्प्रायश्चित्तत्वस्मरणस्याभावमिति भावः १६ किंच ॥ तैस्तपोदानादिभिस्तान्यघान्येव पूयंते नश्यंति ॥ अधर्माज्जातं मलिनं तु तस्य
पापकर्तुर्हृदयं ॥ यद्वा तेषामघानां हृदयं अघरूपसंस्कारास्त्वं न शुध्यति तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः ॥ अयं भावः
महांत्यपि पापानि सकृदुच्चरितेनैव नाम्ना नश्यंति ॥ सकृत्प्रवर्तितेन दीपेनैव गाढध्वांतेन न तदावृत्या तु पापांतरस्यानुत्पत्तिः दीपधा
रणादिव तमोंतरस्य ॥ ततश्च वासनानाशः स्यात् हृदयशुद्धिः ॥ एतदर्थमेव तत्र तत्रावृत्तिविधानं ॥ पापक्षयश्च भवति स्मरतो तमहर्निशमि
त्यादिषु तदेवात्राप्युक्तं गुणानुवादः ॥ खलु सत्वभावनः तदपीशांघ्रिसेवयेति च ॥ अतो स्य हरिनाम्नैव सर्वपापक्षयः वासनाक्षयस्तु
महोपुरुषदर्शनादिभिरिति नित्यस्य तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा १८ ७

श्री:
७

7657
1981

नोज्ञानमिति चेत्तत्राहुः ॥ यथेति ॥ अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युपक्रमं ॥ यदृच्छया श्रद्धाहीनं उपयुक्तं भक्षि
तं पर्षन्मुखाद् अजानतोपि स्वगुणमारोग्यं कुर्यात् ॥ मंत्रोपि नामात्मकस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिः श्रद्धादिकमपेक्षित इ
तं पर्षन्मुखाद् जानतोपि स्वगुणमारोग्यं कुर्यात् ॥ मंत्रोपि नामात्मकस्तथा स्वकार्यं कुर्यादेव न हि वस्तुशक्तिः श्रद्धादिकमपेक्षित इ
त्यर्थः ॥ तदुक्तं विष्णुधर्मेषु हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति १९ तं विप्रं
अमूमुचन् मोचयामास २० प्रत्युदिता निराकृताः संतो यात्वा आगत्वा यमराजाय यथावत्कथयामासुः २१ दर्शनं नोत्सवो यस्य २२

यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतो प्यात्मगुणं कुर्यान्मंत्रो प्युदाहृतः १९ श्रीशुक उवाच ॥ ते
एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् २० इति प्रत्युदिता याम्या दूता
यात्वा यमांतिकं ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम २१ द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववं
दे शिरसा विष्णोः किंकरान् दर्शनोत्सवः २२ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रा
तर्दधिरे च वः २३ अथाजामिळ आकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयं २४ भ
क्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत् स्मरतोशुभमात्मनः २५ अहो मे परमं क
ष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना २६ धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुल
कज्जलं ॥ हित्वा बाळां सतीं योहं सुरापामसतीमगां २७ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ ॥ अहो
मयाधुना त्यक्तावकृतज्ञेन नीचवत् २८ सोहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र वि

विवक्षुं वक्तुमिच्छं तं ज्ञात्वा २३ त्रैविधं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भगवत्प्रणितं शुद्धं निर्गुणं ध
र्ममाकर्ण्येति योज्यं २४ भक्तिमान् प्रसीदत् इत्युत्तरानुषंगः २५ अनुतापं प्रपंचयति अहो इति चतुर्भिः ॥ येन आत्मनामुया वृष
ल्यां पुत्रतया जायमानेन ब्रह्म ब्राह्मण्यं विप्लावितं नाशितं २६ दुःकृतं दोषकर्तारं कुलस्य कज्जलं कलंकं २७ मा त्वन्यो बंधुः
पुत्रादिर्ययोः तपस्विनौ संतप्तौ अधुना तत्क्षणमेव २८ ॥२९॥ गोविंद ॥

इदानींतस्य विमर्शपूर्वकं मोक्षक्रममाह किमिदमित्यष्टभिः ॥ साक्षात्प्रत्यक्षमिहजाग्रतैव दृष्टं ३० येमांविमोचयन् ॥ ते चक्कगताः
३१ यद्यप्यहमस्मिन्जन्मनि दुर्भागः पापीयान् ॥ अथापिजन्मांतरेनूनं पुण्यवानित्याह विबुधोत्तमदर्शनेनिमित्तेमममयिदंद
र्शनार्थपूर्वेण मंगळेन महापुण्येन भवितव्यं येन दर्शनेन ॥ अन्यथा पूर्वपुण्यं विना ३२ कथंभूतं वैकुंठनामगृह्यते वशीक्रियतेऽ

किमिदं स्वप्न आहोस्वित्साक्षाद्दृष्टमहाद्भुतं ॥ क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ३० अथ ते क्व गता
सिद्धाश्चत्वारश्चारुदर्शनाः ॥ व्यमोचयन्नीयमानं बध्वा पाशैरधो भुवः ३१ अथापि मे दुर्भगस्य विबुधोत्तमदर्श
ने ॥ भवितव्यं मंगळेन येनात्मा मे प्रसीदति ३२ अन्यथा म्रियमाणस्य नाशुचेर्वृषळीपतेः ॥ वैकुंठनामग्रहणं
जिह्वा वक्तुमिहार्हति ३३ क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ॥ क्व च नारायणेत्येतद्भगवन्नाम मंगळं ३४
सोऽहं तथा यतिष्यामि यतचित्तेंद्रियानिळः ॥ यथा न भूय आत्मानमंधे तमसि मज्जये ३५ विमुच्य तमिमं बं
धमविद्याकामकर्मजं ॥ सर्वभूतसुहृच्छांतो मैत्रः कारुण आत्मवान् ३६ मोचये ग्रस्तमात्मानं योषिन्मय्यात्म
मायया ॥ विक्रीडितो ययैवाहं क्रीडामृगवदधमः ३७ ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिं ॥ धास्ये
मनो भगवति शुद्धं तत्कीर्तनादिभिः ३८ इति जातसुनिर्वेदः क्षणसंगेन साधुषु ॥ गंगाद्वारमुपेयाय मुक्तस
र्वानुबंधनः ३९ श्रीशुक उवाच ॥ स तस्मिन्देवसदन आसीनो योगमास्थितः ॥ प्रत्याहृतेंद्रियग्रामो युयोज मन
आत्मनि ४० ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ४१

नेनेति ग्रहणं ३३ ब्रह्मघ्नः विप्रत्वनाशः ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ मिथ्याभूते अर्थे धीर्यस्य तथाभूतः सन् देहादौ ममाहमिति मतिं
हित्वा धास्ये ३८ मुक्तं सर्वमनुबंधनं पुत्रादिस्नेहो येन सः ३९ प्रत्याहृतइंद्रियग्रामो येन ४० गुणेभ्यो देहेंद्रियादिभ्यः आत्मानं
वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धाम्नि स्वरूपे तस्मिन् भगवद्धाम्नि ४१ श्रीकृष्ण ॥

१६१
१९८१

उपारिता निश्चला धीर्यस्य सः ॥ तस्मिन्काळे द्राक्षीदिति वा पुरः पुरतः ॥ ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय ववंदे
४२ ॥ ४३ ॥ ४४ ॥ उपसंहरति ॥ एवमिति द्वाभ्यां ॥ विप्लाविताः सर्वे धर्मा येन ॥ हतं व्रतं स्वदारनियमादिर्यस्य ४५ कर्मनिबंधस्य
पापमूलस्य कृंतनं छेदकमतः परं नास्तिक स्मात्परं तीर्थपदस्यानुकीर्तनात् यतत्र हेतुः यद्यतोनुकीर्तनात् ॥ ततोनुकीर्तनादन्यथा
प्रायश्चित्तांतरैः रजस्तमोभ्यां कलिलं मळिनमेव तिष्ठति यत्तत्मनः ४६ नवेक्षितो भवति ४८ म्रियमाण अवशत्वेन श्रद्धां

यत्स्यपारतधीतस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ४२ हित्वा कळेवरं ती
र्थे गंगायां दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां ४३ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥
हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ४४ एवं संप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपा
त्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ४५ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदा
नुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ४६ य एवं परमं गुह्यमितिहासं पुरा
तनं ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ४७ नवै स नरकं याति नेक्षितो यमकिंकरैः ॥ यद्यप्यमंगळो
मर्त्यो विष्णुलोके महीयते ४८ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं ॥ अजामिळोप्यगाद्धाम किंपुनः श्रद्ध
यागृणन् ४९ इति श्रीभागवते० षष्ठ० अजामिळोपाख्याने द्वितीयोऽध्यायः २ राजोवाच ॥ निशम्य देवः स्व
भटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयं १ ॥ ॥

ह्नोपि ४९ इति षष्ठे द्वितीयः २ तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः ॥ सांत्वयित्वा स्वदूतास्ते वैष्णवैकंकरीकृताः ॥ विष्णु
दूतैर्निर्णीतं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यायारंभः तत्र यदुक्तं ॥ यमराज्ञे सर्वमाचचक्षुरिति ॥ ततः किं तत्र वृत्तमिति पृच्छ
ति ॥ निशाम्येति ॥ मुरारेर्नैदेशिकैः किंकरैः स्वान्विहतान् अतएव हताज्ञा आज्ञा यस्य यस्य वशवर्ती अयं जनः सोपि तान्प्रति किमाह १

आत्याश्चर्यमेतदित्याह ॥ यमस्येति ॥ हे ऋषे यमस्य दंडभंगः कुतश्च न कस्मादपि श्रुतपूर्वो नासीत् ॥ एतत् एतस्मिन्नर्थे ॥ यद्वा ॥ नश्रु
तपूर्वः ॥ एतद्यमदूतनिराकरणं चासीत् अतः सर्वस्यापि लोकस्य संशयावर्तते तं च त्वत्तोन्यो नच्छिनत्तीति मे निश्चितं ॥ अतः कथयेति
शेषः २ भगवतः पुरुषैः प्रतिहतउद्यमो येषां ते याम्याः पुरुषाः ३ कतिसंतीत्याक्षेपोक्तिः ॥ त्रैविध्यं त्रिविध्यं त्रिविधं स्वार्थे ष्यञ् य
द्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः ॥ तदर्थं च कर्मफलस्याभिव्यक्तिहेतवः कति संतीति ४ संतु बहवः को बाधस्तत्राह ॥ यदीति ॥
मृत्युः दुःखं अमृतं सुखं तेषां विप्रपतिपत्तौ तेउभे कस्य स्यातां न कस्यापि परस्परविरोधेनोभयोरपि प्रतिबंधात् ॥ एकः मत्यनुकस्यवान
स्यातां ॥ एकः सुखं कर्तुमिच्छति दुःखं चान्यः एकमत्ये च तयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्तिः कस्य वा तेउभे अपि न स्याताम्

यमस्य देवस्य न दंडभंगः कुतश्चनर्षेश्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे विनिश्चि
तं २ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञापयामासुर्यमं संयमिनीपतिं ३ य
मदूता ऊचुः ॥ कति संतीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ४ यदि स्यु
र्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव च ५ किंतु शास्तृबहुत्वे स्याद्बहूना
मिह कर्मिणां ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्तिनां ६ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ॥ शास्ता
दंडधरो नृणां शुभाशुभविवेचनः ७ तस्य ते विहितो दंडो न लोके वर्ततेधुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलं
भिता ८ नीयमानं तवादेशादस्माभिर्यातनागृहान् ॥ व्यमोचयन् पातकिनं छित्वा पाशान् प्रसह्य ते ९ तांस्ते
वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं १०

त्यर्थः ५ ननु बहूनां कर्मिणां व्यवस्थया शास्तृबहुत्वे शास्तृत्वं स्यात् घटेत किंतु तदा यत् सर्वशास्तॄणामुख्यं शास्तृत्वं तदेकं दंडशोडपचा
रमात्रमेव स्यात् ॥ यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिनामुपचारमात्रं निरंकुशत्वाभावात् यस्मादेवं शास्तृबहुत्वं न घटते
अतस्त्वमेक एव शास्ता ६ शुभाशुभव्यनक्तीति तथा ७ विप्रलंभिता वंचिता लंघितेत्यर्थः ८ नीयमानमिति ॥ ते तव ९ यदि
नो स्माकं क्षमं हितं मन्यसे ॥ अन्यथाज्ञानतस्तद्वृत्तानेन तथा चायमनर्थः स्यात् ॥ अतस्त्वया हितं वोत्र भावः यतो नारायणेति केवलं कमभि

771/1381

संयमयतीति ११ तथा मत्तोन्यो जगतः तस्थुषश्चापरोधीश्वरोस्ति ॥ अहं तु जंगमानामेव तत्रापि नृणामेव तत्रापि नृणामेव तत्रापि पा
पिनामेव तत्किंकरः सन् ईश्वरः स तु सर्वेश्वरः कोसौ यत्र यस्मिन् विश्वमोतं प्रोतं च ऊर्ध्वतिर्यक्तंतुषु पटवत् यस्यांशभ्यो विष्णुब्रह्मरुद्रे
भ्यो स्य स्थित्यादयो भवंति तस्य वशे लोको वर्तते नसि नासिकायां प्रोत बलीवर्दवत् १२ एतत्प्रपंचयति ॥ ब्राह्मणादिनामभिर्वाचा यां नि जायां
तंत्यां दामन्यां जनयो बध्नाति दामभिर्गोः बलीवर्दानिव ॥ तदिमे जीवाः नामकर्मभिर्निर्बंधे बद्धाः यस्मै बलिं वहंति यदधीनाः कर्म कुर्वंतीत्य
र्थः १३ यस्य च लीला दुर्विभाव्येत्याह ॥ आहमिति द्वाभ्यां १४ न स्पृष्टं रजस्तमश्च यैः ईहितं अभिप्रेतं चेष्टितं वा न विदुः स्पृष्टमायाः ॥ मा

यमस्यदुवाच
श्रीशुक उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूतान् प्रत्याह स्मरन् पादानुजं हरेः ११ यम उवाच
॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं ॥ यदंशतोस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः
१२ यो नामभिर्वाचि जनं निजायां बध्नाति तंत्यामिव दामभिर्गाः यस्मै बलिं त इमे नामकर्मभिर्निबंधबद्धाश्चकिताव
हंति १३ अहं महेंद्रो निर्ऋतिः प्रचेताः सोमोग्निरीशः पवनोर्को विरिंच्यः ॥ आदित्यविश्वे वसवोथ साध्या मरुद्गणा रु
द्रगणाः ससिद्धाः १४ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमायाः स
त्वप्रधाना अपि किं ततोन्ये १५ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ॥ आत्मानमंतर्हृदि संत
मात्मनां चक्षुर्यथैवाकृतयस्ततः परं १६ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण
दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः १७ श्रीराम ॥

यया स्पृष्टाः तततस्तेभ्योन्ये न विदुरिति किं पुनर्वक्तव्यं १५ तन्मायामोहितत्वान्न जानंतीत्युक्तं ॥ अविषयत्वाच्च तस्येत्याह ॥ यमिति ॥
गोभिरिंद्रियैर्हृदा चित्तेन न विचक्षते न पश्यंति ॥ यद्वा चानभ्युदितं यन्मनो न मनुत इत्यादिश्रुतेः ॥ आत्मनां जीवानां आत्मानं द्रष्टारं ॥
आकृतयो रूपाणि चक्षुर्यथा कर्मभूतं न जानंति ततः परमाकृतीनां प्रकाशकं ॥ न हि प्रमाता प्रमाणस्य विषय इति भावः ॥ एवंभूतः प
रमेश्वरो स्तीति पूर्वेणैव संबंधः १६ भवतु एवंभूतोन्यः परमेश्वरः ये पुनरस्माभिर्भर्त्स्यपापिनं रक्षितवंतस्ते के तानाह ॥ तस्येति द्वाभ्यां ॥
तस्येव रूपं गुणाः प्रभावादयः स्वभावः ॥ भक्तवात्सल्यादिर्येषां ते १७ ६

भाग० विष्णोर्भृत्ता निभृत्याः दुर्दर्शानिद्रष्टुमप्यशक्यानिलिंगानिरूपाणियेषांतानितद्भक्तिमतः विष्णुभक्तान्परेभ्यः शत्रुभ्यः सर्वतः अग्न्या ष०
६० दिभ्यश्चरक्षंति १८ ननुविष्णुभक्ताश्चेत्कथमधर्मपक्षपातंकुर्वंतः तदाह धर्मंत्विति ऋषयोभृग्वादयः १९ ननुकेपिचेन्नजानंति
तस्यसत्वेपिकिंप्रमाणंतत्राह स्वयंभूरिति कुमारः सनत्कुमारः वयमित्यात्मानमेवबहुमन्यमानोनिर्दिशति २० हेभटाः २१ तमेवधर्म
माह एतावानिति न चात्रप्रमाणंवक्तव्यंदृष्टत्वादित्याह नमोच्चारणेति येनैवकेवलेनसकृदुच्चारितेन ननुनामाभासेनकथंसर्वपा

भूतानिविष्णोः सुरपूजितानिदुर्दर्शलिंगानिमहाद्भुतानि रक्षंतितद्भक्तिमतः परेभ्योमत्तश्चमर्त्यानथसर्वतश्च
१८ धर्मंतुसाक्षाद्भगवत्प्रणीतंनवैविदुर्ऋषयोनापिदेवाः नसिद्धमुख्याअसुरामनुष्याः कुतश्चविद्याधरचारणादयः
१९ स्वयंभूर्नारदःशंभुःकुमारःकपिलोमनुः प्रह्लादोजनकोभीष्मोबलिर्वैयासकिर्वयं २० द्वादशैतेविजानीमोधर्मंभागवतंभटाः
गुह्यंविशुद्धंदुर्बोधंयज्ज्ञात्वामृतमश्नुते २१ एतावानेवलोकेस्मिन्पुंसांधर्मःपरःस्मृतः भक्तियोगोभगवतितन्नामग्रहणादिभिः
२२ नमोच्चारणमाहात्म्यंहरेःपश्यतपुत्रकाः अजामिलोपियेनैवमृत्युपाशादमुच्यत २३

पक्षयःस्यात् श्रद्धाभक्त्याद्यावृत्त्यादरादेरपिविधानात् तथाहि सायंप्रातर्गृणन्भक्त्यादुःखग्रामाद्विमुच्यतइति अनुदिनमिदमाद
रेणशृण्वन्तिति श्रवणंकीर्तनंध्यानंहरेरद्भुतकर्मणः जन्मकर्मगुणानांचतदर्थेखिलचेष्टितमित्याद्यस्मिन्नेवपुराणेतत्रतत्रपठ्यते
पुराणांतरेच पापक्षयश्चभवति स्मरतांतमहर्निशमिति अंत्रेवच तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां महतामपिकौ श्रीः
रव्यविध्येकांतिकंनिष्कृतमित्यादिनासम्यक्कीर्तनादेवमन्यते २३ गणपति श्रीराम गोविंद ७ ६०

473
1981

किंच तथासतिकिमितिमन्वादयोद्वादशाब्दादीनिस्मरेयुः तस्मादिदमनुपपन्नमिवतत्राह एतावतेति भगवतोगुणानांक
र्मणांचनाम्नांचसम्यक्कीर्तनमितियत् एतावतापुंसामघनिर्हरणायपापक्षयमात्रायअलमुपयोगोनास्ति अलंशब्दोत्रवारणे
यथाहामरसिंहः अलंभूषणपर्याप्तिशक्तिवारणवाचकमिति उपयोगाभावमेवाह अजामिलोमहापातक्यपिनारायणेतिविक्रु
श्यनतुसम्यक्कीर्तयित्वातत्रपुत्रंविक्रुश्यनतुहरिं अघवानशुचिरपिम्रियमाणोस्वस्थचित्तोपिमुक्तिमवापनत्वघनिर्हरणमात्रं अ
तोनामाभासेनापिसर्वपापक्षयइत्येवतत्वं आवृत्तिश्रद्धादिविधयस्तुपापवासनाक्षयार्थाइत्युक्तमेव हरेर्गुणानुवादःखलुसत्वभा
वनइत्यत्र २४ यत्तूक्तंव्यर्थंतर्हिद्वादशाब्दादिस्मरणमितितत्राह प्रायेणेति महाजनोमन्वादिः अयंभावः यथामृतंसंजीवनमो

एतावतालमघनिर्हरणायपुंसांसंकीर्तनंभगवतोगुणकर्मनाम्नां विक्रुश्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणउपैतिमुक्तिं
२४ प्रायेणवेदतदिदंनमहाजनोयंदेव्याविमोहितमतिर्बतमाययालं त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियुज्यमानः
२५ एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मनाविदधते खलुभावयोगं तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः २६

षधमज्ञानंतोवैद्यारोगनिर्हरणायत्रिकटुकनिंबादीनिस्मरंति तथास्वयंभुशंभुप्रमुखद्वादशव्यतिरिक्तेणायंमहाजनोतिगुह्यमि
दमज्ञात्वाद्वादशाब्दादिकंस्मरंतीति किंचमाययादेव्याअलंमोहितमतिरयंजनः मधुमधुरंयथाभवत्येवंपुष्पितायांपुष्पस्थानीयैरर्थ
वादैर्मनोहरायांत्रय्यांजडीकृताअभिनिविष्टामतिर्यस्य अतोमहत्येवकर्मणिश्रद्धयायुज्यमानोनाल्पेप्रवर्तते दृश्यतेहिप्राकृतस्य
लोकस्यमहतिमंत्रादौश्रद्धाअल्पेवाश्रद्धातस्मादस्यग्राहकोनास्तीतितैर्नोक्तं यद्वास्वाधीनःसिंहोस्तीत्येतावताश्वसृगालादिनिवार
णायतंयथानप्रयुंजते तथातितुच्छत्वापापस्यनतंनिरसनायपरंमंगलंहरेर्नामस्मरंति यद्वानाममाहात्म्यज्ञानेसर्वमुक्तिप्रसंगादि
त्येषादिकूग्रंथविस्तरभयात्तुनातिप्रपंच्यते २५ भावयोगंभक्तियोगं अमीषांपातकंनस्यादेवयदिस्यादुरुगायस्यवादःकीर्तनं २६

भाग०
३३
तदेवं धर्मतत्त्वं विनिर्णीय भृत्याननुशास्ति तद् इति ॥ ये भगवंतं प्रपन्नाः तदेवं ः सिद्धैश्च परिगीत पवित्र गाथा वर्णित पवित्र कथाः ॥ अन् ष०
स्तान्नोपसीदत ॥ तत्समीपमपि न गच्छत ॥ यः कालो न प्रभवति २७ के तर्हि इदं शार्थमानेया इत्यत्राह ॥ तानिति द्वाभ्यां ॥ असतो दुष्टान् तान्
वाह ॥ मुकुंदपादारविंदयोर्यो मकरंदरूपो रसः तस्माद्विमुखान् निःकिंचनै रजस्त्वं नुष्टात् ॥ तेषां ज्ञापकमाह निरयवर्त्मनि स्वधर्मशून्ये गृहेब

तेदेवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तन्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न
च वयः प्रभवाम दंडे २७ तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं ॥ निःकिंचनैः परमहंस
कुलै रसज्ञैर्जुष्टात् गृहे निरयवर्त्मनि बद्धतृष्णान् २८ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणा
रविंदं ॥ कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् २९ तत्क्षम्यतां स भगवान्पुरु
षः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ॥ स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने ३०
तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां ॥ महतामपि कौरव्य विध्येकांतिकनिष्कृतिं ३१ शृण्वतां गृणतां वीर्याण्युद्द
मानि हरेर्मुहुः ॥ यथा सुजातया भक्त्या शुध्येन्नात्मा व्रतादिभिः ३२

क्षात्त्वच्छाये स्तान् ॥ किंच जिह्वेत्यादि ॥ यद्येषां जिह्वेत्याद्यन्वयः न कृतं विष्णुकृत्यं भगवद्व्रतं यैः २९ भगवंतं क्षमापयंति तद् इति ॥ अयं भा
वः ॥ स्वपुरुषैः अस्मदीयत्वेन स्थितैः स्वीयैरेव पुरुषैर्यद्यस्माद् असत् ॥ अन्याय्यं कृतं तत्तस्मात् स्वयमेव क्षम्यतां सहतां स्वानां स्वीयानां नः वि
दुषां अज्ञानां ॥ अहो गरीयसि तस्मिन् क्षांतिर्युक्तैव महद् इति पदे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः ३० तस्मादित्यादि
शुकोक्तिः ॥ जगतोऽपि मंगलरूपं ३१ एकांतिकत्वमेवाह ॥ शृण्वतामिति व्रतादिभिस्तथा न शुध्येत् ३२ श्रीराम् ॥ ७ ॥ श्रीः
३३

1175
1981

एतदुपपादयति ॥ कृष्णांघ्रिपद्मयोर्मधुलेट् आस्वादयतीति तथा मधुलिह इतीति तुच्छत्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुन
र्न रमते अन्यस्तु तन्मध्वास्वादरहितः अत एव कामाभिभूतः सन् आत्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव श्रायश्चित्तरूपमीहेत ॥ यतः क
र्मणः पुनरपि रजः पापं स्यादेव कुंजरशौचवत् ॥ सत्त्वशोधकत्वाभावात् ३३ नैव विस्मिता ॥ धीर्येषां ते बभूवुः किंतु सत्यमुक्तमित्य
वमेनिरे ॥ ततः प्रभृति प्रतिशंकमानाः अस्मान् एष हन्यादिति शंकां वहंतः तं द्रष्टुमपि बिभ्यति स्म ॥ ते च पापांतरे तु विस्मितधियो जा
तास्ते च ततः प्रभृति बिभ्यति स्मेत्यर्थः ३४ कुंभसंभवो गस्त्यो मलयपर्वते आसीनो व्यग्रो हरिमर्चयन् पुनःपुनः विश्वासार्थं हरेः पा
दौ स्पृशन्नित्यर्थः ३५ षष्ठे त्वतीः ३ चतुर्थादित्रिभिर्विश्वरूपजन्म विवक्षया ॥ प्रचेतः सुत दक्षस्य वंशस्तावत्प्रतन्यते १ चतुर्थे

कृष्णांघ्रिपद्ममधुलिड्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ॥ अन्यस्तु कामहत आत्मजः प्रमार्ष्टुमीहे
त कर्म यत एव रजः पुनः स्यात् ३३ इत्थं स्वभर्तुर्गदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते ॥
नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ३४ इतिहासमिमं गुह्यं भगवान्कुं
भसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ३५ इति श्रीभागवते महापुराणे षष्ठस्कंधे तृतीयोऽध्या
यः ॥ ॥ राजोवाच ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणां ॥ सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेंतरे १
तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः २ सूत उवाच ॥ इति सं
प्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः ३ श्रीशुक उवाच ॥ यदा प्रचेत
सः पुत्रा दश प्राचीनबर्हिषः ॥ अंतः समुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां ४ श्रीराम् ॥ ॥ ॥

तु प्रजासृष्टौ दक्षेणाराधनं हरेः ॥ तपसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते २ प्रसक्तानुप्रसक्तेन स्वायंभुवस्तु तान्वये ॥ नाम प्रभाव
माकर्ण्य वंशव्यासं बुभुत्सते ३ देवासुरेति द्वाभ्यां ॥ सामासिकः संक्षिप्तः यः प्रोक्तः तृतीयस्कंधे १ व्यासं विस्तारं तेऽत्वत्तः यया शक्त्या
यथा ससर्ज तां शक्तिं च प्रकारं ज्ञातुमिच्छामि अनुसर्गं अनुवृत्तं सर्गं २ दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह यदेति ॥ प्रा
चीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथिवीं द्रुमैर्वृतां ददृशुः नारदोपदेशतः प्राचीनबर्हिषो निवृत्या च अश

तपसादीपितो मन्युर्येषां तेषां द्रुमाणां दग्धुमिच्छया ५ ताभ्यां दह्यमानांस्तान् द्रुमान् वनस्पतीनां राजा सोमउवाच ६ मा द्रुमेभ्य इति न वभिः हे महाभागा विशेषेण वर्धयितुमिच्छवः ७ प्रजापतीनां तत्तृक्षभोज्यदा हो तु चितदह्यादह ॥ अहो इति त्रिभिः ॥ ऊर्जभक्ष्यं इषमन्नं ८ अतः आतिष्ठत आश्रयतः सतां मार्गमुपशमं पित्रादिभिर्जुष्टं ११ प्रजानां प्रजापतेरेव बंधुः अतस्तज्जीविकानाशेन कर्तव्य इति द

द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ५ ताभ्यां निर्दह्यमानांस्तान्
पलभ्य कुरूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ६ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्धयि
षवो यूयं प्रजानां पतयः स्मृताः ७ अहो प्रजापतिर्भगवान् हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ८
अन्नं चराणामचरा ह्यपदः पादचारिणां ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ९ यूयं च पित्रान्वादिष्टा देव
देवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ १० आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं ॥ पित्रा पिताम
हेनापि जुष्टं वः प्रपितामहैः ११ लोकानां पितरो बंधुर्दृशः पक्ष्म स्त्रियः पतिः ॥ पतिः प्रजानां भिक्षूणां गुह्यज्ञानां बुधः
सुहृत् १२ अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ १३ यः समुत्पति
तं देह आकाशान्मन्युमुल्बणं ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते १४ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिव
मस्तु वः ॥ वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां १५ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ
दत्वा ते धर्मेणोपयेमिरे १६ तेभ्यस्तस्यां समभवत् दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः १७

ष्टांतपंचकेनाह लोकानां बालकानां मातापितरौ अज्ञानां ज्ञानदो बुधः एवं सुहृत् १२ ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह ॥ अंतर्दे
हेष्विति ॥ वः युष्माभिः १३ आकाशाद्देहे समुत्पतितं अकस्मिकमित्यर्थः ॥ आत्मविचारेण यो नियच्छेत् १४ खिलानां शेषाणां च यु
ष्माकं च शिवमस्तु वृक्षरक्षणार्थं त्वदीयां कन्यां ददामि वार्क्षी वृक्षैः पालिता १५ आमंत्र्य सांत्वयित्वा आप्सरसीं अप्सरसः प्रम्लोचायाः सुता ॥१६॥१७॥ श्री: १२

447
1981

दुहितृवत्सल इति ॥ तस्य कन्या वंशा एवेत्युक्तं ॥ मममत्तः १८ प्रजापतिर्दक्षः १९ अबृंहितं असंवृद्धं ॥ विंध्यस्य पादान् ॥ सन्निहि
तपर्वतान् २० ॥२१ ॥ हंसगुह्याख्येन स्तोत्रेण कस्य दक्षस्य २२ पराय सर्वोत्तमायन मो दधेन मनं करोति ॥ परत्वे हेतुः ॥ अवितथा अनु
भूतिः चिच्छक्तिर्यस्य ॥ अतो गुणत्रयाभासो जीवो निमित्तं माया च तयोर्बंधवे नियंत्रे ॥ एवमपि गुणेषु तत्त्वबुद्धिर्येषां ॥ ते जीवे रदृश्यं धाम
स्वरूपं यस्य तत्र हेतुः ॥ निवृत्तं मानं यस्मात् ॥ पाठांतरे निवर्तमानमवधिश्च यस्मात् ॥ तर्हि कथं तस्य सिद्धिः आह ॥ स्वयं भुवे स्वप्रकाशाय
२३ आदृश्यधामत्वं वर्णयन्नाह ॥ नेति पुरुषः सखा जीवः अस्मिन्पुरे देहे वसन्नपि अत्रैव संवसतः सख्युर्यस्य ॥ सख्यं करणं प्रवर्तकत्वा

यथाससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु १८ मनसैवासृजत्पूर्वं प्रजाप
तिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन् नभस्थलजलौकसः १९ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्य
पादानुपव्रज्य सोचरद्दुष्करं तपः २० तत्राघमर्षणं नाम तीर्थं पापहरं परं ॥ उपस्पृश्यानुसवनं तपसातोषयद्धरिं
२१ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः २२ प्रजापतिरुवाच ॥ नमः
परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे
२३ न यस्य सख्यं पुरुषोवैति सख्युः सखा वसन् संवसतः पुरेस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय न
मः स्करोमि २४ देहे सवोक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यतः ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञ
मनंतमीडे २५ ॥

दिकं नावैति न जानाति तस्मै ॥ कुतः व्यक्तदृष्टेः प्रपंचद्रष्टुः न हि द्रष्टा दृश्यो भवतीति ॥ प्रथमांतपाठे व्यक्ते प्रपंच एव दृष्टिर्यस्य सः ॥ गु
णो विषयं गुणिनो विषयिण इंद्रियादेः सख्यं प्रकाशकत्वं यथा नावैति तद्वत् २४ ननु गुणो जडत्वान्न जानाति जीवस्तु चेतनः किमिति
न जानाति ॥ अत्राह देह इति ॥ देहश्वासवश्च प्राणा अक्षाणींद्रियाणि मनवः अंतःकरणानि भूतानि च मात्राश्च तन्मात्राणि आत्मानं
स्वस्वरूपं दृश्यं अन्यमिंद्रियवर्गं तयोः परं देवतावर्गं च न विदुः ॥ पुमान् जीवस्तु सर्वमेतत् त्रयं वेद गुणांश्च तन्मूलभूतान् वेद तत् ज्ञोपि
सन् यत् सर्वज्ञं न वेद तमनंतमीडे स्तौमि २५

भाग०
९३

अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह ॥ यदा मनस उपरामः समाधिः नतु सुषुप्तविलयः ॥ नन्वप्राप्तस्वप्नयोरिव विक्षेपः तदाह ॥ नामरूपे रूप्यते येन तत्तथा ॥ तस्य उपरामे हेतुः दृश्यं दर्शनेस्मृतिश्च तयोः संप्रमोषान्नाशात् तदायः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै हंसाय शुद्धाय शुचिशुद्धं मनः सम्यक्प्रतीतिस्थानं यस्य तस्मै नमः २६ एवंभूतः केषां प्रतीयत इति अपेक्षायामाह यमनीषिण इति द्वाभ्यां ॥ विवेकिनो यं निःकर्षंति विविच्य ध्यायंति ॥ स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः ॥ एवं निकर्षतां प्रतीयत इति भावः किमिति निःकर्षंति स्वशक्तिभिर्गूढं ॥ अप्रकाशमानं कतिभिर्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः सप्तविंशत्युपाधिभिर्गूढं अष्टाविंशं निष्कर्षंतीत्यर्थः ॥ यद्वा नवभिः प्रकृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिः त्रिवृद्भिस्त्रिगुणात्मकाभिः चकाराद्धो ५०

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः २६ मनीषिणोंतर्हृदि सन्निवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निःकर्षंति गूढं २७ स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः २८ यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तत्स वै गुणापायविसर्गलक्षणः २९ ॥ ॥ ॥ ॥ ॥ ॥

उशविकाररूपाभिश्च कथंभूतं निष्कर्षंति मनीषयांतर्हृदि सन्निवेशितं निश्चलीकृतं पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यं अलौकिकं वह्निमिवाहंकारास्यदादात्मनोन्यं परमात्मानं निष्कर्षंतीत्यर्थः ॥ अशेषा विशेषा यस्याः तस्या मायायाः निषेधेन निर्वाणसुखेअनुभूतिर्यस्य अप्रसक्तनिषेधासंभवात् ॥ प्रसक्तिमाह २७ स एव सर्वनामा स च विश्वरूप इति तद्रूपत्वेपि वास्तवत्वाभावान्निषेधः संभवतीत्याह ॥ अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः २८ ननु यद्हि केवलया स्वसंस्थया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्नामभिर्वाच्यं प्रत्यक्षादिदृश्यं च तस्य स्वरूपं वस्तुतो मा भूत् ॥ तथापि मायया घटत इति श्लोकत्रयेणोपपादयन्नमस्करोति २९

श्री:
९३

+/79
1981

यद्यदिति यद्यद्वचसा निरुक्तं अभिहितं धिया निरूपितं व्यवसितं ॥ अक्षभिर्वा इंद्रियैर्निरूपितं गृहीतं ॥ उत अपि मनसापि निरूपितं संकल्पितं यस्य स्वप्रकाशत्वं तस्य तत्स्वरूपं मा भूत् ॥ स्वरूपत्वाभावे हेतुः हि यस्मात् तद्गुणानामेव रूपं ॥ पाठांतरे गुणैर्हि हितं स तु गुणव्यतिरिक्तः यतो गुणानामेवापायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा चेतनाधिष्ठानं विना तयोरसंभवात् ॥ यद्वा ॥ यस्य स्वरूपं मा भून्न भवति तस्मै नम इति तृतीयेनान्वयः ॥ तदेवं वस्तुतो गुणस्वरूपत्वाभावमंगीकृत्य २९ अनिरुक्तात्मशक्तिरित्यनेन द्योतितं मायया सर्ववाच्यत्वेन विश्वरूपत्वमाह ॥ यस्मिन्नधिकरणे ॥ यतोपादानात् ॥ येन करणेन ॥ यस्य संबंधि ॥ यस्मै संप्रदानाय ॥ यदीप्सिततमं ॥ यः कर्ता कुरुते ॥ स्वतंत्रः कार्यते चान्येन प्रयोज्यकर्ता तद्ब्रह्मेति प्रत्येकं संबंधः ॥ अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः

॥ यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तत्स वै गुणापायविसर्गलक्षणः २९ यस्मिन् यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं ३० यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति ॥ कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोनंतगुणाय भूम्ने ३१

यथेष्विच क्रियासंबंधप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः ॥ चशब्देन भावकर्मादिविहितप्रत्ययार्थाः संगृहीताः तद्ब्रह्मैवेति कुतस्तत्राह तद्धेतुः ॥ तेषां कारणं तत्कुतः सर्वेभ्यः प्राक्प्रसिद्धं ननु ब्रह्मादयस्तद्धेतवः श्रूयंते अवरे च दृश्यंते तत्कथं ब्रह्मैव तद्धेतुस्तत्राह परेषां च हेतूनां परमं कारणं ॥ ननु सर्वं सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तदानीमन्यस्याभावात् ॥ सत्यं निरपेक्षमेव तत्कारणमित्याह ॥ अनन्यद्विजातीयशून्यं एकं सजातीयशून्यं च तस्मै नम इत्युत्तरेणान्वयः ३० नन्वेवं ब्रह्म चेद्विश्वस्य हेतुः ॥ तर्हि न कदाचिदनीदृशं जगदिति वदंतो मीमांसकाः ॥ कुरुते त्रिविवदंते तेश्चान्ये स्वभाववादिनः संवदंते ॥ ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनःपुनर्मुह्यंतीति तत्राह यस्य मायाविद्याद्याः शक्तयो विवादस्य कचित्संवादस्य भुवः स्थानानि भवंति ॥ तस्मै नमः ३१

भाग० ३४ ननु किं तत् ब्रह्म यस्य शक्तयो विवादादिभुवो भवंतीति तत्राह ॥ अस्तीति ॥ योगउपासनाशास्त्रं ॥ तत्र हि विराड्रूपेणोपासनायां पाताळ प०
पादादिकमस्तीत्युपास्यत्वेन विधीयते ॥ नास्तीति सांख्यं ज्ञानशास्त्रं तत्र ह्यपाणिपादं अचक्षुरश्रोत्रमिति च पादादिनास्तीति निषिध्य
ते ॥ तयोर्योगसांख्ययोर्यत्किंचित्समं अनुवर्तमानं अवेक्षितं प्रतीतं बृहद्ब्रह्म विवादेप्यविवादास्पदं ब्रह्मेत्यर्थः ॥ विवादं स्फुटयति ॥ भि
न्नौ अस्तिनास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोस्तयोर्भिन्नविषयत्वे विरोधो न स्यादित्येकस्थयोरित्युक्तं ॥ एकविषययोः कुतो वस्तुनिष्ठ

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ॥ अवेक्षितं किंचन सांख्ययोगयोः समं परं ह्यनु
कूलं बृहत्तत् ३२ योनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः ॥ नामानि रूपाणि च जन्मकर्मभिर्भे
जे स मह्यं परमः प्रसीदतु ३३ श्रीरामचंद्र ॥

योः पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात् ॥ समत्वे हेतुः परं हि यतो विधिप्रतिषेधयोरविषयः तयोः पादादिविषयत्वात् न तर्हि
तथा तद्विषयस्य सद्भावे किं प्रमाणं तदाह ॥ अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात् ॥ अवधिं विना तन्निषेधायोगाच्च तयो
रुपपादकत्वेन सिद्धमित्यर्थः ॥ तत्स्मेन मह्यमिति पूर्वस्यानुषंगः ३२ ननूदासीनस्य समस्य नमस्कारे को लाभस्तत्राह य इति ॥ पाद
मूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोपि जन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिर्नामानि च यो भजते तत्कृतः भगवा श्रीः
नचिंत्यैश्वर्यः सः मह्यं प्रसीदतु ३३ ७ श्रीराम ७ श्रीगोविंद ॥ ७ श्रीकृष्ण ७ श्रीगजानन ७ ७ ३४

1181
1981

ननु त्वादृशाः सकामा गणेशादीन् प्रार्थयंते त्वं तु तान्विहाय किमिति भगवंतं प्रार्थयसे तत्राह ॥ प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपा
सनामार्गैर्यथाशयं तत्तदुपासनानुसारेण यो देहगतोंतर्यामी तत्तद्देवतारूपेण विविधो भवति ॥ यथा वायुः पार्थिवं चंपकादिगं
धभेदमाश्रित्य नानागंधवान्विभाति ॥ रेणोगुणं धूसरत्वादिकमाश्रित्य नानारूपवान्प्रतीयते तद्वत् तस्यैव तत्तद्देवतारूपेण फल
दातृत्वात् ॥ स ईश्वर एव मम मनोरथं सत्यं करोतु किमंतगडुभिर्देवतांतरैरित्यर्थः ॥ तदुक्तं गीतासु ॥ यो यो यां यां तनुं भक्तः श्रद्ध
यार्चितुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान् मयैव

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतां म
नोरथं ३४ श्रीशुक उवाच ॥ इति संस्तुवतस्तस्य स तस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठ भगवान् भक्त
वत्सलः ३५ कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ३६ पीत
वासा घनश्यामः प्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगो लसत्श्रीवत्सकौस्तुभः ३७ महाकिरीटकटकः
स्फुरन्मकरकुंडलः ॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः ३८ श्रीराम श्रीगोविंद ॥

विहितान्हितान् इति ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं इति च ३४ इति संस्तुवतस्तस्य दक्षस्य भगवान्प्रत्यक्षीभूत् ॥ तं व
र्णयति साधैश्चतुर्भिः सुपर्णस्यांसे स्कंधे कृतौ पादौ येन प्रलंबा अष्टौ महांतो भुजा यस्य चक्राद्यष्टायुधधरः ३६ प्रसन्नं वदनं ईक्षणे
च यस्य ॥ वनमालया निवीतं कंठपादांतं व्याप्तमंगं यस्य ॥ लसंतौ श्रीवत्सकौस्तुभौ यस्य ॥ महांति किरीटकटकानि यस्य ॥ कांच्यादि
भिर्विभूषितः वलयमत्र पादभूषणं द्रष्टव्यं ॥ कटकस्योक्तत्वात् ३८ श्रीगोपालकृष्ण ॥

त्रैलोक्यमोहनंश्रीपुरुषोत्तमारव्यंसुरयूथपैः लोकपालैः ३९ ॥४०॥४१॥आपूरितानि मनोद्वाराणींद्रियाणितेः यथाद्रुमेणादिन्योनि
र्झरैरापूर्यंतेतथामहानंदापूर्णत्वेनात्तृप्तिकत्वाद्वारादीनांनकंचिदृकुंशक्तोभूदित्यर्थः ॥यद्यप्यसौनावोचत्तथापिचित्तज्ञइदंवक्ष्यमा
णमाह ४२ भावंभक्तिंगतःप्राप्तः ४३ यद्यतस्तेतपः अस्यविश्वस्यउद्बृंहणंवृद्धिकरंमतस्तेहंप्रीतः मत्तपसोलोकसमृध्येर्थत्वेनत्व
नीतेः किंकारणंतत्राह॥ममेतिभूतानांविभूतयःसमृद्धयोभूयासुरितियत्॥एषएवममकामः अतोमत्कामपूरणादेवाहंप्रीतोस्मी
त्यर्थः ४४ भूतिविस्तारप्रयत्नश्चनवोचितएवेत्याह॥ब्रह्मेति॥भवंतःप्रजापतयःभूतेरुद्भवस्यहेतवः ४५ विश्वदृध्यर्थत्वेन

त्रैलोक्यमोहनंरूपंबिभ्रत्त्रिभुवनेश्वरः॥वृतोनारदनंदाद्यैःपार्षदैःसुरयूथपैः ३९ स्तूयमानोनुगायद्भिःसि
द्धगंधर्वचारणैः॥रूपंतन्महदाश्चर्यंविचक्ष्यागतसाध्वसः ४० ननामदंडवद्भूमौप्रहृष्टात्माप्रजापतिः॥न
किंचनोदीरयितुमशकत्तीव्रयामुदा ४१ आपूरितमनोद्वारैर्ह्रदिन्यइवनिर्झरैः॥तंतथावनतंभक्तंप्रजाकामं
प्रजापतिं ४२ चित्तज्ञःसर्वभूतानामिदमाहजनार्दनः॥श्रीभगवानुवाच॥प्राचेतसमहाभागसंसिद्धस्तपसा
भवान्॥यच्छ्रद्धयामत्परयामयिभावंपरंगतः ४३ प्रीतोहंतेप्रजानाथयत्तेस्योद्बृंहणंतपः॥ममैषकामोभू
तानांयद्भूयासुर्विभूतयः ४४ ब्रह्माभवोभवंतश्चमनवोविबुधेश्वराः॥विभूतयोममह्येताभूतानांभूतिहेत
वः ४५ तपोमेहृदयंब्रह्मंस्तनुर्विद्याक्रियाकृतिः॥अंगानिक्रतवोजाताधर्मआत्मासवःसुराः ४६

त्वत्तपसाहंप्रीतइत्युक्तंतदेवतपस्तवन्प्रसंगादन्यान्यपिलोकवृद्धिकराणिविद्यादीनिस्तौति॥तपोयमनियमादिसहितंध्यानं
हृदयंविद्यासांगमंत्रजपः॥ध्यानंतनोतीतितनुर्देहःक्रियाध्यानादिविषयः॥पुव्यापारोभावनाशब्दवाच्यस्तेनक्रियानादिकमाक्रि
यतइति॥आकृतिःजाताःसुनुष्पन्नाःक्रतवोंगानिशिरोवाएतद्यत्प्रवर्ग्यः उपसदःचक्षुषीआज्यभागावित्यादिश्रुतेः॥धर्मःक्रता
द्यपूर्वंआत्मामनःहृदयाश्रयत्वात्सुरायज्ञभुजस्तएवअसवःप्राणाःसंतर्पणीयत्वात् ४६

1/83
1981

तपसःसंतानवृद्धिहेतुत्वंदर्शयितुंद्वितीयतृतीयोक्रमिनिहासमाहचतुर्भिः॥अहमेवेतिवस्त्वंतरव्यावृत्तिः आंतरंग्राहकंबहिर्ग्रा
ह्यंसंज्ञानमात्रंचैतन्यमात्रं॥अव्यक्तंइंद्रियवृत्तिभिरनभिव्यक्तं॥अतएवचप्रसुप्तमिवचविश्वतःसर्वत्र ४७ गुणतामायातःगु
णमयोविग्रहोब्रह्मांडं॥ततस्तदेवअजःअयोनिजः ४८ खिलसमर्थमिव ४९ तेमयातपतपेत्यभिहितःसन्येनतपसा ५०
संततिवृध्युपायमाह॥एषेति॥अंगहेदक्षपंचजनाख्यस्यप्रजापतेः ५१ मिथुनस्ययोव्यवायोरतिःसएवधर्मोयस्य॥सत्वंतथाभूता

अहमेवासमेवाग्रेनान्यत्किंचांतरंबहिः॥संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः ४७ मय्यनंतगुणेनंतेगुण
तोगुणविग्रहः॥यदासीत्तत्रएवाद्यःस्वयंभूःसमभूदजः ४८ सवैयदामहादेवोममवीर्योपबृंहितः॥मेनेखि
लमिवात्मानमुद्यतःसर्गकर्मणि ४९ अथमेभिहितोदेवःतपोतप्यतदारुणं॥सचविश्वसृजोयुष्मान्येनादाव
सृजद्विभुः ५० एषापंचजनस्यांगदुहितावैप्रजापतेः॥असिक्नीनामपत्नीत्वेप्रजेशप्रतिगृह्यतां ५१ मिथुन
व्यवायधर्मस्त्वंप्रजासर्गमिमंपुनः॥मिथुनव्यवायधर्मिण्यांभूरिशोभावयिष्यति ५२ त्वत्तोधस्तात्प्रजाःस
र्वामिथुनीभूयमायया॥मदीययाभविष्यंतिहरिष्यंतिचमेबलिं ५३ श्रीशुकउवाच॥इत्युक्त्वामिषतस्तस्यभ
गवान्विश्वभावनः॥स्वप्नोपलब्धार्थइवतत्रैवांतर्दधेहरिः ५४ इतिश्रीभाग०षष्ठस्कंधेचतुर्थोध्यायः ४ श्रु
कउवाच॥तस्यांसपांचजन्यांवैविष्णुमायोपबृंहितः॥हर्यश्वसंज्ञानयुतंपुत्रानजनयद्विभुः १ अपृथक्धर्म
शीलास्तेसर्वेदाक्षायणानृप॥पित्राप्रोक्ताःप्रजासर्गेप्रतीचींप्रययुर्दिशं २ तत्रनारायणसरस्तीर्थंसिंधुसमुद्र
योः॥संगमोयत्रसुमहत्मुनिसिद्धनिषेवितं ३ श्रीकृष्ण॥ ॥श्रीराम॥

यांतस्यांमाययानिमित्तभूतयास्त्रियासहमिथुनीभूयभविष्यंति॥पुत्रादिरूपेणोत्पत्स्यंते ५४ षष्ठेचतुर्थः ४ पंचमेनारदेनाथ
वाचःकूटैस्तच्छिशितान्॥सुतानाकर्ण्यदक्षोमुंशशापेतिनिरूप्यते॥अपृथक्धर्मशीलाःएकाचारस्वभावाः १॥२॥तत्रप्रतीच्यांदि
शिसिंधोर्नद्याःसमुद्रस्यचयत्रसंगमस्तत्रस्थंनारायणसरोनामतीर्थंप्रययुरित्यन्वयःसुमहत्अतिविस्तीर्णं ३ श्रीगोविंद॥

भाग० विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषां तान्॥ शुद्धसत्वानपि ४ पित्रादेशेन प्रजाविवृद्धये यत्नानुद्यतान् दृदर्श ५ अ प०
३६ हो मोक्षमार्गे अधिकारिण: संति एते प्रवृत्ति निष्ठैः कर्मभिर्नश्येरन्निति॥ कृपया तान् गूढार्थैः वाक्यैः उपदिशति स्म॥ तदाह॥ उवा
चेति चतुर्भि: पालका: संतोऽपि बालिशा आज्ञा यूयं कथं प्रजा: स्रक्ष्यथ बत ते निरवेदं॥ बालकाइति पाठे॥ बालिशत्वे हेतु: ६ एक एव
पुरुषो यस्मिन् तत्राष्ट्रं अदृष्ट्वेत्यनुषंग: बिलं चेत्यादि द्वितीयांतानां अविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वय: ७ पंच पंचानां
पांच विशंते रद्भुतं गृहं॥ क्षौरपव्यं॥ क्षुरै: पविभि: खड्गैश्च निर्मितमिवाति तीक्ष्णं दृढं चेत्यर्थ:॥ स्वयं स्वतंत्रं भ्रमि भ्रमण स्वभावं ८

तदुपस्पर्शनादेव विनिर्धूतमलाशया:॥ धर्मं पारमहंस्यं च प्रोत्पन्नमतयाप्युत ४ ते पि रेतपए वाग्रे पित्रादे
शेन यंत्रिता:॥ प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ५ उवाच चाथ हर्यश्वा: कथं स्रक्ष्यथ वै प्रजा:॥ अदृ
ष्ट्वांतं भुवो यूयं बालिशा बत पालका: ६ तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं॥ बहुरूपां स्त्रियं चापि पुमांसं पुं
श्चलीपतिं ७ नदीमुभयतोवाहां पंचपंचाद्भुतं गृहं॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ८ कथं स्वपि
तुरादेशमविद्वांसो विपश्चित:॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ९ श्रीशुक उवाच॥ तन्निशम्याथ हर्य
श्वा आत्यंतिकमनीषया॥ वाच: कूटं तु देवर्षे: स्वयं विममृशुर्धिया १० भू: क्षेत्रं जीवसंज्ञं यदनादिनिजबंध
नं॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ११ श्रीगोपालकृष्ण॥

विपश्चित: सर्वज्ञस्य स्वपितु: संदेशमात्मनोऽननुरूपमविद्वांसो जानंत: पूर्वोक्तं चैकपुरुषं राष्ट्रमित्याद्यविज्ञाय अहो कथं सर्गं
करिष्यथेत्यन्वय:॥ वाच: कूटं परोक्षवादेनार्थांतरमिव प्रतीयमानं वचनं॥ आत्यंतिकी सहजा मनीषा विचारशक्ति र्यस्या: तया
धिया स्वयमेव विममृशु: विचारितवंत: ९॥१०॥ नारदोक्तदशवाक्यानां तै: विमृश्य निर्णीतानर्थानाह दशभि: अदृष्ट्वांतं भुव इत्य
त्र भूशब्दार्थमाह॥ भूरिति क्षेत्रं तच्चात्र जीवसंज्ञं लिंगशरीरं यत् निजबंधनमात्मनो बंधकारणं॥ अंतशब्दार्थमाह निर्वाणं नाशं॥ अ श्री:
संगि: मोक्षानुपयोगिभि: कर्मभि: किं भवेन्न किमपि ११ ३६

1185
1981

एकपुरुषमित्यस्यार्थमाह॥ एक एवेति॥ तुर्य: सर्वसाक्षी स्वाश्रय: स्वाधार:॥ अभवं नित्यमुक्तं॥ असद्भि: ईश्वरासमर्पितै: कर्म
भि: १२ बिलं चादृष्टनिर्गममित्यस्यार्थमाह॥ पुमान् यद्गत्वा प्राप्य बिलस्वर्गपातालं गत इव नैवेति नावर्तते तत्प्रत्यग्धाम ज्योतिरू
पं ब्रह्म अविदुष: असद्भि: नश्वरस्वर्गादिसाधनै: कर्मभि: १३ बहुरूपां स्त्रियमित्यस्यार्थमाह॥ नानारूपेति॥ स्वैरिणी पुंश्चलीव
विमोहिके: रजआदिगुणै: अन्विता तन्निष्ठं तत्स्यावसानं॥ विवेकं अगतस्य अप्राप्तस्य असद्भिरगां तै: १४ पुमांसं पुंश्चलीपति
मित्यस्यार्थमाह॥ तत्संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य कुत्सिता भार्या यस्य तद्वत्॥ तस्यागती: कुत्सदु:खलक्षणा: गच्छंतं॥ संस
रंतं जीवमबुधस्य अजानत: असद्भि: बुध्यविवेकप्राप्तै: १५ नदीमुभयतोवाहामित्यस्यार्थमाह॥ सृष्ट्यप्ययौ करोतीत्युभयत: प्र

एक एवेश्वरस्तुर्यो भगवान् स्वाश्रय: पर:॥ तमदृष्ट्वाभवं पुंस: किमसत्कर्मभिर्भवेत् १२ पुमान्नैवेति यद्गत्वा
बिलस्वर्गं गतो यथा॥ प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत् १३ नानारूपात्मनो बुद्धि: स्वैरिणीव गुणा
न्विता॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् १४ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत्॥ तद्गतीरबुध
स्येह किमसत्कर्मभिर्भवेत् १५ सृष्ट्यप्ययकरीं मायां वेलाकूलांतवेगितां॥ मत्तस्य तामविज्ञस्य किमसत्कर्मभि
र्भवेत् १६ पंचविंशतितत्वानां पुरुषोऽद्भुतदर्पण:॥ अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् १७

वाहो दर्शित:॥ वेलाकूलं प्रवाहयति तानां निर्गमस्थानं तपोविद्यादितस्यां ते समीपे वेगितां निर्गमप्रतिबंधाय क्रोधाहंकारादिभि:
कृतवेगां मत्तस्य तद्वेगेन विवशस्य अत एव तां तथाभूतामविज्ञस्य अविचारयत:॥ असद्भिर्मायिकै:॥ यद्वा॥ वेलाकूलं समुद्रस्य
व्यवहारस्थानं तस्य समीपे समुद्रवृद्धिह्रासाभ्यां यथा उभयतोंतर्बहि: कृतवेगा नदी भवति॥ एवं समुद्रतुल्यस्यात्मनो व्यवहारस्था
ने देहे जन्ममरणादिभि: कृतवेगामित्यर्थ:॥ वेगिनीमिति पाठे॥ वेगवती १६ पंचपंचेत्यस्यार्थमाह॥ पंचविंशतितत्वानां पुरु
षोंतर्यामी अद्भुतदर्पण:॥ आश्चर्यरूप आश्रय:॥ अध्यात्मं कार्यकारणसंघाताधिष्ठातारं तं अबुधस्य असद्भि: मिथ्यास्वातंत्र्यकृतै: १७

क्वचिद्धंसमित्यस्यार्थमाह ॥ ऐश्वरं ईश्वरप्रतिपादकं विविक्तंपदं चिज्जडरूपंव स्तयेनेतिहंसपदव्याख्यानं ॥ बंधमोक्षावनुद र्शयतीतितथा ॥ अनेनचित्राः कथायस्येतिव्याख्यातं ॥ तदुत्सृज्यअनभ्यस्यअज्ञायअविदुषोसद्भिर्बहिर्मुखैः १८ क्षौरपव्य मित्यस्यार्थमाह ॥ कालचक्रमिति ॥ भ्रमिभ्रमणात्मकं तीक्ष्णमिति निःकर्षयदिति चक्षौरपव्यपदं व्याख्यातं तदबुधस्य अतए वफलस्यनित्यत्वबुध्याकाम्यकर्मानुध्यानेवैगुण्यबाहुल्यादसद्भिः १९ स्वपितुर्देशमित्यस्यार्थमाह ॥ शास्त्रस्यपितुर्द्वितीयजन्म हेतोः तदनुरूपायनिवर्तकमादेशं योनवेदसकथंगुणविश्रंभीगुणमयप्रवृत्तिमार्गविश्वासवान् उपक्रमेत ॥ सद्यादौप्रवर्तते २०

ऐश्वरशास्त्रमुत्सृज्यबंधमोक्षानुदर्शनं ॥ विविक्तपदमज्ञायकिमसत्कर्मभिर्भवेत् १८ कालचक्रंभ्रमती क्ष्णंसर्वंनिष्कर्षयज्जगत् ॥ स्वतंत्रमबुधस्येहकिमसत्कर्मभिर्भवेत् १९ शास्त्रस्यपितुरादेशंयोनवेदनिवर्त कं ॥ कथंतदनुरूपायगुणविश्रंभ्युपक्रमेत् २० इतिव्यवसिताराजन् हर्यश्वाएकचेतसः ॥ प्रययुस्तंपरिक्रम्य पंथानमनिवर्तनं २१ स्वरब्रह्मणिनिर्भातहृषीकेशपदांबुजे ॥ अखंडंचित्तमावेश्यलोकाननुचरन्मुनिः २२ नाशंनिशम्यपुत्राणांनारदाच्छीलशालिनां ॥ अन्वतप्यतकः शोचन्सुप्रजास्त्वंशुचांपदं २३ सभूयः पांचजन्या यामजेनपरिसांत्वितः ॥ पुत्रानजनयद्दक्षःशबलाश्वान्सहस्रशः २४ तेपिपित्रासमादिष्टाः प्रजासर्गेधृतव्र ताः ॥ नारायणसरोजग्मुर्यत्रसिद्धाःस्वपूर्वजाः २५ तदुपस्पर्शनादेवविनिर्धूतमलाशयाः ॥ जपंतोब्रह्मपरमंते

मोक्षेशब्रह्मबुद्धीनांजीवमायांतरात्मनां ॥ शास्त्रकालोपदेशानांमज्ञानेकिमुकर्मभिः ॥ इतिवाचःकूटसंग्रहश्लोकः ॥ इतिव्यवसिताः एवंनिश्चितवंतः ॥ एकचेतसः एकमत्ययुक्तास्तंनारदंप्रदक्षिणीकृत्यअपुनरावृत्तिंमार्गंप्रययुः २१ निर्भातः साक्षात्कृतोयोहृषी केशः तस्यपादांबुजेअनुचरत् अन्वचरदित्यर्थः २२ नाशमदर्शनंस्वधर्मभ्रंशंवा शीलेनशालंतेशोभंतइतितथा ॥ तेषांकः दक्षः ॥ सु प्रजास्त्वसत्पुत्रवत्वंशुचांशोकानांस्थानं २३ अजेनब्रह्मणा सहस्रशः सहस्रसंख्यान् २४ परंब्रह्मप्रणवंवक्ष्यमाणमंत्रंवा २५ इदुस्य तिवाचांमंत्राणांपतिंविष्णुंआराधयामासुः २६

7/84
1981

विशुद्धसत्वाश्रयाय ॥ परमहंसायनमोधीमहि २८ प्रतिसर्गेधीर्येषांतान् वाचकःकूटानि ॥ अदृष्टांतंनुवइत्यादीनिपूर्वोक्तानिप्राह २९ हेदाक्षायणाः संश्रृणतेत्यादिपुनरन्यदपिप्राह ॥ निगममुपदेशं अन्विच्छन् अवलोकयन् ३० प्रायणंप्रकृष्टमयनंपुण्यमेवबंधु र्यस्यमरुद्भिःभ्रातृवत्सलैः देवैः ३१ अमोघंदर्शनंयस्य ॥ हेमारिषआर्य ३२ सध्रीचीनंसमीचीनंप्रत्यग्वृत्तिलभ्यं ॥ अनुपथंअनुगु

अभक्षाःकतिचिन्मासान्कतिचिद्वायुभोजनाः ॥ आराधयन्मंत्रमिममभ्यसंतइडस्पतिं २७ ॐनमोनारायणपु रुषायमहात्मने ॥ विशुद्धसत्वधिष्ण्यायमहाहंसायधीमहि २८ इतितानपिराजेंद्रप्रतिसर्गधियोमुनिः ॥ उपेत्य नारदःप्राहवाचःकूटानिपूर्ववत् २९ दाक्षायणाःसंश्रृणुतगदतोनिगमंमम ॥ अन्विच्छतानुपदवींभ्रातृणांभ्रातृव त्सलाः ३० भ्रातृणांप्रायणंभ्रातायोनुतिष्ठतिधर्मवित् ॥ सपुण्यबंधुःपुरुषोमरुद्भिःसहमोदते ३१ एतावदुक्त्वाप्रय योनारदोमोघदर्शनः ॥ तेपिवान्वगमन्मार्गंभ्रातृणामेवमारिषा ३२ सध्रीचीनंप्रतीचीनंपरस्यानुपथंगताः ॥ नाद्यापि तेनिवर्तंतेपश्चिमायामिनीरिव ३३ एतस्मिन्कालउत्पातान्बहून्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतंपुत्रनाशमुपा शृणोत् ३४ चुक्रोधनारदायासौपुत्रशोकविमूर्छितः ॥ देवर्षिमुपलभ्याहरोषाद्विस्फुरिताधरः ३५ दक्षउवाच ॥ अ होअसाधोसाधूनांसाधुलिंगेननस्त्वया ॥ असाध्वकार्यर्भकाणांभिक्षोमार्गःप्रदर्शितः ३६ श्रीरामचंद्रप्रसन्न ॥

णंपंथानंपश्चिमायामिनीःगताःरात्रयइव ३३ पुत्राणांपारमहंस्यनिष्ठामुपश्रुत्यदक्षोपिप्रायशोविरक्तःस्यादितितदनुग्रहा र्थंदेवर्षिःतत्पार्श्वंगतःतदातमुपलक्ष्यदक्षआह ३५ साधोरिवलिंगंवेषोयस्यतेनत्वयानोस्मदीयानांअर्भकाणांअसाधुअकारि कृतंतदेवाह ॥ साधूनांस्वधर्मप्रवृत्तानांभिक्षोर्योमार्गःप्रदर्शितः ३६ श्रीगोविंद श्रीगोपालकृष्ण ७

 ननु संन्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् सत्यं ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह ॥ ऋणैरिति ॥ जायमानो वै ब्राह्मणस्त्रि
भिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति श्रुतेः ॥ ऋणैरमु
क्तानां न मीमांसितानि विचारितानि कर्माणि यैस्तेषां तावद्रुणविमोको नास्ति तदुत्तरकालभाविनावपुत्रोत्पादनयज्ञानुष्ठानयोरभावेन
पितृदेवर्षिऋणात् विमुक्तश्च नास्ति अतो ॥ हे पाप विषयभोगत्यागात् इह लोके श्रेयसो विघातः कृतः मोक्षानधिकारित्वाच्च परलोके
पि श्रेयसो विघातः कृत इत्यर्थः ॥ तथा च मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इ
ति ३७ बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा ॥ एवं निरनुक्रोशः निर्घृणः हरेर्यशो नाशकः सन् तत्पार्षदानां मध्ये कथं चरसि ३८

ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणां ॥ विघातः श्रेयसः पापलोकयोरुभयोः कृतः ३७ एवं त्वं निरनुक्रोशो बा
लानां मतिभिद्धरेः ॥ पार्षदमध्ये चरसि यशोहा निरपत्रपः ३८ ननु भागवता नित्यं भूतानुग्रहकातराः ॥ ऋते त्वां सौहृ
दघ्नं वै वैरकारमवैरिणां ३९ नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ॥ मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनं ४०
नानुभूय न जानाति पुमान्विषयतीक्ष्णतां ॥ निर्विद्येत स्वयं तस्मात् न तथा भिन्नधीः परैः ४१ श्रीकृष्ण ॥ ॥

निर्लज्जत्वमेवाह ॥ ननु त्वामृते भागवताः सर्वे भूतानुग्रहपरवशास्त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः ३९ ननु वैराग्याद
परामः उपशमानुभूत स्नेहपाशछेदनं भवति ॥ न च विरक्तस्य ऋणत्रयापाकरणमावश्यकं ॥ यदहरेव विरज्येत्तदहरेव प्रव्रजेत ॥ यदि
वेतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतेः ॥ अतो वैराग्योपदेशेन तेषां मया नुग्रह एव कृत इति चेत्तत्राह नेति ॥ यद्यपि त्वमेवं मन्यसे तथा
पि मृषा केवलिना ज्ञानं विना भागवतशेषेण त्वया इच्छं मति बालेन कृते पि पुंसां विरागो नैव स्यात् ॥ न च विरागं विनोपशमः न चं तेन वि
ना स्नेहपाशनिकृन्तनमित्यर्थः ४० इत्थं विरागो न स्यादित्यत्र हेतुमाह ॥ नानुभूय अननुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति ४१

1189
1981

यदिति ॥ कर्मसंधानो कर्ममर्यादा
तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात् ॥ अतस्त्वया स्माकमप्रियमेव कृतं तथापि वयं न कुर्म इत्याह ॥ यदिति ॥ कर्मसंधानो कर्ममर्यादा
नां कर्तुं संधानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः दुःसहं यत्त्वं कृतवानसि तन्मर्षितं सोढं ४२ तथापि त्वया भद्रं भविष्यत्येवे
त्याह ॥ तं तु कृतनं संतानछेदक यद्यस्मात् ॥ अभद्रं पुत्राणां स्थानभ्रंशं ॥ पदं स्थानं न भवेदिति मृदुच्छलेन तापः ४३ बाढं तथेति स्वीकृत
वान् ॥ ईश्वरो पि प्रतिशप्तुं समर्थो पि तितिक्षेत सहेतेति यत् ॥ एतावानेव ४४ इति भागवतभावार्थटीकायां षष्ठे पंचमः ५ षष्ठे दक्षेण

यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनां ॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं ४२ तं तु कृतन यन्नस्त्वमभद्रमचरः
पुनः ॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं ४३ शुक उवाच ॥ प्रतिजग्राह तद्बाढं नारदः साधुसंमतः ॥ एतावान् साधुवा
दो हि तितिक्षेतेश्वरः स्वयं ४४ इति श्रीभाग० षष्ठस्कंधे दक्षनारदशापः पंचमोध्यायः ॥ ५ ॥ ॥ श्रीशुक उवाच ॥
ततः प्राचेतसो सिक्न्यामनुनीतः स्वयंभुवा ॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः १ दश धर्माय कायेंदोर्द्विषट् त्रि
णव दत्तवान् ॥ भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः २ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रस
वैर्लोका आपूरितास्त्रयः ३ भानुर्लंबा ककुब्जामिर्विश्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान् शृणु ४
भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप ॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः ५ ककुभः संकटस्तस्य कीकटस्तनयो
यतः ॥ भुवो दुर्गाणि जामेयः स्वर्गो नंदिस्ततो भवत् ६ श्रीगोविंद ॥

सृष्टायां कन्या षष्ठ्यां प्रकीर्तिताः ॥ पृथग्वंशाय ततो जातो विश्वरूपो दितेः सुतान् ॥ नारदात्पुत्राणां नाशं आशंकमानो दुहितॄर्जनयामास १
काय कश्यपाय द्विषट् ॥ द्विगुणाः षट् द्वादश या सुताः त्रयोदशेत्यर्थः ॥ इंदोः सोमाय त्रिनव सप्तविंशतिं ॥ तार्क्ष्यायनामांतरं प्राप्ताय कश्य
पायेव वशिष्टाश्चतस्रः २ सापत्यानां अपत्यसहितानां मे मत्तः शृणु ॥ प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ३ भानोर्देव ऋषभात् ॥ यतः
कीकटात् भुवो दुर्गाणि दुर्गाभिमानिनो देवाः ॥ जामेवः जाम्याः पुत्रः स्वर्गः ६ श्रीराम श्रीगोविंद ॥

भाग० तत्सुतः साध्यानां सुतः ७ वसोर्वंशस्य भूयस्त्वादंते निर्देशः मे मत्तः १० अभिमतिर्नामपत्नीतस्याः हर्षादयः ११ पुत्राः सहश्च आ ष०
६९ युश्च पुरोजवश्च पुत्राः पुरः पुराणि १२ स्कंदश्च कृत्तिकासुतोग्नेः पुत्रः षण्मातुर इति अग्निभूरिति च प्रसिद्धेः ॥ ततः स्कंदात् १४
आकृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणः ॥ चाक्षुषो मनुरासीत् १५ उषा भार्या ॥ अथ आतपत् ॥ पंचयामो दिवसो जातः ॥ अ

विश्वेदेवास्तु विश्वाया अप्रजांस्तान्प्रचक्षते ॥ साध्यागणास्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ७ मरुत्वांश्च जयंतश्च मरुत्वत्यां बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ८ मौहूर्तिका देवगणाः मुहूर्तायांश्च जज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं ९ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु १० द्रोणः प्राणो ध्रुवोर्कोग्निर्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्याः हर्षशोकभयादयः ११ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः १२ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः १३ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला १४ वसोरांगिरसीपुत्रो विश्वकर्माकृतीपतिः ॥ ततो मनुश्चाक्षुषोभूद्विश्वे साध्या मनोः सुताः १५ विभावसोरसूतोषा व्युष्टं रोचिषमातपं ॥ पंचयामोथ भूतानि येन जाग्रति कर्मसु १६ सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोजो भवो भीमो वाम उग्रो वृषाकपिः १७ अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः १८ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती १९

तएव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् १६ भूतस्य द्वे भार्ये तयोर्वंशमाह ॥ सरूपेति ॥ महानित्येवमेकादशरूपस्य रु श्री:
द्रस्य पार्षदाः प्रेतादयः १७ अन्ये अन्यस्यां जाताः १८ अंगिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधा नाम प ६९
त्नी पितॄन् पुत्रत्वे करोत् अथ सती च अथर्वांगिरसं नाम वेदं १९ श्रीगोविंद ॥

१७१
1981

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह ॥ कृशाश्व इति २१ सुपर्णा विनता २२ अनूरुं अरुणं २२ रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात् ॥ कुपितस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्यो भूत् २३ तं दक्षं प्रसाद्य केवलं कलाएव लेभे न त्वपत्यानि कथंभूताः क्षये कृष्णपक्षे र्दिताः खंडिताः सतीः सत्यः क्षये धिता इति ॥ पाठांतरे क्षये सति पुनरेधिताः

कृशाश्वोर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरो देवलं वयुनं मनुं २० तार्क्ष्यस्य विनता कद्रूः पतंगी जामिनीति ॥ तं पतंग्यसूत पतगान् यामिनी शलभानथ २१ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः २२ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत ॥ दक्षशापात्सोनपत्यस्तासु यक्ष्मग्रहार्दितः २३ पुनः प्रसाद्य तं सोमः कलालेभे क्षयार्दिताः ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च २४ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः २५ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप २६ ताम्रायाः श्येनगृध्राश्च मुनेरप्सरसां गणाः ॥ दंदशूकादयः सर्पा राजन् क्रोधवशात्मजाः २७ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः २८ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु २९ द्विमूर्धा शंबरोरिष्टो हयग्रीवो विभावसुः ॥ अयोमुखः शंकुशिराः स्वर्भानुः कपिलोरुणः ३० पुलोमा वृषपर्वा च एकचक्रोनुतापनः ॥ धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ३१ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ३२ वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः ॥ उपदानवी हयशिरा पुलोमा कालिका तथा ३३

तेनैव वर्धिताः सतीः २४ ॥ २५ ॥ अल्पत्वेन सुगमत्वाद्यथाय थं व्युत्क्रमेण तासां वंशानाह तिमेरित्यादिना २६ २७ सुरसायाः पुत्राः २८
प्रधानानिकान् मुख्यान् अष्टादश शृणु २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ श्रीकृष्ण ध

तत्सुतः साध्यानां सुतः ७ वसोर्वंशस्य भूयस्त्वादंते निर्देशः मे मत्तः १० अभिमतिर्नामपत्नीतस्याः हर्षादयः ११ पुत्राः सहश्च आ
युश्च पुरोजवश्च पुत्राः पुरः पुराणि १२ स्कंदश्च कृत्तिकासुतोग्नेः पुत्रः षण्मातुर इति अग्निभूरिति च प्रसिद्धेः ॥ ततः स्कंदात् १४
आकृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणः ॥ चाक्षुषोमनुरासीत् १५ उषाभार्या ॥ अथ आतपत् ॥ पंचयामोदिवसोजातः ॥ अ

विश्वेदेवास्तु विश्वाया अप्रजांस्तान्प्रचक्षते ॥ साध्यागणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ७ मरुत्वांश्च जयंतश्च
मरुत्वत्यां बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ८ मौहूर्तिका देवगणाः मुहूर्तायांश्च जज्ञिरे ॥ ये वै फलं प्र
यच्छंति भूतानां स्वस्वकालजं ९ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोष्टौ वसोः पुत्रास्तेषां नामानि मे
शृणु १० द्रोणः प्राणो ध्रुवोर्कोग्निर्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्याः हर्षशोकभयादयः ११ प्राणस्योर्जस्व
ती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः १२ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः
॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः १३ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमा
रो हरेः कला १४ वसोरांगिरसी पुत्रो विश्वकर्माकृतीपतिः ॥ ततो मनुश्चाक्षुषोभूद्विश्वेसाध्या मनोः सुताः १५ विभा
वसोरसूतोषा व्युष्टं रोचिषमातपं ॥ पंचयामोथ भूतानि येन जाग्रति कर्मसु १६ सरूपासूत भूतस्य भार्या रुद्रांश्च को
टिशः ॥ रैवतेजो भवो भीमो वाम उग्रो वृषाकपिः १७ अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये
घोरा भूतविनायकाः १८ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती १९

तएव रात्रिस्त्रियामा प्रदोष प्रत्यूषयोर्दिवसस्यावयवत्वात् १६ भूतस्य द्वे भार्ये तयोर्वंशमाह ॥ सरूपेति ॥ महानित्येवमेकादशरूपस्य रु
द्रस्य पार्षदाः प्रेतादयः १७ अन्ये अन्यस्यां जाताः १८ अंगिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधा नाम प
त्नी पितॄन्पुत्रत्वे करोत् अथ सती च अथर्वांगिरसं नाम वेदं १९ श्रीगोविंद ॥

991
1981

कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह ॥ कृशाश्व इति २१ सुपर्णा विनता २२ अनूरुं अरुणं २२ रोहिण्यामेव प्रेमाति
शयेनान्यासामुपेक्षणात् ॥ कुपितस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योभूत् २३ तं दक्षं प्रसाद्य
केवलं कलाएव लेभे न त्वपत्यानि कथंभूताः क्षये कृष्णपक्षे र्दिताः खंडिताः सतीः सत्यः क्षये धिता इति ॥ पाठांतरे क्षये सति पुनर्रधिताः

कृशाश्वोर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरो देवलं वयुनं मनुं २० तार्क्ष्यस्य विनता क
द्रूः पतंगी जामिनी इति ॥ पतंग्यसूत पतगान् यामिनी शलभानथ २१ सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं
सूर्यसूतमनूरुं च कद्रुर्नागाननेकशः २२ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत ॥ दक्षशापात्सोनपत्यस्ता
सु यक्ष्मग्रहार्दितः २३ पुनः प्रसाद्य तं सोमः कला लेभे क्षयार्दिताः ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च २४
अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ता
म्रा सुरभिः सरमा तिमिः २५ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्वि
शफा नृप २६ ताम्रायाः श्येनगृध्राश्च मुनेरप्सरसां गणाः ॥ दंदशूकादयः सर्पा राजन्क्रोधवशात्मजाः २७ इ
लाया भूरुहाः सर्वे यातुधानाश्च सौरसाः २८ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥ सुता दनोरेकषष्टि
स्तेषां प्राधानिकान् शृणु २९ द्विमूर्धा शंबरोरिष्टो हयग्रीवो विभावसुः ॥ अयोमुखः शंकुशिराः स्वर्भानुः कपि
लोरुणः ३० पुलोमा वृषपर्वा च एकचक्रोनुतापनः ॥ धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ३१ स्वर्भानोः सु
प्रभां कन्यामुवाह नमुचिः किल ॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ३२ वैश्वानरसुता याश्च चतस्रश्चा
रुदर्शनाः ॥ उपदानवी हयशिरा पुलोमा कालिका तथा ३३

तेनैव वर्धिताः सतीः २४ ॥ २५ ॥ अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह तिमेरित्यादिना २६ २७ सुरसायाः पुत्राः २८
प्रधानानिकान् मुख्यान् अष्टादश शृणु २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ श्रीकृष्ण ॥

भाग॰ २० वैश्वानरदनोः पुत्रः तस्य सुताः कः प्रजापतिः कश्यपउपयेमे ३४ दानवीपरिणयने हेतुः ब्रह्मणा चोदित इति ३५ तयोः षष्टिं सह ष॰
स्राणि निवातकवचाः पुत्रा जाताः तांश्च स्वर्गतः सन् ते पितामहोऽर्जुनो जघान ३६ राहुज्येष्ठो यस्य असूयत अजनयत् ४२
भुवि वर्तमाना ४३ तत्र विवस्वतः ४४ चर्षणयः कृताकृतज्ञा नर्वतः पश्यंति कर्मत्वेन निर्घटावुक्तेः ॥ यत्र येषु आत्मानुसंधान

उपदानविं हिरण्याक्षः क्रतुर्हयशिवान् नृप ॥ पुलोमाः कालिका च द्वे वैश्वानर सुते तु कः ३४ उपयेमेऽथ भग
वान् कश्यपो ब्रह्मचोदितः ॥ पौलोमाः कालिकेयाश्च दानवा युद्धशालिनः ३५ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते
पितुः पिता ॥ जघान स्वर्गतो राजन् एक इंद्रप्रियंकरः ३६ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ रा
हुज्येष्ठं क्रतुशतं ग्रहत्वं य उपागतः ३७ अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशे
नावतरद्विभुः ३८ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ३९
विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं ४० मिथुनं च महाभागा यमं देवं यमीं तथा ॥ सैव भूत्वाथ बडवा नासत्यौ
सुषुवे भुवि ४१ छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिं ४४ अर्यम्णो
मातृका पत्नी तयोश्चर्षणयः स्मृताः ॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ४५ पूषानपत्यः पिष्टादो भग्न
दंतोऽभवत् पुरा ॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ४६ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका ॥ संनिवे
शस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ४७ तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि ॥ विमतेन परित्यक्ता गुरु
णांगिरसेन यत् ४८ इति श्रीभाग॰ षष्ठस्कंधे षष्ठोऽध्यायः ६ राजोवाच ॥ यस्य हेतोः परित्यक्ता आचार्येणात्म
नः सुराः ॥ एतदाचक्ष्व भगवान् शिष्याणामक्रमं गुरौ ३ रामचंद्र
विशेषेण मानुषी जातिः ॥ श्वोपकल्पिता ॥ तथा च श्रुतिः पुरुषे त्वाविस्तरामात्मेति ४५ कुपितं हर स्मितिशेषः विवृतद्विजः प्रकटितदंतः
सन् ४६ यत् यदा विमतेन अवज्ञातेन बृहस्पतिना परित्यक्ताः तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवंतः ४८
षष्ठे षष्ठः ६ सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः ॥ गुरुणा संपरित्यक्तैः पौरोहित्यमथाकरोत् ॥ यस्य हेतोः कस्माद्धेतोः आत्मनः श्रीः २०

शिष्याः स्मृताः परिस्मृताः भक्तं संभावयं ३ गोविंद ॥

1793
1981

स इंद्रो यदा संप्राप्तं वाचस्पतिं नाभ्यनंदत ॥ नादृतवान् तदा स आंगिरसः ततो निर्गत्य तूष्णीं स्वगृहमाययौ इत्यन्वयः त्य नामन्वयः अ
नादरहेतुं मदं दर्शयितुं विशिनष्टि ॥ त्रिभुवनैश्वर्यमदेनोल्लंघितः सतां पंथा येन सः २ परिश्रितः परिवृतः ३ ॥ ४ ॥ ५ ॥ आस्थानं सभा
तस्मिन् अध्यासनं सिंहासनं तदास्थितः ६ परमेष्ठी महाराजचिह्नैः असनस्यार्धस्थितया पौलोम्या सह विराजमानः सन् ॥ उत्थानादि
नानाभ्यनंदत् ८ नोच्चचाल आसन एव स्थितोऽपि किंचिन्न चलितवान् ९ श्रीमदेन या विक्रिया तां विद्वान् जानन् १० प्रतिबुध्य अनु

श्रीबादरायणिरुवाच ॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः ॥ मरुद्भिर्वसुभी रुद्रैरादित्यैरृभिभिर्नृप ३ वि
श्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ४ विद्याधराप्सरोभिश्च
किन्नरैः पतगोरगैः ॥ निषेव्यमाणो मघवा स्तूयमानश्च भारत ५ उपगीयमानो ललितमास्थानाध्यासनाश्रितः
पांडुरेणातपत्रेण चंद्रमंडलचारुणा ६ उक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानः पौलोम्या सहा
र्धासनया भृशं ७ स यदा परमाचार्यं देवानामात्मनश्च ह ॥ नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः ८ वाच
स्पतिं मुनिवरं सुरासुरनमस्कृतं ॥ नोच्चचालासनादिंद्रः पश्यन्नपि सभागतं ९ ततो निर्गत्य सहसा कविरांगिर
सः प्रभुः ॥ आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियां १० तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः ॥ गर्हयामास स
दसि स्वयमात्मानमात्मना ११ अहो बत मयासाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः १२
को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः १३ ये पारमेष्ठ्यं धिषणमधितिष्ठ
न्न किंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः १४ श्रीरामकृष्ण ॥

स्मृत्य ११ मम कृतं कर्म अहो असाधु यद्यस्मात् दभ्रबुद्धिना अल्पमतिना मया कात्कृतः तिरस्कृतः १२ विबुधानां सात्विकानां देवाना
मीश्वरोऽप्यहं १३ ननु सिंहासनस्थो राजाभ्युत्थानं न कुर्यादिति रहाबदंतितत्राह ॥ यद् तिद्वाभ्यां धिषणमासनं १४ श्रीगोविंद ॥ य

 कुपथंदिशंतीतिकुपथदेशारः तेषांवचः ॥अश्ममयःप्लवोयेषांतेतथामज्जंतंप्लवमनुमज्जंतितद्वत् १५ अगाधागंभीराधिषणाय
स्यतं निःशठः शाठ्यहीनः सन् १६ अधिकयात्ममायया १७ गुरोःसंज्ञांज्ञानोपायंपरीक्षमाणोपिनाधिगतः अप्राप्तः सन् १८ आ
ततायिनः उद्यतास्त्राः १९ निर्भिन्नान्यंगानिउत्तमांगानि॥शिरांसिउरवोबाहवश्चयेषां २०॥२१॥वोयुष्माकंकृतंकरणंमहदभद्रं

तेषांकुपथदेष्ट्राणांपततांतमसित्वधः ॥येश्रद्दध्युर्वचस्तेवैमज्जंत्यश्मप्लवादिव १५ अथाहममराचार्यमगा
धधिषणंद्विजं ॥प्रसादयिष्येनिशठः शीर्ष्णातच्चरणंस्पृशन् १६ एवंचिंतयतस्तस्यमघोनोभगवान्गृहात् ॥
बृहस्पतिर्गतोदृष्टांगतिमध्यात्ममायया १७ गुरोर्नाधिगतःसंज्ञांपरीक्षन्भगवान्स्वराट् ॥ध्यायन्धियासुरै
र्युक्तः शर्मनालभतात्मनः १८ तच्छ्रुत्वैवासुराःसर्वेआश्रित्यौशनसंमतं ॥देवान्प्रत्युद्यमंचक्रुर्दुर्मदाआतता
यिनः १९ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ब्रह्माणंशरणंजग्मुःसहेंद्रानतकंधराः २० तांस्तथा
भ्यर्दितान्वीक्ष्यभगवानात्मभूरजः ॥कृपयापरयादेवउवाचपरिसांत्वयन् २१ ब्रह्मोवाच ॥अहोबतसुरश्रेष्ठा
ह्यभद्रंवःकृतंमहत् ॥ब्रह्मिष्ठंब्राह्मणंदांतमैश्वर्यान्नाभ्यनंदत २२ तस्यायमनयस्यासीत्परेभ्योवःपराभवः
॥प्रक्षीणेभ्यःस्ववैरिभ्यः समृद्धानांचयत्सुराः २३ मघवन्द्विषतःपश्यप्रक्षीणान्गुर्वतिक्रमात् ॥संप्रत्युपचि
ताअन्भूयःकाव्यमाराध्यभक्तितः २४

तदाह ॥ब्रह्मिष्ठमिति ॥नाभ्यनंदत्नाभिनंदितवंतः २२ परेभ्यःशत्रुभ्योवःपराभवइतियत् अयंतस्यअयनस्यअन्याय्यस्यसंवं
धीफलरूपआसीत् ॥उक्तंच ॥ब्राह्मणंकुलसंपन्नंभक्तंविष्णोर्महात्मनः आयांतंवीक्ष्यनोत्तिष्ठेत्सदुःखैःपरिभूयते ॥स्वयमेववै
रिणोहंतारोयेषांतेभ्यः २३ गुरुतिरस्कारसत्कारावेवापचयोपचयकारणमित्यत्रदृष्टांतेनाह ॥मघवन्निति ॥द्विषतःशत्रून् ॥
काव्यंभार्गवंगुरुमेवसेव्योपचितान् ॥उपचितत्वमेवाह ॥आददीरन्गृहीयुः २४ श्रीराम् ॥ गोपालकृष्ण ॥ ॥

195
1981

अभेद्योमंत्रोयेषां ॥अनुशिक्षितार्थाः शिष्याः यतः विप्रायोगोविंदोगावश्चेश्वरः ॥अनुग्राहकायेषांतेषान्नैवअभद्राणिनभवंति ॥
अन्येषांतुभवति ॥तस्मादथअनंतरमेवभजत ॥अस्यकर्मअसुरपक्षपातं २६ उदिताउक्ता २७ अतिथीनांपितॄणांचप्रशंसार्थ
माहुः ॥आचार्यउपनीयवेदाध्यापकः ॥ब्रह्मणोवेदस्यमूर्तिः ३० धर्मस्यात्मामूर्तिरतिथिःस्वयंसाक्षात्आत्मनःश्रीविष्णोः ॥यद्वा ॥
आत्मनःस्वस्यसर्वभूतेष्वात्मदृष्टिःकर्तव्येत्यर्थः ३१ परेभ्यःपराभवएवार्तिःतां ३२ संदेशमाहुःवृणीमहइति ३३ ननूपाध्यायत्वेक

आददिरन्निलयनंममापिभृगुदेवताः ॥त्रिविष्टपंकिंगणयत्यभेद्यमंत्राभृगूणामनुशिक्षितार्थाः ॥नविप्रगोविं
दगवीश्वराणांभवंत्यभद्राणिनरेश्वराणां २५ तद्विश्वरूपंभजताशुविप्रंतपस्विनंत्वाष्ट्रमथात्मवंतं ॥सभाजितो
र्थान्सविधास्यतेवोयदिक्षमिष्यध्वमुतास्यकर्म २६ श्रीशुकउवाच ॥तएवमुदितराजन्ब्रह्मणाविगतज्वराः ॥
ऋषिंत्वाष्ट्रमुपव्रज्यपरिष्वज्येदमब्रुवन् २७ देवाऊचुः ॥वयंतेतिथयःप्राप्ताआश्रमंभद्रमस्तुते ॥कामःसंपाद्य
तांतातपितॄणांसमयोचितः २८ पुत्राणांहिपरोधर्मःपितृशुश्रूषणंसतां ॥अपिपुत्रवतांब्रह्मन्किमुतब्रह्म
चारिणां २९ आचार्योब्रह्मणोमूर्तिःपितामूर्तिःप्रजापतेः ॥भ्रातामरुत्पतेर्मूर्तिर्माताशाक्षात्क्षितेस्तनुः ३०
दयायाभगिनीमूर्तिर्धर्मस्यात्मातिथिःस्वयं ॥अग्नेरभ्यागतोमूर्तिःसर्वभूतानिचात्मनः ३१ तस्मात्पितॄणा
मार्तानामार्तिंपरपराभवं ॥तपसापनयंस्तातसंदेशंकर्तुमर्हसि ३२ वृणीमहेत्वोपाध्यायंब्रह्मिष्ठंब्राह्मणंगु
रुं ॥यथांजसाविजेष्यामःसपत्नांस्तवतेजसा ३३ नगर्हयंतित्यर्थेषुयविष्ठांघ्र्यभिवादनं ॥छंदोभ्योन्यत्र
नब्रह्मन्वयोज्यैष्ठस्यकारणं ३४

निष्ठस्यममाभिवंदनंकरिष्यथतत्वगर्हितंतत्राहुःनेति ॥अर्थेषुप्रयोजननिमित्तंयविष्ठानामभिवादनंननिंदति किंच ॥छंदो
भ्यःमंत्रेभ्योतत्रवयोज्यैष्ठस्यकारणंनतुमंत्रेषु ॥अतोस्मभ्यंमंत्रदातृत्वेनत्वमेवज्येष्ठोभविष्यसि ॥यद्वा ॥छंदोभ्योन्यत्रवेदात्विद्या
यवयएवज्येष्ठस्यकारणंनभवतिकिंतुवेदाएवकारणं ॥तस्मात्त्वयःवेदज्ञत्वात्त्वमेवज्येष्ठइत्यर्थः ३४

निंदितमपि इदं यस्मर्थांच्याभंगभंगेनकरिष्यामीत्याह ॥ सार्धेन ॥ विगर्हितं पौरोहित्यं धर्मशीलैः ॥ अधर्महेतुत्वात् ॥ किंच ॥ ब्र
ह्मवर्चउपव्ययं ॥ पूर्वसिद्धस्य ब्रह्मवर्चसस्य व्ययकरं प्रत्याख्यातुं च मादृशो नार्हतीत्याह ॥ कथं त्विति ॥ तेषां शिष्यः शिक्षणार्हः
स एव प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ३६ ननु पौरोहित्येन धनलाभाधर्मः सिध्येत ॥ अन्यथा निर्धनस्य कुतो धर्मः
अत एव तेन लोको तुष्यतीति तत्राह ॥ अकिंचनानां शिलोञ्छिन्नं हि धनं ॥ क्षेत्रे स्वाम्युपेक्षित कणशोपादानं ॥ उञ्छः ॥ हट्टादौ पतितत्री

ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ३५
विश्वरूप उवाच ॥ विगर्हितं धर्मशीलैः ब्रह्मवर्चउपव्ययं ॥ कथं नु मद्विधो नाथा लोकेशैरभियाचितं ३६ प्रत्या
ख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ३७ अकिंचनानां हि धनं शिलोञ्छनं तेन हं निर्वर्तित साधुसत्क्रियः ॥ क
थं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं तुष्यति येन दुर्मतिः ३८ तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ॥
भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ३९ श्रीबादरायणिरुवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः
॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना ४० सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेंद्रा
य वैष्णव्या विद्यया विभुः ४१ यया गुप्तः सहस्राक्षो जिग्ये सुरचमूर्विभुः ॥ तां प्राह स महेंद्राय विश्वरूप उदारधीः
४२ इति श्रीभागवते महापुराणे षष्ठस्कंधे सप्तमोऽध्यायः ७ ॥ ॥ राजोवाच ॥ ॥ यया गुप्तः सह
स्राक्षः सवाहान् रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं १ श्रीगोपालकृष्ण ॥ ॥

त्यादेरुपादानमुंछनं ॥ इह त्वाश्रमे तेन वनिवर्तिता साधूनां सत्क्रिया येन ३७ कियदेतत्प्रार्थितमल्पमेव अभ्यधिकमपि करिष्या
मीत्याह ॥ भवतामपि ३८ समाधिना परमोद्यमेन ३९ वैष्णव्या श्रीनारायणकवचात्मिकया ४० असुरचमूः दैत्यसेनाः ४१॥४२
इति षष्ठे सप्तमोऽध्यायः ७ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकं ॥ इंद्राय प्राह येनेंद्रो गुप्तो दैत्यानथाजयत् त्रिलोक्याः संबंधिनीं श्रियं १

1981

मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां ३ कृतः स्वांगेषु करयोश्च न्यासो येन ॥ नारायणमयं परं वर्म सनह्येत् वभीयात् ४ तत्राष्टाक्ष
रेण पादाद्यष्टांगेषु न्यासमाह ॥ पादयोरिति ॥ सार्धेन ॥ प्रणवसंपुटितमोंकाराद्येकैकमक्षरं विन्यसेत् ५ विपर्ययं यया भवन्त्यवशि
रःआदिपादांतं वा विन्यसेत् ॥ उत्पत्तिन्यासं संहारन्यासं वा कुर्यात् इत्यर्थः ६ द्वादशाक्षरस्याहारः प्रणवादियकारांतमिति ॥ प्रणवसं
पुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोराद्यंतपर्वसु न्यसेत् ७ मंत्रांत

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं ॥ यथाततायिनः शत्रून्येन गुप्तोजयन्मृधे २ बादरायणिरुवाच ॥ वृतः
पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ३ विश्वरूप उवाच ॥ धौतांघ्रिपाणि
राचम्य सपवित्र उदङ्मुखः ॥ कृतः स्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ४ नारायणपरं वर्म सन्नह्येद्भय आग
ते ॥ दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ५ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्यादों
कारादीनि विन्यसेत् ५ ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ६
प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ॥ न्यसेद्धृदय ओंकारं विकारमनुमूर्धनि ७ षकारं तु भ्रुवोर्मध्ये णकारं
शिखया दिशेत् ॥ वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु ८ मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः ॥ सविसर्गं फ
डंतं तु सर्वदिक्षु विनिर्दिशेत् ९ ॐ विष्णवे नम इति ॥ आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतं ॥ विद्यातेज
स्तपोमूर्तिमिमं मंत्रमुदीरयेत् १० ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषु
चापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ११ श्रीराम्

रन्यासमाह ॥ न्यसेद्धृदिति ॥ षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत् ८ मकारमस्त्रमुद्दिश्य ध्यात्वा तन्मकारास्त्रयः ॥
अस्त्राय फडिति एवं दिग्बंधे विनिर्दिशेत् ९ ध्येयमीश्वररूपमात्मानं ध्यायेत् ॥ षट्शक्तिभिः ऐश्वर्यादिभिर्भगवच्छब्दवाच्यादिभिः वि
द्या च तेजश्च तपश्च मूर्तिर्यस्य तं १० इमं वक्ष्यमाणं श्रीनारायणकवचाख्यं ॥ अष्टगुणः ॥ अणिमाद्यष्टैश्वर्ययुक्तः ११ श्रीराम् ॥ ॥

याद्सां गणएववरुणस्यपाशात्तस्मात् ३२ अटवी आजिमुखं संग्रामो पथ्य दृश्च आदिर्येषां तेषु मंकरस्थानेषु ३३ असौ प्रभि द्वो
वराहो मामध्वंनिरक्षतु ॥ यज्ञे रवयवरूपैः कल्पत इतितथा ॥ उन्नीताउत्थताधरायेनसः अद्रिकूटेषुगिरिशिखरेषु रामो ज्ञामदग्न्यः ३४
उग्रधर्मादभिचारादिलक्षणात् ॥ हासात् ॥ गर्वान्नरः अवतु ॥ दत्तोदत्तात्रेयः अयोगात् योगभ्रंशात् ३५ पथियद्देवानांहेळनंनमस्कार
मकृत्वागमनंतस्मात् ॥ पुरुषार्चनस्यांतरात् देवपूजाच्छिद्रात् ॥ द्वात्रिंशदपराधावराहे विष्णुनाउक्ताः ॥ द्वात्रिंशदपराधरूपान्नारदः ३६

॥ जलेतुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् ॥ स्थलेषुमायावटुवामनोव्यात्त्रिविक्रमः खेवतुविश्वरू
पः ३२ दुर्गेष्वटव्याजिमुखादिषुप्रभुःपायान्नृसिंहोसुर यूथपारिः ॥ विमुंचनोयस्यमहाट्टहासंदिशोविनेदुर्न्यप
तंश्चगर्भाः ३३ रक्षत्वसौमध्वनियज्ञकल्पः स्वदंष्ट्रयोन्नीतधरोवराहः ॥ रामोद्रिकूटेष्वथविप्रवासेसलक्ष्मणोव्याद् भर
ताग्रजोस्मान् ३४ मामुग्रधर्मादखिलात्प्रमादान्नारायणःपातुनरश्चहासात् ॥ दत्तस्त्वयोगादथयोगनाथःपायाद्गु
णेशःकपिलःकर्मबंधात् ३५ सनत्कुमारोवतुकामदेवाद्धयशीर्षामांपथिदेवहेळनात् ॥ देवर्षिवर्यःपुरुषार्चनांत
रात्कूर्मोहरिर्मांनिरयादशेषात् ३६ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभोनिर्जितात्मा ॥ यज्ञश्चलोकादव
तांकृतांतात्बलोगणात्क्रोधवशादहींद्रः ३७ द्वैपायनोभगवानप्रबोधाद्बुद्धस्तुपाखंडगणात्प्रमादात् ॥ कल्किः क
ळेः काळमळात्प्रपायात्धर्मावनायोनुकृतावतारः ३८ मांकेशवोगदयाप्रातरव्यात्गोविंदआसंगवमात्तवेणुः ॥
नारायणःप्राह्णउदात्तशक्तिर्मध्यंदिनेविष्णुररींद्रपाणिः ३९ देवोपराह्णेमधुहोग्रधन्वासायंत्रिधामावतुमाधवोमां ॥
दोषेहृषीकेशउतार्धरात्रेनिशीथएकोवतुपद्मनाभः २० श्रीराम ॥ श्रीगोपाळकृष्ण ॥ ॥ ॥

लोकाज्जनापवादाद्यज्ञः ॥ जननिमित्तोयोंतउपघातः ॥ तस्माद्बलिभद्रः ॥ अवतात् ॥ कृतांतादितिपाठे कृतांतात्काळात् रक्षतु ॥ क्रो
धवशात्सर्पाणांगणात् अहींद्रःशेषः ३७ काळगनुभूतात् कळेः कल्किः धर्मावनायधर्मरक्षणायकरुमहान् कृतोवतारोयेन ३८ दि
नस्यषड्भागेषु क्रमेणप्रातरादिसंज्ञेषु रात्रेश्चप्रदोषादिसंज्ञेषु रयाप्रार्थनंमांकेशव इतित्रिभिः ॥ असंगवंसंगवमभिव्याप्य ३९

411
1981

देवोपराह्णेत्रिधामा अस्मादित्रिमूर्तिः श्रीमाधवः दोषे प्रदोषे अर्धरात्रे अर्धरात्रिपर्यंतेकाळे निशीथे ॥ चएकएवपद्मनाभोवतु २० अप
रात्रेईशः श्रीवत्सधामावतु प्रत्यूषईशः श्रीजनार्दनः श्रीदामोदरः प्रभाते श्रीविश्वेश्वरोनुसंध्यंप्रतिसंध्यं २१ युगांतानळवत्तिग्मा
रत्तिष्णानेमिर्यस्य ॥ तच्चक्रंभगवताप्रयुक्तंसत् अरिसैन्यंदंदग्धि अतिशयेनदहति ॥ तस्यायंस्वभावएवनतुतस्मात्प्रार्थनीयमित्यर्थः
यद्वा ॥ दंदग्धितिलोण्मध्यमपुरुषः ॥ अत्रत्वमेवंभूतंचक्रमितिस्वरूपमुक्त्वासंबोध्यप्रार्थ्यतेअतिशयेनदहेतिकक्ष्यंशुष्कतृणं २२

देवोपराह्णेमधुहोग्रधन्वासायंत्रिधामावतुमाधवोमां ॥ दोषेहृषीकेशउतार्धरात्रेनिशीथएकोवतुपद्मनाभः २० श्री
वत्सधामापररात्रईशःप्रत्यूषईशोसिधरोजनार्दनः ॥ दामोदरोव्यादनुसंध्यंप्रभातेविश्वेश्वरोभगवान्काळमूर्तिः २१
चक्रंयुगांतानळतिग्मनेमिभ्रमत्समंताद्भगवत्प्रयुक्तं ॥ दंदग्धिदंदग्ध्यरिसैन्यमाशुकक्षंयथावातसखोहुताशः २२
गदेशनिस्पर्शनविस्फुलिंगेनिष्पिंढिनिष्पिंढ्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचूर्णयारीन्
२३ त्वंयातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्रविद्रावयकृष्णपूरितोभीमस्वनोरेर्हृदयानिकंपयन्
२४ त्वंतिग्मधारासिवरारिसैन्यमीशप्रयुक्तोममछिंधिछिंधि ॥ चक्षूंषिचर्मन्शतचंद्रछादयद्विषामघानांहरपापच
क्षुषां २५ यन्नोभयंग्रहेभ्योभूत्केतुभ्योनृभ्यएवच ॥ सरीसृपेभ्योदंष्ट्रिभ्योभूतेभ्योघेभ्यएवच २६ श्रीगोविंद ॥

अशनिवत्स्पर्शोयेषांतेस्फुलिंगाःयस्यास्तस्याः संबोधनंहेगदेत्वमजितस्यप्रियासि अहंअच्युतस्यदासः ॥ अतः कूष्मांडादीन् नि
ष्पिंढिसंचूर्णय अरींश्चचूर्णयचूर्णय २३ सर्वत्रवीप्सा अतिशीघ्रत्वाय हेदरेंद्रपांचजन्यत्वंयातुधानादीन् विद्रावय ॥ विप्रग्रहाः ब्र
ह्मराक्षसाः ॥ येन्येचघोरदृष्टयस्तान् २४ तिग्माधारायस्य हेतिग्मधार असिवर खड्गश्रेष्ठ त्वंममारिसैन्यंछिंधिछिंधि शतचंद्राका
राणिमंडलानियस्मिन् ॥ हेशतचंद्रचर्मन् अघानां अघवतांद्विषांचक्षूंषिछादय पापचक्षुषांचउग्रदृष्टीनांचचक्षूंषिहर २५ य
त् यभ्योभये ॥ अघेभ्यः पापेभ्यः २६ श्रीराम ॥ ॥

श्रेयः प्रतीपकाः दुष्टव्याघातकाः २७ स्तोत्राणि बृहद्रथंतरादिसामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोमः ॥ छंदोमयो वेदमूर्तिः
सुपर्णोसि गरुत्मानित्यादिश्रुतेः ॥ ऐकपद्यपाठे स्तोभा गीतिपूरकाक्षराणि स्तोत्रस्तोमेति पादे सामाधारभूतरुक्स्तोमः २८ नामानि च
रूपाणि च यानि च वाहनानि आयुधानि च नो बुध्यादीन् पांतु पार्षदमुख्याश्च पांतु २९ सच्च असच्च मूर्तामूर्तं यत् तत्सर्वं जगत् ३० ऐ
कात्म्यस्यानुभावोनुध्यानं येषां तेषां विकल्पो भेदस्तद्रहितोपि ३१ सत्यमानेन सत्यभूतेन प्रमाणेन ३२ पुनरपि श्रीनृसिंह एव प्रार्थ्य

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः २७ गरुडो भगवान् स्तोत्रस्तो
भः छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २८ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥ बुद्धी
न्द्रियमनःप्राणान् पांतु पार्षदभूषणाः २९ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु नाशमुपद्र
वाः ३० यथैकात्म्यानुभावानां विकल्परहितः स्वयं ॥ भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ३१ तेनैव सत्यमाने
न सर्वज्ञो भगवान् हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ३२ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्ना
रसिंहः ॥ प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ३३ मघवन्निदमाख्यातं वर्म नारायणात्मकं ॥ विजे
ष्यस्यंजसा येन दंशितोसुरयूथपान् ३४ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स
विमुच्यते ३५ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ३६ राम ॥

ते ॥ विदिक्ष्विति ॥ पांत्वित्यनुषंगः ॥ यद्वा नारसिंहः प्रह्लादः स्वनेन नृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेण ग्रस्तानि समस्तानि दि
ग्गजविषशस्त्रजलवाय्वग्न्यादीनां तेजांसि प्रभावा येन सः ३३ दंशितः कवचितः ३४ सोपि साध्वसात् ॥ भयात् विमुच्येते ३५ त
स्य तु भयं न भवेदेव ॥ एतद्विद्याप्रभावमितिहासेन ३६ श्रीगोविंद ॥

801
1981

दमाम्निति ॥ साधं स्त्रीभिः मरुधन्वनि निरुदकेदेशे अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितं ॥ यत्र द्विजक्षयो देहत्यागः तस्योपरि
सद्यः तत्क्षणमेव गगनात् न्यपतत् ॥ पाठांतरे अंगनाभिः सह ॥ वालखिल्योपदेशात् तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्व
धाम गंधर्वलोकं जगाम ॥ अधिगतः प्राप्तः सन् ४१ इति षष्ठेष्टमः ८ नवमे विश्वरूपे तु हते शक्रेण कोपतः ॥ त्वष्टा चोत्पादितेवृत्रे

इमां विद्यां पुरा कश्चित्कौशिको धारयन् द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ३७ तस्योपरि समाने
न गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ३८ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः
॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ३९ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ श्रीशुक उवाच
॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ४० एतां विद्यामधिगतो वि
श्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेसुरान् ४१ इति श्रीभागवते महापुराणे षष्ठस्कंधे नारा
यणवर्मनामाष्टमोध्यायः ८ श्रीशुक उवाच ॥ तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरा
पीतमन्नादमिति शुश्रुम १ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अददद्यस्य पितरो देवाः सप्रश्रयं नृ
प २ स एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ यजमानोवहद्भागं मातृस्नेहवशानुगः ३ श्रीगोविंद ॥

भीतैर्देवैर्हरेस्स्तुतिः १ सोमस्य पीथं पानं यस्मिन् एवं सुरापीथं अन्नं अत्तीत्यन्नादं ॥ अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवाना
मासीदित्यादिश्रुतिरनुसंधेया १ तस्यासुरपक्षपातमाह ॥ स वा इति द्वाभ्यां ॥ प्रत्यक्षं प्रकटं यथा भवति तथा स बर्हिषि देवेभ्यो हवि
र्भागं इंद्रायेदं अग्नय इदं इत्युच्चैरवदत् अत्र हेतुः ॥ यस्य पितरो देवासः २ असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ तद्वाह ॥ दे
वान् यजमानो सावसुरान् प्रतिभागव्यावहत् ३ श्रीगोविंद ॥

४।।५ ।।तां धारयितुं समर्थस्तयापि जग्राह ।।संवत्सरं तथैव स्थित्वा संवत्सरांते भूतानां क्रोशभीतः सन् भूतानां मध्ये विश्वरूपद्वये लो
कापवादपरिहाराय स हरिरिंद्रो भूम्यादिभ्यस्तदघं विभज्य ददौ तुरीयं चतुर्थं खातं स्यगर्तस्य पूरः पूरणं तेन वरेण यदि खातपू
रणं स्वत एव भविष्यति तर्हि ग्रहिष्यमित्येवं भाषाबंधेन जग्राहेत्यर्थः ६।।७।। ईरिणमुखरं ।।अत एवोखरे ध्ययनादि निषिध्यते
छंदेसति पुनर्विवाहेप्ररोहो भवति इति वरेण ।। निर्यासरूपेण ब्रह्महत्याया दृष्टत्वात् निर्यासो न भक्ष्य ।।शश्वत्कामवरेण याव
त्प्रसवं गर्भानुपघाते नैव संभोगवरेण ।।अत एव रजोदर्शने तत्संगादि न कार्यं ।।द्रव्यभूय वरेण यस्मिन् द्रव्ये क्षीरादावापो मि

तद्धेव हेळनं तस्य धर्मालीकं सुरेश्वरः ।।आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ४ सोमपीथं तु यत्तस्य
शिर आसीत्कपिंजळः ।।कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ५ ब्रह्महत्यामंजलिना जग्राह यदपीश्व
रः ।।संवत्सरांते तदघं भूतानां स विशुद्धये ६ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ।।भूमिस्तुरीयं जग्रा
ह खातपूरवरेण वै ७ ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ।।तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः ८
तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ।।शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ९ रजोरूपेण तास्वंहो मा
सि मासि प्रदृश्यते ।।द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलं १० तासु बुद्बुदफेनाभ्यां दृश्यते तद्धरन्किल्बिषं ।।
हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे ११ श्रीगोविंद

श्रा भवेयुः ।।तस्य भूयस्त्वमाधिक्यं स्यादिति वरेण ।।यद्वा ।।स्वस्यैव निर्जरोद्भमादिना भूयस्त्ववरेण ।।द्रव्यभूय इति पाठेप्ययमे
वार्थः ।।यद्वा ।।द्रवत्व्यभूयस्त्वं संसिद्धिकद्रवत्वं तेन वरेणापि विभागस्य विश्वरूपो वेत्ताष्टृ इत्यस्यां श्रुतावनुक्तेः ।।तद्धि भागफलमाह
।।तत्पापं हरति निराकरोति ।।कः क्षीपनु बुद्बुदादि जलाद्बहिः प्रक्षिपंतीत्यर्थः ।।यद्वा क्षिपत जलं पापं हरति आहरति गृह्णातीत्य
र्थः ।।अयं च तस्मादापो न परिचक्ष्याद् इति ।।आदि श्रुत्यर्थ उक्तः ।।पाठांतरे हरि किल्बिषं इद्रपापं इंद्राय इंद्रं हंतुं ।।शत्रवे शात्रुत्पत्त्यै ।।तदाह ११

803
1481

इंद्रशत्रो विवर्धस्वेति ।।अत्र चेंद्रशत्रुपदस्याद्युदात्तत्वात् ।।बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्मृते बहुव्रीहिलक्षणापत्त्यादिंद्र एव तस्य
शत्रुरभूत् ।।तदुक्तं श्रुत्या ।।यदब्रवीत्स्वाहेंद्रशत्रो वर्धस्वेति तस्मादस्येंद्रः शत्रुरभवदिति ।।तथा च शिक्षायां ।।मंत्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।।स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात् इति ।।अन्वाहार्यपचनाद्दक्षिणाग्नेः तंवीक्ष्य वित्र
स्ता लोकाद्दशदिशो विदुद्रुवुरिति पंचमेनान्वयः ।।कथंभूतं विष्वक् समंततः ।।इषुविक्षेपमात्रं प्रतिदिनं वर्धमानं दग्धशैलप्रतीकाशं
कृष्णवर्णं संध्याभ्रानीकवद्दचौदीप्तिर्यस्य तं ।।तप्ततांम्रवच्छिखाः श्मश्रूणि च यस्य मध्याह्नार्कोष्णोचदुग्रेलोचने यस्य ।।रोदसी आरोप्य

इंद्रशत्रो विवर्धस्व माचिरं जहि विद्विषं ।।अथान्वाहार्यपचनादुत्थितो घोरदर्शनः १२ कृतांत इव लोकानां युगां
तसमये यथा ।।विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने १३ दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं ।।तप्तताम्र
शिखाश्मश्रुं मध्याह्नार्कोग्रलोचनं १४ देदिप्यमाने त्रिशिरोशूळ आरोप्य रोदसी ।।नृत्यंतमुन्नदंतं च चालयंतं पदा
महीं १५ दरीगंभीरवक्त्रेण पिबता च नभस्तळं ।।लिहता जिह्वयार्क्षाणि ग्रसता भुवनत्रयं १६ महता रौद्रदंष्ट्रेण जृं
भमाणं मुहुर्मुहुः ।।वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश १७ येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्तिना ।।स वै वृ
त्र इति प्रोक्तः पापः परमदारुणः १८ तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ।।स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोग्रसत्ता
नि कृत्स्नशः १९ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्तचेतसः ।।प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः २०

वेत्यर्थः ।।दरीवत् गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्यर्थः ।।कथंभूतेन नभस्तळं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रस
ता ।।महता विस्तीर्णा नरौद्रा दंष्ट्रा यस्मिन् ।।वृत्तनाम निर्वक्ति येनावृता इति ।।त्वष्टुर्मूर्तिर्यस्य तपसः तेन तथा च श्रुतिः ।।स इमांल्लोकानावृ
णोत्तद्वृत्रस्य वृत्रत्वमिति ।।अग्रसत् ।।भक्षितवान् ग्रस्तं तेजो येषां प्रत्यंचमंतर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात् ।।क्वापि गमनासंभवा
त् तत्रैव स्थित्वा तुष्टुवुरित्यर्थः ।।महाभये परित्राणमन्यतो न भवेदिति ।।हरिमेव प्रपद्यंते सुराः शरणमातुराः २० श्रीरामचंद्र ।।

वाय्वादीनि पंच महाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयः ब्रह्मादयश्च ततो वीचीनाम् वयं च सर्वे यस्मै अंतकाय कालाय यो
द्विजंतः संतो बलिं हराम असावपि यस्मात् बिभेति ततः परमेश्वरादेव नोस्माकं अरणं शरणं रक्षणमस्तु ॥ तत एवैवत्यवधारणे हेतुमा
हुः ॥ अविस्मितं निरहंकारं कुतः रूठशून्यं चा ॥ कुतः प्रशांतं रागादिशून्यं ॥ तत्र कुतः स्वेनैव लाभेन परिपूर्णकामं तत्र कुतः समं उपाधि
परिछेदशून्यं ॥ एवंभूतं परमेश्वरं विना अपरं यः शरणार्थमुपसर्पति स हि बालिशो जः यतो सौ शुनो लांगूलेन पुछेन समुद्रमति त

देवा ऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः ॥ हराम यस्मै बलिमंतकोसौ बिभेति यस्मा
दरणं ततो स्तु नः २१ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं ॥ विनोपसर्पत्यपरं हि बालिशः श्वलां
गुलेनातितितर्ति सिंधुं २२ यस्योरुशृंगे जगतीं स्वनावं मनुर्यथाबध्य ततार दुर्गं ॥ स एव नस्त्वाष्ट्रभयात् दुरंतात् त्राता
श्रितान् वारिचरोपि नूनं २३ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराळे ॥ एकोरविंदात् पतितस्ततार
तस्माद्भयाद्येन स नोस्तु पारः २४ श्रीगोविंद ॥ ॥ ॥ ॥ ॥ ॥ ॥

र्तिअतितर्तुमिछतीत्यर्थः ॥ यथा तेन समुद्रतरणं न भवति ॥ तथा निरीश्वराश्रयणेन व्यसनार्णवतरणं न भवतीति भावः २२ महा
भयो स एव रक्षक इति दृष्टमित्याहुः द्वाभ्यां ॥ यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बध्वा मनुः सत्यव्रतो यथावद्दुर्गं संकटं ततार ॥ स ए
वारिचरो मत्स्यमूर्तिः वोस्मान् अप्याश्रितान् सतः ॥ नूनं त्राता रक्षिष्यति २३ संयमांभसि प्रळयोदके उदीर्णउद्गतैर्वातैरूर्मयस्तेषां रवैः क
राळे भयंकरे अरविंदान्नाभिकमळात् पतितप्राय एक असहायं एव तस्माद्भयाद्येन ततार स एव नः पारस्तारकोस्तु २४ गोविंद ॥

805
1981

किंच वयं भगवंतेवस्तृशाः पाळिताश्च वकुशाः अतस्तमेव शरणं व्रजामेत्याहुः ॥ य एक इति त्रिभिः येनानुगृहीताः संतो विश्वं सृजाम य
न तु यूयमेव स्रष्टारः नान्यो युष्माकमनुग्राहकोस्ति तस्यादर्शनात्त्राहुः ॥ अस्मत्तः पुरः पूर्वमेवांतर्यामिनया समीहमनस्यापि यस्य
लिंगं रूपं न पश्यामः ॥ तत्र हेतुः ॥ पृथक्पृथगीशो इत्यभिमानिनः ॥ देवादिषु उपेंद्र परशुराम मत्स्यरामादितनुभिः कृतावतारः सन् ॥
आत्मसात्कृत्वा याति च ॥ आत्मभूतं देवतं कुतः विश्वं विश्वात्मकं तथापि विकारं वारयति अन्यं विश्वात्मत्वे हेतुः ॥ परं कारणं ॥ ननु प्रधा

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं ॥ वयं न यस्यापि पुरः समीहितः पश्याम लिंगं पृथगीशमा
निनः २५ यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्या
ति युगे युगे च २६ तमेव देवं वयमात्मदेवतं परं प्रधानं पुरुषं विश्वमन्यं ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्य
ति शं महात्मा २७ शुक उवाच ॥ इति तेषां महाराज सुराणामुपतिष्ठतां ॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाध
रः २८ आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ॥ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं २९ दृष्ट्वा तमवनौ स
र्व ईक्षणाल्हादविक्लवाः ॥ दंडवत्पतिता राजन् शनैरुत्थाय तुष्टुवुः ३० श्रीगोपाळकृष्ण ॥ ॥ ॥

नं पुरुषश्च विश्वस्य कारणं तत्राहुः ॥ प्रधानं पुरुषं च तदात्मकोपि स एवेत्यर्थः ॥ स एव नः शं विधास्यति ॥ प्रतीच्यां दिशि हृदि प्रथम
माविरभूत् ॥ पुनश्च तं पुरो दृष्ट्वा ईक्षणाल्हादेन विवशा अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुरित्यर्थः ॥ कथंभूतं श्रीवत्सकौ
स्तुभौ विना स्वतुल्यैः षोडशभिः सुनंदादिभिः परितः सेवितं उन्निद्रशरदंबुरुहवदीक्षणे यस्य तं ३० श्रीगोविंद ॥ ॥ ७ ॥

यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः ॥ वयसे ॥ उतनत्फलपरिच्छेदककालात्मनेऽपि ॥ न ह्युपातकेषु दैत्येषु असं
प्रक्षिप्तं चक्रं येन एवंभूतैः प्रभावैः स पुरुहूयशोनन बहुनाम्ने ३१ ननु मम गुणातीतं रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादिकमि
ति वर्ण्यते ॥ तत्राहुः ॥ यन्नवगुणत्रयस्येशितुर्नियंतुस्त्रिगुणात्मिका नो तिस्रणां गतीनां परमं पदं निर्गुणस्वरूपं तत् ॥ विसर्गस्यार्वाची
नः इदानींतनो हे धातः वेदितुं नार्हति अतः केवलं तस्मै तेन मोक्ष ॥ मिताक्षराणि पद्यानि नमीयंते हरे गुणाः इति पद्यैरतुष्यंतः सद्योग
येनतुष्टुवुः ॥ भक्त्युद्रेकेण बहुधा संबोधयंतो दुर्ज्ञेयत्वं प्रपंचयंति ॥ भगवन्नित्यादिना परममंगलं शुद्धो धर्मो यस्मिन् ॥ आत्मयोगेना

देवा ऊचुः ॥ नमस्ते यज्ञवीर्याय वयसे उत ते नमः ॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ३१ यत्ते गतीनां तिसृणां
ईशितुः परमं पदं ॥ नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ३२ ॐ नमस्ते भगवन्नारायण वासुदेवादिपुरुष
महापुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीना
थ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाट
द्वारे चित्ते पावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ दुरवबोध इव तवायं विहारयोगो यदशरणोश
रीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ३३ श्रीराम ॥

त्मांगयोगेन अथः समाधिः चित्तैकाग्र्यं तेन परिभावितः सुशीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेनोद्घाटितं तमोरूपं क
पाटं यस्मिंस्तस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आत्मलोके प्रत्यग्रूपे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् ॥
ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कथं तत्राहुः ॥ दुःखबोध इव तवायं विहारयोगः क्रीडायोगः यद्यस्मादशरणो निराश्रयः श्रीः
इदं विश्वं अनवेक्षितो स्माकं समवायो मेलनं सहाय्यं येन सः ३३ श्रीगोविंद ॥ श्रीगोपालकृष्ण ॥ ॥ ॥ २७

804/1981

दुर्ज्ञेयत्वांतरमाहुः ॥ अथ तत्रेति ॥ यथेह देवदत्तो गृहादि निर्मीय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते ॥ एवं भवान् आत्मस्व
रूपो जीवरूपेण गुणविसर्गे पतितः सन् उपाददाति ॥ यद्वा ॥ समंजसं अप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासीनः सा
क्षितया वर्तत इति ३५ तदेवं विरोधेन दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाहुः ॥ न हीति ॥ विरुध्यत इति विरोधः उभयं न
विरुध्यमित्यर्थः ॥ नत्वंन्यदृष्टांतेन त्वयि विकल्पो युज्यते ॥ अनवगत्यैश्वर्यत्वादित्याहुः ॥ भगवतीति ॥ अपरिमिता गुणगणा यस्य
तस्मिन्नीश्वरे स्वतंत्रे अनवगात्यमनवर्ग्यं माहात्म्यं यस्य तस्मिन् विकल्प एवं वा एवं वेति वितर्कः किमत्र युक्तमिति विचार इत्थमेवे
ति तत्र प्रमाणाभासाः तदनुग्राहकाः कुतर्काश्च अर्वाचीना वस्तुस्वरूपासंस्पर्शिनो विकल्पादयस्तेयेषु शास्त्रेषु तैः कलिलं व्याकुलं

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः ॥ पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपाददाति
३४ अहोस्विदात्माराम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदाम ३५ न हि विरोध उभयं भ
गवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्र
कलिलांतःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामंतर्धा
यकोन्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ३६ समविषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादि
धियां ३७ श्रीगोपालकृष्ण

अंतःकरणमाश्रयो यस्य ॥ दुरवग्रहस्य दुराग्रहस्य तेन वादिनां विवादस्यानवसरे अगोचरे ॥ ननु श्रद्धामात्रमेतत् युक्तिरुच्यतां
तत्राहुः ॥ उपरतो मायामयः संसारो यस्मिन् तस्मिन् केवले आत्ममायां मध्ये निधाय कोन्वर्थः कर्तृत्वादिर्न संभवति यदि वस्तुतः
कर्तृत्वादि भवेत्तर्हि विरोधः स्यात् न तु तदस्तीत्याहुः ॥ स्वरूपद्वयाभावादिति ॥ अनुग्रहनिग्रहादिकं तु तत्तन्मतिभेदेन त्वन्मायया
त्वयि स्फुरतीत्याहुः ॥ समा विषमा च मतिर्येषां मतमभिप्रायं ॥ सर्पादिविषया धीर्येषां तेषां यथा रज्जुखंडस्तथा तथा भाति ॥
यद्वा तमेवाविरोधं पुरुषमिति भेदेन दर्शयति समविषमेति ३७ श्रीगोविंद ॥

न्तदेवं विरोधं परिहृत्य निखिलं परमार्थमाहुः॥ स एव हि नानारूपेण प्रतीतः वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विषयाणामा
भासैः प्रकाशैरुपलक्षितः॥ ननु तैर्जीव एवोपलक्ष्यतेन सर्वप्रत्यगात्मत्वात् सर्वजीवांतर्यामित्वात् जडतादात्म्याध्यासेन जीवस्या
पि जडप्रायत्वात् तेन विनाप्रकाश इति भावः पर्यवशेषितः॥ नेति नेतीत्यादिश्रुतिभिः॥ अत स्त्वदङ्घ्रिरेव परमपुरुषार्थ इत्याहुः॥
अथहेति॥ पर्यावर्तत इत्यंते नयस्मादेवंभूतस्त्वं परमेश्वरः॥ अथ ह वा च भत एव हि हे मधुमथन परमभागवता पतेत्वत्पादांभोजा

सएव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभा
सोपलक्षित एक एव पर्यवशेषितः॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि नि
ष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभू
तप्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृत्तमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रिय
सुहृदः साधवः त्वच्चरणांबुजसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः ३८ श्रीगोविंद॥ ॥

नुसेवां कथं मुहुर्विसृजंतीत्यन्वयः॥ हि यस्मात्स्वार्थे पुरुषार्थे कुशलाः निपुणाः आत्मत्वमेव च प्रियः सुहृत्त्वं येषां ते साधवो रागादि
शून्याः तत्र हेतुः॥ तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिंदुमात्रेण सकृदपि लीढया आस्वादितया स्वमनसि निष्यंदमानम
तिशयेन स्रवत्॥ यन्निरंतरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते अत एव भगवति स्त्वयि नितरां निरंतरं
निर्वृत्तं च मनो येषां ते यत्र यस्यामनुसेवायां सत्यां ३८ श्रीगोपालकृष्ण॥ ॥ ॥

809
1981

प्रस्तुतं वित्तापयंति त्रिभुवनेत्यादिना यावत्समाप्ति त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा अयो वि
क्रमा यस्य त्रीन् लोकान् जयतीति तथा त्रयाणां लोकानां मनोहरानुभावो यस्य॥ स वं च तुर्धा संबोध्याहुः॥ तेषामनुपक्रमसमयः॥ उ
पक्रमाय स्य त्रीन् लोकान् जयतीति तथा त्रयाणां लोकानां मनोहरानुभावो यस्य॥ एवमेनं त्वा प्रभुमपि जहि॥ यदि मन्यसे हंतुं यदीच्छसि प्रथमं ता
वत् मकालोन भवतीति मत्वा हे दंडधर पूर्वं यथा दंडं दधर्थ धृतवानसि॥ एवमेनं त्वाप्रभुमपि जहि॥ यदि मन्यसे हंतुं यदीच्छसि प्रथमं ता
वत् त्वदीयानामस्माकं अंतस्तापं शमयितुमर्हसि तावकानामित्यत्र हेतुः ततनतामहहेपितामहतवचरणनलिनयुगलध्यानेनेवा

त्रिभुवनात्मभवन त्रिविक्रम त्रिलोकनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि ते
षामनुपक्रमसमयोयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एव
एनमपि भगवन् जहि त्वाष्ट्रमुत यदि मन्यसे॥ अस्माकं तावकानामवनततानां ततततामह तव चरणनलिनयुगल
ध्यानानिबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिर शिशिरस्मित
तावलोकेन विगलितमधुमुखरसामृतकलया चांतस्तापमनघार्हसि शमयितुं॥ ॥

नुबद्धो हृदयनिगडः शृंखला येषां स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानां केन अनुकंपयानुरंजितसानुरागं च तद्विश
दं रुचिरं च शिशिरं स्मितं तत्सहितेन नावलोकेन तथानुकंपयेव विगलितो मधुरो मुखरसः प्रियावाक् सैवामृतकला न यावा॥ ॥

किंचास्मदभिप्रायस्त्वयाज्ञायतएवकिमत्रास्माभिर्विज्ञापनीयमित्याह॥अथहेभगवन्तवास्माभिरिहकियानार्थविशेषोविज्ञा
पनीयःस्यादित्यन्वयः॥यथाहिरण्यरेतसोग्नेस्तदंशभूतैर्विस्फुलिंगादिभिःप्रकाशोनक्रियतेतथातवास्माभिःकार्यार्थप्रकाशनं
नकार्यमित्यर्थः॥अत्रहेतुगर्भाणिविशेषणानिअखिलजगतामुत्पत्त्यादिषुनिमित्तायमानंयादिव्यमायया विनोदोयस्य॥अत
एवसर्वजीवनिकायानामंतर्हृदयेषुब्रह्मस्वरूपेणप्रत्यगात्मीमीतद्रूपेणचबहिरपिप्रधानरूपेणदेशकालदेहावस्थानविशेषा
ननुलंघ्यानुभवतःकथं॥तेषामुपादानतयाउपलंभकतयाइतिवा॥अतएवसर्वेषांप्रत्ययानांबुध्यादीनामपिसाक्षिणःसाक्षित्वेहे

अथभगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्यसकलजीवनिका
यानामंतर्हृदयेषुबहिरपिचब्रह्मप्रत्यगात्मस्वरूपेणप्रधानरूपेणचयथादेशकालदेहावस्थानविशेषंत
दुपादानोपलंभकतयानुभवतःसर्वप्रत्ययसाक्षिणआकाशशरीरस्यसाक्षात्परब्रह्मणःपरमात्मनःकियानि
हवाअर्थविशेषोविज्ञापनीयःस्यात्॥विस्फुलिंगादिभिरिवहिरण्यरेतसः॥अतएवस्वयंतदुपकल्पयास्माकं
भगवतःपरमगुरोस्तवचरणशतपलाशछायांविविधवृजिनसंसारपरिश्रमोपशमनीमुपाश्रितानांवयंय
त्कामेनोपसादिताः॥ ॥

तुः॥आकाशवदलिप्तंशरीरंस्वरूपंयस्य॥अलिप्तत्वेहेतुद्वयंसाक्षात्परब्रह्मणोनिरुपाधेःपरमात्मनःशुद्धसत्वमूर्तेश्चअतएवसर्व
ज्ञत्वादेववयंयत्कामेनयस्यकार्यस्यकामेनोपसादिताःतदस्माकंकार्यंस्वयमेवोपकल्पयसंपादयेतिचरणमेवशतपलाशंकमलं
तस्यछायांविविधैर्वृजिनैःयःसंसारपरिश्रमःतस्योपशमकरीं॥उपसृतानांप्राप्तानां॥ श्रीमोरेश्वरोजयति॥ ॥७॥ ॥

811
1981

पूर्वभक्तेरुत्कर्षोक्तेः॥अकामशंकामाभूदितिस्वकामंकथयंति॥अथोअनंतरमेवशीघ्रं॥तद्ध्यायपुनःप्रणमंति॥हंसायशुद्धायह
रत्येआर्तिहरायतेनमः॥शुद्धसत्वहेतवः॥दहनिलयायहृदयाकाशनिकेतायनिरीक्षकायबुध्यादिसाक्षिणेकृष्णायसदानंदरूपाय
॥कृषिर्भूवाचकःशब्दोनश्चनिर्वृतिवाचकः॥तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइतिनिरुक्तेःआर्तिहरत्वेहेतवःमृष्टंरुचिकरंयशोय
स्यनिरुपक्रमाय॥आदिशून्यायसद्भिःसंगृह्यतइतितथातस्मै॥भवपांथःभवरूपेपथिवर्तमानःतस्यजनस्यनिज्ञाश्रमासोमत्यांसंसार

अथोईशजहित्वाघ्रसंतंभुवनत्रयंग्रस्तानियेननःकृष्णतेजोस्यस्त्राआयुधानिच॥हंसायदहनिलयायनिरीक्षकाय
कृष्णायमृष्टयशसेनिरुपक्रमाय॥सत्संग्रहायभवपांथनिजाश्रमाप्तावंतेपरीष्टगतयेहरयेनमस्ते॥श्रीशुकउवाच॥अ
थैवमीडितोराजन्सादरंत्रिदशैर्हरिः॥स्वमुपस्थानमाकर्ण्यप्राहतानभिनंदितः॥श्रीभगवानुवाच॥प्रीतोहंवःसुरश्रेष्ठा
मदुपस्थानविद्यया॥आत्मैश्वर्यस्मृतिःपुंसांभक्तिश्चैवययामयि॥किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः॥मय्येकांत
मतिर्नान्यत्मत्तोवांछतितत्वविद्॥नवेदकृपणःश्रेयःआत्मनोगुणवस्तुदृक्॥तस्यतानिच्छतोयच्छेद्यदिसोपितथाविधः॥

स्यांतेपरीष्टासर्वतःपूजिताउत्तमागतिःफलंयस्तस्मै॥अभिनंदितःसंतोषितःमदीयभुपस्थानंस्तोत्रंतत्सहितयाविद्याज्ञानेनआ
त्मनऐश्वर्यमसंसारित्वंतस्यस्मृतिर्ययानहिविरोधउभयमित्यादिनाकर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेःभक्तिश्चययाभवति॥अथाह
भगवन्नित्यादिनाभक्तेःसर्वोत्कर्षोक्तेःभक्तमभिनंदति॥किमिति॥यदुक्तंदेवैःस्वयंतदुपकल्पयास्माकमपित्यादिसंपादनंकृपालोर्म
मानुचितमित्याशयेनाह॥नवेदेति॥द्वाभ्यांगुणेषुविषयेषुतत्वदर्शीतान्विषयान्तथाविधोज्ञएव॥ ॥ ॥ ॥ ॥

कर्मनवक्ति प्रवृत्तिमार्गेनवक्तिहि ॥ अपथ्यंयथानरातिभिषकूनःसंहेद्यः ३८ एवंतत्वकथनेनानौचित्यंपरिहृत्यतदभिप्रायम
नुसरन्नाह ॥ मघवन्निति ॥ विद्ययाव्रतैस्तपसाचसारंदृढंगात्रंशरीरंयाचत ३९ तत्रतदीयंविद्यातिशयमाह ॥ सवाइतिद्वाभ्यां ॥ ए
वंत्यत्रप्रसिद्धाकथा ॥ निशम्याथर्वणंदक्षंप्रवर्ग्यंब्रह्मविद्ययोः दध्यंचंसमुपागम्यतमूचतुरथाश्विनौ १ भगवन्देहिनौविद्याभिति
श्रुत्वासश्चाब्रवीत् ॥ कर्मण्यवस्थितोद्याहंपश्चाद्वक्ष्याभिगच्छथ २ तयोर्निर्गतयोरेवशक्रआगत्यतंमुनिं ॥ उवाचभिषजोर्विद्यांमावदीर
श्विनौमुने ३ यदिमद्वाक्यमुल्लंघ्यब्रवीषिसहसैवने ॥ शिरःछिंद्यांनसंदेहइत्युक्त्वासययौहरिः ४ इंद्रेगतेतथाभ्येत्यनासत्याबूच
तुर्द्विजं ॥ तन्मुखादिंद्रगदितंश्रुत्वाताबूचतुःपुनः ५ अवांतरशिरःछित्वापूर्वमश्वस्यमस्तकं ॥ संधास्यावस्ततोब्रूहितेनविद्यांचनौद्वि

त्वयंनिश्रेयसंविद्वान्नवक्त्यज्ञायकर्मणि ॥ नरातिरोगिणोपथ्यंवांछितोहिभिषक्तमः ३८ मघवन्यातभद्रंवो
दध्यंचमृषिसत्तमं ॥ विद्याव्रततपःसारंगात्रंयाचतमाचिरं ३९ सवाअधिगतादध्यङ्ङश्विभ्यांब्रह्मनिष्कलं ॥ य
द्वाअश्विशिरोनामतयोरमरतांव्यधात् ४० दध्यङ्ङाथर्वणस्त्वष्ट्रेवर्माभेद्यंमदात्मकं ॥ विश्वरूपाययत्प्रादात्त्वष्टाय
त्त्वमधास्ततः ४१

ज ६ तस्मिन्निंद्रेणसंछिन्नेपुनःसंधायमस्तकं ॥ निजंतेदक्षिणांदत्वागमिष्यावोयथागतं ७ एतच्छ्रुत्वाततोवाचदध्यङ्ङाथर्वणस्त
योः ॥ प्रवर्ग्यंब्रह्मविद्यांचसत्कृतोसत्यशंकितः ८ इति ॥ ततश्चायमर्थः दध्यङ्निष्कलंशुद्धंब्रह्मअधिगतःज्ञानवान् पाठांतरेतुनि
तरांकृतंभवतिचनतंप्रवर्ग्यंचाधिगतःज्ञानवान्ततोश्विभ्यांप्रादादित्युत्तरस्यानुषंगः ॥ उपदिदेशेत्यर्थः ॥ कथंभूतंब्रह्मयद्वैअश्वशि
रसाप्रोक्तत्वादश्वशिरोनामप्रसिद्धंतयोरमरतांजीवन्मुक्तत्वंव्यधात् ॥ तथाचश्रुतिः ॥ अश्वस्यशीर्ष्णाप्रयतीमुवाचेति ४० मदात्मकंव
र्मश्रीनारायणकवचंअधिगतइतिपूर्वस्यानुषंगः ॥ तत्रहेतुः ॥ ययस्मात्त्वष्ट्रेप्रादात् यत्त्वष्टाविश्वरूपायपुत्रायप्रादात् कीदृशंय
त्वंततोविश्वरूपात्अधाःधृतवानसितदेवंविषयासारंगात्रंयाचध्वमित्यर्थः ४१ श्रीराम श्रीगोविंद ॥ ॐ ॥

813
1981

मनुप्रेष्टंदेहंकथंदास्यति ॥ तत्राह ॥ युष्मभ्यमंगानिआरुष्टीनियाचितःसन्दास्यति ॥ यतोधर्मज्ञःविशेषितोश्विभ्यांशिष्यप्रीत्यादा
स्यति ॥ अस्थिनीत्यनेनदेहयत्वंदर्शितं ॥ तेरस्थिभिर्विश्वकर्मणाविनिमितआयुधश्रेष्ठोवज्रोभविष्यतीतिशेषः ४२ येनभवान्व
त्रस्यशिरोहर्ताहरिष्यति ॥ मत्तेजसाउपबृंहितःसन्तेजश्वअस्त्राणिचआयुधानिचसंपदश्वभूयःप्राप्स्यमहाकायस्त्रिभुवनग्रासी
सएवास्मान्हन्यादितिशंकाकुलचित्तान्प्रत्याह ॥ मत्परांश्चकेपिनहिंसंतिअतोयुष्माकंभद्रमेवेति ४३ षष्ठेनवमोध्यायः ९ ॥

युष्मभ्यंयाचितोश्विभ्यांधर्मज्ञोंगानिदास्यति ॥ ततस्तैरायुधश्रेष्ठोविश्वकर्मविनिर्मितः ४२ येनवृत्रशिरोहर्ता
मत्तेजउपबृंहितः ॥ तस्मिन्विनिहतेयूयंतेजोस्त्रायुधसंपदः ४३ भूयःप्राप्स्यथभद्रंवोनहिंसंतिचमत्परान् ॥
४४ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेनवमोध्यायः ९ शुकउवाच ॥ इंद्रमेवंसमादिश्यभगवान्विश्वभा
वनः ॥ पश्यतामनिमिषाणांतत्रैवांतर्दधेहरिः १० तथाभियाचितोदेवैरृषिराथर्वणोमहान् ॥ मोदमानउवाचेदंप्र
हसन्निवभारत २ अपिवृंदारकायूयंनजानीथशरीरिणां ॥ संस्थायांयदभिद्रोहोदुःसहश्चेतनापहः ३ जिजी
विषूणांजीवानामात्माप्रेष्ठइहेप्सितः ॥ कउत्सहेततंदातुंभिक्षमाणायविष्णवे ४ देवाऊचुः ॥ किंनुतद्दुस्त्यजंब्रह्म
न्पुंसांभूतानुकंपिनां ॥ भवद्विधानांमहतांपुण्यश्लोकेड्यकर्मणां ५

दशमेकेशवादिष्टदध्यङ्स्थितवज्रभृत् ॥ इंद्रोयुध्यतवृत्रेणसासुरेणसनिर्जितः १ मोदमानएवतन्मुखात्धर्मंश्रोतुकामः
प्रत्याचक्षीणइवोवाच २ अपीतिद्वाभ्यांहेवृंदारकाःहेदेवाःअपिकिंसंस्थायांमृत्यौयोभिद्रोहोदुःसहस्तंनजानीथ ३ आत्मादे
हवयंजानीमएवकिंतुश्रीक्षुःस्मरन्मुखेनयाचतइतिचेत्तत्राहुः ॥ याचनेविष्णवेपिदातुंकउत्सहेत ४ पुण्यश्लोकेरीड्यानिकर्माणियेषां ५

याचकोयदिवेदन हिनयाचेतयदीश्वरः ॥दानसमर्थेन हिंसोपिनेतिनाह ॥अतोयथातवसंकटंवयंस्वार्थपरानजानीमः एवंप्र
त्याचक्षाणस्त्वमस्मत्संकटंनजानासीतिभावः ६ मेममाप्रत्युदाहृताःप्रयुक्ताः मोत्यजनंत्यक्ष्यामीत्यर्थःत्यक्तायातंआत्मानंदेहं ७ अध्रुवेणा
त्मनादेहेनहेनाथाः ८ भूतानांशोकेनशोचतिहर्षेणहृष्यतियआत्मास्वयंतस्ययोधर्मः ॥एतावानेवाव्ययइत्यर्थः ९ पारक्यैः

ननुस्वार्थपरोलोकोनवेदपरसंकटं ॥यदिवेदनयाचेतनेतिनाहयदीश्वरः ६ ऋषिरुवाच ॥धर्मंवःश्रोतुकामेन
यूयंमेप्रत्युदाहृताः ॥एषवःप्रियमात्मानंत्यजंतंसंत्यजाम्यहं ७ योध्रुवेणात्मनानाथानधर्मंनयशःपुमान् ॥
ईहेतभूतदययासशोच्यःस्थावरैरपि ॥ ८ ॥एतावानव्ययोधर्मःपुण्यश्लोकैरुपासितः ॥योभूतशोकहर्षाभ्यामा
त्माशोचतितुष्यति ९ अहोदैन्यमहोकष्टंपारक्यैःक्षणभंगुरैः ॥यन्नोपकुर्यादस्वार्थैर्मर्त्यःस्वज्ञातिविग्रहैः १० श्री
बादरायणिरुवाच ॥एवंकृतव्यवसितोदध्यङाथर्वणस्तनुं ॥परेभगवतिब्रह्मण्यात्मानंसन्नयन्जहौ ११ यताक्षा
सुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः ॥आस्थितःपरमंयोगंनदेहंबुबुधेगतं १२ अथेंद्रोवज्रमुद्यम्यनिर्मितंविश्वक
र्मणा ॥मुनेःशक्तिभिरुत्सिक्तोभगवत्तेजसान्वितः १३ श्रीराम ॥

श्वसृगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः स्वंवित्तंज्ञातयःपुत्रादयःविग्रहोदेहः तैर्नोपकुर्यादितियत् १० कृतंव्यव
सितंनिश्चयोयेन ॥आत्मानंक्षेत्रज्ञंसंनयन्एकीकुर्वन्तनुंजहौ ११ यताअक्षादयोयेन ॥तत्त्वंपश्यतीतितथाध्वस्तानिगता
निबंधनानियस्य १२ अथेंद्रःअशोभतेत्युत्तरेणान्वयः ॥मुनेःशक्तिभिः अस्थिभिर्निर्मितंउत्सिक्तः ऊर्जितः मुनिशुक्तिभिरिति
वापाठः १३ श्रीराम

815
1981

१४ ॥अरुणानीकानांयूथपैःपर्यस्तंपरिवृतं १५ रणःसंग्रामः ॥प्रथमेचतुर्युगेत्रेतायुगस्यमुखेआरंभे १६ ॥१७ ॥नामृष्य
न्नासहंत १८ ॥१९ ॥२० ॥२१ ॥२२ ॥शतघ्नीचचतुर्हस्तालोहकंटकसंचिता ॥भुशुंडीसर्वतोलोहकंटकानुक्रमोन्नतेत्यभिधानं ॥
पुंखोमूलदेशःएकस्यमूलदेशमनुतत्संलग्नोपरस्यपुंखोयथाभवतितथा ॥नभस्थैर्घनैःज्योतींषीवेत्यनेनतेषांनदप्राप्तिःसू

॥वृतोदेवगणैःसर्वैर्गजेंद्रोपर्यशोभत ॥स्तूयमानोमुनिगणैस्त्रैलोक्यंहर्षयन्निव १४ वृत्रमभ्यद्रवच्छेदमसु
रानीकयूथपैः ॥पर्यस्तमोजसाराजन्क्रुद्धोरुद्रइवांतकं १५ ततःसुराणामसुरैरणःपरमदारुणः ॥त्रेतामुखे
नर्मदायामभवत्प्रथमेयुगे १६ रुद्रैर्वसुभिरादित्यैरश्विभ्यांपितृवह्निभिः ॥मरुद्भिर्ऋभुभिःसाध्यैर्विश्वेदेवैर्म
रुत्पतिं १७ दृष्ट्वावज्रधरंशक्रंरोचमाणंस्वयाश्रिया ॥नामृष्यन्नसुराराजन्मृधेवृत्रपुरःसराः १८ नमुचिः
शंबरोनर्वाद्विमूर्धाऋषभोवरः ॥हयग्रीवःशंकुशिराविप्रचित्तिरयोमुखः १९ पुलोमावृषपर्वाचप्रहेतिर्हेतिरुत्क
लः ॥दैतेयादानवायक्षारक्षांसिचसहस्रशः २० सुमालिमालिप्रमुखाःकार्तस्वरपरिच्छदाः ॥प्रतिषिध्येंद्रसे
नाग्रंमृत्योरपिदुरासदं २१ अभ्यद्रवन्नसंभ्रांताःसिंहनादेनदुर्मदाः ॥गदाभिःपरिघैर्बाणैःप्रासमुद्गरतोमरैः
२२ शूलैःपरश्वधैःखड्गैःशतघ्नीभिर्भुशुंडिभिः ॥सर्वतोवाकिरन्शस्त्रैरस्त्रैश्चविबुधर्षभान् २३ नतेदृश्यंत
संछन्नाःशरजालैःसमंततः ॥पुंखानुपुंखपतितैर्ज्योतींषीवनभोघनैः २४ नतेशस्त्रास्त्रवर्षौघाह्यासेदुःसुर
सैनिकान् ॥छिन्नाःसिद्धपथेदेवैर्लघुहस्तैःसहस्रधा २५ श्रीगोविंद ॥ ॥

चिता २४ तामेवाहनतइति ॥शस्त्राणामस्त्राणांचयानिवर्षाणितेषामोघाःनासेदुःनप्रापुः ॥सिद्धपथेआकाशे २५ श्रीराम

क्षीणा अस्त्राणां च शस्त्राणां ओघा येषां गिरिशृंगैर्दैर्भैरुपलैश्च २६ तानिंद्रसैनिकान् शस्त्राणां अस्त्राणां च पूगैः समूहै रक्ष
तान् क्षतशून्यान् ॥ स्वस्तिमतः स्रग्विणः दृमादिभिश्च अविक्षतान्निशम्य ॥ वृत्रो नाथो येषां ते तत्र स्रुभीरिताः २७ कृताः पुनः पु
नः कृताः कृष्णानुकूलो येषां तेषु देवगणेषु रुषती रुषत्यः अकल्याण्यः रूक्षाः पुरुषा वाचो यथा महत्सु क्षोभ कर्त्र्यो न भवंति तद्वत्
२८ हतो युद्धे दर्पो येषां ॥ अतः परे गृहीतः सारो धैर्यं येषां ते अतिप्रसिद्धाः अपि ते दैत्या एवं ते द्रुत्य स्थापी न रुत्स्यं आजिमुखे युद्धारं

अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः ॥ अभ्यवर्षन् सुरबलं चिच्छिदुस्तांश्च पूर्ववत् २६ तानक्षतान्स्वस्तिम
तो निशम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान् २७ सर्वे प्रया
सा अभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुषती रूक्षवाचः २८
ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः २९
वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ॥ पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ३०
कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्ते नमुचे पुलोमन् मयानर्वन् शंबर मे शृणुध्वं
३१ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह कॢप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणी
त युक्तं ३२

भे पतिं विसृज्य पलायनाय मनो दधुः यतो हरावभक्ताः २९ प्रधावतः पलायमानान् प्रेक्ष्य आदावेव तीव्रेण भयेन पलायितं भ
ग्नं च तद्बलं सैन्यं तत्स्वप्रेक्ष्य एतद्वक्ष्यमाणं बभाषे ३० तदेव विशिनष्टि ॥ कालोपपन्नां समयसरोचितां मनस्विनां रुचिरां ॥ हे मयदे
अनर्वन् मे वाचं शृणु ३१ ततो मृत्योः इह यशः लोकः स्वर्गश्च यदि स्यात् ॥ अथ तर्हि अमुं मृत्युं युक्तं समीचीनं प्राप्तं वा ३२ गोविंद

817/1981

ब्रह्मसंधारणया कलेवरं जह्यादिति यत् स एको मृत्युः वीरशयेरणभूमौ अनिवृत्तः अपराङ्मुखः सन् जह्यादिति यत् ॥ स चैकः
तो द्वाविह शास्त्रे संमतौ मृत्यू तथा च स्मृतिः ॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ ॥ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः इ
ति ३३ इति षष्ठे दशमोऽध्यायः १० ॥ एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा ॥ भक्तिज्ञानबलोदर्काश्चित्रा वाचोऽनुवर्णिताः ॥ शांस
तः कथयतः पत्युर्वचः १ कालानुकूलैः कालानुवर्तिभिः काल्यमानां विद्राव्यमानां २ अमर्षितः असहमानः तान् त्रिदशान्निभ

द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ३३
इति श्रीभागवते महापुराणे षष्ठस्कंधे दशमोऽध्यायः १० शुक उवाच ॥ त एवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृ
ह्णन् भयत्रस्ताः पलायनपरा नृप १ विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानाम
नाथवत् २ दृष्ट्वातप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः ॥ तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ३ किं व उच्चरितैर्मा
तुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ४ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥
अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ५ एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो
येन लोका विचेतसः ६ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ७ गोविंद

र्य निर्भर्त्स्य वेदं वक्ष्यमाणमुवाच ३ तदाह द्वाभ्यां ॥ मातुरुच्चरितैः पुरीषः प्रायैः प्रथमांत पाठे देवानां संबोधनं पृष्ठतो हतैः दैत्यैः कि
न्न किंचिद्यशो नापि धर्मः ४ तदेवाह ॥ यदीति ॥ प्रधने संग्रामे सारं धैर्यं हे क्षुल्लकाः क्षुद्राः मात्रं क्षणमात्रं अग्रे तिष्ठत न चेदिहलो
कभोगे स्पृहास्ति ५ सुरगणान् रिपून् सुमहान् प्राणो बलं यस्य ॥ येन विचेतसो बभूवुः ६ वृत्रस्य विस्फोटनेन नादेन ७

उद्यंतं शूलं येन ॥ तालं नलानां वनं उद्धतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ८ ॥ ९ ॥ १० ॥ ११ ॥ सप्तधनुः प्रमाणं देशं सन्नोव
सन्नो बाहोर्यस्य तस्मैन प्रायुंक्त ॥ अमृतस्यंदी अमृतस्रावी यः स्वकरः तेनाभिमर्षः तेन वीतव्यथो गतदुःखः क्षतो बाहुर्यस्येंद्रस्य
स तथाभूतो वतस्थे १२ स वृत्रः हे नृपेंद्र ॥ आहवः काम्यया युद्धेच्छया वस्थितं भ्रातृहणं भ्रातरं विश्वरूपं हतारं नृशंसं क्रूरं तं देवाद्

ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूलओजसा नालं वनं यूथपतिर्यथोन्म
दः ८ विलोक्य तं वज्रधरोत्यमर्षितः स्वशत्रवेभिद्रवते महागदां ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन क
रेण लीलया ९ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोरुविक्रमः ॥ जघान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे
समपूजयन्नृप १० ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोद्रिः कुलिशाहतो यथा ॥ अयासरद्भिन्नमुखः सहेंद्रो मुंच
न्नसृक्सप्तधनुर्भृशार्तः ११ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा ॥ इंद्रोमृतस्यंदिकराभिम
र्षवीतव्यथः क्षतवाहोभितस्थे १२ स तं नृपेंद्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ॥ स्मरंश्च तत्कर्म नृ
शंसमंहः शोकेन मोहेन हसन् जगाद १३ वृत्र उवाच ॥ दिष्ट्या भवान्मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृ
हा च ॥ दिष्ट्यानृणोद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाचिरात् १४ यो नोग्रजस्यात्मविदो द्विजातेर्गुरोर
पापस्य च दीक्षितस्य ॥ विश्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाकरुणः स्वर्गकामः १५ श्रीभगवान् ॥ ॥

पापं तस्य कर्म स्मरन् ॥ १३ ॥ यो ब्रह्महा ब्राह्मणं हतवान् विशेषतश्च गुरुं मम च भ्रातरं स भवानग्रतः समवस्थितः ॥ एतद् दिष्ट्या भ
द्रं जातं दिष्ट्येत्यस्य यमानंदार्थे हे असत्तम मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन त्वया निमित्तभूतेन अद्य चिराद
व भ्रातुरनृणो हं स्यां एतच्च दिष्ट्या १४ स्वर्गकामो यो भवान् अवृश्चत् ॥ स्वर्गकामो याज्ञिकः पशोरिवेति ना १५ श्रीराम ॥

819
1931

तं त्वा मस्पृष्टवह्निं अदं तु देहं समदंति ॥ वर्तमानसामीप्ये वर्तमानवन्निर्देशः १६ अन्ये पि येन्न ह्यादृत्वान्नोनृशंसमनुमन्य
मुद्यतास्त्राः संतो यदि प्रहरंति तैर्भूतनायान् भैरवादीन् यक्ष्मामि कथंभूतैः निशातं तीक्ष्णं रुतं यन्मम त्रिशूलं तेन निर्भिन्नो गलो
येषां तैः १७ अथो अथवा हरे भो इंद्र यदि भवानेव मम शिरो हर्ता हरिष्यति तत्र तथा सति अनृणो विमुक्तकर्मबंधः सन् तेभ्यो वह्निं
देहेन विधाय मनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि १८ जीवितादपि मृत्युरेव ममाभिमत इत्याशयेनाह ॥ सुरेशेति ॥

ईशश्रीर्द्याकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यं ॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदंति गृध्राः
१६ अन्ये तु ये त्वेह नृशंसमज्ञा यद्युद्यतास्त्राः प्रहरंति मह्यं ॥ तैर्भूतनाथान् सगणान् निशातत्रिशूलनिर्भिन्नगलैर्य
जामि १७ अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह ॥ तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः
प्रपत्स्ये १८ सुरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघं ॥ मा संशयिष्ठा न गदेव वज्रं स्यान्निःफलं
कृपणार्थेव याञ्चा १९ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचस्तपसा च तेजितः ॥ तेनैव शत्रुं जहि विष्णुयंत्रितो यतो
हरिर्विजयः श्रीर्गुणास्ततः २० अहं समाधाय मनो यथाह नः संकर्षणस्तच्चरणारविंदे ॥ त्वद्वज्ररंहोलुलितग्राम्य
पाशो गतिं मुनेर्याम्यपविद्धलोकः २१ श्रीराम ॥ ॥

नहि नो षिन हि क्षिपसि गदेव विफलो यास्यतीति संशयं मा कार्षीः कृपणार्थः प्रयोजनं यस्याः सा याञ्चा यथा निःफला तथा न
स्यात् १९ अमोघत्वे हेतुं वदंवदं स्तं प्रोत्साहयति नन्विति ॥ तेजितस्तीक्ष्णीकृतः ॥ मत्वं मां जहि विष्णुना यंत्रितः प्रेरितः २० हनने
न मम पीडा स्यादित्यपि मा संशयिष्ठा इत्याह ॥ अहमिति ॥ संकर्षणो मत्प्रति यथाह तथा तदीय चरणारविंदे मनः समाधाय मु
नियोगिनो गतिमहं यास्यामि तव वज्रस्य रंहसा लुलितः छिन्नो ग्राम्यपशो विषयभोगलक्षणो यस्य अपविद्धलोकः त्यक्तदेहः २१

तर्हि भगवान् संकर्षणः स्वभृत्याय मह्यमेव सः स्वर्गादिसंपदो दास्यतीत्यपि मा संशयिष्ठा इत्याह ॥ पुंसामिति ॥ स्वर्गे भूमौ रसातले च याः संपदस्ताः किल निश्चितं न राति न ददाति ॥ तत्र हेतुः यत् याभ्यः द्वेषादयो भवंति २२ तर्हि स्वभक्तस्य किं विधत्ते तत्राह त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते ततः तत् आयासो परमात् अनुमेयः न तु ऐश्वर्यादिना ॥ अतः सम्यक् भगवत्प्रसादाभावात्तव संपदो भविष्यंतीति भावः २३ एवमिंद्राय स्वाभिप्रायं निवेद्य प्रार्थयते अहमिति ॥ तव पादावेव एकं मूलमाश्रयो येषां तेषां दासाना मनुदासः ॥ भूयो भविताऽस्मि भविष्यामि भवेयं ॥ असुपतेः प्राणनाथस्य तव गुणान् मम मनः स्मरतु

पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां ॥ न राति यत् द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः २२ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ॥ ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः २३ अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः २४ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे २५ अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविंदाक्ष दिदृक्षते त्वां २६ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् २७ इति श्रीभागवते महापुराणे षष्ठस्कंधे एकादशोऽध्यायः ११

वाग् अपि तान् एव कीर्तयतु काय स्तवैव कर्म करोतु २४ ननु किं दास्येन तुभ्यं महाफलानि दास्यामि तत्राह ॥ नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च हे समंजस निखिलसौभाग्यधे त्वां विरहय्य पृथक्कृत्य न कांक्षे नेच्छामीति ॥ २५ ॥ तर्हि किमिच्छसि तदाह ॥ अजातपक्षाः खगाः मूकादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धाः बाल वत्साः स्तन्यं यथा च ॥ व्युषितं दूरदेशे गतं प्रियं कामेन विषण्णा प्रिया तथा मम मनः तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः २६ उत्तमश्लोकस्य तव जनेषु भक्तेष्वेव सख्यं भूयात् ॥ त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोऽपि तेष्वासक्तिर्न भूयात् २७ इति षष्ठे एकादशः ११

821
1981

द्वादशे तु विषण्णेन स्वयमुत्साहितेन तु ॥ महेंद्रेण महायुद्धे वृत्रस्य वधईर्यते १ महापुरुषं श्रीविष्णुं अभ्युक्रमे उदके १ युद्धादरोऽति विषण्णेन स्वयमुत्साहितेन तु ॥ महेंद्रेण महायुद्धे वृत्रस्य वध ईर्यते १ महापुरुषं श्रीविष्णुं अभ्युपक्रमे उदर्के १ युगांताग्निवत् कठोरा जिह्वा शिखा यस्य तत् आविध्य भ्रामयित्वा ततः खं आयतन् आगच्छत् विचलत् परिभ्रमत् ग्रहः अभ्र उल्का च यथा २ हनोः कपोलप्रांतं अमरैः भ्रमे रावनं च ४ लक्षं तद्वत् दुःप्रेक्ष्यं शतपर्वाणि यस्य तेन उरगराजो वासुकिः तस्य भोगाद् देहस्तदाकारं २ हनोः कपोलप्रांतं अमरैर्भ्रमे रावनं च ४ कृतं तद्वत् दुःप्रेक्ष्यं शतपर्वाणि यस्य तेन उरगराजो वासुकिः एकत्र कुत्रचित् नैव यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव किंतु कस्मै पुनश्च तमाह वृत्रः हे हरे इंद्र सदा जयो नैव किंतु कुत्र विजयः एकत्र कुत्रचित् नैव यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव किंतु कस्मै

ऋषिरुवाच ॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोऽप्सु १ ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेंद्रः ॥ क्षिप्त्वा महेंद्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद २ ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगं ३ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रं ॥ हनौ तताडेंद्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ४ वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हा हेति विचुक्रुशुर्भृशं ५ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसंनिधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ६ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनां ॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनं ७ लोकाः सपाला यस्येमे श्वसंति विवशा वशे ॥ द्विजा इव शिचा बद्धाः स कालो इह कारणं ८ ओजः सहो बलं प्राणममृतं मृत्युमेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडं ९

कदाचिदेवेत्यर्थः ५ ॥ ६ ॥ परो देह आत्मा येषां पराधीनात्मना भिन्निवा ॥ आद्यमनादि सनातनं नित्यं ७ पराधीनतामेवाह ॥ लोका इति सप्तभिः ॥ यस्य वशे स्थिताः स्वयं विवशाः संतः श्वसंति चेष्टंते द्विजाः पक्षिणः शिचाजालेन कलयतीति भगवानिह जनादौ कारणं ८ ओजसादिरूपं कालं तं हेतुमज्ञाय जडं संतमात्मानं देहं हेतुं मन्यंते ९ श्रीगोपालकृष्ण ॥ ॥ ॥७॥

ननुस्वारंभकप्रधानपुरुषादितंत्रीणितियुक्तंतत्राहपुरुषइति॥व्यक्तंमहत्तत्वंआत्माअहंकारः ११ ननुस्वकर्मद्वाराजीवएव
सृष्ट्यादिहेतुरितिमिमांसकामन्यंतेतत्राह॥एवमविद्वान्अनीशमेवात्मानमीश्वरंस्वतंत्रंमन्यते॥ननुपित्रादयःस्रष्टारोदृ
श्यंतेव्याघ्रादयस्तु्हर्तारस्तत्राह॥भूतैरिति स्वयंईश्वरः १२ ननुत्वयापराजितस्यममजयादिशंकैवनास्तिकिंमितिमांबलात्
युद्धेप्रवर्तयसितत्राह॥आयुरिति॥तत्कालेजयादिकालेविपर्ययाः॥आयुःकीर्त्यादयः १३ यस्मादिदंसर्वमीश्वराधीनंतस्मा

यथादारुमयीनारीयथायंत्रमयोमृगः॥एवंभूतानिमघवन्ईशतंत्राणिविद्धिभोः १० पुरुषःप्रकृतिर्व्यक्तमा
त्माभूतेंद्रियाशयाः॥शक्नुवंत्यस्यसर्गादौनविनायदनुग्रहात् ११ अविद्वानेवमात्मानंमन्यतेनीशमीश्वरं॥भू
तैःसृजतिभूतानिग्रसतेतानितैःस्वयं १२ आयुःश्रीःकीर्तिरैश्वर्यमाशिषःपुरुषस्ययाः॥भवंत्येवहितत्कालेयथा
निच्छोर्विपर्ययाः १३ तस्मादकीर्तियशसोर्जयापजययोरपि॥समःस्यात्सुखदुःखाभ्यांमृत्युजीवितयोस्त
था १४ सत्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः॥तत्रसाक्षिणमात्मानंयोवेदासनबध्यते १५ पश्यमांनिर्जितंश
त्रुवृक्णायुधभुजंमृधे॥घटमानंयथाशक्तितवप्राणजिहीर्षया १६ प्राणग्लहोयंसमरइष्वक्षोवाहनासनः॥
अत्रनज्ञायतेमुष्यजयोमुष्यपराजयः १७ श्रीशुकउवाच॥इंद्रोवृत्रवचःश्रुत्वागतालीकमपूजयत्॥गृहीतव
ज्रःप्रहसंस्तमाहगतविस्मयः १८ अहोदानवसिद्धोसियस्यतेमतिरीदृशी॥भक्तःसर्वात्मनात्मानंसुहृदंजग
दीश्वरं १९

त्समस्याद्धर्षविषादहीनोभवेत् १४ समदृशावुपायमाह॥सत्वमिति॥हर्षादिभिर्नबध्यते १५ हर्षविषादनिवृत्त्येतवाहमेवगु
रुरित्याहपश्येति॥वृक्णमायुधंभुजश्चयस्य १६ अनियतत्वंद्यूतरूपकेणोपसंहरति॥प्राणाएवग्लहःपणोयस्मिन्॥इष
वएवाक्षाःयस्मिन्वाहनान्येवहस्त्यादीनिततस्तत्रात्ममानानिआसनानिफलकायस्मिन् १७ गतालीकंनिःकपटं १८ भक्तः
सेवितवानसि १९ श्रीराम

523
1981

युधांसंयामाणांपतीमुख्यौ॥मारीषश्रेष्ठराजन् २४
२०॥२१॥२२॥नस्यतवस्वातकोदकैःगर्तादिजलोपमैःस्वर्गादिभिःकिं २३ कृत्वाधरामित्यादेर्जग्रासेतितृतीयेनान्वयः॥नभोवद्गंभीरेणवक्त्रेण
२५ उत्कृत्तंमूलंययोस्ताभ्यांरक्तंस्रवतीतितथा गोत्रःपर्वतः २६ कृत्वाधरामित्यादेर्जग्रासेतितृतीयेनान्वयः अतिमात्रअत्युच्छ्रितोमहान्कायोयस्य॥आक्षिपन्चा
लेलिहःसर्पःतद्वत्उल्बणयाजिह्वया २७ कालकल्पाभिः मृत्युतुल्याभिः अतिमात्रअत्युच्छ्रितोमहान्कायोयस्य॥आक्षिपन्चा

खल्विदंमहदाश्चर्यंयद्रजःप्र
भवानतात्कृष्णीमायांवैष्णवींजनमोहिनीं॥यद्विहायासुरंभावंमहापुरुषतांगतः २० खल्विदंमहदाश्चर्यंयद्रजःप्र
कृतेस्तव॥वासुदेवेभगवतिसत्वात्मनिदृढामतिः २१ यस्यभक्तिर्भगवतिहरौनिःश्रेयसेश्वरे॥विक्रीडतोमहांभो
धौकिंक्षुद्रैःखातकोदकैः २२ श्रीशुकउवाच॥इतिब्रुवाणावन्योन्यंधर्मजिज्ञासयानृप॥युयुधातेमहावीर्याविंद्रवृ
त्रौयुधांपती २३ आविध्यपरिघंवृत्रःकार्ष्णायसमरिंदम॥इंद्रायप्राहिणोत्घोरंवामहस्तेनमारिष २४ सतु
वृत्रस्यपरिघंकरंचकरभोपमं॥चिच्छेदयुगपद्देवोवज्रेणशतपर्वणा २५ दोर्भ्यामुत्कृत्तमूलाभ्यांबभौरक्तस्र
वोसुरः॥छिन्नपक्षोयथागोत्रःखात्भ्रष्टोवज्रिणाहतः २६ कृत्वाधरांहनुंभूमौदैत्योदिव्युत्तरांहनुं॥नभोगंभी
रवक्त्रेणलेलिहोल्बणजिह्वया २७ दंष्ट्राभिःकालकल्पाभिर्ग्रसन्निवजगत्त्रयं॥अतिमात्रमहाकायआक्षिपंस्तर
सागिरीन् २८ गिरिराट्पादचारीवपद्भ्यांनिर्जरयन्महीं॥जग्रासससमासाद्यवज्रिणंसहवाहनं २९ महाप्राणोम
हावीर्योमहासर्पइवद्विपं॥वृत्रग्रस्तंतमालक्ष्यसप्रजापतयःसुराः ३० हाकष्टमितिनिर्विण्णाश्चुक्रुशुःसमहर्षयः॥
निगीर्णोप्यसुरेंद्रेणनममारोदरंगतः ३१ महापुरुषसन्नद्धोयोगमायाबलेनच॥भित्वावज्रेणतत्कुक्षिंनिष्क्रम्यब
लभिद्विभुः ३२

लयन् २८ निर्जरयन्॥चूर्णयन् २९ महाप्राणोमहाबलोमहावीर्योमहाप्रभावः ३० महापुरुषेणकवचरूपश्रीनारायणेनसन्न
द्धोदंशितः ३१ योगबलेनमायाबलेनचबलभितइंद्रः ३२ श्रीनारायण श्रीराम श्रीगोपालकृष्ण॥ ॥

भागवत ३६ उच्चकर्तचिच्छेद ॥ तस्य कंधरां ॥ आशुवेगः प्रतिवेगवान् ॥ ज्योतिषां ॥ सूर्यादीनां अयने दक्षिणोत्तरगतिरूपे संवत्सरे यो अहर्गणः ५०
षष्ठ्युत्तरशतत्रयात्मकः ॥ तावताहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्यकाले न्यपातयत् ॥ यद्वा स्वार्थे तद्धितः ॥ वृत्रहत्यायां वृत्रहननार्थं
सपरिवर्तमान इत्यर्थः ३३ वार्त्रघ्नलिंगैर्मंत्रैर्वृत्रहंतुर्वीर्यप्रकाशकैः ॥ वार्त्रहत्याय शवसे पृतनाषाह्याय चेत्यादिभिस्तमिंद्रमभिष्टुवा
नाः अभिष्टुवंतः ३४ अलोकं लोकातीतं भगवंतं ३५ इतिश्रीभागवते महापुराणे षष्ठस्कंधे टीकायां द्वादशोध्यायः १२ त्रयोदशे तु

उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा ॥ वज्रेण कृत्तकंधरमाशुवेगः कृततस्मंतात्परिवर्तमानः ॥ न्यपातयत्ताव
दहर्गणेन योज्योतिषामयने वार्त्रहत्ये ३३ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैः
स्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ३४ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानाम
लोकं समपद्यत ३५ इतिश्रीभागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम द्वादशोध्यायः १२ श्रीशुक उवाच ॥ वृ
त्रे हते त्रयो लोका विना शक्रेण भूरिद ॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः १ देवर्षिपितृभूतानि दैत्या देवानु
गाः स्वयं ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः २ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥
येनासन्सुखिनो देवा हरेर्दुःखं कुतो भवत् ३ शुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ॥ तद्वधाया
र्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात् ४

वृत्रस्य ब्रह्महत्या महाभयात् ॥ चिरं न शोभितः शक्रो विष्णुनेति निरूप्यते १ अनिर्वृतं शक्रमपश्यन्नास्वयमेव प्रतिजग्मुः १ ॥ २ ॥ ३ ॥ त श्रीः
स्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह ॥ वृत्रविक्रमेत्यादिना ॥ अर्थयन् प्रार्थयंत बृहद्वधात् ब्राह्मणवधाद्भीतः सन् ४ राम ३६

825
1981

एनः पापं विभक्तं विभज्य गृहीतं ॥ मा डिमी शोधयामी ५ वृषाकपिं इंद्रं १० तयां देवादिभिः का इत्यपास्मि त्यवधारणे इंद्र एवता
पमसहत् नान्यः अमुमिंद्रं निर्वृत्तिनीविशत् ॥ न नु धैर्यादिगुणयुक्तस्य कुतो निर्वृत्तिः तत्राह ह्रीमंतं वाच्यतां निंद्यतां ११ यक्ष्मग्र
स्तां यक्ष्यरोगव्याप्तां १२ मीनस्येव गंधो यस्य स मीनगंधिः स चासावसृक्श्वभ्वासवायुः तस्य गंधेन १३ प्रागुदीच्यां दिशं गतः सन तू

इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहं ५ श्रीशुक उवाच ॥
ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ६ हयमेधेन पुरुषं परमात्मा
नमीश्वरं ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेपि जगद्वधात् ७ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् ॥ श्वादः पु
ल्कसको वापि शुद्ध्येरन्यस्य कीर्तनात् ८ तमश्वमेधेन महामखेन श्रद्धान्वितोस्माभिरनुष्ठितेन ॥ हत्वापि सब्रह्म
चराचरं त्वं न लिप्यसे किं खलनिग्रहेण ९ शुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं ॥ ब्रह्महत्या हते त
स्मिन्नाससाद वृषाकपिं १० तयेंद्रः स्मासहत्तापं निर्वृत्तिर्नामुपाविशत् ॥ ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो
गुणाः ११ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीं ॥ जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां १२ विकीर्य पलि
तान्केशांस्तिष्ठतिष्ठेति भाषिणीं ॥ मीनगंधासुगंधेन कुर्वतीं मार्गदूषणं १३ नभो गतो दिशः सर्वाः सहस्राक्षो
विशांपते ॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं १४ स आवसत्पुष्करनालतंतूनलब्धभोगो यदिहाग्नि
दूतः ॥ वर्षाणि साहस्रमलक्षितोंतः संचिंतयन्ब्रह्मवधाद्विमोक्षणं १५ श्रीगोपालकृष्ण ॥ ॥ ७ ॥ ॥

तूर्णं मानसं सरः प्रविष्टः १४ स इंद्रः सहस्रं वर्षाणि पुष्करनालस्य तंतून् आवसत् ॥ कथंभूतः नलब्धो भोगो येन सः कुतः यद्यस्मात्
इह जले वसन् अग्निदूतश्च स्वयं अग्नेः स्वदूतस्य हविर्भागात् तेन जले प्रवेशासंभवादलब्धभोग इत्यर्थः ॥ अलब्धभाग इति पाठांत
रे नलब्धो यज्ञभागो येन सः १५ राम

त्रिनाकं नभकंदुःखं यस्मिन् इति नाकः पुण्यश्लोकः तृतीयं नार्हिस्वर्गं ॥ ननु मनुष्यस्य कुतः स्वर्गराज्यं तत्राह ॥ विद्यादिभिरनुभवः स्वर्ग
पाळन सामर्थ्यं यस्य सः ॥ तर्हि तस्मिन्सति कथमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह ॥ सनहुषः संपदैश्वर्यश्रीभ्यां यो मदस्तेनांधा बुद्धिर्यस्य
सः इंद्रपत्न्याशच्या तिरश्चां गतिं सर्पयोनिं नीतः उपायेन प्रापितः एवं त्युपायः ॥ नहुषः किल कदाचित् इंद्राणीमुवाच ॥ इंद्रस्त्वा व
दहं अतस्त्वं मां भजे ति तया चावेद्दि तद्वतां तो ऽहस्पतिस्तमुवाच ब्राह्मणवाह्यशिबिकामारुह्य आगतं त्वां भजिष्यामीति ॥ हि ततो सोऽब्र
ह्मशापात्पतिष्यतीति ॥ तथा च तथोक्तो नहुषो ऽगस्त्यादीन् शिबिकां वाहयामास ॥ तदा च शाप्रं सर्प सर्पत्यगस्त्यं पदा पस्पर्शतेन कु

तावत्त्रिनाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स संपदैश्वर्यमदांदबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या
३६ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुप
त्न्या १७ तं च ब्रह्मर्षयो ऽभ्येत्य हयमेधेन भारत ॥ यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह १८ अथेज्यमाने पुरुषे
सर्वदेवमयात्मनि ॥ अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः १९ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ॥ नीतस्ते
नैव शून्याय नीहार इव भानुना २० स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ॥ इष्ट्वाधियज्ञं पुरु
षं पुराणमिंद्रो महानास विधूतपापः २१ इदं महाख्यानमशेषपाप्मनां प्रक्षाळनं तीर्थपदानुकीर्तनं ॥ भक्त्युच्छ्रयं
भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः २२ श्रीराम ॥ श्रीगोपाळकृष्ण ॥ ॥ ॥
पितेनैव सर्पो भवेत्युक्तो महासर्पः अजगरः ॥ अभूदिति १६ ततइंद्रः स्वर्गं गतः प्राप्तः कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहू
तः सन् ऋतंभरः स सपाळको हरिः तस्य ध्यानेन निवारितमघं येन ॥ प्राक् अपि तु पापो ब्रह्मवधस्तमिंद्रं नाभ्यभूत् तस्याभिभवं ना
करोत् ॥ कुतः दिग्देवतया प्रागुदीच्यां दिशि स्थितया श्रीरुद्रेणावितं रक्षितं १७ पुरुषस्य हरेराराधनं यस्मिंस्तेन १८ सर्वदेवम
य आत्मा मूर्तिर्यस्य तस्मिन्वेदमयात्मनीति वा पाठः ॥ ब्रह्मवादिभिर्वितते अनुष्ठिते अश्वमेधे महेंद्रेणेज्यमाने पुरुषे सति १९ ते
नैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः २० अधियज्ञायज्ञायेतनं २१ ॥ २२ ॥ श्रीगजाननप्रसन्न ॥ ॥ ॥

S27
1981

पाठादिविधातुमाख्यानं स्तोतिइदमिति ॥ प्रक्षाल्यंते ऽनेनेति प्रक्षाळनं तीर्थपदस्यानुकीर्तनं यस्मिन् ॥ भक्तेरुच्छ्रयो यस्मिन् भक्त
जनानामनुवर्णनं यस्मिन् ॥ महेंद्रस्य मोक्षो यस्मिन् मरुत्वतो विशेषणं जयो यस्मिन् ॥ इंद्रियं तत्पाटवकरं इंद्रसंबंधीति वा ॥ आ
युष्यं आयुष्यकरं ॥ २३ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधटीकायां त्रयोदशोऽध्यायः १३ ॥ वृतस्य ज्ञानभक्त्यादिश्लाघ

पठेयुराख्यानमिदं सदा बुधाः शृण्वंत्यथो पर्वणि पर्वणींद्रियं ॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्य
यनं तथायुषं ॥ २३ ॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ परि
क्षिदुवाच ॥ रजस्तमः स्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः ॥ नारायणे भगवति कथमासीद्दृढा मतिः ॥ १ ॥ देवानां शुद्ध
सत्वानां ऋषीणां वामलात्मनां ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥ २ ॥ रजोभिः समसंख्याताः पार्थिवैरिह जंत
वः ॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः ३ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मु
च्येत सिध्यति ४ मुक्तानामपि सिद्धानां नारायणपरायण ॥ सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ५ वृत्रस्तु
स कथं पापो सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे ६ अत्र नः संशयो भूयान् श्रोतुं कौतू
हलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ७ सूत उवाच ॥ परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः नि
शम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ८

ष्टः परिक्षिता ॥ हेतुमाह चतुर्भिस्तत् प्राग्जन्मचरितोक्तिभिः ॥ चतुर्दशे तु सहस्राक्षश्रुलब्धे स्तुते मते ॥ चित्रकेतोरनिर्वेदादतिशो
को निरूप्यते ॥ रजश्च तमश्च स्वभावो यस्य १ ॥ २ ॥ भक्तेर्दुर्लभत्वं प्रपंचयति त्रिभिः पार्थिवैः रजोभिः परमाणुभिः समाः संख्याताः अ
नंता इत्यर्थः ॥ जंतवो जीवाः तेषां मध्ये ये केचन कतिपयः श्रेयो धर्मं ईहते कुर्वंति ॥ मुच्यते गृहादिसंसर्गादिमुच्यते ॥ सिध्यति तत्वं जा
नाति ॥ ४ ॥ ५ ॥ ६ ॥ न च भियाकृष्णं शरणं गत इत्याह यः पौरुषेणेति ॥ ७ ॥ ८ ॥ ॥

यथायथावत्शृणु ९ भार्यासहस्राणांदशसहस्राणिकोटिरित्यर्थः॥सांतानिकः स्वयंसंतानार्होपिपुत्रोत्पादनसमर्थोपिताभ्यःसं
ततिंनलेभे १०॥११॥सर्वास्तावंध्याएवंदेवयोगेनमीढिनाद्भुतिभावः॥तदेवाह॥वंध्यापतेरिति १२ उपासीदत्तस्यसमीपं॥उ
पविवेशसमाहितः संयतः १५॥१६॥अपिकिंअनामयमारोग्यंस्वस्तिशुभं॥प्रकृत्यधीनमेवहिराज्यमितिसदृष्टांतमाह॥यथा
महदाद्याभिःसप्तभिःप्रकृतिभिःपुमान्जीवोनित्यंगुप्तोभवति॥नतुतद्व्यतिरेकेणक्षणमपितिष्ठति॥तथाराजापिसप्तभिः स्वाम्य

श्रीशुकउवाच॥शृणुष्वावहितोराजन्नितिहासमिमंयथा॥श्रुतंद्वैपायनमुखान्नारदाद्देवलादपि ९ आसीद्रा
जासार्वभौमः शूरसेनेषुवैनृप॥चित्रकेतुरितिख्यातोयस्यासीत्कामधुङ्मही १० तस्यभार्यासहस्राणांसह
स्राणिदशाभवन्॥सांतानिकश्चापिनृपोनलेभेतासुसंततिं ११ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः॥संप
न्नस्यगुणैःसर्वैःचिंतावंध्यापतेरभूत् १२ नतस्यसंपदःसर्वामहिष्योवामलोचनाः॥सार्वभौमस्यभूश्चेयमभव
न्प्रीतिहेतवः १३ तस्यैकदातुभवनमंगिराभगवानृषिः॥लोकाननुचरन्नेतानुपागच्छद्यदृच्छया १४ तंपूजयि
त्वाविधिवत्प्रत्युत्थानार्हणादिभिः॥कृतातिथ्यमुपासीदत्सुखासीनंसमाहितः १५ महर्षिस्तमुपासीनंप्रश्रया
वनतंक्षितौ॥प्रतिपूज्यमहाराजसमाभाष्येदमब्रवीत् १६ अंगिराउवाच॥अपितेनामयंस्वस्तिप्रकृतीनांत
थात्मनः॥यथाप्रकृतिभिर्गुप्तःपुमान्राजाचसप्तभिः १७ आत्मानंप्रकृतिष्वद्धानिधायश्रेयआप्नुयात्॥राज्ञा
तथाप्रकृतयोनरदेवाहिताधयः १८ श्रीरामकृष्ण॥ ॥

मात्योजनपदादुर्गंद्रविणसंचयाः॥दंडोमित्रंचतस्यैताःसप्तप्रकृतयोमताइत्युक्तलक्षणाभिर्नित्यंगुप्तःसन् १८ आत्मानंप्रकृ
तिष्वद्धासाक्षान्निधायतदनुवर्तिनंकृत्वाश्रेयोराज्यसुखंप्राप्नुयादित्यर्थः॥स्वामीगुरुः॥स्वयंवा॥मंत्रसहायोमित्रं॥कर्मसहायोमा
त्यइतिभेदः॥प्रकृतीनांचसुखंराजाधीनमेवेत्याह॥हेनरदेवतथाप्रकृतयोपिराज्ञाआहिताधयः निहितासया॥स्वधनैःसमृद्धाभ
वंति॥आहिताधयइति॥पाठांतरेअसमंततोहिताधयोनिरस्तमनोदुःखाभवंतीत्यर्थः १८ श्रीकेशव॥ ॥ ॥

523
1331

प्रजाश्चअमात्यश्चश्रेण्यश्चसमयेविशेषेणसंघशोवर्तमानावणिक्प्रभृतयः पौराःपुरवासिनः॥जानपदाःतत्तद्देशाधिकारिणः
१९ तवमनश्चवशंवानवेत्यर्थापृच्छति॥यस्यात्मामनःअनुवशःअनुवर्त्तीअधीनःस्यात्तस्यवशगाइमेसर्वेभवंति किंच॥लोका
श्चतस्यबलिंयच्छंति २० आत्माभवान्आत्मनोनप्रीयतेनतुष्यति॥तत्किंपरतोवास्वतोवाअलब्धकामंत्वांलक्षये २१ विदुषाम

अपिदाराःप्रजामात्याभृत्याःश्रेण्योथमंत्रिणः॥पौराजानपदाभूपाआत्मजावशवर्तिनः १९ यस्यात्मानुवशश्चे
त्स्यात्सर्वेतद्वशगाइमे॥लोकाःसपालायच्छंतिसर्वेबलिमतंद्रिताः २० आत्मनःप्रीयतेनात्मापरतःस्वतएवच॥लक्ष
येलब्धकामंत्वांचिंतयाशबलंमुखं २१ एवंविकल्पितोराजन्विदुषामुनिनापिसः॥प्रश्रयावनतोभ्याहप्रजाकामः
स्ततोमुनिं २२ चित्रकेतुरुवाच॥भगवन्किंनविदितंतपोज्ञानसमाधिभिः॥योगिनांध्वस्तपापानांबहिरंतःशरी
रेषु २३ तथापिपृच्छतोब्रूयांब्रह्मन्नात्मनिचिंतितं॥भवतोविदुषश्चापिचोदितस्त्वदनुज्ञया २४ लोकपालैरपिप्रा
र्थ्याःसाम्राज्यैश्वर्यसंपदः॥ननंदयंत्यप्रजंमांक्षुत्तृट्काममिवापरे २५ ततःपाहिमहाभागपूर्वैःसहगतंतमः॥
यथातरेमदुस्तारंप्रजयातद्विधेहिनः २६ श्रीशुकउवाच॥इत्यर्थितःसभगवान्कृपालुर्ब्रह्मणःसुतः॥श्रपयित्वा
चरुंत्वाष्ट्रंत्वष्टारमजयद्विजः २७ ज्येष्ठाश्रेष्ठाचयाराज्ञोमहिषीणांचभारत॥नाम्नाकृतद्युतिस्तस्यैयज्ञोच्छिष्टम
दाद्द्विजः २८ अथाहनृपतिंराजन्भवितैकस्तवात्मजः॥हर्षशोकप्रदस्तुभ्यमितिब्रह्मसुतोययौ २९ श्रीराम॥

र्वज्ञेनापि २२ अलब्धकामत्वंकथयन्पुत्रंयाचते॥भगवन्नितिचतुर्भिः॥अप्रजमपुत्रंक्षुत्तृड्भ्यांअन्नपानकामंअपरेस्रक्चंदना
दयोयथानसुखयंति २५ पूर्वैःपित्रादिभिःसहगतंप्राप्तंतमःनरकंप्रजयायथातरेमतथाविधेहि २६॥२७॥यज्ञोच्छिष्टमन्नं
शेषं २८ जन्मनाहर्षमरणेनशोकंप्रददातीतितथा॥इतिएवमुक्त्वाययौ २९ श्रीगोपालकृष्ण॥ ॥ छ॥

शूरसेनामीशस्यतेजसावीर्येणयोगर्भःसवर्दे ३१ जातकंजातकर्म ३२॥३३ अर्बुदंदशकोटयः वेदेतुकोटिरेवार्बुदंनियुतंच अर्बुदंचेतिप्रसुतानंतरनिर्देशात् ३४ धन्यंधनकरंआयुष्यंआयुष्करंमोहस्यसमुद्भवोयस्मिन्प्रजाकामरूपोज्वरस्तापः ३५ दार इत्येकवचनमार्षं ३८ आनपत्येनअपुत्रत्वनिमित्तेन ३९ नगृहेसंमतांनबहुमतां॥यद्वागृहिणीवद्गृहंनभार्येतिसंम

साप्यितस्माशनादेवचित्रकेतोरधारयत्॥गर्भंकृतद्युतिर्देवीकृत्तिकाग्नेरिवात्मजं ३० तस्याअनुदिनंगर्भःशुक्लपक्षइवोडुपः॥ववृधेशूरसेनेशतेजसाशनकैर्नृप ३१ अथकालउपावृत्तेकुमारःसमजायत॥जनयन्शूरसेनानांशृण्वतांपरमांमुदं ३२ हृष्टोराजाकुमारस्यस्नातःशुचिरलंकृतः॥वाचयित्वाशिषोविप्रैःकारयामासजातकं ३३ तेभ्योहिरण्यंरजतंवासांस्याभरणानिच॥ग्रामान्हयान्गजान्प्रादात्धेनूनामर्बुदानिषट् ३४ ववर्षकामानन्येषांपर्जन्यइवदेहिनां॥धन्यंयशस्यमायुष्यंकुमारस्यमहामनाः ३५ कृच्छ्रलब्धेथराजर्षेस्तनयेनुदिनंपितुः॥यथानिःस्वस्यकृच्छ्राप्तेधनेस्नेहोन्ववर्धत ३६ मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः॥कृतद्युतेःसपत्नीनांप्रजाकामज्वरोभवत् ३७ चित्रकेतोरतिप्रीतिर्यथादारेप्रजावति॥नतथान्येषुसंजज्ञेबालंलालयतोन्वहं ३८ ताःपर्यतप्यन्नात्मानंगर्हयंत्योभ्यसूयया॥आनपत्येनदुःखेनराज्ञोनादरणेनच ३९ धिगप्रजांस्त्रियंपापांपत्युश्चागृहसंमतां॥सुप्रजाभिःसपत्नीभिःदासीमिवतिरस्कृतां ४० दासीनांकोनुसंतापःस्वामिनःपरिचर्यया॥अभीक्ष्णंलब्धमानानांदास्यादासीवदुर्भगाः ४१ एवंसंदह्यमानानांसपत्न्याःपुत्रसंपदा॥राज्ञोसंमतवृत्तीनांविद्वेषोबलवानभूत् ४२ विद्वेषनष्टमतयस्त्रियोदारुणचेतसः॥गरंददुःकुमारायदुर्मर्षानृपतिंप्रति ४३ श्रीरामकृष्णभगवान्॥ ॥

तामित्यर्थः ४० दास्यादासीयथातथावयंदुर्भगाः ४१ नसमंतावृत्तिर्जीवनंयासां ४२ विद्वेषेणनष्टामतिर्यासांतागरंविषंदुर्मर्षा असहनाः ४३

831
1381

धात्रीस्तनदायिनी ४५ उद्गतेतारकेकनीनिकेययोस्तेलोचनेयस्यतं ४६ विभ्रष्टाःशिरोरुहाःअंबरंचयस्याः साताश्चसपत्न्योपि अलक्षितःअंतकःमृत्युर्हेतुर्यस्यतं ४९ अनुगताःप्रकृतयोमात्यादयोयस्यसोनुप्रकृतिः ५० बाष्पकलाभिःअश्रुबिंदुभिरुपरोधतः संवृतत्वेननिरुद्धःकंठोयस्य॥उरुशुचार्पितं॥बहुशोकेनव्याप्तं॥एकमेवसंततिरूपं ५१ विगलंत्यःस्रजोयेभ्यस्तान्केशान् ५२ आत्म

कृतद्युतिरजानंतीसपत्नीनामघंमहत्॥सुप्तएवेतिसंचिन्त्यनिरीक्ष्यव्यचरद्गृहे ४४ शयानंसुचिरंबालमुपधार्यमनीषिणी॥पुत्रमानयमेभद्रेइतिधात्रीमचोदयत् ४५ साशयानमुपव्रज्यदृष्ट्वाचोत्तारलोचनं॥प्राणेंद्रियात्मभिस्त्यक्तंहतास्मीत्यपतद्भुवि ४६ तस्यास्तदाकर्ण्यभृशातुरंस्वरंघ्नंत्याःकराभ्यामुरमुच्चकैरपि॥प्रविश्यराज्ञीत्वरयात्मजांतिकंददर्शबालंसहसामृतंसुतं ४७ पपातभूमौपरिवृद्धयाशुचामुमोहविभ्रष्टशिरोरुहांबरा॥ततोनृपांतःपुरवर्तिनोजनानराश्चनार्यश्चनिशम्यरोदनं ४८ आगत्यतुल्यव्यसनाःसुदुःखितास्ताश्चव्यलीकंरुरुदुःकृतागसः॥श्रुत्वामृतंपुत्रमलक्षितांतकंविनष्टदृष्टिःप्रपतन्स्खलन्पथि ४९ स्नेहानुबंधैधितयाशुचाशंविमूर्छितोनुप्रकृतिर्द्विजैर्वृतः॥पपातबालस्यसपादमूलेमृतस्यविस्रस्तशिरोरुहांबरः ५० दीर्घंश्वसन्बाष्पकलोपरोधतोनिरुद्धकंठोनशशाकभाषितुं॥पत्नींनिरीक्ष्योरुशुचार्पितंतदामृतंचबालंसुतमेकसंततिं ५१ जनस्यराज्ञःप्रकृतेश्चहृद्रुजंसतीदधानाविललापचित्रधा॥स्तनद्वयंकुंकुमगंधमंडितंनिषिंचतीसांजनबाष्पबिंदुभिः ५२ विकीर्यकेशान्विगलत्स्रजःसुतंसुशोचचित्रंकुररीवसुस्वरं ५२ अहोविधातस्त्वमतीवबालिशोयस्त्वात्मसृष्ट्यप्रतिरूपमीहसे॥परेनुजीवत्यपरस्ययामृतिर्विपर्ययश्चेत्त्वमसिध्रुवःपरः ५३

सृष्टेरप्रतिरूपंचेष्टसेतदेवाह॥नुअहोपरेवृद्धेजीवतिअपरस्यबालस्ययामृतिस्तत्॥गतदाहिकदृस्यसृष्टिसामर्थ्याभावेबालेचमृतेससृष्टेरप्रतिरूपंचेष्टसेतदेवाह...

ननुजीवः कर्मानुसारेण जन्मादिकुर्वतो मम कोपराधस्तत्राह ॥ नीति ॥ पुत्रो जीवति एव पिता म्रियते पिता रोजीवत्येव पुत्रो जायत इति क्र
मो नास्ति कर्माधीनत्वादिति चेत् ॥ तर्ह्यात्मकर्मभिरेव नजन्मादिक्रमोस्तु किं त्वया कृत्यं ॥ ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं
सिध्येत् भवतु नाम तथापि निजसर्गवृद्धये तत्वया यः स्नेहपाशः कृतः स्तमिमं स्वयमेव विसृश्वसि श्विनत्सीत्यादिकोशति ॥ नत्येवं
विधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्यतीति भावः ५४ अप्रजदुस्तरं अप्रजानां दुस्तरं अकरुणेन सह ५५ अशनया

न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं
विवृश्वसि ५४ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं ॥ अंजस्तरेम भवताप्रजदुस्तरं
यत् ध्वांतं न याह्यकरुणेन यमेन दूरं ५५ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं ॥ सु
सुप्तश्चिरं ह्यशनया च भवान् परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां ५६ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मि
तं मुदितवीक्षणमाननाब्जं ॥ किं वा गतस्य पुनरत्वयमन्यलोकं नीतोघृणेन न शृणोमि कला गिरस्ते ५७ श्रीशुक उ
वाच ॥ विलपंत्या मृतं पुत्रमिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ५८ तयोर्विलपतोः सर्वे
दंपत्योस्तदनुव्रताः ॥ रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनं ५९ एवं कश्मलमापन्नं नष्टसंज्ञमनायकं ॥ ज्ञात्वांगिरा
नाम मुनिराजगाम सनारदः ६० इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्दशोऽध्यायः १४ श्रीराम ॥

क्षुधा ५६ तनूज हे पुत्र नाहं प्रथमं तत्पार्श्वमागता सती तव मुग्धस्मितं वक्त्रं ददर्श नदृष्टवत्यस्मि इदानीमपि गिरो न शृणोमि नार्हे
किं पुनरत्वयं पुनरागमनं यथा न भवति तथा गतोसि ६० इति षष्ठे चतुर्दशः १४ ततः पंचदशे चित्रकेतोः शोकापनोदनं ॥ कृ
तं तत्त्वोपदेशेन नारदेनांगिरोयुजा १ श्रीराम ॥

833
1981

मृतकोपांते शवसमीपे १ त्वं चास्य बंधूनां कतमः सृष्टो प्रजा रूपायां अयं पुत्रः अहं चास्य पितेति चेत्तत्राहतुः पुरेति ॥ ये पूर्वजन्मनि पि
त्रादिरूपेण संयुक्ता असन् त एव मरणेन वियुक्ताः संतो वर्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवंति तेजन्मांतरे तस्यैवान्य
स्य वा कलत्रादयः शत्रुमित्रादयो वा भवंति अतो नायं नियम इति भावः २ तमेवाभिप्रायं प्रकटयंतियथेति ॥ स्रोतसः प्रवाहस्य वेगेन
यथा प्रयांति वियुज्यंते तथा कालवेगेन देहिनो जीवा अपि ३ तथाप्येतावंतं कालं मम पुत्रो नाभूत् वार्धके जातो मृत इतीदृः स्वमिति चेत
त्राहतुः यथा धानास्तु बीजेषु धानाः बीजांतराणि भवंति कासूचित् कदाचिन्न भवंति नोत्पद्यंते नश्यंति च न तु भवंत्येवेति च नश्यंत्येवेति वा

ऊचतुर्मृतकोपांते पतितं मृतकोपमं ॥ शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः १ कोयं स्यात्तव राजेंद्र भवान् य
मनुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं २ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः ॥ संयुज्यंते वियु
ज्यंते तथा कालेन देहिनः ३ यथा धानासु वै धाना भवंति न भवंति च ॥ एवं भूतेषु भूतानि चोदितानीशमायया ॥
४ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ॥ जन्ममृत्योर्यथा पश्चात् प्राङ्नैवमधुनापि भो ५ भूतैर्भूतानि भूते
शः सृजत्यवति हंत्यजः ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत् ६ श्रीरामचंद्र

नियमः ॥ एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु अतो धानानां जन्यजनकत्वेपि यथा पितृपुत्रादिभावो नास्ति एवमत्रापि
नियमः ॥ न पुत्र एव शोचनीय इति न शोकः कार्य इति भावः ४ ईशमायया प्रेरितानामेव भवनमभवनं वस्तु तत्त्वस्य च सर्वसाधारणत्वात् ॥ न पुत्र एव शोचनीय इ
त्याहतुः वयं चेति ॥ तुल्यकालाः वर्तमानकालीनाः जन्मनः प्राक् मृत्योः पश्चाच्च यथा न संति एवमधुनापि न संति भो राजन् आद्यंतयो
रसत्वात्त्वभवदित्यर्थः ५ असत्वे कथं प्रतीतिः कथं वाहमस्य जनक इत्याद्यभिमानस्तत्राहतुः ॥ भूतैरिति ॥ ईश्वरेण मया सृष्टत्वात्
प्रतीतिः निमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः ॥ ननु ईश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेन्न हि अपूर्णकामता प्राप्ता
नास्ति चेत् कुतः प्रवृत्तिस्तत्राहतुः अनपेक्षोपि बालवल्लीलया करोतीति ६ श्रीगोविंद

अयंच जन्मादिव्यवहारो देहानामेव नत्वात्मन इत्याह तुः॥ देहिनः पितुर्देहेन देहिनः पुत्रस्य देहो मातुर्देहिनो देहाद भिजायते॥
यथा बीजादेव बीजं जायते देही तु शाश्वत एव अर्थो भूम्यादिर्यथा तद्वत् ७ ननु नश्वरदेह प्रतियोगित्वात् देह्यपि न शाश्वतः स्या
त् तत्राह तुः॥ देहिनोरयं परस्परप्रतियोगि विभागः पुरा अनादिः अविवेकिकृतः अज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशे

शुक उवाच॥ देहेन देहिनो राजन् देहाद्देहोभिजायते॥ बीजादेव यथा बीजं देह्यर्थ इह शाश्वतः ७ देहिदेह विभा
गोयमविवेककृतः पुरा॥ जाति व्यक्ति विभागोयं यथा वस्तुनि कल्पितः ८ शुक उवाच॥ एवमाश्वासितो रा
जा चित्रकेतुर्द्विजोक्तिभिः॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ९ राजोवाच॥ कौ युवां ज्ञानसंपन्नौ मह्
ष्ठौ च महीयसां॥ अवधूतेन वेषेण गूढाविह समागतौ १० चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः॥ मादृशां
ग्राम्यबुद्धीनां बोधयोन्मत्तलिंगिनः ११ कुमारो नारद ऋभुरंगिरा देवलोसितः॥ अपांतरतमो व्यासो मार्कंडेयोथ गो
तमः १२ वसिष्ठो भगवान् रामः कपिलो बादरायणिः॥ दुर्वासा याज्ञवल्क्यश्च जातुकर्ण्यस्तथारुणिः १३ रोमश
श्च्यवनो दत्त आसुरिः सपतंजलिः॥ ऋषिर्वेदशिरा बोध्यो मुनिः पंचशिखस्तथा १४ हिरण्यनाभः कौशल्यः श्रु
तदेव ऋतध्वजः॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः १५ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू॥ अंधे तम
सि मग्नस्य ज्ञानदीप उदीर्यतां १६ अंगिरा उवाच॥ अहं ते पुत्रकामस्य पुत्रदोस्म्यंगिरा नृप॥ एष ब्रह्मसुतः सा
क्षान्नारदो भगवानृषिः १७ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे॥ अतदर्हमनुस्मृत्य महापुरुषगोचरं १८

षः तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धित्वेनानिरूप्यत्वात्॥ तद्वत्॥ आधिना म्लानं वक्त्रं ९ उन्मत्तस्येव
लिंगं येषां ते ११ मम प्रभू रक्षकौ बोधे समर्थौ वा॥ अतो युवाभ्यां ज्ञानदीपः प्रवर्त्यतां १६॥ १७ महापुरुषगोचरं त्वां हरि
भक्तं १८ श्रीराम

835
1381

तदेव यदा पूर्वमागतोस्मि २० रायः अर्थाः २१ चलाः अनित्याः किंच महीति २२ हे शूरसेन इमे सर्वेपि शोकादिप्रदाः किंच॥
आगमापायित्वेन गंधर्वनगरतुल्याः गंधर्वनगरं त्वकस्मादेव क्वचिदायाति चापयाति चेति प्रसिद्धं॥ तदेवमनित्यत्वं शोकादिहेतुत्वं चा
गमापायित्वं चोक्तं मिथ्यात्वमप्याह स्वप्नश्च माया च मनोरथश्च यथा तद्वत् मनोमात्रविजृंभिताः २३ अत्र हेतुः॥ अर्थेन तात्त्विकस्वरू
पेण विनैव दृश्यमानाः तत्कुतः यस्मात् तत्क्षणांतरे न दृश्यंते तात्त्विकत्वे हि क्षणांतरे बाधो न स्यात् यतो मनोमात्रविजृंभितत्वेन स्वप्नादिव
न्मिथ्याभूता इत्यर्थः ननु नैते पुण्यापुण्यकृता इति मीमांसकाः॥ प्राहुः तत्कितो मनोभवत्वं तत्राह॥ कर्मभिः कर्मवासनाभिः अर्थान् ध्यायतः

अनुग्रहाय भवतः प्राप्तावावामिह प्रभो॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति १९ तदैव ते परं ज्ञानं ददामि
गृहमागतः॥ ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददाम्यहं २० अधुना पुत्रिणां तापो भवतैवानुभूयते॥ एवं दारा गृहा रायो
विविधैश्वर्यसंपदः २१ शब्दादयश्च विषयाश्चला राजविभूतयः॥ मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः २२
सर्वेपि शूरसेनेमे शोकमोहभयार्तिदाः॥ गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः २३ दृश्यमाना विनार्थेन न दृश्यंते
मनोभवाः॥ कर्मभिर्ध्यायतो नानाकर्माणि मनसोभवन् २४ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः॥ देहिनो वि
विधक्लेशसंतापकृदुदाहृतः २५ तस्मात् स्वस्थेन मनसा विमृश्य गतिमात्मनः॥ द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश॥
२६

पुंसो मनस एवानभिव्यक्तकर्मण्य भवन् पागंतरे कर्मदृष्टिमभिध्यायत इत्यर्थः॥ कर्माण्यपि मनसो भवंति तत्साध्या अर्था अपि मनो
भवा एवेति भावः २४ तदेवं ममतास्पदानां दुःखादिहेतुत्वमुक्तं॥ तत्र देहसंबंधो मूलमित्याह॥ अयं हीति॥ हीत्यवधारणे॥ अयं द्र
व्यज्ञानक्रियात्मकः॥ आधिभूताधिदैवाध्यात्मरूपो देह एव देहिनः देहोहमिति मन्यमानस्य देहिनो जीवस्य विविधान् क्लेशान् संतापा
ंश्च करोतीति तथा २५ स्वस्थेनाव्यग्रेण गतिं तत्त्वं ध्रुवोयमर्थ इति विश्रंभं विश्वासं प्रणयं वा त्यज॥ ततश्च उपशममाविश आश्रय २६

अंगिरसोपदिष्टं तत्त्वं परमेश्वरं प्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति एतामिति ॥ उपनिषदं परं श्रेयो
स्मामित्युपनिषत् मंत्र एवोपनिषत् तां प्रतीच्छ गृहाण ॥ द्रष्टा द्रक्ष्यसि भवान् २७ अतुलं च तदनधिकं च समानाधिकशून्यं परं महि
मानं प्रापुः ॥ उपेति उपैष्यति २८ इति षष्ठे पंचदशः १५ षोडशे तत्कृतौ स्वैव विशोकीकृत्य तं परं ॥ आदिदेश महाविद्यां नारदो
शेषतोषणीं १ आदौ तावत् तु स्पुत्र मुखेनैव पितृपुत्रादिसंबंधो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन्नित्यादि
वाच ॥ शेषमवशिष्टमायुरस्ति ॥ अपमृत्युना मृतत्वादित्यर्थः ॥ तदेव कलेवरं प्रविश्य स्थितो जीव उवाच ॥ यद्वा अंतराले प्रेतशरीरे स्थि

नारद उवाच ॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन् सप्तरात्रात् द्रष्टा संकर्षणं प्रभुं २७ यत्पादमूलमु
पसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महत्त्वं प्रापुर्भवानपि परं न चिरादुपै
ति २८ ॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चित्रकेतूपाख्याने पंचदशोऽध्यायः १५ ॥ ॥ श्रीशु
क उवाच ॥ अथ देवर्षी राजन् संपरेतं नृपात्मजं ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां १ नारद उवाच ॥ जीवा
त्मन् पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशं २ कलेवरं स्वमाविश्य शेषमायुः
सुहृद्वृतः ॥ भुंक्ष्व भोगान् पितृप्रत्तानधितिष्ठ नृपासनं ३ जीव उवाच ॥ कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभव
न् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ४ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां
भवंति क्रमशो मिथः ५

त्वेति तेयं ३ ॥ ४ ॥ मयि मृते पुत्रे दृष्ट्वा शोकश्चेत् शत्रुदृष्ट्या हर्षः किं न क्रियत इत्याशयेन संबंधस्यानियतत्वमाह ॥ बंधवो विवाहा
दिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्राणि रक्षकाः मध्यस्था उभयव्यतिरिक्ताः विद्विषो द्रव्यादिनिमित्तेन द्वेषिणः
उदासीनास्तद्व्यतिरिक्ता इति भेदः ५ श्रीगजानन

837
1981

कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः यथा पण्यानि क्रयविक्रयाद्यर्हाणि ॥ कनकादीनि व्यवहारकर्तृषु परिभ्रमंति एवं जीवोऽपि योनिषु जनकेषु ॥
६ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वं सदृष्टांतमाह ॥ द्वाभ्यां ॥ नित्यस्य जीवतो पि अर्थस्य पश्वादेः अनित्यः यतः विक्रयादीना
संबंधनिवृत्तेः ७ एवं योनिगतः पित्रादिसंबंधं प्राप्तोऽपि स जीवो नित्यः देहं जन्मादिना तस्य जन्माद्यभावात् ॥ अत एव स तो निरहंकृतः
अनहंकृतः अहमस्य पुत्र इत्यभिमानशून्यः यत्र पित्रादेः संबंधिनि यावदुपलभ्येत कर्मवशेन वर्तेत तावदेव तस्य पित्रादेः तत्तदा स्मिन्
स्वत्वं न तु विक्रयाद्युत्तरकालमपि ॥ अथ चैवं संबंधः ॥ यदुक्तं कलेवरं स्वमाविश्येति तत्र तस्मिन् कलेवरे ममेदानीं स्वत्वं निवृत्तमिति सदृ
ष्टांतमाह ॥ नित्यस्य चिरकालावस्थायिनः स्वर्णादेः योनिगतो देहं प्रविष्टः ॥ यत्र देहे तस्य जीवस्य तस्मिन् देहे स्वत्वं ॥ न तु मरणोत्तर

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ६ नित्यस्यार्थस्य संबंधो ह्यनि
त्यो दृश्यते नृषु ॥ यावद्यस्य हि संबंधो ममत्वं तावदेव हि ७ एवं योनिगतो जीवः स नित्यो निरहंकृतः ॥ यावद्यत्रोप
लभ्येत तावत् स्वत्वं हि तस्य तत् ८ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृ
जते प्रभुः ९

कालमपीत्यर्थः ॥ शेषं समानं ८ जीवस्य नित्यत्वं साधयति ॥ एष नित्यः तत्र हेतुः ॥ अव्ययः अपक्षयशून्यः ॥ तत् कुतः सूक्ष्मः जन्मा
दिशून्यः तच्च कुतः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः ॥ न तु देहादिस्वरूपः यतः स्वदृक् स्वप्रकाशः ॥ सर्वाश्रयत्वमुपपादयति आ
त्ममायागुणैरात्मानमेव विश्वं विश्वात्मकं सृजति ॥ तदात्मानं स्वयमकुरुतेति श्रुतेः ॥ उपादानकारणत्वात् सर्वाश्रय इत्यर्थः ॥ जीवस्य
वस्तुतो ब्रह्मत्वाद्ब्रह्मण एव चिच्छक्तिविशिष्टस्येश्वरत्वेन स्रष्टृत्वात् जीवः सृजतीति वायोयुक्तिः ॥ यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन
सृज्यत्वं भोग्यस्य च सर्वस्य भोक्ताश्रयत्वं चोक्तमिति द्रष्टव्यः ९

यदुक्तंस्नेहदोषबाधवास्तस्मादिति चतदप्याह नत्यस्येति ॥ तत्र हेतुः ॥ एकः स्नेहादिसंगरहितः तत्कृतः गुणदोषयोर्हिताहितयोः ॥ क
र्तृणां मित्रादीनां याः सर्वाधियः विचित्राबुद्धयस्तासां द्रष्टा साक्षी १० यच्चोक्तं भुंक्ष्वभोगानित्यादि तत्राप्याह ॥ नादत्त इति गुणं सुखं दो षं०
षं दुःखं क्रिया फलं च राज्यादिकं उदासीनत्वे हेतुः ॥ परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यतः ईश्वरः देहादिपारतंत्र्यशून्यः

नत्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः १० नादत्त आत्मा हि
गुणं न दोषं न क्रियाफलं ॥ उदासीनवदासीनः परावरदृगीश्वरः ११ बादरायणिरुवाच इत्युदीर्य गतो जीवो ज्ञा
तयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां १२ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ त
त्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं १३ बालघ्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणै
र्यन्निरूपितं १४ यमुनायां महाराज स्मरंत्यो द्विजभाषितं ॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः १५ गृहां
धकूपान्निष्क्रामत्सरःपंकादिव द्विपः ॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः १६ मौनेन यतप्राणो ब्रह्म
पुत्राववंदत ॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने १७ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥ प्रद्युम्नाया
निरुद्धाय नमः संकर्षणाय च १८ नमो विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये

अत एवं भूतस्य मम च युष्माकं च संबंधाभावाच्छोकं मा कुरुतेति वाक्यार्थः ११ द्विजभाषितं अंगिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्म १९
रंत्यः पुत्रकामनाशून्याः निर्मत्सराः सत्य इति भावः १५ निबिडपंकतुल्यं गृहं विहाय निष्क्रमणमतिधीरस्य तस्यैव योग्यं नान्यस्येति
सदृष्टांतमाह ॥ सरसः पंकात् द्विपो गज एवं निकृताः पुण्यजलक्रियाः पितृतर्पणाद्यायेन १६ संयतप्राणो नियतेंद्रियः १७ न
मो धीमहि ध्यायेम मनसा नमस्याम इत्यर्थः १८ निवृत्ता द्वैतदृष्टिर्यस्मात् १९ श्रीरामचंद्र ॥ ॥ ॥

839
1981

न्यस्तानिरस्ताः शांत्यूर्मयः मायानिमित्ता रागद्वेषाद्या येन २० मनसा सह वचसा अप्राप्य उपरते सति य एक एव प्रकाशते वचसी
ति सर्वेंद्रियोपलक्षणं ॥ सोऽस्मान् व्यात्सदसत्परः कार्यकारणयोः कारणं २१ तदेवाह यस्मिन्निदं कार्यकारणं तिष्ठति अप्येति च यत
श्च जायते मृन्मयेषु घटादिषु मृज्जातिर्मृन्मात्रमिव सर्वानुस्यूतं यत्तस्मै २२ ननु स्यूतं मन्नाग्निवत् प्रतीयेत कथं मनोवचसोरप्राप्ति
स्तत्राह ॥ यत् व्योमवत् ॥ विततमपि असवः प्राणाः क्रियाशक्त्या न स्पृशंति मनआदीनि च ज्ञानशक्त्या न विदुः तत् ब्रह्मन्नतोऽस्मि २३
तेषां तदज्ञाने हेतुमाह देहेंद्रियादयो मीयदंशाविद्धाय चैतन्यांशेनाविष्टाः संतः कर्मसु स्वस्वविषयेषु प्रचरंति जाग्रत्स्वप्नयोः ॥ अन्यदा

आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्तेऽनंतमूर्तये २० वचस्युपरतेऽप्राप्य य एको म
नसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः २१ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मये
ष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः २२ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्तन्न
तोऽस्म्यहं २३ देहेंद्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरंति कर्मसु ॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्
द्रष्ट्रपदेशमेति २४ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिक
रकरकमलकुड्मलोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते २५

सुषुप्तिमूर्छादौ नैव प्रचरंति यथा अप्रतप्तं लोहं न दहति ॥ अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं विना न दहति ॥ एवं ब्रह्मग
तज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयः तन्न स्पृशंति न विदुश्चेति भावः ॥ जीवस्तर्हि द्रष्टुत्वाज्जानातु नेत्याह ॥ स्थानेषु जाग्रदादि
षु द्रष्ट्रुपदेशं द्रष्टृसंज्ञां तदेवेति प्राप्नोति नान्यो जीवो नामास्ति ॥ नान्योतोऽस्ति द्रष्टेत्यादिश्रुतेः ॥ यद्वा द्रष्ट्रुपदेशं द्रष्टृसंज्ञं जीवमपि तदेव
एति जानाति न तु जीवस्तत् जानातीत्यर्थः ॥ तदुक्तं हंसगुह्ये स्तोत्रे देहोऽसवोऽक्षा इत्यादि २४ सकलाये सात्वतपरिवृढास्तेषां निकरः
समूहस्तस्य करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविंदयुगलं यस्य तस्य संबोधनं परम उत्कृष्ट परमेष्ठिन् सर्वेश्वर २५

भागवत
४४ पूर्वसनारदांगिराआजगामेत्यांगिराःप्राधान्येनोक्तः चित्रकेतोःपुत्रप्रदत्वेनतस्यपृथकृउक्तत्वात्॥ इहतुनारदोंगिरसासाकं ५०
ययाविति नारदस्यप्राधान्यनिर्देशः तदुपदेशेनतस्यवैराग्योत्पत्तेःप्रभोहेसमर्थ २६ यथायथावद्धारयामास २७ विद्या
धराधिपत्यंचावांतरफलंलेभे॥अप्रतिहतमस्खलितं २८ कतिपयैरहोभिःविद्ययाइद्धेनदीप्तेनमनसागतिर्यस्य २९ मृणा
लवद्गौरंशितिवाससंनीलांबरं॥स्फुरंतिकिरीटादीनियस्यकटत्रंकटिसूत्रंप्रसन्नानिवक्त्राणियस्यअरुणानिलोचनानियस्य

॥श्रीशुकउवाच॥भक्तायैतांप्रपन्नायविद्यामादिश्यनारदः॥ययावंगिरसासाकंधामस्वायंभुवंप्रभो २६ चित्र
केतुस्तुविद्यांतांयथानारदभाषितां॥धारयामाससप्ताहमभक्षःसुसमाहितः २७ ततश्चसप्तरात्रांतेविद्ययाधा
र्यमाणया॥विद्याधराधिपत्यंसलेभेप्रतिहतंनृप २८ ततःकतिपयाहोभिःविद्ययेद्धमनोगतिः॥जगामदेवदे
वस्यशेषस्यचरणांतिकं २९ मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणं॥प्रसन्नवक्त्रारुणलोच
नंवृतंददर्शसिद्धेश्वरमंडलैःप्रभुं ३० तद्दर्शनध्वस्तसमस्तकिल्बिषःस्वच्छामलांतःकरणोभ्ययान्मुनिः॥प्रवृद्ध
भक्त्याप्रणयाश्रुलोचनःप्रहृष्टरोमानमदादिपुरुषं ३१ सउत्तमश्लोकपदाब्जविष्टरंप्रेमाश्रुलेशैरुपसेचयन्मु
हुः॥प्रेमोपरुद्धाखिलवर्णनिर्गमोनैवाशकत्तंप्रसमीडितुंचिरं ३२ ततःसमाधायमनोमनीषयाबभाषएतत्प्रति
लब्धवागसौ॥नियम्यसर्वेंद्रियबाह्यवर्तनंजगद्गुरुंसात्वतशास्त्रविग्रहं ३३ श्रीगोविंद॥ ॥ ॥

तंवृतंचदृष्ट्वावृतमादिपुरुषंअभ्ययाच्छरणंगतः॥अनमत्ननाम कथंभूतः॥तस्यदर्शनेनध्वस्तंसमस्तंकिल्बिषंयस्य॥स्वच्छम
मलंचांतःकरणंयस्य॥प्रणयेनाश्रुयुक्तेलोचनेयस्यप्रहृष्टानिरोमाणियस्यसः ३१ तंप्रसमीडितुंस्तोतुंचिरंनैशकत्नशशाक॥त
त्रहेतुः॥उत्तमश्लोकस्यपादाब्जयोर्विष्टरमासनंउपसेचयन्अभिषिंचन्प्रेम्णाउपरुद्धः॥अखिलानांवर्णानांनिर्गमउच्चारणंय
स्यसः ३२ मनीषयाबुध्यामनःसमाधायएतद्वक्ष्यमाणंबभाषे॥प्रतिलब्धावाग्येन॥सात्वतशास्त्रोक्तोविग्रहोयस्यतं ३३॥ ॥ श्रीः
४४

841
1381

अन्योन्यप्रेमजानंदनिभृतान्स्वामिसेवकान्॥अभिनंदन्मुदास्तौतिदशभिःपंचभिर्विभुं॥हेअजितअन्यैरजितोपिभवान्साधु
भिर्भक्तैःजितःस्वाधीनएवकृतः॥यतोभवाननिकरुणःतेपिचनिष्कामाअपिभवताजिर्जिताःयोभवानकामात्मानामेवददाति ३४
ननुभक्तैरेवजितइतिकथंस्पर्धमानैरपिसृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जयसंभावात्तत्राह॥तवेति॥जगतउदयादीनितवैवविभवः
विभवनंमहिमालीलेतियावत्॥आदिशब्देनप्रवेशानियमादीनि॥विश्वसृजस्तुअंशांशाद्यानेश्वराः किंतुतेतवांशांशाःपुरुषःतस्यां
शाःतत्रएवंस्थितोपिपृथगभिमत्यापृथगीश्वरावयमित्यभिमानेनवृथैवस्पर्धंते ३५ त्वमेवसृष्ट्यादिकर्तेत्येतदुपपादयति॥पर
माणुःसूक्ष्मंमूलकारणंपरममहत्अंतिमंकार्यंतयोस्त्वमेवाद्यंतांतरवर्तीआदावंतेचअंतरेमध्येचवर्तितुंशीलंयस्यसः॥अतएवत्र

॥चित्रकेतुरुवाच॥अजितजितःसममतिभिःसाधुभिर्भवान्जितात्मभिर्भवता॥विजितास्तेपिचभजतामकामात्म
नांयआत्मदोतिकरुणः ३४ तवविभवःखलुभगवन्जगदुदयस्थितिलयावनादीनि॥विश्वसृजस्तेशांशास्तत्रमृ
षास्पर्धंतिपृथगभिमत्या ३५ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्तीत्रयविधुरः॥आदावंतेपिचसत्वानांयत्ध्रुवं
तदेवांतरालेपि ३६ क्षित्यादिभिरेषकिलावृतःसप्तभिर्दशगुणोत्तरैरांडकोशः॥यत्रपतत्यणुकल्पःसहांडकोटिभि
स्तदनंतय ३७

यविधुरः॥अयंतमध्यशून्योध्रुवःतेचत्वयास्त्अंतेनध्रुवाःकुतइत्यतआहसत्वानांसत्वेनप्रतीतानांकार्याणामाद्यावंतेपिअंतरालेपि
तदेवध्रुवंसुवर्णादिवत् ३६ एवंध्रुवत्वेनकालतःपरिच्छेदोनास्तीत्युक्तं॥देशतोप्यपरिच्छेदमाह॥क्षित्यादिभिरितिपूर्वस्माद्दशगुण
मुत्तरैरधिकैरावृतःयत्रत्वयिअणुकल्पःपततिपरिभ्रमतितत्तस्मादनंतस्त्वंयस्मादेवंपरमेश्वरस्त्वमेवअन्येदेवास्तवविभूतयः ३७

अतस्त्वां विहाय विषयकामनयान्येउपासकाअतिमंदाइत्याह ॥ विषयेषुतृष्णाएषांतेनराकाराःपशवःकुतःयेविभूतीरिंद्राद्या
उपासंतेनतुपरंत्वांनतःकिंतत्राह ॥ तेषामिति ॥ तदनुउपास्यनाशानंतरंयथाराजकुलंअनुराजकुलनाशानंतरंयथातत्सेवकानांआ
शिषोनश्यंतितद्वत् ॥ अयंचमैपरमोवधिः ॥ मध्येविनश्यंत्येव ३८ विषयकामेनापिकृतात्वत्सेवामोक्षफलैवेत्याह ॥ कामधियःविष
यकामनाअपिहेपरमत्वयिरचिताःकृताश्चेत्तन्नरोहंतिदेहांतरोत्पत्तयेनभवंतिकरंभबीजानि ॥ यथायतोस्यजीवस्यगुणगणादेव
द्वंद्वसमूहाभवंतिअतःकामेनापिनिर्गुणस्यतवभजनाच्छनैर्नैर्गुण्यंभवतीत्यर्थः ३९ फलकामनयापित्वदाराधनंयदामोक्षहेतुः
तदाकिंवक्तव्यंभगवद्धर्ममाहात्म्यमिति ॥ वक्तुंतत्संप्रदायप्रवर्तकेनैवभगवंतंस्तौतिजितमिति ॥ यदाभवान्भगवतंधर्ममाह ॥ तदा

॥ विषयतर्षोनरपशवोयउपासतेविभूतिर्नपरंत्वां ॥ तेषामाशिषईशतदनुविनश्यंतियथाराजकुलं ३८ काम
धियस्त्वयिरचितानपरमरोहंतियथाकरंभबीजानि ॥ ज्ञानात्मन्यगुणमयेगुणगणतोस्यद्वंद्वजालानि ३९ जित
मजिततदाभवतायदाहभागवतंधर्ममनवद्यं ॥ निष्किंचनायेमुनयआत्मारामायमुपासतेपवर्गाय ४० विषमम
तिर्नयत्रनृणांत्वमहमितिममतवेतिचयदन्यत्र ॥ विषमधियारचितोयःसत्यविशुद्धःक्षयिष्णुरधर्मबहुलः ४१

भगवन्त्वयाजितंसर्वोत्कर्षेणस्थितं ॥ तत्रहेतुः ॥ येनतिःकिंचनाःसनत्कुमारादयोमुनस्तेयंभवंतमपवर्गायसेवंतेतेनभवताजितं
यंधर्ममितिवा ४० अनवद्यतामेवाह ॥ विषयमतिर्यस्मिन्भागवतधर्मेनास्तियदन्यत्रयथान्यस्मिन्काम्यधर्मे ॥ ननुसोपिवेदो
क्तत्वानंद्यएवतत्राह ॥ विषमधियाशत्रुमरणादिकामनयारचितोविहितोयःसत्यविशुद्धरागद्वेषादिमत्वात्क्षयिष्णुश्चनश्वर
फलत्वात्अधर्मबहुलश्चहिंसादिबाहुल्यात् ॥ तदुक्तंशंकरस्वामिभिःउभयमिहचोदयानांलक्ष्यतेअर्थोनर्थश्चेत्यादि ४१ श्रीराम ॥

843
1981

एतत्प्रपंचयति ॥ कःक्षेमःकिंकुशलंनकिंचित् ॥ निजपरयोःस्वस्यपरस्यचस्वपरद्रुहास्वस्मैपरस्मैचद्रुह्यतीतिस्वपरध्रुक्तेन
यतःस्वद्रोहात्अंत्यंतकायक्लेशात्तवकोपःपीडासंभवति ॥ तदुक्तंगीतासु ॥ कर्षयंतःशरीरस्थंभूतग्राममचेतसः ॥ मांचैवांतःशरी
रस्थंतान्विध्यासुरनिश्चयानिति ॥ तथापरसंपीडयाधर्मश्चशब्दात्तवकोपश्चअतस्त्वयाराराधमपिकथंविदुहमार्गेप्रवर्तयितुंका
म्यधर्मोभिहितोनतुतत्वदृष्ट्या ४२ भागवतधर्मेणनद्रोहइत्याह ॥ नव्यभिचरतिनपरमार्थेजहातितवईक्षादृष्टिः ॥ अव्यभिचारेहे
तुः ॥ स्थिरेति ॥ स्थावरजंगमप्राणिसमूहेषुसमबुद्धयोभागवतायांधर्मंसेवंते ४२ एवंभूतस्यभागवतधर्मप्रवर्तकस्यतवदर्शना

कःक्षेमोनिजपरयोःकियानर्थःस्वपरद्रुहाधर्मेण ॥ स्वद्रोहात्तवकोपःपरसंपीडयाचतथाधर्मः ४२ नव्यभिचरति
तवेक्षायथाह्यभिहितोभागवतोधर्मः ॥ स्थिरचरसत्वकदंबेष्वपृथग्धियोयमुपासतेत्वार्याः ४३ नहिभगवन्न
घटितमिदंत्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नामसकृच्छ्रवणात्पुल्कशोपिविमुच्यतेसंसारात् ४४ अ
थभगवन्वयमधुनात्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणायदुदितंतावकेनकथमन्यथाभवति ४५ वि
दितमनंतसमस्तंतवजगदात्मनोजनैरिहाचरितं ॥ विज्ञाप्यंपरमगुरोःकियदिवसवितुरिवखद्योतैः ४६

त्सर्वपापक्षयोभवतीतिकिंचित्रमित्याह नहीति ४४ अतोहंकृतार्थोस्मीत्याह ॥ अथेति ॥ अतोहेतोःतवावलोकनेनपरिमृ
ष्टानिरस्ताआशयचित्तेमलायेषांतेत्वद्दर्शनंचममनारदोपदेशेनजातमित्याह ॥ सुरर्षिणेति ४५ यथाचाहंपूर्वमतिमूढआ
संयथाचनारदेनानुगृहीतोस्मितत्सर्वांतर्यामिणस्तवमयाकिंप्रकाशनीयमित्याह ॥ हविदितमिति विशेषेणज्ञाप्यं ॥ प्रकाशनी
यंकियदिवनकिमपीत्यर्थः ॥ सवितुर्यथाखद्योतैःप्रकाशनीयंनास्तितद्वत् ४६ श्रीराम ॥ श्रीगोपालकृष्ण ॥ ॥

उक्तलक्षणं भगवंतं प्रणमति नम इति द्वाभ्यां सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निज
तत्वं यस्य तस्मै ॥ केषां कुयोगिनां केन भिदा भेददृष्ट्या ४७ ॥ श्वसंति चेष्टंते चेकितानं पश्यंतमनुचित्तयः ज्ञानेंद्रियाणि उत्क्रंति
स्वरूपं पश्यंति ४८ ॥ ४९ मे नुशासनं मद्विषय उपदेशः तेन तया च विद्यया अस्मात् दर्शनात् संसिद्धोसि ५० तद्धोपदार्श्यी
यस्त्वयमप्युपदिशति ॥ अहमित्यादिना ॥ सर्वभूतान्यहमेव भूतानामात्मा भोक्तापि अहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं

नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ४७
यं वै श्वसंतमनु विश्वसृजः श्वसंति ये केचितानमनु चित्तय उत्क्रंति ॥ भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै न
मो भगवते स्तु सहस्रमूर्ध्ने ४८ शुक उवाच ॥ संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याधरपतिं प्रीतश्चि
त्रकेतुं कुरूद्वह ४९ श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेनुशासनं ॥ संसिद्धोसि तया राजन् वि
द्यया दर्शनाच्च मे ५० अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ५१
लोके विततमात्मानं लोकं चात्मनि संततं ॥ उभयं च मया व्याप्तं मयि चैवोभयं कृतं ५२

नास्तीत्यर्थः यतोहं भूतभावनः भूतानां प्रकाशकः कारणं च ॥ ननु शब्दब्रह्म प्रकाशकं परं ब्रह्म कारणं च ॥ प्रकाशकं च सत्यं ॥
ते उभे ममैव रूपे इत्याह ॥ शब्दब्रह्मेति शाश्वती शाश्वत्यौ ५१ अतस्त्वमेवं पश्येत्याह ॥ लोके भोग्यप्रपंचे भोक्तृत्वेन विततमनुग
तमात्मानं लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तं मयि चैवोभयं प्रकल्पितं स्मरेदिति तृतीयेनान्व
यः पश्येरित्यध्याहारो वा ५२ श्रीराम ॥ ॥ ॥ ॥ ॥ ॥

845
1951

ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्य स्वप्नगतगृहादिदृष्टांतेन संभा
वयन्नाह ॥ यथेति द्वाभ्यां ॥ यथा स्वप्ने सुषुप्तो विश्वं गिरिवनादिरूपं देशांतरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुषुप्तिस्वप्नं च प
श्यतीत्यर्थः ॥ तथा स्वप्न एव उत्थितः सन् आत्मानमेकदेशे स्थितं शयनप्रदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ५३ एवं प्रसि
द्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्था आत्मनो मायामात्राणि इत्येवं विज्ञाय तेषां द्रष्टारं अत एव परं तदवस्था
रहितमात्मानं स्मरेत् ५५ ननु तेषां द्रष्टारमिति कथमुच्यते स्वप्ने ॥ दृश्याभावेन द्रष्टृत्वाभावात् तत्राह ॥ येनेति सुषुप्तः पुरुषो जी
वः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतींद्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि तदा स्वापसुखयोरसंवेदने स

यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५४ एवं जागरणादीनि जी
वस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५५ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ॥
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ५६ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत तज्
ज्ञानं ब्रह्म तत्परं ५७ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ५८

स्वमहमस्वाप्समिति स्मृतेरसंभवात् ५६ ननु स्वापसाक्षिणा दृश्यं कथं जाग्रदवस्थः स्मरेत् न ह्यन्येन दृष्टमन्यः स्मरति तत्रा
ह ॥ उभयं प्रस्वापं प्रतिबोधं च स्मरत अनुसंदधतस्तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत एकैकापा
येप्यनपायात् तज्ज्ञानं परं ब्रह्म तदेतत्तत्वमिति न तु भिन्नमित्यर्थः ॥ अतो बाल्ये दृष्टं यौवने स्मरतीति तद्वदवस्थांतरेपि स्वापानंद
योः स्मरणं घटत इति भावः ॥ तदेवंभूतं ब्रह्मात्मानं मामवेहीत्यनुषंगः ५७ विपक्षे दोषमाह ॥ यदि एतन्मम भावं मत्स्वरूपं ब्रह्म
विस्मृतं सदात्मनः सकाशात् भिन्नं भवति एतस्य पुंसः संसारो भवति संसारस्वरूपमाह ॥ देहात् देहः जन्मानंतरं पुनर्जन्म मृते
रनंतरं मृतिश्चेति ५८ श्रीगजाननप्रसन्न ॥ ॥ ॥ ॥ ॥

योन्यंतरेपिभोगादिसंपादनंशक्यंज्ञानार्थंत्वत्रैवयतितव्यमितितमाहलब्ध्वेतिग्रज्ञानंशास्त्रोक्तंविज्ञानपरोक्षंतयोःसंभवो
यस्यांतां ५९ वैराग्यार्थमाह ॥ इहायांप्रवृत्तिमार्गेततईहातः ॥ अनीहायांनिवृत्तिमार्गेतुअभयंमोक्षोभवतिइतिचस्मृत्वाफ
लसंकल्पाद्विरमेत ॥ पायांतरे ॥ नोभयपरिक्लेशः फलविपर्ययश्चनास्तीत्येवंस्मृत्वा ६० एतद्विवृणोति ॥ सुखायेतित्रिभिः ॥
दुःखस्यानिवृत्तिःसुखस्याप्राप्तिः ६१ विज्ञाउपमेप्रवीणावयमित्यभिमानवंतोस्थानत्रयविलक्षणांतुरीयांबुध्वा ६२ दृष्टश्रु

॥ लब्ध्वेहमानुषींयोनिंज्ञानविज्ञानसंभवां ॥ आत्मानंयोनबुध्येतनक्वचित्क्षेममाप्नुयात् ५९ स्मृत्वेहायांपरिक्ले
शंततः फलविपर्ययं ॥ अभयंचाप्यनीहायांसंकल्पाद्विरमेत्कविः ६० सुखायदुःखमोक्षायकुर्वातेदंपतीक्रि
याः ॥ ततोनिवृत्तिरप्राप्तिर्दुःखस्यचसुखस्यच ६१ एवंविपर्ययंबुध्वानृणांविज्ञाभिमानिनां ॥ आत्मनश्चगतिं
सूक्ष्मांस्थानत्रयविलक्षणां ६२ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तःस्वेनतेजसा ॥ ज्ञानविज्ञानसंतृप्तोमद्भक्तःपुरुषो
भवेत् ६३ एतावानेवमनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थःसर्वात्मनाज्ञेयोयत्परात्मैकदर्शनं ६४ त्वमेतच्छ्रद्धया
राजन्नप्रमत्तोवचोमम ॥ ज्ञानविज्ञानसंपन्नोधारयन्नाशुसिध्यसि ६५ श्रीशुकउवाच ॥ आश्वास्यभगवानित्थं
चित्रकेतुंजगद्गुरुः ॥ पश्यतस्तस्यविश्वात्माततश्चांतर्दधेहरिः ६६ इतिश्री॰ष॰चित्रकेतूपाख्यानेषोडशोध्यायः ॥

ताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैः स्वेनतेजसाविवेकबलेन ६२ नैवातःपरःपुरुषार्थोस्तीत्याह ॥ एतावानेतियोगनैपुण्यं
मस्यासाबुद्धिर्येषांपरस्यात्मनएकंदर्शनमितिएतावानेव ६६ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेटीकायांषोडशोध्यायः १६
ततःसप्तदशेमोघमहर्धिंप्राप्यखेचरन् ॥ विहस्यगिरिशंशापादुमायास्त्रत्वंगतः १ श्रीरामचंद्रप्रसन्न ॥ ॥ ॥

847
1981

यतःतस्यांतस्यैदिशेनमःकृत्वा १ सविद्याधरस्त्रीभिर्हरिंगापयन्रेमइतिद्वयोरन्वयः ॥ अव्याहतबलेंद्रियपाटवंचयस्य
नानाविधाःसंकल्पैनैवसिद्धयोयास्ताःस २ अकस्माद्भुतैश्वर्यगर्वात्प्राप्तनकर्मतः ॥ आसुरींयोनिमापन्नोभवानीशापतः
सतु ॥ तदाह ॥ एकदेत्यादि ॥ अंकाकृतांउत्संगेनैकीकृत्यदेवींबाहुनालिंग्यास्थितंउवाचजहासचतस्यांतिकेस्थितःसन् ४ ॥ ५ ॥
धर्मवक्तावदति ॥ शारीरिणांमध्येमुख्यश्चभार्ययामिथुनीभूयचास्ते ६ ॥ ७ ॥ ८ ॥ अगाधागंभीराधीर्यस्यसः ९ ततस्यवीर्य

॥ शुकउवाच ॥ यतश्चांतर्हितोनंतस्तस्यैकृत्वादिशेनमः ॥ विद्याधरश्चित्रकेतुश्चचारगगनेचरः १ सलक्षंवर्षल
क्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानोमहायोगीमुनिभिःसिद्धचारणैः २ कुलाचलेंद्रद्रोणीषुनानासंकल्पसिद्धि
षु ॥ रेमेविद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं ३ एकदासविमानेनविष्णुदत्तेनभास्वता ॥ गिरिशंददृशेगच्छन्परीतं
सिद्धचारणैः ४ आलिंग्यांकीकृतांदेवींबाहुनामुनिसंसदि ॥ उवाचदेव्याःशृण्वंत्याजहासोच्चैस्तदंतिके ५ चित्र
केतुरुवाच ॥ एषलोकगुरुःसाक्षाद्धर्मवक्ताशरीरिणां ॥ आस्तेमुख्यःसभायांवैमिथुनीभूयभार्यया ६ जटाधरस्तीव्र
तपाब्रह्मवादीसतांपतिः ॥ अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा ७ प्रायशःप्राकृताश्चापिस्त्रियंरहसिबि
भ्रति ॥ अयंमहाव्रतधरोबिभर्तिसदसिस्त्रियं ८ भगवानपितच्छ्रुत्वाप्रहस्यागाधधीर्नृप ॥ तूष्णींबभूवसदसि
सभ्याश्चतदनुव्रताः ९ शुकउवाच ॥ इत्यतद्वीर्यविदुषीब्रुवाणेबह्वशोभनं ॥ रुषाहदेवीधृष्टायनिर्जितात्माभिमा
निने १० पार्वत्युवाच ॥ अयंकिमधुनालोकेशास्तादंडधरःप्रभुः ॥ अस्मद्विधानांदुष्टानांनिर्लज्जानांचविप्रकृत् ११

प्रभावंविद्वान् अतद्वीर्यविद्वान् ॥ तस्मिन्निर्जितात्माभिमानिनेजितेंद्रियोहमित्यभिमानवतेतिरुषाक्रोधेनाह १० विरुद्धंप्रकर्षेण
करोतीतिविप्रकृत् ११

अतिवर्तितंशास्त्रमतिक्रम्यवर्तमानशीलंयेनोनिषेधंतिनिवारयंति १२ एषांब्रह्मादीनांअनुध्येयंपदाब्जयुग्मंयस्यतंमंगलंमंगल
परमधर्ममूर्तिं॥सूरीन्परिभूयअवज्ञांकृत्वाजगद्गुरुंयःप्रशास्तितत्तस्मात् १३ ननुहरिभक्तोयंनदंडार्हइतिचेत्तत्राह॥नायंसाधुभिः
परिसेवितंवैकुंठस्यपादमूलोपसर्पणमर्हतियतःसंभावितोअहमधिकइतिकृतामतिर्येनअतएवस्तब्धःअनम्रः १४ तदेवंस्वयंद
उत्वंनिश्चितंप्रत्याह॥अतइति॥हेपुत्रयथाभूयः॥महतांकिल्बिषमपराधंनकर्तानकरिष्यसितथायाहीत्यर्थः १५॥१६ पूर्वदिष्टंप्राची

॥नवेदधर्मंकिलपद्मयोनिर्नब्रह्मपुत्राभृगुनारदाद्याः॥नवैकुमारःकपिलोमनुश्चयेनोनिषेधंत्यतिवर्तितंहरं १२ येषा
मनुध्येयपदाब्जयुग्मंजगद्गुरुंमंगलमंगलंस्वयं॥कःक्षत्रबंधुःपरिभूयसूरीन्प्रशास्तिधृष्टस्तदयंहिदंड्यः १३ नाय
मर्हतिवैकुंठपादमूलोपसर्पणं॥संभावितमतिस्तब्धःसाधुभिःपर्युपासितं १४ अतःपापीयसींयोनिमासुरींयाहि
दुर्मते॥यथेहभूयोमहतांनकर्तापुत्रकिल्बिषं १५ शुकउवाच॥एवंशप्तश्चित्रकेतुर्विमानादवरुह्यसः॥प्रसादया
माससतींमूर्ध्नानम्रेणभारत १६ चित्रकेतुरुवाच॥प्रतिगृह्णामितेशापमात्मनोंजलिनांबिके॥देवैर्मर्त्याययत्प्रोक्तंपू
र्वदिष्टंहितस्यतत् १७ संसारचक्रएतस्मिन्जंतुरज्ञानमोहितः॥भ्राम्यन्सुखंचदुःखंचभुंक्तेसर्वत्रसर्वदा १८
नैवात्मनःपरश्चापिकर्तास्यात्सुखदुःखयोः॥कर्तारंमन्यतेप्राज्ञआत्मानंपरमेवच १९ गुणप्रवाहएतस्मिन्कःशापः
कोन्वनुग्रहः॥कःस्वर्गोनरकःकोवाकिंसुखंदुःखमेवच २० एकःसृजतिभूतानिभगवानात्ममायया॥एषांबंधंचमोक्षं
चसुखंदुःखंचनिष्कलः २१

नकर्मप्राप्तमेव १७ अयंचसंसारचक्रस्वभावएवनचित्रंइत्याहसंसारचक्रइति १८ अतएवात्रममचतववनकोपिदोषइत्याह
नैवेति॥एवंतावत्सुखदुःखादिमंगीकृत्योक्तंइदानींतदपिवस्तुतोनास्तीत्याह॥गुणानांमायामयानांप्रवाहेसंसारे २० ननुमायागु
णानांचेदयंप्रवाहस्तर्हितेषांजडत्वाद्बंधमोक्षाद्यनुभवोनस्यात्तत्राह॥एकःपरमेश्वरोमाययानिमित्तभूतयाभूतानिप्राणिनःसृज
तिएषांबंधादिकंचसृजति निष्कलःस्वयंबंधादिशून्यः २१

849
1780

नन्वेवंभूतविषमदृष्टेःकिंतस्यकारणंप्रियादिवैषम्याभावादित्याशंक्ययद्यपिप्रियादयोनसंतितथापितत्कर्मवशात्सर्वंघटतइत्या
ह॥नतस्येतिद्वाभ्यां॥प्रतीपःअप्रियःनज्ञातिर्बंधुश्चेत्यर्थः॥तत्रहेतुः॥सर्वत्रसमस्यतत्कुतः॥निरंजनस्यनिःसंगस्यअतएवतस्मिंस्त
त्सुखेरागोनास्तिरागानुबंधोरोषःकुतःस्यात् २२ यद्यप्येवंतथापितस्यशक्त्यामाययायोविसर्गःपुण्यपापादिलक्षणंकर्मएषांश
रीरिणांसुखाद्यर्थमेवकल्पतेसमर्थोभवति॥यथोक्तंगीतासु॥भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितइति २३ अथतस्मात्हेभामिनि

नतस्यकश्चिद्दयितःप्रतीपोनज्ञातिर्बंधुर्नपरोनचस्वः॥समस्यसर्वत्रनिरंजनस्यसुखेनरागःकुतएवरोषः २२ त
थापितच्छक्तिविसर्गएषांसुखायदुःखायहिताहिताय॥बंधायमोक्षायचमृत्युजन्मनोःशरीरिणांसंसृतयेचकल्प
ते २३ अथप्रसादयेनत्वांशापमोक्षायभामिनि॥यन्मन्यसेह्यसाधूक्तंममतत्क्षम्यतांसति २४ शुकउवाच॥इ
तिप्रसाद्यगिरिशौचित्रकेतुररिंदम॥जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः २५ ततस्तुभगवान्रुद्रोरुद्राणी
मिदमब्रवीत्॥देवर्षिदैत्यसिद्धानांपार्षदानांचशृण्वतां २६ श्रीरुद्रउवाच॥दृष्टवत्यसिसुश्रोणिहरेरद्भुतकर्मणः
॥माहात्म्यंभृत्यभृत्यानांनिस्पृहाणांमहात्मनां २७ नारायणपराःसर्वेनकुतश्चनबिभ्यति॥स्वर्गापवर्गनरकेष्वपि
तुल्यार्थदर्शिनः २८ देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलया॥सुखंदुःखंमृतिर्जन्मशापोनुग्रहएवच २९ ७

कोपनेत्वांकेवलंप्रसादयामि॥ननुशापमोक्षायतर्हिकिंप्रसादनेनतत्राह॥ममोक्तंउक्तिंसाध्वपिअसाधुवन्मन्यसेतत्त्वयाक्षम्य
तां २४ गिरिशौभवानीशंकरौप्रसाद्यस्मयतोविस्मयंकुर्वतोःसतोः २५ स्वर्गादौएवतुल्योर्थप्रयोजनमिति द्रष्टुंशीलंयेषांतेतथा
२८ तत्रतदुक्तमेवहेतुमाह॥देहिनांसुखदुःखमित्यादिद्वंद्वानिईश्वरस्यलीलयामायया॥भवंति २९ श्रीराम् श्रीगोविंद

भाग०व० तेषुच गुणदोषविकल्प इत्येवेत्यन्वयः ॥ दृशानिष्ठ एवैं भेदः यः स्फुरतिस आत्मन्यर्थभेदः पुंसः ॥ स्वप्न यथा विवेक कृतो भवति स्वजिव
४९ त्सर्पमाळादिभिर्यथा तथैव कृत इत्यर्थः ॥ स्वप्नवदिति वक्तव्ये स्वजिवदित्यार्षं ॥ स्वजिव पाठांतरे तु सुगमं ३० अतो भागवतानां नि स्पृ षु०
हत्वमुचितमेवेत्याह ॥ वासुदेव इति ॥ ज्ञानवैराग्ययोः वीर्यं बळं येषां तेषां व्यपाश्रयः विशिष्टबुध्याश्रयणीयो र्थो नास्ति ३१ अस्य च

॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ॥ गुणदोषविकल्पश्च भिदेव स्वजिवत्कृतः ३० वासुदेवे भगवति भक्तिमु
द्वहतां नृणां ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ३१ नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सु
रेशाः ॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ३२ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परो
पि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ३३ तस्य चायं महाभागश्चित्रकेतुः प्रियो नुगः ॥ सर्वत्र समदृक्शां
तो ह्यहं चैवाच्युतप्रियः ३४ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु ३५
शुक उवाच ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं ॥ बभूव शांतधी राजन् देवी विगतविस्मया ३६ इति भागव
तो देव्याः प्रतिशप्तुमलंतमः ॥ मूर्ध्ना स जग्रहे शापमेतावत्साधुलक्षणं ३७ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमा
श्रितः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३८ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ वृत्रस्यासुरजा
तेश्च कारणं भगवन्मतेः ३९

हरिदासत्वेन तत्स्वभावत्वान्नैतच्चित्रमिति वक्तुं हरेर्माहात्म्यमाह ॥ नाहमिति द्वाभ्यां ॥ इहितमभिप्रायं लीलां वा यद्वा वयं न विद्मः स्तदात
स्य स्वरूपमंशकांशका अपि संतः पृथगीशमानिनो न विदुरेव ३२ अत एव हरिरयं सर्वेषां भूतानां प्रियः ॥ अहं चैवाच्युतप्रियः ॥ तस्मा
न्ममास्मिन्क्रोधो नाभूदिति भावः ३३ ॥ ३४ ॥ प्रतिशापं दातुमलंतमः समर्थमलं तमोपि ३७ असुरजातेः असुरस्वभावेनोत्पत्तेः भग
वति मतेश्च ३९ श्री:
४९

851
1981

एतत् एतं । षष्ठे सप्तदशः १७ आदित्यानां चतुर्थस्य त्वष्टुर्वंशप्रसंगतः ॥ प्रोक्तमिंद्रकृतं विश्वरूपवृत्रवधादिकं ॥ ॥ अदितेः
पंचमादीनां पुत्राणामन्वयोक्तितः ॥ अष्टादशेदितेर्गर्भे शक्रेण मरुतां भिदा ॥ त्वष्टुर्वंशमनुक्रम्य सप्रसंगं यथाक्रमं ॥ आदित्यानाम
थान्येषां वंशानाह मुनीश्वरः ॥ दक्षकन्यान्वयानुकथने आदित्याः द्वादश पुत्राः प्रोक्ताः ॥ विवस्वानर्यमा पूषा त्वष्टा च सविता भगः ॥ धा
ता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ इति ॥ तत्राष्टाध्यायांतमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्य इदानीं
सवितुर्वंशमाह पृश्निस्त्विति ॥ सावित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषंगः ॥ पशुं पशुयागं महामखान् पंच यज्ञान् १ ॥ २ ॥ धा

इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ॥ माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ४० य एतत्प्रातरुत्थाय श्रद्धया वा
ग्यतः पठेत् ॥ इतिहासं हरिं स्मृत्वा स याति परमां गतिं ४१ इति श्रीभागवते महापुराणे षष्ठस्कंधे चित्रकेतूपाख्याने स
प्तदशोध्यायः १७ श्रीशुक उवाच ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीं ॥ अग्निहोत्रं पशुं सोमं चातुर्मास्यं
महामखान् १ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं ॥ आशिषं च वरारोहां कन्यां प्रासूत सुव्रतां २ धातुः कुहूः सि
नीवाली राका चानुमतिस्तथा ॥ सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ३ अग्नीन् पुरीष्यानाधत्त क्रियायां समनंतरः
४ चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ५ अगस्त्यश्च वशिष्ठश्च
मित्रावरुणयोर्ऋषी ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं ६ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ पौलोम्या
मिंद्र आधत्त त्रीन् पुत्रानिति नः श्रुतं ७ श्रीराम

तुर्भार्या कुहूः सायं पुत्रं प्रासूत एवं सिनीवाली दर्शमित्यनुक्रमात् ३ समनंतरो विधाता क्रियायां भार्यायां पुरीष्यानग्नीन् पंच चितीन् पु
रीष्यासो अग्नय इति पंच एते अग्नयश्चितय इति च श्रुतेश्च ४ चर्षणी वरुणस्य भार्यासीत् पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः वाल्मी
कि वरुणस्यैव पुत्रो भवत् एतौ वरुणस्यासाधारणौ पुत्रौ तयोस्त्सर्गाद्यो मित्रस्यासाधारणाः ५ तयोरेव साधारणौ द्वौ सुतौ वाहो अगस्त्यश्च
वसिष्ठस्य ऋषी मित्रावरुणयोरभवतां यत उभावपि कुंभे रेतः सिषिंचतुः ॥ सन्नेह जाता विषितानमोभिः कुंभे रेतः सिषिंचतुः समानमि
ति श्रुतेः इत्तस्कंने ६।७

पश्चादष्टमस्कंधे १० अथेतिकश्यपस्यादितेःपुत्राणांद्वादशादित्यानांसंततिमुक्त्वादितेःपुत्रान्कथयामीत्यर्थः हिरण्यकशिपुर्हिर
ण्याक्षश्चेतिप्रथमंद्वावेवतोचकीर्तितौतृतीयस्कंधे ॥विप्रचित्तेर्दानवाद्गुर्तुःसकाशात्राहुपुत्रमग्रहीत् १२ ततःसंह्रादादस्तत १३ यो
मेघरूपंवातापिपंचेतमिल्वलंयंपेचनंचवातापिंचासृतेत्यन्वयः १४ ततोबलेःसकाशात्अभवत् १५ तस्यबलेःअनुभावःसश्लोक्यः

जयंतमृषभंतातत्तृतीयमीढुषंप्रभुः॥उरुक्रमस्यदेवस्यमायावामनरूपिणः ७ कीर्तौपत्न्यांबृहत्श्लोकेस्तस्यासन्सौ
भगादयः॥तत्कर्मगुणवीर्याणिकाश्यपस्यमहात्मनः ८ पश्चाद्वक्ष्यामहेदित्यांयथैवावततारह॥अथकश्यपदायादान्
दैतेयान्कीर्तयामिते ९ यत्रभागवतःश्रीमान्प्रह्लादोबलिरेवच॥दितेर्द्वावेवदायादौदैत्यदानववंदितौ १० हिरण्यक
शिपुर्नामहिरण्याक्षश्चकीर्तितौ॥हिरण्यकशिपोर्भार्याकयाधुर्नामदानवी ११ जंभस्यतनयादत्तासुषुवेचतुरःसुतान्॥
संह्रादंप्रागनुह्रादंप्रह्रादंह्रादमेवच १२ तत्स्वसासिंहिकानामराहुंविप्रचितोग्रहीत्॥शिरोहरद्यस्यहरिश्चक्रेणपिबतो
मृतं॥संह्रादस्यकृतिर्भार्यासूतपंचजनंततः १३ ह्रादस्यधमनिर्भार्यासूतवातापिमिल्वलं॥योगस्त्यायात्वतिथयेपेचेवा
तापिमिल्वतुः १४ अनुह्रादस्यसूर्म्यायांबाष्कलोमहिषस्तथा॥विरोचनस्तुप्राह्रादिर्देव्यांतस्याभवद्बलिः १५ बाणः
ज्येष्ठंपुत्रशतंडशनायांततोभवत्॥तस्यानुभावःसश्लोकःपश्चादेवाभिधास्यते १६ बाणआराध्यगिरिशंलेभेतद्गण
मुख्यतां॥यत्पार्श्वेभगवानास्तेत्यद्यापिपुरपालकः १७ मरुतश्चदितेःपुत्राश्चत्वारिंशन्नवाधिकाः॥तआसन्नप्रजाः
सर्वेनीताइंद्रेणसात्मतां १८ श्रीराजोवाच॥कथंतआसुरंभावमपोह्योत्पत्तिकंगुरो॥इंद्रेणप्रापिताःसात्म्यंकिंतत्सा
धुकृतंहितैः १९ इमेश्रद्दधतेब्रह्मन्नृषयोहिमयासह॥परिज्ञानायभगवंस्तन्नोव्याख्यातुमर्हसि २० श्रीगोविंद॥

गुणकीर्त्यर्हः॥यद्वा॥अनुभाव्यतेसद्भिस्तूयतइत्यनुभावंसश्लोक्यंयशइतिशेषः १६ गणेषुतस्यमुख्यतांप्राधान्यं १७ सात्मतां
समानरूपतांदेवत्वंप्रापिताः १८ १९ २० श्रीराम

533
1981

पार्ष्णिग्राहेणपृष्ठतःसहा
आदृतंसादरंअल्पंमिताक्षरमर्थवत्॥अर्थयुक्तं॥सत्रमयनमाश्रयोयस्यहेसत्रायणशौनक २६ पार्ष्णिग्राहेणपृष्ठतःसहा
येन॥भ्रातृहंतारमिंद्रंघातयित्वासुखिनीस्यामितिचिंतयामासदितिः॥उल्बणंक्रूरंअक्लिन्नहृदयंकठिनचित्तं २३ ननुराजा
स्वदेहरक्षार्थमन्येषांघातंकरोत्येवंकिमत्रचित्रंतदाह॥कृमीति॥ईशःप्रभुरित्याभिहितस्यापियस्यपूर्वेषांशतादेहस्यमरणानंत
रंविट्कृमिरितिभक्षितस्यकृमयइतिश्वादिभिर्भक्षितस्यतु॥विष्ठेतिदग्धस्यभस्मेतिसंज्ञाआसीत्॥तत्कृतेतस्यदेहस्यार्थेयोभूतेभ्योद्रु

तद्विष्णुरातस्यसबादरायणिर्वचोनिशम्यादृतमल्पमर्थवत्॥सभाजयंस्तंनिभृतेनचेतसाजगादसत्रायणसर्वद
र्शिनः २१ शुकउवाच॥हतपुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुना॥मन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयत् २२ क
दानुभ्रातृहंतारमिंद्रियाराममुल्बणं॥अक्लिन्नहृदयंपापंघातयित्वाशयेसुखं २३ कृमिविड्भस्मसंज्ञासीद्यस्येशाभि
हितस्यच॥भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः २४ आशासानस्यतस्येदंध्रुवमुन्नद्धचेतसः॥मदशोषकइंद्र
स्यभूयाद्येनसुतोहिमे २५ इतिभावेनसाभर्तुराचचारासकृत्प्रियं॥शुश्रूषयानुरागेणप्रश्रयेणदमेनच २६ भक्त्या
परमयाराजन्मनोज्ञैर्वल्गुभाषितैः॥मनोजग्राहभावज्ञासुस्मितापांगवीक्षणैः २७ एवंस्त्रियाजडीभूतोविद्वान
पिविदग्धया॥बाढमित्याहविवशोनतच्चित्रंहियोषिति २८ विलोक्यैकांतभूतानिभूतान्यादौप्रजापतिः॥स्त्रि
यंचक्रेस्वदेहार्धंययापुंसांमतिर्हृता २९ ॥

ह्यतिसकिंस्वार्थंवेदनवेदेवतत्रहेतुः॥यतोभूतद्रोहान्निरयोभवति २४ इदंदेहादिकंध्रुवंनित्यंआशानाभूयात्भवेत्भर्तुः
प्रियाचरणमेवेतिभावेनसाभर्तुःप्रियमसकृदाचचार २५ २७ विवशःस्त्रीभूतानिनिःसंगानिमेथुनेनपरतंत्रःसन्बाढंन
बमनोरथंपूरयिष्यामीतियदाहतन्नचित्रं २८ तत्रहेतुमाहविलोक्येति॥एकांतभूतानिनिःसंगानिमेथुनेनसृष्ट्यर्थमेव
स्त्रियंचक्रे २९

एवंस्त्रियास्कश्रुषितःसन् इहचकारात्परत्रचअगमःअप्राप्यः ३० ३१ ननुपरमेश्वरेस्कप्रीतेसर्वकामप्राप्तिरितिप्रसिद्धंतत्रा
हपतिरेवेतिननुमनसिस्थितःश्रीवास्कदेवएवलक्ष्मीपतिःपरंदैवतमितिप्रसिद्धं॥सत्यंसएवस्वाधिकारेणरूपभेदैःपूज्यतइत्या
हमानसइतिसार्धेनदेवतालिंगैर्मूर्तिभिरुपलक्षितःतान्येवाहनामइंद्रादिरूपंवज्रहस्तत्वादिताभ्यांविशिधकल्पितैः ३२ इंद्रह

एवंशुश्रुषितस्तातभगवान्कश्यपस्त्रिया॥प्रहस्यपरमप्रीतोदितिमाहाभिनंद्यच ३० कश्यपउवाच॥वरंवरयवा
मोरुप्रीतस्तेहमनिंदिते॥स्त्रियाभर्तरिस्कप्रीतेकःकामइहचागमः ३१ पतिरेवहिनारीणांदैवतंपरमंस्मृतं॥मानसः
सर्वभूतानांवास्कदेवःश्रियःपतिः ३२ सएवदेवतालिंगैर्नामरूपविकल्पितैः॥इज्यतेभगवान्पुंभिःस्त्रीभिश्चपतिरू
पथृक् ३३ तस्मात्पतिव्रतानार्यःश्रेयस्कामास्कमध्यमे॥यजंतेनन्यभावेनपतिमात्मानमीश्वरं ३४ सोहंत्वयार्चि
तोभद्रेईदृग्भावेनभक्तितः॥तत्तेसंपादयेकामंअसतीनांस्कदुर्लभं ३५ दितिरुवाच॥वरदोयदिमेब्रह्मन्पुत्रमिंद्र
हणंवृणे॥अमृत्युंमृतपुत्राहंयेनमेघातितौसुतौ ३६ निशम्यतद्वचोविप्रोविमनापर्यतप्यत॥अहोधर्मःस्कमहान
थमेसमुपस्थितः ३७ अहोअर्थेंद्रियारामोयोषिन्मय्येहमायया॥गृहीतचेताःकृपणःपतिष्येनरकंध्रुवं ३८
कोतिक्रमोनुवर्तत्याःस्वभावमिहयोषितः॥धिङ्मांबताबुधंस्वार्थेयदहंत्वजितेंद्रियः ३९ शरत्पद्मोत्सवंवक्त्रंवचः
श्रवणामृतं॥हृदयंक्षुरधाराभंस्त्रीणांकोवेदचेष्टितं ४०

नंइंद्रहंतारंअमृत्युंमृत्युशून्यंयेनइंद्रेणविष्णुनासहायेनघातितौ ३४ ३५ ३६ ३७ स्वभावमनुवर्तमानायायोषितःकोतिक्र
मोपराधः ३८ स्वभावमेवाह॥द्वाभ्यां॥शरत्पद्मस्येवोत्सवोविकाशोयस्मिन्श्रवणामृतंकर्णयोरमृतंक्षुरधारोपमंचित्तं ३९ ४०

855
1981

स्वाशिषात्मनांस्वार्थकामनयाप्रेष्ठत्वेनप्रतीयमानानां ४० तत्रेदमुपकल्पयतेयोग्यंभवतिअयंभावः॥वैष्णवंव्रतंतावदुपदेक्ष्या
मितेनैवास्याःशुद्धचित्तयाःइंद्रक्रोधोविनिवर्तिष्यते॥पुत्रस्तुमर्त्योभवतिदीर्घकालेचव्रतस्यकथंचिद्वैगुण्येसतिइंद्रस्यवधोन
भविष्यतितर्हिइंद्रोनभविष्यतिवैगुण्येतुदेवबांधवोभविष्यतिवैष्णवत्वाद्भूतस्यचकथंचिद्वैगुण्येपिसतिसर्वथावैकल्याभावात् ४१
कार्याण्यावश्यकानिव्रतंयानिनभ्रंशंतितान्यावश्यकानिनचनिषिद्धानिकिंत्वभ्यनुज्ञातानिसर्वाण्यपिब्रूहि ४४ तत्रैकत्रिंशन्निषे

नहिकश्चित्प्रियःस्त्रीणामंजसास्वाशिषात्मनां॥पतिंपुत्रंभ्रातरंवाघ्नंत्यर्थेघातयंतिच ४० प्रतिश्रुतंददामीतिवच
स्तन्नमृषाभवेत्॥वधंनार्हतिचेंद्रोपितत्रेदमुपकल्पतां ४१ इतिसंचिंत्यभगवान्मारीचःकुरुनंदन॥उवाचकिं
चित्कुपितआत्मानंचविगर्हयन् ४२ कश्यपउवाच॥पुत्रस्तेभवितामद्रेइंद्रहादेवबांधवः॥संवत्सरंव्रतमिदं
ययंजोधारयिष्यसि ४३ दितिरुवाच॥धारयिष्येव्रतंब्रह्मन्ब्रूहिकार्याणियानिमे॥यानिचेहनिषिद्धानिनव्रतंघ्नं
तियान्कत ४४ कश्यपउवाच॥नहिंस्याद्भूतजातानिनशपेन्नानृतंवदेत्॥नछिंद्यान्नखरोमाणिनस्पृशेयदमंग
लं ४५ नाप्सुस्नायान्नकुप्येतनसंभाषेतदुर्जनैः॥नवसीताधौतवासःस्रजंचविधृतांक्वचित् ४६ नोच्छिष्टंचंडिका
न्नंचसामिषंवृषलाहृतं॥भुंजीतोदक्यायादृष्टेपिबेदंजलिनात्वथः ४७ नोच्छिष्टास्पृष्टसलिलासंध्यायांमुक्तमूर्ध
जा॥अनर्चितासंयतवाग्नासंवितावहिश्चरेत् ४८ श्रीगोविंद॥ ॥

द्धानाह॥नहिंस्यादितिपंचभिः॥नशपेन्नाक्रोशेत्यदमंगलंकपालास्थ्यादिकंतंनस्पृशेत् ४५ नाप्सुप्रविश्यस्नायात्पूर्वंवि
धृतांस्रजंपुनर्नधारयेत् ४६ भोजनेपंचनिषेधानाह॥नोच्छिष्टमिति॥चंडिकान्नंभद्रकाल्यैनिवेदितंपि॥पीलिकादिदूषितं
वा॥अंजलिनास्वपोनपिबेदिति ४७ गृहाद्बहिर्निर्गमेसप्तनिषेधानाह॥नोच्छिष्टेति॥अनर्चितामंडनहीना॥असंवीताअ
पावृता ४८

शयनेस्यैनिषेधानाह ॥ नाधौतपादेति ॥ नापराक् पश्चिमशिराः ४९ कार्याण्याह ॥ धौतवासा इति द्वाभ्यां प्रातराशात् प्रथम ५०
भोजनात् ५० ५१ पुंसवनं पुत्रोत्पत्तिकरं ॥ तुभ्यंतव ५२ ५३ ५४ ५५ हरिरिंद्रो व्रतंप्रस्यच्छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः
कुटिलः साधुवेषः मृगहा लुब्धको यथा मृगवचनाय मृगवेषं भवति तद्वत् ५६ केन मे शिवं स्यादिति चिंतां प्राप्तश्च ५७ अस्पृष्ट

॥ नाधौतपादाप्रयता नार्द्रपान्नोउदक्शिराः ॥ शयीत नापराङ् नान्यैर्न नग्ना न च संध्ययोः ४९ धौतवासाः शुचि
र्नित्यं सर्वमंगलसंयुता ॥ पूजयेत्प्रातराशात्प्राक् गोविप्रान् श्रियमच्युतं ५० स्त्रियो वीरवतीश्चार्चेत् स्रग्गंधाव
लिमंडनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ५१ सांवत्सरं पुंसवनं व्रतमेतदविप्लुतं ॥ धारयिष्यसि चेत्तु
भ्यं शक्रहा भविता सुतः ५२ बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः ॥ काश्यपं गर्भमाधत्त व्रतं चांजो दधार सा
५३ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ५४ नित्यं वनात्सुमन
सः फलमूलसमित्कुशान् ॥ पत्रांकुरमृदोपश्च काले काल उपाहरत् ५५ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥
प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ५६ नाध्यगच्छद्व्रतच्छिद्रं तत्परोथ महीपते ॥ चिंतां तीव्रां गतः शक्रः
केन मे स्याच्छिवं त्विह ५७ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्षिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहि
ता ५८ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगीशो योगमायया ५९ चकर्त सप्तधा गर्भं
वज्रेण कनकप्रभं ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः ६० ते तमूचुः पाट्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघां
ससि किमिंद्र भ्रातरो मरुतस्तव ॥ ६१ ॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो म
रुतां गणान् ६२

वारिश्चासावधौतांघ्रिश्च ५८ निद्रयापहृतं चेतो यस्याः ५९ मारोदीरित्युपलालयन् द्रवतान् पुनः सप्तधा चकर्त चिच्छेद कौ श्रीः
शिक इंद्र गणान् सप्त सप्त गणा वै मरुत इति श्रुतेः ५२
६० ६१ ६२

857
1981

सजूः सह ६५ ६६ ६७ दित्या निःकपटमुक्तेसतिइंद्रोपि निष्कपटमेवाह ॥ अंबेति ॥ लब्धमंतरं येन अर्थ एव बुद्धिर्यस्य ६९ गुण

नममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेन यथा भवान् ६३ सकृदिष्ट्वादिपुरुषं पुरु
षो याति साम्यतां ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ६४ सजूरिंद्रेण पंचाशद्देवास्ते मरुतोभवन् ॥ व्यपोह्य मा
तृदोषं ते हरिणा सोमपाः कृताः ६५ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता
६६ अथेंद्रमाह ताताहमादित्यानां भयावहं ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करं ६७ एकः संकल्पितः पुत्रः सप्तस
प्ताभवन्कथं ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ६८ इंद्र उवाच ॥ अंब तेहं व्यवसितमुपधार्यागतोंतिकं ॥ लब्धांत
रोच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ६९ कृतो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ॥ तेपि चैकैकशो वृक्णाः सप्तधा नापि
मम्रिरे ७० ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यानुषंगिकी ७१ आराधनं
भगवत ईहमाना निराशिषः ॥ ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः स्मृताः ७२ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्व
रं ॥ को वृणीते गुणस्पर्शं बुधः स्यान्नरकेपि यत् ७३ तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षंतुमर्हसि मातस्त्वं
दिष्ट्या गर्भो मृतोत्थितः ७४ शुक उवाच ॥ इंद्रस्तयाभ्यनुज्ञातः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रि
दिवं प्रभुः ७५ एवं ते सर्वमाख्यातं यन्मा त्वं परिपृच्छसि ॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ७६ इति श्री
भागवते महापुराणे षष्ठस्कंधे मरुतोपाख्याने अष्टादशोध्यायः १८ श्रीगोविंद ॥

स्पर्शविषयभोगं बुधः को वृणीत यद्यस्मान्नरकेपि स्यात् ७३ महीयसि ॥ हे महंत मे ॥ मृतः सन्नुत्थितः ७४ ७५ ७६ इति षष्ठे
ष्टादशोध्यायः १८

ऊनविंशे तु यत्प्रोक्तं कश्यपेनादितेर्व्रतं ॥ तदेव विधृतं लोके हिताय हरितोषणं १ तस्य प्रकारमितिशेषः ॥ मार्गशिरे मासे शुक्ल
पक्षे आदितः प्रतिपदि २ अनुमंत्र्य दृष्ट्वा शुक्लादंतायस्यासा ॥ शुक्लदती धौतदंअलंकृता सती पूजयेत् ३ आदौ तावन्मंत्रमक्षा
रमंत्रमाह त्रिभिः ॥ ते तुभ्यं अलं पर्याप्तमेव सर्वं न किंचिदन्यैः कृत्यमस्ति अतः केवलं ते तुभ्यं नमोस्तु पर्याप्तो हेतवः निरपेक्षा

राज्ञोवाच ॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितं ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति १ श्रीशुक उवा
च ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः २ निशम्य मरुतां जन्म
ब्राह्मणाननुमंत्र्य च ॥ स्नात्वा शुक्लदती शुक्ले वसीतालंकृतांबरे ३ पूजयेत्प्रातराशात्प्राक्भगवंतं श्रिया सह
॥ अलं ते निरपेक्षाय पूर्णकाम नमोस्तु ते ४ महाविभूतिपतये नमः सकलसिद्धये ॥ यथा त्वं कृपया भूत्या तेज
सा महिमौजसा ५ जुष्ट ईश गुणैः सर्वैस्ततोसि भगवान्प्रभुः ॥ विष्णुपत्नि महामाये महापुरुषलक्षणे ॥ प्रीये
था मे महाभागे लोकमातर्नमोस्तु ते ६ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह म
हाविभूतिभिर्बलिमुपहराणीति ७ अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउप
वीतविभूषणगंधपुष्पधूपदीपोपचारांश्च समाहितउपाहरेत् ८ हविःशेषं तु जुहुयादनले द्वादशाहुतीः ९
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ॥ भक्त्या संपू
जयेन्नित्यं यदीच्छेत्सर्वसंपदः १०

यहे पूर्णकाम महाविभूतिपतये लक्ष्मीपतये ॥ सकलाः सिद्धयो मायाद्या यस्मिन् तस्मिन् ४ भो ईश यथा यथावत् त्वं कृपादि
भिर्जुष्टः अन्यैश्च सत्यसंकल्पादिभिः सर्वैर्गुणैः ५ ततः तस्मात् महापुरुषस्य परमेश्वरस्यैव लक्षणानि निरपेक्षत्वादीनि य
स्यास्तस्याः संबोधनं ६ पूजामंत्रमाह ॥ ॐ नम इति ७ ॥ ८ ॥ हविःशेषमुपहारावशिष्टं ९ होममंत्रस्योद्दर्शयति ॥ ॐ मिति ॥
प्रकर्षेण भवंत्याभ्यामिति प्रभवौ १०

559
1981

११ १२ १३ इज्याय ज्ञाभिनिवर्तकः ॥ पुरुषस्य व्यापारो भावनाख्यः ॥ क्रिया लौकिकी १४ प्रत्ययो नामरूपयोः प्रकाराः ॥ अ
पाश्रयः तयोराधारः १५ १६ १७ १८ महापुरुषचेतसा ईश्वरबुध्या उपरमेत् ॥ भजेत् पतिः स्वयं प्रेमशीलः सन् पत्न्याः कर्मा
णि बिभृयात् ॥ तदनुकूलो भवेदित्यर्थः १९ यत्तोरं पत्न्योर्मध्ये एकतरेण उभयोरपि भवति २० न विहन्यात् न विच्छिंद्यात् २१ २२

प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेन चेतसा ॥ दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ११ युवां तु विश्वस्य विभू जगतः का
रणं परं ॥ इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १२ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ॥ त्वं सर्वयज्ञ
इज्येयं क्रियेयं फलभुग्भवान् १३ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् ॥ त्वं हि शारीर्यात्मा श्रीः शरीरेंद्रिया
शयः १४ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ १५ तथा म उत्तमश्लो
क संतु सत्या महाशिषः ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह १६ तन्निःसार्योपसरणं दत्वाचमनमर्चयेत् ॥ त
तः स्तुवीत स्तोत्रेण भक्तिप्रह्वेन चेतसा १७ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं ॥ पतिं च परया भक्त्या महापुरुष
चेतसा १८ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च १९ कृतमे
कतरेणापि दंपत्योरुभयोरपि ॥ पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः २० विष्णोर्व्रतमिदं बिभ्रन्न विहन्या
त्कथंचन ॥ विप्रान्स्त्रियो वीरवतीः स्रग्गंधबलिमंडनैः २१ अर्चयेदहरहर्भक्त्या देवं नियममास्थितः ॥ उद्वास्य
देवं स्वे धाम्नि तन्निवेदितमग्रतः २२ अद्यादात्मविशुध्यर्थं सर्वकामर्धये तथा ॥ एतेन पूजाविधिना मासान्द्वादश
हायनं ॥ नीत्वाथोपरमेत्साध्वी कार्तिके चरमेहनि २३

द्वादश मासा नित्यक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात् हायनमित्युक्ते
तन्मध्ये पतितस्तस्यापि प्रसंगात् ॥ तदुभयमुक्तं ॥ उपरमेत् ॥ उपवसेत् २३

भागव० ५४ श्वोभूते प्रभाते सति पयसि श्रितेन पक्केन २४ पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन २ सप्रजास्त्वं सत्पुत्रत्वमि ष०
त्यर्थः ॥ यत्शेषं २६ अवीरा विधवा २७ धनेश्वरी सत्यपि या सा दुर्भगा साधुभगा भवति २८ य आमयावी योगी स विरु
जा विशिष्टया रुजा विमुच्यते इंद्रियैः संकल्पं देहं विंदेते निशेषः पठन् यो वर्तेत तस्या पितॄणां देवतानां चानंतस्तृप्तिर्भवतीत्य

श्वोभूते प्र उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ॥ पयःशृतेन जुहुयात् चरुणा सह सर्पिषा २४ पाकयज्ञविधानेन
द्वादशैवाहुतीः पतिः ॥ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः २५ प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञ
या ॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः २६ दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगं ॥ एतच्चरित्वा वि
धिवत् व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्री चैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहं २७
कन्या च विंदेत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिं ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपम
ग्र्यं २८ विंदेद्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्पदेहं ॥ एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवता
नां २९ तुष्टाः प्रयच्छंति समस्तकामान् होमावसाने हुतभुक् श्रीहरिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभि
हितं महत्ते ३० इति श्रीभागवते महापुराणे षष्ठस्कंधे परमहंस्यां संहितायां पुंसवनव्रतकथनमेकोनविंशोऽध्यायः
१९

र्थः २९ उपसंहरति राजन्निति महत्पुण्यं जन्म महद्व्रतं च ॥ षष्ठस्कंधनिगूढार्थपदभावार्थदीपिका ॥ सद्भिरासेव्यतामेषा श्री:
यतिश्रीधरनिर्मिता ३० इति षष्ठस्कंधटीकायां एकोनविंशोऽध्यायः १९ ५४

861/1981

ब्रह्मनिर्वाणं ब्रह्मानंदस्तत्र समाधिमेकाग्र्यमाश्रितं योगकक्षं योगपट्टं वामजानुनी दृढीकरणार्थं विशेषेणाश्रितवंतं ॥ मनुन
शीला मुनयस्तेषामाद्यं मुख्यं ॥ अर्हत्तमो विष्णुर्वामनमूर्तिः कश्यपस्य यस्य ३८ महर्षिभिः सहिताः येनीललोहितं अनुवर्तंते
ते पितस्मै वंदनं चक्रुः एवं सर्वैर्नमस्कृतः प्राह ॥ कृतः प्रणामो देवैर्यस्मै तं ३९ यद्यपि नीचावन्मालेन नमस्कारोऽपि तथापि तवैश्वर्य
महद्वेप्रीत्याह ॥ जान इति ॥ विश्वस्य ईशं जाने तत्र हेतुः ॥ जगतो योनिर्या शक्तिः प्रकृतिः जीवं च यः शिवः पुरुषः तयोः प्रकृतिपुरु
षयोः परं कारणं तथापि निर्भेदं ब्रह्मनिर्विकारं तदेव त्वमिति जाने ४० ननु विरुद्धमेतत्तत्राह ॥ त्वमेव सरूपयोरविभक्तयोः शि

तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षं ॥ सलोकपाला मुनयो मुनीनां आद्यं मुनिं प्रांजलयः
प्रणेमुः ३७ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिं ॥ उत्थाय चक्रे शिरसाभिवादनं अर्हत्तमः
कस्य यथैव विष्णुः ३८ तथापरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललोहितं ॥ नमस्कृतः प्राह शशांकशे
खरं कृतप्रणामं प्रहसन्निवात्मभूः ३९ जाने त्वामस्य विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं य
त्तद्ब्रह्म निरंतरं ४० त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ४१
त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरं ॥ त्वयैव लोकेऽवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दध
ते धृतव्रताः ४२ त्वं कर्मणां मंगल मंगलानां कर्तुः स्वलोकं तनुषे स्वः परं वा ॥ अमंगलानां च तमिस्रमुल्बणं विप
र्ययः केन तदेव कस्यचित् ४३

शिवशक्त्योः क्रीडन् विश्वसृष्ट्यादि करोषि ऊर्णपटः ऊर्णनाभिरिव ॥ सरूपयोरिति पाठे स्वांशयोः अतो न विरोधः ४१ धर्ममर्थं
च दोग्धि या त्रयी तस्या अभिपत्तये रक्षणाय अध्वरं कृतवानसि ॥ यद्वा ॥ हे धर्मार्थदुघ अभिपत्तये तत्साम्ये दक्षेण सूत्रेण निमि
त्तेन ॥ सेतवो वर्णाश्रममर्यादा ॥ अवसिता निबद्धा निर्णीता इति वा ॥ श्रद्दधते श्रद्धया अनुतिष्ठंतीति ४२ सर्वकर्मफलदातापि
त्वमेवेत्याह ॥ हे मंगल मंगलानां कर्मणां कर्तुः स्वः स्वर्गं परं मोक्षं वा तनुषे अमंगलानामशुभानां कर्मणां कर्तुश्च तमिस्रं नरक
तनुषे तत्र केन हेतुना तदेव तस्मिन् एव कस्यचिद्विपर्ययो भवति ४३ श्रीगोविंद ॥ ७ ॥ ७ ॥ ७ ७ ॥

॥इतिभागवतषष्ठस्कंधसमाप्तः॥

863
1981

865
1981

अथसप्तमस्कंधप्रारंभः ॥ छ ॥

भा० स०

१ श्रीगणेशायनमः श्रीकृष्णचरणावहमीडे॥ ॥स्वभक्तपक्षपातेनतद्विपक्षविदारणं नृसिंहमद्भुतंवंदेपरमानंदविग्रहं १ अतः पंचदशाध्यायेसप्तमेवर्ण्यतेधुना ऊतिश्चवासनाप्रोक्तानत्तत्कर्मानुसारिणी २ अशुभाचशुभाचेतिद्विधाशाहेतुभेदतः अशुभामहतोकोपात्शुभामहदनुग्रहात् ३ हरिद्वारपथार्यद्वत्वैकुंठेवसतोरपि चतुःसनकशापाद्विप्रदुष्टाद्यशुभवासना ४ यथाहिदैत्यगर्भेहिप्रह्लादस्यसतःस्थिरा नारदानुग्रहादासविष्णौसद्भक्तिवासना ५ स्वभक्तंचसदाविष्णुर्हि षतमपिरक्षति तृतीयेथभवेद्दास्त्वावकरोदात्मसात्पुनः ६ अतोमनीषिणायत्नःकार्योमहदनुग्रहे इत्येतदर्थमत्रोन्नामन्त्रलक्षणमुच्यते ७ तत्रादौदशभिर्दैत्यतत्पुत्रमतिभेदतः महत्कोपानुकंपोत्थवासनाभेदउच्यते ८ सद्वासना

श्रीमोरयागोसावि राजोवाच समःप्रियःसुहृद्ब्रह्मन्भूतानांभगवान्स्वयं इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोयथा १ नह्यस्यार्थःसुरगणैःसाक्षान्निश्रेयसात्मनः नैवासुरेभ्योविद्वेषोनोद्वेगश्चागुणस्यहि २ इतिनःसुमहाभागनारायणगुणान्प्रति संशयस्सुमहान्जातस्तद्भवांश्छेत्तुमर्हति ३

चयुज्यतेकर्मभिःशुद्धचेतसः परैस्तत्पंचभिस्तस्माक्रियतधर्मनिर्णयः ९ तत्रतुप्रथमेध्यायेहिरण्यकशिपोःसुत विष्णुस्थविरोधस्तुविप्रशापजईर्यते १० यदुक्तंपूर्वस्कंधांतेहतपुत्रादितिश्शोकपार्ष्णिग्राहेणविष्णुना मन्युनाशोकदीप्तेनज्वलंतीपर्यायचिंतयदिति तच्छ्रुत्वाविस्मितःपरिक्षित्पृच्छति समइतित्रिभिः नहिसमस्यसुहृदश्चवैषम्यंनाभास्तीति नच प्रियस्यप्रीतिकर्तृषुवैषम्ययुक्तमित्यर्थः किंचयस्यपःप्रयोजनंसिध्यतिसतत्पक्षपातीभवतियस्याद्विभेतितानद्वेष्टि द्वेषणहंतिननुतदत्रास्तीत्याह नहीति निःश्रेयसंपरमानंदएवात्मास्वरूपंयस्य असुरेभ्यश्चोद्वेगोभयंनास्तिअतोविद्वेषोनास्त्येवतत्रहेतुःअगुणस्येति २ श्रीनारायणस्यगुणान्अनुग्रहनिग्रहादीन्प्रतितत् तंसंशयं ३ श्रीगोपाल॥ १

867/1981

भागवतस्यप्रह्लादस्यमाहात्म्यं ४ कृष्णायव्यासायकृष्णंमुनिंनत्वेत्यर्थः ५ यस्मात्प्रकृतेःपरः अतोनिर्गुणः अतएवअजः अतएवअव्यक्तः रागद्वेषादिनिमित्तभूतदेहेंद्रियादिरहितः सोपिस्वमायागुणंसत्वादिकमाविश्यअधिष्ठायबाध्यान्यतियद्दादेवासुरादीनांयापरस्परंबाध्यबाधकतातांप्राप्तस्तत्रहेतुर्जातइत्यर्थः ६ तत्रगुणानांस्वीयत्वेसतिप्राकृतत्वरूपवत्तननुतदस्तीत्याह नैतेषामिति ननुस्वेच्छयागुणाधिष्ठानेनपिपक्षपातेनवैषम्यंस्यादेवन तस्यकालकृतत्वादित्याह नतेषामितिसार्द्धेन उल्हासोवृद्धिः ७ सत्वस्यजयकालेदेवादीन्ऋषींश्चअभजनतत्तद्देहेप्रविश्यवर्द्धयतीत्यर्थः रजसो

श्रीशुकउवाच साधुपृष्टंमहाभागहरेश्चरितमद्भुतं यद्भागवतमाहात्म्यंभगवद्भक्तिवर्द्धनं ४ गीयते परमंपुण्यमृषिभिर्नारदादिभिः नत्वाकृष्णायमुनयेकथयिष्येहरेःकथा ५ निर्गुणोपिह्यजोव्यक्तोभगवान्प्रकृतेःपरः स्वमायागुणमाविश्यबाध्यबाधकतांगतः ६ सत्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः नतेषांयुगपद्राजन्ह्रासउल्हासएववा ७ जयकालेतुसत्वस्यदेवर्षीन्रजसोसुरान् तमसोयक्षरक्षांसितत्कालानुगुणोभजत् ८ ज्योतिरादिरिवाभातिसंघातान्नविविच्यते विदंत्यात्मानमात्मस्थंमथित्वाकवयोंततः ९ श्रीकृष्णः छ॰ छ॰ छ॰ छ॰

जयकालेतमसोजलकालेइत्यन्वयः ८ तस्यकालस्यानुगुणःसन्समस्यापिनिमित्तभेदेनवैषम्येदृष्टांतः ज्योतिर्यथाकाष्ठादिषु जलंयथापात्रेषु आकाशोयथाघटादिषु तथानानारूपआभाति ननुतर्हितदविवेकेनप्रतीयेत तत्राह। संघातात्सुरादिदेहात्नविविच्यतेनपृथक्प्रतीयते तर्हितात्सतंनीतिकुतोज्ञायतेतत्राह। विदंतीति आत्मस्थंपरमात्मानंकवयोनिपुणाःमथित्वातत्कार्यदर्शनलिंगेनविचार्यज्ञानं अंततःस्वभावकर्मादिवादनिषेधनविदंतीतिपाठात् भोपिज्ञानमेव अत्रापिज्योतिरादिरिवेतिद्रष्टव्यं यथास्तूर्यकांतादादाहदर्शनात्ज्योतिर्ज्ञायतेयथाचगंधदर्शनाद्वायुरित्यादिवा ९ छ॰

भा० स०
२

तदेवं मायागुणवशेनैतद्वैषम्यं नतत्स्वाभाविकमित्युक्तं। तर्हिपारतंत्र्यादनीश्वरत्वमात्रांक्याह यदा आत्मनोजीवस्य भोगाय
पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदासाम्येन स्थितंरजः पृथक्सृजति विचित्रासुतासुपुरिरमः क्रीडितुमिच्छुः सत्वं
पृथक्सृजति शयिष्यमाणः संहरिष्यन्तमः पृथगिरयति प्रेरयति १० यदासिसृक्षुरित्यादिनिर्देशात् प्रतीतंकालपारतं
त्र्यंवारयन्प्रधानपुरुषपारतंत्र्यमपिवारयतिकालमिति हेनरदेव प्रधानपुंभ्यांनिमित्तभूताभ्यां सत्यकृत अमोघकर्ताईश्वर
तयोः सहकारित्वेनाश्रयभूतं चरंनवर्तमानंकालंस्वयमेवसृजति स्वचेष्टानुरूपत्वात्कालस्य चतत्पारतंत्र्यामित्यर्थः तथापिप्र
स्तुतेकिमायातंतत्राह यएवकालः सः सत्वमवधयति वर्द्धयति अतोहेतोईषितापिईश्वरोपिसत्वप्रधानंसुरनीकंदेवसमूह

यदासिसृक्षुः पुरआत्मनः परो रजः सृजत्येषपृथक्स्वमायया सत्वंविचित्रासुरिंसुरीश्वरः शयिष्यमाणस्तम
ईरयत्यसौ १० कालंचरंतंसृजतीशआश्रयंप्रधानपुंभ्यांनरदेवसत्यकृत् यएषराजन्नपिकालईषितासत्वंसु
रानीकमिवैधयत्यतः ११ तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः ११ अत्रैवोदाह
तः पूर्वः इतिहासः सुरर्षिणा प्रीत्यामहाक्रतौराजन्पृच्छतेजातशत्रवे १२ दृष्ट्वामहदुतंराजाराजसूयेमहा
क्रतौ वासुदेवेभगवतिसायुज्यंचेदिभूभुजः १३ तत्रासीनंसुरऋषिंराजापांडुसुतः क्रतौ पप्रच्छविस्मितमना
मुनीनांशृण्वतामिदं १४ युधिष्ठिरउवाच अहोअत्यद्भुतंह्येतत्दुर्लभैकांतिनामपि वासुदेवेपरेतत्वेप्राप्तिश्चै
यस्यविद्विषः १५

मेधयतीत्यर्थः ११ तत्प्रत्यनीकानसुरप्रतिपक्षान्प्रमिणोतिहिनस्तीत्यन्वयः उरुश्रवाः कीर्तिर्यस्यसः कालशक्त्यु
त्थितगुणगतंवैषम्यंसन्निधिमात्रेणतदधिष्ठानस्फुरतीतिप्रकरणार्थः ११ इदानींतुतयोर्वधोनसुरपक्षपातेनकिंतुब्र
ह्मशापेनात्सुरीयोनिप्राप्तयोरनुग्रहार्थएवेतिवक्तुमितिहासमुपक्षिपति अत्रैवेति १२ द्वेषादिरहितस्यापिदैत्यवध
चेदिभूभुजः शिशुपालस्य १३ १४ एकांतभक्तानामपिदुर्लभाप्राप्तिः विद्विषोजातेत्येतदद्भुतंहितत १५ ०श्रीः॥

०: ०: ०: ०: ०: ०:
२

869
1931

तस्यतुवैतननरकपातएवोचितइत्याह भगवन्निंदयावेन नमसिनरके १६ दमघोषसुतः शिशुपालः कलभाषणात्
बाल्यकोमलभाषणमारभ्यसंप्रतिअधुनापिअमर्षःक्रोधीमत्सरीवा १७ श्वित्रः कुष्टं १८ दुरवग्राह्यंदुःप्रापंधाम
स्वरूपंयस्यतस्मिन् लयंसायुज्यंतज्ज्ञानैकप्रामाण्येनसिद्धवन्निर्दिशः १९ एतत्अद्भुतनमंअतः एतत्प्रतिभ्राम्यति
भगवान्सर्वज्ञस्त्वंब्रहीति २० अभाष्यसंबोध्यसीदंतिनिषीदंत्यस्यामितिसतस्समातस्याः सदः सदसः शृण्वत्याः सत्याः
कथाः प्राहेत्यन्वयः २१ अहोभगवन्निंदकस्यनरकपातेनभाव्यमितिवदतस्तवकोभिप्रायः भगवत्पीडाकरत्वेनवा न

एतद्वेदितुमिच्छामः सर्वएतेवयंमुने भगवन्निंदयावेनोद्विजैस्तमसिपातितः १६ दमघोषसुतःपाप
आरभ्यकलभाषणात् संप्रत्यमर्षीगोविंदेदंतवक्त्रश्वदुर्मतिः १७ शपतोरसकृद्विष्णुंयद्ब्रह्मपरम
व्ययं श्वित्रोनजातोजिह्वायांनांधंविविशतुस्तमः १८ कथंतस्मिन्भगवतिदुरवग्राह्यधामनि पश्यतां
सर्वलोकानांलयमीयतुरंजसा १९ एतद्भ्राम्यतिमेबुद्धिर्दीपार्चिरिववायुना ब्रूह्येतदद्भुततमंभगवा
न्तत्रकारणं २० श्रीशुकउवाच राज्ञस्तद्वचआकर्ण्यनारदोभगवानृषिः तुष्टः प्राहतमाभाष्यशृण्वं
त्यास्तत्सदःकथाः २१ निंदनस्तवसत्कारन्यक्कारार्थंकलेवरं प्रधानपरयोराजन्नविवेकेनकल्पितं २२
हिंसातदभिमानेनदंडपारुष्ययोर्यथा वैषम्यमिहभूतानांममाहमितिपार्थिव २३ श्रीरामाजयति॥

दभावेपिसुरापानादिवन्निषिद्धनिंदाचरणाद्वा तत्रतावत्देहाभिमानकृतनिंदादिनिमित्तत्वात्पीडादीनांभगवतश्च
तदभावान्नपीडाशंकास्तीत्याह सार्द्धस्त्रिभिः निंदनंदोषकीर्तनं न्यक्कारस्तीरस्कारः निंदनस्तुत्यादिज्ञानार्थंप्रधानपु
रुषयोरविवेकेनकलेवरंकल्पितंरचितं २२ तदभिमानेनभूनिंदनस्तुत्यादिज्ञानार्थंप्रधानपुरुषयोरविवेकेनकलेवरंक
ल्पितंरचितं॥ तदभिमानेनभूतानांयथाममाहमितिवैषम्यंतत्कृतहिंसादिकंचनभवतितथानयस्येत्यन्तरेणान्वयः दं
डस्ताडनं पारुष्यंनिंदातयोर्हेतुभूतयोर्हिंसापीडाचभवति २३ श्रीकृष्णायवासुदेवायहरयेपरमात्मने॥ ०:

यस्मिन्निबद्धोयमभिमानस्तस्यदेहस्यवधात्तद्वधश्चयथातथायस्याभिमानोनास्ति अस्यपरमेश्वरस्यहिंसाकेनहेतुनाक
ल्प्यतेनकेनापि अभिमानाभावहेतुः कैवल्यात् अद्वितीयत्त्वेनभिन्नत्वाभावात् वैषम्याभावहेतुः आखिलात्मनः सर्वात्मन
इति २४ तर्हिकिमितिहंतितत्राह यस्मादिति दमकर्तुः हितार्थंदंडकरोतीत्यर्थः यस्माद्भगवतिनिंदादिकृतेवैषम्यंनास्तित
स्माद्येनकेनाप्युपायेनध्यायतस्तेनवनिंदादिकृतपापस्यापिनाशात्तत्सायुज्यंयुक्तमित्याशयेनाहतस्मादिति सप्तभिः
निर्वैरेणनास्तिवैरंकेनापियस्मिंस्तेनभक्तियोगेनेत्यर्थः युंजीतमनइतिशेषः यस्मादेतैरुपायैः पृथङ्नईक्षते २५ न

यन्निबद्धोभिमानोयंतद्वधात्प्राणिनांवधः तथानयस्यकैवल्यादभिमानोखिलात्मनः २४ परस्यदमकर्तुर्हि
हिंसाकेनास्यकल्प्यते तस्माद्वैरानुबंधेननिर्वैरेणभयेनवा २५ स्नेहात्कामेनवायुंज्यात्कथंचिन्नेक्षतेपृथक्॥२५
तथावैरानुबंधेनमर्त्यस्तन्मयतामियात् नतथाभक्तियोगेनइतिमेनिश्चितामतिः २६ कीटःपेशस्कृतारुद्धः
कुड्यायांतमनुस्मरन् संरंभभययोगेनविंदतेतत्स्वरूपतां २७ एवंकृष्णेभगवतिमायामनुजईश्वरे वैरे
णपूतपाप्मानस्तमापुरनुचिंतया २८ कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरेमनः आवेश्यतदघंहित्वा
बहवस्तद्गतिंगताः २९ गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावा
यंविभो ३० कतमोपिनवेनःस्यात्पंचानांपुरुषंप्रति तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् ३१

नेत्यपिवैरानुबंधःश्रेष्ठइत्याह यथेति २६ नतथाभक्तियोगेनापीति अत्रदृष्टः कीटःपेशस्कृताभ्रमरेणसंरंभोद्वेषःभ
यंचसएवयोगस्तेनवैरेणयाअनुचिंतयातयैवपूतःपाप्मायेषांतेतंप्रापुः २८ तद्यंकामादिकंनिमित्तंपापंहित्वा २९ ३०
नार्हवेनःकिमितिनरकेपातितः तीव्रध्यानाभावात्पापमेवतत्रफलितमित्याह कतमोपीति पुरुषंश्रीहरिंप्रति पु
रुषस्यकामासंभवात् भयादिभिश्चिंतयतांपंचानांमध्येनैकतमोपीत्यर्थः ३१ श्रीकृष्णायनमः॥ ९

871
1981

नेदंविभितिहासप्रस्तावकथामुक्त्वाश्रीकृष्णशिशुपालस्यवैरानुबंधएकोहेतुरित्यपेक्षायांतमेवेतिहासंवक्तुमाह मातृष्वस्रे
यइति पदात्वैकुंठात्प्रच्युतौ ३२ हरिदासोअभिमर्शातिअभिभवतीतितथा अश्रद्धेयः अनादरणीयइव असंभवत्वात्
भवोजन्म ३३ असंभवमेवाह जन्महेतुभूतैर्देहेंद्रियासुभिर्हीनानांशुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसंबंधनसं
बंधमेतदाख्यानमाख्यातुमर्हसि ३४ ३५ कथंभूताः पंचषड्हायनानियेषांतेअर्भाबालाः तद्वदाभायेषांते तेषामपि

मातृष्वस्रेयोवश्चैद्योदंतवक्त्रश्चपांडव पार्षदप्रवरौविष्णोर्विप्रशापात्पदच्युतौ ३२ युधिष्ठिरउवाच कीदृ
शःकस्यवाशापोहरिदासाभिमर्शनः अश्रद्धेयइवाभातिहरेरेकांतिनांभवः ३३ देहेंद्रियासुहीनानांवैकुंठ
पुरवासिनां देहसंबद्धसंबंधमेतदाख्यातुमर्हसि ३४ नारदउवाच एकदाब्रह्मणःपुत्राविष्णोर्लोकंयदृच्छया
सनंदनादयोजग्मुश्चरंतोभुवनत्रयं ३५ पंचषड्हायनार्भाभाःपूर्वेषामपिपूर्वजाः दिग्वाससःशिशून्म
त्वाद्वास्थौतान्प्रत्यषेधतां ३६ अशपन्कुपिताएवंयुवांवासंनचार्हथः रजस्तमोभ्यांरहितेपादमूलेमधुद्विषः
३७ पापिष्ठांवासुरीयोनिंबालिशौयातमाश्वतः एवंशप्तौस्वभवनात्पतंतौतैःकृपालुभिः ३८ प्रोक्तौपुन
र्जन्मभिर्वांत्रिभिर्लोकायकल्पतां जज्ञातेतौदितेःपुत्रौदैत्यदानववंदितौ ३९ हिरण्यकशिपुर्ज्येष्ठोहि
रण्याक्षोनुजस्ततः हतोहिरण्यकशिपुर्हरिणासिंहरूपिणा ४० हिरण्याक्षोधरोद्धारेबिभ्रताशौकरंवपुः
४० हिरण्यकशिपुःपुत्रंप्रह्लादंकेशवप्रियं जिघांसुरकरोन्नानायातनामृत्युहेतवे ४१ तंसर्वभूतात्मभू
तंप्रशांतंसमदर्शनं भगवत्तेजसास्पृष्टंनाशक्नोद्धंतुमुद्यमैः ४२ श्रीकृष्णायवासुदेवाय॥

रीच्यादीनामपि दिग्वाससःदिगंबराःअतःशिशून्मत्वा ३६ वासंनार्हथःकुतःपुनस्तत्सेवामितिचकारार्थः ३७ हेबा
लिशौअतोहेतोःआशुयातं ३८ वांयुवयोस्त्रिभिर्जन्मभिर्लोकायस्वस्थानप्राप्तयेकल्पतां अयंशापःसमाप्यतां
मितिप्रोक्तावित्यर्थः ३९ धरोद्धारेनिमित्तेतत्सन्निपातीहतः ४० हिरण्यकशिपोर्वधेकारणंसूचयति हिरण्यकशिपुः
पुत्रमिति ४१ सर्वभूतानामात्मभूतं कुतःसमंब्रह्मैवपश्यतीतितथातं अतःप्रशांतंद्वेषादिरहितं अतएवभग
वत्तेजसास्पृष्टंव्याप्तं उद्यमैः शस्त्रप्रहारादिभिः ४२

विश्रवसः सुतौ ४३ न्यहनत्हतवानित्यर्थः तर्हितंदेवकुथनीयमित्यत्रकमितकंप्रत्यहरामवीर्यमिति ४४ कृत्स्नचक्रेणाह
तमंहोयस्यांमोनयोः पापमेवहतंनतुताविल्यर्थः ४५ ४६ येनकारणेनप्रह्लादस्याच्युतात्मनाअच्युतेनकचिनत्वं तदपित्रस्ती
तिशेषः ४७ इतिश्रीसप्तमेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांटीकायांप्रथमोध्यायः १ द्वितीयेतिदुर्गेणा
लोकंविप्लाव्यदानवैः तद्धतज्ञ्ञातपुत्रादीन्हरिनहोमेरसांत्वयन् १ भगवद्वेषएवतद्वेषेपिकारणमित्याशयेनाह भ्रातरीत्यादि

ततस्तौराक्षसौजातौकेशिन्यांविश्रवस्सुतौ रावणः कुंभकर्णश्चसर्वलोकोपतापनौ ४३ तत्रापिराघवोभूत्वा
न्यहनच्छापमुक्तये रामवीर्यश्रोष्यसित्वंमार्कंडेयमुखात्प्रभो ४४ तावेवक्षत्रियौजातौमातृष्वस्रात्मजौतव
अधुनाशापनिर्मुक्तौकृष्णचक्रहतांहसौ ४५ वैरानुबंधतीव्रेणध्यानेनाच्युतसात्मतां नीतौपुनर्हरेःपार्श्वंज
ग्मतुःकृष्णपार्षदौ ४६ युधिष्ठिरउवाच विद्वेषोदयितेपुत्रेकथमासीन्महामुने ब्रूहिमेभगवन्येनप्रह्लादस्या
च्युतात्मता ४७ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रथमोध्यायः १ श्रीनारदउवाच भ्रातर्येवं
विनिहतेहरिणाक्रोडमूर्तिना हिरण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा १ आहचेदंरुषापूर्णःसंदष्टदश
नच्छदः कोपोज्ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरं २ करालदंष्ट्रोग्रदृष्ट्यादुःप्रेक्ष्यभ्रुकुटीमुखः शूलमु
द्यम्यसदसिदानवानिदमब्रवीत् ३ भोभोदानवदैतेयाद्विमूर्द्धंस्त्र्यक्षशंबर शतबाहोहयग्रीवनमु
चेपाकइल्वल ४ विप्रचित्तेममवचःपुलोमन्शकुनादयः शृणुतानंतरंसर्वेक्रियतामाशुमाचिरं ५
सपत्नैर्घातितःक्षुद्रैर्भ्राताभेदयितःसुहृत् पार्ष्णिग्राहेणहरिणासमेनाप्युपधावनैः ६ तस्यत्यक्तस्व
भावस्यघृणेर्मायावनौकसः भजंतंभजमानस्यबालस्येवास्थिरात्मनः ७

ना एवंदेवपक्षपातेनकोपेन उत अतिशयेनज्वलद्भ्यांकोपाग्निधूमेनेवधूम्रमंबरंनिरीक्षमाणः २ करालदंष्ट्राभि
र्युक्तयाउग्रयादृष्ट्यादुःप्रेक्ष्यंभ्रुकुटियुक्तंमुखंयस्यसः ३ ४ समेनापिउपधावनैः भजनैःनिभिन्नभूतः पार्ष्णिग्राहे
णसता ६ एवंत्यक्तःस्वभावःसमत्वंयेनतस्य घृणेःशुद्धतेजोमयस्यापिमाययावनौकसः वराहरूपस्यसतःअस्थि
रात्मनः अव्यवस्थितचित्तस्य कुतः योयोभजतितंभजमानस्यअनुसरतः ७ ७ ७ ७ ४

873
198

तस्यरुधिरेणयावत्तर्पयिष्यामितावद्यूयंसुखंयातेतितृतीयेनान्वयः ८ ननुदेवैःतद्वधःकारितः अतस्तेकिंनहन्यंतेतत्राह
तस्मिन्कूटकपटेअहितेप्रतिपक्षेकृतेसतिभिन्नेतंयस्यैतिवा नष्टेअदृष्टेसतिदेवाःशुष्यंतिस्वयमेवनाशंयास्यंति कुतः विष्णुरे
वप्राणायेषांते ९ तपोयज्ञादियुक्तानस्सूदयध्वंघातयत १० ननुतैःकिमपराद्धंतत्राह विष्णुरिति विष्णुर्हिद्विजानांक्रियाअनु
ष्ठानंमूलंयस्यसः यतोसौयज्ञोधर्ममयश्च परायणंपरमःआश्रयः अतोयज्ञरूपस्यविष्णोर्मूलत्वात्तमामनाद्द्यतदा
श्रयणात्तद्वध्याइतिभावः ११ तस्मात्परमंमंत्रंशृणुतेत्याह यत्रयत्रेति संदीपयतदहत वृश्चतछेदंकुरुत १२ १३ पुरंहट्टा

मच्छूलभिन्नग्रीवस्यभूरिणारुधिरेणवै रुधिरप्रियंतर्पयिष्येभ्रातरंमेहतव्यथः ८ तस्मिन्कूटेहितेनष्टेकृतमू
लेवनस्पतौ विटपाइवशुष्यंतिविष्णुप्राणादिवौकसः ९ तावद्यातभुवंयूयंब्रह्मक्षत्रसमेधितं सूदयध्वंतपोय
ज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियामूलोयज्ञोधर्ममयःपुमान् देवर्षिपितृभूतानांधर्मस्यचपरायणं
११ यत्रयत्रद्विजागावोवेदावर्णाश्रमक्रियाः तंतंजनपदंयातसंदीपयतवृश्चत १२ इतितेभर्तृनिर्देशमादा
यशिरसादृताः तथाप्रजानांकदनंविदधुःकदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटख
र्वटघोषांश्चददहुःपत्तनानिच १४ केचित्खनित्रैर्बिभिदुःसेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्
केचित्परशुपाणयः १५ प्रदहन्शरणान्यन्येप्रजानांज्वलितोल्मुकैः एवंविप्रकृतेलोकेदैत्येंद्रानुचरैर्मुहुः
१६ दिवंदेवाःपरित्यज्यभुविचेरुरलक्षिताः हिरण्यकशिपुर्भ्रातुःसंपरेतस्यदुःखितः १७ श्रीराम ॥

इभित्वाभस्मीकृत्वाहीनः व्रजोगवांवासः उद्यानंकृत्रिमंवनं क्षेत्रंव्रीह्यादेः आरामः अकृत्रिमंवनं आश्रमंऋषीणांस्था
नं आकाराःरत्नाद्युत्पत्तिस्थानं खेटः कृषीवलानांवासः खर्वटोदरिद्रोण्याश्रयोग्रामः घोषःआभीराणांवासः पत्तनंराज
धानी १४ खनित्रैःखननसाधनैः १९ आजीव्यानउपजीव्यान् १५ शरणानिगृहान् विप्रकृतेउपद्रुते १६ यज्ञभागानाम
भावात्दिवंपरित्यज्य तदेवंप्रजानांकदनंदानवेषुकुर्वत्सुस्वयंस्वर्गशान्त्यादिसाधयितुंतपस्तप्तुकामःप्रथमंपत्युःतवान्
तदाहहिरण्यकशिपुरित्यादिना १७ ७ ७ ७ ७ ॥

कोदकंप्रेतायप्रदेयमुदकं आदिशब्दात्प्रेतश्राद्धादिकंच १८ १९ २० हेवधूरितिभ्रातभार्यासंबोधयति २१ भवतुना
मतस्यश्लाघ्योवधः तथाप्यस्माकंबंधुर्गतएवेतिचेत्तत्राहभूतानामिति देवेनप्राचीनकर्मणाएकत्रनीतानांसंयोजितानां
पुनश्चस्वैःस्वैःकर्मभिरुन्नीतानांवियोजितानामिति २२ एवंलोकदृष्ट्याशोकंनिवार्यतत्वदृष्ट्यावारयतिनित्यइति॥
नित्यःमृत्युशून्यः अव्ययःअपक्षयशून्यः शुद्धःनिर्मलः सर्वगःसर्वगतः सर्ववित्सर्वज्ञश्चसर्वत्रहेतुः परःदेहादिव्यतिरि
क्तः अतोमृतइतिरुदनाइतिमलिनइतिवियुक्तइतिअज्ञइतिशोकोनकार्यः कथंतर्हितस्यसंसारःतत्राह धत्तइति आत्मनोमाय

हत्वाकटोदकादीनिभ्रातउशानसांत्वयत् शकुनिःशंबरंधृष्टिंभूतसंतापनंवृकं १८ कालनाभंमहानाभंह
रिश्मश्रुमथोत्कचं तन्मातारुषाभानुंदितिश्चजननीगिरा १९ श्लक्ष्णयादेशकालज्ञइदमाहजनेश्वरः २०
हिरण्यकशिपुरुवाच अंबांबहेवधूःपुत्रावीरंनार्हथशोचितुं रिपोरभिमुखेश्लाघ्यःशूराणांवधईप्सितः २१
भूतानामिहसंवासःप्रपायामिवसुव्रते दैवेनैकत्रनीतानांउन्नीतानांस्वकर्मभिः २२ नित्यआत्माव्ययःशु
द्धःसर्वगःसर्ववित्परः धत्तेसचात्मनोलिंगंमाययाविसृजन्गुणान् २३ यथांभसाप्रचलतातरवोपिचलाइव
चक्षुषाभ्रममाणेनदृश्यतेचलतीवभूः २४ एवंगुणैर्भ्राम्यमाणेमनस्यविकलःपुमान् यातितत्साम्यतां
भद्रेह्यलिंगोलिंगवानिति २५ एषआत्मविपर्यासोह्यलिंगेलिंगभावना एवंप्रियाप्रियैर्योगोवियोगःकर्म
संसृतिः २६ संभवश्चविनाशश्चशोकश्चविविधःस्मृतः अविवेकश्चचिंताचविवेकास्मृतिरेवच २७

यास्वाविद्ययालिंगंधत्ते गुणानुच्चावचान्देहांश्चसुखदुःखादीन्वाविशेषेणसृजन्स्वीकुर्वन् लिंगशरीरोपाधिःसंसा
रत्यर्थः २३ एतत्सदृष्टांतयतिद्वाभ्यां तरवःप्रतिबिंबिताः उपाधिधर्माउपहितेभवंतीतिदृष्टांतमुक्त्वाग्राहकधर्मा
ग्राह्येभवंतीतिदृष्टांतमाह चक्षुषेति २४ अविकलःपरिपूर्णएव तत्साम्यतांमनस्समतामित्यर्थः २५ लिंगभावनादेहाभि
मानः एषआत्मनोविपर्यासः अन्यथाभावस्तमेवाह प्रियैर्वियोगःअप्रियैर्योगश्च कर्मचसंसृतिश्चनानागर्भप्रवेशः
२६ ततश्चसंभवउत्पत्तिः विवेकस्यास्मृतिः अननुसंधानं २७ श्रीकृष्णायनमः ॐ ॐ ५

895
1281

अत्रापिशोकहेतुंविनावृथैवायंशोकइत्यस्मिन्नप्यर्थेप्रेतस्यमृतस्यकस्यचिद्येबांधवास्तेषांच २८ उपासततत्समीपेप्राप्
त्यास्थिताः २९ विशीर्णंरत्नमयंकवचंयस्य विभ्रष्टानिअभरणानिस्रजश्चयस्य शरेणनिर्भिन्नंहृदयंहृदयंयस्य असृक्शोस्ते
नआविलंलिप्तं ३० प्रकीर्णाःकेशायस्य व्यस्तेआक्षिप्तेयस्य रभसासंरंभेणदृष्टोदच्छदओष्ठोयेन रजसाकुंठंआवृतंमु
खांभोजंयस्य छिन्नमायुधंभुजौचयस्य ३१ तस्यपादयोरुपसमीपेआसमंतात्अपतन् ३२ विलापंचक्रुः ३३ विलापमे

अत्राप्युदाहरंतीममितिहासंपुरातनं यमस्यप्रेतबंधूनांसंवादंतंनिबोधत २८ उशीनरेष्वभूद्राजासुय
ज्ञइतिविश्रुतः सपत्नैर्निहतोयुद्धेज्ञातयस्तमुपासत २९ विशीर्णरत्नकवचंविभ्रष्टाभरणस्रजं शरनिर्भि
न्नहृदयंशयानमसृगाविलं ३० प्रकीर्णकेशंध्वस्ताक्षंरभसादष्टदच्छदं रजःकुंठमुखांभोजंछिन्नायुध
भुजंमृधे ३१ उशीनरेंद्रंविधिनातथाकृतंपतिंमहिष्यःप्रसमीक्ष्यदुःखिताः हताःस्मनाथेतिकरेणउरोभृशं
घ्नंत्योमुहुस्तत्पदयोरुपापतन् ३२ रुदंत्यउच्चैर्दयिताघ्रिपंकजंसिंचत्यअस्रैःकुचकुंकुमारुणैः विस्र
स्तकेशाभरणाःशुचंनृणांसृजंत्यआक्रंदनयाविलेपिरे ३३ अहोविधात्राकरुणेननःप्रभोभवान्प्रणी
तोदृगगोचरींदशां उशीनराणामसिवृत्तिदःपुराकृतोधुनायेनशुचांविवर्धनः ३४ त्वयाकृतज्ञेन
वयंमहीपतेकथंविनास्यामसुहृत्तमेनते तत्रानुयानंतववीरपादयोःशुश्रूषतीनांदिशयत्रयास्यसि
३५ एवंविलपतीनांवैपरिगृह्यमृतंपतिं अनिच्छतीनांनिर्हारमर्कोस्तंसन्यवर्तत ३६

वाह अहोइतिद्वाभ्यां अकरुणात्वमेवाकृः दृशांअगोचरींदशांयेनप्रभवान्प्रणीतःगमितः तेनविधात्रात्वमधुनाशु
चांविवर्द्धनःकृतोसीत्यन्वयः ३४ त्वयासुहृत्तमेनविनावयंकथंस्यामभवेमजीवेम अतःहेवीरयत्रत्वंयास्यसितत्र
तेअनुयातंअनुगमनंतवपादयोःशुश्रूषांकुर्वतीनामस्माकंदिशादेहि ३५ निर्हारंदाहार्थंनयनं अस्तंअस्तावलंप्र
ॐ ॐ ॐ ॐ ॐ॥ ॐ ति ३६

परिदेवितंरोदनंस्वपुर्यामेवाश्रुत्यश्रुत्वानचस्वयमेवोपगतोयमस्तानाह अहोइत्यादिना ३७ वयमास्मत्तोऽधिकानाम
पि लोकस्यविधिंजन्ममरणादिप्रकारंविपश्यतामपि विमोहमेवाह यत्रयस्मादव्यक्तादागतः तत्रैवगतं अपार्थंव्यर्थंशोचं
ति तदुक्तंगीतासु अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवनेति किंचस्वयमपिसुधर्मा
मतेनसहसमानामृत्युलक्षणोधर्मोयेषांतथाभूताअपि ३८ अबलादुर्बलाअपिवृकादिभिरभक्ष्यमाणावयं तत्रहेतुः

तत्रहप्रेतबंधूनामाश्रुत्यपरिदेवितं आहतान्बालकोभूत्वायमःस्वयमुपागतः ३७ यमउवाच
अहोअमीषांवयसाधिकानांविपश्यतांलोकविधिंविमोहः यत्रागतस्तत्रगतंमनुष्यंस्वयंधर्मा
अपिशोचंत्यपार्थं ३८ अहोवयंधन्यतमायदत्रत्यक्ताःपितृभ्यांनविचिंतयामः अभक्ष्यमाणा
अबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे ३९ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्य
वलुंपतेचसः तस्याबलाःक्रीडनमाहुरीशितुश्चराचरंनिग्रहसंग्रहेप्रभुः ४० पथिच्युतंतिष्ठ
तिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजी
वति ४१

योगर्भेरक्षतिसएवहिविश्वरक्षितारक्षति ३९ ननुतस्यरक्षणेकिंप्रयोजनंनकिंचिदपि किंतुक्रीडैवकेवलमित्या
ह यईशः इदंविश्वंसृजतिरक्षतिसंहरतिच भोभोअबलास्तस्येशितुःचराचरंक्रीडासाधनमाहुः अतःसएव
निग्रहेसंहारेसंग्रहेपालनेचप्रभुः ४० प्रभुत्वमेवान्वयव्यतिरेकाभ्यांदर्शयति पथीति दिष्टेनदैवेनईश्वरेणार
क्षितंतेनेश्वरेणाविहतं अस्यहतः तेनउपेक्षितः षष्ठीतृतीयार्थे ४१ श्रीकृष्णगोपालायवासुदेवाय ६
॥ ॥ ॥ ॥

1981

तदेवमात्मनोजन्ममरणादिकमंगीकृत्येश्वराधीनत्वान्नशोकःकार्यइत्युक्तं इदानींतुदेहानामेवजन्मादिनत्वात्मनइ
त्याहत्रिभिः भूतानिदेहानिजयोनिःस्वकारणभूतंलिंगशरीरंतन्निमित्तैःकर्मभिःभवंतिजायंतेतनभवंतिविनश्यंतिच
सर्वशःदेवादिदेहाअपि तत्राह नदाप्रकृतोदेहेस्थितोप्यात्मातस्यागुणैर्देहधर्मैःजन्मादिभिर्नबध्यतेनयुज्यतेयतःअ
न्यतमःदेहादत्यंतविलक्षणः ४२ नन्वहंकृशःस्थूलइत्यादौनवैलक्षण्यंप्रतीयतेतत्राह इदंमोहजंअविवेकादात्मत्वेन
ज्ञातं वस्तुतस्तुपृथगेव यतःईयतेदृश्यंतेभौतिकंयथागृहमित्यन्वयः अत्रैवंप्रयोगः दृष्टुर्भौतिकाच्चपुरुषात्शरीरंभिन्नं
दृश्यत्वात्भौतिकत्वाच्च यथाअत्यंताविवेकिनआत्मत्वेनाभिमतमपिगृहंततःपृथक्तद्वदिति भौतिकत्वानुमानेविवरणवन्ना

भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिकालेनभवंतिसर्वशः नतत्रहात्माप्रकृतावपिस्थितास्तस्यागुणैरन्यतमो
नबध्यते ४२ इदंशरीरंपुरुषस्यमोहजंयथापृथक्भौतिकमीयतेगृहं यथोदकैःपार्थिवतैजसैर्जनःकालेनजा
तोविकृतोविनश्यति ४३ यथानलोदारुषुभिन्नईयतेयथानिलोदेहगतःपृथक्स्थितः यथानभःसर्वगतंन
सज्जतेतथापुमान्सर्वगुणाश्रयःपरः ४४ सुयज्ञोनन्वयंशेतेमूढायमनुशोचथ यःश्रोतायोनुवक्तेहन
सदृश्येतकर्हिचित् ४५

त्मनोजन्माद्यभावमुपसंहरति यथाऔदकैःपरमाणुभिर्जातोबुद्बुदादिः यथाचपार्थिवैर्जातोघटादिः यथातैजसैर्जातः
कुंडलादिर्विनश्यतितथातैरेवत्रिविधैःपरमाणुभिर्जातोजनोदेहएवविकृतःपरिणतःसन्विनश्यतिनत्वात्मेत्यर्थः ४३
पृथगेवस्थानाभावेपिभिन्नत्वेदृष्टांतद्वयमाह यथानलोदारुषुव्यवस्थितोपिदाहकत्वेनप्रकाशकत्वेनभिन्नएवप्रतीयते
यथाचदेहगतोप्यनिलोनासिकादिषुपृथक्स्थितोपिसप्रतीयते देहस्थत्वेप्यात्मनःतद्धर्मयोगाभावेदृष्टांतमाह यथानभो
नसज्जतेक्वापिसंगंनप्राप्नोतितथापुमानपिसर्वेषांगुणानांदेहेंद्रियादीनांआश्रयःतैराश्रितोवापरःपृथगेवेत्यर्थः ४४ किं
चहेमूढाःयमनुशोचथसोयंयुष्माकंसुयज्ञःशेतेकिमितिशोचथ नन्वेतावंतंकालमसौशृणोतिअनंतरंप्रतिवक्तिच इदा
नींतस्यादर्शनात्मृतइतिशोचामइतिचेत्तत्रशोचनीयोनभवतिप्रागपितस्यादर्शनादित्याहयःश्रोतेति ४५ श्रीकृष्णा

ननुमुखनासिकासंचारीप्राणः श्रोतावक्ताचद्रष्टाच नासौश्रोतावक्ताचअचेतनत्वादित्याह नश्रोत्रेति महानसर्वेंद्रियचेष्टाहेतुः अ
तएवमुख्यः प्राणोवैमुख्यइतिश्रुतेः कस्तर्हिवक्ताश्रोतावातत्राह यस्त्विहदेहेंद्रियैः स्तत्तदर्थद्रष्टाआत्मासतुप्राणदेहाभ्यामचेत
नाभ्यामन्यएवचेतनः ४६ ननुचेतनत्वेचतस्याहंकृशः स्थूलः काणोबधिरइत्यादिदेहधर्मोपलब्धिः कुतस्तत्राह भूतेंद्रियमनोभि
र्लिंग्यंतेलक्ष्यंतइतितथातान्देहान् तेभ्योऽन्यएवभजतिभाहमितिमन्यते नर्हिकथंमोक्षस्तत्राह तच्चभजनंस्वेनतेजसाविवेक
बलेनउत्सृजत्यपिहिइत्यनुभवंप्रमाणयति ४७ ननुविवेकानंतरमप्याहारादिकर्मसुप्रवृत्तेर्बंधस्यादेवेत्यतआह यावल्लिंगशा

नश्रोतानानुवक्तायंमुख्योप्यत्रमहानसुः यस्त्विहेंद्रियवानात्मासचान्यः प्राणदेहयोः ४६ ॥
भूतेंद्रियमनोलिंगान्देहानुच्चावचान्विभुः भजत्युत्सृजतिह्यन्यः तच्चापिस्वेनतेजसा ४७ ॥
यावल्लिंगान्वितोह्यात्मातावत्कर्मनिबंधनं ततोविपर्ययः क्लेशोमायायोगेनुवर्तते ४८ ॥
वितथाभिनिवेशोयंयद्गुणेष्वर्थदृग्वचः यथामनोरथः स्वप्नःसर्वमैंद्रियकंमृषा ४९ श्रीकृष्णा॥ यी

शरीरेणान्वितः तदभिमानवानात्माभवतितावदेवतस्यतत्कर्मनिबंधनंबंधहेतुर्भवति ततोविपर्ययः देहधर्मभाक्त्वं
ततः क्लेशश्चानुवर्ततेनतुलिंगभिमाननिवृत्तेपियतोयंमायायोगोविपर्यादिमायायायुज्यतइतितथानतथानपरमार्थ
तइत्यर्थः ४८ ननुसुखदुःखादीनांतत्साधनानांचसत्वप्रतीतेः कुतोयमभिनिवेशः कोसौ गुणेषुतत्कार्येषुसुखा
दिषुअर्थः परमार्थइतिदृक्वचश्चेति वचश्चेति यतुसः कुतइत्यतः आहः यथेति ५० श्रीकृष्णायनमः ॥ ८
॥ ॥ ॥ ॥ ॥

8/19
1981

उपसंहरतिअथेति अथतस्मात्नित्यमात्मानमनित्यंदेहंचतद्विदः नित्यमनित्यंचजानंतः नन्वेवमुपदेष्टारः शोचंतेदृश्यंतेतत्राह
नान्यथेति ज्ञानदार्ढ्याभावात्त्वाभावोननिवर्ततइत्यर्थः ५० स्वयंसधर्माअपीतियदुक्तंतत्रेतिहासमाह लुब्धकइत्यादिना
पक्षिणामंतकईश्वरेणनिर्मितः सनूयत्रतेतत्रतान्प्रलोभयन्जालंविस्तार्यविशेषेणधृतवान् पाठांतरेतेषामामिषादिभिः
प्रलोभनंकृतवानित्यर्थः ५१ कुलिंगः कंदभक्षीपाक्षिविशेषः कुलिंगयोर्मिथुनं ५२ शिचस्तंत्यांजलस्यसत्रेअसज्जतवं

अथनित्यमनित्यंवानेहशोचंतितद्विदः नान्यथाशक्यतेकर्तुंस्वभावः शोचतामिति ५० लुब्धकोपि
वनेकश्चित्पक्षिणांनिर्मितोऽन्तकः वितत्यजालंविदधेतत्रतत्रप्रलोभयत् ५१ कुलिंगमिथुनंतत्र
विचरत्समदृश्यत तयोः कुलिंगीसहसालुब्धकेनप्रलोभिता ५२ सासज्जतशिचस्तंत्यांमहिषी
कालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः ५३ स्नेहादकल्पः कृपणः कृपणांपर्यदेव
यत् अहोकरुणोदेवः स्त्रियाकरुणायाविभुः ५४ कृपणांमानुशोचंत्यादीनयाकिंकरिष्यति का
मंनयतुमांदेवः किमर्द्धेनात्मनोहिमे ५५ दीनेनजीवतादुःखमनेनविधुरायुषा कथंत्वजातपक्षां
स्तान्मातृहीनान्बिभर्म्यहं ५६ मंदभाग्याः प्रतीक्षंतेनीडेमेमातरंप्रजाः ५७ एवंकुलिंगंविलपंत
मारात्प्रियावियोगातुरमश्रुकंठं सएवतंशाकुनिकः शरेणविव्याधकालप्रहितोविलीनः ५८ ॥

धंप्राप आपन्नांआपदंप्राप्तां ५३ आकरुणायासर्वतोनुकंपया ५४ आत्मनोदेहस्यार्द्धेन अर्द्धोवाआत्मनोयपत्नीति
श्रुतेः ५५ विधुरायुषाभार्याशून्यजीवितेनअनेनदुःखंयथाभवत्येवंजीवितोमेकिंप्रयोजनंअतोमामपिकामंनय
त्वित्यन्वयः ५६ नजाताःपक्षाः येषांतान्कथंबिभर्मिपोष्यामि मेप्रजाः मातरंप्रतीक्षंते ५७ शाकुनिकः पक्षि
हंताविलीनः सन् ५८ ॥ ॥ ॥ ॥

आत्मापायंस्वमृत्यं ५९ अयथोत्थितंमिथ्यैवाविर्भूतं ६० सांपरायिकंपरलोकहत्यं ६१ अत्रोचनेतिपाठेआडागमआ
र्षः स्वःपरइत्यभिनिवेशाएवाज्ञानंतेनविना ६२ सस्नुषासस्नुषयासहिता ६३ इतिश्रीभागवतेसप्तमस्कंधेटीकायांद्वितीयो
ध्यायः २ तृतीयेतस्यतपसातप्तंवीक्ष्यजगद्विधिः आगत्यविस्मितस्तेनसंस्तुतश्चवरानदात् १ तदेवंसाधूनांकद
नेदानवानादिश्यबंधूनांचशोकंतत्वनिरूपणेनापनीयथयत्कृतवान्तदाह हिरण्यकशिपुरित्यादिना अप्रतिद्वंद्वंप्रति

एवंब्रूयमपश्यंत्य आत्मापायमबुद्धयः नैनंप्राप्स्यथशोचंत्यः पतिंवर्षशतैरपि ५९ हिरण्यकशिपुरुवाच
बालएवंप्रवदतिसर्वेविस्मितचेतसः ज्ञातयोमेनिरेसर्वमनित्यमयथोत्थितं ६० यमएतदुपाख्यायत
त्रैवांतरधीयत ज्ञातयोपिसुयज्ञस्यचक्रुर्यत्सांपरायिकं ६१ ततः शोचतमायूयंपरंचात्मानमेवच ॥
कआत्माकःपरोवात्रस्वीयःपारक्यएववा ६२ स्वपराभिनिवेशेनाविनाज्ञानेनदेहिनां ६२ नारदउवाच
इतिदैत्यपतेर्वाक्यंदितिराकर्ण्यसस्नुषा पुत्रशोकंक्षणात्त्यक्त्वातत्वेचित्तमधारयत् ६३ इतिश्री
मद्भागवतेमहापुराणेसप्तमस्कंधेद्वितीयोध्यायः २ श्रीनारदउवाच हिरण्यकशिपूराजन्नजेयम
जरामरं आत्मानमप्रतिद्वंद्वमेकराजंव्यधित्सत १ सतेपेमंदरद्रोण्यांतपःपरमदारुणं ऊर्ध्वबाहुर्न
भोदृष्टिःपादांगुष्ठाश्रितावनिः २ जटादीधितिभीरेजेसंवर्तार्कइवांशुभिः उर्ध्वंतस्मिंस्तथातप्यमा
नेदेवाःस्थानिस्थानानिभेजिरे ३ श्रीकृष्णायवासुदेवायहरयेपरमात्मनेगोपालदयानिधे॥

यक्षहीनंएकराजंएकमेवराजानंव्यधित्सनकर्त्तुमैछत् १ ऊर्ध्वौबाहूयस्य नभसिदृष्टिर्यस्य पादांगुष्ठेनाश्रिता
अवनिर्येन २ जटानांदीधितिभिः कांतिभिः अंशुभिः रश्मिभिः प्रलयकर्त्ताइवरेजे धूर्वयेअलक्षिताः संतोवि
वेरुस्तेदेवाःपुनःस्थानिस्थानानिभेजिरे ३ श्रीकृष्णायनमः ॐ ॐ ॐ ॥ ८

881
1981

विश्वक्कुईरितःसर्वतःप्रसृतःसन् ४ द्वीपैरद्रिभिश्चसहितानभूश्चलिता ५ ६ नवधालिहाराःकरप्रदाःपूजाकारिणइ
विश्वक्कुईरितःसर्वतःप्रसृतःसन् ४ ... अभितोयावन्नक्ष्यंतीतिसंबंधः ७
तिवा अभितोभवतीत्यभिभूःहेअभिभोसर्वाधिपते पाठांतरेभोइतिसंबोधनंआभितोयावन्नक्ष्यंतीतिसंबंधः ७
ब्रह्मणःतस्मिन्द्वेषमुत्पादयितुंतत्संकल्पमाहुः तस्येतिचतुर्भिः अथाप्यस्माभिर्निवेदितंत्वयाश्रूयतां ८ तपोयोग
योगयोःसमाधिनानिष्ठया ९ सर्वधिष्ण्येभ्यःश्रेष्ठंनिजासनंसत्यलोकंयथाअध्यास्तेआधितिष्ठतितथैवात्मनः

तस्यमूर्ध्नःसमुद्भूतःसधूमोग्निस्तपोमयः तिर्यगूर्ध्वमधोलोकानतपद्विश्वगीरितः ४ चक्षुभुर्नद्यु
दन्वंतःसद्वीपाद्रिश्चचालभूः निपेतुःसग्रहास्तारा जज्वलुश्चदिशोदश ५ तेनतप्तादिवंत्यक्त्वाब्रह्म
लोकंययुःसुराः धात्रेविज्ञापयामासुर्देवदेवजगत्पते ६ दैत्येंद्रतपसातप्तादिविस्थातुंनशक्नुमः॥
तस्यचोपशमंब्रह्मन्विधेहियदिमन्यसे ७ लोकानयावन्नक्ष्यंतिवलिहारास्तवाभिभो ७ त
स्थायंकिलसंकल्पश्चरतोदुश्चरंतपः श्रूयतांकिंनविदितस्तवाथापिनिवेद्यते ८ सृष्ट्वाचराच
राभिदंतपोयोगसमाधिना अध्यास्तेसर्वधिष्ण्येभ्यःपरमेष्ठीनिजासनं ९ तदहंवर्द्धमानेनतपोयो
गसमाधिना ९ कालात्मनोश्चनित्यत्वात्साधयिष्येतथात्मनः अन्यथेदंविधास्येहमयथापूर्व
मोजसा १० किमन्यैःकालनिर्धूतैःकल्पांतेवैष्णवादिभिः इतिशुश्रुमनिर्बंधंतपःपरममास्थितः ११

साधयिष्यामि १० ननुब्रह्मणाअतिदीर्घायुष्मातपतस्यात्साधितंअन्यःकुतःसत्साधयेत्तत्राह कालात्म
नोऽशिति यद्यपिआयुषोअल्पत्वेनदेहोवारंवारंम्रियेत्ततथापिकालस्यात्मनश्चनित्यत्वात्बहुभिर्जन्मभि
स्तपस्तस्मात्साधयिष्याम्येवेति ११ श्रीकृष्णगोपाल ॐ श्रीराम ॐ ॐ

भा० स०
९

वर्द्धमानेनेतियदुक्तंतस्यफलमाह अन्यथेति सुरासुरादिव्यत्ययेन अव्यथापूर्वंपुण्यपापादिव्यत्ययेन इदंजगद्विधास्या
मि १२ वैष्ठवादिभिः ध्रुवादिपदैः किंप्रयोजनं अतस्तदेवसाधयिष्यामीतित्वत्पदापहरणेतस्यानिर्बंधंशुश्रूमः अत
एवासौतपः परममास्थितः ११ यदत्रयुक्तंतत् अनंतरमेवविधत्स्व १२ अन्यथानवस्थानभ्रंशसातिसाधूनामनिष्टस्यादीत
शोचंतआहुः नवपारमेष्ठ्यमिदमासनंद्विजानांगवांचभवायउद्भवायश्रेयसेसुखायभूत्यैऐश्वर्यायक्षेमायलब्धप
रिपालनायविजयायउत्कर्षाय १३ वाल्मीकादिभिःप्रतिछन्नंप्रथमंनददर्शायश्चात्कथंचिद्विलक्ष्यप्राहेतिद्वयोरन्व

विधत्स्वानंतरंयुक्तंस्वयंत्रिभुवनेश्वर नवासनंद्विजगवांपारमेष्ठ्यंजगत्पते ११ भवायश्रेयसेभूत्यैक्षे
मायविजयायच १२ इतिविज्ञापितोदेवैर्भगवानात्मभूर्नृप परीतोभृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमं १३
तंददर्शप्रतिछन्नंवाल्मीकतृणकीचकैः पिपीलिकाभिराचीर्णमेदस्त्वङ्मांसशोणितं १४ तपंतंतपसा
लोकान्यथाभ्रापिहितंरविं विलक्ष्यविस्मितःप्राहप्रहसन्हंसवाहनः १५ ब्रह्मोवाच उत्तिष्ठोत्तिष्ठभ
द्रंतेतपःसिद्धोसिकाश्यप वरदोहमनुप्राप्तोव्रीयतामीप्सितोवरः १६ अद्राक्षमहमेतत्तेहृत्सारंमहदद्
तं दंशभक्षितदेहस्यप्राणाह्यस्थिषुशेरते १७ नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यंतिचापरे निरंबुर्धारयेत्प्रा
णान्कोवैदिव्यसमाःशतं १८ व्यवसायेनतेऽनेनदुष्करेणमनस्विनां तपोनिष्ठेनभवताजितोहंदिति
नंदन १९ ततस्तआशिषःसर्वाददाम्यसुरपुंगव मर्त्यस्यतेह्यमर्त्यस्यदर्शनंनाफलंमम २० श्रीराम

यः आचीर्णसमंताद्भक्षितंमेदश्चत्वक्चमांसंचशोणितंचयस्य १४ अभ्रैरपिहितंछन्नंरविमिवविलक्ष्य १५ १६
हृत्सारंधैर्यंदंशैर्मक्षिकाविशेषैःभक्षितोदेहोयस्य १७ निरंबुःनिषिद्धंअंबुयेनसःत्यक्तोदकः १८ तेअनेनव्यव
सायेनैवतावज्जितोहं तपोनिष्ठेनभवतातुसुतरांजितः १९ अमर्त्यस्यममदर्शनंअफलंनभवति २० श्रीराम
छं छं छं छं छं ९

883
1981

आदौभवतीत्यादिभवः ओक्षतप्रेक्षितवान् २१ वज्रवत्संहननंअंगदार्ढ्यंयस्य २२ नमस्यहेमइवआभायस्य॥
तदर्शनमेवमहानुत्सवोयस्यसः २३ हर्षेणअश्रूणिपुलकाश्चदश्चयस्य २४ अंधेननिबिडेनतत्रहेतुः कालसृष्टेन
प्रकृतिगुणरूपेणानुवर्तिनातेनैवतमसावृतमिदंजगत् यःअभिव्यनक्तिअभिव्यक्तमकरोत् २५ यश्चात्रिगुणेनात्मना
इदंसृजतिअवतिलुंपतितस्मैरजःसत्वतमसांधाम्नेआश्रयायमहतेपरायपरमेश्वरायनमइतिद्वयोरन्वयः २६ अत्रच
स्वप्रकाशकत्वंजगतप्रकाशकत्वंतत्कारणत्वंतत्सृष्ट्यादिकर्तृत्वंमहत्वंपरमेश्वरत्वंचेतिषाड्गुण्यमुक्तं तदेवप्रपंच
यन्नमस्करोतिनमइतिचतुर्भिः बीजायकारणायतत्रहेतुः आद्याय ज्ञानंज्ञप्तिःविज्ञानंविषयाकारंज्ञानंमूर्तिर्यस्यतस्मै

नारदउवाच इत्युक्त्वादिभवोदेवोभक्षितांगंपिपीलिकैः कमंडलुजलेनौक्षत्दिव्येनामोघराधसा २१
उत्थितंस्तंभहेमाभोविभावसुरिवैधसः सनिरीक्ष्यावरेदेवंहंसवाहमवस्थितं २२ सतत्कीचकवाल्मी
कात्सहओजबलान्वितः सर्वावयवसंपन्नोवज्रसंहननोयुवा २२ उत्थायप्रांजलिःप्रह्वःईक्षमाणोदृ
शाविभुं हर्षाश्रुपुलकोद्भेदोगिरागद्गदयागृणन् २४ हिरण्यकशिपुरुवाच कल्पांतेकालसृष्टेन
योंधेनतमसावृतं अभिव्यनक्तिजगदिदंस्वयंज्योतिःस्वरोचिषा २५ आत्मनात्रिवृतानेदंसृजत्य
वतिलुंपति रजःसत्वतमोधाम्नेपरायमहतेनमः २६ तमआद्यायबीजायज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबु
द्धिविकारैःव्यक्तिमीयुषे २७ त्वमीशिषेजगतस्तस्थुषश्चप्राणेनमुख्येनपतिःप्रजानां चित्तस्यचित्तेर्मनइंद्रि
याणांपतिर्महान्भूतगुणाशयेशः २८

अनेनस्वप्रकाशकत्वंजगत्प्रकाशकत्वंचदर्शितं बीजायेतिनिमित्तत्वमुक्तं उपादानत्वंचाह प्राणादयोयेविकाराःतैरूपैःव्यक्तिं
कार्यकारणमीयुषेप्राप्तवते २७ एवमात्मनात्रिवृतेत्यनेनोक्तंकारणत्वंद्विधादर्शितं महत्वमीश्वरत्वंचाह त्वमेवजगतोजंगमस्य
तस्थुषःस्थावरस्यचईशिषेनियंताभवसि केनमुख्येनप्राणेनसूत्रात्मरूपेण अतस्त्वंप्रजानांपतिः तासांचित्तस्यबुद्धेश्चेतु
स्तपरिणामभूतायाश्चेतनायामनसश्चतन्नियम्यानामिंद्रियाणांचपतिः तासांअतस्त्वमेवमहान् भूतानामाकाशादीनांतद्गुणानां
चशब्दादिविषयाणांआशयानांतद्वासनानामीशश्च एतेनचस्वस्रष्टत्वंदर्शितं २८ श्रीकृष्णगोपाल ७ छं

इदानींयज्ञप्रवर्तकत्वेनांतर्यामित्वेन च जगत्पालकत्वमाह त्वमेवसप्ततंतून् अग्निष्टोमादियज्ञान् विस्तारयसि कथं त्रयातन्वावे
दत्रयरूपेण कथंभूतया चत्वारोहोतारोयत्र तत् चातुर्होत्रकंकर्म तद्विषयया विद्यया आत्मवतांप्राणिनामात्मभूतस्त्वमेवांतरात्मा
अंतर्यामिच कुतः यतः कविः सर्वज्ञः तत्कुतः एकः अखंडः तत्रहेतुः अनादिः अनंतपारश्चेति नास्त्यंतः कालतः पारश्चदेशतोयस्य
सः २९ कालरूपेणसंहर्तृत्वमाह त्वमेवेति लवाद्यैरवयवैः क्षिणोसि क्षपयसि तदेवंसृष्ट्यादिकर्तृत्वेपिनिर्विकारित्वमाह कू
टस्थइति तत्रहेतवः आत्माज्ञानरूपः परमेष्ठीपरमेश्वरः अजः जन्मशून्यः महान् अपरिछिन्नः किंच जीवलोकएवकर्मवशाज्जन्मा
दिभिर्विक्रियतेत्वंतुतस्यजीवः जीवनहेतुः यतस्तस्यात्मानियंता ३० तत्कुतस्तत्राह त्वत्तइति त्वत्तोव्यतिरिक्तंयादिकिंचिद्भवे

त्वंसप्ततंतून्वितनोषितन्वात्रय्याचतुर्होत्रकविद्ययाच त्वमेकआत्मात्मवतामनादिरनंतपारःकविरंतरा
त्मा २९ त्वमेवकालोनिमिषोजनानामायुर्लवाद्यावयवैःक्षिणोषि कूटस्थआत्मापरमेष्ठ्यजोमहांस्त्वंजी
वलोकस्यचजीवआत्मा ३० त्वत्तःपरंनापरमप्यनेजदेजच्चकिंचिद्व्यतिरिक्तमस्ति विद्याःकलास्तेतनवश्च
सर्वाहिरण्यगर्भोसिबृहत्त्रिपृष्ठः ३१ व्यक्तंविभोस्थूलमिदंशरीरंयेनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षेस्थितो
धामनिपारमेष्ठ्ये अव्यक्तआत्मापुरुषःपुराणः ३२

नहितस्माज्जन्मादिविकारोनियम्यत्वादिकंचभवेत् तत्तुपरंकारणंअपरंकार्यंचतत्रएतत्त्रयंयत्नः विद्यागमंअनेजत्तस्था
वरंव्यतिरिक्तंनास्ति बाधकंज्ञात्वाव्यतिरिक्तंअस्तितिचेतनयतः विद्याः वेदोपवेदादिविद्यास्थानानि कलाश्चतदंगानि
तेचैवतनवः नतुतद्व्यतिरिक्ताः तत्कुतः यतस्त्वंबृहत्ब्रह्मैवासि तदपिकुतस्तत्राह हिरण्यरूपंब्रह्मांडंगर्भेयस्यसः त्रिपृष्ठः
त्रिगुणात्मकस्यप्रधानस्यपृष्ठेपरतोस्थितः अक्षरात्परतःपरइतिश्रुतेः ३१ ननुब्रह्मांडशरीरस्यजीवस्यममकुतोवाब्रह्मत्वं
हिरण्यगर्भत्वादि तत्राह व्यक्तंकार्यमिदंतवशरीरंव्यक्तंमत्त्वमिति वा येनशरीरेणत्वमिंद्रियप्राणमनसागुणान् विषयान्भु
क्षे किंच पारमेष्ठ्येपरमैश्वर्येधामनिस्वरूपेस्थितएवभुंक्षेनतुस्वरूपतिरोधानेनअतस्त्वमव्यक्तआत्मानिरुपाधिब्रह्मै
वपुराणपुरुषश्चेत्यर्थः ३२ ॐ ॐ ॐ ॐ ॐ १०

885
1381

ननुब्रह्मत्वंपुराणपुरुषत्वंकथंममकस्यतत्राह हे अनंतयेनत्वयाअव्यक्तेनमनोवचनागोचरेणइदंविश्वंततंव्याप्तंतस्मैनम
स्यंभगवतेअचिंत्यैश्वर्यायनमः भगवत्त्वेहेतुः चिच्छक्तिर्विद्याचिच्छक्तिर्मायातताभ्यांयुक्तायेति ३३ ३४ अन्यस्मादतत्त्व
दृष्ट्यव्यक्तातिरिक्तादपि भवतः आयुधेर्माभूत् ३५ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैः ३६ यथाआत्मनस्तवास्तितथा
अप्रतिद्वंद्वतादिकंदेहीतिशेषः तपसायोगेनचप्रभावोयेषांतेषांयत्त्वआणिमाद्यैश्वर्यंनारश्यतिननश्यतितच्चदेहीत्य

अनंताव्यक्तरूपेणयेनेदमखिलंततं चिदचिच्छक्तियुक्तायतस्मैभगवतेनमः ३३ यदिदास्यस्यभिमता
न्वरान्मेवरदोत्तमा भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभो ३४ नांतर्बहिर्दिवानक्तंअन्यस्मादपि
चायुधैः नभूमौनांबरेमृत्युर्ननरैर्नमृगैरपि ३५ व्यसुभिर्वाऽसुमद्भिर्वासुरासुरमहोरगैः अप्रतिद्वंद्वता
युद्धेऐकपत्यंचदेहिमे ३६ सर्वेषांलोकपालानांमहिमानंयथात्मनः तपोयोगप्रभावानांयन्नरिष्यतिक
र्हिचित् ३७ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेतृतीयोध्यायः ३ नारदउवाच एवंवृतःशतधृ
तिर्हिरण्यकशिपोरथ प्रादात्तत्तपसाप्रीतोवरांस्तस्यसुदुर्लभान् १ ब्रह्मोवाच तातेमेदुर्लभाःपुंसांयान्
वृणीषेवरान्मम तथापिवितराम्यंगवरान्यदपिदुर्लभान् २ ततोजगामभगवानमोघानुग्रहोविभुः
पूजितोसुरवर्येणस्तूयमानःप्रजेश्वरैः ३ एवंलब्धवरोदैत्योबिभ्रद्धेममयंवपुः भगवत्यकरोद्द्वेषंभ्रातुर्व
धमनुस्मरन् ४ सविजित्यदिशःसर्वालोकांश्चत्रीन्महासुरः देवासुरमनुष्येंद्रगंधर्वगरुडोरगान् ५
सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ६ सर्व
सत्त्वपतीन्जित्वावशमानीयविश्वजित् जहारलोकपालानांस्थानानिसहओजसा ७ ॐ ॐ

र्थः ३७ इतिसप्तमेटी० तृतीयोध्यायः ३ चतुर्थेतुवरान्लब्ध्वाविजित्याखिललोकपान् विष्णुद्वेषेणतान्सर्वान्दैत्यं
द्रःसमपीडयत् १ शतधृतिर्ब्रह्मा १ ममसत्तः यत्तद्यद्यपिइमेदुर्लभाः २ अमोघानुग्रहोयस्य ३ यदर्थंतपस्तमंतदाह
एवमित्यादिना ४ ५ ६ सर्वेषांसत्त्वानांप्राणिजातानांयेपतयस्तान् ७ श्रीहृल्लायवासुदेवाय ॐ ॐ

त्रिविष्टपंस्वर्गंअध्यास्तेस्म अधिष्ठितवान् ८ तत्रचमहेंद्रभवनमध्युवास अधिवसतिस्म ९ अखिलसमृद्धियुक्तत्वमे वाह यत्रेतित्रिभिः १० मुक्तादामानिपरिछदाः परिकराः यासांताः शय्याः ११ सुदतीः सुदत्यः ११ ऊर्जितंअधिकंचंडंती व्रंशासनंयस्य १२ अगहेराजन्उरुगंधिनाउग्रगंधेनमधुनासुरयामत्तः अतएवविवृत्तेविघूर्णितेअक्षिणीयस्यतंअ शेषधिष्ण्यपाः सर्वलोकपालाः उपायनयुक्तैः पाणिभिः उपासतो त्रिभिर्विष्णुरुद्रब्रह्मभिर्विनापरंआश्रयभूतं १३

देवोद्यानंश्रियाजुष्टमध्यास्तेस्मत्रिविष्टपं महेंद्रभवनंसाक्षान्निर्मितंविश्वकर्मणा ८ त्रैलोक्यलक्ष्म्या यतनमध्युवासाखिलर्द्धिमत् यत्रविद्रुमसोपानामहामरक यत्रचित्रविमानानिपद्मरागसमानिच ९ यत्रस्फटिककुड्यानिवैडूर्यस्तंभपंक्तयः १० पयःफेननिभाः शय्यामुक्तादामपरिछदाः कूज न्नूपुरैर्देव्यः शब्दयंत्यइतस्ततः ११ रत्नस्थलीषुपश्यंतीः सुदतीः सुंदरंमुखं ११ तस्मिन्महेंद्रभुवनेमहा बलोमहामनानिर्जितलोकएकराट् रेमेभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंगमत्तंमधुनोरुगंधिनाविवृत्तताम्राक्षमशेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विनात्रिभिस्तपो योगबलौजसांपदं १३ जगुर्महेंद्रासनमोजसास्थितं विश्वावसुस्तुंबरुरस्मदादयः गंधर्वसिद्धाऋषयो स्तुवन्मुहुर्विद्याधराअप्सरसश्चपांडव १४ सएववर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः इज्यमानोहवि र्भागानग्रहीत्स्वेनतेजसा १५ अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही यथाकामदुघाद्यौश्चनानाश्च र्यपदंनभः १६ रत्नाकराश्चरत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः क्षारसिंधुघृतक्षौद्रदधिक्षीरमनोदकाः ॥ १७ शैलाद्रोणिभिराक्रीडंसर्वर्तुषुगुणान्द्रुमाः दधारलोकपालानामेकएवपृथग्गुणान् १८

उपासनाप्रकारमाह जगुरिति १४ १५ १६ तत्पत्न्योनद्यः ऊहुः वहंतिस्म रत्नाकरानेवाह क्षारेति १७ आक्री डस्थानंगुणान्पुष्पफलादीन् सर्वलोकपालानांपृथक्विधान्गुणान्वर्षणदहनशोषणादीनिएकएवदधार १८ ११

887
1981

निर्जिताः ककुभोयेन यथोपजोषंयथाप्रीति १९ २० २१ २२ २३ २४ अरूपावक्तृरहिता २५ ममदर्शनंश्रवणं सर्वे षांश्रेयसां उपपत्तयेप्राप्तये २६ २७ २८ ननुदेवादिविद्वेषिण्यस्यविनाशोनास्त्येव ब्रह्मवरेणार्जितत्वात् तत्राहनि वैरायेति सर्वमहं सहेनमद्भक्तद्रोहमितिभावः २९ असुरंचहतंमेनिरे तदानीमेवततद्वेषस्यप्रवृत्तत्वादितिभावः ॥

सइत्थंनिर्जितककुपएकराड्विषयान्प्रियान् यथोपजोषंभुंजानोनातृप्यदजितेंद्रियः १९ एवमैश्वर्यम त्तस्यदृप्तस्योच्छास्त्रवर्तिनः कालोमहान्व्यतीयायब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाः सर्वेलोकाः सपालकाः अन्यत्रालब्धशरणाः शरणंययुरच्युतं २१ तस्यैनमोस्तुकाष्ठायैयत्रात्माहरिरीश्वरः यद्गत्वा ननिवर्तंते शांताः संन्यासिनोमलाः २२ इतितेसंयतात्मानः समाहितधियोमलाः उपतस्थुर्हृषीकेशंवि निद्रावायुभोजनाः २३ ओंनमोभगवतेतुभ्यंपुरुषायमहात्मने विशुद्धानुभवानंदसंदोहायमूर्तयेनमः २४ तेषामाविरभूद्वाणीअरूपामेघनिस्वना सन्नादयंतीककुभः साधूनामभयंकरी २५ माभैष्टविबुधश्रे ष्ठाः सर्वेषांभद्रमस्तुवः मद्दर्शनंहिभूतानांसर्वश्रेयोपपत्तये २६ ज्ञातमेतस्यदौरात्म्यंदैतेयापसदस्य यत् तस्यशांतिंकरिष्यामिकालंतावत्प्रतीक्षतां २७ यदादेवेषुवेदेषुगोषुविप्रेषुसाधुषु धर्मेमयिच विद्वेषः सवाआशुविनश्यति २८ निर्वैरायप्रशांतायस्वसुतायमहात्मने प्रह्लादाययदाद्रुह्येद्धनिष्येपि वरोर्जितं २९ नारदउवाच इत्युक्तालोकगुरुणातंप्रणम्यदिवौकसः न्यवर्तंतगतोद्वेगामेनिरेचासु रंहतं ३० तस्यदैत्यपतेःपुत्राश्चत्वारःपरमाद्भुताः प्रह्लादोभून्महांस्तेषांगुणैर्महदुपासकः ३१ ब्रह्मण्यः शीलसंपन्नः सत्यसंधोजितेंद्रियः आत्मवत्सर्वभूतानामेकःप्रियसुहृत्तमः ३२ दासवत्सन्नतार्यांघ्रिः पितृवद्दीनवत्सलः भ्रातृवत्सदृशेस्निग्धोगुरुष्वीश्वरभावनः ३३

३० तमेवंद्वेषंवक्तुमादौसुतस्यमहत्त्वमाह तस्येत्यादिना गुणैर्महानभूत् गुणानेवाह महदुपासकइत्यादिना ३१ सत्यसंधाप्रतिज्ञायस्य एकएवप्रियश्चसुहृत्तमोसखा ३२ सम्यक्नता आर्याणामंघ्रयोयेन ईश्वरइतिभावनायस्य

व्यसनेषुनोद्विग्नचित्तः गुणेष्वविषयेष्वनिस्पृहः यतस्तेषु अवस्करकुदांताइंद्रियादयोयस्य रहितः आसुरोभावोम
त्सरादिर्यस्य असुरोपिसन् ३४ अधुनापितेगुणाः नापिधीयंतेतिरोहितानभवंति ३५ साधुगाथासदसिसाधुकथा
प्रसंगवत्यांसभायां प्रतिमानंदृष्टांत ३६ सूच्यतेमयाकेवलंघोत्यतेसुष्टुकथ्यतइतिवा ३७ नैसर्गिकरतेर्लिंगा
न्याह न्यस्तक्रीडनकइतिषड्भिः तन्मनस्कतयातदेकचित्तत्वेन ३८ एतानिआसनादीनिगोविंदेनपरिरंभितः॥

विद्यार्थरूपजन्माढ्योमानस्तंभविवर्जितः नोद्विग्नचित्तोव्यसनेषुनिस्पृहः श्रुतेषु दृष्टेषुगुणेष्ववस्त
दृक् दांतेंद्रियप्राणशरीरधीः सदाप्रशांतकामोरहितासुरोऽसुरः ३४ यस्मिन्महद्गुणाराजन्गृह्यंते
कविभिर्मुहुः नतेऽधुनापिधीयंतेयथाभगवतीश्वरे ३५ यंसाधुगाथासदसिरिपवोपिसुरान्नृप प्रतिमा
नंप्रकुर्वंतिकिमुतान्येभवादृशाः ३६ गुणैरलमसंख्येयैर्माहात्म्यंतस्यसूच्यते वासुदेवेभगवतियस्य
नैसर्गिकीरतिः ३७ न्यस्तक्रीडनकोबालोजडवत्तन्मनस्कया कृष्णग्रहगृहीतात्मानवेदजगदीदृशं ३८
आसीनः पर्यटन्नश्नन्शयानः प्रपिबन्ब्रुवन् नानुसंधत्तएतानिगोविंदपरिरंभितः ३९ क्वचिद्रुदति
वैकुंठचिंताशबलचेतनः क्वचिद्धसतितच्चिंताह्लादउद्गायतिक्वचित् ४० नदतिक्वचिदुत्कंठोविलज्जोन
त्यतिक्वचित् क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह ४१ क्वचिदुत्पुलकस्तूष्णीमास्तेसंस्पर्शनिर्वृतः
अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४२ सउत्तमश्लोकपदारविंदयोर्निषेवयाकिंचनसंगलब्धया तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनस्यमनःशमंव्यधात् ४३

आत्मनाएकीकृतः ३९ रुदतिरोदितिवैकुंठस्यचिंतयाशबलाव्यामिश्राक्षुभितावाचेतनायस्य तस्यचिंतयाआह्ला
दयोयस्य ४० उत्कंठः मुक्तकंठः सन् अनुचकारतच्चेष्टादिकंस्वयंकृतवान् ४१ संस्पर्शस्तद्भावाप्तिः तेननिर्वृतः॥
अस्पंदः स्थिरः यः प्रणयः आनंदः तेनयत्सलिलंतेनयुक्तेआमीलितेईषन्मीलितेईक्षणेयस्य ४२ आत्मनः परा
निर्वृतिंतन्वन् दुःसंगेनदीनस्यापिमनः शमंशांतंव्यधात् ४३ श्रीराम॥ छः छः १२

889
1981

अघंद्रोहंअकरोत् ४४ प्रथमंमध्यायांतेपृष्टमेवार्थमतिविस्मयेनपुनः पृच्छति देवर्षइति नवृत्तवान् तवकाक्यमितिवा
साधनेअघमदात्अघोद्रोहस्तंकृतवानितियत्एतद्वेदितुं ४५ उपालंभंते आक्षिपंतिअघंतुनैवकुर्वंति अपरः शत्रुरिव
४६ अनुवशान् अनुकूलान् अपगतरोषान् गुरुः पितृवद्देवतायेषांतानुद्दिश्यअघंनकुर्वंतीतिकिमुवक्तव्यमित्यर्थः
पुत्रायपुत्रमुद्दिश्यपितुर्द्वेषः पित्राहृतोद्वेषः पुत्रस्यमरणार्थंप्रयोजितः प्रवर्तितइतियत्एतकौतूहलंविधमअपनुदयद्वा॥

तस्मिन्महाभागवतेमहाभागेमहात्मनि हिरण्यकशिपूराजन्नकरोदघमात्मजे ४४ युधिष्ठिरउवाच
देवर्षएतदिच्छामोवेदितुंतवसुव्रत यदात्मजायशुद्धायपिताऽदात्साधवेह्यघं ४५ पुत्रान्विप्रतिकूलांश्च
पितरः पुत्रवत्सलाः उपालभंतेशिक्षार्थंनैवाघमपरोयथा ४६ किमुतानुवशान्साधूंस्तादृशान्गुरु
देवतान् एतत्कौतूहलंब्रह्मन्नस्माकंविधमप्रभो ४७ पितुःपुत्राययद्द्वेषोमरणायप्रयोजितः ४७
इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादचरितेचतुर्थोध्यायः ४ नारदउवाच पौरोहित्यायभ
गवान्वृतः काव्यःकिलासुरैः षंडामर्कौसुतौतस्यदैत्यराजगृहांतिके १ तौराज्ञाप्रापितंबालंप्रह्लादंन
यकोविदं पाठयामासतुःपाठ्यानन्यांश्चासुरबालकान् २ यत्तत्रगुरुणाप्रोक्तंशुश्रुवेनुपपाठच नसाधु
मनसामेनेस्वपरासद्ग्रहाश्रयं ३ एकदासुरराट्पुत्रमंकमारोप्यपांडव पप्रच्छकथ्यतांवत्समन्यतेसाधुय
द्भवान् ४

यद्यस्मात्पुत्राययोद्वेषः सपितुर्मरणायप्रयोजितः अतएतत्कौतूहलंहविधमेत्यर्थः ४७ इतिसप्तमेटीकायांभा
वार्थदीपिकायांचतुर्थोध्यायः ४ पंचमेगुरुतोधीतंत्यक्त्वाविष्णुस्तनोरतं घातयन्दीपसर्पाद्यैः कृतंदै
त्योनचाशकत् १ भगवद्भक्तिरेवविद्वेषकारणमितिवक्तुमाह पौरोहित्यायेत्यादिना काव्यः शुक्रः अनंतरस्य
सुतौतत्रान्यवसतामितिशेषः १ पाठानदंडनीत्यादीनपाठ्यानसुरबालकानीतिवान्वयः २ ३ ४ छः

अनुश्रवणानंतरं तथैव पपाठ च किंतु न तत्साधु मेने तत्र हेतुः स्वः पर इत्यसद्ग्रहाभिनिवेशस्य आश्रयीभूतस्य तेन देहा-
सत्खर्य असत्यग्रहात् अहं ममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्नाधीर्येषां वनं गतः सन् हरिमाश्रयेत तदेव साधु म-
न्ये कथंभूतं गृहं हित्वा आत्मनः पातं अधःपातनिमित्तं कूपं अंधकूपमाह्वयं वह मोहकूपकमिति ५ परपक्षेविश्रोत्रसमा-
हिताः परिनिश्चिताः हासमेवाह बुद्धिरिति ६ विष्णुपक्षैर्भागवतैर्हेतुभूतैः ननु त्वद्गृहकुतस्त्यैः पाप्रवक्त्राः सत्यं न तथापि प्रतिच्छन्नैः

प्रह्लादउवाच तत्साधु मन्ये सुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्ध-
रिमाश्रयेत ५ नारदउवाच श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः
६ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः विष्णुपक्षैः प्रतिच्छन्नैः न भिद्येतास्य धीर्यथा ७ गृहमानीतमा-
हूय प्रह्लादं दैत्ययाजकाः प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ८ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृ-
षा बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ९ बुद्धिभेदः परकृत उताहो ते स्वतोभवत् भण्यतां श्रोतुकामा-
नां गुरूणां कुलनंदन १० प्रह्लादउवाच परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः विमोहितधियां दृष्टस्तस्मै भ-
गवते नमः ११ स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते अन्य एष तथान्योहमिति भेदगतासती १२

७ गृहमानीतं ८ बालान्सर्वान् अति अतिक्रम्य तुभ्यं तव ९ अहो मायामोहिता भवंतो मामाक्षिपंतीत्याशयेन तद्वा-
वदाह परः स्वश्चेति मिथ्याभिनिवेशो यदीयया माययैव कृतः न तु वास्तवः अत एव तया विमोहितबुद्धीनां भवता-
मेव दृष्टः न तु मम तस्मै अचिंत्यमायैश्वर्याय नमः ११ अहो किमेतत्प्रलपसि न बुद्धिभेदोयं वा जातस्तत्कथयेत्याक्षिप्तः
सन् तत्समाधानवत्पुनरमाह त्रिभिः स भगवान् यदा अनुव्रतः अनुकूलो भवति तदा पशूनामिव बुद्धिभेदगता असती
मिथ्याविषया भिद्यते अभिन्नात्मनिष्ठा भवतीत्यर्थः १२

13

891
1981

भेदस्यासत्त्वं दर्शयन्नाह स एष परमात्मैव स्वः पर इति अविवेकिभिर्निरूप्यते युक्तं चैतत् यतः यस्य वर्त्मनि जिज्ञासायां ब्रह्माद-
योपि मुह्यंति तत्र हेतुः दुरन्वयं दुर्घटमनुक्रमणं अनुचरितमनुवर्णनं वा यस्य सः १३ ननु निर्विकारस्य कथं मतिभेदकत्वं तत्रा-
ह यथा अयो लोहं आकर्षस्य अयस्कांतस्य सन्निधिमात्रेण भ्रमति चेतस्तथा चक्रपाणेः सन्निधिमात्रेणैव तत्कृता जातस्तत्राह यदृच्छया भि-
दयस्य तथा दानादेः फलमेतदिति न जायत इत्यर्थः १४ राजसेवक उवाच निश्रोषः १५ वेत्रं कथा उपायानां मध्ये चतुर्थः दमो
दंडः अस्य दुर्बुद्धेः उदितः उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवत्तापहेतोः १६ ननु तत्र स्नेहेन तथापि दैत्या एवं चंदनद्रु-

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरन्वयानुक्रमणो निरूप्यते मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भि-
नत्ति मे मतिं १३ यथा भ्रमत्ययो ब्रह्मन् स्वयमाकर्षसन्निधौ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया १४ ना-
रदउवाच एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः तं निर्भर्त्स्याथ कुपितः सदीनो राजसेवकः १५ आनीयतां
अरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः १६ दैतेयचंदनवने जातोयं कंटक-
द्रुमः तन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः प्रह्लादं
ग्राहयामास त्रिवर्गस्योपपादनं १८ तत एवं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं दैत्येंद्रं दर्शयामास मातृमृष्टमलं-
कृतं १९ पादयोः पतितं बालं प्रतिनंद्याशिषासुरः परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं २०

मात्तेषां वने अयं कंटकद्रुमतुल्यो जातः तदेवाह यस्य दैतेयवनस्य मूलानामुन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक ए-
व नालायितः नालमिवाचरत् यथा परशोश्छेदकत्वेपि वेणुरादिः पुनर्निर्मितो दंडः सहकारी तं विना छेदनासंभवात् त-
था यं विष्णोर्दैत्यमूलच्छेदहेतुर्जात इत्यर्थः १७ इति तं प्रह्लादं भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रं अध्या-
पयामास १८ ज्ञातं ज्ञेयं उपायानां चतुष्टयं येन तं दैत्येंद्रं प्रति मात्रा मृष्टं मुहुर्त्यस्नापितं १९ २० श्रीराम

२१ २२ पादसेवनंपरिचर्या अर्चनंपूजा दास्यंकर्मार्पणं सख्यंतद्विश्वासादि आत्मनिवेदनं देहसमर्पणंयथाविक्रीतस्य
गवाश्वादेः भरणपालनादिचिंतानक्रियतेतथादेहंसमर्प्यतच्चिंतावर्जनमित्यर्थः २३ इतिनवलक्षणानियस्यासा अर्पि
तेनचेत्भगवतिविष्णौभक्तिःक्रियतेसाअर्पितैवसतीयदिक्रियतेननुकृतासतीपश्चादर्प्यतेतदुत्तमंअधीतंमन्ये त्वस्मा
द्गुरोरधीतंशिक्षितंवातथाविधंकिंचिदस्तीतिभावः २४ २५ २६ भिन्नत्वेनवर्तमानस्यापितवविरोधाचरणेनासंभावि

आरोप्याकमवघ्रायमूर्द्धन्यश्रुकलांबुभिः असिंचद्विकसद्वक्त्रमिदमाह युधिष्ठिर २१ हिरण्यकशि
पुरुवाच प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमं कालेनेतावतायुष्मन् यदशिक्षद्गुरोर्भवान् २२ प्रह्ला
दउवाच श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं २३ इतिपुंसार्पि
ताविष्णौभक्तिश्चेन्नवलक्षणा क्रियतेभगवत्यद्धातन्मन्येधीतमुत्तमं २४ निशम्यैतत्सुतवचोहिरण्यक
शिपुस्तदा गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः २५ ब्रह्मबंधोकिमेतत्तेविपक्षंश्रयतासता असारं
ग्राहितोबालोमामनादृत्यदुर्मते २६ संतिह्यसाधवोलोकेदुर्मैत्राश्छद्मचारिणः तेषामुदेत्यघंकालेरो
गःपातकिनामिव २७ गुरुपुत्रउवाच नमत्प्रणीतंनपरप्रणीतंसुतोवदत्येषतवेंद्रशत्रो स्वाभाविकी
यंमतिरस्यराजन्नियच्छमन्युंकददास्ममानः २८ श्रीगोपालकृष्णवासुदेवायश्रीरामाय ७ः

तमित्याह संतिहीति दुष्टंमैत्रंमित्रत्वंयेषांते रोगइति ब्रह्महास्ययरोगीस्यात्सुरापःश्यावदंतकः स्वर्णहारीतुकुन
खीदुश्चर्मागुरुतल्पगइत्यादिस्मत्युक्तेः पातकिनांरोगायथोदेतितथातेषामघंपित्रैद्वेषादिकमुदेतीत्यर्थः २७ नम
त्प्रणीतंमयापाठितं नोअस्माभ्यंकदकुत्सितंदोषमाआदाः अडागमआर्षः मयिदोषारोपणंमाकृथाइत्यर्थः
इंद्रशत्रोइति नहिब्राह्मणेषुतवकोपउचितइतिभावः २९ ७ ७ः ७ः ७ः १४

893
1981

गुरुमुखीगुरुवाक्यजनिताअहोअभद्रामतिः २९ आस्तामियंवार्ताभगवद्गुणानांविषयासक्तानामत्राःनाधिकारादित्या
शयेनाह मतिरिति परतःगुरोःस्वतोवामिथोवाअन्योन्यतः नाभिपद्येतनसंपद्येतकेषां गृहमेवव्रतंसंकल्पइतिकृत्वाचि
नायेषां अतएवअदांतैरजुपतैर्गोभिरिंद्रियैर्हेतुभूतैस्तमिस्रंसंसारंविशतां तत्रचचर्वितस्यैवचर्वणंयेषांतेषां ३० ननुश्री
कृष्णस्यपरमानंदरूपत्वात्तेपितन्निष्ठाएवकिंनस्युः तदज्ञानादित्याह नेति येदुराशयाःविषयवासितांतःकरणाः तेहिविष्णुं
नविदुः तत्रहेतुःस्वस्मिन्नेवार्थःपुरुषार्थोयेषांतेषांगतिंगम्यंननुतेतंगुरूपदेशाद्विष्णुंज्ञास्यंतितत्राह वहिर्विषयएवार्थोये
षांते बहिर्विषयएवअर्थोयेषांतेबहिरर्थास्तानेवगुरुत्वेनमंतुंशीलंयेषांते अतःअंधरूपनीयमानोअंधोयथापंथानंनविदुः

नारदउवाच गुरुणैवंप्रतिप्रोक्तोभूयःआहासुरःसुतं नचेद्गुरुमुखीयंतेकुतोभद्रासतीमतिः २९ प्रह्लादउ०
मतिर्नकृष्णेपरतःस्वतोवामिथोभिपद्येतगृहव्रतानां अदांतगोभिर्विशतांतमिस्रंपुनःपुनश्चर्वितचर्वणानां
३० नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेबहिरर्थमानिनः अंधायथांधैरुपनीयमानास्तेपीशतंत्र्यामु
रुदाम्निबद्धाः ३१ नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृशत्यनर्थापगमोयदर्थः महीयसांपादरजोभिषेकंनि
ष्किंचनानांनवृणीतयावत् ३२

किंतुगर्तेपतंति तथानेपिईशस्यतंत्र्यांदीर्घरज्ज्वांवेदलक्षणायांउरूणिदामानिब्राह्मणादिनामानियस्यांतस्यांका
म्यैःकर्मभिर्बद्धाएवभवंतीत्यर्थः तदुक्तं विषयाविष्टचित्तानांविष्ण्वावेशःसुदूरतः वारुणीदिग्गतंवस्तुव्रजन्नैंद्रीकि
माप्नुयात् इति ३१ ननुच एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मेत्यादिश्रुतिप्रतिपादितंविष्णुंकथंनवि
दुः कुतोवातेषांतामिस्रप्रवेशस्तत्राह नैषामिति निष्किंचनानांतरात्मेत्यादिश्रुतिप्रतिपादितंविष्णुंकथंनविदुः
कुतो॥निष्किंचनानांनिरस्ताविषयाभिमानानांमहत्तमानांपादरजसाअभिषेकंयावन्नवृणीतताववत्श्रुतिवाक्य
तोज्ञातापिसतीउरुक्रमस्यांघ्रिंनस्पृशतिनाप्नोति असंभावनादिभिर्विरुध्यतइत्यर्थः अनर्थस्यसंसारस्याप
गमोयदर्थः यस्यांघ्रिस्पर्शिन्यामतेरर्थःप्रयोजनं महदनुग्रहाभावान्नतत्वनिश्चयेनापिमोक्षस्तेषामित्यर्थः ३२

भा० स०
१९

निरस्यतानिरास्यतत्विक्षेप ३३ अमर्षो असहनंतेनसहितयारुषा आविष्टोव्याप्तः कषायीभूतेआताम्रेलोचनेयस्य हंतैर्नैऋ
ताः ३४ वध्यत्वेहेतुः यतोयंमेभ्रातृहाकुतः यतोविष्णोःपादावर्चतितत्पक्षपातीत्यर्थः अतःसएवाधमित्यन्वयः ३५
अहोविष्णुरप्यविश्वसनीयंकिमितिस्वीकृतवानित्याह विष्णोर्वेति अहातंजहौ ३६ ननुतवायमपत्यंचकथंवध्यस्तत्राह
परोप्यौषधमिवहितकृच्चेतर्ह्यपत्यमेवज्ञेयः सुतःस्वदेहजोपिअहितश्चेत्आमयइव आस्तांममतावदस्यकथा अंगम

इत्युक्तोपरतंपुत्रंहिरण्यकशिपूरुषा अंधीकृतात्मास्वोत्संगात्निरस्यतमहीतले ३३ आहाम
र्षरुषाविष्टःकषायीभूतलोचनः वध्यतामाश्वयंवध्योनिःसारयतनैऋताः ३४ अयंमेभ्रातृ
हासोयंहित्वान्स्वान्सुहृदोधमः पितृव्यहंतुर्यःपादौविष्णोर्दासवदर्चति ३५ विष्णोर्वासाध्व
सोकिंतुकरिष्यत्यसमंजसं सौहृदंदुस्त्यजंपित्रोरहाद्यःपंचहायनः ३६ परोप्यपत्यंहितकृत्य
थौषधंस्वदेहजोप्यामयवत्सुतोहितः छिंद्यात्तदंगंयदुतात्मनोहितंशेषंसुखंजीवतियद्वि
वर्जनात् ३७ सर्वैरुपायैर्हंतव्यःसंभोजशयनासनैः सुहृल्लिंगधरःशत्रुर्मुनेर्दुष्टमिवेंद्रियं
३८ नैऋतास्तेसमादिष्टाभर्त्रावैशूलपाणयः तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः॥
३९ नदंतोभैरवान्नादान्छिंधिभिंधीतिवादिनः आसीनंचाहनन्शूलैःप्रह्लादंसर्वमर्मसु ४०

पियत्करचरणादितदप्यात्मनोहितंचेत्तच्छिंद्यादेवेत्यर्थः ३७ अतःसर्वैरुपायैर्हंतव्यः संभोजोभोजनंभोजनादिषु
विषादिप्रयोगैरित्यर्थः यथादुष्टमिंद्रियंमुनेःशत्रुः ३८ तिग्माःतीक्ष्णाः दंष्ट्रायेषांकरालान्यास्यानियेषांतेचतेच
ताम्राणिश्मश्रूणिशिरोरुहाःकेशायेषांते ३९ नादान्शब्दान्नदंतःकुर्वंतः ४० श्रीकृष्णायनमः ७ः १५

995/1981

परेब्रह्मणिईश्वरेयुक्तःसमाहितः आत्मामनोयस्यतस्मिन् तेषांप्रहाराःनिःफलाजाताः तत्रदृष्टांतः असत्यनिर्विका
रेअनिर्देश्येअविषयेभगवतिनिरतिशयैश्वर्ये अखिलात्मनिशास्त्रादीनामपिनियंतरि अपुण्यस्यानिर्दैवस्यसत्क्रियाम
हाद्यमाइव ४१ ४२ अभिचाराःकृत्यादयः अवपातनानिगिरिशृंगादधःपातनानितैः अवटादिषुसन्निरोधैश्च ४३
पर्वताक्रमणैःपर्वतानांतदुपरिप्रक्षेपैः बहुवचनैरभिचाराद्यावृत्तिदर्शयति ४४ तत्हननंकर्तुंनाध्यपद्यतनप्रापना
शाक्रोदित्यर्थः चिंतामिवाहएषइतित्रिभिः ममयाअसाधुपुरुषंयथाभवतितथाक्तः ४५ असद्धर्मैरपकारकैःअभि

परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनिः युक्तासन्यफलाआसन्नपुण्यस्येवसत्क्रियाः ४१ प्र
यासेपहतेतस्मिन्दैत्येंद्रःपरिशंकितः चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर ४२ दिग्गजैर्दंदशूकै
रभिचारावपातनैः मायाभिःसन्निरोधैश्चगरदानैरभोजनैः ४३ हिमवाय्वग्निसलिलैःपर्वता
क्रमणैरपि नशशाकयदाहंतुमपापमसुरःसुतं ४४ चिंतादीर्घतमांप्राप्तस्तत्कर्तुंनाभ्यपद्यत ए
षमेबह्वसाधूक्तोवधोपायाश्चनिर्मिताः ४५ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा वर्तमानोविदू
रेवैबालोप्यजडधीरयं ४६ नविस्मरतिमेनार्यंशुनःशेपइवप्रभुः अप्रमेयानुभावोयमकुतश्चिद्भ
योऽसुरः ४७ नूनमतद्विरोधेनमृत्युर्मेभवितानवा ४७ श्रीगोविंद ७ ७ ७ ७ः

चारेर्वा अविदूरेवर्तमानोपिबालोप्ययं अजडधीः निर्भयचित्तःमेअनार्यमन्यायंशत्रुत्वंवानविस्मरति अजीग
र्तस्यमध्यमपुत्रःशुनःशेपोताभ्यांपितृभ्यांहरिश्चंद्रायविक्रीतःसन्यथातदपकारमविस्मरन्नतद्विपक्षविश्वामित्र
माश्रित्यगोत्रांतरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागेदृष्टांतःशुनःशेपःपुच्छमिवेति ४६ अप्रमेयःअपरि
मेयोऽनुभावोयस्य नकुतश्चिद्भयंयस्य नवाभविता अन्यथामृत्युर्नैवभविष्यतीत्यर्थः ४७ ७ः ७ः

भा० स०
१६

औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकांते ४८ भ्रुवोर्विजृंभणेन वत्रस्ताः समस्ताधिष्ण्यपा यस्मिन् तस्याचिंत्य
न चक्ष्महे न पश्यामः यद्यालंबनं नैवास्ति यद्वा शिश्नतां इंगुणदोषयोः पदं विषयो न भवतीत्यर्थः ४९ तथापि तु बं
धनमस्यावितमित्याहुः इमं त्विति यावद्गुरुरागमिष्यति तावत्ववध्वानिधेहि ततः किं अतउचतुः बुद्धिश्च समीची
नावयसा भवतीति ५० अनुज्ञापत्तथेत्यंगीकृत्य ततश्च तौ प्रह्लादायधर्मादिकमूचतुः ५१ प्रश्रितश्चासावनतश्च

इति संचिंतयाकिंचित्म्लानश्रियमधोमुखं षडामर्कावौशनसौ विविक्तइतिहोचतुः ४८ जितं त्वयैके
न जगत्त्रयं भ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपं न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः प
दं ४९ इमं तु पाशैर्वरुणस्य बध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरु
र्भार्गव आगमिष्यति ५० तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मोह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधि
नां ५१ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू राजन्प्रश्रयावनताय च ५२ यथा त्रि
वर्गं गुरुभिरात्मने उपशिक्षितं न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां ५३ यदाचार्यः परावृत्तो गृहमे
धीयकर्मसु वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ५४ अथ तान्श्लक्ष्णया वाचा प्रत्याहूय महाबु
धः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ५५ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बाला न दूषि
तधियो द्वंद्वारामेरितेहितैः ५६ पर्युपासन्राजेंद्र तन्न्यस्तहृदयेक्षणाः तानाह करुणो मैत्रो महाभाग
वतोसुरः ५७ इति श्रीभागवते सप्तमस्कंधे प्रह्लादचरित्रे पंचमोध्यायः ५ श्रीकृष्णायनमः ७

तस्मै ५२ यथावत्त्रिवर्गमुपशिक्षितमपि साधु न मेने तां शिक्षां च कुतः द्वंद्वैः रागद्वेषादिभिर्विषयेषु आरमणं ये
षां तैरुपवर्णितं ५३ परावृत्तः अन्यत्रगतः सउपहूतः संधिः पादपूरणार्थः क्रीडार्थं हस्तस्पर्शः कृतोत्सवः लब्धाव
सरैरिति वा ५४ तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ५५ द्वंद्वारामाणामीरितैरीहितैश्चन दूषिता धीर्येषां ५६
यतो बालास्तस्मिन्न्यस्ते हृदयेक्षणे येषां ५७ इति श्रीभा० म० सप्त० टीकायां प्रह्लादचरित्रे पंचमोध्यायः ५ १६

897/198

ये गुरुगृहे व्यये प्रह्लादो दैत्यबालकान् अनुकंप्य परं तत्त्वं नारदादुक्तमुपादिशत् १ निरर्थकक्रियालापेष्वशुच्यजन्मजान
नां प्रह्लादः सदर्थमाह धर्मं भागवतं कृती कौमारइत्यादिना इहैव मानुषजन्मनि धर्मान्नाचरेत् यतोर्थदमेतत् तत्र कौमा
र एव यतस्तदप्यध्रुवं नैव चंभक्तं जन्मांतरे यतः दुर्लभं तत्र च धर्मान्नेवाचरेत् न स्वार्थप्रयासान् तत्र भागवतानेव न कौ
म्यान् १ इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति यथा हीति चतुर्भिः इह पुरुषस्य विष्णोः पादोपसर्पणमेव य
धानुरूपं योग्यमित्यर्थः यद्यस्मादेषप्रियः सुहृदित्यादि २ भाग्याद्यामः कथं त्याज्य इति चेत्तत्राह सुखमिति सर्वत्र पश्वादा

प्रह्लादउवाच कौमारआचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं १ यथा हि पुरुष
स्येह विष्णोः पादोपसर्पणं यदेषः सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् २ सुखमैंद्रियकं दैत्या देहयोगेन देहिनां
सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ३ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परं न तथा विंदते क्षेममुकुं
दचरणांबुजं ४ ततो यतेत कुशलः क्षेमाय भयमाश्रितः शरीरं पौरुषं यावन्न विपद्येत पुष्कलं ५ पुंसो वर्ष
शतं ह्यायुस्तदर्धं चाजितात्मनः निःफलं यदसौ रात्र्यां शेतेंधं प्रापितस्तमः ६ मुग्धस्य बाल्ये कौमारे क्री
डतो याति विंशतिः जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ७ दुःपूरेण च कामेन मोहेन च बलीयसा॥
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ८

न तथा तेन
वपि दैवात् पूर्वादृष्टादेव ३ अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासात् परं केवलं आयुषो व्यय एव यतः तथा तेन
प्रकारेण क्षेमं न प्राप्नोति ४ भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमस्ति न तु विपद्येत अक्षमं न भवेत् न
नश्यादिति वा तावत् शीघ्रं क्षेमाय यतेत तदुक्तं यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो यावच्चेंद्रियशक्तिरप्रतिह
ता यावत्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः
५ आयुर्व्ययक्रममाह पुंसइति त्रिभिः यद्यस्मात् शेते ६ विंशतिवर्षाणि आयुर्याति दुःपूरेण दुःखेन समं नाशं प्राप्यमानेन ८

भा० स०
७

ननु यौवनेन गृहासक्तोपि पश्चाद्विरक्तः सन् कश्मं यास्यति नेत्याशंक्य न दमं भवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति को
गृहेष्विति सप्तभिः ९ यं अर्थं असुभिः क्रीणाति प्राणहानिमंगीकृत्यापि तस्कारादिः यं साधयति तं स्पिन् अर्थे तृष्णां को नु वि
सृजेत् १० किंच कथमित्यादि प्रियायाः संगादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः मंत्रान् रहितशिक्षालापान् स
हृत्सु च संगं तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च संगं अनुरक्तं चित्तं यस्य ११ नाश्च श्वश्रुर् गृहा
श्चिता हृदयंगमाः मनोज्ञाः उरवः परिच्छदा यषु तान् वृत्तीर् जीविकाः कुल्याः कुलपरंपरागताः १२ कोशस्कृत कोश

को गृहेषु पुमान् सक्तमात्मानमजितेंद्रियः स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ९ को न्वर्थतृष्णां विसृजे
त्प्राणेभ्योपि गरीयसी यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० कथं प्रियाया अनुकंपितायाः
संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११ पुत्रान्स्मरंस्ता
दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान्
१२ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औपस्थ्यजैह्वं बहुमन्यमानः कथं विरज्ये
त दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहतं प्रमत्तः सर्वत्र तापत्रयदुःखितात्मा निर्वि
द्यते न स्वकुटुंबरामः १४

कारकीटः स यथा गृहं कुर्वन् आत्मनो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणि ईहमानः न त्वविततृप्तकामो पि दा
रादर्शनेन विरक्तः सन् त्यजेदित्यत्राह औपस्थ्यं ग्राम्यं जैह्वं च सुखं तदेवाधिकं मन्यमानः अतो दुरंतो मोहो यस्य सः क
थं विरज्येत विरक्तः स्यात् १३ दुरंतमोहत्वमेव दर्शयन्नाह कुटुंबपोषाय वियत् क्षियमाणं निजमायुः पुरुषार्थं च वि
हतं च न बुध्यते अतएव तापत्रयेण दुःखितः सन्नपि न निर्विद्यते दुःखबुद्धिं न करोति यतः स्वकुटुंबे रमो रतिर्यस्य सः १४

३७३
१९८१

प्रत्युत चौर्यं करोतीत्याह वित्तेष्विति नित्यमभिनिविष्टं चेतो यस्य सः परवित्तहर्तुः प्रेत्य नरकलक्षणं इह च दंडादिरूपं दोषं स
न्नपि विद्वान् अथापि अजितेंद्रियत्वात् अशांतकामो तृप्ताभिलाषः तत्परवित्तं हरत्येव १५ तदेवं को गृहेषु पुमानित्यादिसप्तभिः श्लोकैरुपपादितं गृहा
दिषु आसक्तस्य वैराग्याद्यसंभवमुपसंहरति विद्वानपीति स्वलोकाय आत्मपरामर्शाय न कल्पते किंतु विमूढो यथा तथा
विद्वानपि तमः आत्मनि च ज्ञानमेव प्रपद्येत तत्र हेतुः य इति स्वकीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः १६
तस्मात् कौमार एव भागवतान् धर्मानाचरेदिति संकुचितमुपसंहरति यत इति यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः प्रेत्येह वाथाप्यजितेंद्रियस्तदशांतकामो हरते कु
टुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै यः स्वीयपारक्यविभिन्नभावस्तमः
प्रपद्येत यथा विमूढः १६ यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः विमोचितुं का
मदृशां विहारक्रीडामृगो यन्निगडो विसर्गः १७ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु
उपेत नारायणमादिदेवं स मुक्तसंगैरिषितोपवर्गः १८ न ह्यच्युतं प्रीणयतो बह्वायासोसुरात्मजाः
आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९

र्थः ततः नारायणमुपेत शरणं यातेति उत्तरेणान्वयः असामर्थ्ये हेतुः अलं दीनो लंपटः अतः कामदृशां स्त्रीणां तासां
विहारः क्रीडायां निमित्ते क्रीडामृगः विहार इति पृथक् पाठे तासां विहारसाधनमात्मानं यत स्तासां क्रीडामृगः सट इत्य
न्वयः किंच यत् तासु निगडः शृंखलातुल्यो विसर्गः पुत्रादिरूपो भवति १७ विदूरात् दूरतः संगं परिहृत्य यद्वा अति
दूरात् शीघ्रं उपेतेत्यन्वयः स एव अपवर्गः इष्टः १८ बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राह न हीति बह्वा
यासः १९

आत्मत्वात्सर्वत्र चासिद्धत्वादितिचेत्तद्द्वयमुपपादयति परावरेष्विति चतुर्भिः ब्रह्मा अंतो येषां स्थावरआदिर्येषां तेषु जी
वेषु जीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु २० गुणसाम्यप्रधानगुणव्यतिकरे महत्तत्वादौ च परब्रह्मस्वरूपः २१
कथं तर्हि द्रष्टृदृश्यभोग्यादिभेदः माययेत्याह प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्याप्यतया निर्देश्यः दृश्यं भोग्यं दृ
हादि तद्रूपेण व्याप्यतया निर्देश्यो माययाईयत इत्युत्तरेणान्वयः वस्तुतस्तु स्वरूपं अविकल्पितेनानिर्देश्योपि सन् यद्वा
अनिर्देश्योपि एवं निर्देश्यः सन् विकल्पित ईयत इत्युत्तरेणान्वयः २२ यतः केवलानुभवात्मक आनंद एव स्वरूपं य

परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुणसाम्ये
च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगात्मस्वरूपेण दृश्यरूपेण च
स्वयं व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ केवलानुभवानंदस्वरूपः परमेश्वरः मायया
ंतर्हितैश्वर्य ईयते गुणसर्गया २३ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्य
त्यधोक्षजः २४ तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः कि
मगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः २५

स्य ननु स एव चेत्सर्वत्र तर्हि सर्वज्ञसर्वज्ञत्वादि कुपलभ्येत तत्राह गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया अं
तर्हितमैश्वर्यं यस्य सः २३ यस्मादेवं तस्मात्सर्वेषु यथोचितं दयां सौहृदं च कुरुत यया आदयया उन्मुच्य संत्यज्य २४
ततः किं अत आह तुष्टे च तत्र तस्मिन् न किमलभ्यं तथापि गुणपरिणामाद्दैवादेव स्वसिद्धा अयत्नतः सिद्धा ये धर्मा
दयः तैः किं अगुणेन च मोक्षेण कांक्षितेन तैः किं तदुपगायतां नो स्माकं आकांक्षितस्यापि तस्य सिद्धेः यद्वा मोक्ष
मोक्षः तस्य चरणयोः सारं जुषां सुधां सेवमानानां तेनापि किमित्यर्थः २५ ६ ६ ६ १८

901
1981

ननु च धर्मादेः पुरुषार्थत्वं किमित्याचार्याभ्यां वेदोक्तत्वेन सत्य एवाभिहितः तत्राह धर्मोऽर्थः कामश्चेति यस्त्रिवर्गः तद
र्थं च य ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्कदंडनीतिश्च विविधा च वार्ता जीविकाः तं देत
त्सर्वं निगमस्य अर्थजातं स्वसुहृदः स्वांतर्यामिणः परस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सत्यं मन्ये सत्यपरत्वात् अन्यथा
तदसत्यमेव यद्वा तु इदं तदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः
स्वात्मार्पणमेवेत्यर्थः तदुक्तं गीतासु त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति २६ तेषां विश्वासार्थं गुरुसंप्रदाय

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता मन्ये तदेतदखिलं निगमस्य स
त्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६ ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल ना
रदाय एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् २७ श्रुतमेतन्मया पूर्वं
ज्ञानं विज्ञानसंयुतं धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् २८ दैत्यपुत्रा ऊचुः प्रह्लाद त्वं वयं चापि
न त्वन्यं विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ २९ बालस्यांतःपुरस्थस्य महत्संगो दुर
न्वयः छिंधि नः संशयं सौम्य स्याच्चेद्विश्रंभकारणं ३० इति श्रीभागवते म० स० प्रह्लादचरिते षष्ठोऽध्यायः ६

माह ज्ञानमिति यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इति मा शंकीत्याह भगवत एकांतभक्तानां यत्पादरज
स्तेन आप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् न तु उत्तमानामेवेति नियमः २७ अत एव मयापि नारदा
च्छ्रुतं विज्ञानसंयुतं अनुभवपर्यंतं धर्मं च श्रुतं २८ तत्राति विस्मिताः पृच्छंति एताभ्यां च ते अन्यं गुरुं न विद्मः एतदा
गमात्पूर्वमेवाहं नारदपार्श्वं गत इति चेत्तत्राहुः बालानामपि नो स्माकमेतौ ईश्वरौ नियंतारौ २९ अतस्त
वान्यत्र गमनं न संभवति स एवात्रागत इत्यपि न संभवतीत्याहुः बालस्येति दुरन्वयः दुर्घटः विश्रंभकारणं विश्वासहे
तुः इति श्रीधरस्वामिविरचितायां षष्ठोऽध्यायः ६ श्रीकृष्णार्पणमस्तु ६ ६ ६

सप्तमेमात्तगर्भेस्थेस्मिन्नारदाभाषितं प्रह्लादोवर्णयामासशिष्यतत्त्वयसिद्धये १ अथाविनारदादेतन्मयागर्भे
इतीरितं तत्कथांप्रस्तावमाहपृष्टः षाड्गभिः सुधीः १ अस्माकंपितरिहिरण्यकशिपौ २ स्वकृतेनैवपापेनपापोऽस्मा
अभक्षिभक्षितइतिहर्षणावदेनायुद्धायमचक्रुः ३ ४ ५ गजः शिबिरंआवासंव्यलुंपन्सर्वस्वापहरणेननाशितवंतः ६ ७ अनागसांनिरपराधामेनांनेतुंनार्हसीतिप्राह ८ अविषह्यंदुःसहं अतः अनयाप्रसवपर्यंतमत्रास्यतो

नारदउवाच एवंदैत्यसुतैः पृष्टोमहाभागवतोसुरः उवाचस्मयमानस्तान्स्मरन्मदनुभाषितं १
प्रह्लादउवाच पितरिप्रस्थितेस्माकंतपसेमंदराचलं युद्धोद्यमंपरंचक्रुर्विबुधादानवान्प्रति २ पिपी
लिकैरहिरिवदिष्ट्यालोकोपतापनः पापेनपापोभक्षीतिवादिनोवासवादयः ३ तेषामतिबलोद्यो
गंनिशम्यासुरयूथपाः वध्यमानाःसुरैर्भीताःदुद्रुवुःसर्वतोदिशं ४ कलत्रपुत्रवित्ताप्तान्गृहान्पशु
परिच्छदान् नावेक्ष्यमाणास्त्वरिताः सर्वेप्राणपरीप्सवः ५ व्यलुंपन्राजशिबिरममरा जयकांक्षिणः॥
इंद्रस्तुराजमहिषींमातरंममचाग्रहीत ६ नीयमानांभयोद्विग्नांरुदतीकुररीमिव यदृच्छयागतस्तत्र
देवर्षिर्ददृशेपथि ७ प्राहनैनांसुरपतेनेतुमर्हस्यनागसां मुंचमुंचमहाभागसतीपरपरिग्रहां ८ इंद्रउ०
आस्तेस्याजठरेवीर्यमविषह्यंसुरद्विषः आस्यतांयावत्प्रसवंमोक्ष्येर्थपदवींगतः ९ नारदउवाच अयं
निष्किल्बिषःसाक्षात्महाभागवतोमहान् त्वयानप्राप्स्यतेसंस्थांअनंतानुचरोबली १० इत्युक्तस्तां
विहायेंद्रोदेवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनांपरिक्रम्यदिवंययौ ११ ततोनोमातरमृषिःसमा
नीयनिजाश्रमे आश्वास्येहोषितांवत्सयावत्तेभर्तुरागमः १२

ततश्च अर्थस्यपदवींमार्गंगतः प्राप्तः सन्जातंपुत्रंहत्वामोक्ष्यामीत्यर्थः ९ साक्षात्स्वगुणैरेवमहान्नतुपित्रादि
संबंधात् त्वयाहेतुभूतेनसंस्थांमृत्युंनतथाप्स्यति तत्रहेतवः निष्किल्बिषइत्यादयः १० अनंतः तस्यप्रियोयोऽहं १२
वाप्रियोयस्यतस्यममभक्त्याएनांप्रदक्षिणीकृत्यइहोष्यतामित्याहेतिशेषः ११ ॥ श्रीकृष्णायवासुदेवाय॥

903
1981

अंतिसमीपे १३ अंतर्वत्नीगर्भिणीइछयाभर्त्तुरागमनानंतरंप्रसूयते स्वगर्भस्यक्षेमाय तस्याःशोकत्रांते
१४ धर्मतत्त्वंभक्तिलक्षणं ज्ञानमात्मानात्मविवेकः तदुभयंप्रसादात्ईश्वरः समर्थः १५ १६ भयात्भवतां वेशा
रदीस्वार्थानदृतः देहाद्यहंकारछेदनिपुणात्यर्थः १७ कासौवशारदीधीरित्यपेक्षायांनारदोक्तमेवदेहात्मविवेकप्रका
रमाह दशभिः जन्माद्याः जायंते अस्तिवर्द्धतेविपरिणमते अपक्षीयतेनश्यतीत्येवंभूताषड्भावविकाराः वृक्ष
स्येवयथाफलानांदृश्यंतेनतद्वदात्मनि यथैवास्थितेदेहस्यदृष्टाइत्यर्थः ईश्वरोनिकारसमर्थास्तेर्यस्यतेनतका
लेन १८ तदेवंदेहधर्मैस्तद्वैलक्षण्येनात्मनोदेहभेदोदर्शितः इदानीमात्मधर्मैरेवभेदंस्फुटयंस्तद्देहकारादिकंत्या

तथेत्यवात्सीद्देवर्षेरंतिसाप्यकुतोभया यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्तत १३ ऋषिंपर्यचरत्तत्र
भक्त्यापरमयासती अंतर्वत्नीस्वगर्भस्यक्षेमायेछाप्रसूतये १४ ऋषिःकारुणिकस्तस्याःप्रादादु
भयमीश्वरः धर्मस्यतत्त्वंज्ञानंचमामप्युद्दिश्यनिर्मलं १५ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्ति
रोदधे ऋषिणानुगृहीतंमांनाधुनाप्यजहात्स्मृतिः १६ भवतामपिभूयान्मेयदिश्रद्दधतेवचः वै
शारदीधीःश्रद्धातः स्त्रीबालानांचमेयथा १७ जन्माद्याःषडिमेभावादृष्टादेहस्यनात्मनः फलाना
मिववृक्षस्यकालेनेश्वरमूर्तिना १८ आत्मानित्योव्ययःशुद्धएकःक्षेत्रज्ञआश्रयः अविक्रियःस्व
दृग्हेतुर्व्यापकोसंग्यनावृतः १९

जयति आत्मानित्यः अविनाशीवाअरेयमात्मेतिश्रुतेः अव्ययः अपक्षयशून्यः एषोअक्षरेपरमेव्योमन्नि
तिश्रुतेः शुद्धः निष्कलंनिःक्रियंशांतंनिरवद्यंनिरंजनमितिश्रुतेः क्षेत्रज्ञः विज्ञातारमरेकेनविजानीयादितिश्रु
तेः आश्रयः यस्मिन्द्यौःपृथिवीचांतरिक्षमितिश्रुतेः अविक्रियः निष्क्रियंशांतमितिश्रुतेः स्वदृक् आत्मज्योति
सम्राडितिहोवाचेतिश्रुतेः हेतुः सइमांल्लोकानसृजतेतिश्रुतेः व्यापकः सत्यंज्ञानमनंतमितिश्रुतेः असंगी
असंगोह्ययंपुरुषइतिश्रुतेः अनावृतः पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यतइतिश्रुतेः १९ श्रीराम ॐ

परैः श्रेष्ठैः विवेकसमर्थैः देहादावहंममेत्यसद्भावं मिथ्याबुद्धिं २० ननु एवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मता
प्राप्तिः कथं स्यात् यतो अहंकारादिकं त्यजत इत्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टान्तमाह स्वर्णमिति स्वर्णकारः क्षेत्रेषु स्वर्णक्षेत्रेषु सुवर्ण
कणेषु ग्रावसु योगैर्धमनाद्युपायैस्तद्गुणाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्म
ता अध्यात्मवित् आत्माधिकृतकार्यकारणसंघातज्ञाता २१ अध्यात्मविवेकमात्मप्राप्त्युपायमाह अष्टाविति त्रिभिः मूलप्र
कृतिः महदहंकारः पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्त्वादयः प्रकृतिगुणास्तेन तदभिन्नाः एकादशेन्द्रियाणि पंचमहाभूतानि च
इति षोडश पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः एकत्वहेतुः सर्वसाक्षित्वेनान्वयात् तदुक्तं मूलप्रकृतिरविकृति

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहंममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० स्वर्णं यथा ग्रावसु
हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत २१
अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुरुषो नेति नेतीत्यतत्त्यजन्नग्र२॥
पुमानेकः समन्वयात् २२ देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्
त्यजन् २३ अन्वयव्यतिरेकेण विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ छ: ॥

महदाद्याः प्रकृतिविकृतयः सप्त षोडशस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२ जगत् जंगमं तस्थुः स्थावरं अत्र
च संघातात्मके देहे एव मृग्यः अन्वेष्टव्यः मृग्यः कस्मै एतदित्याह नेति नेतीत्यनात्मवर्गादेः यमाणस्य यम एव अतत्त्वं त्यजन् अ
नात्मवर्गात् पृथगुपलभ्यमान इत्यर्थः॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अतएव मणिभ्यः सूत्रस्य व्यतिरेक
व्यतिरेकश्च तद्योर्द्वंद्वं तेनैव यो विवेकः सर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थिति
संहारैः यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुत्युक्तैः सर्गादिसंधानेनेत्यर्थः विमृशद्भिर्विचारयद्भिः असत्वरैः
अव्यग्रैः मृग्य इति पूर्वेणान्वयः २३ २४ श्रीकृष्ण॥ छ: छ: छ:

905
1331

विमर्शप्रकारमाह बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी अतः एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैः आत्मधर्मत्वे
नानिरस्तैः बुद्धिधर्मत्वहेतुः त्रिवर्णः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकृतत्वाच्च न
स्याएवंता अवस्थाः आत्मा तु बुध्यन्वयात् तदवस्थावानिव भाति स्मृतत्वेन इत्यात्मनः स्वरूपं बुध्येत जानीयादित्यर्थः
अत्र दृष्टान्तः कुसुमधर्मैर्गन्धैस्तदाश्रयं वायुमिव २५ २६ ननु तर्हि यथा कुसुमोपाधिका गन्धा वायोर्गन्धाविवेकज्ञाने
न निवर्तन्ते एवमात्मनः संसारो न निवर्तते त्याशंक्याह एतद्द्वारं बुद्धिद्वारकं तदवस्थाद्वारको वा संसारः स्वतः हि यस्माद्

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः २५ एभिस्त्रिवर्णैः
पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुध्येद्गन्धैर्वायुमिवान्वयात् २६ एतद्द्वारो हि संसा
रो गुणकर्मनिबंधनः अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवाप्यते २७ तस्माद्भवद्भिः कर्तव्यं कर्मणां
त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८ तत्रोपायसहस्राणामयं भगवतोदितः
यदीश्वरे भगवति यथा यैरंजसा रतिः २९ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च संगेन साधुभ
क्तानामीश्वराराधनेन च ३०

द्धेर्ये गुणाः कर्माणि च तैर्निबध्यत इति तथा स वाऽज्ञानमूलः अतः अपार्थो मिथ्याभूतोऽपि स्वप्नवद्दृश्यते वायो
स्तु गंधवत् द्रव्यसंबंधस्य वास्तवास्तवत्वाद्विषमो दृष्टान्तः यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं
दहनं कं तत् योगः कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा सः २८ २९ तदेवं ज्ञानप्रकारमुक्त्वा
तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाह तत्रेति पंचभिः यः धर्मः यथानुष्ठितैर्वा रतिरिति यत् अयमुपायो भगव
तोक्तः तथा हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति।
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वत इत्यादि २९ तत्रैव तानेव गानधर्मानाह गुरोः शुश्रूषया भक्त्या प्रेम्णा स
र्वेषां लब्धानामर्पणेन च ३०

तस्यलिंगानांमूर्तःनामीक्षणं अर्हणंचादिर्येषांवंदनादीनां ३१ ३२ तेश्चानिर्जितः कामक्रोधलोभमोहमदमत्सराणो
इंद्रियाणांचवर्गोयैः ३३ भगवद्भक्तेर्लिंगान्याह निशम्येतित्रिभिः गुणानभक्तवात्सल्यादीनअतिहर्षेणउद्भूताः पु
लकाः अश्रूणिचतेः गद्गदंयथाभवत्येवंप्रोत्कंठः उद्गायति ३४ ३५ तस्यभावश्चेष्टादिः तस्यभावःभावनातेनाचक्र
तआशयाकृतीमनःशरीरेयस्यनिर्दग्धंबीजमज्ञानमनुशयावासनावायस्यसः सम्यग्गतिप्राप्नोति ३६ ततःकि

श्रद्दधानःकथायांचकीर्त्तनैर्गुणकर्मणां तत्पदांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ हरिःसर्वेषु
भूतेषुभगवानास्तईश्वरः इतिभूतानिमनसाकामैस्तैःसाधुमानयेत् ३२ एवंनिर्जितषड्वर्गैःक्रियते
भक्तिरीश्वरे वासुदेवभगवतियथासंलभतेरतिं ३३ निशम्यकर्माणिगुणानतुल्यान्वीर्याणिली
लातनुभिःकृतानि यदातिहर्षोत्पुलकाश्रुगद्गदंप्रोत्कंठउद्गायतिरौतिनृत्यति ३४ यदाग्रहग्रस्तइ
वक्वचिद्धसत्याक्रंदतेध्यायतिवंदतेजनं मुहुःश्वसन्वक्तिहरेजगत्पतेनारायणेत्यात्ममतिर्गतत्रपः
३५ तदापुमान्मुक्तसमस्तबंधनःतद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयोमहीयसा
भक्तिप्रयोगेणसमेत्यधोक्षजं ३६ अधोक्षजालंभमिहाशुभात्मनःशरीरिणःसंसृतिचक्रशातनं॥
तद्ब्रह्मनिर्वाणसुखंविदुर्बुधास्ततोभजध्वंहृदयेहृदीश्वरं ३७ कोतिप्रयासोसुरबालकाहरेरुपास
नेस्वेहृदिछिद्रवत्सतः स्वस्यात्मनःसख्युरशेषदेहिनांसामान्यतःकिंविषयोपपादनैः ३८ छं

मतआह अधोक्षजस्यालंभनंस्पर्शः पाठांतरेतस्याश्रयणं अशुभःरागादियुक्तआत्मामनोयस्य संसृतिच
क्रशातनंनिवर्तकंबुधाविदुः तदेवब्रह्मनिर्वाणलयोमोक्षः तदात्मकंसुखंविदुः हृदीश्वरमंतर्यामिणं ३७ भक्ति
रत्राकंप्रतिवचनमंतव्यमित्याहकइति छिद्रवत्आकाशवत्विषयाणामुपपादनैरर्जनैः किंतत्रहेतुः सर्वदेहिनां
सामान्यतोविषयाणांसकरादिसाधारण्यापत्तेरित्यर्थः नचवमारोपानरुक्तदोषः नारदोक्तानुवादरूपत्वा
दस्यप्रकरणस्य ३८

907/1981

अनर्थकंचविषयार्जनमित्याह रायःअर्थाःक्षणभंगुरमायुर्यस्य तदुक्तमितिहासेषु धनंहिपुरुषोलोकेपुरुषंधन
मेवच अवश्यमेकंत्यजतितस्मात्किंधनतृष्णयेति ३९ यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं अभिलाषोपनीतंच
सुखंस्वर्गपदास्पदमित्येवंस्मृताःस्वर्गादिभोगाअपिनसेव्याइत्याहएवंहीति क्षयिष्णुत्वेहेतुःऋतुभिःकृताइति॥
तद्यथेहकर्मजितोलोकःक्षीयतएवपुण्यजितोलोकःक्षीयतइतिश्रुतेः सातिशयाःनचनिर्मलाःस्पर्धादिमत्त्वात् नविद्यतेदृष्टंश्रुतंच

रायःकलत्रंपशवःसुतादयोगृहामहीकुंजरकोशभूतयः सर्वेर्थकामाःक्षणभंगुरायुषःकुर्वंतिम
र्त्यस्यकियत्प्रियंचलाः ३९ एवंहिलोकाःक्रतुभिःकृताअमीक्षयिष्णवःसातिशयाःनर्निर्मलाः तस्माद
दृष्टश्रुतदूषणंपरंभक्त्यैकयेशंभजतात्मलब्धये ४० यदर्थइहकर्माणिविद्वन्मान्यसकृन्नरः क
रोत्यतोविपर्यासममोघंविंदतेफलं ४१ सुखायदुःखमोक्षायसंकल्पइहकर्मिणः सदाप्नोतीहयाद
ःखमनीहायाःसुखावृतः ४२ कामानकामयतेकाम्यैर्यदर्थमिहपूरुषः सवैदेहस्तुपारक्योभंगु
रयात्युपैतिच ४३ किमुव्यवहितापत्यदारागारधनादयः राज्यकोशगजामात्यभृत्याप्तामम
तास्पदाः ४४ किमेतैरात्मनस्तुच्छैःसहदेहेननश्वरैः अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४५ छं

दूषणंयस्मिन्तत्किंच यदर्थंयदर्थःयत्संकल्पः अतःसंकल्पितान्विपर्यासंविपरीतफलंअमोघंअवश्यंप्राप्नो
ति ४१ तदेवदर्शयतिसुखायेति ईहयाइच्छयावायःपूर्वमनीहयाहेतोःसुखेनावृत्तोव्याप्तआसीत्सईहयाइच्छया
क्रिययावायःपूर्वमनीहयाहेतोःसुखेनावृतोव्याप्तआसीत्सईहयादुःखमाप्नोत्येव ४२ किंच कामानभोगानका
म्यैर्विषयैःकर्मभिर्वापारक्यःश्वादिभोग्यः नतात्मनीयःभंगुरश्च ४३ किमुदेहाद्व्यवहिताःअपत्यादयोममता
विषयाःपारक्याइतिवक्तव्यं ४४ किंचस्वयंपुरुषार्थश्चान्यस्यकिमेतैरित्याह किमेतैरिति ४५ श्रीराम॥

भोगावसराभावाच्चैतैः कउपयोगइत्याह निरूप्यतामिति प्राचीनैः कर्मभिः क्लिश्यमानस्यकर्मभिःकियानर्थइति
चान्वयः ४६ ननुकर्मस्कप्राप्तेषुभोगावसरःस्यात्तत्राह कर्माणीति नचैवंकर्मतत्फलंदेहादिकंचपरमार्थइत्या
ह उभयंकर्म चदेहंचअविवेकेनज्ञानेनैवततुते ४७ यदपाश्रयाःनदधीनाः ४८ भूतानांप्राणिनांजीवसंज्ञितः
अं

निरूप्यतामिहस्वार्थःकियान्देहभृतोऽसुराः निषेकादिष्ववस्थासुक्लिश्यमानस्यकर्मभिः ४६
कर्माण्यारभतेदेहीदेहेनात्मानुवर्तिना कर्मभिस्तनुतेदेहमुभयंत्वविवेकतः ४७ तस्मादर्थश्च
धर्मश्चयदपाश्रयः भजतानीहयात्मानमनीहंहरिमीश्वरं ४८ सर्वेषामिहभूतानांहरिरात्मेश्वरः
प्रियः भूतैर्महद्भिःस्वकृतैः कृतानांजीवसंज्ञितः ४९ देवोसुरोमनुष्योवायक्षोगंधर्वएववा॥
भजन्मुकुंदचरणंस्वस्तिमानस्याद्यथावयं ५० नालंद्विजत्वंदेवत्वमृषित्वंवासुरात्मजाः प्रीण
नायमुकुंदस्यनवृत्तंनबहुज्ञता ५१ नदानंनतपोनेज्यानशौचंनव्रतानिच प्रीयतेमलयाभक्त्या
हरिरन्यद्विडंवनं ५२ ततोहरौभगवतिभक्तिंकुरुतदानवाः आत्मौपम्येनसर्वत्रसर्वभूतात्म
नीश्वरे ५३ दैत्यायायक्षरक्षांसिस्त्रियःशूद्राव्रजौकसः खगामृगाःपापजीवाःसंतिह्यच्युततां
गताः ५४ एतावानेवलोकेस्मिन्पुंसःस्वार्थःपरःस्मृतः एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणं
५५ इतिश्री० स० सप्तमोध्यायः ७

अंतर्यामी ४९ असुराणामस्माकमत्रनाधिकारइत्यपिनवाच्यमित्याह देवइतिपंचभिः ५० ५१ अमलया
निष्कामयाविडंबनंनटनमात्रं ५२ ५३ अच्युततांअमृतत्वं ५४ अध्यायद्वयोक्तमुपसंहरति एतावानिति॥
सर्वत्रदीक्षणंगोविंददृष्ट्यासंमाननं ५५ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधटीकायांसप्तमोध्यायः ७ २२

909
1381

अष्टमेनिरूपास्तुतंनिघ्नन्दैत्यंहतःस्वयं आविर्भूतनृसिंहनसप्तब्रह्मादिभिःस्तुतः १ अंतःकृपासुधापूर्णोबहिः
क्रोधनकेसरी दैत्येंद्रस्मरिभावैनभजंतंसमभावयत् २ एकांतसंस्थितोभक्त्यक्रनिष्ठापथायथावत् २ मत्कृतुंसमनो
दधे कथंभूतःकोपस्यावेशेनाद्भेकेणचलत्गात्रंयस्यसः क्षिप्त्वातिरस्कृत्य ३ पापेनसरोषेणातिरश्चिनेनवक्रेण ४
अमंदात्मन्अल्पबुद्धे ५ मदाज्ञातिलंघितवानअद्यमालयंनेष्यामि ६ अभीवत् धृष्टवत् किमबलंयस्यस

नारदउवाच अथदैत्यसुताःसर्वेश्रुत्वातदनुवर्णितं जगृहुर्निरवद्यत्वान्नैवगुर्वनुशिक्षितं १ अ
थाचार्यसुतस्तेषांबुद्धिमेकांतसंस्थितां आलक्ष्यभीतस्त्वरितोराज्ञआवेदयद्यथा २ कोपावेशचलद्गा
त्रपुत्रंहंतुंमनोदधे क्षिप्त्वापरुषयावाचाप्रह्लादमतदर्हणं ३ आहेक्षमाणःपापेनतिरश्चीनेनचक्षुषा
प्रश्रयावनतंदांतंबद्धांजलिमवस्थितं ४ सर्पःपदाहतइवश्वसन्प्रकृतिदारुणः हेदुर्विनीतमंदात्मन्
कुलभेदकराधम ५ स्तब्धंमच्छासनोद्वृत्तंनेष्येत्वाद्ययमसादनं क्रुद्धस्ययस्यकंपंतेत्रयोलोकाःसहेश्वराः
६ तस्यमेभीतवन्मूढशासनंकिंबलोऽत्यगाः ६ प्रह्लादउवाच नकेवलंमेभवतश्चराजन्सवैबलंबलि
नांचापरेषां परावरेमीस्थिरजंगमायेब्रह्मादयोयेनवशंप्रणीताः ७ सईश्वरःकालउरुक्रमोसावो
जःसहःसत्वबलेंद्रियात्मा सएवविश्वंपरमःस्वशक्तिभिःसृजत्यवत्यत्तिगुणत्रयेशः ८ जह्यासुरंभाव
मिमंत्वमात्मनःसमंमनोधत्स्वनसंतिविद्विषः ऋतेजितादात्मनउत्पथस्थितात्तद्धिह्यनंतस्यमहत्समर्हणं ९

किंबलः ७ वशंप्रणीताइत्यत्रहेतुः सईश्वरइति उरवःक्रमाःपादविक्षेपाःयस्य बहुपराक्रमइतिवा ओजआ
दिरूपः सत्वंधैर्यंबुद्धिर्वा ८ मच्छत्रुरसौकथंममापिसएवबलंस्यादतआह जहीति आत्मनःस्वस्यस्वभावंत्यज
अजितादात्मनोमनसऋतेनविनाअन्येविद्विषोनसंति किंच तद्धितदेवाराधनंसाम्यसमनसाधारणमेवा समर्हणंआ
राधनं ९

मयाहिदिग्विजयेसर्वेजिताः अतःसांप्रतंनसंतीतिसत्यमितिचेत्तत्राह दस्यूनिति एकेभवादृशामंदाःपुराआदौलुंपंतः
सर्वस्वंहरतःषडिंद्रियलक्षणान्तत्रात्रन्अविजित्यअजित्वादशदिशःस्वयंजितामन्यंते साधोसुजितचित्तस्यदेहिनां
समस्यतस्यविद्विषःस्वाज्ञानकल्पिताःपूर्वरात्रवःकुतःस्युः १० व्यक्तंनिश्चितं विप्लुवाअनन्विताइत्यर्थः ११ हेमंदभाग्य
यद्यसावस्तितर्हिक्वास्तिप्रह्लादआह सर्वत्रास्ति हिरण्यकशिपुराह तर्हिकस्मात्स्तंभेनास्ति प्रह्लादस्तुतंस्तंभेनिरी
क्ष्यमाणोनमस्यन्नाहदृश्यतइति १२ हिरण्यकशिपुःस्तंभमुपपश्यन्नाह सोऽहमिति १३ प्रह्लादेनमर्दितबद्धांजलि

दस्यून्पुराषट्नविजित्यलुंपतोमन्यंतएकेस्वजितादिशोदश जितात्मनोज्ञस्यसमस्यदेहिनांसाधोः
स्वमोहप्रभवाःकुतःपरे १० हिरण्यकशिपुरुवाच व्यक्तंत्वंमर्तुकामोसियोतिमात्रंविकत्थसे मुमर्षू
णांहिमंदात्मन्ननुस्युर्विप्लवागिरः ११ यस्त्वयामंदभाग्योक्तोमदन्योजगदीश्वरः क्वासौयदिससर्व
त्रकस्मात्स्तंभेनदृश्यते १२ सोहंविकत्थमानस्यशिरःकायाद्धरामिते गोपायतुहरिस्त्वाद्ययस्तेशरण
मीप्सितः १३ नारदउवाच एवंदुरुक्तैर्मुहुरर्दयन्रुषासुतंमहाभागवतंमहासुरः खड्गंप्रगृह्योत्पतितोव
रासनात्स्तंभंतताडातिबलःस्वमुष्टिना १४ तदैवतस्मिन्निनदोतिभीषणोबभूवयेनांडकटाहमस्फुटत् — सविक्रमन्पुत्रवधेप्सुरोजसानिशाम्यनिर्ह्रादमपूर्वम
द्भुतं अंतःसभायांनददर्शतत्पदंवितत्रसुर्येनसुरारियूथपाः १५ सत्यंविधातुंनिजभृत्यभाषितंव्या
प्तिंचभूतेष्वखिलेषुचात्मनः अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभेसभायांनमृगंनमानुषं १६

नानिरीक्ष्यमाणंस्तंभंताडितवान् १४ तत्पदंतस्यध्वनेराश्रयं १५ भगवांस्तदाअदृश्यतदृश्योबभूवकिमर्थं नि
जभृत्येनप्रह्लादेनयद्भाषितंदृश्यतइतितत्सत्यंविधातुंकर्त्तुंतथाअखिलेषुभूतेषुस्वात्मनोव्याप्तिंचसत्यंकर्तुंस्तं
भेअदृश्यतनान्यत्रकिमर्थंभातिकेषुचभावेषुभूतेषुचमहत्त्वंचभगवानास्तइतिचनतेनचभाषितंसत्यंकर्तुं तथाअ
त्यद्भुतंदैत्यघातकमितिघोरंरूपमुद्वहन्नतत्किमर्थं निजभृत्यैःसनकादिभिःशापान्तेमरभसुरतोस्त्रिभिर्जन्मभिः
शापमोक्षोभवतिनतत्सत्यं १६

911
1981

कर्तुं तथाअत्यद्भुतंब्रह्मसृष्टावदृष्टसृष्टंतंचरूपमुद्वहन्नतच्चनमृगाकारंउद्वहन् सभायांमध्येअदृश्यत नत्किमर्थं॥
निजभृत्येनहिरण्यकशिपुनाब्रह्माणंप्रतियद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभो नथान्तर्बहिः
दिवानक्तमन्यस्मादपिचायुधैः नभूमौनांबरेमृत्युर्ननरैर्नमृगैरपीति तत्तथास्त्विति यद्भाषितंतत्सत्यंकर्तुंनहितद्ब्रह्मसृष्टेषु तंननरोवनमृगोवा
ति ननरैर्नमृगैरितिचब्रह्मणाचनिजभृत्येनतथास्त्विति यद्भाषितंतत्सत्यंकर्तुंनहितद्ब्रह्मसृष्टेभ्य तंननरोवनमृगोवा
नचसभागृहस्यांतःनचप्रांगणवद्बहिःएवंताभ्यांभाषितंसत्यंकर्तुंयुच्चहिरण्यकशिपुनाभाषितं भूतंभविष्यद्धनम्
त्वमेभववितेति अयमकुतश्चिद्भयोमरइतितच्चनिजभृत्येननारदेनइंद्रंप्रतियद्भाषितंअयंमहान्संस्थानेप्राप्तम
ति अनंतानुचरइत्यनेनस्वस्यभक्तपक्षपातित्वंचयद्भाषितंतच्चसत्यंकर्तुं अदृश्यत चकारान्निजभाषितंचयत् कौंतेय

सस्त्वमेवंपरितोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानं नायंमृगोनानरोनापिमृगोविचित्रमहोकिमेतन्न
मृगेंद्ररूपं १७ मीमांसमानस्यसमुत्थितोग्रतोनृसिंहरूपस्तदलंभयानकं प्रतप्तचामीकरचंड
लोचनंस्फुरत्सटाकेसरजृंभिताननं १८ श्रीकृष्णायवासुदेवायहरयेपरमात्मने छः ॥

प्रतिजानीहिनमेभक्तःप्रणश्यतीति तेषामहंसमुद्धर्तामृत्युसंसारसागरादित्यादि तच्चसत्यंकर्तुंअदृश्यतेति
द्रष्टव्यं अलमतिविस्तरेण १६ अस्यश्लोकटीकासदृत्यएवंध्वनिश्रुत्वातदाश्रयंसत्वप्राणिविशेषमवेक्ष्यवि
लोकयन् स्तंभस्यमध्यात्अनुनिर्जिहानंनिर्गच्छंतंनमृगेंद्रयोर्मिश्ररूपमहोकिमेतदितिमीमांसवानितिशेषः
१७ तस्येवमलंभयानकंतन्नृसिंहरूपंमीमांसमानस्याग्रतःसन्नृसिंहरूपोहरिःसमुत्थितः भयानकत्वमेव
दर्शयन्तद्रूपमनुवर्णयतित्रिभिः प्रतप्तंचामीकरंस्वर्णमिवपिंगेलोचनेयस्मिन् सटाजटाःकेसराःकंठरोमा
णि स्फुरद्भिःसटाकेसरैःजृंभितंसाटोपमाननंयस्मिन् १८ श्रीराम छः छः छः

करालास्तैगाः दंष्ट्रायस्मिन्करवालः खड्गः तद्वच्चंचलाक्षरांतवत्तीक्ष्णाग्रवाजिह्वायस्मिन्भ्रुकुटीयुक्तेनमुखेनोत्
ल्बणं स्तब्धौनुस्रौतांकुवन्तऊर्ध्वौकर्णौयस्मिन् गिरिकंदरवदद्भुतंव्यात्तप्रसृतंआस्यंनासेचयस्मिन् हनुकपो
लप्रांतौतयोर्भेदनाविदारणेनभीषणं १९ दिविस्पृशान्कायायस्मिन्अलुक्समासः अदीर्घाह्रस्वापीवरास्थू
लाग्रीवायस्मिन् उरुविशालंवक्षस्थलंचयस्मिन् उरुविशालंवक्षस्थलंचयस्मिन् तथाअल्पंमध्यंउदरंयस्मि
न् चंद्रांशुगौरैस्तनूरुहैर्लोमभिः छुरितंव्याप्तंविष्वक्सर्वतःप्रसृताःभुजाःतेषामनीकानिस्तोमाःतेषांश

करालदंष्ट्रंकरवालचंचलक्षुरांतजिह्वंभ्रुकुटीमुखोल्बणं स्तब्धोर्ध्वकर्णंगिरिकंदराद्भुतव्या
त्तास्यनासंहनुभेदभीषणं १९ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षस्थलमल्पमध्यमं
चंद्रांशुगौरैःछुरितंतनूरुहैःविष्वग्भुजानीकशतंनखायुधं २० दुरासदंसर्वनिजेतरा
युधप्रवेकविद्रावितदैत्यदानवं प्रायेणमेयंहरिणोरुमायिनावधःस्मृतोनेनसमुद्यते
नकिं २१ एवंब्रुवंस्त्वभ्यपतद्गदायुधोनदन्नृसिंहंप्रतिदैत्यकुंजरः अलक्षितोग्नौप
तितःपतंगोयथानृसिंहौजसिसोसुरस्तथा २२ श्रीराम छ: श्रीकृष्णायनमः॥

नानियस्मिन् नखान्येवायुधानियस्मिन् २० दुरासदंप्राप्तुमशक्यं।सर्वाणिचनिजानिचक्रादीनीतराणिकुंतादी
निनान्यायुधप्रवेकाःशस्त्रोत्तमाःतैर्विद्राविताःदैत्यदानवाःयेनतत्तनदृपंमीमांसमानस्याग्रतःसमुत्थितइतिपूर्वेणान्व
यः तथाविभौवप्रयोजनविमर्शपूर्वकंतेनसहदैत्यस्ययुद्धमाहसप्तभिः प्रायेणमहामायाविनाहरिणाअयमेवंमेतावध
ःमृत्युहेतुःस्मृतःचिंतितः तथाप्यनेनसमुद्यतेनकिंनकिंचीत्यादितिइत्येवंब्रुवन्नाभ्यपद्यतेत्यन्वयः २१ नृ
सिंहौजसिदीप्तेपतितःसन्अलक्षितःअदृष्टोभूत २२ श्रीकृष्णायवासुदेवायहरयेपरमात्मने २४

913
1981

सत्त्वधामनिसत्त्वप्रकाशेहरौपतितस्यतमोमयस्यासुरस्यानंनतद्विचित्रंभवतितत्त्वंहेतुः योहरिः पुरासृष्ट्यादौप्रलयकालीनं
तमः अपिबत् २३ तस्मिन्विक्रमंतंतस्तुवतःप्रहरंतंहस्तादुत्कलितःनिःसृतः २४ तदाअमराःदेवाःसर्वधिष्ण्यपाःअसा
ध्वमन्यंत हतान्याकाशस्थानानियेषांते तद्विधाघनच्छदाःमेघांतरिताःसंतः २५ यस्यहस्तात्त्वयंमुक्तःतंनृहरिस्ववीर्या
तंशंकितंमन्यमानःखड्गचर्मणीप्रगृह्यपुनस्तमासज्जत आस्यपद्यतेत्यन्वयः श्येनस्येववेगोयस्यतं शतचंद्रवर्त्मभिः

नतद्विचित्रंखलुसत्त्वधामनिस्वतेजसायोनुपुरापिबत्तमः ततोभिपद्याभ्यहनन्महासुरोरुषान्नृसिंहंग
दयोरुवेगया २३ तंविक्रमंतंसगदंगदाधरोमहोरगंतार्क्ष्यसुतोयथाग्रहीत् सतस्यहस्तोत्कलितस्तदास
रोविक्रीडितोयद्वदहिर्गरुत्मतः २४ असाध्वमन्यंतहृतौकसोमराघनच्छदाभारतसर्वधिष्ण्यपाः तंमन्य
मानोनिजवीर्यशंकितंयद्धस्तमुक्तोनृहरिंमहासुरः २५ पुनस्तमासज्जतखड्गचर्मणीप्रगृह्यवेगेनगत
श्रमोमृधे तंश्येनवेगंशतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधोहरिः २६ कृत्वाट्टहासंखरमुत्स्वनोल्बणंनि
मीलिताक्षंजगृहेमहाजवः विष्वक्स्फुरंतंग्रहणातुरंहरिर्व्यालोयथाखुंकुलिशाक्षतत्वचं २७ द्वार्यूरु
आपात्यददारलीलयानखैर्यथाहिंगरुडोमहाविषं २८ श्रीकृष्णायवासुदेवायहरयेपरमात्मने॥

खड्गचर्ममार्गैः अच्छिद्रंयथाभवत्येवमुपर्यधश्चरंतं २६ अट्टहासमेवाह खरंतीव्रंउत्स्वनेनमहानादेनोल्बणंभयंक
रंतद्यथाहरेस्तेजसाचनिमीलितेअक्षिणीयस्य प्रहरणेदृष्टांतः व्यालोयथाआखुंमूषकंविदारणेदृष्टांतः आहिंगरुड
इति विष्वक्सर्वतःस्फुरंतंनिःसरंतंग्रहणेनातुरंविवशं इंद्रेणमहत्युद्धेतत्प्रयुक्तेनकुलिशेननक्षतात्वगपियस्यतं
द्वारिसभायांनांतर्बहिःऊरौउरौनिपात्यनभूमौचनांबरेनखैर्नव्यस्त्रैभिःअसुमाद्भिर्वा एवंदेवानृतपरिहाराय
संध्यायामितिद्रष्टव्यं २९ श्रीकृष्णायवासुदेवाय छ: छ: छ: छ:

दैत्यवधमुक्त्वातद्भृत्यवधमाह द्वाभ्यां संरंभेणदुःप्रेक्ष्येकरालेलोचनेयस्य असृज्जोरक्तस्यलवैर्बिंदुभिः रक्ताः अतएव
अरुणाः केसराः आननेचयस्यसः कुद्भवद्विपहत्ययागजवधहरिः सिंहोयथा एवंभूतः तस्यानुचरानुद्धत्कन्नरणान्वयः २९
नखांकुरैः उत्पाटितंहत्सरोजंयस्यतं दोर्दंडानांयूथानियस्यसः तंअनुपथायेषांतान् अन्यानपितत्पक्षपातिनइत्यर्थः अह
नहतवान् ३० दैत्यवधव्यग्रस्यनरहरेराटोपमाहद्वाभ्यां सटाभिरवधूताः प्रकंपिताः परापतन्व्यशीर्यंत तस्यदृष्ट्या

संरंभदुःप्रेक्ष्यकरालेलोचनोव्यात्ताननांतंविलिहन्स्वजिह्वया असृक्लवाक्तारुणकेसराननोयथांत्रमालीद्विपहत्ययाहरिः २९ नखांकुरोत्पाटितहृत्सरोरुहंविसृज्यतस्यानुचरानुदायुधान् अहन्समस्तान्नखशस्त्रपाणिभिर्दोर्दंडयूथोऽनुपथान्सहस्रशः ३० सटावधूताजलदाःपरापतन्ग्रहाश्चतद्दृष्टिविमुष्टरोचिषः अंभोधयश्वासहताविचुक्षुभुर्निर्ह्रादभीतादिगिभाविचुक्रुशुः ३१ द्यौस्तत्सटोत्क्षिप्तविमानसंकुलाप्रोत्सर्पतक्ष्माचपदातिपीडिता शैलाःसमुत्पेतुरमुष्यरंहसा तत्तेजसाखंककुभोनरेजिरे ३२ ततःसभायामुपविष्टमुत्तमेनृपासनेसंहततेजसंविभुं अलक्षितद्वैरथमत्यमर्षणंप्रचंडवक्त्रंनवभाजकश्चन ३३ निशाम्यलोकत्रयमस्तकज्वरंतमादिदैत्यंहरिणाहतंमृधे प्रहर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३४

विमुष्टरोचिषःषांतिरस्कृतप्रभाः अभवन्निर्ह्रादोघोषः दिगिभादिग्गजाः ३१ तस्यसटाभिरुत्क्षिप्तानिविमानानितैः
संकुलाद्यौरासीत् प्रोत्सर्पत स्वस्थानात्प्रकर्षेणउदसर्पत स्वाभिमैश्वर्यमाश्चर्यमिवमत्वा कौतूहलेनतस्यासनेउ
पविष्टंभयात्नकोपिभजननासेवत नलक्षितोद्वैरथः प्रतियोद्धायेन ३३ लोकत्रयस्यमस्तकज्वरंशिरोगोय
थवदुःसहं प्रहर्षस्यवेगेनउत्कलितानिविकसितान्याननानियासांताः मुहुरिंवकृषुः ३४ ॥ ॥ २५

915
1981

नाकिनांविमानावलिभिः सुराणामानकाःपटहाः नेदुर्नांध्रिंवादिताः ३५ तंनिकटमागत्य ३६ स्त्रियोऽप्सरसोननृतुः
गंधर्वाश्चरसश्चचारणाश्चनेनवनेत्यर्थः ३७ नरशार्दूलंपुरुषोत्तमं ३८ प्रसादयांनृसिंहस्यगंकुमाकुलचेतसः आगत्य
वास्तवन्समदत्ताभ्लोकैःपृथक्पृथक् अनंतायअनंतप्रमादधितुंनतोस्मि अनंतत्वेहेतुः दुरंताःशक्तयोयस्यतस्मै ॥
तत्कुतः विचित्राणिवीर्याणिप्रभावाःयस्य तत्किमर्थं पवित्राणिशोधकानिकर्माणियस्य विचित्रवीर्यत्वमेवाह विश्व

तदाविमानावलिभिर्नभस्तलंदिदृक्षतांसंकुलमासनाकिनां सुरानकादुंदुभयोथजघ्निरेगंधर्वमुख्याननृतुःसुरस्त्रियः ३५ तत्रोपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ऋषयःपितरःसिद्धाविद्याधरमहोरगाः ३६ मनवःप्रजानांपतयोगंधर्वाप्सरचारणाः यक्षाःकिंपुरुषास्तातवेतालाःसाध्यकिन्नराः ३७ तेविष्णुपार्षदाःसर्वेसुनंदकुमुदादयः मूर्ध्निबद्धांजलिपुटाआसीनंतीव्रतेजसं ३८ ईडिरेनरशार्दूलंनातिदूरचराःपृथक्पृथक् ३८ ब्रह्मोवाच नतोस्म्यनंतायदुरंतशक्तयेविचित्रवीर्याय पवित्रकर्मणे विश्वस्यसर्गस्थितिसंयमान्गुणैःस्वलीलयासंदधतेऽव्ययात्मने ३९ श्रीरुद्रउवाच॥ कोपकालोयुगांतस्तेहतोयमसुरोल्पकः तत्सुतंपाह्युपसृतंभक्तंतेभक्तवत्सल ४० श्रीरुद्रः॥

स्येति संदधते सम्यक्कुर्वते एवमपिअव्ययात्मने अप्रच्युतस्वरूपाय ३९ रुद्रस्तत्कोपकालाभिज्ञःनायंकोपावस
र इतितंप्रार्थयते सहस्रयुगांतस्तवकोपस्यकालः कोपायोग्यश्चायमित्याह अल्पकः अत्यल्पः अतःकोपानिवृ
त्यापहादंमाहिंसीरित्याह तत्सुतमिति यद्वा अकालेप्ययंकोपोऽस्यभक्तस्यरक्षणार्थमितिवक्तुंहिंइदानींको
पंत्यक्त्वेमंपाहीत्यर्थः ४० ॥ ॥ ॥ ॥

इंद्रस्तुनास्माकंहविर्भागादिलाभः पुरुषार्थः किंतुत्वत्परिचर्यैषा भवतापुनरनेननसंरंभेणतत्कार्यमेवसाधितं तस्यचसि
द्धत्वादुपसंहरनेत्क्रोधमित्याशयेनाहु हेपरमनोअस्मान्त्रायतारक्षता भवताखियाएवभागादित्यात्प्रत्याहृताः अं
तर्यामिणास्त्वंवयज्ञभुभोक्तृत्वात् अस्मदीयंहृदयकमलंत्वत्रूहमेवतावत्त्वयैतंभयहेतुकत्वेनास्मतस्मत्निपर्यानित्यं
स्थितनदैत्येनक्रांतंव्याप्तसत्बोधिभयापाकणान विकासंनीततत्त्वत्रैलोक्यैश्वर्यसाभूनार्थमयमुद्यमइतिचत्त्राहु
कालग्रस्तमिति नेत्वीहेनारसिंहस्यचकाराभ्यांआविर्भूत ४१ ऋषयस्तुतपः प्रवर्तनेनास्माकंमहाननुग्रहकृत
इत्याहुः त्वत्तायदात्तुपरमंध्यानलक्षणंतपः परमत्वेहेतुः आत्मनः तवत्तजः प्रभावरूपं तदेवाह यनतपसा आत्मनि

इंद्रउवाच प्रत्यानीताः परमभवतात्रायतानः स्वभागादैत्याक्रांतंहृदयकमलंत्वद्गृहंप्रत्यबोधि कालग्रस्तं
कियदिदमहोनाथशुश्रूषतांतमुक्तिस्तेषांनहिबहुमतानारसिंहापरैःकिं ४१ ऋषयऊचुः त्वंनःत्तपःपरम
मात्थयदात्मतेजोयेनेदमादिपुरुषात्मगतंससर्ज तद्विप्रलुप्तमनुनाद्यत्त्वारण्यपालरक्षागृहीतवपुषापुन
रन्वमंस्थाः ४२ पितरऊचुः श्राद्धानिनोधिभुजेप्रसभंतनूजैर्दत्तानितीर्थसमयेपिपतिलांबुसाथः तस्याद
रान्नखविदीर्णवपाद्यआर्छतस्मैनमोन्हरयेखिलधर्मगोप्ते ४३ श्रीगोविंद॥ श्रीराम छः छः

लोनमिदंविश्वंससर्ज सृष्टवानसि तत्तअसुनादैत्येनविप्रलुप्तंकुंठितंसत्त हेत्वारण्यपाल अद्यारक्षार्थंगृहीतेना
नेनवपुषापुनरपितपः कुरुतेत्यभ्यनुज्ञातवानसि तस्मैतेनमइत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ४२ पितरस्तु
श्राद्धाहरणेनपरमोपकारिणंप्रणमंति श्राद्धानिश्रद्धायुक्तानिपिंडादीनिनोऽस्मभ्यंपुत्रैर्दत्तानिप्रसभंबलात्तस्व
यमधिकृत्यबुभुजे किंच तीर्थस्नानसमयेदत्तंतिलोदकमप्यपिबन्तानितस्यादराद्यआछित आहृतवान॥
कथंनखैविदीर्णावपायस्य तस्मात्वपाविदारणस्यतद्धृतपिंडोद्धारणमेवफलमितिभावः ४३ छः २६

917
1981

योगसिद्धांगतिंअणिमादिसिद्धिं नाना अनेकंदर्पोयस्यतंतस्मैतुभ्यंतंत्वामुद्दिश्य ४४ विद्यांअंतर्द्धानादिलक्षणां अ
नुगृह्यसंग्रामो संख्येयुद्धे ४५ रत्नानिफणास्थितानिस्त्रीरत्नानिचउत्तमाः स्त्रियः आसांस्त्रीणांदत्त आनंदायन
तत्संबोधनं पाठांतरं अस्माकंदत्तआनंदोयेनेति ४६ नृसिंहनावलोकिताः संतोमूर्ध्निबद्धांजलयोमनवः प्राहुः ॥

सिद्धाऊचुः योनोगतिंयोगसिद्धामसाधुरहार्षीद्योगतपोबलेन नानादर्पंतन्नखैर्निर्ददारतस्मैतुभ्यं
प्रणताःस्मोनृसिंह ४४ विद्याधराऊचुः विद्यांपृथक्धारणयानुराद्धांन्यषेधदज्ञोबलवीर्यदृप्तः ॥
सयेनसंख्येपशुवद्धतस्तंमायानृसिंहंप्रणताःस्मनित्यं ४५ नागाऊचुः येनपापेनरत्नानिस्त्रि
रत्नानिहृतानिनः तद्वक्षःपाटनेनास्मद्दत्तानंदनमोस्तुते ४६ मनवऊचुः मनवोवयंतवनिदे
शकारिणोदितिजेनदेवपरिभूतसेतवः भवताखलःसउपसंहृतः प्रभोकरवामतेकिमनुशा
धिकिंकरान् ४७ प्रजापतयऊचुः प्रजेशावयंतेपरेशाभिसृष्टानयेनप्रजावैसृजामोनिषिद्धाः
सएषत्वयाभिन्नवक्षाऽनुशेतेजगन्मंगलंसत्वमूर्तेवतारः ४८ श्रीकृष्णगोपालाय॥

मनवोवयंधर्मपालकाः परिभूताः सेतवोवर्णाश्रमधर्ममर्यादायेषांते अनुशाधिअनुशिक्षय। ४७ प्रजापतयो
पितदवलोकिताः प्रोचुः हेपरेशतेत्वयाअभिसृष्टाः प्रजेशावयंयेननिषिद्धाः संतः प्रजानसृजामः सएवएषः भि
न्नंवक्षोयस्यसः नुनिश्चितंस्मृतः शेतेअतःपरंप्रजाःस्रक्ष्यामइतिहृष्यंतआहुः हेसत्वमूर्तेतवायमवतारो
मंगलं ४८ ॥ छः छः छः छः छः

गंधर्वा अपि तदवलोकिताः प्रोचुः हे विभो वयं ते त्वदीया नटाः नर्तकाः नाट्येन त्वं गायकाश्च येन आधीनाः कृताः कथंभूतेन वीर्यं शौर्यं बलं शक्तिस्ताभ्यामोजः प्रभावो यस्य तेन इमां दशां नीतं उचितमेतदित्याहुः किमिति ४९ भवापवर्गं
संसारनिवर्त्तकं आश्रयणे हेतुः यद्यस्मात् साधुनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरस्त्वया समा

गंधर्वा ऊचुः वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः स एष नीतो भवता
दशामिमां किमुत्पथस्थः कुशलाय कल्पते ४९ चारणा ऊचुः हरे तवांघ्रिपंकजं भवापवर्ग
माश्रिताः यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ५० यक्षा ऊचुः वयमनुचरमुख्याः कर्म
भिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरह
र उपनीतः पंचतां पंचविंश ५१ किंपुरुषा ऊचुः वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः अयं
कापुरुषो नष्टो धिक्कृतः साधुभिर्यदा ५२ वैतालिका ऊचुः सभासु सत्रेषु तवामलं यशो
गीत्वा सपर्यां महतीं लभामहे यस्तामनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन् यथामयः ५३

पितः अंतं नीतः ५० मनोज्ञैः कर्मभिरनुचरेषु मुख्याः पंचतां मृत्युं हे पंचविंश चतुर्विंशतितत्त्वनियामक ५१
किंपुरुषास्त्वां स्तोतुं केवयं वराका इत्याहुः वयं किंपुरुषास्तुच्छप्राणिनः त्वं तु महानद्भुतप्रभावः पुरुषः न च
यं महान् दैत्यो हत इति किं न वर्ण्यत इत्याशंक्याकिंचनैतदित्याहुः अयमिति ५२ सत्रेषु यज्ञेषु ते तव यादृग्
तत्तादृशं यशो मदं कृत ५३ ॥८॥ ॥८॥ ॥८॥ २८

919
1981

अमुनेति अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनुनिरंतरं कारिताः अतः परं नः विभवाय समृद्धये भव ५४ नोऽस्मा
कं भक्तानां शरणद आश्रयद सर्वेषां लोकानां शर्म मंगलमेतदद्भुतं रूपं अद्य वर्दृष्टं न तु पूर्वं दिधिकरः किंकरः ५५
इति श्रीधरस्वामिविरचितायां भावार्थदीपिकायां दैत्यवधो नामाष्टमोऽध्यायः ८ नवमे ब्रह्मणाभीत्या चोदितः

किन्नरा ऊचुः वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः भवता हरे
स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ५४ विष्णुपार्षदा ऊचुः अद्यैतद्धरिनररू
पमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्र
हाय विप्रः ५५ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते दैत्यराजवधो ना
माष्टमोऽध्यायः ८ नारद उवाच एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः नोपैतुमशकन्मन्यु
संरंभं सुदुरासदं १ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं अदृष्टाश्रुतपूर्वत्वात्सा नोपेया
य शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३

स्वबालकः कोपं प्रशामयन् स्तौति नरसिंहमतिभीषणं उग्रोप्यनुग्र एवायं स्वभक्तानां नृकेसरी केसरीव स्वपोताना
मन्येषामुग्रविग्रहः इत्याद्यागमोक्तां भक्तानुकंपितामाह एवमिति सप्तभिः एवं दूरत एव स्थितास्ते कृतवंतः मन्युना
संरंभः आवेशो यस्य तं तमुपगंतुं नाशक्नुवन् १ महदद्भुतं रूपं दृष्ट्वा शंकिता सती तं नोपजगाम अद्भुतत्वे
हेतुः अदृष्टेति २ उपेहि उपगच्छ ३ ७ः ७ः ७ः ७ः

भा० स०
२६

४ कालएवाहिस्तस्मात्त्विवस्ताधीर्येषांतेषांकृतमभयंयेनतत ५ तस्यकरस्पर्शेनधुतंनिरस्तंअखिलंअशुभंय
स्य सपदितत्क्षणमेवअभिव्यक्तंअपरोक्षीभूतंपरात्मदर्शनंब्रह्मज्ञानंयस्यसः निवृतः मन्नहरिध्यो हृयंतीतिमांचि
नाननुयंस्य अश्रूणिलोचनयोर्यस्य परमपुरुषार्थतयादध्यौ नसाधनत्वेमेत्यर्थः सुसमाधिमेवाह तस्मिन्निधन्य
स्तंहृदयमीक्षणंचयेनसः ७ तस्मिन्निवसमस्तेषुनत्रूपामतद्दृष्ट्ये प्रह्लादःस्तोतिसत्पद्यैर्ईश्चत्वारिंशताहरिं।

तथेति शनकैराजन्महाभागवतोर्भकः उपेत्यभुविकायेनननामविधृतांजलिः ४ स्वपादमूले
पतितंतमर्भकंविलोक्यदेवःकृपयापरिप्लुतः उत्थाप्यतच्छीर्ष्ण्यदधात्कराम्बुजंकालाहिवित्रस्तधियां
कृताभयं ५ सतत्करःस्पर्शधुताखिलाशुभः संपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मंहृदिनिर्वृ
तोदधौहृष्यत्तनूःक्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसासुसमाहितः प्रेमगद्गदया
वाचातन्न्यस्तहृदयेक्षणः ७ प्रह्लादउवाच ब्रह्मादयःसुरगणामुनयोथसिद्धाःसत्वैकतानमतयो
वचसांप्रवाहैः नाराधितुंपुरुगुणैरधुनापिपिप्रुः किंतोष्टुमर्हतिसमेहरिरुग्रजातेः ८ छ: छ:

नन्वेतावदात्मनोभगवतःस्तुतावनधिकारमिवाशंक्याधिकारंसंभावयन्नाह ब्रह्मादयइतिपंचभिः मुन
योमननशीलाःसिद्धाः शमिनोपि कथंभूतासत्वएवैकस्मिन्नतानाविस्तारोयस्याः सामतिर्येषांतथाअपि
वचसांप्रवाहैरपितथाबहुभिर्वक्ष्यमाणैर्गुणैरपियमाराधयितुंनपिप्रुः नपूर्णाःनशक्ताइत्यर्थः सहरि
र्मेमयाकथंतोषंप्राप्तुमर्हति तत्रहेतुः उग्राघोराआसुयाजातिर्यस्य ८ छ: छ: छ: २८

921
1981

एवंहरितोषणेस्वस्यायोग्यतामाशंक्ययोग्यतांसंभावयतिमन्यइतिद्वाभ्यां अभिजनःसत्कुलेजन्म रूपंसौंदर्यं श्रुतंपांडि
त्यं ओजःइंद्रियनैपुण्यं तेजःकांतिः प्रभावःप्रभावःप्रतापः पौरुषमुद्यमः बुद्धिःप्रज्ञा योगोअष्टांगः एतेधनादयोद्वादश
अपिगुणाःपरस्यपुंसः आराधनायनभवंतिहियतःकेवलयाभक्त्यैवतुतोषगजेंद्रायतुष्टोभवत एवंभक्त्यैवकेवलयाद्वरेस्तोष
संभवतीत्युक्तं ९ इदानींभक्तिंविनानान्यत्तत्तोषहेतुरित्याह विप्रादिति पूर्वोक्ताधनादयोयद्विषड्द्वादशगुणाः तैर्युक्ता
तविप्रादपिश्वपचंवरिष्ठं अहंमन्ये सनत्सुजातोक्ताद्वादशधर्मादयोयेगुणाःद्रष्टव्याः तदुक्तं धर्मश्चसत्यंचदमस्तपश्च अ

मन्येधनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः नाराधनायहिभवं
तिपरस्यपुंसोभक्त्यातुतोषभगवान्गजयूथपाय ९ विप्राद्द्विषड्गुणयुतादरविंदनाभ
पादारविंदविमुखात्श्वपचंवरिष्ठं मन्येतदर्पितमनोवचनेहितार्थप्राणंपुनातिस
कुलंनतुभूरिमानः १० श्रीकृष्णायवासुदेवायहरयेपरमात्मनेनमः॥ छ: ॥

मात्सर्यंह्रीः तितिक्षाऽनसूया यज्ञश्चदानंचधृतिःश्रुतंचव्रतानिवैद्वादशब्राह्मणस्येति यद्वा शमोदमःस्तपः
शौचंशांत्यार्जवविरक्तता ज्ञानविज्ञानसंतोषाः सत्यास्तिक्यद्विषड्गुणाः कथंभूतात्तविप्रात्तअरविंदनाभ
स्यपादारविंदात्तविमुखात् कथंभूतंश्वपचंआरविंदनाभेअर्पितामनआदयोयेनतंइहीनंकर्मवरिष्ठत्वेहेतुः
सएवंभूतःश्वपचःसर्वंकुलंपुनाति भूरिर्मानोगर्वोयस्यसतुविप्रः आत्मानमपिनपुनाति कुतःकुलं यतोभक्ति
हीनस्यएतेगुणागर्वायैवभवंतिनतुशुद्धये अतोहीनइतिभावः १० श्रीकृष्णः श्रीगोपाल छः

तर्हि किं धनाद्यर्पणेन सन्मानं प्राकृत इव भगवानपेक्षते नेत्याह नैवेति अयं प्रभुरीश्वरः अविदुषः अल्पकाज्जनात् मानं न
ज्ञामात्मनोऽर्थेन वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि किं पूजां नेच्छत्येव तत्राह करुणः कृपालुः अतो वृणीते च त
त्र हेतुः यद्यदिति यं यं मानं यद्वा यद्यस्मात् यत् येन धनादिना भगवते मानं विदधीत तत्तदेवात्मने भवति नान्यत् यथा मु
खे कृतं वा तिलकादिश्रीः शोभा प्रतिबिंबस्य भवति न तु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ११ यस्मादेवं भगवान् भक्तैरेव
तुष्यति तस्मादहं नीचोऽपि विगतविक्लवः गतालसः सन् ईश्वरस्य महि महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणानुसारेण

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते यद्यज्जनो भगवते विदधीत मा
नं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ११ तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि
यथा मनीषं नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन १२ सर्वे ह्यमी वि
धिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः क्षेमाय भूतय उतात्मसुखाय चा
स्य विक्रीडितं भगवतो रुचिरावतारैः १३

नुवर्णयामि अज्ञानतोऽपि स्तुतिकरणे हेतुमाह येनैव महिम्ना अनुवर्णितेन अविद्यया संसारमनुप्रविष्टः पुमान् पू
यते शुध्यति तन्महि अन्यस्य तथा शोधकस्याभावादित्यर्थः १२ तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तं स्तु
वन् कोपोपसंहारं प्रार्थयते सर्वे हीति द्वाभ्यां भो ईश अमी उद्विजंतो बिभ्यतः सर्वे ब्रह्मादयः सत्वमूर्तेस्तव विधिकराः
त्वन्नियोगकर्तारो भक्ता एव नान्ये न च वयमसुरा इव वैरभावेन एते भक्ताः किं तु श्रद्धयैव तव च रुचिरैरवतारैर्विधेयं क्री
डितं अस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय १३ ६ः ६ः ६ः १०

923
1981

तत्तस्मादस्मां भयपरिहाराय मन्युं यच्छ उपसंहर यदर्थं अयं मन्युः स चासुरः साधूनां संतापार्थमद्य हतः अतः परं क्रोधेन कार्याभा
वात् त्वं नियच्छ ननु त्वमेवं वधेन साधुः किं मोदते तत्राह वृश्चिकादेः परोपद्रवकारकान् अन्यत एव जातया हत्यया वधेन त
स्यैव नष्टं ज्ञातमिति साधुरपि मोदते तद्वत् हिंदकानां सुखावहत्वात् मुञ्च क्रोधं नन्वर्जामीति चेन्न तत्राह लोकाश्च निर्वृतिं सुखं इताः
प्राप्ताः संतः प्रतियंति क्रोधोपसंहारं प्रतीक्षंते नहि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेन्न तत्राह रूपमिति विभयाय
भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः १४ त्वं चेद्दि भीषितोऽहमित्यशामीति चेन्न तत्राह
नाहमिति भो अजित ते अस्मात् रूपात् अहं न बिभेमि कथं भूतात् आस्यं च जिह्वा च अर्कसदृशे नेत्रे च भ्रुकुटीनां

तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं
नृसिंह विभयाय जनाः स्मरंति १४ नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रा
त् आंत्रस्रजः क्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ त्रस्तोऽस्म्यहं कृपणव
त्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः बद्धः स्वकर्मभिरुशत्तम तेऽघ्रिमूलं प्रीतोऽपवर्गशरणं ह्व
यसे कदा नु १६

रभस आटोपश्च उग्रा दंष्ट्राश्च एतानि अतिभयानकानि यस्मिन् तस्मात् आंत्रमय्यः स्रजो यस्मिन् तत् आंत्रस्रक् तस्मा
त् क्षतजाः रक्ताः केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात् निर्ह्रादेन भीता दिगिभा यस्मात्
अरीन् भिंदंतीत्यरिभिदः तानि नखाग्राणि यस्मिन् एवंभूतादपि ते रूपादहं न बिभेमि १५ मद्भयं त्वन्यदस्तीत्याह
त्रस्तोऽस्मीति दुःसहं यदुग्रं संसारचक्रं कदनं दुःखं तस्मादहं त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिः बद्धः सन् प्र
णीतः निक्षिप्तोऽस्मि हे कृपणवत्सल हे उशत्तम कदा नु त्वं प्रीतः सन् अपवर्गभूतं शरणं तवांघ्रिकमलं प्रति ह्वयसे मा
॥ ६ः ६ः ६ः ६ः ह्वयसि १६

भा० स०
३०

मद्दास्येसतिमत्वीतिशितिचेत्तर्हिनानायोनिषुक्लिश्यमानस्यममदासस्यज्ञानाभावात् त्वमेवतदुपदिशेतिप्रार्थयते यस्मा
त्प्रियैरप्रियैश्चयथासंख्यंवियोगाभ्यांजन्मयस्यतेनशोकाग्निनासकलयोनिषुदह्यमानोस्मि दुःखस्यप्रतीकारःकार्यइ
तिचेत्तत्राह दुःखस्यौषधंप्रतीकारस्तदपिदुःखमेव एवमपि अतद्धियादेहाद्यभिमानेनभ्रमामि अतःहेभूमन्हेविभोमेतव
दास्यरूपंयोगंनिस्तारोपायंवद १७ ननुदास्ययोगेप्रवृत्तस्यापितदंतरायभूतानांप्रवीकनानादुःखानांकुतःपरिहारस्त
त्राह सोहंत्वद्दासःसन्हेनृसिंहतवलीलाकथाअनुगृणन्दुर्गाणिमहादुःखान्यंजसाअनायासेनातितर्मितरामितरिष्यामीत्यर्थः

यस्मात्प्रियाप्रियवियोगजन्मशोकाग्निनासकलयोनिषुदह्यमानः दुःखौषधंतदपिदुःखमत
द्धियाहंभूमन्भ्रमामिवदमेतवदास्ययोगं १७ सोहंप्रियस्यसुहृदःपरदेवतायालीलाक
थास्तवनृसिंहविरिंच्यगीताः अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तोदुर्गाणितेपदयुगा
लयहंससंगः १८ श्रीकृष्णायवासुदेवायहरयेपरमात्मने प्रणतःक्लेशनाशायगोविंदा०

ष्यामीत्यर्थः तत्रहेतुः गुणैरागादिभिर्विशेषेणप्रमुक्तःसन् तत्कुतः तेपदयुगमेवालयोयेषांतेषांभक्तानांतएव
हंसाज्ञानिनःतैःसहसंगोयस्यसमसोहं कथंभूतस्यकथास्तत्राह प्रियस्येत्यादि कुतोजाताः विरिंच्येनगीताः।
तत्संप्रदायप्रवृत्ताः तथाथर्वणीश्रुतिः देवाहवैप्रजापतिमब्रुवन्नित्यादि दास्यप्रवृत्तस्यभगवदनुग्रहेणासक्तं
गम्ततोवीतरागतयाभगवद्गुणानुवर्णनंततश्चदुःखादितिवाक्यार्थः १८ श्रीराम छः छः ३०

925
1981

ननुदुःखिस्तमस्यतत्प्रतीकारांलोकप्रसिद्धएवकिंदास्यादिना तत्राह बालस्येति नोनृसिंहतमस्यतत्प्रतिविधिर्यदखप्रती
कारःइहलोकेयांजसाइष्टःसःत्वयाउपेक्षितानांतावदेवक्षणमात्रमेवनत्वात्यंतिकःतदेवाह बालस्यापितरौशरणंरक्षका
विहनभवतःताभ्यांपाल्यमानस्यापितस्यदुःखदर्शनात् क्वचिद्रोगगर्तादिषुताभ्यामेवतद्वधदर्शनाच्च नवार्तस्यरोगिणअ
गदमौषधंशरणंकृतेप्यौषधेमृत्युदर्शनात् नचउदन्वतिसमुद्रेमज्जतःपुंसोनौः शरणंतयासहमज्जनदर्शनात् अतस्त्व
मेवशरणमित्यर्थः अथचैवकाक्वाव्याख्येयं तप्तस्यतत्प्रतिविधिर्यइहतावत्प्रसिद्धःसत्वदुपेक्षितानांकिमंजसेष्टःअ
पितुनेष्टएव यद्वा यस्तावदिहप्रतिविधिरिष्टःसकिमंजसानेवांजसेत्यादियोज्यं बालस्येत्यादिपूर्ववदेव १९ ननुकश्चित्

बालस्यनेहशरणंपितरौनृसिंहनार्त्तस्यचागदमुदन्वतिमज्जतोनौः तप्तस्यतत्प्रतिविधिर्यइहांजसे
ष्टस्तावद्विभोतनुभृतांत्वदुपेक्षितानां १९ यस्मिन्यतोयर्हियेनचयस्ययस्माद्यस्मैयथायदुभय
स्त्वपरःपरोवा भावःकरोतिपृथकुस्वभावःसंचोदितःतदखिलंभवतःस्वरूपं २० श्रीकृष्णगोपाल

कुत्रश्चित्केनचित्कदाचित्कश्चित्रक्षकोपिदृश्यतएवेत्याशंक्यतत्रापितत्तद्रूपेणत्वमेवरक्षकइत्यंगीकृत्यत
स्यैवसर्वात्मतामाह यस्मिन्निति अपरोसवीचीनःपित्रादिःपरोब्रह्मादिर्वाभावः कर्त्तातत्तत्कारकैर्युद्यत्करोतितत्
सर्वंभवतएवस्वरूपं नतुपृथक् यस्मिन्नधिकरणेयतोनिमित्तात्यर्हियस्मिन्कालेयेनकरणेनयेनहेतुनाकर्त्रासं
चोदितश्चयस्यसंबंधिं यस्मादुपादानात् यस्मैसंप्रदानाययदीप्सिततमंयःकर्त्तेत्येवंसप्तविभक्त्यर्थाः यथायेन
प्रकारेणेतिक्रियाविशेषणभूतानामव्ययानामर्थःपृथकुस्वभावः सत्वादिप्रकृति करोतिउत्पादयतिविकरोति
रूपांतरंनयतीति २० श्रीकृष्ण छः छः छः छः ॥

अतोन्यस्य रक्षकास्याभावात्संसारित्वाच्च नित्यमुक्तस्त्वमेव मां शरणागतं रक्षेति प्रार्थयते मायेति द्वाभ्यां त्वदंशस्य पुंसो
अनुमतेन ईक्षणरूपेणानुग्रहेण मनः प्रधानलिंगं माया सृजति कथंभूता कालेन चोदिताः क्षोभिताः गुणा यस्याः कथं
भूतं मनः कर्ममयं कुर्वद्रूपं बलीयः दुर्जयं छंदोमयं वेदोक्तकर्मप्रधानं च अजया अविद्यया अर्पिता षोडश विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनः ततकः अतितरेत् भो अज त्वत्तः पृथक्स्थितः त्वामभज
न्नित्यर्थः २१ ननु ममापि मायासंबंधात्कर्तृत्वाद्यविशेषाच्च त्वत्तः को विशेष इत्यत आह स इति स्वधाम्ना चित्छक्त्या नि
त्यं विजिता आत्मना बुद्धेर्गुणा येन स हि त्वं यतः कालो मायाप्रेरकः अत एव वशीकृताः विसृज्यानां कार्याणां साधना

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः छंदोमयं यदजयार्पितषोडशारं सं
सारचक्रमज कोतितरेत्त्वदन्यः २१ सत्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यवि
सर्गशक्तिः चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नं २२ दृष्टा मया दिवि वि
भोखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोयं येस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फू
र्जितेन लुलिताः स तु ते निरस्तः २३ तस्मादमूस्तनुभृतामहमाशिषोज्ञ आयुः श्रियं विभवमैंद्रियमावि
रिंच्यात् नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं २४ श्रीकृष्ण॥

नां च शक्तयो येन अतः इक्षुदंडवन्निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय २२ ननु लोकपालानां भोगान्भुंक्ष्व त्वं च
राज्यमपीदं दास्यामीति किमिति संसारादुद्विजसेऽत आह दृष्टा इति त्रिभिः श्रियः संपदः विभव उद्भवः अथवा दृश्योरस्त्वा
इति कालानुगुणत्वमुक्तं वदेवाह येस्मात्पितुः कोपहासविकृतभ्रूभंगमात्रेण विध्वस्ताः स त्वया निरस्तः २३ य
स्मादेवं तस्मादाशिषः भोगान् अज्ञः नत्परिपाकं विद्वानहं ऐंद्रियं भोग्यं ब्रह्मणो भोगमभिव्याप्य किमपि नेच्छामि॥
ते कालात्मना उरुविक्रमेणाखिलुलि तान्विध्वस्तान् अणिमादीनपि २४ ०: ०: ०: ३१

927
1981

किंच वर्तमानकालेपि न भोगाहा इत्याह कुत्रेति श्रुतिः श्रवणं तदेव सुखं यासु ताः मृगतृष्णिकावत्तमिथ्याभूताश्चाशिषः
अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्व चेदं कलेवरं एवं च त्वमवोधि जनः किं न विरज्यते नेत्याह यदपि यद्यपि इत्य
वं विद्वानयं जनः तथापि न निर्विद्यते न विरक्तो भवति कुतः काम एवानलः तं मधुलवैः सुखलवैः दुःसाध्यैरपि शामयन्
कामाग्निशमनव्यग्रस्य निर्वेदस्य वकाशो नास्तीत्यर्थः यद्वा अचिंत्यमिदं त्वन्मायाविलसितमिति भावः २५ नाहं तु
कथं निर्विण्णोसि अनर्हेपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह क्वेति रज एव प्रभवो जन्म यस्य सः स च तमसा कुल
तमोधिकं यस्मिंस्तस्मिन्नसुराणां कुले जातोहं क्व च तवानुकंपा नामेवाह ब्रह्मादीनां शिरसि योन वार्पितः स पद्म

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः निर्विद्यते न तु जनो यदपी
ति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः २५ क्वाहं रजः प्रभव ईश तमोधिकेस्मिन् जातः सुरेत
रे कुले क्व तवानुकंपा न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेर्पितः शिरसि पद्मकरः प्रसादः २६ नैषा
परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्रसादः से
वानुरूपमुदयो न परावरत्वं २७

वत् शकलसंतापहारः करः प्रसादः पुरुषार्थरूपो मे शिरसि अर्पित इति यत्तत् यतः यया अनुकंपया तव २६ न
च त्वयोदमानि वित्रमित्याह नैषेति एते ब्रह्मादयः उत्तमाः अयमसुरो नीच इत्येषा परावरमतिः जंतोः प्राकृतस्य य
था न तथा भवतो न वै स्यात् अत्र हेतुः जगतः आत्मनः सुहृदश्च तर्हि सर्वत्र समत्वमादरेक रूप्यं किं न स्यात्तत्राह सं
सेवया न च प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे
दृष्टांतः सुरतरुर्यथा सन्निकृष्टस्यैव संकल्पानुसारेण फलं ददातीति न च विषमस्तद्वत् न परावरत्वं अत्र कारणमिति शेषः
॥२७॥

एतच्च त्वद्भृत्यरूपया प्रार्थयामीति त्वत्याश्चमेवमानयं स्वाशयेनाह एवमिति यथा त्वयानुकंपितोस्मि एवं नारदेनात्मसा
त्कृत्वा पूर्वमनुगृहीतः सोहं कथं नु त्वद्भृत्यसेवां विसृजामि कथंभूतः अनुगृहीतोस्मि प्रभवस्संसार एवाहिकूपस्तस्मिन् कामा
नभितो कामयमानं जनं निपतितमनु तत्प्रसंगात्प्रपतन्नप्याहं तवेदं त्वद्भृत्यस्य श्रीनारदस्यानुग्रहेण त्वया अत्यंतमनुकंपितोस्मि॥
अयमेव च मम परमोनुग्रहः नपुनरिदमिति तुच्छमत्प्राणरक्षणादि २८ नचेदं त्वया मदनुग्रहार्थं कृतं किंत्वन्यार्थमित्याह॥
भो अनंत यदेतत्प्राणरक्षणं मा हं तु मद्यातस्य मत्पितुर्वधश्च तदुभयं स्वभृत्य ऋषिवाक्यमृतं विधातुं कर्तुमित्यहं मन्ये कुतः
यद्यस्मात् असत् अयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरोऽमद्व्यतिरिक्तश्चेदीश्वरोस्ति तर्हि त्वामिदानीमवतु तव
कं शिरः अहं हरामि पाठांतरेप्ययमेवार्थः यद्यदा अवोचत् तदा मत्प्राणरक्षणमिति वा अन्वयः एतच्च सत्यं विधातुं निजभृ

एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् कृत्वात्मसात्सुरर्षिणा भगवन्गृहीतः
सोहं कथं नु विसृजे तव भृत्यसेवां २८ मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्य ऋषिवाक्यमृतं विधातुं।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोवतु कं हरामि २९ एकस्त्वमेव जगदेतदमुष्य यत्त्व
माद्यंतयोः पृथगवस्यसि मध्यतश्च सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ३०

त्यभाषितमित्यत्रैव बहुधा व्याख्यातं २९ नचेदं पक्षपातेन रक्षणं दैत्यहननं च त्वयि स्वाभाविकं किंतु मायागुणोपाधि
कं सर्वात्मके त्वयि स्वतस्तदयोगादित्याह एक इति एतत् जगत् त्वमेवैकः यद्यतः अमुष्य आद्यंतयोः पृथगवस्यसि
विरमं करोषि सन्मात्रतया कारणत्वेनाबाधित्वेन च वर्तसे इत्यर्थः अतो मध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिस्तत्राह
निजमायया गुणपरिणामात्मकमिदं जगत् सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव रक्षकः इह हंता च अवसितः॥
प्रतीतः तदुक्तं ग्रंथोपक्रमे निर्गुणोपि ह्यजोव्यक्तो भगवान्प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गतः॥
॥ ॥ ॥ ॥ ॥ इत्यादिना ३० ३२

९२९/१९८१

ननु यद्येतज्जगदहं मम वर्तते हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यत आह त्वं वेति त्वमेवेदं सदसत्कार्यकारणा
त्मकं जगत् न तु त्वत्तः पृथक् भवांस्ततोन्यः आद्यंतयोः पृथगवस्थानात् यत्तयस्मादेवं भेदाय साम्यमियं परइति या बुद्धिः
सा अपार्था मायैव कार्यकारणयोः परमकारणाभेदं दृष्टांतेन साधयति यद्यतः यस्य जन्मेक्षणं प्रकाशः स्वस्मिन्निधनम
वस्थितिश्च तद्वैतदेव अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसु कालमात्रत्वं अयमर्थः कालशब्देन नीलत्वसाधार
णगुणः योगात्पृथ्वी वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्तरौ यथा पृथ्वी मम पूर्वबीजमात्रत्वं तस्य च यथा भूतसूक्ष्म
मात्रत्वं सर्वमपि कार्यकारणात्मकं जगत् परमकारणात्मकमेवेति तथा च पारमर्षं सूत्रं तदनन्यत्वमारंभणशब्दादिभ्य

त्वं वा इदं सदसदीश भवांस्ततोन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था यद्यस्य जन्म निधनं स्थिति
रीक्षणं च तद्वैतदेव वसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेत्मना नि
जसुखानुभवो निरीहः योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ३२

इति श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ३१ तत्र तावदेतत्पृथगवस्थानं दर्शयति न्यस्ये
ति इदं जगत् आत्मना आत्मन्येवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निःक्रियः सन् प्रलयोदकमध्ये शयनं करोषि
तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्रास्ति नहि योग एव तु बहिर्वृत्त्यभावमात्रं निद्रेष्यत इत्याह योगेन मीलितदृ
ग्योगेन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुर्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितस्त्वं। नतु सुप्त इवात्मना
तमो युंक्षे न योजयसि न पश्यसि न च जाग्रत्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः॥ ३२ ॥ श्रीकृष्णगोपालाय०

भा॰ स॰
३३

इदानींकारणत्वेनाशावपिपृथगवस्थानंदर्शयन्नमध्यतश्चत्वमेवेत्येतत्प्रपंचयति चतुर्भिः यस्त्वमशेषः तस्यैवतेइदंजग
तवपुः स्वरूपंनान्यस्ययतस्त्वंमध्येतोस्याः कथंभूतस्यनिजयाकालशक्त्यासंचोदिताः प्रकृतेःधर्माः सत्वादयोयनस्य
रूपत्वेहेतुः अनंतशायनात्तशेषपर्यंकातविरमन्तसमाधिर्यस्यतवनाभेः सकाशातएकार्णवादेकेमहाअंभोकपद्मं
अभूतकथंभूतंआत्मनित्वय्यवगूढं स्वकणिकातः सूक्ष्मादटबीजान्महावटइव तदेवंकारणत्वेनानुगतः सन्नम
ध्यतश्चत्वमेववर्तसेइत्युक्तं ३३ एतदेवशुद्धसत्वस्यब्रह्मणोनुभवेनस्फुटयितुंतस्यप्राक्तनीमवस्थामाह तस्मिन्नंभे

तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितप्रकृतिधर्मिणआत्मगूढं अंभस्यनंतशयानाद्विरमत्समा
धेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं ३३ तत्संभवः कविरतोन्यदपश्यमानस्त्वांबीजमात्मनिततंस
बहिर्विचिंत्य नाविंदद्दब्दशतमप्सुनिमज्जमानोजातेंकुरेकथमुहोपलभेतबीजं ३४ सत्वात्मयोनि
रतिविस्मितआश्रितोब्जंकालेनतीव्रतपसापरिशुद्धभावः त्वामात्मनीशभुविगंधमिवातिसूक्ष्मं
भूतेंद्रियाशयमयेविततंददर्श ३५ एवंसहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायु
धाढ्यं मायामयंसदुपलक्षितसन्निवेशंदृष्ट्वामहापुरुषमापमुदंविरिंच्यः ३६ श्रीकृष्णायनमः

गंतवायस्यसःकविः ब्रह्माप्सुअदन्यदपश्यन्बीजंउपादानकारणभूतंत्वांस्वस्मिन्व्याप्तंसंतमपिनाविंदत युक्तंचै
तत् उअहोअंकुरेजातेसतिबीजंतदनुगागंकारणंपृथकुकथंनामपुमान्पश्येत ३४ भवदुपासनयानुत्वस्मिन्ने
वद्दष्टवानित्याह सात्विति पराबुध्याअब्जमाश्रितसन् तीव्रेणतपसाध्यानेन अन्नसन्मात्ररूपेणोपादानतयाद्रष्टुमनुक्तं
३५ ईश्वरत्वेनचद्दष्टवान्कृतार्थोभवदित्याह एवंअनेनप्रकारेणसहस्रमपरिमितानियानिवदनादीनितैराढ्यंसम
द्धं मायामयंमायाप्रधानं सत्ताप्रपंचेनोपलक्षितःसन्निवेशःधारादिरचनायस्य॥ श्रीकृष्णराम ७ ७ः ३३

931/1981

तदाभवांस्तस्यानुग्रहंकृतवानित्याह तस्मादिति हयग्रीवमूर्तिंबिभ्रत्सन्नरजस्तमोरूपौमधुकैटभाख्यौहत्वातन्मैथ्य
ितिगुणानस्मर्पितवान् तत्रहेतुः सत्वमिति एकस्त्वमसत्यादिभिरष्टभिःश्लोकैः यदुक्तंयत्रपातनरक्षणंतदिपक्षवधश्च
सत्वोपाधिकानतुस्वतइति ३७ तदुपसंहरतिइत्थमितित्रिविभावयसिपालयसि हंसिघातयसिकलौतत्कर्णाषियतस्तदा
त्वंछन्नःभवः यतस्त्रिषुवचयुगेष्वाविर्भावात्ससएवंभूतस्त्वंत्रियुगइतिप्रसिद्धः ३८ तदेवंभगवतस्तत्वंनिरूप्यस्वस्य
तद्विचारायोग्यतांनिवेदयन्प्रार्थयते नैतदितित्रिभिः असाधुबहिर्मुखंतत्रचदुष्टंरंहर्षशोकभयेषणात्रयेणचातिदुः
खितमपित्वत्कथासुनसंप्रीयतेतस्मिन्नेवंभूतमनसिसतिकथंतवतत्वंविचारयामि ३९ किंच जिह्वाअवितृप्तासतीमां

तस्मैभवान्हयशिरस्तनुवंचबिभ्रद्वेदद्रुहावतिबलौमधुकैटभाख्यौ हत्वानयच्छ्रुतिगणान्सुरजस्तमश्चसत्वं
तवप्रियतमांतनुमामनंति ३७ इत्थंनृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसिहंसिजगत्प्रतीपान् धर्मं
महापुरुषपासियुगानुवृत्तंछन्नःकलौयदभवस्त्रियुगोथसत्वं ३८ नैतन्मनस्तवकथासुविकुंठनाथसंप्री
यतेदुरितदुष्टमसाधुतीव्रं कामातुरंहर्षशोकभयैषणार्तंतस्मिन्कथंतवगतिंविमृशामिदीनः ३९ जिह्वैक
तोऽच्युतविकर्षतिमावितृप्ताशिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित् घ्राणोन्यतश्चपलदृक्कचकर्मशक्तिर्ब
ह्व्यःसपत्न्यइवगेहपतिंलुनंति ४० एवंस्वकर्मपतितंभववैतरण्यांअन्योन्यजन्ममरणाशनभीतभीतं पश्य
न्जनंस्वपरविग्रहवैरमैत्रंहंतेतिपारचरपीहिनमूढमद्य ४१ श्रीकृष्णगोपाल ७ः ७ः ७ः

अच्युतमामाथतोमधुरादिरसस्ततः आकर्षति उदरंतुसुधासंततंसद्य एवंयत्किंचिदाहारमात्रेप्रतिचपलादृकच
क्षुः कर्मशक्तिः कर्मेंद्रियाणिलुनंछिंतित्राटयंति ४० नकेवलमहमेवकष्टंदशांमापन्नः किंतुमहानोप्येवमेवक्लि
श्यंति अतःसर्वजनंपालयेतिप्रार्थयते एवमिति भवःसंसारएववैतरणीमहानदीतस्यांअन्योन्यतोयानिजन्मा
दीनि तेभ्योःतिभीतःस्वपरविग्रहेषुयथायथंवैरंमैत्रंचयस्य एवंमूढंजनंपश्यन्त्वंहेपारचरतस्याःपार
स्थित नित्यमुक्त हंतेतिअहोकष्टमित्येवमनुकंप्यायपीहिबैतरणीमुत्तारयपालय ४१ श्रीकृष्णायनमः

एकेनमयाकथंसर्वोजनस्तारणीयइतिचेत्तत्राह कोन्वितेआर्त्तबंधोसर्वज्ञतोनारणप्रयासःनकोपिकुतःअस्यविश्वस्य भवसंभवलोपानांउत्पत्तिस्थितिसंहाराणांहेतोःनतोपिकिमेतत्तदुष्करमितिभावः उचितंचैतदित्याहमूढेष्विति तोच चरीयांश्चतारयिष्यामिइमंदुरंग्रहेमाहकथाइतिचेत्तत्राह नवयेंप्रियाजनाभक्ताःतानसुसेवमानानांनास्माकंनत उ तारणेनकिं कोपिप्रयासोःअसुरबालकाहेरः कोन्वत्रनखिलगुरोभगवनप्रयासःप्रह्लादृढत्थमुपसंख्यमिथान्तरणामा ज्ञानुसख्यमकरोःरूपनीयमायां ४१ वत्सप्रह्लादत्वांतावत्तारयिष्यामितावुतेवचकृतार्थःस्याः किमनेननिर्बंधेनेत्यतआ हनेवेतिहेपरमवांत्तभत्वद्वीर्यगायनमेवमाहाम्रततस्मिन्मग्नंचित्तंयस्यसोहंभववैतरण्याःनेवोद्विजेकिंतुविमूढानूशो

कोन्वत्रतेऽखिलगुरोभगवनप्रयासउत्तारणेस्यभवसंभवलोपहेतोः मूढेषुवैमहदनुग्रहआर्त्तबंधोकिंतेनते प्रियजनाननुसेवतांनः ४२ नेवोद्विजेपरदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचेततोवि मुखचेतसइंद्रियार्थमायासुखायभरमुद्वहतोविमूढान् ४३ प्रायेणदेवमुनयःस्वविमुक्तिकामामौनंच रंतिविजनेनपरार्थनिष्ठाः नैतान्विहायकृपणान्विमुमुक्षुएकोनान्यंत्वदस्यशरणंभ्रमतोनुपश्ये ४४ य न्मैथुनादिगृहमेधिसुखंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखं तृप्यंतिनेहकृपणाबहुदुःखभाजःकंडूतिवन्मनसि जंविषहेतधीरः ४५

चामि तानेवाह ततोमहामृतान्विमुखंचेतोयेषांतेत्वतइंद्रियार्थनिमित्तंयन्मायासुखंतदर्थंभरंकुटुंबादिभारमु द्वहतः ४३ तेनात्वन्मुक्तिंग्रहणतांस्ततत्त्वज्ञानंमुनयउपदेक्ष्यंतीतिचेत्तत्राह प्रायेणेति नविमुमुक्षविमुक्तिंनेच्छामि तर्ह्यन्यंकमपिप्रार्थयमामेवकिमितिनिर्बंधासीतिचेदतआह त्वत्तोअन्यमस्यजनस्यत्राणंनपश्यामि ४४ ननुते स्त्रीसंभोगादिनासुखिनएवनकृपणास्तत्राह यदिति करयोःकंडूयनेनसंघर्षेणानंतदुःखमनुदुःखंयस्मिन् तादृग्दुःख त्वादेवततोनिर्विघ्नसुखेरन्नतत्राह कृपणाःकामुकाःबहुदुःखभाजोपिइहगृहमेधीयसुखेनतृप्यंतिअलंभावितमन्यं तेकंडूतिवत्कामस्यदुःसहत्वात ननुकश्चित्कंडूतिमपिसहतेकामंचेत्सत्राह तद्वदेवकश्चिद्धीरएवमनसिजंकामंविष हतेनतुसर्वे अत्रापिकंडूतिवदितिदृष्टांतः ४५

933
19 81

ननुमौनादिभिर्मोक्षसाधनैःमुमुक्षवस्तेषामपिमुक्तिस्तत्राह मौनेति हेपुरुषअंतर्यामिन्नयेमौनादयोदशअपवर्ग्याःअप वर्गहेतवःप्रसिद्धाः रहःविविक्तवासःतेतुप्रायशोअजितेंद्रियाणांइंद्रियभोगायअर्थार्थंविक्रीणतांवार्ताजीवनोपाया वगहेतवःप्रसिद्धाःरहःविविक्तवासःतेतुप्रायशोअजितेंद्रियाणांइंद्रियभोगायअर्थार्थविक्रीणतांवार्ताजीवनोपाया भवंतिदांभिकानांवातोअपिभवंतिवानवा ४६ दंभस्यानियतफलत्वात्तत्वज्ञानंतुभक्तिंविनासंकामैमौनादिभिर्नभ भवंतिदांभिकानांवातोअपिभवंतिवानवा ४६ दंभस्यानियतफलत्वात्तत्त्वज्ञानंतुभक्तिंविनासकामैर्मौनादिभिर्नभ वस्येवेत्याह रूपेइतिद्वाभिः बीजांकुरावितिप्रवाहापन्नेसदसतीकार्यकारणेएवतेरूपेउपलक्षणेअतएवंदनसृष्टप्रकाशि तेनचान्यतस्त्वसमवेतंगोरत्वादिकमिवदेवदत्तादेः कुतःअरूपकस्यप्राकृतरूपादिशून्यस्य अतःयुक्ताःसंयुताएवभाने योगेनप्रत्यक्षंत्वामुभयत्रकार्यकारणेचानुगतंपश्यतिमंथनेनदारुषुवह्निमिवनान्यतःस्यातज्ञानमितिशेषः यद्वा

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधयआपवर्ग्याः प्रायःपरंपुरुषतेत्वजितेंद्रियाणां वार्ताभवंत्युतनवात्रतुदांभिकानां ४६ रूपेइमेसदसतीतववेदसृष्टेबीजांकुराविवनचान्यदरूपकस्य॥ युक्ताःसमक्षमुभयत्रविचक्षतेत्वांयोगेनवह्निमिवदारुषुनान्यतःस्यात् ४७ त्वंवायुरग्निरवनिर्वियदंबु मात्राःप्राणेंद्रियाणिहृदयंचिदनुग्रहश्च सर्वंत्वमेवसगुणोविगुणश्चभूमन्नान्यत्त्वदस्त्यपिमनो वचसानिरुक्तं ४८ नैतेगुणानगुणिनोमहदादयोयेसर्वेमनःप्रभृतयःसहदेवमर्त्याः आद्यंतवंतउरु गायविदंतिहित्वामेवंविमृश्यसुधियोविरमंतिशब्दात ४९ श्रीकृष्णराम ॐ श्रीगोपालाय ॐ

ज्ञानप्रकारमेवाह एतदुभयमन्यतःप्रधानपरमाणवादेर्नस्यात सएक्षतेत्यादिश्रुतेः अतस्त्वमेवकारणत्वात्सर्वत्रा नुस्यूतइति ४७ तदेवाह त्वंवायुरिति हृदयंमनःचितचित्तंअनुग्रहःअहंकारःदेवतावर्गोवासगुणःस्थूलःविगुणःसूक्ष्मः मनश्चवचश्चमनोवचः तेननिरुक्तंप्रकाशितंकिमपित्वत्तोन्यन्नास्ति ४८ अभक्तास्तुत्वय्यनुगतमपित्वांनजानंती त्याह नैतेगुणाभिमानिनोदेवाःआद्यंतवंतःजडोपाधित्वात अनाद्यंतंनिरुपाधित्वांनविदंतिहि यस्मात्सुधियोवि द्वांसःएवंविचार्यशब्दात्अध्ययनादिव्यापाराउपरमंतित्वामेवसमाधिनोपासतइत्यर्थः तथाचश्रुतिः किमर्थावय मध्यामहेकिमर्थावयंयक्ष्यामहइति नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनंहितदितिस्मृतिश्च यदातेमोहकलिलं तु

ध्यंतिनतिष्यति महांगतोमिनिवें श्रोतस्यसश्वतस्यवत्स्यादि ४०

उपसंहरति नदिति हे अर्हत्तम नमः स्तुतिकर्मपूजाः प्रणिपातस्तुतिसर्वकर्मार्पणानि कर्मस्वपरिचर्याचरणयोः स्म
निश्च कथायां श्रवणमित्येवं षडंगया सम्यक् सेवया विना परमहंसानां गतिः प्राप्यते त्वयि जनः कथं भक्तिं लभेत यस्मा
देवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विना अतः प्राक् प्रार्थितं तदास्योऽयोगमेव देहीति प्रकरणार्थः ५० ए
तावद्वर्णितागुणा यस्य यतः उपसंहृतकोपः ५१ कामान् पूरयतीति तथा यद्वा पुरुषार्थप्रवाहो मत्त्यर्थः ५२ अप्रीणीत्वः

तत्तेऽर्हत्तम नमः स्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां संसेवया त्वयि विनेति षडंगया किं भक्तिं ज
नः परमहंसगतौ लभेत ५० नारद उवाच एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः प्रह्लादं प्रणतं प्रीतो यतम
न्युरभाषत ५१ श्रीभगवानुवाच प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृ
णां ५२ मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ५३ प्रीणन्ति ह्यथ मां
धीराः सर्वभावेन साधवः श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिं ५४ इति श्रीभागवते महापुराणे
सप्तमस्कंधे प्रह्लादचरित्रे नवमोऽध्यायः ९ नारद उवाच भक्तियोगस्य तत्सर्वमंतरायतयाऽर्भकः ॥
मन्यमानो हृषीकेशं स्मयमान उवाच ह १ प्रह्लाद उवाच मा मां प्रलोभयोत्पत्त्यासक्तं कामेषु तैर्वरैः तत्सं
गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् भवान् संसारबी
जेषु हृदयग्रंथिषु प्रभो ३ नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ३ ७ ८ ९ ॥

अप्रीणयतः तत्तु मत्पूर्णकामत्वेन तोषयितुं ५३ प्रीणंति तोषयंति ५४ एकांतित्वान्निरुपाधिभक्तत्वात् ५५ इति स
प्तमे टीकायां नवमोऽध्यायः दशमे त्वनुग्रहोऽयं भक्तमतां हितेऽहरौ प्रसंगाद्दर्शितो रुद्रेऽकृतोऽनुग्रहस्तदीर्यते १ तत्सर्वं वर
जातं तदंतराय तत्त्वा भावेन वाऽर्भकं मानिषां कामानां संगाद्भीतः २ ननु किमर्थं मद्भक्तं प्रलोभयामि न हि किंतु वरं त्वं
प्रार्थितं च दत्तं स्वाभिप्रायो न्यत्त्वं त्वाह भृत्यलक्षणेति हृदयस्य ग्रंथिवद् बंधकेषु अन्यथा अनर्थसाधनेषु प्रवर्त
नं न घटेत तथा ३

935
1931

कथमेवं भृत्यलक्षणं ज्ञानं स्यात्तत्राह यद्विति नन्वतः ननु कामनया भिसव्यसे कवयोः स्वामिभृत्यभावः प्रसिद्धः सत्यं सोपाधि
कां नानुतात्विकः स्यात् स्वामिन्यात्मन आशिषो अपेक्षमाणो न वै भृत्यः ४ भृत्यहेतुकं आत्मनः स्वाम्यमिच्छन्यो भृत्याय
ददाति स न वै स्वामी आवयोस्तु तात्विका मा विस्त्वाह अहं त्विति अनपाश्रयो निरभिसंधिः ५ अन्यथा कामाभिसंधिं विना
अर्थप्रयोजनं नास्ति ननु तथापि परमादरस्य मम संतोषार्थं किंमपि वृणीष्वेति चेदत आह यदीति ६ कामांकुराणां अस
गाहं अनुत्पत्तिं स वृणे सकाशात् ननु कामोत्पत्तौ सत्यां को दोषस्तत्राह इंद्रियादीनि यस्य जन्मना नश्यंतीति आत्मादेः
७

यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ४ न स्वामी
भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ५ नान्य
थेहावयोरर्थो राजसेवकयोरिव यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ ६ कामानां हृद्यसंरोहं भवत
स्तु वृणे वरं इंद्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ७ ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना
विमुंचति यदा कामान् मानवो मनसि स्थितान् ८ तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते नारदेनोपदिष्टं म
तवमंत्रमिमं स्मरन् ९ ओं नमो भगवते तुभ्यं पुरुषाय महात्मने हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने १०
श्रीभगवानुवाच नैकांतिनो मामयिजात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः अथापि मन्वंतरमेतदत्र
दैत्येश्वराणामनुभुंक्ष्व भोगान् कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं सर्वेषु भूत
ष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् १२

७ कामाभावे गुणमाह विमुंचतीति ८ भगवत्त्वाय त्वत्समानैश्वर्याय तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा यस्य हृदि स्थि
ताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति निर्देशात् ९ कामान्दातुमिच्छंतं प्रत्याख्यायास्य तन्नमस्यति ओं नम इति
१० अथ मत्तो मनोऽभवत्यत्र ब्रह्मसमश्नुत इति निर्देशात् ... मम आशिषोऽनवांछत्यं
सत्यमेकांतभक्तस्त्वं तथापि मदाज्ञाकरणीयेत्याह नेति मदेकांतिनः कदाचिदपि इहामुत्र च मत्त आशिषो न वांछंत्ये
वं तथाप्येतन्मन्वंतरमात्रं भोगाननुभुंक्ष्व ११ ननु तर्हि बंधः स्यादित्यत आह कथा इति द्वाभ्यां सर्वेषु भूतेषु संतमेकं स्वा
ग्नं यज्ञाधिष्ठातारं मामात्मनि आवेश्य त्वं यजस्व तद्धि नेन च कर्मणा बंधः स्यात्तेनेत्याह मय्यर्पणेन कर्म हिन्वन् त्यजन् यजस्व १२

किंचभोगेनसुखानुभवेनआरब्धंपुण्यंहित्वा मुक्तबंधःसन्लोकानुग्रहार्थंकिंतंश्चविस्तार्यमांचप्राप्स्यसि कुशलेन
पुण्याचरणेनपापंहित्वेतिचभोषामात्रं अन्यथातस्यराज्येप्रवृत्तेः नतुतस्यप्राचीनंपापमस्ति तदधिगमउत्तरपूर्वाघ
योरश्लेषविनाशौतद्व्यपदेशादितिन्यायात् तत्कृतदुष्कृतेनविधुनुतइतिश्रुतेश्च नचेदंप्रारब्धंपापाभिप्रायं तस्य
भोगेनवक्ष्यमाणत्वात् कुशलेनहित्वेतिवचनानुपपत्तेः ननुचासाववि ह्यानितिवाच्यं भगवतैवकृतार्थत्वस्यानंतरं वक्ष्यमाणत्वा
त् एतएवयोगेनकर्माहिन्वाल्मितीदमपिलोकसंग्रहार्थंकर्माणिप्रवर्तितस्यस्यान्त्विगमात्रायतेतिसर्वमनवद्यं १३ किं

भोगेनपुण्यंकुशलेनपापंकलेवरंकालजवेनहित्वा कीर्तिविशुद्धांसुरलोकगीतांवितायमामेष्यसि
मुक्तबंधः १३ यएतत्कीर्तयेन्मह्यंत्वयागीतमयंनरः त्वांचमांचस्मरन्कालेकर्मबंधाद्विमुच्यते १४
प्रह्लादउवाच वरंवरयएतत्तेवरदेशान्महेश्वर यदनिंदत्पितामेत्वामविद्वांस्तेजऐश्वरं १५ विद्धाम
र्षाशयःसाक्षात्सर्वलोकगुरुंप्रभुं भ्रातृहेतिमृषादृष्टिस्त्वद्भक्तेमयिचाघवान् १६ तस्मात्पितामेपूयेत
दुरंतादुस्तरादघात् पूतस्तेपांगसंदृष्टस्तदाकृपणवत्सल १७ श्रीभगवानुवाच त्रिसप्तभिःपितापूतः
पितृभिःसहतेनघ यत्साधोस्यगृहेजातोभवान्वैकुलपावनः १८ यत्रयत्रमद्भक्ताःप्रशांताःसमदर्शि
नः साधवःसमुदाचारास्तेपूयंत्यपिकीटकान् १९

च यइति त्वांचमांचइदमाचरितंस्मरेत्एतत्स्तोत्रंयःकीर्तयेत्सोपिकर्मबंधाद्विमुच्यते कुतस्तवबंधशंकेत्यर्थः १४
ईश्वराज्ञयाप्राप्तकर्माधिकारःसन्नपितुर्निष्कृतिंप्रार्थयतेत्रिभिः वरंवरणीयमेतदपरंवृणुतेलतः १५ विद्धाअमर्ष
णक्रोधेनआशयोयस्य १६ तेअपांगेनसंदृष्टःअतःपूतएवतथापिभोकृपणवत्सलकार्पण्यनप्रार्थयइत्यर्थः १७
यद्यपिकश्यपामरीचिब्रह्मादिभिस्तुल्यएवपूर्वजास्तथापित्रिसप्तभिःमहतिप्राकृकल्पगतपितृभिः प्रायेण
सं यद्यस्मात् १८ सम्यगुत्तमआचारोयेषां कीटकानपिदेशान्तचुल्यायंत्राश्वयंतशुद्धाभवंति १९ श्रीराम ३६

937
1981

केथमेवंमन्यलक्षणंझ्युनतुत्वद्भक्तानामयंहिमहिमेतिनचित्रं अहंतुनारशानसयामीतिवनन्नाह सर्वात्मनेतिद्वाभ्यां मद्भा
वेनमद्भक्त्याविगतास्पृहायेषां २० त्वामनुगतायेकेचित्पुरुषास्तेप्यवलक्षणाःसंतोमद्भक्ताभवंति अतोभवान्मभक्तानांस
र्वेषांप्रतिरूपधृक् उपमानास्पदंश्रेष्ठःखल्वित्यर्थः २१ मदंगस्पर्शनेनसर्वतःपूतस्यतेपितुः २२ पापशंकेवनास्तिकेवलं
पुत्रकृत्यानिप्रेतकार्याणिकुरु वदवादिभिरुक्तमनतिक्रम्यमत्परःसन्कर्माणिकुरु २३ २४ २५ २६ ममम

भवंतिपुरुषालोकेम
सर्वात्मनानहिंसंतिभूतग्रामेषुकिंचन उच्चावचेषुदैत्येंद्रमद्भावविगतस्पृहाः २० भवंतिपुरुषालोकेम
द्भक्तास्त्वामनुव्रताः भवान्मेखलुभक्तानांसर्वेषांप्रतिरूपधृक् २१ कुरुत्वंप्रेतकार्याणिपितुःपूतस्यसर्वशः
मदंगस्पर्शनेनांगलोकान्यास्यतिसुप्रजाः २२ पित्र्यंचस्थानमातिष्ठयथोक्तंब्रह्मवादिभिः मय्यावेश्य
मनस्तातकुरुकर्माणिमत्परः २३ नारदउवाच प्रह्लादोपियथाचक्रेपितुर्यत्सांपरायिकं यदाहभगवान
राजन्नभिषिक्तोद्विजोत्तमैः २४ प्रसादसुमुखंदृष्ट्वाब्रह्मानरहरिंहरिं स्तुत्वावाग्भिःपवित्राभिःप्राहदेवा
दिभिर्वृतः २५ देवदेवाखिलाध्यक्षभूतभावनपूर्वज दिष्ट्यातेनिहतःपापोलोकसंतापनोऽसुरः २६
योसौलब्धवरोमत्तोनवध्योममसृष्टिभिः तपोयोगबलोन्नद्धःसमस्तनिगमाहनत् २७ दिष्ट्यास्यतन
यःसाधुर्महाभागवतोर्भकः त्वयाविमोचितोमृत्योर्दिष्ट्यात्वांसमितोधुना २८ एतद्वपुस्तेभगवान्ध्या
यतःप्रयतात्मनः सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः २९ ॥ ॥ ॥

सृष्टिभिर्मयासृष्टैःश्वभूतैः समस्तान्निगमान्धर्मानित्यर्थः अहनहतवान् मत्तयाहतः २७ एततविस्मयासं
मितःसम्यक्प्राप्तः २८ सर्वतःसंत्रासात्गोप्तरक्षकंवपुः २९ श्रीकृष्णायवासुदेवाय श्रीरामाय ॥
॥ ॥ ॥ ॥ ॥

एवंसवरस्त्वयानप्रदेयः क्रूरोनिसर्गःस्वभावोयेषां अमतंस्त्वीरं ३० ३१ ३२ ३३ शिशुपालदंतवक्त्रयोर्द्विषतोः श्री
कृष्णसायुज्यंकथमितियत्पृष्टंतदेवनयोःपूर्वजन्मकथनादिभिरुपपादितमुपसंहरतिएवमितिसप्तभिः दितेःपुत्रत्वंप्रापिता
विप्रशापेनेत्यनन्तरस्यानुषंगः ३५ नारदउवाच ई ३६ तच्चितोश्रीरामंचिंतयंतौ ३७ करूषजादंतवक्त्रः हरेःसायु

मैववरोस्क्रूराणांतेप्रदेयःपद्मसंभव वरःक्रूरनिसर्गाणामहीनाममतंयथा ३० नारदउवाच इत्युक्त्वाभ
गवान्राजन्ततत्रैवांतर्दधेहरिः अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३१ ततःसंपूज्यशिरसाववंदेपरमे
ष्ठिनं भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३२ ततःकाव्यादिभिःसार्धं कमलासनः दैत्यानांदानवानांच
प्रह्लादमकरोत्पतिं ३३ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः स्वधामानियुयूराजन्ब्रह्माद्याःप्रतिपू
जिताः ३४ एवंतौपार्षदौविष्णोःपुत्रतांप्रापितौदितेः हृदिस्थितेनहरिणावैरभावेनतौहतौ ३५ पुनश्चवि
प्रशापेनराक्षसौतौबभूवतुः कुंभकर्णदशग्रीवौहतौतौरामविक्रमैः ३६ शयानौयुधिनिर्भिन्नहृदयौ
रामसायकैः तच्चित्तौजहतुर्देहंयथाप्राक्तनजन्मनि ३७ ताविहाथपुनर्जातौशिशुपालकरूषजौ हरौवै
रानुबंधेनपश्यतस्तेसमीयतुः ३८ एनःपूर्वकृतंयत्तद्राजानःकृष्णवैरिणः जहुस्त्वंतेतदात्मानःकीटःपेश
स्कृतोयथा ३९ यथायथाभगवतोभक्त्यापरमयाभिदा नृपाश्चैद्यादयःसात्म्यंहरेस्तच्चिंतयाययुः ४० आ
ख्यातंसर्वमेतत्तेयन्मांत्वंपरिपृष्टवान् दमघोषसुतादीनांहरेःसात्म्यमपिद्विषां ४१ एषाब्रह्मण्यदेवस्य
कृष्णस्यचमहात्मनः अवतारकथापुण्यावधोयत्रादिदैत्ययोः ४२

ज्यंसमीयतुः ३८ कृष्णनिंदादिनापूर्वकृतंयदेनःपापंतत्तध्यानेनतदात्मनः संतोजहुः भदात्मत्वेदृष्टांतः कीटःपेशस्कृ
तोध्यानेनयथातदात्मासवर्तते ३९ अभिदाभेददर्शनशून्यया ४० हरेःसात्म्यंसारूप्यं ४१ प्रह्लादचरितार्थमुप
संहरतिएषेति चतुर्भिः अवतारःश्रीनृसिंहरूपःश्रीनृसिंहरूपःतस्यकथाआख्यानेतित्रयः ४२ ॐ ॐ

939
1981

प्रह्लादस्यचरितमित्यादेः समाम्नातमितित्रतीयेनान्वयः ४३ अस्यतेनेनोक्तःसर्गस्थित्यप्ययानामीशस्यहरेर्यथा
त्म्यंतत्त्वं अनेनकृतंहरेर्गुणकर्मानुवर्णनंचेत्यर्थः परावरेषां देवदैत्यादीनांयानिस्थानानितेषांव्यत्ययोविपर्यासः ४४
आध्यात्मिकमात्मानात्मविवेकादि ४५ एतच्छ्रवणादिफलमाह यइतिद्वाभ्यां एतच्छ्रुत्वापःकीर्तयेत ४६ एततएना
मृगेंद्रस्यचलीलांतामेवाह दैत्येंद्रमृथयानांवधंयःशुचिःसन्पठेत्पुण्यमनुभावंप्रभावमितिनिश्चयंबालोकंवकुंठं

प्रह्लादस्यानुचरितंमहाभागवतस्यच भक्तिर्ज्ञानंविरक्तिश्चयाथात्म्यंचास्यवैहरेः ४३ सर्गस्थित्यप्य
येशस्यगुणकर्मानुवर्णनं परावरेषांस्थानानांकालेनव्यत्ययोमहान् ४४ धर्मोभागवतानांचभगव
त्येनगम्यते आख्यानेस्मिन्समाम्नातमाध्यात्मिकमशेषतः ४५ एतद्यपुण्यतमाख्यानंविष्णोर्वीर्यो
पबृंहितं कीर्तयेच्छ्रद्धयाश्रुत्वाकर्मपाशैर्विमुच्यते ४६ एतद्यआदिपुरुषस्यमृगेंद्रलीलांदैत्येंद्रयूथ
पवधंप्रयतःपठेत दैत्यात्मजस्यचसतांप्रवरस्यपुण्यंश्रुत्वानुभावमकुतोभयमेतिलोकं ४७ यूयंनृ
लोकेबतभूरिभागालोकंपुनानामुनयोभियंति येषांगृहानावसतीतिसाक्षात्गूढंपरंब्रह्ममनु
ष्यलिंगं ४८ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःखलुमातुलेय
आत्माहणीयोविधिकृद्गुरुश्च ४९

४७ अहोप्रह्लादस्यभाग्यंयेनदेवोदृष्टः वयंतुमंदभाग्याइतिविषदंतंप्रत्याह यूयमितित्रिभिः येषांयुष्माकंगृहा
न्मुनयः अभियंतिसर्वतःसमायांतितत्कस्यहेतोः येषुगृहेपुनराकारंगूढंसंतंश्रीकृष्णाख्यंपरंब्रह्मसाक्षाद्वस
तीति ४८ ननुकृष्णअस्माकंमातुलेयःकथंब्रह्मेत्युच्यतेतत्राह सवाइति सोयंब्रह्मैव कथंभूतः महद्भिर्विमृग्यंय
त्कैवल्यंनिर्वाणसुखंनिरुपाधिःपरमानंदस्तदनुभूतिरूपतः वः युष्माकंतुखलुप्रियःसुहृदित्यादिरूपोभवति वि
धिकृत्आज्ञाकृत् ४९ ॐ

भा॰ स्क॰ ३८

ननुपरब्रह्मचेत्तकथंद्यष्टसहस्रस्त्रीषुरतिः कथंवाधर्माचरणंतस्योत्यतआह नयस्यरूपंनत्वंभवादिभिरपिधिया
स्वबुद्ध्यावस्तुतयाइदमित्थमितिसाक्षान्नोपवर्णितं सयुष्माकंस्वयमेवप्रसन्नः अस्माकंतुमौनादिसाधनैः तत्प्र
सादःप्रार्थनीयएवेत्याहमौनेनेति सएषसात्वतांपतिःनप्रसीदतु नहिभक्षाद्गृहेषुपरब्रह्मवसति नचतद्दर्शनायमुन
यस्तद्गृहानभियंति नचतस्यब्रह्मभातुलेत्यादिरूपेणवर्तते नचस्वयमेवप्रसन्नः अतोयमेवनतोपिअस्मत्ता

नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितं मौनेनभक्त्योपशमेनपूजितः प्रसीदता
मेषससात्वतांपतिः ५० सएषभगवान्राजन्व्यतनोद्विहतंयशः पुरारुद्रस्यदेवस्यमयेनानंतः
मायिना ५१ राजोवाच कस्मिन्कर्मणिदेवस्यमयोऽहन्जगदीशितुः यथाचोपहताकीर्तिःकृष्णेना
नेनकथ्यतां नारदउवाच दैत्यानिर्जिताःयुधिदेवैर्युध्येनेनापबृंहितैः मायिनांपरमाचार्यंमयंशर
णमाययुः ५३ सनिर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छ
दाः ५४ ताभिस्तेसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप स्मरन्तो नाशयांचक्रुः पूर्ववैरमलक्षिताः ५५

पिभ्रूपिभागाइतिभावः ५० ननुअन्येदुष्करंत्रिपुरभेदादिकंश्रीरुद्रःकृतवान् सएवंभगवदीश्वरोप्यस्यतत्वंन
जानातीतिकथमित्यपेक्षायांतस्याप्यनुत्साहाख्यादेवासौप्रभावोनकेवलस्येतिवक्तुमाख्यानमुपक्षिपतिसए
षइति ५१ राजायुधिष्ठिरउवाच जगदीशितुर्देवस्यकीर्तिंकस्मिन्कर्मणिमयोहतवान् ५२ अनेनश्रीकृ
ष्णेनोपबृंहितैःसंवर्द्धितैः ५३ हैमीरौप्यायसीर्विचित्रास्त्रिपुराणिनिर्मायतेभ्यादर्शयिति शेषः दुर्लक्ष्यो अपाय
संयोगोगमनागमनेयासां दुर्वितर्क्याःपरिच्छदायासाम् ५४ असुराणांसेनान्यःसेनापतयःपूर्ववैरंस्मरंतः ५५ ३८

॥ ५६ अस्त्रंअभिमंत्रितं शरंपरंमुख्यमुमंचत ५७ ततः शरतत्सूर्यमंडलान्मयूखसंदोहः रश्मिसमूहाइवयतःयस्य
५८ कूपरसस्वयंनिर्मितंकूपामृतं ५९ वज्रसाराःवज्रवत्दृढांगाः महाजसोमहाबलाःमेघदलनामेघभेदनाः
विद्युदिवावह्नयइव ६० ६१ कालमध्याह्ने ६२ ६३ ६४ आत्मनावाअन्यस्यवाद्ययोगपिवादैवनादिष्टमुपक

अथानुगृह्यभगवान्मामैष्टेतिसुरान्विभुः शरंधनुषिसंधायपुरेष्वस्त्रंव्यमुंचत ५७ ततोग्निवर्णा
इषवउत्पेतुःसूर्यमंडलात् यथामयूखसंदोहानादृश्यंतपुरोयतः ५८ तैःस्पृष्टाव्यसवःसर्वेनिपेतुःस्म
पुरौकसः ताआनीयमहायोगीमयःकूपरसेक्षिपत् ५९ सिद्धामृतरस
स्पृष्टावज्रसारामहौजसः ६० उत्तस्थुर्मेघदलनावैद्युताइववह्नयः ६० विलोक्यभग्नसंकल्पंविमनस्कंवृषध्वजं तदायंभ
गवान्विष्णुस्तत्रोपायमकल्पयत् ६१ वत्सआसीत्तदाब्रह्मास्वयंविष्णुरयंहिगौः प्रविश्यत्रिपुरंकालेरसकूपा
मृतंपपौ ६२ तेसुराअपिपश्यंतोनान्यषेधन्विमोहिताः तद्विज्ञायमहायोगीरसपालानिदंजगौ
६३ स्वयंविशोकःशोकार्तान्स्मरन्दैवगतिंचताम् देवासुरनरान्योवानभ्रंशास्तीहकश्चन ६४ आत्म
नान्यस्यवादिष्टंदैवेनापोहितुंद्वयोः अथासौशक्तिभिःस्वाभिःशंभोःप्राधानिकंव्यधात् ६५ धर्मज्ञा
नविरक्त्यादितपोविद्याक्रियादिभिः रथंसूतंध्वजंवाहान्धनुर्वर्मशरादियत् ६६ सन्नद्धोरथमास्था
यशरंधनुरुपाददे शरंधनुषिसंधायमुहूर्तेभिजितीश्वरः ६७ ददाहतेनदुर्भेद्याहरोथत्रिपुरान्नृप॥
६८ दिविदुंदुभयोनेदुर्विमानशतसंकुलाः ६९

त्स्यितंअपोहितुंपरिहर्तुंइहकश्चिदपीश्वरःसमर्थोनास्ति अतोश्रीकृष्णःप्रधानंसंग्रामस्तत्साधनं ६५ ६६ अभि
जितीमध्याह्ने ६७ विमानशतानि संकुलानियेषांते देवादयः ६८

सुमा 1981

भा॰ स॰

३६

६९ ७० आदितः आरभ्यस्त्ववधार्थनिगमयति एवंविधानीति नृलोकं नराकारमात्मनो विडंबमानस्य अनुकुर्व
तः ७१ इतिसप्तमेटीकायांदशमोध्यायः एकादशेनृणांधर्माः साधारण्येनवर्णिताः विशेषेणात्ववर्णानांमुख्या
मुख्याश्चवाधिताः १ तदेवंदशभिर्ज्ञानभक्तियोगावुदीरितौ अथपंचभिरध्यायैः कर्मयोगोनुवर्ण्यते २ दैत्यपतप्र
ह्रादस्यसाधुनासभासुराभाजितंसत्कृतं इहितंश्रुत्वापुनर्नारदंपप्रच्छ ३ कथंभूतस्यइहितमहत्तमानामग्रण्यःमुख्य

देवर्षिपितृसिद्धाजयेतिकुसुमोत्करैः अवाकिरन्जगुर्हृष्टानन्तुश्चाप्सरोगणाः ६९ एवंदध्यापुरहितस्वो
भगवान्पुरहान्प ब्रह्मादिभिस्तूयमानः स्वधामप्रत्यपद्यत ७० एवंविधान्यस्यहरेः स्वमायया विडंबमा
नस्यन्नलोकमात्मनः वीर्याणिगीतान्यृषिभिर्जगद्गुरोर्लोकंपुनानान्यपरंवदामिकिं ७१ इतिश्रीभागवते
महापुराणेसप्तमस्कंधेदशमोध्यायः १० श्रीशुकउवाच श्रुत्वेहितंसाधुसभासभाजितंमहत्तमाग्र
ण्यउरुक्रमात्मनः युधिष्ठिरोदैत्यपतेर्मुदान्वितः प्रपच्छभूयस्तनयंस्वयंभुवः १ युधिष्ठिरउवाच ॥
भगवन्श्रोतुमिच्छामिनॄणांधर्मंसनातनं वर्णाश्रमाचारयुतंयत्पुमान्विंदतेपरं २ भवान्प्रजाप
तेः साक्षादात्मजः परमेष्ठिनः सुतानांसंमतोब्रह्मन्तपोयोगसमाधिभिः ३ नारायणपराविप्राः
धर्मंगुह्यंपरंविदुः करुणाःसाधवः शांतास्त्वद्विधानतथापरे ४ नारदउवाच नत्वाभगवतेजायलो
कानांधर्मसेतवे वक्ष्येसनातनंधर्मंनारायणमुखाच्छ्रुतं ५ योवतीर्यात्मनोंशेनदाक्षायण्यांतुधर्म
तः लोकानांस्वस्तयेध्यास्तेतपोबदरिकाश्रमे ६

स्य तत्रहेतुः श्रुतेआत्मामानोयस्य १ श्रवणेच्छायांहेतुः यतयतोधर्मात्परंज्ञानंचभक्तिंविंदतेति २ संम
तोमान्यः ३ ननुस्मृतिकारैर्धर्मउक्तएवतत्राह नारायणपराइति ४ अनायश्रीनारायणाय नमस्येवमु
खाच्छ्रुतं ५ तन्मुखादात्मनःश्रवणंसंभावयन्तविशिनष्टियइति ६ श्रीकृष्णगोपाल ६ः ६ः ३९

943
1981

प्रथमंतावद्धर्मेप्रमाणमाह धर्मस्यमूलंप्रमाणंस्मृतंच स्मृतिः तद्विदांवेदविदांयेनचात्मामनः प्रसीदतितुष्यति॥ ७
तथाचयाज्ञवल्क्यः श्रुतिःस्मृतिःसदाचारः स्वस्यचप्रियमात्मनः सम्यक्संकल्पजः कामोधर्ममूलमिदंस्मृतं॥
मनुश्च वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां आचारश्चैवसाधूनां आत्मनस्तुष्टिरेवचेति तत्रतावद्वर्णमात्र
साधारणधर्ममाह सत्यमितिपंचभिः तपएकाद्युपवासादि युक्तायुक्तविवेकः ईक्षा शमोमनसः संयमः दमो
वाह्येंद्रियाणां त्यागोदानं स्वाध्यायोयथावित्तजपः संतोषोदैवाल्लब्धेनालंबुद्धिः समदृशांमहतांसेवा ग्राम्येहो
परमः प्रवृत्तकर्मभ्योनिवृत्तिः विपर्ययेहक्षानिष्फलक्रियाणामीक्षणं मौनंवृथाप्रलापनिवृत्तिः आत्मविमर्शनंदेहा

धर्ममूलंहिभगवान्सर्ववेदमयोहरिः स्मृतंचतद्विदांराजन्येनचात्माप्रसीदति ७ सत्यंदयातपःशौ
चंतितिक्षेक्षाशमोदमः अहिंसाब्रह्मचर्यंचत्यागःस्वाध्यायआर्जवं ८ संतोषःसमदृक्सेवाग्राम्येहो
परमःशनैः नृणांविपर्ययेहेक्षामौनमात्मविमर्शनं ९ अन्नाद्यादेःसंविभागोभूतेभ्यश्चयथार्हतः ते
ष्वात्मदेवताबुद्धिःसुतरांनृषुपांडव १० श्रवणंकीर्तनंध्यानंस्मरणंमहतांगतेः सेवेज्यावनतिर्दास्यंस
ख्यमात्मसमर्पणं ११ नृणामयंपरोधर्मःसर्वेषांसमुदाहृतः त्रिंशल्लक्षणवान्राजन्सर्वात्मायेनतुष्यति
१२ संस्कारायत्राविच्छिन्नाःसद्विजोजगादयं इज्याध्ययनदानानिविहितानिद्विजन्मनां १३ जन्मकर्मवदा
तानांक्रियाश्चाश्रमचोदिताः १२

देहव्यतिरिक्तात्मानुसंधानं ८ ९ आत्मेतिदेवतेतिबुद्धिः १० अस्यश्रीकृष्णश्रवणादयोनव ईज्यार्चनं ११ एवंत्रिं
शल्लक्षणवान् १२ इदानींवर्णधर्मान्वक्तुंद्विजानांलक्षणमाह संस्कारामंत्रवंतोगर्भाधानादयोयत्राविच्छिन्नाः स
द्विजः तर्हिशूद्रस्यसंस्काराविच्छेदसत्त्वेद्विजत्वंस्यात्तत्राह अजोब्रह्मापमर्षंभूतसंस्कारयुक्तंजगादसद्विजःशूद्रस्तु
नमंत्रवत्संस्कारयुक्तंजगाद नचोपनयनवंतं अतोनासौद्विजः तथास्मृतिः विवाहमात्रसंस्कारंशूद्रोपिलभतेस
दा तत्रनिरूमसृजतछंदसातंप्रजापतिरिति श्रुतिश्च गायत्र्याब्राह्मणमसृजतत्रिष्टुभाराजन्यंजगत्यावैश्यनत

विद्वद्दमिति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात् उपनयनस्य तु सर्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः पा ठांतरे वैदिकादयः इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान् धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्म णा च आचरणेन च अवदातानां शुद्धानां दुःकुलानां दुराचाराणां चैनं तानि विहितानीत्यर्थः ब्रह्मचार्याद्याश्रमविहिताः क्रि याश्च शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषाभावात् १३ इयं त्रयोदशश्लोकस्य टीकासमाप्ता ब्राह्मणादीनां तु वर्णानामपि वृत्तिरूपान् धर्मानाह सार्द्धैः सप्तभिः विप्रस्य षट्कर्माणि विहितानीत्यनुषंगः तत्र तु अध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः षण्णां तु कर्मणामस्य त्रीणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहादिति अन्यस्य क्षत्रिय

> विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राच्च करादिभिः १४ वैश्यस्तु वार्ता वृत्तिः स्यान्नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १५ वार्ता विचित्रा शाली नयायावरशिलोंछनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा १६ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः १७

स्य च अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनाध्यापनं चापद्यनुज्ञातानि वक्ष्यति चानंतरमेव ऋते राजन्यमिति श्रूयते चाश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि १४ प्रजापालनेऽधिकृतः क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति आ दिशब्देन दंडशुल्कादि १५ वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः शूद्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विज स्य शुश्रूषा वृत्तिश्च भवेत् १५ विप्रस्य मुख्यामुकल्पभेदेन वृत्त्यंतराण्याह वार्तेति विचित्रा कृष्यादिरूपा शालीनं धार्स्य विनैव प्राप्तमयाचितं यायावरं प्रत्यहं धान्ययाच्या शीलं त्यक्तक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उंछनमापणा दिपतितकणोपादानं शिलोंछनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा १६ वृत्तिषु व्यवस्थामाह जघन्य आपदंती राह जघन्यो नीचः उत्तमामध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् १७ श्रीकृष्णाय नमः ४०

945
1981

चतुर्द्धा पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह ऋतामृताभ्यामिति १८ श्लोकं व्याचष्टे ऋतमिति १९ २० तयोस्त चतुर्द्धा ... वर्णानामभिव्यंजकरूपान् धर्मानाह शम इति चतुर्भिः २१ अच्युतात्मत्वं श्रीवि ष्णुनेहेतुमाह सर्ववेदमय इति ... नमस्कारेण च पंचयज्ञानुष्ठानं तथा च या ज्ञवल्क्यः नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति २४ स्त्रीधर्मानाह स्त्रीणामिति पंचभिः पतिरेव देवो यासां

> ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन १८ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितं मृतं तु नित्ययाच्या स्यात्प्रमृतं कर्षणं स्मृतं १९ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सितं २० सर्ववेदमयो विप्रः सर्वदेवमयो नृपः शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं २१ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं २१ शौर्यं वीर्यं धृतिस्तेजस्त्यागश्चात्मजयः क्षमा ब्रह्मण्यताप्रसादश्च रक्षा च क्षत्रलक्षणं २२ देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणं आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं २३ शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणं २४ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं २५ संमार्जनोपलेपाभ्यां गृहमंडनवर्तनैः स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा २६ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत्पतिं २७ संतुष्टालोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् २८ श्रीरामकृष्ण गः

नां तस्य प्रत्यक्षः शुश्रूषा तदनुकूलता च तस्य यद्व्रतं नियमः तस्य धारणं एतत् चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च २५ किं च संमार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः परिमृष्टाः उद्वर्तनादिना निर्मलीकृताः परिच्छदाः गृहोप करणानि यया २६ २७ किंच संतुष्टा यथालाभेन तावन्मात्रभोगा अलोलुपा दक्षा अनलसा प्रिया सत्या च वाक् य स्याः सर्वत्रापि अप्रमत्ता अवहिता अपतितं महापातकैः शून्यं यथाह याज्ञवल्क्यः अशुद्धं संप्रतीक्ष्या हि महापातकदूषि तइति तत्सगमनीमजेत् २८

श्रीर्हरिमिव हर्यात्मनापत्यासह २९ प्रतिलोमजानुलोमजानांप्रवृत्तिमाह वृत्तिरिति तत्तत्कुलकृताकुलपरंपराप्रा
प्ता परंपराप्राप्तमपि चौर्यादिकं निषेधति अचौराणामपापानामिति तत्रप्रदर्शनार्थंकांश्चित्प्रतिलोमजविशेषाना
ह अंत्यजेति रजकश्चर्मकारनटोबुरुडएवच केवर्तभेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृताः अंतेवसायिनस्तु चांडालपुल्क
समातंगादयः तेषांपरंपराप्राप्तएवव्यवस्थानिर्णज्जनादिर्वृत्तिरित्यर्थः ३० श्रेष्ठादपिपरधर्मान्नीचोपिस्वधर्मएवश्रेयानि
त्याह प्रायइति स्वभावेनसत्वादिप्रकृत्याविहितोधर्मः शर्मकृत्त्सुखहेतुःस्मृतः कैःवेदएवदृक्चक्षुर्येषांतैः भ
गवताचोक्तं श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितादिति ३१ ननुस्वाभाविकस्यकर्मणोबंधहेतुत्वात्कथंसु

यापतिंहरिभावेनभजेच्छ्रीरिवतत्परा हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते २९ वृत्तिःसंकरजाती
नांतत्तत्कुलकृताभवेत् अचौराणामपापानामंत्यजांतेवसायिनां ३० प्रायःस्वभावविहितोनृणां
धर्मोयुगेयुगे वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३१ वृत्त्यास्वभावकृतयावर्तमानःस्वक
र्मकृत् हित्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३२ उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात्
नकल्पतेपुनःसूत्यैउप्तंबीजंचनश्यति ३३ एवंकामाशयंचित्तंकामानामतिसेवया विरज्येत
यथाराजन्नग्निवत्कामबिंदुभिः ३४

खहेतुत्वंतत्राह वृत्त्येति ३२ ननुकाम्यानिकर्माणिकुर्वतस्तत्फलोपभोगपरस्यकथंनैर्गुण्यंस्यात् तदुक्तंप्रह्ला
देन ओपस्थ्यजैह्व्यबहुमन्यमानःकथंविरज्यतदुरंतमोहादिति मतत्रदृष्टांतमाह उप्यमानमितिद्वाभ्यां पुनः
सूत्यैसस्यकृप्रसवाय ३३ कामाआशेरतेवासनारूपेणयस्मिंस्तत्कटवासनाविष्टस्यसहसैवकामत्यागोसंभवादृश
कृनियमेनबहुशः कामान्भुंजानस्यैवनित्यंनैमित्तिकःविशुद्धचेतसः तद्दोषदर्शनेनयथोचितभोगेप्रवृत्तस्यकामा
नेवशनैर्विरागोभवति यथासर्ववीर्यक्षेत्रंशनैर्निर्वीर्यंभवति यथाचप्रज्वलितोग्निर्नघृतबिंदुभिःशाम्यति मह
तातुघृतप्रक्षेपणशाम्यत्येवतद्वत् प्रह्लादकृतनिर्गुणकामारण्यनिद्रास्यपदेशामयदवासनानामधिकारेण तदुक्तंतत्रैव बा
लानदृषितधियोह्यहमाशितोदितिअतः सर्वमनवद्यं ३४ ४१

9417
1981

समादिभिरेवब्राह्मणादिव्यवहारोमुख्यःनजातिमात्रादित्याह यस्येति यत्तद्यदि अन्यत्रवर्णांतरेपिदृश्येततत्तद्वर्णांतरं
तेनैवलक्षणनिमित्तेनैववर्णेनविनिर्दिशेत् नतुजातिनिमित्तेनेत्यर्थः ३५ इतिसप्तमेटीकायामेकादशोध्यायः ११
इदानीमाश्रमधर्माउक्ताःइदानीमाश्रम
द्वादशेवर्ण्यंतेधर्माब्रह्मचारिवनस्थयोः चतुर्णामाश्रमाणांचसाधारण्येनकश्चन वर्णादीनांधर्माउक्ताःइदानीमाश्रमधर्मा
धर्माउच्यंते तत्रास्मिन्द्वादशाध्यायेब्रह्मचारिवनस्थयोरसाधारणाश्चतुर्णांसाधारणाश्चोच्यंते तत्रादौगृहस्थधर्माः चतुर्णामाश्र
तुर्दशोग्रहस्थस्यपंचदशेसर्वधर्मसारसंग्रहः ब्रह्मचारीगुरुकुलेवसन्गुर्वादीनुपासीतेत्युक्तंत्वरणान्वयः १ ब्रह्मगायत्री

यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकं यदन्यत्रापिदृश्येततत्तेनैवविनिर्दिशेत् ३५ इतिश्रीभागवतेमहा
पुराणेसप्तमस्कंधेयुधिष्ठिरनारदसंवादेसदाचारनिर्णयएकादशोध्यायः ११ नारदउवाच ब्रह्मचारीगु
रुकुलेवसन्दांतोगुरोर्हितं आचरन्दासवन्नीचोगुरौसुदृढसौहृदः १ सायंप्रातरुपासीतगुर्वग्न्यर्कसुरो
त्तमान् संध्येउभेचयतवाग्जपन्ब्रह्मसमाहितः २ छंदांस्यधीयीतगुरोराहूतश्चेत्सुयंत्रितः उपक्रमेवसा
नेचचरणौशिरसानमेत् ३ मेखलाजिनवासांसिजटादंडकमंडलून् बिभृयादुपवीतंचदर्भपाणिर्यथोदितं
४ सायंप्रातश्चरेद्भैक्ष्यंगुरवेतन्निवेदयेत् भुंजीतयद्यनुज्ञातोनोचेदुपवसेत्क्वचित् ५ सुशीलोमितभुक्
दक्षःश्रद्दधानोजितेंद्रियः यावदर्थंव्यवहरेत्स्त्रीषुस्त्रीनिर्जितेषुच ६ वर्जयेत्प्रमदागाथामगृहस्थोबृहद्व्रतः
इंद्रियाणिप्रमाथीनिहरंत्यपियतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभिर्युवतिभिःका
रयेन्नात्मनोयुवा ८ नन्वग्निःप्रमदानामघृतकुंभसमःपुमान् सुतामपिरहोजह्यादन्यदायावदर्थकृत् ९

जपन्संध्याद्वयमप्युपासीत उभेसंध्येयतवाक्भवेत् सायंप्रातःसंध्याकालविनिमित्तंमौनंकुर्यादित्यर्थः २
गुरोश्चरणौनमेत् ३ यथोदितंपालाशादिदंडोब्राह्मणस्येत्यादिनियमानतिक्रम्य भैक्षधारणंतुकेशप्रसाधनाभा
वमात्रं ४ ५ यावदर्थंयथोपयोगमेव ६ बृहद्व्रतःब्रह्मचर्यवान् गृहस्थव्यतिरिक्तःसर्वोपिवर्जयेदित्यत्रहेतुः इंद्रियाणिव
लवंतिसंयतस्यापिमनोहरंतीति ७ ८ नकारयेदित्यत्रहेतुः नन्विति रहःएकांतेअन्यदाकेशप्रसाधनादिव्यतिरिक्तावस
रेअनेकांतावसरेवायावदर्थंतदुक्तंकुर्यात् ९ श्रीकृष्णगोपाल ॐः ॐः ॐः ॥

भा० स०
४२

ननुमिथ्यात्वादतिकश्मलतात्वस्वयंत्यक्तप्रायंस्यादित्यत्याहितिकोयमतिनिर्बंधः तत्राह कल्पयित्वेति आत्मनास्वस्वरूपसाक्षा
त्कारेणइदंदेहेंद्रियादिआभासमात्रंकल्पयित्वानिश्चित्ययावदसौजीवईश्वरःस्वतंत्रोनभवेत् तावत्द्वैतंअहंपुमानियंस्त्रीत्या
दिभेदोनविरमेत् ततःकिमतआह ततोहिद्वैतात्तविपर्ययः गुणाध्यासेनभोग्यताबुद्धिः अनेनजायादिवैत्यर्थः १० एतत्तसर्वं
सुशीलइत्याद्युक्तं गृहस्थस्यविशेषमाह गुरुवृत्तिरिति ११ अंजनादिनामामिषांतानांद्वंद्वैक्यं अंजनंशरीरस्य अभ्यंजनंशि
रसःस्त्रियंच अवलेखांच चित्रकर्म स्त्रीणांकुड्यादौलेखनंवातान्निरीक्षणंवा अत्राभ्यंगादिस्वरूपतोनिषिध्यते धूर्वंतुकथं

कल्पयित्वात्मनायावदाभासमिदमीश्वरः द्वैतंतावन्नविरमेत्ततोह्यस्यविपर्ययः १० एतत्सर्वंगृहस्थस्य
समाम्नातंयतेरपि गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषंमधु
स्रक्गंधलेपालंकारांस्त्यजेयुर्येधृतव्रताः १२ उषित्वैवंगुरुकुलेद्विजोधीत्यावबुध्यच त्रयींसांगोपनि
षदंयावदर्थंयथाबलं १३ दत्वावरमनुज्ञातोगुरोःकामंयदीश्वरः गृहंवनंवाप्रविशेत्प्रव्रजेत्तत्रवाव
सेत् १४ अग्नौगुरावात्मनिचसर्वभूतेष्वधोक्षजं भूतैःस्वधामभिःपश्येदप्रविष्टंप्रविष्टवत् १५ एवंवि
धोब्रह्मचारीवानप्रस्थोयतिर्गृही चरन्विदितविज्ञानःपरंब्रह्माधिगच्छति १६ श्रीकृष्णगोपालाय०

विदापदिप्राप्तमपिस्वीकृतंत्तंनिषिद्धमितिभेदः १२ अंगैःशिक्षादिभिरुपनिषद्भिश्चसंहितावेदत्रयीमधीत्यअवबु
ध्यचतदर्थंविचार्य यावदर्थंस्वाधिकारानुसारेण १३ यदीश्वरः शक्तः तर्हिगुरोःकाममपेक्षितं वरंदत्वायथाधिकारं
गृहस्थाद्याश्रमंस्वीकुर्यात् तत्रैववावसेत् नैष्ठिकःस्यादित्यर्थः १४ स्वधामभिःस्वाश्रयभूतैःजीवैःसहतत्तन्नियंत
तया १५ चरन्एवमाचरन् विदितंविज्ञानंविज्ञेयंयेनसः १६ श्रीकृष्णायगोपालायवासुदेवायनाराय०
छ्रीः छ्रीः छ्रीः छ्रीः छ्रीः छ्रीः ४२

९५५
1981

र्ऋषिकालोमहर्लोकं १७ अकृष्टंअकृष्टपच्यं अकालतःपाककालात्पूर्वमेवनिष्पन्नानित्यर्थः अर्कपक्वंफलादिआ
हरेत्अश्नीयात् १८ वन्यैर्नीवारादिभिः कालचोदितान्विहितान् पुराणंपूर्वसंचितं १९ हिमादीनिसहेतेति २०
तथाकेशादीन्मलंनाप्रक्षालनेनधारयन् कमंडल्वादींश्चदधत् २१ कृच्छ्रतःतपःक्लेशाद्यथाबुद्धिर्नश्येत्तथाचरेत्
द्वादशाब्दाद्यनंतरमपिप्रयदिस्वधर्मानुष्ठानेशक्तःतर्हिवनएववसेत् यदितुज्ञानाभ्यासयोग्यस्तर्हिसन्न्यसेदित्यनशनाद्या
यवक्ष्यति २२ तदुभयपक्षगतिस्तस्यतुपक्षत्वेतदाह यदाअकल्पःअसमर्थः आन्वीक्षिक्यांज्ञानाभ्यासे २३ अनशना
दिकरिष्यतःपूर्वकृत्यमाह आत्मनीत्यादिना यावत्समाप्तिः यथार्हतःयथायोग्यं स्वकारणेष्वाकाशादिषुसंघातंदे

वानप्रस्थस्यवक्ष्यामिनियमान्मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ नकृष्टपच्यम
श्नीयादकृष्टंचाप्यकालतः अग्निपक्वमथामंवाअर्कपक्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचो
दितान् लब्धेलब्धेनवेऽन्नाद्येपुराणंतुपरित्यजेत् १९ अग्न्यर्थमेवशरणमुटजंवाद्रिकंदरं श्रयेतहिमवाय्वग्नि
वर्षार्कातपषाट्स्वयं २० केशरोमनखश्मश्रुमलानिजटिलोदधत् कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान् २१
चरेद्वनेद्वादशाब्दानअष्टौवाचतुरोमुनिः द्वावेकंवायथाबुद्धिर्नविपद्येतकृच्छ्रतः २२ यदाऽकल्पःस्वक्रियायांव्या
धिभिर्जरयाथवा आन्वीक्षिक्यांवाविद्यायांकुर्यादनशनादिकं २३ आत्मन्यग्नीन्समारोप्यसन्न्यस्याहंममात्मतां
कारणेषुन्यसेत्सम्यक्संघातंतुयथार्हतः २४ खेखानिवायौनिश्वासांस्तेजस्यूष्माणमा
त्मवान् अप्स्वसृक्श्लेष्मपूयानिक्षितौशेषंयथोद्भवं २५ वाचमग्नौसवक्तव्यामिंद्रेशिल्पंकरावपिपदानिगत्या
वयसिरत्योपस्थंप्रजापतौ २६
हंन्यसेत् प्रविलापयेत् २४ तदेवविभज्यदर्शयति खेआकाशेखानिदेहगतछिद्रा
णि आत्मवान्धीमान् शेषंअस्थिमांसादिकाठिन्यांशं २५ एवंस्थूलशरीरस्याध्यात्मादित्रयस्यलयमाह वाचमित्यादि
ना तत्रयद्यपियथोद्भवंलयस्ययुक्तत्वादध्यात्मादीनांस्वस्वकारणेषुराजसाहंकारादिषुलयोवाच्यः तथापितत्तल्लय
भावनेयमाहितीयात्मप्रतिपत्तिरितियथाकथंचित्तल्लयेभाव्येदेवतानांप्रवर्तकत्वेनप्राधान्यादिंद्रियतद्विषययोस्तत्तद्देवता
सुलयःकथ्यते वक्तव्यसहितांवाचमग्नौन्यसेत् एवंसर्वत्रपदानिपादौवयसिविष्णौ २६ श्रीकृष्णायनमः॥

सनादे ३ नच्छब्देनसह अध्यात्मनिवायोध्रु अध्यात्मविदितिपांत्त्वायाविति ज्ञातव्यं २७ ज्योतिषि आदित्यरसगंधयोस्त्विंद्र
याद्याकर्षत्वेनप्राधान्यविवक्षयादेवतासहितस्येंद्रियस्यविषयलयमाह प्रचेतसासहजिह्वारसनं अश्विरसन्तपारस्थ्राणत्राव्येना
श्विनोरप्युपलक्षणं अश्विभ्यांसहघ्राणंघ्रेयेगंधेरूपलक्षितायित्यर्थः २८ परकेवाब्रह्मणि अध्यात्मना अहंकारेण अध्यात्मता
मितिपाठे कर्मण्यहंकारं चेत्यर्थः कथंभूतरुद्रेयद्यस्मादहंममतापूर्विकाक्रियाभवति तस्मिनसत्वेनचेतनयागुणेः गुणकार्येः

भृत्योपायंविसर्गंचयथास्थानंविनिर्दिशेत दिक्षुश्रोत्रंसनादंनस्पर्शमध्यात्मनित्वचं २७ रूपाणिचक्षु
षाराजन्‌ज्योतिष्यभिनिवेशयेत अप्सुप्रचेतसाजिह्वांघ्रेयैः घ्राणंक्षितौन्यसेत २८ मनोमनोरथैश्चं
द्रेबुद्धिंबोध्यैःकवौपरे कर्माण्यध्यात्मनारुद्रेयदहंममताक्रिया २९ सत्वेनचित्तंक्षेत्रज्ञेगुणैर्वैकारि
कंपरे २९ अप्सुक्षितिमपोज्योतिष्यदोवायौनभस्यमुं कूटस्थेतच्चमहतितदव्यक्तेक्षरेचतत ३० इ
त्यक्षरतयात्मानंचिन्मात्रमवशेषितं ज्ञात्वाद्वयोथविरमेतदग्धयोनिरिवानलः ३१ इतिश्रीभा
गवतेमहापुराणेसप्तमस्कंधेआश्रमलक्षणविधिर्द्वादशोध्यायः १२ श्रीकृष्णगोपाल ॐ

प्रागवशिष्टैर्देवैःसह यद्वासत्वादिभिर्गुणैर्हेतुभूतैः वैकारिकंभोक्तृत्वादिविकारवंतंक्षेत्रज्ञंपरेनिर्विकारेब्रह्मणि
२९ ननुविकारवतःकथंपरेलयःस्यात विकारहेतूनांसर्वोपाधीनांलयद्वारेणत्याह अप्स्विति आदोज्योतिः
तच्चनभःकूटस्थेअहंतत्वेतच्चकूटस्थंमहतिमहतत्वे तदव्यक्तेप्रधानेतच्चाव्यक्तंअक्षरेपरमात्मनि ३० इतिसर्वोपा
धिलयाद्धेतोः अवशेषितंचिन्मात्रमात्मानंक्षेत्रज्ञमक्षरतयाज्ञात्वाअद्वयःसन्‌विरमेत दग्धकाष्ठयथानलः
३१ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांद्वादशोध्यायः १२ ॐ श्रीकृष्णार्पणमस्तु ॐ ४३

951
1981

त्रयोदशेयतेर्धर्मसाधकस्योच्यतेमहान अवधूतेतिहासेनमिक्षावस्थाचवर्ण्यते १ एवंध्यात्वाअकल्पोःनग्नादिकंबु
र्यात आन्विक्षिक्यांकल्पस्त्वेवंध्यात्वापरिव्रजेदितिसंबंधः कियदेतत्याज्यंदेहव्यतिरिक्तंसर्वमित्याह देहमात्रेति तस्यधर्मा
नाह ग्रामैकरात्रेतिनवभिः १ कौपीनंआच्छाद्यतेयावतातावन्मात्रं पुरंकेवलं अन्यादिति वा त्यक्तंप्रेषोच्चारणात्पूर्वमेव २ ३
सदसतःपरेकार्यकारणव्यतिरिक्ते ४ नन्वात्मानंपरंब्रह्मेतिकथंसामानाधिकरण्यनिर्देशः नहिबद्धमुक्तयोरैक्यंसंभ
वति तत्राह सुप्तेति सुषुप्तेर्हितमसावृतमात्मतत्वंजाग्रत्स्वप्नयोस्तुविक्षिप्तंप्रकाशतेसंधौतुभतमोनापिविक्षेपः अत

नारदउवाच कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीं १ बिभृया
द्यद्यसौवासःकौपीनाच्छादनंपरं त्यक्तंनलिंगदंडादेरन्यत्किंचिदनापदि २ एकएवचरेद्भिक्षुरात्मारामोनपा
श्रयः सर्वभूतसुहृच्छांतोनारायणपरायणः ३ पश्येदात्मन्यदोविश्वंपरेसदसतोव्यये सुप्तप्रबोधयोःसं
धावात्मनोगतिमात्मदृक् ४ पश्यन्बंधंचमोक्षंचमायामात्रंनवस्तुतः नाभिनंदेध्रुवंमृत्युमध्रुवंचस्यजी
वितं ५ कालंपरंप्रतीक्षेतभूतानांप्रभवाप्ययं नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविकां ६ वादवादांस्त्यजेत्त
र्कानपक्षंकंचननाश्रयेत नशिष्याननुबध्नीतग्रंथान्नैवाभ्यसेद्बहून ७ नव्याख्यामुपयुंजीतनारंभाना
रभेत्क्वचित ७

सदाआत्मदृक्‌आत्मानंलक्षीकृत्यस्थितःसन्‌आत्मनोगतितत्वंपश्यन्‌अतएवबंधंमोक्षंचमायामात्रंपश्यन्‌आत्मानंब्र
ह्मसर्वत्रपश्येदित्यन्वयः तदुक्तंयोगग्रंथे निद्रादौजागरस्यांतेयोभावउपजायते तंभावंभावयन्नित्यंमुच्यतेनेतरोय
तिरिति ४ अस्यदेहस्यप्रभवअप्ययश्चयस्मात्तंकालं ५ असच्छास्त्रेषुअनात्मपरेषु नोजीविकांनक्षत्रविद्यादिवृत्तिं वा
दवादान्‌जल्पवितंडादिनिष्ठान्‌तर्कान्‌तर्कमाश्रित्यकंचनमपिपक्षंनिर्बंधेननसंश्रयेत ६ नाभुखभीतप्रलोभादि
नाबलान्नपाठयेत आरंभान्‌मठादिव्यापारान्‌ ७ श्रीकृष्णायवासुदेवायहरयेपरमात्मनेनमः ॐ ॐ

परमहंसस्यविशेषमाह नयतेरितिनयतेराजश्रमोधर्मार्थः कथंभूतस्यमहात्मनः तस्यलक्षणंशांतस्येत्यादि प्रायइत्यस्यार्थभा
वः ज्ञानोत्पत्तिपर्यंतंबकुदकादिलिंगमाश्रित्यसत्वशुद्ध्यर्थंयमान्नियमांश्चाचरन्नेवज्ञानोत्पत्तौयेततउत्पन्नेतुज्ञानेननिय
मैःकृत्यमस्ति यमाश्चस्वतएवस्युः अतस्तदालिंगादिभिःप्रयोजनाभावाल्लोकसंग्रहार्थंधारयेद्वात्यजेद्वेति ८ तस्यैवज्ञा
नदीर्घीभावेयोगभ्रंशपरिहारार्थमाह बहिर्व्यक्तंलिंगंयस्य व्यक्तोऽर्थःप्रयोजनमात्मानुसंधानंयस्यसः मनीष्यपिउन्म

नयतेराश्रमःप्रायोधर्महेतुर्महात्मनः शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत् ८ अव्यक्तलिंगोव्य
क्तार्थोमनीष्युन्मत्तबालवत् कविर्मूकवदात्मानंस्वदृष्ट्यादर्शयेन्नृणां ९ अत्राप्युदाहरंतीममितिहासं
पुरातनं प्रह्लादस्यचसंवादंमुनेराजगरस्यच १० तंशयानंधरोपस्थेकावेर्यांसह्यसानुनि रजस्वले
स्तनुदेशैर्निगूढामलतेजसं ११ ददर्शलोकान्विचरन्लोकतत्वविवित्सया वृतोमात्यैःकतिपयैः
प्रह्लादोभगवत्प्रियः १२ कर्मणाकृतिभिर्वाचालिंगैर्वर्णाश्रमादिभिः नविंदंतिजनायंवैसोसाविति
मवेतिच १३ तंनत्वाभ्यर्च्यविधिवत्पादयोःशिरसास्पृशन् विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः १४

नवत्बालवच्चकविरपिमूकवदात्मानंनृणांदृष्ट्यादर्शयेत् नेयथाउन्मत्तादिरूपंमन्येरन्तथावर्तेत स्वदृष्ट्येतिशरी
राद्यानुसंधानाभावेनेत्यर्थः ९ परमहंसधर्ममेवेतिहासेनस्फुटयति अत्रापीतियावदध्यायसमाप्तिः आजगर
व्रतस्यमुनेश्च १० धरापृष्ठेभूपृष्ठे सह्याद्रिसटे रजोभिर्धूसरैस्तनुदेशैर्देहावयवैर्निगूढममलंतेजोयस्यतं ११
१२ कर्मादिभिर्यंजनानविदुः १३ तंपादयोःशिरसास्पृशन्नत्वाअप्राक्षीदित्यन्वरेणान्वयः १४ श्रीलक्ष्म्यैः
छः छः छः छः छः ॥

953
1951

उद्यमसहितइव भोगवानिवपीवानंस्थूलंदेहंधारयसि तत्रहेतुंवदेतितृतीयेनान्वयः उद्यमंविनैवममभोगोस्तीतिचेत्तत्रा
हवित्तंचेति १५ नुइतिनिश्चयेहइतिप्रसिद्धौतवार्थोनास्तीतिप्रसिद्धमेवेत्यर्थः यतोऽर्थादेवयतोहेतोःपीवा क्षमंयो
ग्यंचेत् १६ किंच वित्तार्जनाद्यसमर्थोपि अयंजनः तदर्थमुद्यमंकरोतित्वंतुसमर्थोपिकिमितिनकरोषीत्याह कविर्वि
द्वान्कल्योदक्षः निपुणदृक्चतुरःचित्राःप्रियाः लोकरंजनाःकथायस्य लोकस्यकर्मकुर्वतः सतःशेषेतद्वीक्षिता

प्रह्लादउवाच बिभर्षिकायंपीवानंसोद्यमोभोगवान्यथा वित्तंचैवोद्यमवतांभोगोवित्तवतामिह १५
भोगिनांखलुदेहोयंपीवाभवतिनान्यथा नतेशयानस्यनिरुद्यमस्यब्रह्मन्नुहार्थोयतएवभोगः १६
अभोगिनोयंतवविप्रदेहःपीवायतस्तद्वदनःक्षमंचेत् १६ कविःकल्योनिपुणदृक्चित्रप्रियकथःसमः
लोकस्यकुर्वतःकर्मशेषेतद्वीक्षिनोपिवा १७ नारदउवाच सइत्थंदैत्यपतिनापरिपृष्टोमहामुनिः स्म
यमानस्तमभ्याहतद्वागमृतयंत्रितः १८ ब्राह्मणउवाच वेदेदमसुरश्रेष्ठभवानन्वार्यसंमतः ईहो
परमयोर्नृणांपदान्यध्यात्मचक्षुषा १९ यस्यनारायणोदेवोभगवान्हृद्गतःसदा भक्त्याकेवल
याज्ञानंधुनोतिध्वांतमर्कवत् २० अथापिब्रूमहेप्रश्नांस्तवराजन्यथाश्रुतं संभाषणीयोहिभवाना
त्मनःशुद्धिमिछता २१

पिवा तत्तुसर्वंपश्यन्नपि पाणांतरेनद्वेष्टितत्कर्मनद्वेष्टिनोपिवा नस्तौमीदित्यर्थः १७ तस्यवागेवामृतंतेनयंत्रि
तोवशीकृतःसन् १८ अध्यात्मचक्षुषाअंतर्दृष्ट्याभवान्वेदेव आर्याणांज्ञानिनांसंमतोनन्तुभवान् इदमितिय
दुक्तं तदेवाह नृणामिहोपरमयोःप्रवृत्तिनिवृत्त्योःपदानिस्थानानिफलानीत्यर्थः १९ वेदेत्यत्रहेतुःयस्येति हृदिप्र
विष्टःसन्अज्ञानंविधुनोति अर्कोयथाबाह्यंध्वांतं २० यथाश्रुतमित्येतत्परिहारायोक्तं २१ श्रीमोरयागसे

भा० स०
४५

लोकः कर्मसु प्रवर्तनेत्वं तु निवृत्तः सन् किं शेष इति यदुक्तं तत्राह तृष्णयेति चतुर्भिः भवप्रवाहकारिण्या यथोचितैरपि
तु विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं पूर्वं नानायोनिषु प्रवेशितः २२ तथैवेमं लोकं मनुष्यदेहं यदृच्छ
या प्रापितः कथंभूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनं अधर्मेण तिरश्चां श्वसूकरादियोनेर्द्वारं मिश्राभ्यां ताभ्यां पुनरस्य मनु
ष्यस्य नष्य द्वारं सर्वतो निवृत्त्या अपवर्गस्य द्वारमित्यर्थः २३ अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विप
र्ययं दृष्ट्वा निवृत्तोऽस्मि २४ प्रवृत्त्या कदाचित्सुखं स्यादपि निवृत्त्या तु किं स्यादिति चेत्तत्राह सुखमस्य जीवस्य स्वरूपमे

तृष्णयाभववाहिन्यायोग्यैः कामैरपूरया कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः २२ यदृ
च्छयालोकमिमं प्रापितः कर्मभिर्भ्रमन् स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च २३ अत्रापि दंपती
नां च सुखायान्यापनुत्तये कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययं २४ सुखमस्यात्मनो रूपं स
र्वेहोपरतिस्तनुः मनः संस्पर्शजान् दृष्ट्वा भोगान् स्वप्स्यामि संविशन् २५ इत्येतदात्मनः स्वार्थं संतं वि
स्मृत्य वै पुमान् विचित्रामसति द्वैते घोरामाप्नोति संसृतिं २६ जलं तदुद्भवैश्छन्नं हित्वाज्ञो जलकाम्य
या मृगतृष्णामुपाधावेत् तथान्यत्रार्थदृक् स्वतः २७

व तर्हि किं न प्रकाशते तत्राह सर्वेति तनोतीति तनुः सर्वक्रियानिवृत्त्यैव स्वत एव प्रकाशत इत्यर्थः भोगांश्च मनः सं
स्पर्शजान् मनोरथमात्रजान् आशाश्च तान् दृष्ट्वा स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः तर्हि कदाचित् कथं भुंक्षे तत्राह ॥
संविशन् प्रारब्धान् भोगान् भुंजान इत्यर्थः २५ एवं चेत्कोऽपि संसारं न प्राप्नुयात् तत्राह इत्येतदात्मनः सुखात्मकं
रूपं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं विस्मृत्य असत्यपि द्वैते २६ एतदेव दृष्टान्तेन स्पष्टयति जलमिति तदुद्भवैः ४५
तृणशैवालादिभिः जलकाम्यया जलेच्छया स्वतः आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् २७ श्रीराम ॥

955/1981

एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति देहादिभिरिति पंचभिः ईहतः इच्छतः अनी
शस्यानीश्वरस्य पुनः प्रारब्धाः क्रियाः मोघा विफला एव भवंति २८ क्रियाणां सफलत्वेऽपि फलस्यानुपयोगमाह अध्यात्मिका
दिभिरिति मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः २९ कृच्छ्रेविनैव प्राप्तेऽप्यर्थे दुःखं तदवश्यमित्याह पश्यामीति ३० भयं प्र
पंचयति राजत इति स्वस्मात् स्वत एव कथंचित् त्यागभोगविस्मरणादिनानाशः स्यादिति प्राणवतामर्थवतां च भयं नित्यं ३१

देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः २८ अध्यात्मि
कादिभिर्दुःखैरविमुक्तस्य कर्हिचित् मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किं २९ पश्यामि धनि
नां क्लेशं लुब्धानामजितात्मनां भयादलब्धनिद्राणां सर्वतोऽभिविशंकिनां ३० राजतः श्चौरतः श
त्रोः स्वजनात्पशुपक्षितः अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ३१ शोकमोहभयक्रोधराग
क्लैब्यश्रमादयः यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ३२ मधुकारमहासर्पौ लोकेऽस्मिन्नो गु
रूत्तमौ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयं ३३ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतान् कृ
च्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ३४ अनीहः परितुष्टात्मा यदृच्छोपनतादहं नो चेच्छये बह्वहानि म
हाहिरिव सत्ववान् ३५ क्वचिदल्पं क्वचिद्भूरि भुंजेऽन्नं स्वाद्वस्वादु वा क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ३६

अतोऽनर्थहेतुत्वात्प्राणे चार्थे च स्पृहा न कार्येत्याह शोकेति ३२ नन्वेवमनर्थाननुभवतापि न केचिद्विरज्यंते न त्वयथा त्वा
मेन तुष्यति त्वं तु कथं वैराग्यादिकं प्राप्तोऽसि तत्राह मधुकारेति मधुमक्षिकाजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ३३
३४ मधुकाराच्छिक्षितमाह विराग इति वित्तपतिं हत्वाप्यन्यो वित्तं हरेदित्येवं अजगराच्छिक्षितमाह अनीह इति स
त्त्ववान् धैर्यवान् ३५ पीनत्वे हेतुत्वेन यदृच्छया प्राप्तात् परितोषं प्रपंचयति क्वचिदल्पमिति षड्भिः ३६ श्रीराम ॥

३७ चीरंजीर्णवस्त्रखंडंवसेपरिदधे दिष्टभुक्प्रारब्धभोगी ३८ प्रासादमध्येपर्यंकेतत्रापिकशिपौशय्यायां ३९ चरे
विचरामिकचिद्देहवद्दिगंबरोविचरामि ४० नचमानापमानादिकर्तत्पुममवैषम्यमित्याहनाहमितिमहात्मनिविष्णौ ४१
एवंभूतत्वेनस्थिताद्युपायमाह विकल्पमितिद्वाभ्यां चित्तोभेदयाहकमनोवृत्तौ अर्थरूपोविभ्रमोयस्मिन्वैकारिके अहं
कारे अनुअनंतरमहत्तत्वद्वारेणेत्यर्थः ४२ सत्यमेवंपश्यतीतिसत्यदृक् ४३ मंदहष्ट्यालोकशास्त्राभ्यांव्यपेतंनतुतत्वदृ

श्रद्धयोपहृतंक्वापिकदाचिन्मानवर्जितं भुंजेभुक्त्वाथकस्मिंश्चिद्दिवानक्तंयदृच्छया ३७ क्षौमंदुकूलमाजिनं
चीरंवल्कलमेववा वसेन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहं ३८ क्वचिच्छयेधरोपस्थेतृणपर्णाश्मभस्मसु॥
क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया ३९ क्वचित्स्नातोनुलिप्तांगोसुवासाःस्रग्व्यलंकृतः रथेभाश्वैश्च
रेक्वापिदिग्वासायहवद्विभो ४० नाहंनिंदेनचस्तौमिस्वभावविषमंजनं एतेषांश्रेयआशासेउतैकात्म्यं
महात्मनि ४१ विकल्पंजुहुयाच्चित्तौतांमनस्यर्थविभ्रमे मनोवैकारिकेहुत्वातन्मायायांजुहोत्यनु ४२
आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः ततोनिरीहोविरमेत्स्वानुभूत्यात्मनिस्थितः ४३ स्वात्म
वृत्तंमयेत्थंतेसुगुप्तमपिवर्णितं व्यपेतलोकशास्त्राभ्यांभवान्हिभगवत्परः ४४ नारदउवाच धर्मंपा
रमहंस्यंवैमुनेःश्रुत्वासुरेश्वरः पूजयित्वाततःप्रीतआमन्त्र्यप्रययौगृहं ४५ इतिश्रीभागवतेमहापुराणे
सप्तमस्कंधेयुधिष्ठिरनारदसंवादेयतिधर्मस्त्रयोदशोध्यायः १३ युधिष्ठिरउवाच गृहस्थएतांपदवींवि
धिनायेनचांजसा यायाद्देवऋषेब्रूहिमादृशोगृहमूढधी १ ६ ६ ६

ष्या यतोभवान्भगवत्परः ४४ ४५ इतिभागवतसप्तमटीकायांत्रयोदशोध्यायः १३ चतुर्दशेगृहस्थस्य
परमोधर्मईर्यते देशकालादिभेदेनपुनःश्रेयोविशेषकृत् १ गृहस्थमुमुक्षोरन्तरंगत्वेनप्रथमंवनस्थयतिध
र्मेष्वभिहितेषु नाहंगृहस्थस्यमोक्षोनस्यादितिशंकितचित्तःसन्पृच्छतिगृहस्थइति १ ६ श्रीकृष्णः ४६

951
1980

तस्यमोक्षधर्मेनाह गृहेष्वित्यादियावदध्यायसमाप्तिः साक्षाद्वासुदेवार्पणंयथाभवत्येवंकुर्वन्नुपासीत २ ३ स्वयमेवमु
च्यमानेषु यथाउत्थितःपुमान्स्वप्नदृष्टेषुपुत्रादिषुसंगंविमुंचन्निनइव ४ नन्वेवंभूतस्यदुर्जनैरभिभूयमानस्यकुतोगृहो
चिताःक्रियाःस्युस्तत्राह यावदर्थमिति अनंतरंनासक्तःबहिस्त्वासक्तइवनलोकेजनमध्येनरतांमानुष्यंन्यसेत पुरुष
कारमाविष्कुर्यादित्यर्थः ५ अयहंतुक्वापिनकुर्यादित्याह ज्ञातयइति ६ नन्वेवंसर्वानुमोदनेवित्तक्षयप्रसंगात्कुतोजीव

नारदउवाच साधुपृष्टंमहाभागलोकानामनुगृह्णता तत्वेनतदहंवक्ष्येनैष्कर्म्यंयेनकर्मणां २ गृहेष्ववस्थि
तोराजनक्रियाःकुर्वन्गृहोचिताः वासुदेवार्पणंसाक्षादुपासीतमहामुनीन् १ शृण्वन्भगवतोभीक्ष्णंअ
वतारकथामृतं श्रद्दधानोयथाकालमुपशांतजनावृतः ३ सत्संगाच्छनैःसंगमात्मजायात्मजादिषु॥
विमुंचन्मुच्यमानेषुस्वयंस्वप्नवदुत्थितः ४ यावदर्थमुपासीनोदेहेगेहेचपंडितः विरक्तोरक्तवत्तत्रनलो
केनरतांन्यसेत् ५ ज्ञातयःपितरोपुत्राभ्रातरःसुहृदोपरे यद्वदंतियदिच्छंतिचानुमोदेतनिर्ममः ६ दिव्यंभौ
मंचांतरिक्षंवित्तमुच्यतनिर्मितं तत्सर्वमुपभुंजानएतत्कुर्यात्स्वतोबुधः ७ यावद्भ्रियेतजठरंतावत्स्वत्वं
हिदेहिनां अधिकंयोभिमन्येतसस्तेनोदंडमर्हति ८ मृगोष्ट्रखरमर्काखुसरीसृपखगमक्षिकाः आत्मनः
पुत्रवत्पश्येत्तैरेषामंतरंकियत् ९

भंकुतोवाकर्मकरणंतत्राह दिव्यंवृष्ट्यादिभिर्जातंधान्यादि भौमंनिधानादि आंतरिक्षंअकस्मादेवप्राप्तं एवंस्वतएव
अच्युतनिर्मितंदैवलब्धंयत् ७ एतत्पूर्वोक्तंकर्मादिदैवाङ्कुरिलाभेजातेपितत्राभिमानोनकार्यइत्याह यावदिति॥
भ्रियेतपूर्येत ८ अतएवयंकमपिस्वगृहेक्षेत्रेवाप्रविश्यभुंजानान्नाभिवारयेदित्याह मृगेति मर्कोमर्कटः सरी
सृपःसर्पःमक्षिकाश्चतैःपुत्रैरेषांमृगादीनां ९ ६ ६ ६ ६ ६

अतिकृच्छ्रेणापाद्य नभजेत् किंतु यावदैवप्रापितं तावदेव भजेत १० श्वानश्च आद्याश्वपतिताअंतेवसायिनः श्वाडालादयः ता
नभिव्याप्य यथार्हंकामान्संविभजेत स्वभोग्यान्विभज्य दद्यात् अप्येकैवात्मनोदाराः भार्यातस्यामतिथिशुश्रूषणनियुक्ता
यांस्वस्यात्तिश्रूषाहीयेत यस्यां चनृणांस्वत्वग्रहः ममैवेयमित्याग्रहः तामपि कामपि संविभजेत आतिथ्यादिशुश्रूषणेनियु
नीतेत्यर्थः नत्वन्यथा मंतव्यं यथार्हं संविभजेदित्युक्तत्वात् ११ एवंचेन्नेनश्वरोवशीकृतः स्यादित्याह यदर्थेयन्निमित्तं॥

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि यथादेशं यथाकालं यावदैवोपपादितं १० आश्वाद्यांतेवसायिभ्यः
कामान्संविभजेद्यथा अप्येकामात्मनोदारान्नृणांस्वत्वग्रहो यतः ११ जह्याद्यदर्थे स्वान्प्राणान्हन्यात्
द्वापितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः १२ कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं॥
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः १३ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः शेषे स्वत्वं त्यज
न्प्राज्ञः पदवीं महतामियात् १४ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं स्ववृत्त्यागतवित्तेन यजेत
पुरुषं पृथक् १५ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः वैतानिकेन विधिना अग्निहोत्रादिना यजेत॥
१६ न ह्यग्निमुखतोयं वै भगवान्सर्वयज्ञभुक् ईज्येत हविषा राजन्यथा विप्रमुखे हुतैः १७ श्रीकृष्णः

अन्यैरजितोपीश्वरस्तेनजितएव १२ कथमेवंतस्यांस्वत्वाभिमानोहातुंशक्यस्तत्त्वविचारेणेत्याह कृमिविड्भस्मसुनिष्ठा
पर्यवसानमंतेयस्य तदीयादेहार्थेरतिर्यस्यांसास्वमहिम्नानभोपिच्छादयतीतितथा १३ किंचसिद्धैर्दैवलब्धैः यज्ञावशिष्टार्थैः
पंचयज्ञशेषैरन्नादिभिः महतांनिवृत्तानां १४ एतदेवप्रपंचयन्नाह देवादीन्पंचयज्ञदेवताः आत्मानंच एवंपृथकुअंतर्या
मिणमेवयजेत १५ १६ नपुनरितिनिर्बंधोयज्ञार्थकार्यइत्याह नहीति विप्रमुखेहुतैरन्नादिभिर्यथाइज्यतेनतथा
अग्निमुखतोहविषाइज्यते १७ श्रीकृष्णायवासुदेवायहरयेपरमात्मने प्रणतःक्लेशनाशायगोविंदायनमोनमः

959
1981

ब्राह्मणेषु देवेषु च पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमंतर्यामिणं ब्राह्मणाननुमर्त्यादियजने॥
ब्राह्मणयजनानंतरमन्येषु यजस्व पागंतरे ब्राह्मणा आननं यस्यतं १८ प्रौष्ठपदे भाद्रपदे १९ २० शुक्लपक्षे अक्षततृतीयामि
त्यर्थः हेमंतेशिशिरेच मार्गशीर्षादिमासचतुष्टयेपियास्तिस्रो अष्टकास्तासु २१ संपूर्णचंद्रापौर्णमासीकायान्यूनचंद्रासे
वानुमतिः तथामासर्क्षाणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युस्तदा तदुक्तत्रिकाद्यां पुष्ययुक्ता

तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननं १८ कुर्यादपरपक्षीयं मा
सि प्रौष्ठपदे द्विजः श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् १९ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये
चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च २० तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके चतसृष्वप्यष्टकासु
हेमंते शिशिरे तथा २१ माघे च सितसप्तम्यां मघाराकासमागमे राकया वानुमत्या वा मासर्क्षाणि युता
न्यपि २२ द्वादश्यामनुराधायां श्रवणास्तिस्र उत्तराः तिसृष्वेकादशी वासु जन्मर्क्षश्रवणयोगयुक् २३
त एते श्रेयसः काला नृणां श्रेयोविवर्द्धनाः कुर्यात्सर्वात्मनैतेषु श्रेयोमोघं तदायुषः २४ एषु स्नानं ज
पो होमो व्रतं देवद्विजार्चनं पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं २५ श्रीकृष्णाय गोपालाय ॐ

पौर्णमासीपौषीमासेतु यत्रसा नाम्नासपौषोमासः माघश्चैवमेकादशीपरइति २२ अनुराधाश्रवणाउत्तराफाल्गुनीउ
त्तराषाढाउत्तराभाद्रपदावाद्वादश्यांयदास्यात आसुउत्तरासुएकादशीवायदास्यात तदावजन्मर्क्षश्रवणयोगयुक्।
जन्मनक्षत्रस्यश्रवणस्यवायोगेनयुक्तंदिनं यदा योगग्रहणंसंबंधबाहुल्यार्थं २३ नकेवलंश्राद्धस्यैवैतेकालः किं
तुधर्ममात्रस्येत्याह तएतइतिद्वाभ्यां तदेवआयुषः अमोघंसाफल्यमित्यर्थः २४ २५ श्रीरामोजयति॥
ॐ ॐ ॐ ॐ ॐ ॥

संस्कारकालइति जायायाः पुंसवनादि अपत्यस्यजातकर्मादि आत्मनोयज्ञदीक्षादिप्रेतंसंस्कारदहनादि मृताहश्चसांवत्सरादिकंच
दाअन्यस्मिन्नपिअभ्युदयार्थकर्मणिश्रेयः कुर्यादित्यनुषंगः २६ २७ यत्रयस्मिन्सर्वमेतच्चराचरमास्तितस्यभागवतोबिंबरूपं
सत्पात्रंयत्रलभ्यतेसर्वपुण्यतमोदेशः २८ २९ अर्हेरुच्चमेराश्रितानि ३० ३१ सीतायारामस्यचाश्रमः आदिर्येषां द्वयोः पृथ
कृग्रहणंवियोगकालाभिप्रायेण ३२ आर्चाश्रिताः स्थंडिरप्रतिमाश्रिताः पूर्वंतुशालग्रामशिलाद्यर्चनदेशाउक्ताइत्यपौनरु

संस्कारकालेजायायाअपत्यस्यात्मनस्तथा प्रेतसंस्थामृताहश्चकर्मण्यभ्युदयेनृप २६ अथदेशान्प्रवक्ष्या
मिधर्मादिश्रेयआवहान् सर्वपुण्यनमोदेशःसत्पात्रंयत्रलभ्यते २७ बिंबंभगवतोयत्रसर्वमेतच्चराचरं॥
यत्रहब्राह्मणकुलंतपोविद्यादयान्वितं २८ यत्रयत्रहरेर्वासः सदेशःश्रेयसांपदं यत्रगंगादयोनद्यः पुराणे
षुचविश्रुताः २९ सरांसिपुष्करादीनिक्षेत्राण्यर्हाश्रितान्युत कुरुक्षेत्रंगयशिरः प्रयागः पुलहाश्रमः ३०
नारायणाश्रमोनंदासीतारामाश्रमादयः सर्वेकुलाचलाराजन्महेंद्रमलयादयः ३२ एतेपुण्यतमादे
शाहरेरर्चाश्रिताश्चये एतान्देशान्निषेवेतश्रेयस्कामोह्यभीक्ष्णशः ३३ धर्मोह्यत्रेहितः पुंसांसहस्रा
दिफलोदयः पात्रंतत्रनिरुक्तंवैकविभिः पात्रवित्तमैः ३४ हरिरेवैकउर्वीशयन्मयंवैचराचरं देवर्ष्य
र्हत्सुवैतत्सुतत्रब्रह्मात्मजादिषु ३५ राजन्यदग्रपूजायांमतःपात्रतयाच्युतः ३५ ॐ ॐ

कंयं ३३ अतएतेषुईहितः कृतः सहस्रगुणमधिकस्यफलस्यउदयोयस्मात्सतथा ३४ हरिरेवपात्रंनिरुक्तंनिर्णी
तंतदेवाह देवेषुऋषिषुचअर्हत्सुचतपोयोगादिसिद्धेषुब्रह्मात्मजादिषुसनकादिष्वपि तत्रत्वदीयेराजसूयेय
द्यस्मादच्युतएवपात्रतयासंमतः ३५ श्रीमोरयागोसाविप्रसन्नास्तु ॐ ॐ ॐ ४९

961
1981

संमतत्वेहेतुमाह जीवराशिभिर्व्याप्तोब्रह्मांडकोशएवयस्यांघ्रिपः सर्वजीवानामात्मनश्चतर्पणं ३६ तदेवपुरुषोत्तमनिरु
क्त्याद्रढयति पुराणीति नतिर्यगादिरूपाणिशरीराणितेष्वंतर्यामिरूपेणप्रत्यगंशेनन्वयः शेतेअतः पुरुषइतिप्रसिद्धः
३७ तारतम्येनतिर्यगादिभ्यः पुरुषेयस्मादाधिक्येनवर्ततेतस्मात्पुरुषः पात्रंतत्रापियावानात्मांशस्तांशः यथायथात
पआदियोगेनयत्रयत्रप्रतीयतेतथासोपात्रमित्यर्थः तथाचश्रुतिः पुरुषेत्वेवाविस्तरामात्मेत्यादि ३८ नार्हप्राति

जीवराशिभिराकीर्णआंडकोशांघ्रिपोमहान् तन्मूलत्वादच्युतेज्यासर्वजीवात्मतर्पणं ३६ पुराण्य
नसृष्टानिन्रतिर्यगृषिदेवताः शेतेजीवनरूपेणपुरेषुपुरुषोह्यसौ ३७ तेष्वेवभगवान्राजन्तारतम्ये
नवर्तते तस्मात्पात्रंहिपुरुषोयावानात्मायथेयते ३८ दृष्ट्वातेषामिथोनृणामवज्ञानात्मतांनृप त्रेता
दिषुहरेरर्चाक्रियायैकविभिःकृता ३९ ततोर्चायांहरिंकेचित्संश्रद्धायसमर्थया उपासतउपास्तापिना
र्थदापुरुषद्विषां ४० पुरुषेष्वपिराजेंद्रसुपात्रंब्राह्मणंविदुः तपसाविद्ययातुष्ट्याधत्तेवेदंहरेस्तनुं ४१
नन्वस्यब्राह्मणाराजन्कृष्णस्यजगदात्मनः पुनंतःपादरजसात्रिलोकींदैवतंमहत् ४२ इतिश्री
भागवतेमहापुराणेसप्तमस्कंधेयुधिष्ठिरनारदसंवादेगृहस्थधर्मनिर्णयोनामचतुर्दशोध्यायः १४

मांदोहरेः पूजांकिमितिकुर्वंतितत्राह दृष्ट्वेतिद्वाभ्यां मिथोऽवज्ञानमसन्मानस्तस्मिन्नात्मबुद्धिर्येषांभावंद्रष्टाक्रियायै
पूजार्थैर्हरिमुपासतेउपासितापिपुरुषद्वेषिणामर्थदानभवति पुरुषेषुद्वेषित्वाद्रेतासातीसाधिमंदधिकारिणांपु
रुषार्थप्रदाभवत्येवेत्यर्थः ३९ ४० पुरुषेष्वेवज्ञात्यातपआदिभिश्चपुनर्विशेषांतरमाह पुरुषेष्वपीति योधत्तेत
सुपात्रंविदुः ४१ एतदेवकैमुत्यन्यायेनद्रढयति नन्वस्येति ४२ इतिसप्तमेटिकायांचतुर्दशोध्यायः १४ ततः
पंचदशेसर्ववर्णाश्रमनिबंधनं सारतः संग्रहेणाथवर्ण्यतेमोक्षलक्षणं १ श्रीगोविंद ॐ ॐ ॐ

सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायारंभः तत्र श्राद्धगतान्विशेषानाह कर्मनिष्ठा इति स्वाध्यायादिपरिनि
ष्ठिता इति शेषः १ कव्यानि पितृनुद्दिश्य देयानि दैवे च हव्यानि पितृभ्यो देयानि यथार्हत इति सर्वत्र ज्ञानादितारतम्येन
२ ३ ननु विस्तरः कुतः प्राप्तः येन निषिध्यते तत्राह स्वजनानामर्पणात् जामातादीन्निमंत्र्यते नापि त्र्यादयः कथं वर्ज्या
इत्येवं प्राप्ताद्विस्तरादित्यर्थः मुन्यन्नं आरण्यं व्रीह्यादि हरिदैवतं हरये निवेदितं सत् ५ पुरुषात्मकं ईश्वरस्वरूपं ६

नारद उवाच कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे स्वाध्यायेऽन्ये प्रवचने ये केचित् ज्ञानयोग
योः १ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता दैवे च तदभावे स्यादितरेभ्यो यथार्हतः २ द्वौ
दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरं ३ देशकालोचि
तश्रद्धाद्रव्यपात्रार्हणानि च सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात् ४ देशे काले च संप्रा
प्ते मुन्यन्नं हरिदैवतं श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं ५ देवर्षिपितृभूतेभ्य आत्मने स्वज
नाय च अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकं ६ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् मु
न्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ७ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां न्यासो दंडस्य भू
तेषु मनोवाक्कायजस्य च ८ एके कर्ममयान्यज्ञान्ज्ञानिनो यज्ञवित्तमाः आत्मसंयमनेऽनीहा जुह्व
ति ज्ञानदीपिते ९

७ दंडस्य न्यासः हिंसायास्त्यागो यः एतादृशो अन्यो नास्ति ८ अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंती
त्याह एके अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंयमने जुह्वति मनो नियम्य तदंतरायत्वात्त्यजं
तीत्यर्थः तदुक्तं सर्वज्ञमुनिना प्रत्यक्स्फूर्तिरसत्स्फूर्तिं तनुनिष्ठाविघातकं संलक्ष्य संसजेत्कर्म त्यजन्विघ्नहतोऽन्यथेति ९ ४२

मामायं घातयेदेवं हन्यादिति अकरुणः न कुतः असकृत्प्राणतर्पकः तत्किं अतत्त्वज्ञः आत्मन त्वाभिज्ञः तथा च श्रुतिः ॥
न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति प्रस्तुतमनुवर्णयति
तस्मादिति १० अधर्मवत्साक्षान्निषिधवत् ११ क्रममनादृत्य पूर्वापि व्याचष्टे धर्मबुध्यापि यस्मिन्क्रियमाणे स्वधर्म
बाधः अन्यसंचोदितोऽन्यस्य परधर्मः उपधर्मेति शब्दस्याभिन्नभेदः अन्यथा व्याख्यानं यस्मिन्यथा रश्नावरान्भोजयेद्

द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति एष माऽकरुणो हन्यादतज्ञो ह्यसुतृब्ध्रुवं ९ तस्माद्दैवोप
पन्नेन मुन्यन्नेनापि धर्मवित् संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकक्रियाः १० विधर्मः परधर्मश्च आभास
उपमा छलः अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ११ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः १२ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक्
स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये १३ धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनं अनीहानीहमान
स्य महाहेरिव वृत्तिदा १४ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं कुतस्तत्कामलोभेन धावतोऽर्थेह
या दिशः १५ सदा संतुष्टमनसः सर्वाः शिवमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं १६

त्यक्तेर् दशाश्यो वरानिति शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गांदद्यादिस्कन्देमरिष्यं त्यागोर्दीनं १२
स्वधर्मानुष्ठानानंतरं धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयः अनुपयोगादित्याह स्वभावविहित इति १३ किंच अ
धनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा दैवोपपन्नेनैव तद्धर्मसिद्धेरुक्तत्वात् यात्रार्थमपि नेह
तेत्येतत्सर्पं नयति अनीहेति सार्द्धैः षड्भिः १४ १५ उपानहौ पादयोर्यस्य स उपानत्पात् तस्य १६ श्रीराम ॥
ॐ ॐ ॐ ॐ ॐ

963/1981

गृहपालः श्वातद्वदाचरति १७ १८ क्षुधातृषावज्जनः कामस्यांतंयाति अन्नोदकातिरिक्तकामांतराभावात् क्रोधस्यचां
तंयाति एतस्ययत्फलंहिंसातस्योदयान्निष्पत्तेः दिवोजित्वापिभुवोभुक्त्वापिलोभस्यनैवांतंयातीत्यर्थः १९ २० इदानींका
मादिजयोपायानाह असंकल्पादितिचतुर्भिः जयेदितिपदापेक्षमन्वेति अर्थेऽनर्थदर्शनेन तत्वावमर्शनात् अद्वैतानुसं
धानेन २१ आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्विकानां सेवया योगस्यांतरायान् लोकवार्तादीन् २२ येभ्यो

संतुष्टः केनवाराजन्नवर्तेतापिवारिणा औपस्थ्यजैह्व्यकार्पण्याद्गृहपालयतेजनः १७ असंतुष्टस्यवि
प्रस्यतेजोविद्यातपोयशः स्रवंतींद्रियलौल्येनज्ञानंचैवावकीर्यते १८ कामस्यांतंतुक्षुत्तृषांक्रोधस्यै
तत्फलोदयात् जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः १९ पंडिताबहवोराजन्बहुज्ञाः सं
शयच्छिदः सदसस्पतयोप्येकअसंतोषात्पतंत्यधः २० असंकल्पाज्जयेत्कामंक्रोधंकामविवर्जनात्
अर्थानर्थेक्षयालोभंभयंतत्वाभिमर्शनात् २१ अन्वीक्षिक्याशोकमोहौदंभंमहदुपासया योगांतरा
यान्मौनेनहिंसांकायाद्यनीहया २२ कृपयाभूतजंदुःखंदैवंजह्यात्समाधिना आत्मजंयोगवीर्येण
निद्रांसत्वनिषेवया २३ रजस्तमश्चसत्वेनसत्वंचोपशमेनच एतत्सर्वंगुरौभक्त्यापुरुषोह्यंजसा
जयेत् २४ यस्यसाक्षाद्भगवतिज्ञानदीपप्रदेगुरौ मर्त्यासद्धीःश्रुतंतस्यसर्वंकुंजरशौचवत् २५ छुः

भूतेभ्योभयंजायते तेष्वेवकृपयाहिताचरणेन दैवंदैवोपसर्गनिमित्तंदुःखं यथामनःपीडादि तदुक्तं याज्ञवल्क्येन विमलावि
फलारंभःसंसीदत्यनिमित्ततइति आत्मजंदेहजं योगवीर्येणप्राणायामादिबलेन सत्वनिषेवया सात्विकाहारादिना २३
२४ ननुकथंगुरुभक्त्या सर्वस्यजयः स्यात् तस्यापिमनुष्यत्वेन तदवरुद्धत्वात् तत्राह यस्येति मर्त्यासद्धीः मनुष्यइतिदुर्बु
द्धिः तस्यशास्त्रश्रवणं कुंजरस्नानवद्व्यर्थं २५ ॥ ॥ ॥ ॥ ॥ ५०

965
1981

ननुगुरोःपितपुत्रादयस्तेनरमेवमन्यंते अतआह एषगुरुःसाक्षाद्भगवानेवभवेत् लोकस्यनरांसानितिबुद्धिर्भ्रांतिरित्य
र्थः यद्वानहितपुत्रादेर्मनुष्यबुध्याप्रतीयमानोपिगुरुर्भगवानेवभवेत् यथैवश्रीकृष्णइत्यर्थः २६ एवंसर्वरूपायैः
कामादिवर्गंजित्वानियतेंद्रियोभूत्वाध्यानपरोभवेत् अन्यथानंप्रतिसर्वशास्त्रवैफल्यंस्यादित्याह षड्वर्गेतिसर्वा
अपिनियमचोदनाः इष्टापूर्तादयःधर्माः षडिंद्रियवर्गस्ययःसंयमः तस्मिन्नेकस्मिन्नंतायासांतदेकपराइत्यर्थः॥
नचतावतापिचरितार्थाइत्याह तदंताःसत्योपियदियोगान्धारणाध्यानसमाधीन्नोआवहेयुः नसाधयेयुः॥ त

एषवैभगवान्साक्षात्प्रधानपुरुषेश्वरः योगेश्वरैर्विमृग्यांघ्रिर्लोकोयंमन्यतेनरं २६ षड्वर्गसंयमै
कांताःसर्वानियमचोदनाः तदंतायदिनोयोगानावहेयुःश्रमावहाः २७ यथावार्तादयोह्यर्थाःयो
गस्यार्थंनबिभ्रति अनर्थायभवेयुस्तेपूर्तमिष्टंतथासतः २८ यश्चित्तविजयेयत्तःस्यान्निःसंगोः
परिग्रहः एकोविविक्तशरणोभिक्षुर्भैक्षामिताशनः २९ देशेशुचौसमेराजन्संस्थाप्यासनमात्म
नः स्थिरंसुखंसमंतस्मिन्नासीतर्ज्वंगओमिति ३० प्राणापानौसंनिरुध्यात्पूरकुंभकरेचकैः या
वन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ३१ यतोयतोनिःसरतिमनःकामहतंभ्रमत् ततः सत
उपाहृत्यहृदिरुंध्याच्छनैर्बुधः ३२

तर्हिकेवलंश्रमावहाएवेत्यर्थः २७ एतदेवदृष्टांतेनाह यथावार्तादयःकृष्यादयःअर्थास्तत्फलानिचयोगस्यार्थंमोक्षं
नसाधयंति प्रत्युतअनर्थायसंसारायैव असतोबर्हिर्मुखस्यइष्टापूर्तादापितथा २८ एवंयोगंयुंजतोपियस्यकुटुंबादिसं
गेनचित्तविक्षेपस्तेनतस्यकृत्यमाह यश्चित्तस्यविजयेयत्तउद्युक्तःसभिक्षुःस्यात्संन्यसेत् तथाचस्मृतिः इहामुत्रस्यगा
र्हस्थ्योध्यानभंगादिकारणं लक्षयित्वागृहीस्पष्टंसंन्यसेदविचारयन्निति भिक्षयाप्राप्तंमितमशनंयस्य २९ ऋजुसममंगंय
स्यसःसुखंयथाभवत्येवंआसीत ओमित्यक्षरस्यन्निति शेषः ३० ३१ ३२ श्रीकृष्णायवासुदेवायहरये॥

एवमनिशामभ्यसतस्तस्ययत्तश्चित्तंनिर्वाणंशांतिं ३३ नपुनर्विक्षिप्यतेत्याह कामादिभिरक्षुभितंयच्चित्तंतन्नोत्तिष्ठेत॥
यतःप्रशांताःअखिलावृत्तयोयस्यतत् कुतःब्रह्मसुखेनस्पृष्टं ३४ यस्तुप्रव्रज्यांकृत्वापिभोगलिप्सुःस्यात्तंनिंदति॥
यइति त्रयाणांधर्मादीनांवर्गःआसमंतादुप्यतेयस्मिन्तस्माद्गृहात्धर्मादीन्वांताशीछर्दिभोजीनिर्लज्जःभ्यसः ३५
नचेदमघटितं दृष्टत्वादित्याह येःपूर्वंस्वदेहःअनात्मादिरूपःस्मृतःश्चिंतितः तएवपुनरेनमात्मेतिमत्वाश्लाघयंति

एवमभ्यसतश्चित्तंकालेनाल्पीयसायतेः अनिशांतस्यनिर्वाणंयात्यनिंधनवह्निवत् ३३ कामादि
भिरनाविद्धंप्रशांताखिलवृत्तियत् चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित् ३४ यःप्रव्रज्यगृहा
त्पूर्वंत्रिवर्गावपनात्पुनः यदिसेवेततान्भिक्षुःसवैवांताश्यपत्रपः ३५ येःस्वदेहःस्मृतोनात्मा
मर्त्योविट्कृमिभस्मसात् तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः ३६ गृहस्थस्यक्रियात्या
गोव्रतत्यागोबटोरपि तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता ३७ आश्रमापसदाह्येतेखलु
आश्रमविडंबकाः देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३८ आत्मानंचेद्विजानीयात्परं
ज्ञानधुताशयः किमिच्छन्कस्यवाहेतोःदेहंपुष्णातिलंपटः ३९ श्रीकृष्णायवासुदेवाय

स्तावयंतिहि ३६ यतिमुपलक्षणीकृत्यान्यानपिस्वधर्मत्यागिनोनिंदति गृहस्थस्येतिद्वाभ्यां ३७ ३८ नन्वा
त्मतत्वज्ञस्यभिक्षोरिंद्रियलौल्येपिकोदोषस्तत्राह आत्मानंपरंब्रह्मचेज्जानीयात् ज्ञानेनधुतानिरस्ताआशा
योवासनायस्य ज्ञानिनोलौल्यमेवनसंभवतीत्यर्थः तथाचश्रुतिः आत्मानंचेद्विजानीयात्अयमस्मीतिपू
रुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति ३९ श्रीगोविंद श्रीराम श्रीकृष्ण छः छः ५१

967/1381

अज्ञस्यतुलौल्येनरकपातापत्तेरप्रमत्तेनसदातत्वज्ञानेयतितव्यमितीममर्थंआत्मानंरथिनंविद्धिशरीरंरथमेवचेत्या
दिश्रुत्युक्तरथरूपकद्वारेणाह आहुरितिषड्भिः इंद्रियेशंमनोऽभीशून्रश्मीन्आहुः मात्राःशब्दादीन्वर्त्मानिगंतव्य
देशानाहुः सत्वंचित्तंबृहत्देहव्यापीबंधनकर्तीलीशएवेत्यर्थः ४० प्राणादयःपंचनागःकूर्मश्चकृकरोदेवदत्तोधनंज
यश्चेत्येवंदशविधंप्राणमक्षेअभिमानंसाहंकारंजीवंरथिनंशुद्धंजीवंशरंपरंब्रह्मलक्ष्यंयथाधनुषाशरोलक्ष्येनिया

आहुःशरीरंरथमिंद्रियाणिहयानभीशून्मनइंद्रियेशं वर्त्मानिमात्राधिषणांचसूतंसत्वंबृहद्बं
धुरमीशसृष्टं ४० अक्षंदशप्राणमधर्मधर्मौचक्रेऽभिमानंरथिनंचजीवं धनुर्हितस्यप्रणवःपठंति
शरंतुजीवंपरमेवलक्ष्यं ४१ रागोद्वेषश्चलोभश्चशोकमोहौभयंमदः मानोवमानोऽसूयाचमा
याहिंसाचमत्सरः ४२ रजप्रमादःक्षुन्निद्राशत्रवस्त्वेवमादयः रजस्तमःप्रकृतयःसत्वप्रकृत
यःक्वचित् ४३ यावन्नकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणार्चनयानिशातं ज्ञानासिम
च्युतबलोदधदस्तशत्रुःस्वाराज्यतुष्टमुपशांतइदंचजह्यात् ४४ श्रीकृष्णायवासुदेवाय

त्यतइत्यर्थः ४१ रागादयोजेतव्याःशत्रवः ४२ तत्ररजोभिनिर्विशाः क्वचिदारूढसमाधेःसत्वप्रकृतयोपिपरोप
कारादिप्रवृत्तयःशत्रवः ४३ नकायरूपंरथंआत्मवशउपकल्पइंद्रियादिपरिकरोयस्मिन्तथाभूतंयावद्धत्तेतावत्
देवगरिष्ठानांचरणसेवयानिशातंज्ञानखड्गंबिभ्रत् अच्युताश्रयःसन्निरस्तशत्रुरुपशांतः स्वानंदेनाढ्योभूत्
त्वाइदंरथादिकमुपेक्षेतेत्यर्थः ४४ श्रीकृष्णायवासुदेवायहरयेपरमात्मने प्रणतःक्लेशनाशायगोविंदाय०

अच्युताश्रयाभावेबाधकमाह नोचेदिति असंतोबहिर्मुखायेइंद्रियवाजिनःसूतश्चतेउत्पथंप्रवृत्तिमार्गंनीत्वाविषया
ख्येषुदस्युषुनिक्षिपंति हयःसूतेनचसहवर्त्तमानंनमोंधतमसाव्याप्तेउरुमृत्युभयंयस्मिन् ४५ ननुवेदविहितेस्यापूर्तादिक
रणेपुंसःकथमेवमनर्थप्राप्तिःस्यादित्याशंक्यवेदोक्तकर्मणांद्वैविध्यंदर्शयनफलभेदमाह प्रवृत्तंचेतिदशभिः ४६ हिंस्रंश्ये
नादिकर्मअशांतिदंअत्यासक्तियुक्तंआदिशब्दार्थविवरणंदर्शश्चेति पशुःपशुयागः सुतःसोमयागः ४७ हुतंवैश्वदेवं
प्रहुतंबलिहरणंएतत्सर्वमिष्टमुच्यते एतदेवयदिकाम्यंअशांतिदंचतर्हिप्रवृत्ताख्यमपीत्यर्थः आजीव्यंप्रपादि ४८ प्रवृत्त
नकर्मणाआरोहावरोहाभ्यामावृत्तिप्रकारमाह द्रव्यस्यचरुपुरोडाशादेःसूक्ष्मोविपाकःपरिणामोदेहांतरारंभकःयेनसंप

नोचेत्प्रमत्तमसदिंद्रियवाजिसूतानीत्वोत्पथंविषयदस्युषुनिक्षिपंति तेदस्यवःसहयसूतममुंतमोंधे
संसारकूपउरुमृत्युभयेक्षिपंति ४५ प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकं आवर्त्ततेप्रवर्तेननिवृत्तेना
श्नुतेऽमृतं ४६ हिंस्रंद्रव्यमयंकाम्यमग्निहोत्राद्यशांतिदं दर्शश्चपूर्णमासश्चचातुर्मास्यंपशुःसुतः
४७ एतदिष्टंप्रवृत्ताख्यंहुतंप्रहुतमेवच पूर्तंसुरालयारामकूपाजीव्यादिलक्षणं ४८ द्रव्यसूक्ष्मवि
पाकश्चधूमोरात्रिरपक्षयः अयनंदक्षिणंसोमोदर्शओषधिवीरुधः ४९ श्रीकृष्णगोपालायनमः

धूमिश्चक्तोगच्छति यएवंश्रुतावपक्षयशब्देनोक्तः इतितुपंचम्यामाहुतावापः पुरुषवचसोभवंतीति पाठांतरेद्र
व्यशब्देनतेजोमात्रशब्दोक्तानींद्रियाणि उष्मविपाकशब्देनहृदयाग्रप्रयोगः तथाचश्रुतिः सइमांस्तेजोमात्राःस
मभ्याददानोहृदयमेवान्ववक्रामतीति तथा तस्यहैतस्यहृदयस्याग्रंप्रद्योततेतेनैषआत्मानिष्क्रामतीति धूमादिशब्द
स्तत्तदभिमानिन्योदेवताः तत्रापक्षयःकृष्णपक्षः सोमःसोमलोकः तत्रभुक्तभोगस्यावरोहणप्रकारोदर्शइत्यादि॥
दर्शइतिविपरीतलक्षणयाविशिष्टभोगक्षयश्चोक्ताग्निनादेहलयेनादर्शनमुच्यते एतदुक्तंभवति भूतसूक्ष्मयु
क्तोधूमाद्यातिवाहिकदेवताभिःसोमलोकंप्रापितःसन्ततभोगावसानेविलीनदेहोवृष्टिद्वारेणौषधिवीरुध्यादिसाम्या ५२
पत्तिक्रमेणजायते४९

969
1981

एवंपुनर्भवहेतुःपितृयानंप्रवृत्तकर्ममार्गइति क्ष्मेशहेभूपतेपुनर्भवमेवाह एकैकश्येनप्रत्येकंप्राप्यैणभूत्वानत्वान्निध्यंप्राप्य
इहभूमौजायते ५० तत्राधिकारणमाहनिषेकादीति अन्यस्त्विष्टादिकार्येप्यवंजन्मनलभतइत्यर्थः निवृत्तकर्मनिष्ठस्योपा
सनाविशेषमुपदिशन्नर्चिरादिमार्गेणब्रह्मलोकप्राप्तिमाह इंद्रियेष्वित्यादिना यद्वाद्रव्ययज्ञेषुहिंसायाडुर्वारत्वात्तमुख्यं
निवृत्तंकर्मैवदर्शयन्नाह ज्ञानेनदीप्यंतइतितथा तेषुइंद्रियव्यापाराणामिष्टापूर्तादीनामिंद्रियतावन्मात्रतांभावयन्नीत्यर्थः
एवमुत्तरत्रापि ५१ ऊर्मौदर्शनादिसंकल्परूपेमनसि वैकारिकंविकारयुक्तंमनोवाचिविध्यादिलक्षणायावाचाहिमनः
कर्तृत्वादिविकारंभजति वर्णानांसमाम्नायसमुदायेतद्विशेषत्वाद्वाचःस्वरेआकारादिस्वरत्रयात्मके ५२ ओंकारंबिंदौ

अन्नंरेतइतिक्ष्मेशपितृयानंपुनर्भवः एकैकश्येनानुपूर्वंभूत्वाभूत्वेहजायते ५० निषेकादिश्मशानांतैः
संस्कारैःसंस्कृतोद्विजः इंद्रियेषुक्रियायज्ञान्ज्ञानदीपेषुजुह्वति ५१ इंद्रियाणिमनस्यूर्मौवाचिवैकारि
कंमनः वाचंवर्णसमाम्नायतमोंकारेस्वरेन्यसेत् ५२ ओंकारंबिंदौनादेतंतंतुप्राणेमहत्यमुं अग्निःसू
र्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट् ५३ विश्वतैजससःप्राज्ञसूक्ष्मआत्मासमन्वयात् देवयानमिदं
प्राहुर्भूत्वाभूत्वाऽनुपूर्वशः आत्मयाज्युपशांतात्माह्यात्मनोननिवर्त्तते ५४ श्रीकृष्णायनमः॥

तंचनादेतंप्राणेसूत्रात्मनिमहतिब्रह्मणि अग्निरितितदभिमानिन्योदेवतास्ताःप्राप्नोतीतिपूर्ववत् दिवाअहः प्राह्णःत
स्यैवांतः राकाशुक्लपक्षस्यांतः यद्वा प्राह्णोराकेतिचपुराणांतरमतं उत्तरंअयनंस्वराट्ब्रह्मा ५३ एवंब्रह्मलोकंगतस्यभोगा
वसानेमोक्षप्रकारमाह विश्वइति विश्वःस्थूलोपाधिःसःस्थूलंसूक्ष्मेविलाप्यसूक्ष्मोपाधिस्तैजसोभवति सूक्ष्मंचकारणे
विलाप्यकारणोपाधिःप्राज्ञोभवति कारणंचसर्वत्रसाक्षित्वेनान्वयात्साक्षिस्वरूपेविलाप्यतुर्योभवति तेषांचव्य
भिचारिणांसाक्षाणांलयेशुद्धआत्माभवतिमुच्यतइत्यर्थः यथोत्तरांभूत्वानिवर्त्ततेतथाननिवर्त्ततइत्यर्थः ५४ ६:

वेदेननिर्मितेतेधूममभिसंभवतीत्यादिनाते अर्चिरभिसंभवतीत्यादिनाचनिश्चयेनाविविच्यज्ञापितेइत्यर्थः जनस्तो
पिदेहस्तोपिनमुह्यति ५९ तत्रहेतुमाह आतावित्ति जनानांदेहादीनांआदौकारणत्वेनअंतेचावधित्वेनयत्सत्ततथा
बाह्यभोग्यंअंतर्भोक्तृपरमवरंचउच्चनीचं नमोअकाशः ज्योतिःप्रकाशः तच्चसर्वंअयंज्ञानीस्वयमेवनतस्माद्व्यतिरिक्तं
वस्तुकिंचिदस्तियेनमुह्येदित्यर्थः ५६ ननुतर्हिकथंपृथगर्थस्तस्यादिप्रतीयतेतत्राह आबाधितःतर्कविरोधेनसर्वतो
बाधितोपिआभासःप्रतिबिंबादिर्वस्तुतयायथास्मृतः तद्वदैंद्रियकंसर्वंअर्थत्वेनविकल्पितंनतुपरमार्थत्वतः दुर्घ
टत्वात् ५७ तदेवाह क्षित्यादीनांपंचभूतानांछायाऐक्यबुध्यालंबनरूपंदेहादिसंघातारंभपरिमाणानामध्येकत

यएतेपितृदेवानामयनेवेदनिर्मिते शास्त्रेणचक्षुषावेदजनस्तोपिनमुह्यति ५५ आदावंतेज
नानांसद्बहिरंतःपरावरं ज्ञानंज्ञेयंवचोवाक्यंतमोज्योतिस्त्वयंस्वयं ५६ आबाधितोपिह्या
भासोयथावस्तुतयास्मृतः दुर्घटत्वादैंद्रियकंतद्वदर्थविकल्पितं ५७ क्षित्यादीनामिहार्थी
नांछायानकतमाअपि नसंघातोविकारोपिनपृथक्नान्वितोमृषा ५८ श्रीरामार्पणमस्तु

माअपिअन्यतमापिनभवति नतावत्तेषांसंघातः वृक्षाणामिववनं एकदेशाकर्षणेसर्वाकर्षणानुपपत्तेः॥
नह्येकस्मिन्वृक्षेआकृष्टेसर्ववनमाकृष्यते नचविकारःआरब्धोऽवयवीअपिशाब्दान्नपरिणामोपि कुतः॥
सकिंस्वावयवेभ्योवापरिणतेभ्योवापृथक्तदन्वितोवा नतावदत्यंतंपृथक्तथाअप्रतीतेः नचान्वितः सकिं
प्रत्यवमन्वेतिअंशेनवा आद्येअंगुलिमात्रेपिदेहबुद्धिःस्यात् द्वितीयेतस्याप्यंशांगीकारेसत्यनवस्थास्या
त् अतोमृषैवेत्यर्थः ५८ श्रीकृष्णायवासुदेवायश्रीरामायनारायणगोपालायकृष्णायनमः॥ ५३

1971
1971

एवंदेहादेर्मिथ्यात्वमुक्त्वातद्धेतूनांक्षित्यादीनामपिमिथ्यात्वमाह धास्यंतीतिधातवोमहाभूतानितन्मात्रैः सूक्ष्मैरवयवैर्वि
नानस्युः अवयवित्वात्तेषामपि तर्हिअवयवःसत्यइतिचेत्तत्राह उक्तप्रकारेणअवयविन्यसतिअवयवोऽप्यंततोऽसन्नेव
स्यात् अवयविप्रतीत्यन्यथानुपपत्तिंविनातत्सद्भावेप्रमाणाभावादित्यर्थः तदुक्तंपंचमस्कंधे एवनिरुक्तंक्षितिशब्दवृ
त्तमित्यादि ५९ नन्ववयविनोऽभावेआगमापायिषुबाल्यादिषुसोयंदेवदत्तइतिप्रत्यभिज्ञानंनस्यात् तदुक्तंभेदः आवि
र्भावतिरोभावधर्मकेष्वनपायियत्ततद्भ्रमइतितत्राह स्यादिति वस्तुनःपरमात्मनोविकल्पेभेदेअसतियद्वा वस्तुनोऽविद्यया

धातवोऽवयवित्वाच्चतन्मात्रावयवैर्विना नस्युर्ह्यसत्यवयविन्यसन्नप्यवयवोंऽततः ५९ स्यात्सादृ
श्यभ्रमस्तावद्विकल्पेसतिवस्तुनः जाग्रत्स्वापौयथास्वप्नेतथाविधिनिषेधता ६० भावाद्वैतंक्रि
याद्वैतंद्रव्याद्वैतंतथात्मनः वर्तयन्स्वानुभूत्येहत्रीन्स्वप्नान्धुनुतेमुनिः ६१ कार्यकारणवस्त्वै
क्यमर्शनंपटतंतुवत् अवस्तुत्वाद्विकल्पस्यभावाद्वैतंतदुच्यते ६२ श्रीकृष्णायगोपालाय०

विकल्पेसतिपूर्वापूर्वारोपसादृश्यात्सएवेतिभ्रमःस्यात्सचतावदेवयावदविद्यानिवृत्तिः ननुसर्वमिथ्यात्वेशा
स्त्रस्यविधिनिषेधताकथंतत्राह स्वप्नमध्येजाग्रत्स्वापावपिव्यवस्थायथेति ६० इदानीमुक्तमेवाद्वैतंभावनात्रयोपदे
शेनदृढीकरोति भावाद्वैतमितिचतुर्भिःवर्तयन्आलोचयन्स्वानुभूत्याआत्मतत्वानुभवेनत्रीन्जाग्रदादीन्
त्रयआवसथाःत्रयःस्वप्नाइतिश्रुतेः यद्वा वस्तुभेदबुद्धिरेकःस्वप्नः ततस्तत्तदधिकारिभेदेनकर्मभेदबुद्धिर्द्वि
तीयः ततोमत्कर्मसाधिकृतादेतत्फलंममेवभोग्यमितितृतीयः तान्धुनुतेनिवर्तयति ६१ कार्यकारणयो
र्वस्त्वैक्यमर्शनंआलोचनं ६२ छ: छ: छ: छ:

भा० टी०
५४

मनोवाकूतनुभिः कृतानांकर्मणांसमर्पणं तैःसमर्पणमितिवा उद्देश्यफलभेदोहिक्रियाभेदेहेतुः ईश्वरार्पणेचतदभावात्
क्रियाणामद्वैतं ६३ आत्मनःस्वस्यजायादीनांस्वार्थश्चकामश्चतयोः देहादीनांपंचभूतात्मकत्वेनभोक्तुश्चपरमात्मत्वेना
भदालोचनेनार्थकामयोर्यदैक्यदर्शनंतदित्यर्थः ६४ उक्तानाश्रमधर्मान्संक्षिप्याहयदिति यत्तद्रव्यंयेनापायेनयतःसका
शात् ६५ प्रस्तुतमुपसंहरति एतैरिति अस्यश्रीकृष्णस्यगतिं तद्भक्तिभाक्तद्भक्तः ६६ एतच्चसर्वसाधारणमुक्तं भक्त

यद्ब्रह्मणिपरेसाक्षात्सर्वकर्मसमर्पणं मनोवाकूतनुभिःपार्थक्रियाद्वैतंतदुच्यते ६३ आत्मजाया
सुतादीनामन्येषांसर्वदेहिनां यत्स्वार्थकामयोरैक्यंद्रव्याद्वैतंतदुच्यते ६४ यद्यस्यवानिषिद्धंस्या
द्येनयत्रयतोन्टप सतेनेहेतकार्याणिनरोनान्यैरनापदि ६५ एतैरन्यैश्चवेदोक्तैर्वर्तमानस्वकर्मभिः
गृहेप्यस्यगतिंयायात्राजंस्तद्भक्तिभाङ्नरः ६६ यथाहियूयंन्टपदेवदुस्त्यजादापद्गणादुत्तरता
त्मनःप्रभोः यत्पादपंकेरुहसेवयाभवानहार्षीन्निर्जितदिग्गजःक्रतून् ६७ अहंपुराभवंकश्चि
द्गंधर्वउपबर्हणः नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः ६८ श्रीकृष्णायवासुदेवाय ॐ

स्यतुभक्तिरेवसर्वपुरुषार्थहेतुरितिपांडवानेवलक्ष्मीकृत्याह यथाहीति हेन्टपदेवान्यैर्देवैश्चसहायैर्दुस्त्यजादि
तिवा आत्मनःश्रीकृष्णादेवप्रभोर्हेतोः अडाभावआर्षः उत्कर्षेणोत्तरतेत्यर्थः यथाययावत् तमेवभजतेतिशेषः॥
यद्वा यथाआपद्गणादुत्तीर्णस्त्वंतथाचक्रतूनहार्षीत् तथाश्रीकृष्णादेवनारकात्संसारादप्युत्तरतेत्यर्थः ६७ श्रीकृष्ण
सेवामहत्वामवज्ञयाभ्रश्यतितत्कृपयाचसिद्ध्यतीति दर्शयन्स्वपूर्ववृत्तांतमाह अहमितिसार्द्धैःपंचभिः नाम्नाउपबर्हणः
६८ श्रीकृष्णः ॐ ॐ ॐ ॐ ॐ ॐ ५४

973/1981

पेशलंसौकुमार्यं रूपादिभिःप्रियंदर्शनंयस्य ६९ ७० तदाज्ञानंविद्वान् उन्मत्तःसन् गायन्नेवगतः ७१ ७२

रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः स्त्रीणांप्रियतमोनित्यंमत्तःस्वपुरलंपटः ६९ एकदादेवस
त्रेषुगंधर्वाप्सरसांगणाः उपहूताविश्वसृग्भिःहरिगाथोपगायने ७० अहंचागायंस्तद्विद्वान्स्त्री
भिःपरिवृतोगतः ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ७१ याहित्वंशूद्रतामाशुनष्टश्रीः
कृतहेलनः तावद्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनां ७२ शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रतां
धर्मस्तेगृहमेधीयोवर्णितःपापनाशनः ७३ गृहस्थोयेनपदवीमंजसान्यासिनामियात् ७३
यूयंन्टलोकेबतभूरिभागालोकंपुनानामुनयोऽभियंति येषांगृहानावसतीतिसाक्षाद्गूढंपरं
ब्रह्ममनुष्यलिंगं ७४ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वः
खलुमातुलेयः आत्मार्हणीयोविधिकृद्गुरुश्च ७५ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तु
तयोपवर्णितं मौनेनभक्त्योपशमेनपूजितः प्रसीदतामेषससात्वतांपतिः ७६ श्रीशुकउवाच
इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभ पूजयामाससुप्रीतःकृष्णंचप्रेमविह्वलः ७७ कृष्णपार्थौ
वुपामंत्र्यपूजितःप्रययौमुनिः श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः ७८ इतिदाक्षायणीनां
तेपृथग्वंशाःप्रकीर्तिताः देवासुरमनुष्याद्यालोकायत्रचराचराः ७९ इति॰भा॰स॰प्रथि॰सनं॰१५

७३ त्वंतुहस्तार्थएवेतिहर्षेणपुनःपूर्वश्लोकानेवपठति यूयमितित्रिभिःस्पष्टं ७४ ७५ ७६ ७७ ७८ ७९ इति॰भा॰ श्रीकृष्णः

476
1951

इतिश्रीभागवतेमहापुराणेसप्तमस्कंधसमाप्त